CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

8.2

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

काश शास्त्री

धर्म के प्रमुख
हर्षिशतानन्दमुनि
द के प्रारम्भ में
वतीर्ण हुए थे।
र्षद्रष्टा महर्षि थे
नारायण धर्म के
थे। आपने कई
ों की रचना की
ग्रन्थ आकार में
क अपना विशेष
स ग्रन्थ में पाँच
अक्षरमूर्ति संत-
हित सर्वावतारी
रायण के जीवन-
ं एवं दार्शनिक
प्रश्नोत्तर के रूप
गीरा संस्कृत भाषा
ा है। इस महा-
श्रीस्वामिनारायण
रहस्य प्राप्त किया
इस ग्रन्थका ज्ञान
के समान आलोक
इच्छित फलको

र मंदिरके चित्रमें
आगे छोटा गुंमट
ी) है। उस स्थान
सर्वावतारी भगवान

......
......
......
टानेकी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० २३३

संस्थान
८४८

२८.११.६०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीहरिवाक्यसुधासिन्धुः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणो विजयतेतराम्

श्रीयोगानन्दमुनिग्रन्थमालायाः तृतीयं पुष्पम्

महर्षिशतानन्दमुनिविरचितः

श्रीहरिवाक्यसुधासिन्धुः

प्रस्तावनां प्रतन्वानः

पण्डितश्रीकृष्णवल्लभाचार्य-स्वामिनारायणः, काव्यकुशलः,

श्रीमद्दार्शनिकपञ्चानन-षड्दर्शनाचार्य-नव्यन्यायाचार्य-सांख्य-योग-वेदान्त-मीमांसातीर्थः, श्रीस्वामिनारायण-सम्प्रदायसकलतत्त्वहार्दाभिज्ञश्च

प्रकाशकः, सम्पादकः, संशोधकश्च हरिप्रकाशशास्त्री

वेदशास्त्री, वेदान्ततीर्थः, सांख्य-योग-पुराण-इतिहास-शास्त्राचार्यः

२०२५ मकरसंक्रान्तिः १९६९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रकाशकः—हरिप्रकाशशास्त्री
स्वामिनारायण मंदिर, मछोदरी
वाराणसी (उत्तर प्रदेश)

सर्वाधिकाराः प्रकाशकाधीनाः

मूल्यम् रु० १५

मुद्रकः—नरेन्द्रकुमार प्राणलाल आचार्य
आचार्य मुद्रणालय, कर्णघण्टा, वाराणसी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समर्पणम्

मुक्तानन्दश्च सद्वर्यो गोपालानन्दयोगिराट्,
नित्यानन्दश्च शास्त्रज्ञो ब्रह्मानन्दस्तथा कविः ॥
पञ्चस्वेतेषु मुख्येषु शुकानन्दमुखेषु च
शास्त्रिहरिप्रकाशेन ग्रन्थोऽयमर्प्यते मुदा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्पादकीयम्

अखिलब्रह्माण्डानि भगवत्स्वरूपेऽणुवद्धासन्ते । यस्य च महिमानं शेषशारदगणेशादयोऽपि पारं गन्तुं न शक्नुवन्ति । यस्माच्च जगदुत्पद्यते, यस्तु रक्षति, यस्मिन्नेव लीयते । तादृशानन्तकल्याणगुणगणसमलंकृत-समग्रैश्वर्यमहोदधेः सर्वावतारिणो भगवतः स्वामिनारायणस्यापरिमितकृपा-कटाक्षेणाकिञ्चनोऽल्पज्ञश्चाहं श्रीहरिमुखचन्द्रस्रवितवाक्यामृतसिन्धुस्वरूपानु-पमवेदरूपाऽद्वितीयग्रन्थरत्नं सम्पादयितुम् , प्रकाशयितुञ्च समर्थोऽभवम् ।

ब्रह्मस्वरूपप्रसन्नात्मनां स्थितप्रज्ञानां सद्गुरुवर्याणां परमभगवदीय-पुराणिस्वामिश्रीहरिप्रियदास-शास्त्रिमुरलीधरदास-,वेदद्वर्यशास्त्रिस्वामिश्रीश्वेत-वैकुण्ठदासमहोदयानां शुभाशीर्वादान्प्राप्य, तथा च ब्रह्मनिष्ठविद्वद्वर्य-धुरंधराणां प्रकाण्डपण्डितप्रवराणामनेकोपाधिभूषणभूषितानां पण्डितश्रीकृष्ण-वल्लभाचार्याणां शास्त्रिस्वामिश्रीगोपालचरणदासमहाभागानाञ्च सम्मति-मार्गदर्शने चोपलभ्यास्य ग्रन्थरत्नस्य प्रकाशनप्रवृत्तिर्मे सञ्जाताऽतोऽस्य ग्रन्थस्य प्रकाशनयशोभागिन एते महोदया एव ।

अपरञ्चास्य हरिवाक्यसुधासिन्धोः सम्पादनकार्यें, प्रारूप (प्रूफ) संशोधने च मम मित्रवर्यस्य वेदान्ताचार्य–एम० ए० इत्याद्युपाधि-विभूषणविभूषितस्याचार्योपाह्वस्य श्रीभाईशङ्करात्मजप्राणलालस्याविस्मरणीयं साहाय्यं प्राप्तं तेनैवोपकृतोऽहमिति शम् ।

मकरसंक्रान्तिः २०२५

हरिप्रकाशशास्त्री

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



उत्तमराजस्य भवनम्, दुर्गपुरम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भगवज्जन्मादिसंक्षेपः

उत्तरप्रदेशीयगोन्डाजीलान्तर्गतछुप्पयाख्यपुरे श्रीधर्मदेवभुवने अष्टादशशताधिकत्रिंशत्तमे विक्रमाब्दे १८३७ मधुमासशुक्लपक्षीयनवमीतिथौ दशघटिकाव्यतीतरात्र्यां श्रीभक्तिदेव्याः श्रीहरिकृष्णभगवान् प्रादुर्बभूव ।

एकादशवर्षाधिकमासत्रयमेकाहश्चैतावत्कालपर्यन्तं स्वपित्रोः श्रीधर्मदेवभक्तिदेव्योः दिव्यमानुष्यबाललीलयाऽऽनन्दयन्सन् तयोः समीपं न्यवसत् । अष्टादशशताधिकैकोनपञ्चाशत्तमे संवत्सरे (१८४९) आषाढमासस्य शुक्लपक्षीयदशमीतिथौ श्रीहरिः वनं गतवान् । अथच येषु येषु तीर्थादिषु विचरणं कृतं तानि तानि तीर्थानि स्नानादिना पवित्राणि कुर्वन्सन्नसंख्यजीवानामात्यन्तिकमोक्षं विधाय सप्तवर्षाधिकैकमासेन सहैकादशाहःपर्यन्तं तीर्थेषु विचरणं कृतं श्रीहरिणा, तदनन्तरमष्टादशशताधिकषट्पञ्चाशत्तमे संवत्सरे (१८५६) ज्येष्ठमासीयकृष्णपक्षस्य षष्ठयां तिथौ सोरठदेशाऽन्तर्गतलोजाख्यपुरे मुक्तानन्दमुनेः समागमोऽभूत् । अष्टादशशताधिकषट्पञ्चाशत्तमे संवत्सरे (१८५६) ज्येष्ठमासीयद्वादशीतिथौ श्रीपीपलाणाग्रामे नरसिंहमहेताख्यब्राह्मणगृहे श्रीरामानन्दस्वामिना सह श्रीहरेः सम्मेलनं सञ्जातम् ।

अष्टादशशताधिकसप्तपञ्चाशत्तमे संवत्सरे [१८५७] कार्त्तिकमासस्य शुक्लपक्षीयैकादशीतिथौ श्रीपीपलाणाग्रामे गुरोः श्रीरामानन्दस्वामिनः महादीक्षा गृहीता भगवता श्रीहरिणा ।

अष्टादशशताधिकाष्टपञ्चाशत्तमे [१८५८] संवत्सरे कार्तिकमासीयशुक्लैकादश्यां श्रीजेतपुराख्यपुरे उन्नडाख्यराजगृहे श्रीरामानन्दस्वामिना स्वधर्मधुरा श्रीनारायणमुनयेऽर्पिता ।

अष्टादशशताधिकाष्टपञ्चाशत्तमे [१८५८] संवत्सरे मार्गशीर्षशुक्लपक्षस्य त्रयोदश्यां तिथौ पुरेणीग्रामे श्रीरामानन्दस्वामी स्वदेहं त्यक्त्वा बदरिकाश्रममगमत् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदनन्तरं श्रीस्वामिनारायणो भगवान् स्वदिव्यैश्वर्यं दर्शयित्वाऽसंख्यजीवानामात्यन्तिककल्याणं कुर्वन्सन्नष्टाविंशतिवर्षाधिकपञ्चमासेन सह सप्तविंशत्यहानि सत्संगे विचरणं कृत्वाऽधर्माणामसुराणाञ्च विनाशं कृत्वा परमैकांतिकधर्मसंस्थापनं चक्रे ।

श्रीदुर्गपुरेऽष्टादशशताधिकषडशीतितमे (१८८६) संवत्सरे ज्येष्ठमासीयशुक्लपक्षदशम्यां तिथौ स स्वामिनारायणः स्वेच्छयाऽन्तर्धानं भूत्वा सर्वोपरिस्वाक्षरधाम जगाम ।

एकादशसंवत्सराधिकमासत्रयमेकाहश्चैतावत्कालपर्यन्तं श्रीहरिकृष्णभगवान् सरवार्गदेशाऽन्तर्गतछुप्पयापुरे श्रीभक्तिधर्मभुवने न्यवसत् ।

सप्तवर्षाधिकैकमासेन सहैकादशाहानि श्रीहरिः वनं विचचार ।

दशमासाधिकषडहानि लोजपुरे श्रीमुक्तानन्दस्वामिना सह निवासं चक्रे ।

एकसंवत्सराधिकपञ्चमासेन सह षड्विंशत्यहानि सोरठदेशे श्रीरामानन्दस्वामिना सह न्यवसत् । अष्टाविंशत्यधिकपञ्चमासेन सह सप्तविंशत्यहानि स्वाश्रितानां सुखं ददत्सन् कल्याणकृच्चरित्राणि कुर्वन्सन् श्रीहरिः सत्सङ्गे व्यराजत । एकोनपञ्चाशदधिकद्विमासेन सहैकाहः (४९ वर्षाणि २ मासौ १ अहः) भूमण्डलेऽस्मिन् न्यवसत् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिसंख्या

श्रीहरिकृतदिव्यमहोपदेशसंग्रहकर्त्री महामुक्तपरिषद्

(१) स्वामी श्रीमुक्तानन्दः (२) स्वामी श्रीगोपालानन्दः

(३) स्वामी श्रीनित्यानन्दः (४) स्वामी श्रीब्रह्मानन्दः

(५) स्वामी श्रीशुकानन्दः

दुर्गपत्तनीयप्रथमप्रकरणस्य	अष्टसप्ततिस्तरङ्गाः	७८
सारंगपुरस्य	अष्टादशस्तरङ्गाः	१८
कार्यायनग्रामस्य	द्वादशस्तरङ्गाः	१२
लोहग्रामस्य	अष्टादशस्तरङ्गाः	१८
पञ्चालाग्रामस्य	सप्ततरङ्गाः	७
दुर्गपत्तनीयमध्यप्रकरणस्य	सप्तषष्टिस्तरङ्गाः	६७
वृत्तालयस्य	विंशतिस्तरङ्गाः	२०
श्रीनगरस्य	त्रयस्तरङ्गाः	३
दुर्गपत्तनीयान्त्यप्रकरणस्य	एकोनचत्वारिंशत्तरङ्गाः	३९

द्विशताधिकद्विषष्टिः

२६२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वाक्यपरिसंख्या

दुर्गपत्तनस्य प्रथमप्रकरणस्य	एकशताधिकपञ्चसप्ततिः प्रश्नाः	१७५
सारंगपत्तनस्य तरङ्गेषु	पञ्चचत्वारिंशत् प्रश्नाः	४५
कार्यायनस्य तरङ्गेषु	षट्त्रिंशत् प्रश्नाः	३६
लोहग्रामस्य तरङ्गेषु	चतुर्नवतिः प्रश्नाः	९४
पञ्चालग्रामस्य तरङ्गेषु	दश प्रश्नाः	१०
दुर्गपत्तनस्य मध्यप्रकरणस्य तरङ्गेषु	एकशताधिकषोडश प्रश्नाः	११६
वृत्तालयस्य तरङ्गेषु	त्रयस्त्रिंशत्प्रश्नाः	३३
श्रीनगरस्य तरङ्गेषु	अष्टौ प्रश्नाः	८
दुर्गपत्तनस्यान्त्यप्रकरणस्य तरङ्गेषु	एकशताधिकचत्वारः प्रश्नाः	१०४

सर्वेषां समूहीकृत्य षड्शताधिकैकविंशतिः प्रश्नाः

६२१

सुधासिन्धुतरङ्गेषु कृपावाक्यानि,	एकशताधिकपञ्चषष्टिः	१६५
श्रीभगवतः प्रश्नाः	एकशताधिकत्रिचत्वारिंशत्	१४३
श्रीमुक्तानन्दस्वामिनः प्रश्नाः	द्विनवतिः	९२
श्रीगोपालानन्दस्वामिनः प्रश्नाः	एकादश	११
श्रीनित्यानन्दस्वामिनः प्रश्नाः	पञ्चविंशतिः	२५
श्रीशुकानन्दस्वामिनः प्रश्नाः	एकविंशतिः	२१
श्रीब्रह्मानन्दस्वामिनः प्रश्नाः	षोडशः	१६
अन्येषां सतां प्रश्नाः	शतम्	१००
अयोध्याप्रसादमहाराजस्य प्रश्नौ	द्वौ	२
रघुवीरप्रसादमहाराजस्य प्रश्नौ	द्वौ	२
हरिभक्तानां प्रश्नाः	चतुश्चत्वारिंशत्	४४

सर्वेषां समूहीकृत्य षड्शताधिकैकविंशतिः

६२१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषय-सूची

सन्तसमागमानां त्रयस्त्रिंशत् तरंगाः (३३)

८, २९, ३०, ४४, ५४, ५८, ५९, ६७, ६८, ७०, ८५, ८७, ९६, ११४, १४०, १६२, १७०, १७९, १८७, १९२, १९६, २०३, २०४, २०५, २११, २१५, २१९, २२५, २३७, २४७, २४९, २५२, २५८,

भगवति वृत्तिरक्षणीयाः चतुर्दशतरंगाः (१४)

१, ३, २१, २२, २३, २४, २५, ३२, ३८, ४९, १६९, १८१, १८२, २४०,

भगवतो ध्यानस्य नवतरंगाः (९)

५, १५, १०८, २०८, २०९, २१६, २२१, २४६, २५४,

भगवति प्रीतेः षट्तरंगाः (६)

२६, ५७, ८०, ८१, १०७, १८९,

भगवन्माहात्म्यस्य पञ्चदशतरंगाः (१५)

१७, ६३, ७९, ९५, १०४ १०५, १२५, १२७, १३७, १७५, १९७, २००, २२५, २२८, २६०,

भगवन्निश्चयस्यैकोनविंशतितरंगाः (१९)

९, ३३, ५१, ६२, ७२, ९१, ९७, १११, ११५, १२०, १२६, १३०, १३३, १४३, १४७, १५४, २०१, २१०, २१२,

सार्वदेशिकज्ञानस्य द्विसप्ततितरंगाः (७२)

७, १०, १३, १४, १७, १९, ४१, ४३, ४६, ४७, ४८, ५०, ५५, ६४, ६५, ६६, ६९, ७१, ७३, ७४, ७५, ७७, ७८, ८४, ९२, ९४, १००, १०१, ११०, ११२, ११३, ११६, ११७, ११९, १२१, १३२, १३६, १४४, १४५, १४८, १५०, १५३, १५६, १६६, १६७, १६८, १७१, १८५, १८६, १९१, १९३, १९४, १९५, १९८, १९९, २०६, २१३, २१४, २१७, २१८, २२०, २२४, २२६, २२७, २२९, २३१, २३६, २३८, २४८, २५०, २५६, २६२,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्मज्ञानस्य पञ्चदशतरंगाः (१५)

२०, ६१, ८२, ९३, १२३, १३५, १६३, १६५, १७६, १७८, १८३, १८८, १९०, २२२, २४४,

पक्षस्य द्वौ तरंगौ (२)

१३८, २३०,

भगवदुपासनायाः नवतरंगाः (९)

४०, ५६, १२२, १४२, १४६, १६४, २३९, २५९, २६१,

पञ्चविषयखण्डनस्य षट्तरंगाः (६)

१८, १०६, ११८, १३४, १८०, २५१,

वासनाया अष्टौ तरंगाः (८)

११, ६०, ८३, ८९, १५८, २२३, २४१, २४२,

मानेर्ष्ययोः सप्ततरंगाः (७)

४, ७६, ८६, १०२, १३१, १७४, २३५,

वृद्धिह्रासयोः सप्तदशतरंगाः (१७)

६, १६, २८, ३१, ३५, ५३, ९८, १०९, १२४, १५९, १६०, १६१, १७३, १७७, २०७, २३४, २४५,

सांख्य-योगस्य चत्वारस्तरंगाः (४)

५२, १२८, १२९, १५७,

वेदान्तस्य अष्टौ (८)

३९, ४२, ४५, १३९, १५१, १५२, २०२, २३३,

सम्बन्धिषु स्नेहोऽरक्षणीयविषयकत्रयस्तरंगाः (३)

३६, ३७, २४२,

प्रतिलोम्नः षट्तरंगाः (६)

८८, ९०, १४१, १५५, २३२,

नियमाज्ञयोश्च पञ्चतरंगाः (५)

३४, ९९, १४९, १८४, २५७,

वैराग्यस्य चत्वारस्तरंगाः (४)

२, १२, १०३, २५३,

सर्वेषां समूहीकृत्य द्विशताधिकद्विषष्टिस्तरंगाः

२६२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रस्तावना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणो विजयतेतराम्

श्रीसुधासिन्धुसारसन्दोहनम्

परब्रह्मब्रह्माऽक्षरवसतिमुक्तेशप्रकृतिप्रतन्वाविर्भावाऽऽत्मरचितसमष्टीतिविषयाः ।
प्रवर्ण्यन्ते मोक्षप्रदकरणयावत्सुविधयः सुधासिन्धुग्रन्थो जयति हरिवाग्दर्शनतनूः ॥१॥

श्रीपरब्रह्मपुरुषोत्तमाऽक्षरातीतपरमात्मश्रीस्वामिनारायणभगवद्वदनारविन्दसमुद्भूतोऽपवर्गफलकः, समस्तसाधनसंकलनसमुपबृंहितः, संसारसमर्चितवस्तुनविमर्षितदर्शितदर्शननिखिलप्रदर्शनपराणां विश्वविदुषां विश्वसृट्समर्पितवैदुष्याणाम् अपरिणतमतिप्रतिभानां सच्चिदानन्दाऽऽत्मज्ञप्तिवैशद्योद्यानविचरणरसिकानां सिद्धान्तितसंसिद्धिस्वरूपाऽऽपन्नतत्त्वानाम् आवेदकोऽयं सुधासिन्धुप्रबन्धः, परब्रह्मव्यष्टिसमष्टिस्वरूपप्रतिपादनपूर्वकपरमसाध्याऽपेक्षिताऽसाधारणविविधसाधनसमुपदेशभरः, सत्पात्रज्ञानविज्ञानसद्मात्रविविधपारिषदसंकलितसभाऽऽन्तरसंभवितजिज्ञासुजनसमुद्भावितयावज्जिज्ञासितततत्त्वार्थविलसितपारमार्थिकप्रकृष्टप्रश्नोत्तरपीयूषं जुषमाणानां प्राग्भवीयसमूषरतानिरासकोऽभिनवसम्पल्लवताप्रसञ्जकः, शाश्वतिकतृप्तिनिभतृप्तिप्रदानकरः, सर्वेषामेतत्परिशीलनपराणामत्यादरणीयतम इति सार्वभौमसम्राडिव यावद्विधब्रह्मात्मविद्यासंभृतो भृशतमं विजयते ।

प्रकृष्टप्रबन्धोऽयं विक्रमादित्यस्याऽष्टादशशताधिकषट्सप्ततितमसंवत्सरत आरभ्याऽष्टादशशताधिकषडशीतिसम्वत्सरपर्यन्तं समयमधिकृत्य तन्मध्यकालिकभगवत्तत्तदाश्रितभक्तजनप्रश्नोत्तरात्मकः |सुस्वरूपमाससाद, गुर्जरभाषात्मक'वचनामृत'नामकमेनं प्रबन्धं विद्वद्धुरन्धरः श्रीस्वामिनारायणभवच्चरणाश्रयकृतनिवासः समाधिसिद्धिसम्पन्नो हिमालयादिप्रदेशेष्वपि व्योममार्गेण विचरन्नन्तर्धानविद्यामूर्तिः सर्वविद्यासु सर्वज्ञकल्पः श्रीशतानन्दमुनिः सन्निर्दिष्टसमये एव संस्कृतभाषायां काव्यात्मकं सुधासिन्धुनामानं द्विषष्ट्यधिकद्विशततरङ्गात्मकं जग्रन्थ ।

दार्शनिकाऽगणिताऽमानुषीमतिजनितकार्यकारणभावादिसंसिद्धतर्कश्रुतिस्मृतिसूत्रादिप्रसाधिततत्त्वावगाहिशेमुषीसम्पन्ना विद्वद्धुरन्धराऽव्ययपदभाजस्तदानीन्तना एव श्रीस्वामिनारायणभगवच्छिष्या ब्रह्मात्मविद्यादिपारङ्गताः श्रीशुकानन्दमुनि-श्रीब्रह्मानन्दमुनि-श्रीनित्यानन्दमुनि-श्रीगोपालानन्दमुनि-श्रीमुक्तानन्दमुनिनामानः पञ्च सद्गुरवो नैष्ठिकव्रतिनः सुधासिन्धुप्रबन्धं प्रायशोऽष्टसाहस्राऽधिश्लोकात्मकं सर्वथा यावद्विषयप्रामाणिकमपि भगवदाज्ञयाऽऽलोचनपूर्वकमतिप्रामाणिकत्वे स्वस्वहस्ताक्षरप्रदर्शितप्रशस्तिकं व्यधुः ।

श्रीस्वामिनारायणभगवन्मतेऽस्मिन्नेव निबन्धे विरलतया निर्दिष्टानां पदार्थानामाधिक्येऽपि मुख्यतरवद्दृष्ट्या श्रीमुखेन परब्रह्मब्रह्ममायेश्वरजीवात्मकानि पञ्च तत्त्वान्यभिहितानि सप्तमतरङ्गे ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीपरब्रह्मपुरुषोत्तमोऽक्षरातीतपूर्णपुरुषोत्तमनारायणोऽनादिश्रीकृष्णनारायणः श्रीस्वामिनारायणपरमात्मैव भगवान् सदा सच्चिदानन्दस्वरूपः किशोरमूर्तिः आनन्दघनमूर्तिः, आनन्दमात्रकरपादमुखोदरादिर्नित्यदिव्यसाकारः सर्वशरीरी सर्वनियन्ता सर्वान्तर्यामी निगमागमसूत्रसंहिताशास्त्रपुराणेतिहासोपनिषद्भाष्यादिप्रतिपादितः सगुणोऽसंख्यनित्यनिरतिशयदिव्यगुणैश्वर्यसामर्थ्यशक्तिचमत्कारसार्वज्ञ्यसत्यसंकल्पादिमान् ब्रह्मधामैकनिलयो द्विभुजमूर्तिः स्वसमानाऽनेकसच्चिदानन्दमूर्तिकाऽसङ्ख्यमुक्तमण्डलपरिमण्डलितसुसेवितध्यातः सर्वावतारस्वरूपः सर्वकर्मफलप्रदाता स्वतन्त्रो निजब्रह्ममहोले विराजत औपनिषदः परमपुरुषः स्वयमानन्दघनतत्त्वात्मस्वरूपाकृतिरेवेति ।

श्रीब्रह्मतत्त्वं श्रीपुरुषोत्तमपरब्रह्ममूर्तितेजःस्वरूपं परमाऽक्षरधामनामकं द्वेधा स्वयं व्यवस्थितं सुमूर्तम् अमूर्तं चेति । तत्र मूर्तं परमात्मसमाकारं द्विभुजं साकारं सगुणं श्रीपुरुषोत्तमसेवकं सर्वदिव्यगुणैश्वर्यादिमद् दिव्यपुरुषाकारं श्रीपुरुषोत्तमस्य व्याप्यं शरीरात्मकं प्रकाशघनस्वरूपमूर्तिकं विराजते श्रीपुरुषोत्तमचरणारविन्दसेवासमनुलग्नम् , यच्च–अमूर्तम् एतदक्षरधामसंज्ञकं सर्वत्र व्यापकं तेजोरूपं सर्वोपनिषत्प्रतिपाद्यब्रह्मलोकस्वरूपं मुक्तिस्थानमनन्तकोट्यनाद्यादिमुक्तानां सारूप्यमुक्तिमाप्तानां निवासस्वरूपं श्रीपुरुषोत्तममूर्तिप्रकाशस्वरूपं 'त्रिपादस्याऽमृतं दिवि' 'यत्र पूर्वे साध्याः सन्ति देवाः' इति निर्दिष्टं भगवदितरतत्त्वान्वयि सर्वप्रकाशकरं 'यस्य भासा सर्वमिदं विभाती'ति वर्णितं यस्य 'पादोऽस्य विश्वाभूतानी'ति तुर्यांशे मायिक्यः सृष्टयो विलसन्ति, यत्राऽन्याऽन्यपुराणाद्युक्तधामान्यपि सुदिव्यान्यभिमतानि तज्ज्ञानामिति ।

मायातत्त्वं त्रिगुणसाम्यावस्थात्मकं सात्त्विकराजसतामसभावमूलकविषमसृष्टिकारणं मूलप्रकृत्यात्मकं नित्यं जडं महत्तत्त्वादिस्वरूपस्थूलचतुर्विंशतितत्त्वजनकं परब्रह्मब्रह्मशरीरस्वरूपं जीवेश्वरगर्भकव्यष्टिसमष्टिसमुपादानद्रव्यात्मकं साकारस्वरूपं सृष्ट्युपकरणभूतं सुखदुःखमोहसंभृतं विविधविचित्राऽऽश्चर्यकरं प्रकाशप्रवृत्तिनियमनशीलमज्ञानाऽविद्याऽन्धतमश्श[illegible]याद्यभिधानकं सूक्ष्मस्थूलजडकारणकार्यात्मकं विततं तमोघनस्वरूपं संवर्तते, प्र[illegible]ये चैतत्पुरुषे लीयते ।

ईश्वरतत्त्वम् ऐश्वर्यघनात्मकं स्वच्छसत्त्वावरितमसङ्ख्येयेश्वरसृष्टिस्वरूपदिव्यसच्चिदानन्दैश्वर्यमूर्तिकं पृथगेवाभिप्रेतं चेतनतत्त्वं मायाधिष्ठात्रीश्वरेशप्रधानपुरुषमहाविष्णुभूमपुरुषवैराजपुरुषतत्त्वाभिमानीशाद्यात्मकं विद्यते, ईश्वराणां साम्राज्यान्यावैराजपुरुषेभ्यः प्रकृतिपुरुषपर्यन्तानि सृष्टिसञ्चालकाऽऽधिदैवतस्वरूपाण्यभिमतानि विततानि विद्योतन्ते, त इम ऐश्वर्यघना ईश्वरा मायाधीनशरीराः परब्रह्मब्रह्मशरीरस्वरूपा अपीति ।

जीवात्मतत्त्वं सच्चिदानन्दात्मकं ज्ञानघनस्वरूपं ज्ञानप्रभायुक्तज्ञातृस्वरूपात्मकं कर्मफलभोक्तृ नित्यं सगुणं सूक्ष्माऽणुस्वरूपम् अन्तःस्थाऽन्तर्यामिस्वरूपानुस्वरूपगर्भगतसुमूर्त्याकारं भौतिकशरीरादिस्थं सूक्ष्माण्वाकारं सुप्रकाशं ज्ञानकृतीच्छासुखदुःखवासना-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भावनाद्यनेकगुणाऽगारं द्रव्यात्मकं तत्त्वं कर्मानुस्वभावकं देवर्षिपितृतिर्यगादिजातीयभेद-भिन्नव्यवहारं विद्यते, जीवात्मानोऽनन्ता ज्ञानघनस्वरूपिणः परब्रह्मब्रह्मशरीरस्वरूपा इति ।

तान्येतानि श्रीस्वामिनारायणभगवतः सम्मतद्रव्यात्मकस्वरूपसत्साकारसमाकार-तत्त्वानि, मुक्तानामाधारावासतयाऽक्षरब्रह्मधामतत्त्वं सर्वथा सर्वसम्मतं तत्त्वं सर्वविधवस्तु-स्वरूपकमपि दिव्यस्वरूपसत्सम्पद्यते, भगवतो ब्रह्मणश्चाऽऽभूषावेषाऽऽयुधाऽङ्कपरिकराद्याः सर्वे मुक्तात्मनश्चेतनाः सुमूर्तय एव विद्यन्ते परमात्मानं सेवन्ते चेति तदर्थं तत्राऽचेतन-विभूतिभूम्यनावश्यकतेति सिद्धयति । मुक्ताश्च ब्रह्मतत्त्वविभागात्मानो ब्रह्ममुक्ता इति । अवता-रास्त्ववतारी स्वयं तद्गुणास्तदैश्वर्याणि तच्चिह्नानि तदायुधानि तद्वेषादयस्तद्ब्रह्म तन्मुक्ता-स्तदीश्वरा अपि कलांशाऽऽवेशपूर्णपरिपूर्णस्वरूपप्रभृतयोऽवतरन्ति, इति यथासम्भवं तत्समा-वेशः । ईश्वरा ज्ञानघनजीवात्मविसजातीया ऐश्वर्यघना इति भिन्नाल्पात्मकाः । माया तमोघना छाया । जीवा ज्ञानघनाः । इति पञ्चतत्त्वानि सम्मतानि ।

अथ मुक्तिः श्रीस्वामिनारायणभगवतो दिव्याकारस्य तत्समदिव्यस्वरूपसन्मूर्त्यात्मक-किशोरस्वरूपसारूप्यापन्नैर्नियामकत्वाऽतिरिक्तभगवत्त्वसमापन्नैः सेवकस्वरूपैः स्नेहसेवाऽऽ-नन्दभोगित्वात्मिका, परमेश्वरोपासनाप्रयोज्यप्रसन्नतापात्रीभूतानां मुक्त्यभियातानां सच्चिदा-नंदचेतनानां चैतन्यप्रभाप्रभावितानां स्नेहाकर्षणेनोपास्यकिशोरमूर्तिप्रविष्टानां द्रागेव सलिल-हिमपिण्डवत्प्रसरज्ज्ञानप्रभामूर्तिकात्मचैतन्याऽऽविर्भूतकिशोरसारूप्यसम्पन्नानां भगवत्सन्मु-क्तानां नित्यसाकारत्वम् 'अस्माल्लोकात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यते' इति प्रोक्तात्मस्वरूपसम्पन्नानां 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति सम्प्रवर्णि-ताऽशेषपरब्रह्मानन्दभोगिब्रह्मसहचाराणां भगवत्सर्वानन्दभोगवन्महासुखाऽशनवत्त्वं चेति । मुक्तिङ्गतानाञ्चेतनात्मनां जीवात्मनां ज्ञानघनानां प्रकाशवत्ता विशिष्यते, ऐश्वर्यघनानामीश्व-राणामपि प्रकाशवत्ता विशिष्यते येन ब्रह्मता संघटते ।

मुक्तिसाधनानि चत्वार्यभिहितानि धर्मज्ञानवैराग्यभक्त्यात्मकानि तत्र तत्र सप्रसङ्ग-तरङ्गेषु, धर्मो भागवतधर्मो निष्कामधर्मः सेवाधर्मो भगवत्प्रसन्नतात्मको धर्मोऽत्र मुक्तिसाधनं भक्त्यर्थकक्रियाकलापः साधनपदभाक्, पुण्यात्मकधर्मस्य तु स्वर्गादिप्रदत्वेन सुखकारित्वेन च प्रवर्णनेन साक्षान्मुक्तिसम्पादकसाधनत्वेनाऽपरिगणनात् ज्ञानम्—आत्मज्ञानं परमात्मविज्ञानं च, जडचेतनतत्त्वज्ञानं तत्साधर्म्यवैधर्म्यज्ञानं ततो विवेकज्ञानं चाथ तदुत्तरमुपासनात्मकं सततस्मरणमनननिदिध्यासनात्मकज्ञानं साधनस्वरूपम् । अथ परमात्मनो विज्ञानं च सर्वप्रकारं माहात्म्यज्ञानं तरङ्गेषु बहुधा निरूपितम् । 'स ऐक्षत बहुस्यां प्रजायेय' 'स सच्च त्यच्च सर्वमभवत्' 'तत्सृष्ट्वा तदनु प्राविशत्' 'रूपं-रूपं प्रतिरूपो बभूव' 'स ईश्वराणां परमो महेश्वरः' 'सर्वभूतान्तरात्मा, भूते भूते व्यवस्थितः' 'योऽक्षरे तिष्ठन्नात्मनि तिष्ठन् पृथिव्यां तिष्ठन्''' यस्याऽक्षरं शरीरं''''यमयति''''यं न वेद''' सतेऽन्तर्याम्यात्मा तद्ब्रह्म' 'यस्य प्रशासने''' सर्वमिदं विधृतं तिष्ठति' 'सैषा आनन्दस्य मीमांसा भवति'''"सर्वरसः सर्वगन्धः' 'रसो वै सः' 'रसं ह्येवाऽयं लब्ध्वाऽऽनन्दी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति' 'अणोरणीयान् महतो महीयान्' 'सर्वकारणकारणम्' 'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः' 'सत्यकामः सत्यसंकल्पः' 'हिरण्यवर्णो हिरण्यकेशा हिरण्यश्मश्रुः, आप्रणखात् सर्व एव सुवर्णः, तस्य कप्यासं पुण्डरीकमिवाऽक्षिणी' 'यः सर्वज्ञः स सर्वविद् यस्य ज्ञानमयं तपः' 'स एकधा भवति'''दशधा शतधा''''अनन्तधा भवति'। 'यस्य सगुणं निर्गुणं चैश्वर्यमलौकिकं यदन्तर्यामितया कर्मफलप्रदातृतानिर्वाहकं भवति' 'तारासूर्यचन्द्रपृथिवीसागरवारिप्रभृतीनि यच्छक्त्या सन्धृतानि तिष्ठन्ति' 'यन्निर्मितबीजेभ्यस्तत्पारम्परिकजातीयानामेवाऽऽविर्भावो नाऽन्यादृशानामिति कलाचातुर्यम्' 'नित्यनैमित्तिकप्राकृताऽऽत्यन्तिकप्रलयव्यवस्था' 'यच्छक्तिर्महाकालः' 'भक्तरक्षाकरः'—इत्येवमादिस्वरूपाणि विशिष्टानि विज्ञानानि परमात्मनि माहात्म्यज्ञानानि स्नेहमुत्पादयन्ति परमेश्वरेतरेषु वैराग्यं चोत्पादयन्तीति, एतत्सर्वं भागवतज्ञानविज्ञानात्मकं दिव्यनिर्गुणाऽपरोक्षसाक्षात्कारात्मकज्ञानं माहात्म्यज्ञानं मुक्तिसाधनं निरूपितम्। अथ वैराग्यम्—विषयरागाभावः, मानवदेवेश्वरादिविभवविषयभोगविरामः, 'तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यात्मकं वैराग्यम्' भगवन्मात्रप्रीतिरतिफलकं मुक्तिसाधनं प्रतिस्थलं प्रसंगेन निरूपितम्। अथ भक्तिः साधनरूपा साध्यरूपा च। स्नेहप्रीतिरतिसुखानन्दप्रवाहधारात्मिका, साधनरूपा सर्वक्रियावृत्तिकलापो भगवदर्थं इति, साध्यो भगवान् स एव प्रसन्नः प्रीतः प्रसादितः सकृपः उपायात्मको भवेन्मुक्तिदाने तादृशी साध्यात्मिका भक्तिः। एतानि चत्वारि मोक्षसाधनानि। तत्रैकन्यूनतायाम् अनैकान्तिकतादूषणम्, चतुर्णामपि भक्त्यात्मकत्वमेवेति श्रीस्वामिनारायणभगवता निरूपितम्।

अथ ज्ञानं विवेक एवाऽऽत्मशुद्धिः, निर्वासनिकत्वमेव भावनोदयात्मकः संस्कारः, भगवत्सम्बन्धिसर्वप्रकारप्रवृत्तिर्निष्कामकर्म, तच्च कुर्वन्नपि निर्बन्धो निर्लेपता। आत्मनिवेदितया वर्तमानस्य परमभक्तताऽत्रैव मुक्तता च, शरणागतिः सर्वथा मुक्तिदायिनी, सा च 'विश्वासो वरणं न्यासः कार्पण्यं च स्थिरा मतिः। आनुकूल्यस्य संकल्पः प्रातिकूल्यविवर्जनम्' इति स्वरूपा, देहधनधामधरादारपुत्रपुत्रीपरिवारराज्यसम्पत्समृद्धिसर्वस्वसमर्पणात्मिका मोक्षदायिनी। अथ निष्कामनिर्लोभनिर्माननिःस्वादनिःस्नेहात्मकतेति पञ्च वर्तमाननियमाः प्रभुप्रसन्नताद्वारा मोक्षप्रदाः। अथ देशकालक्रियासंगमन्त्रध्यानदीक्षाशास्त्राणि सत्स्वरूपाणि भगवत्प्रसन्नताकराणि न त्वसद्देशकालाद्यष्ट, अतः सदात्मकान्येव सेवनीयानि। अथ सत्संगः, सतां साधूनां सत्पुरुषाणां सतीसाध्वीसांख्ययोगिनीनां मुक्तस्थितिकानां ब्रह्मनिष्ठानां समागमात्मको यथायोगं ब्रह्मचर्यव्रतपोषकः कथावार्तापरिचर्याऽनुवृत्तिस्वरूपाऽऽज्ञादिपालनविधिरूपः सर्वोत्तमोत्तमो मोक्षप्रदः। सच्छास्त्राणां भगवत्साकारताप्रतिपादकानां दिव्यावतारप्रतिपादकानां स्वर्गनरकादिविविधदर्शकानां परिशीलनमपि सत्संगो भगवच्छास्त्राणां भक्तिशास्त्राणां श्रवणाद्यात्मकस्तूत्तमोत्तमः सत्संगः। सतः परमेश्वरस्य धर्मः सर्वार्पणताविधः संगोऽपि निर्गुणः सत्संगः, वर्णाश्रमादिधर्मात्मककर्मकाण्डस्याऽऽस्तिकताविधिरूपः संगः सद्धर्मसत्संगः। एते संगाः सत्संगा मोक्षसाधका इत्यपि तरङ्गेषु प्रतिपादितम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ साधवो भगवन्मूर्तय एवेति तत्सेवया तत्रस्थस्य भगवतः प्रसन्नता भवेत्। तेन साधुस्वरूपो भगवान् शरणागतान् मोक्षं प्रापयतीति सार्वभौमोऽपि विशेषाभिमतः श्रीस्वामिनारायणभगवत्सिद्धान्तः। अथ विशिष्टाद्वैतसिद्धान्तो विशिष्टब्रह्माऽद्वैतत्वे विश्राम्यति, पञ्चतत्त्वग्रहणात्, जीवेश्वरमायादिष्वक्षरं ब्रह्म सर्वत्रान्वयि व्यापकं परमेश्वरस्याऽन्तर्यामिशक्तिकार्यकरं सूक्ष्मस्थूलाचिच्चिद्विशिष्टं तत्राऽद्वैतं शरीरी परब्रह्मपरमात्मेति। अथाऽप्रमास्थले सत्समुच्चयख्यातिः, समुच्चयस्त्रेधा,—बीजस्तम्बफलात्मकतया अधिष्ठानं बीजम्, पिठरः स्तम्बः, फलम् अर्थक्रियाप्राप्त्यादिः। शुक्तिरधिष्ठानं पिठरो रजतं विरलावयवात्मकम्, फलं तत्प्रतिगमनार्थक्रिया, अर्थक्रियावयवाऽधिष्ठानानामेकज्ञानस्य ख्यापनात् समुच्चयितपदार्थज्ञापनात्, स्थूलं यदिष्टं फलं तन्न, तेन भ्रमः, पूर्वं साफल्ये ध्यातेऽपि पश्चात्फलवैधुर्यम् इति यज्ज्ञानं, तत्पूर्वं निश्चयस्वरूपो भ्रमः समुच्चयख्यातिः, अथोपासनाबलं सत्संगबलं स्वरूपबलं साधुसमागमबलं भगवत्कृपाबलं चोत्तरोत्तरमुत्कृष्टमित्यसकृदावेदितं श्रीमुखेन तरङ्गेषु। अथ श्रीरामानुजमतीयत्रिपदार्थेष्वल्पीयसीं न्यूनतां सङ्गमयता श्रीस्वामिनारायणभगवता पञ्चपदार्थी प्रख्यापिता। सांख्यस्य चतुर्विंशतितत्त्वान्वितपुरुषस्य निर्गुणत्वे तत्त्वानतिरिक्तत्वे च क्षतिं सम्प्रदर्श्य योगमतेन पञ्चविंशतितममात्मानं पृथक् कृत्वा पञ्चरात्रशास्त्रमतेन षड्विंशं परमात्मानं निराकारीयाऽद्वैतमतादि सन्निरस्य स्वरूपसन्नित्यसाकारं प्रसंस्थाप्य विभूतिरूपशरीरवत्त्वं रुच्यविषयं विज्ञाप्य सच्चिदानन्दमात्रदिव्यैकतत्त्वमूर्तिकं परब्रह्मेति प्रवर्णितम्। नास्तिककुण्डापन्थिशक्तिपन्थिमूर्तिखण्डकानां मताऽग्राह्यत्वं च प्रतिपादितम्। अवतारा भगवन्मूर्तयोऽर्चावतारास्तद्भक्ताद्यभिप्रयुक्तसेवाप्रकारा आस्तिकविधयश्चाऽसकृन्निवेदिताः। योगस्याऽष्टाऽङ्गानां समभ्यासो यद्वा चित्तनिरोधद्वारकप्राणनिरोधात्मकयोगोऽक्षिविद्यादिका विद्या अर्चिर्मार्गस्त्यागिगृहिभगवत्सम्बन्धिसुमिलनसारव्यवहाराश्च तरङ्गेषु सप्रसंगा उपपादिताः। सृष्टिप्रक्रिया विशदतया निरूपिताः। अध्यात्माऽधिभूताऽधिदेवकारणकार्यसम्बन्धसमन्वयोऽपि दर्शितः। वेदान्तप्रक्रिययेश्वरशरीरसंज्ञाजीवात्मशरीरसंज्ञादयोऽपि समुपदिष्टाः। मायामहत्तत्त्वाहंकारेन्द्रियान्तःकरणप्राणतन्मात्रविषयाः सलक्षणाः प्रतिवर्णिताः। पञ्चकोशब्रह्मविद्याशीलव्रतनियमोत्सवबहिःपूजामानसीपूजोत्तममध्यमकनिष्ठभक्तरीतिप्रकारादयोऽपि प्रकाशिताः। कालकर्मस्वभावमायादीनां परमेश्वरायत्तत्वेऽपि क्वचित्तद्वेगादेरपि निर्दिष्टत्वेन ततो रक्षणचातुर्यादिकमपि समुपदिष्टम्। वेदादिसच्छास्त्राणि स्वीकर्तव्यतयोपदिष्टानि।

पञ्चरात्रशास्त्रानुसारेण भागवती दीक्षा शरणागतिरपि च धर्ममार्गानुपोषिका भक्तिमार्गप्रसञ्जिका मोक्षाभिमन्त्रयित्री च समर्पिता। पूर्वेषामवताराणां महापुरुषाणां लीलाचरित्रादीनां गेयतया ग्राह्यता प्रतिपादिता। सत्पुरुषसमागमो भगवत्स्थिरवृत्तिकरणं भगवद्ध्यानाचरणं भगवत्प्रीतिवर्धनं भगवन्माहात्म्यज्ञानाऽर्जनं भगवन्निश्रयपराकाष्ठभावनं सार्वभौमिकवैशद्यबोधनं सम्यगात्मतत्त्वज्ञानकरणं भगवद्भक्तपक्षानुसरणं बहुविधोत्तमोपासनं मायिकविषयनिरसनं वासनाविलयनं मानेर्ष्यादिदुर्गुणविगलापनं भागवतस्थित्यभ्यु-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दयादिकं सांख्ययोगानुगताचारविज्ञानादिकं वेदान्तग्राह्याग्राह्यसारसरणं देहदैहिकस्नेहाऽकरणं वृत्तिप्रतिलोमताभ्यसनं नियमाऽऽज्ञापालनं सद्वैराग्यवर्धनं चेत्याद्या औपयोगिकपदार्थविषयास्तत्र तत्र तरङ्गेषु श्रीस्वामिनारायणपरमात्मना स्फुटीकृताः। श्रीमद्रामानुजाचार्य-श्रीमद्वल्लभाचार्य-श्रीमन्मध्वाचार्य-श्रीमन्निम्बार्काचार्य-श्रीमच्छंकराचार्य-कबीर-श्रीशक्तिमार्गीय - पौराणिकैतिहासिकानां सर्वमूर्धन्यव्यासदेवस्य च प्राभिप्राया ग्राह्याऽग्राह्यसर्वथाऽग्राह्यसिद्धान्ता अपि साररूपेण वर्णिताः। चार्वाकजैनबौद्धशक्तिवादिमलिनाऽघोरमार्गार्थपदार्था अप्यग्राह्यतया सूचिताः। यवनम्लेच्छचाण्डालाद्यनाचारा नाऽऽचरणीयाः। भगवन्महासमर्थपुरुषाचारा अप्यननुकरणीयतया शिक्षिताः। तीर्थव्रतमहोत्सवसदाचारपारायणसाम्प्रदायिकग्रन्थनिर्माणादिविषयोऽपि प्रवर्तिताः।

अथाऽत्र ग्रन्थे दार्शनिकतत्त्वपद्धत्या पदार्था अपि विरलतया यथासम्भवं समुद्दिष्टास्ते यथा —

अथ द्रव्याणि—परब्रह्म, मूलाक्षरब्रह्म, मुक्तब्रह्म, अवताराः; धामानि, ईश्वरात्मानः, जीवात्मानः, देवाः, आचार्याः, मूलमाया, प्रधानमाया, बुद्धिः, महत्तत्त्वम्, अहङ्कारः, चित्तम्, मनः, प्राणः, श्रोत्रम्, त्वक्, चक्षुः, रसना, घ्राणम्, वाक्, पाणी, पादौ, पायुः, उपस्थम्, तन्मात्राणि शब्दस्पर्शरूपरसगन्धात्मकानि, विषयाश्च, भूतानि—आकाशः, वायुः, तेजः, जलं, पृथिवी, विभूतिः, कालः, दिक्, अन्धकारः, निद्रा चेति।

अथ द्रव्यगुणाः—सत्त्वं, रजः, तमः, ज्ञानम्, कामना, चमत्कारः, धर्मः, अधर्मः, प्रीतिः, आकर्षणम् उपासना चेति। अथ केवलगुणाः—रूपम्, रसः, गन्धः, स्पर्शः, संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, तादात्म्यम्, विभागः, परत्वम्, अपरत्वम्, गुरुत्वम्, द्रवत्वम्, स्निग्धत्वम्, शब्दः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, संस्कारः, शक्तिः, स्थैर्यम्। अथ क्रियाः—स्पन्दः, कम्पः, गतिः, आस्फोटनम्, लीनीकरणम्। अथ जातिः—साजात्यम्, वैजात्यम्, सामान्यम्, अवान्तरम्, उपाधिः। अथ विशेषः—सौलक्षण्यम्, वैलक्षण्यम्, व्यावर्तकत्वम्, तत्त्वत्वं च। अथ सम्बन्धः—तादात्म्यम्, सुयोज्यत्वम्, संसिद्धत्वम्, वृत्तित्वम्, स्वरूपः, वैशिष्ट्यम्, समवायः, पर्याप्तिश्च। अथ अभावः—प्रागभावः, प्रध्वंसाभावः, अन्योन्याभावः, अत्यन्ताऽभावः, अचिराऽभावश्च। इत्येते पदार्था अपि तत्र तत्र विरलतयोद्दिष्टाः। अथ एकान्तिकता प्रतिपदमावेदिता, आत्मनिष्ठा धर्मनिष्ठा ज्ञाननिष्ठा भक्तिनिष्ठा स्वरूपनिष्ठा साधननिष्ठा तपोनिष्ठा स्वाध्यायनिष्ठा गुरूपसत्तिनिष्ठा, सांख्यनिष्ठा योगनिष्ठा ब्रह्मनिष्ठा चापि प्रतिपादिताः। अथ धर्मोऽर्थः कामो मोक्षश्चेति चतुःपुरुषार्थाः प्रतिपादिताः। अथ प्रमाणविपर्ययविकल्पनिद्रास्मृतयो वृत्तयोऽपि वर्णिताः। अथाऽवस्था बहुविधाः प्रदर्शिताः। अथ विक्षेपा विघ्ना उपाधयश्चापि दर्शिताः। अथ त्रिविधबन्धाः, गतयः, उपायाः साम दानं भेदो दण्डश्चेति कथिताः। अथ कर्म प्रारब्धं सञ्चितं क्रियमाणमपि कथितम्। अथ ब्राह्मणक्षत्रियवैश्यशूद्राऽन्त्यजा वर्णा अप्याश्रमाश्चत्वारोऽपि च प्रोक्ताः। अथ शुद्धिः, मिथ्यात्वम्, जन्म, मरणम्, विकारः, परिणामः, विवर्तः, कालः, दिशः, दुर्गुणाः, दोषाः, गुणाः, प्रोक्ताः। अथ यथार्थज्ञानम् अयथार्थज्ञानम्, प्रत्यक्षम्,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुमानम्, उपमानम्, शाब्दबोधः, अर्थापत्तिः, अनुपलब्धिः, संभवः, ऐतिह्यम्, चेष्टा, सामान्यज्ञानंप्रमां, अप्रमा, भ्रमः, तर्कः, स्मरणम्, अन्वयव्यतिरेकिव्याप्तिः, सन्तो हेतवोऽसद्धेतवः, फलम्, कथा, वादः, सिद्धान्तः, कामना, चमत्कारः, अनुष्ठानम्, तत्तत्स्थलीयाऽन्वयव्यतिरेकिदृष्टान्तानि, प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि च यथोपयोगं प्रतिपादितानि, कुत्रचिन्निग्रहजातिप्रयोगा अपि कृताः। अथ श्रीपुरुषोत्तमस्य मानवस्वरूपम् अवताराद्यात्मकस्वरूपं च वर्ण्यते, तयोर्मूलं स्वरूपं कीदृग्भवेदिति तरंगेऽभिहितम्। परमात्मस्वरूपेऽपि मूलं विशेषणम्, अनेकस्वरूपविवेचनात्। अथ प्रधानं माया महत्तत्त्वं माया गुणवैषम्यं माया चेत् तत्र मूला माया कीदृशीति? प्रकृतिरिति, तत्त्वाऽन्तराऽनुपादानकत्वं मूलत्वमिति। अथ मुक्तपुरुषः प्रधानपुरुषः, ईश्वरपुरुषः परमपुरुषः इति चेत्, तर्हि मूलमायाया मूलपुरुषः कीदृगिति? महापुरुषो मुक्तात्मा स प्रोक्तः। अथ बहुशाखानां बहुस्वरूपाणां मूलम्, सापेक्षम्, अथ तर्हि साकारम् अक्षरं ब्रह्म, निराकारम् अक्षरं ब्रह्म, अन्तर्याम्यक्षरं ब्रह्म, व्यापि चाप्यक्षरं ब्रह्म, इति चेत्? तर्हि मूलमक्षरं ब्रह्म कीदृशम्? अथ श्रीहरिमूलस्वरूपसमानस्वरूपं सेवकमिति मूलम्, इत्येवं मूलप्रयोगा अपि निहिताः।

अथ सुधासिन्धुतरङ्गेषु वाक्यानि प्रश्नवाक्यानि शंकावाक्यानि कृपावाक्यानि प्रेर्यप्रेरकवाक्यानि, मौनवाक्यानि अप्रतिभावाक्यानि असदुत्तरवाक्यानि निरर्थकोत्तरवाक्यानि भ्रमितोत्तरवाक्यानि असमाधानोत्तरवाक्यानि निश्चितार्थवाक्यानि यथार्थोत्तरवाक्यानि विप्रतिपत्तिवाक्यानि लाक्षणिकपदघटितवाक्यानि व्यञ्जनाश्लेषाऽलंकारादिवाक्यानि रसान्वितवाक्यानि विधिमन्त्रनामधेयाऽर्थवादवाक्यानि प्रवर्तकवाक्यानि निवर्तकवाक्यानि भयजनकवाक्यानि रोचकवाक्यानि वर्णननिरूपणस्फोटकवाक्यानि भगवद्वाक्यानि सभाजनवाक्यानि सम्बन्धकरवाक्यानि श्रुतिस्मृतिपुराणेतिहासशास्त्रसूत्रादिप्रमाणार्थकवाक्यानि दिनादिबोधकानि सभासारकाणि ध्यानोपयोगीनि वेषाभूषणादिवर्णनपराणि च समाप्तिद्योतकानि भगवत्स्वनिगमनकानि सङ्गतिसम्बद्धकवाक्यानि गायनकीर्तनानीत्यादीनि संभृतानि। काव्यात्मकस्तु स्वयं सुधासिन्धुः समस्तोऽस्तीति किमु वक्तव्यं छन्दःस्विति॥ अथैतेषां सुधासिन्धुतरङ्गविविधविषयाणां सर्वथैव प्रामाणिकत्वम्, फलप्रमाणात्। हेतुभ्यश्च, यथा—

‘सुधासिन्धोर्हि कृत्स्नस्य प्रामाण्यं सर्वथाऽस्ति यत्।
मोक्षात्मपुरुषार्थार्थं सर्वस्वं यत्र देशितम्॥ २॥
स्वाननोद्भावितो यस्मात् सुधासिन्धुः कृपालुना।
परब्रह्मणा जीवानां मोक्षार्थं दिव्यमूर्तिना’॥ ३॥

स्वेन श्रीहरिणा दिव्यमानवरूपिणा जीवादिमोक्षार्थमुद्भावितत्वात्, दिव्यमुक्तादिभिः सह निर्णीताऽर्थप्रकाशकत्वात्, भक्तिलभ्यमोक्षाऽनुगुणयावत्सिद्धान्तसंभृतत्वात्, भगवद्व्यावदाविर्भावाऽभिप्रायसंवलितत्वात्, मोक्षपथस्नातकयावन्मुमुक्षुजनप्रवर्तकत्वात्, सर्वविधपुरुषार्थमर्यादास्थापकमुनिजनादिपरिषद्प्रवृत्तत्वात्, चित्तैकाऽग्र्येन्द्रियाऽन्तःकरणप्राणजयादि बहुगुणप्रतिपादकत्वात्, भगवत्प्रसन्नतासाधनातिशयप्रदर्शकत्वात्, श्रीहरितदैकान्तिकाद्यात्मक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विलक्षणवक्तृश्रोतृकत्वात्, निखिलवेदवेदाङ्गसारभूतचतुःपुमर्थोत्तमोत्तममहिमसंभृतविलक्षण-प्रबन्धत्वात्, श्रीहरिनियतितप्रमाणभावत्वात्, प्रत्यक्षभगवदनुशासनात्मकत्वात्, लौकिक-वैदिकभागवतसर्वविधधर्मादिमूर्तिमुनिजनज्ञानोपजीव्यत्वात्, सर्वकर्मणामाराध्यप्रत्यक्षपर-देवतायां समर्पणाऽऽदेशनिरूपकत्वात्, परमपुरुषसाक्षात्कारोपायप्रदर्शकत्वात्, परम-पुरुषाऽध्युषिताऽक्षरब्रह्मलोकस्य परमप्राप्यत्वकथनात्, भागवतधर्मनिष्ठप्रकृष्टदृढीकरणकत्वात्, स्वयम्प्रत्यक्षभगवता भगवद्धर्मप्रकर्षस्याऽपि प्रज्ञापितत्वस्याऽऽवेदकत्वात्, दिव्यपरम-मुक्ताद्यनुष्ठीयमानविलक्षणनिर्गुणक्रियास्थित्याद्यावेदकत्वात्, भगवद्विहितसाधनाद्यनुष्ठातॄणामपि भगवद्दर्शनतुल्यनिजदर्शनफलप्रदत्व - देवर्षिप्रभृतिवन्द्यत्वब्रह्मादिप्रतियोगिकमहत्तादिगुणापाद-कत्वादि-प्रकाशकत्वात्, भागवतधर्मस्याऽऽवश्यकाऽनुष्ठेयत्व - श्रीहरिप्रियत्वसद्वृत्तप्राप्याऽऽ-पादकत्वसनातनवृषत्व-परमैकान्तिकधर्मत्वसर्वानुष्ठेयश्रेष्ठत्व - परममोक्षप्रदत्वादिवर्णनवत्त्वात्, वेदवेदान्तादिवेद्य-परदेवतायाः सर्वप्रकारत्वेन प्रतिपादकत्वात्, श्रीहरिसम्बन्धप्राप्तेन्द्रियाऽन्तः-करणाऽऽद्यकवक्तृ-श्रोतृ-मथितदिव्यतत्त्वनिर्णयाऽऽवेदकत्वात्, नित्यसर्वज्ञ – श्रीहरिसमुच्चरित-प्रश्नोत्तरसिद्धान्तादिगर्भितत्वात्, ब्रह्मलोकप्राप्तिभगवच्चरणसान्निध्यादिवासाऽऽवेदकत्वात्, मोक्षफलप्रदसर्वोपरिपरब्रह्ममुख्यविषयकत्वाच्च, प्रामाण्यं सुधासिन्धुग्रन्थस्येति ।

श्रीस्वामिनारायणसम्प्रदाये सुधासिन्धुप्रदर्शिताः श्रेष्ठसिद्धान्ताः—परब्रह्मश्रीस्वामि-नारायणपरमात्मा स्वरूपसन्नेवैकतत्त्वात्मक आनन्दघनः साकारमूर्तिः । स चैकदेशस्थोऽप्य-क्षरब्रह्मात्मकस्वरूपसत्स्वतेजःप्रकाशात्मकाऽक्षरधामद्वारा सर्वत्र केवलान्वयिव्यापकः । भगवन्मूर्तेः प्रकाशोऽक्षरब्रह्म स्वरूपसत् साकारं पुरुषाकारं सेवकम्, धामस्वरूपं च सर्वत्रान्वयि व्यापकं ब्रह्मलोकात्मकम्, अन्तर्यामिकार्यकरं साक्षितया वर्तमानं च ।

आविर्भूतचेतनचैतन्यस्वरूपसन्मूर्तयो मुक्ताः पुरुषोत्तमसमाकृतयः । ऐश्वर्यात्मान ईश्वरा ऐश्वर्यात्मकसामर्थ्यसामर्थ्याश्रयाः स्वरूपसन्मूर्तयः मायिकसात्त्विकप्रधानविग्रहवन्तो जगदधि-देवाः । ज्ञानघनाः सच्चिदानन्दा जीवात्मानोऽणुप्रकाशाः साक्ष्यनुस्वरूपाः । परब्रह्मस्वयं-स्वरूपसन्नवताराऽवतार्यात्मकमूर्तिः । अंशकलाऽऽवेशप्रभृतयो वेषान्तराः सत्तया वा तथाभि-धानाः । स्वरूपमात्रनित्यतृप्तिः । अन्ययोगोत्था त्वनित्या सा । 'अहं तव भक्त' इत्युपासना । धर्मज्ञानवैराग्यभक्तिभिर्मोक्षप्राप्तिः । अक्षरब्रह्मणि सर्वात्मनां सारूप्यमुक्तिः सुसेवान्विता मुख्या । अक्षरधामस्थश्रीहरेरायुधाऽऽभूषणवेषोपकरणचिह्नगुणादयः सर्वेऽपि चेतना मुक्ता वेषान्तरानन्दभोक्तार एव, उद्यानवाहनसमृद्धयोऽपि मुक्ता एव । पञ्चतत्त्वानि मुख्यानि जीवेश्वरमायाब्रह्मपरब्रह्माणीति । मायिककर्माणि भगवद्वियोगो वा संसारः । आज्ञाऽङ्किताऽऽ-वर्तनादीनि । माया नित्या त्रिगुणा । जीवसृष्टिरीश्वरसृष्टिब्रह्मसृष्टयः । भगवच्छरणागतिः । सन्त आचार्या द्वाराणि । आतिवाहिकाऽर्चिर्मार्गः । एकाऽनेकस्वरूपसामर्थ्यानि । सर्वनियाम-कत्वमेकं परमेश्वरे विशिष्टम् ।

परब्रह्मणोऽक्षरब्रह्मणो मुक्तानां च अत्रवत् नित्यविभूत्यात्मकविग्रहवत्त्वं तेषु शरीरेषु नित्यनिवास इति न श्रीस्वामिनारायणभगवत्सिद्धान्तः । स्वरूपसदवताराणां नित्यविभूतिलीला-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विभूत्यादिदेहधारणं नैवाऽपेक्ष्यते। स्वरूपसदानन्दतृप्तौ विभूतिशरीरसाधनवस्त्वाद्युपभोगार्थं-तत्पदार्थाद्यपेक्षा न विद्यते। वैकुण्ठे गोलोके च पुराणादौ वर्णिता नित्यविभूतिर्लक्ष्मीराधिका-पार्षदपार्षदानीदासदास्यादयश्च भोगाश्चेति वैकुण्ठादिधामानि निर्मितानीति पुराणेषु संहितासु च व्यासश्लोका विद्यन्ते। ब्रह्मलोकस्तु परमाऽक्षरधाम उपनिषत्प्रतिपाद्यं व्यापकं महद्धाम तदंशस्थितान्येव वैकुण्ठगोलोकादीनि तानि त्वक्षरधामतः पृथगिति प्रोक्तानि श्रीहरिणाऽपि, गोलोके गोपा गोपिकाश्च सन्तीति ते ताश्च नाऽक्षरब्रह्मलोके, गोलोके वैकुण्ठेऽव्याकृतेऽमृते श्रीपुरे श्वेतद्वीपे च साकारा विभूतिविग्रहाः स्त्रीपुरुषा मूर्ता दिव्यसर्वक्रियापराः। अक्षरधाम्नि तु केवलपुरुषोत्तमसारूप्यमुक्ताः किशोरा दिव्या द्विभुजाः। अक्षरे धाम्नि द्विचरणारविन्दो-पासना। गोलोकवैकुण्ठादौ चतुश्चरणारविन्दोपासनेति पुराणप्रसिद्धिः। गोलोकवैकुण्ठादौ स्वरूपस्य आत्मनः रूपस्य देहस्य च भेदोऽप्यभेद इव। विष्णोरवताराणामपि तत्तद्दिव्यविभूति-देहस्य लीलाविभूतिदेहस्य वाऽपेक्षा वर्तते यद्देहत्यागेनाऽत्र निश्चीयते वर्ण्यते च तथैव पुराणैः। आश्चर्यरूपा माया सर्वजडतत्त्वकारणम्। इत्येवं पृथक्तया सुधासिन्धुप्रबन्धे स्पष्टं प्रतिपा-दितम्। सुधासिन्धौ विभूतिपदप्रयोगोऽपि विशिष्टा भूतिर्भावो वेषान्तरस्वरूपमेवेति तदर्थः। न तु अचेतना भूमिका। राधालक्ष्म्यादयोऽपि स्वरूपसद्भगवत्सारूप्यव्यवस्थिता भगवत्समाकारा दिव्यमुक्ता एव किशोरा अनन्तशक्तिस्वरूपसन्मुक्ता इति। न तु ताः किशोर्यो दास्यो मुक्ता नारीस्वरूपिण्यो ब्रह्मलोके इति।

श्रीस्वामिनारायणभगवता ब्रह्मव्रतस्यैवाऽक्षरधामस्थमुक्तगतस्य पृथ्व्यां प्रवर्तितत्वात् पूर्वपूर्वतरपूर्वतमगुरुभिरपि त्यागाश्रमस्य परमहंससंन्यासाश्रमस्य मायात्यागस्य कामना-दहनस्य परब्रह्मानन्दमात्रस्य प्रतिपादितत्वात् प्रवर्तकत्वात् स्त्रीवासनाक्रियानिर्वृत्त्यादिनिषेधाद् उपनिषत्सु क्वापि मुक्तस्थितौ स्त्रीसंभोगाद्यवर्णनात् श्रीस्वामिनारायणभगवतः स्त्रीगन्धाद्यस्याप्य-सह्यतायाः प्रसिद्धत्वाद् औपनिषदे ब्रह्मलोके पत्नीपत्यादिकमठानस्याऽसंभवस्यैव समीहितत्वाद् दिव्यविभूत्यादिमत्तानुसरणं तु अविद्याकारसम्प्राप्तब्रह्मणो मायिकत्वदूषणपरिहारार्थकमेवेति विज-यते मोक्षब्रह्ममहोलः परमात्मसारूप्यानन्दाऽशनतृप्तिसम्पादक इति सर्वं सुसमीचीनं निरवद्यम्। एतत्सुधासिन्ध्वाद्यन्तप्रविष्टशेमुषीणां सिन्धुसंभृततत्त्वानामिव दार्शनिकतत्त्वानामारोहणमुप-ग्रहणं च वास्तविकतया सम्पद्यत इत्ययं यत्नो विज्ञैः सुश्रद्धैः संवर्तनीय इति। सुधासिन्धुरयं द्विषष्ट्यधिकद्विशततमोपनिषत्स्वरूपो वर्तते यत्र भगवत्सान्निध्यसम्पादिका ब्रह्मविद्याः साक्षा-त्परम्परस्वरूपा वा सम्प्रकाशिता इति। योगविद्यांगसमाधिप्रकरणे भक्तिमात्रादिकृतसमाधि-गतिप्रसंगे तु ब्रह्मलोकेऽपि तत्स्वागतादिप्रयोजनकतत्स्थितिवर्णने राधालक्ष्म्यादिस्वरूपवेषान्त-रान्वितमुक्तानां सखीदासीत्वादिना तत्कालीनपूजनमाननर्तनादिवर्णनं युक्तम्, न तु सार्वदिकम्। गोलोकादिधामाधिवसतीनामपि तथाविधवर्णनं युक्तं तदपि तावत्प्रयोजनमात्रं सुरासखेलनाद्यु-त्सवोत्कर्षसम्पादनार्थमात्रमिति नाऽक्षरे धाम्नि तथाविधो नित्यः प्रसङ्ग इति। एवं वैष्णव-सम्प्रदायानां भगवत्स्वरूपाणां राधालक्ष्मीरमाकमलाललिताजयापार्वती—पद्माप्रभाभगवती-जयाश्रीभूलीलाविकुण्ठादिसहितानामेव स्वतन्त्रप्रतितन्त्रसर्वतन्त्रसिद्धान्तेषु प्रवर्णनादेव वैष्णव-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वसाजात्येनापि युगलवर्णनस्याऽपरित्याज्यत्वन्यायेन तथाऽनुसरणात्, तावता न ब्रह्मलोके कबीरमतवत् परमब्रह्माऽतिरिक्ताः सर्वा असङ्ख्याः सख्य एव सखा त्वेकोऽपि नास्तीति, यद्वा यावन्तः सखायस्तावत्यः सख्यः सखीनां सखीनां च लोकमहोलसाम्राज्यानि मण्डलानि च समभागानीति न मन्तुमुचितम्। उपनिषत्सु वैष्णवग्रन्थेष्वपि तासाम् अप्राधान्यात् स्वल्प-वर्णनात्। अथ धामगतमुक्तानाम् अपरोक्षसाक्षात्कारः किमाकार इति चेत्? मुक्तानां स्वरूपसत्साकारत्वात् सार्वज्ञ्यात् सर्वक्रियावत्त्वात् सर्वसेवावत्त्वात् सर्वमुक्तमण्डलस्थितिमत्त्वात् स्वभगवदिच्छानुकूलवेषान्तरपरिवर्त्तनवत्त्वात् अनेकस्वरूपाविर्भाववत्त्वात् अनेकपदार्थात्मक-स्वरूपस्वीकरणात् अपरोक्षसाक्षात्कारस्य तद्धामतन्मुक्तत्द्भगवंस्तद्वेषाऽऽभूषाऽलंकारपरि-करपरिजनराजाधिराजतादिग्यावद्विधविशिष्टसविकल्पकधारानुगुणसमस्तमहामहाप्रत्यक्षमात्रत्वात् यथायोग्यस्थितिकाऽपरोक्षसाक्षात्काराणां सत्त्वादेव तत्तदाकारास्तत्तद्व्यक्ति-व्यवस्थाव्यवस्थित-स्वरूपा भवन्त्येव, न त्वद्वैतनिराकारब्रह्मवत् 'ब्रह्म' इत्येवतावन्मात्रसाक्षात्कारः, किन्तु तत्राऽ-हमादिप्रयोगात् 'अहमात्मा, अहं सच्चिदानन्दः, अहं ज्ञानघनः, अहं भगवत्समस्वरूपः, अहं भगवत्सेवकः, अहं स्वस्वामिकः, अहं भगवदात्मकः, अहं दिव्यगुणैश्वर्यसामर्थ्यशक्तिमान्, अहं किशोरः, अहं मुक्तः, अहं ब्रह्म, अहम् एतद्विधसेवास्थः, अहमक्षरसमः, अहम् अनादि-मुक्तः, अहं भगवच्छरीरम्, अहमानन्दभोक्ता, अहं पुरुषः, अहं चिद्घनः, अहं चिद्घनप्रकाशः, अहं सुमूर्तः, अहमेकः, एवमनेके ज्ञानाकाराः प्रवर्तन्ते, मुक्तानां तत्र सर्वविधमुक्तिस्वीकारात्, सर्वविधसेवास्वीकाराच्च। यदि त्वेक एव मुक्तानामनुगततया ज्ञानाकारो जिज्ञास्यते तर्हि 'ब्रह्माऽहं'मिति आत्मसाक्षात्कारः सुस्थः। यदि तत्रापि विशेषाकार इष्यते तर्हि स 'ब्रह्माऽहं भगवद्दास' इति, परब्रह्ममुक्तोऽहमिति, अक्षरमुक्तोऽहमिति, ब्रह्ममुक्तोऽहमिति, अक्षरस्य तु अक्षरोऽहम्, अक्षरधामाऽहम्, मूर्ताऽक्षरोऽहम्, अमूर्ताक्षरोऽहम्, मूर्ताऽमूर्ताऽक्षरोऽहम्, साकारनिराकारोऽहम्, भगवन्मूर्तिप्रकाशोऽहम्, मूर्तिप्रकाशोऽहम्, प्रकाशोऽहम्, धामाऽ-हम्, सेवकोऽहम्, मुक्तानाम् अक्षरब्रह्मणः परब्रह्मणश्च साधारण्येनाऽपरोक्षसाक्षात्कारो लाघवेन तु 'ब्रह्म' इत्येतावन्मात्रमुचितः, ब्रह्मत्वेन मुक्तानामक्षरस्य परमेश्वरस्य च संग्रहणात्, त्रयाणां ब्रह्मतयाऽविरोधात्। परब्रह्मणस्तु 'विशिष्टोऽहं' 'शरीर्यहम्' 'परब्रह्माऽहम्' 'एकोऽहं' इत्यपरोक्षसाक्षात्कारः 'सर्वमहमि'ति चापि, 'एकमेवाऽद्वितीय'मिति, नामरूप-गुणादिविशिष्टाऽपरोक्षसाक्षात्कारस्य सर्वत्र स्वीकारात्। 'ब्रह्मणोऽहमि'ति तु सारः॥

अथ वचनामृतेषु तादृशा आकाराः प्रदर्शिताः, यथाहि—द्वादशे तरङ्गे 'तेजोमयं धाम'''समाधौ तच्च पश्यन्ति॥ ५०॥ देहत्यागानन्तरमपि धाम पश्यन्तीति'। अत्रेदं धामेति धामसाक्षात्कार उक्तः। अथ विंशे तरङ्गे 'स्वरूपं सहसा भास्वद्भासुरं वीक्षते पुमान्'॥ १७॥ 'प्रकाशे विमले तस्मिन् साक्षात्कृष्णं च वीक्षते'॥१८॥ (स्वस्वरूपमति-शयप्रकाशमानं पश्यति तत्प्रकाशमध्ये प्रत्यक्षपुरुषोत्तममूर्तिं पश्यतीत्यर्थः)। अथ त्रयोविंशे तरङ्गे—'अन्ये तु देहत्रितयपरशुद्धात्मरूपिणः। अतिप्रकाशे तत्रैव साक्षात्कृष्णमुपासते॥ ९॥ अतिप्रकाशाऽऽत्मरूपं त ईक्षन्त सदैव हि। कृष्णं च साक्षात्तत्रैव सदेक्षन्तेऽतितेजसम्॥१०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(व्यवस्थत्रिदेहपरं स्वस्वरूपमतिशयप्रकाशमानं पश्यति, तस्मिन्प्रकाशे च भगवन्मूर्तिर्यादृशी प्रकटप्रमाणा तादृश्यतिशयप्रकाशयुक्ता भासतेत्यर्थः) ॥ अथ चतुर्विंशतितमे तरङ्गे—''' सोऽक्षरं पश्येत् सच्चिदानन्दलक्षणम् ॥ ५ ॥ तत्रैकरसचैतन्यप्रकाशोऽतिमहत्यसौ । कृष्णमूर्तिं विना दिव्यां नान्यसाकारमीक्षते ॥ ६ ॥ (ज्ञानेनैकरसचैतन्यं भासते तत्र चैका भगवन्मूर्तिरेव दृश्यते. नान्यः कश्चिदाकारस्तिष्ठतीत्यर्थः) ॥ अथ षड्विंशे तरङ्गे—'हृदि तन्मूर्तिरेकैव भाति नान्यत्तु किञ्चन ॥ १८ ॥ तामेव पश्यताम्'''अलौकिकम् । प्रकाशते ब्रह्मतेजस्तत्र सैव च भासते । १९ । (अलौकिकप्रकाशः प्रद्योतते तस्मिन्प्रकाशे भगवन्मूर्तिर्दृश्यते इत्यर्थः) ।

अथैकपञ्चाशत्तमे तरङ्गे—'अन्तर्बहिश्च तद्व्याप्य स्थितं तत्कृष्णधाम च । कोटिसूर्येन्दुसंकाशं सच्चिदानन्दलक्षणम् ॥ १९ ॥ तदीयदृष्ट्या स्वस्येकं ब्रह्मैव''' ॥ २० ॥ तत्र स्थितोऽस्ति भगवान् सर्वकारणकारणम् ॥ २१ ॥ सर्वात्मात्मा स्वतन्त्रश्च सर्वशक्तिपतिः प्रभुः ॥ २२ ॥ सर्वत्र कारणत्वेन सोऽन्वितोऽस्ति स्वतेजसा । व्यतिरिक्तश्च धाम्नि स्वे राजतेऽनेकशक्तिभिः ॥ २३ ॥ प्रत्यक्षो जायते नृणां धृतदिव्यनराकृतिः ॥ २४ ॥ (श्रीपुरुषोत्तमभगवद्दृष्ट्या पश्यामस्तदा पुरुषोत्तमभगवन्तं विनाऽन्यत् किमपि न भासते इत्यर्थः)

अथ त्रिसप्ततितमे तरङ्गे—'आत्माऽहं सच्चिदानन्दरूपोऽस्मि वपुषः परः ॥ ४१ ॥ मदिष्टदेवो भगवान्,'''अक्षरादप्यस्ति परः ॥ ४२ ॥ (एवं विचारयेद्—'अहमात्मा सच्चिदानन्दोऽस्मि, भगवानक्षरात्परतः परोऽस्तीत्यर्थः) ॥ अथैकाशीतितमे तरङ्गे—एवमभ्यसतः पुंसः प्रसादात्परमात्मनः । स्फूर्तिः स्यात्सहजा नित्यं तस्यैव त्वाकृतेर्हृदि ॥३० ॥ साक्षात्कारः स कथितो दर्शनं च तदुच्यते ॥ ३१ ॥ दर्शनं स्यादात्मनोऽपि ब्रह्मचर्यदृढस्थितेः' ॥ ३२ ॥ (यादृगात्मस्वरूपश्रवणादिकृतं भवेत् तादृगात्मस्वरूपसाक्षात्कारः, भगवतोऽपि श्रवणमनननिदिध्यासनसमसाक्षात्कारः सम्पद्यते' इत्यर्थः) ॥ अथ चतुर्नवतितमतरङ्गे—'ततस्तेषां सुहृदये ब्रह्मतेजसि भूयसि । उपलम्भो भवेत् साक्षात्कृष्णस्य जगदात्मनः ।११। (भक्तजनस्य स्वहृदये भगवदिच्छया भासमानेऽक्षरब्रह्ममयतेजसि साक्षाच्छ्रीकृष्णभगवतो दर्शनं जायते इत्यर्थः) । 'अथ—त्र्यधिकशततमे तरङ्गे—'आत्यन्तिको लयो यर्हि जायते तर्हि लीयते । सह स्वकार्यैः प्रकृतिः पुरुषे सोऽपि चाऽक्षरे ॥ २८ ॥ तदैकं सच्चिदानन्दरूपं तेजः प्रकाशते । ब्रह्माख्ये तत्र भगवान् राजते पुरुषोत्तमः ॥ २९ ॥ दिव्यमूर्तिः कृष्णसंज्ञो दिव्यवासोविभूषणः । सेव्यमानो महामुक्तैर्ब्रह्मभूतैः सहस्रशः ॥ ३० ॥ अनन्तशक्त्यधिष्ठाता स एव स्वेच्छया पुनः ॥ ३१ ॥ भूत्वा नराकृतिर्भूमौ चरत्यद्भुतचेष्टितः । नृनाट्यं विदधानं तं निर्गुणं दिव्यविग्रहम् ॥ ३३ ॥ दैवास्तु सुधियो मायागुणातीतं परं विदुः ॥ ३४ ॥ एष एव हि वेदान्ते मायिकं जीवबुद्धिगम् । भावं सम्यङ्निराकर्तुं निर्गुणोऽरूप उच्यते ॥ ३५ ॥ एष एवेति या निष्ठा श्रेय आत्यन्तिकं हि तत् ॥ ३६ ॥ एतस्याः पक्वतां सिद्धिं प्राप्ताः स्युर्ये तु ते नराः । दृग्गोचरे सदेक्षन्ते तमेव पुरुषोत्तमम् ॥ ३७ ॥ (प्रकृतिपुरुषलयानन्तरम् अक्षरधाम्नि भगवन्मूर्तिरखण्डा विराजते, तामेव स्थावरजङ्गमेषु सर्वेष्वाकारेषु यत्र यत्र दृष्टिर्गच्छेत्तत्र तत्र साक्षात्कारां पश्येत् , एतां मूर्तिं विनाऽन्यदण्वपि न भासेत, एतत्सिद्धदशालक्षणम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यर्थः)। अथ द्वाविंशत्यधिकशततमे तरङ्गे–'स्वामी नारायणः सोऽयं नित्यं हृदि मयेक्ष्यते । तिर्यगूर्ध्वमधोऽपारे स्थितः कोट्यर्कतेजसि ॥ २४ ॥ दिव्यसिंहासनारूढं नैकमुक्तगणैर्वृतम् । अतितेजस्विदिव्याङ्गं दिव्यवासोविभूषणम् ॥ २५ ॥ दिव्यचन्दनपुष्पस्रक्शेखरैरर्चितं निजैः । अतिप्रीत्या तमीक्षेऽहं सादरं पुरुषोत्तमम् ॥ २६ ॥ तन्मूर्तिदर्शनेनैव सदाऽऽनन्दोऽस्ति मे हृदि । प्रतिक्षणं च पश्यामि नवं नवमिव प्रभुम् ॥ २७ ॥ तेजःपुञ्जस्त्वखण्डं मे वर्तते दृशिगोचरः ॥ २९ ॥ मूर्तिं तु तत्र पश्यामि ॥ ३० ॥ (सर्वोपरितेजःसमूहेऽसीम्नि मध्यस्थसिंहासने विराजमानं दिव्यमूर्तिं श्रीनारायणं परितो निषण्णा अनन्तकोटिमुक्ताः पश्यन्ति, एतादृशमुक्तसहितनारायणं सदाऽहं पश्यामि' इत्यर्थः) ॥

अथ त्रयोविंशत्यधिकशततमे तरङ्गे–'आत्मज्योतिः प्रपश्यन्ति तारतम्येन योगिनः २८ ॥ यथा सुकाचै रचिता पुरुषप्रतिमा भवेत् । सर्वाण्यंगानि रोमादि तस्याः काचमयानि च ॥२९॥ तदन्तःस्थं भवेज्ज्योतिः सर्वाङ्गव्यापकं महत् ॥ ३० ॥ दृष्टं स्याद् येन तावत् तत्सत्तावत् कथयेद्धि तत् ॥ ३२ ॥ निरावरणदृष्टिं यः कृष्णोपासनदार्ढ्यतः । प्राप्तो भवेत् स आत्मानं प्रपश्यति यथास्थितम् ॥ ३४ ॥ शुद्धं पूर्णं पश्यति तं परम् ॥ ३५ ॥ निरावरणदृष्टिमान् । स प्रोक्तः सम्यगद्दर्शीति ॥३७॥ कृष्णो दिव्याकृतिर्जीवेष्वन्तर्यामितया स्थितः । मूर्तत्वस्कार्यकारित्वादप्यमूर्तोऽस्ति मूर्तिमान् ॥ ४२ ॥ (सामान्यसत्ताकविशेषसत्ताकज्ञानस्वरूपतयाऽऽत्मदर्शनम्, दिव्यदेहो भवति, तत एवं जानाति,–'अयमहम् अयं पुरुषः, इदम् अक्षरम्, सर्वोपरिविलक्षणोऽयम्पुरुषोत्तमः,' एवं तान्सर्वान्पृथक्तया पश्यति, एतेषां प्रकाशानपि पृथक्तया पश्यतीत्यर्थः) ॥ अथ चत्वारिंशदधिकशततमे तरङ्गवचनामृते–'निवृत्तिमार्गे सन्त्यन्ये योगयज्ञादयो मखाः ॥ ३० ॥ ज्ञानयज्ञोद्यतैर्भाव्यं तद्वशस्थैर्मदाश्रितैः ॥ ४२ ॥ निजस्वरूपं यद्ब्रह्म तत्र परब्रह्मपुरुषोत्तमः प्रकटीभवतीति योगयज्ञफलम् । स्वस्वरूपे ब्रह्मणि परब्रह्म भगवान् साक्षाद् दृश्यते इति ज्ञानयज्ञफलमित्यर्थः) ॥

अथ षट्चत्वारिंशदधिकशततमे तरङ्गे–'सर्वेन्द्रियवृत्तीनां हृद्याकाशेऽतितेजसि । स्फुरद्दिव्यतनौ कृष्णे प्रावण्यम्, तत्र कारणम् ॥ २० ॥ स तु प्रभुर्घनश्यामोऽवदातोऽतितेजसा । आजानुबाहुयुगलो मनोहरपदद्वयः ॥ २१ ॥ अतिसौम्यो नराकारः किशोरः करुणानिधिः ॥ २२ ॥ तन्मुखैकदृशो मुक्ताः परितः सन्ति कोटिशः । पश्यामि तमहं नित्यं प्रत्यक्षं पुरुषोत्तमम् ॥ २३ ॥ तत्तेजःपुञ्जमध्यस्थ एवाऽद्याऽहं वदामि च । युष्मानपि च पश्यामि निषण्णाँस्तत्र सर्वशः ॥ २५ ॥ यस्मिंस्तेजसि तद्रूपं भवत्येकरसे सिते । तदक्षरात्मब्रह्मादिनामभिः सम्प्रकीर्त्यते ॥ ३० ॥ यस्तत्र भगवान् साक्षात् स परब्रह्मसंज्ञकः । आत्मतत्त्वाभिधश्चाऽसौ पुरुषोत्तम उच्यते ॥ ३१ ॥ मनुष्यसदृशो ह्येष न मर्त्यः पुरुषोत्तमः ॥ ३५ ॥ ध्यायन्ति त्वाकृतिं येऽत्र भगवन्तं मुमुक्षवः । तेषामेवैष तेजस्वी भासतेऽक्षरधामगः ॥ ३७ ॥ एतां बोधयितुं सम्यङ् ममैवेदं जनुर्नृपु ॥ ६१ ॥ भूरितेजसि यः प्रोक्तो भगवान् दिव्यविग्रहः । सोऽहमेव भवान्यत्र स्थितो दिव्यनराकृतिः ॥ ६२ ॥ ज्ञेयस्तदेकद्रष्टाऽहं तेनापि स्याद् रतिर्मयि' ॥ ६४ ॥ (मम हृदये व्याप्ते तेजस्येकभगवन्मूर्तिश्चातिप्रकाशमाना घन-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्यामाऽपि श्वेता द्विभुजा द्विचरणा मनोहराऽतिसौम्या मनुष्याकारा किशोरी परितो निषण्णमुक्तमण्डलैरेकदृष्ट्या निरीक्षिता वर्तते, मयेदानीं सा प्रकटप्रमाणा दृश्यते, सत्संगाऽऽगमनपूर्वं मातृगर्भे तत्पूर्वमपि च सदा दृष्टैवाऽऽसीत्, अहं तत्रत्यानेव नो वदमानान्पश्यामि, तदेकरसतेजोब्रह्माऽक्षरधामप्रकाशे मूर्तिरात्मतत्त्वपरब्रह्मपुरुषोत्तमः, ध्यातुरियं मूर्त्तिरक्षरधाम्नि कैवल्यरूपा भासते, भागवती तन्वाऽपीयं वार्ता कर्तव्याऽस्तीति' तदर्थः)। 'अथ पञ्चनवत्यधिकशततमे तरङ्गे—'तस्मिन्प्रकाशश्च महान् प्रादुर्भवति वै तदा ॥ ३२ ॥ ब्रह्मीभूतः स च स्वस्मिन् नारायणमवेक्षते। ब्रह्माऽहमस्मीति ततोऽनुभवन् स्वं भजेद्धरिम् ३३ः (निजात्मनो ब्रह्मरूपेण दर्शनं भवति। ब्रह्मणि परब्रह्मनारायणस्य दर्शनं भवति. दर्शनकर्तुरपरोक्षसाक्षात्कारः—अहमात्माऽस्मि मयि परमात्माऽखण्डस्थितोऽस्ति, ब्रह्माऽहमस्मीत्यर्थः)॥' अथ चतुरधिकद्विशततमे तरङ्गे—'आनखाग्रादाशिखं च साकल्येनैव वीक्षते ॥ १४ ॥ (नखशिखापर्यन्तं भगवत्स्वरूपं साकल्येन पश्येत्, हृदये साक्षिणि केवलचैतन्ये च पश्येदित्यर्थः)।

अथाऽष्टाधिकद्विशततमतरङ्गे—'नेत्रस्य वृत्तिरेषा या सा स्वरूपैव लक्ष्यते ॥ ५ ॥ भक्तस्तु तां योजयति स्वरूपे परमात्मनः ॥ ६ ॥ ततः सा निर्गुणा भूत्वा जायतेऽतिप्रकाशभा ॥ १२ ॥ कृष्णस्वरूपाऽऽकाराऽथ लक्ष्यते सा सुखात्मिका। एतमस्यसततस्तस्य लीयते कृष्ण एव सा ॥ १३ ॥ (नेत्रादिवृत्तिः परमात्मस्वरूपे योजिता निर्गुणाऽतिशयप्रकाशयुक्ता भगवत्स्वरूपाकारा भगवत्स्वरूपे लीनभावं गता भवतीत्यर्थः)। अथैकदशाधिकद्विशततमे तरङ्गे—'ब्रह्मात्मदर्शनं तेन साक्षात् कृष्णस्य चेक्षणम्' ३०। (ब्रह्मनिष्ठसत्पुरुषे दृढप्रीत्या ब्रह्मात्मदर्शनं परब्रह्मसाक्षाद्दर्शनं च जायते इत्यर्थः)।

अथ त्रयोदशाऽधिकद्विशवतमे तरङ्गे—'तमेव तत्र श्रीकृष्णं कोटिसूर्यसमद्युतिम्।' यथैक्षन्ताऽक्षरे धाम्नि ते तथेमे तमेव माम् १३। (समाधौ धामनि मूर्तिमान् ददातीत्यर्थः)। अथाऽष्टादशाऽधिकद्विशततमे तरङ्गे—'परोक्षं रूपमित्थं हि ज्ञेयं कृष्णस्य तत्त्वतः। २०। निर्गुणस्यैव सम्बन्धाद् यस्य भावा गुणात्मकाः। अपि निर्गुणतां यान्ति ततः कृष्णोऽस्ति निर्गुणः। ३०। यद्यसौ निर्गुणो न स्याच्छुद्धसत्त्वात्मको भवेत्। तत्सम्बन्धात्कथं तर्हि निर्गुणा गोपिकादयः। ३२।' (अक्षरधाम्न्यनादिश्रीकृष्णनारायणो द्विभुजः कोटिकोट्यब्जसूर्याधिकप्रकाशमानः श्यामसुन्दरो मुक्तातिसेवितो महाराजाधिराजाधिराजो निर्गुणो दिव्यगुणोऽस्तीति, तं निर्गुणं कथं शुद्धसत्त्वात्मकं (सगुणं) कथयेत्, यः शुद्धसत्त्वात्मकं कथयेत् तस्य भागवतस्य पूर्वापरं ज्ञानमेव नास्तीति, गोपिकाः कामनया निर्गुणतां गताः, स श्रीकृष्णः शुद्धसत्त्वात्मकः कथं वर्ण्येत, नैव शुद्धसत्त्वात्मकमूर्त्तिः, किन्तु आनन्दमात्रकरपादमुखोदरादिरानन्दघनस्वरूपमूर्तिः प्रत्यक्ष इति भावः')।

अथ विंशत्यधिकद्विशततमे तरङ्गे—'यावत्कालं समाधिः स्यादात्मनो वापि दर्शनम्।६। तत्तज्ज्ञानं समासेन कथयामि निशम्यताम्। एक एव हरिः सारः ॥ १९ ॥ देहत्रयपृथक्सत्तारूप आत्मैव केवलम्। हरिदासोऽहमस्मीति वेदनं ज्ञानमुत्तमम्' ॥ २१ ॥ (निर्विकल्पसमाधावात्मदर्शनं भवेच्चेत्यर्थः')। अथ षड्विंशाधिकद्विशततमे तरङ्गे—'सर्वोपाधिविनिर्मुक्तं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सन्मात्रं ब्रह्म शिष्यते' ॥ १० ॥ (मायिकोपाधिनिवृत्तौ जीवात्मा ब्रह्मसत्तामात्रं लोक्यते इत्यर्थः)। अथ द्वात्रिंशदधिकद्विशततमे तरङ्गे—'कृष्णैकान्तिकसत्प्रासः साक्षात्कृष्ण-निजात्मनोः। सम्यक्स्वरूपबोधो यस्तज्ज्ञानमिति कथ्यते' ॥ ६ ॥ उदकार्थी, अश्वगामी, वृत्तिं द्वेधा बहुधा करोति ॥ १६–१७ ॥ (धाम्न्यपि बहुधा सविकल्पसाक्षात्कारधारया परमात्माऽऽस्मदर्शनं जायते इति भावः)

'अथ पञ्चचत्वारिंशदधिकद्विशततमे तरङ्गे 'चिद्रूपास्ते न हि नरा न स्त्रियश्च भवन्ति हि । १२ । ते स्निग्धभक्ता देहान्ते गत्वा भागवतं पदम्। कृष्णेच्छानुसृतान् देहान् प्राप्नुवन्ति हि निर्गुणान् । १३ । (देहं त्यक्त्वा भगवद्धाम याति तत्र भगवद्रुच्यनुसारेण तस्य मूर्तयः सम्पद्यन्ते यादृशसेवावकाशो जायते तादृशमूर्तिर्भूत्वा भगवत्सेवां करोति, ते सर्वे चित्स्वरूपाः, न नरा वा स्त्रियो विकारदेहा इत्यर्थः')।

'अथ चतुःपञ्चाशदधिकद्विशततमे तरङ्गे 'तेजोराशिर्भवत्येकः कोटीन्द्वर्काऽग्निसन्निभः । यमाहुरक्षरं ब्रह्माऽनन्तं कृष्णस्य धाम च ।६। अस्ति तत्र स्वयं साक्षाद् भगवान् पुरुषोत्तमः ।७। स एव भगवान् साक्षाद् युष्मद्दृग्विषयोऽद्य तु । ८ । अक्षरे धाम्नि या मूर्तिर्वर्तते परमात्मनः। तस्याः साक्षात्तु कृष्णस्य मूर्तेश्चास्ति सदृक्षता । १० । कृष्णस्वरूपलुब्धश्च स तामनुभवेद्धृदि । ११ । उभयोरन्तरं किञ्चिदपि नास्त्येव सर्वथा। वर्णेन वयसा पुष्ट्या तथौन्नत्येन च ध्रुवम् । १२ । स्वबुद्धिस्थाऽऽत्मनि तदान्वीक्षेताऽङ्गुष्ठमात्रकाम् । ततस्तां प्रातिलोम्येन पश्येत्सोऽक्षरधामनि । १७ । जीवात्परत्र कोट्यर्कचन्द्रतेजसि तत्र तु । तां स पश्यति दृष्ट्यग्रे पूर्वं दृष्टा यथा तथा । १८ । अतो योऽस्त्यक्षरे धाम्नि गुणातीते हरिः स्वयम् । स एवाऽस्त्यत्र प्रत्यक्षो नास्त्यल्पाऽपि तयोर्भिदा । १९ । मनुष्याकृतिरप्येष कृष्णो भवति निर्गुणः । अक्षरस्थ इवेत्येव विज्ञेयः सूक्ष्मदर्शिभिः । २० ।' (कोटिकोटिसूर्यचन्द्राऽ-ग्नितेजःसमूहात्मकाऽक्षरधामनि श्रीपुरुषोत्तमभगवान् साकारः क्षराऽक्षरपरः सर्वकारण-कारणम् अक्षरात्मकाऽनन्तकोटिमुक्तसेवितचरणयुगलः, धामस्थमूर्तिरत्रत्यमूर्तिरेकैवाऽति-सदृशतमा, भेदो न भासेत, द्वयोः स्वरूपावस्थोर्ध्वतापुष्टतासमाः, रोममात्रविगुणता नास्ति, तस्याश्चैतस्याश्चैक्यमेव, ताम् बहिर्नेत्रकनीनिकायां कण्ठे हृदये बुद्धौ जीवे तेजःसमूहे गुणाती-ताऽक्षरधाम्नि गुणातीतामत्रापि तां तथाविधां पश्येदिति स्वरूपनिरूपणवार्ता कृता)।

अथ पञ्चपञ्चाशदधिकद्विशततमे तरङ्गे—'सदा कृष्णोऽस्ति साकारो बृहद्धाम्न्यति-तेजसि । योऽन्तर्यामी च सर्वेषां सर्वकारणकारणम् । १४ । अनेककोटिब्रह्माण्डमहाराजश्च निर्गुणः । दिव्याऽऽनन्दमयाऽऽकारः प्रत्यक्षोऽस्ति स वै हरिः । १५ । (तेजोमयस्वाक्षर-धाम्नि साकारः सर्वकारणकारणं सर्वनियन्ता सर्वान्तर्याम्यनन्तब्रह्माण्डराजाधिराजोऽलौकिक-सुखमयमूर्तिर्मायागुणरहितो भगवान् विराजते इतिप्रत्यक्षभगवज्ज्ञानम्)।

अथ षट्पञ्चाशत्तमाधिकद्विशततमे तरङ्गे 'सच्चिद्रूपे स्वात्मनि यः साक्षात्कृष्णं सदा स्थितम् । विद्याद् दिव्याकृतिम् । ८ । (आत्माऽहं प्रकाशवान् सत्तारूपो मम स्वरूपे प्रत्यक्षो भगवान् सदा विराजते इति साक्षात्कारः)। इत्येवं बहुप्रकाराऽऽकाराः साक्षात्कारा मुक्तानां मुक्तस्वरूपयोग्यानां च तत्र तत्र निर्दिष्टाः । अथाऽन्त्यस्य चतुर्विंशतितमे 'भगव-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्भक्तोऽक्षरधाम्नि भगवत्सेवायां वर्तते तत्र साधनानि षोडश दर्शितानि, तानि यथा १ श्रद्धा, २ स्वधर्मः, ३ वैराग्यम् , ४ इन्द्रियनिग्रहः, ५ अहिंसा, ६ ब्रह्मचर्यम् , ७ साधुसमागमः, ८ आत्मनिष्ठा, ९ माहात्म्यज्ञानयुग्भक्तिः, १० सन्तोषः, ११ निर्दम्भता, १२ दया, १३ तपः, १४ महत्सु गुरुभावना, १५ समेषु मित्रभावना, १६ निम्नेषु शिष्यभावना, एतैरेकान्तिको भूत्वा धाम्नि भगवत्सेवायां वर्तते । 'अथाऽन्त्यस्य त्रिंशत्तमे द्विप्रकारा रुचिरभिहिता, यथाहि १ चैतन्यतेजोराशौ श्रीपुरुषोत्तमभगवन्मूर्तिः सदा विराजते इति निश्चयोपासनाभक्तिरुचिः, २ तपस्त्यागनिर्विषयभाववैराग्यादिसाधनानिं भगवत्प्रसन्नतार्थकान्येवेति, तद्वन्तं दृष्ट्वाऽहं भगवान् प्रसन्नो भवामि धन्यवादान् प्रहिणोमीति च । अथ पञ्चवार्तानुसन्धानम् , १ मरणानुसन्धान-पूर्वकवैराग्यम् , २ पूर्वापरीभावात्मकव्यतिरेकसंज्ञकविवेकः, ३ वासनाविलयाऽविश्वासा-ऽनुसन्धानम् , ४ महत्साधुवासनाविलयनिरीक्षणानुसन्धानम् , ५ अनौदासीन्यसहभगवद्भक्त-सहवासभक्तिकरण-जीवनमहालाभ इति । अथाऽन्त्यस्य पञ्चत्रिंशे 'षड्लक्षणयुक्तसाधौ भगवान् सदा निवसति तस्य भगवत्समसेवादिफलं चेति, यथाहि, १ साकारोऽक्षरधामस्थोऽयं प्रत्यक्षो भगवानिति निश्चयः, २ भक्तिकरणे प्रसन्नता, ३ कुस्वभावत्यागपूर्वकभक्तमध्यनिवासः, ४भक्तेभ्य उत्तमपदार्थप्रदता, ५ अपरीक्षकसरलस्वभावः, ६ कुसंगाऽरुचिश्चेति । अथान्त्यस्य षट्त्रिंशे कल्याणाऽसाधारणसाधनान्युक्तानि, १ ब्रह्मज्योतिःस्थसाकारोऽयमेव भगवानिति तदाश्रयः, २ धर्मसहितभक्तिः, ३ तद्भक्तियुक्तसाधुसमागमः इति । उपासनयाऽऽत्मा ब्रह्म दृश्यते इति च । अथाऽन्त्यस्य सप्तत्रिंशे भगवत्स्वरूपज्ञानं नवधोक्तम् , तद् यथाहि, १ दिव्योऽप्राकृतो भगवदाकारः २ भगवत्स्वरूपे कालोऽसमर्थः, ३ धामस्थमुक्ताकारा अपि भगवदाकाराकाराः, ४ भगवान् पुरुषोत्तमः स्वामी दिव्यमूर्तिर्निर्गुणः, ५ भगवद्ध्याताऽपि निर्गुणः, ६ एकदेश-स्थोऽप्यन्वयन्तर्यामी सर्वजीवनं च, ७ एकदेशस्थोऽपि सिद्धः सर्वक्रियाकर्ता, ८ जीवस्वरूप-भिन्नस्वरूपः, ९ स भगवान् मानवो भवतीति च ॥

अथ मुक्तिप्रत्यक्त्वसाक्षात्कारः—अत्र जीवनस्थितौ 'स्वोत्पाद्यस्वविषयकवृत्तिवेद्यः 'स्वं जानामी' त्यत्र साक्षात्कारः, अथ मुक्तिस्थितौ-वित्तिवेद्यवेत्तैक्येन 'सच्चिदानन्दात्मकस्वसाक्षा-त्कारः,यदि मानसमपेक्ष्यते ?, तर्ह्यन्तर्यामी श्रीहरिः स्वयं मानसात्मकः, 'सर्वविधोपास्यस्वरू-पापन्नस्वात्मकप्रकाशाऽभिन्नसाक्षात्कारः', उपासनासम्बन्धेनाऽऽत्मद्रव्यं परमात्माऽऽकारे स्वं साक्षात्करोति । धाम्नि मुक्तानां परमात्मन आत्माऽन्तर्व्याप्तिविषयकद्रव्याऽनुस्यूत-साक्षात्कारः । स्वस्वसमव्याप्तनित्याऽयुतसिद्धवस्तूभयविषयकसाक्षात्कारः, अत्र प्रत्यक्त्व-प्रकाश उभयात्मकः, आत्मात्मकः । परमात्मात्मकः, समव्याप्तात्मकः, विषमव्याप्तात्मकोऽपि च । 'स्वं जानामी' त्यत्र—'स्वः-केवलः, स्वः-सगुणः स्वः-अविनाभावसम्बद्धोभयसमव्याप्तः, स्वः-अविनाभावसम्बद्धोभयविषमव्याप्तश्चेति चतुर्धा विद्यते । केवले 'स्वं जानामी' ति कादा-चित्कस्तु-'स्वज्ञानविषयाऽऽत्मसाक्षात्कारः । सार्वदिकस्तु-स्वाभिन्नज्ञानाऽभिन्नाऽऽत्मसाक्षात्कारः सगुणे तु–'स्वं जानामी' त्यत्र 'सत्त्वचित्त्वानन्दत्वादिप्रकारताकविशेष्यताकप्रत्यक्षविषयः प्रत्यगात्मेति । गुणगुणिभावापन्नचेतनो नित्यधर्मधर्म्यभिन्नो ज्ञानधर्मी वर्तते, अतो 'विशिष्टाऽ-भिन्नज्ञानाऽभिन्नप्रत्यगात्मे'ति साक्षात्कारः । सोऽयं तादात्म्यमुक्तसाक्षात्कारः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ समव्यासपक्षे तु—स्वम्—समव्याप्ताऽविनाभावसम्बद्धात्माऽन्तर्याम्युभयम्, ज्ञानं धर्मात्मकम्, तथा च—'उभयत्वप्रकारकविशेष्यकसाक्षात्कारविषयप्रत्यगात्मेति'। 'समव्याप्ताऽविनाभावसम्बद्धस्वात्मकसाक्षात्काराऽभिन्नप्रत्यगात्मे'ति। अनुस्यूतोभयात्मकसाक्षात्कारोऽयमक्षरब्रह्मणो वर्तते विषमव्यासपक्षे तु—'स्वव्याप्यव्यापकभावापन्ननित्यसम्बद्धविषमव्याप्ताऽऽत्मपरमात्मोभयसाक्षात्कारः, विषमव्याप्तोभयत्वप्रकारकविशेष्यकसाक्षात्कारविषयप्रत्यगात्मे'ति। अत्र सार्वदिकसाक्षात्कारो-'विषमव्याप्ताऽविनाभावसम्बद्धस्वात्मकसाक्षात्काराऽभिन्नस्वरूपो वर्तते, शुकस्य स्थावरजङ्गमात्मकस्वाऽभिन्नपरमात्माऽभिन्नस्वसाक्षात्कारो व्यवर्तत। परमेश्वरस्य नित्यप्रत्यक्षदर्शित्वेन परमेश्वरात्मकभक्तात्मनः स्वामिवत् नित्याऽपरोक्षानुभावोऽभिन्नोभयात्मकः सार्वदिकः, 'जयाया हरिः प्रिय' इत्यत्र षष्ठ्यर्थोऽभेदस्तथा च—'अभिन्नजयाहरिः प्रेमाश्रयः' साक्षात्कारो मन्तव्यः। प्रेमास्ति 'वियोगाऽनवच्छिन्नाऽधिकाऽधिकाऽऽकर्षकमिष्टाऽतिमिष्टाऽऽस्वादपराकाष्ठान्वितः—'अयं मम' 'ममाऽयम्' 'अहमयम्' 'अयमहम्' मत्सर्वमस्मिन्' 'अस्य सर्वं मयी' त्येवमैक्यप्रवाहः। एतदवस्थायां क्वचिदहंधर्मी क्वचिदयंधर्मी, क्वचिदुभौ धर्मिणौ, क्वचिदुभयं धर्मधर्म्यभिन्नम्, तेन स्वैकराजस्य 'एकमेवाऽद्वितीयं ब्रह्मे' त्यपरोक्षसाक्षात्कारो घटते' उत्तमा स्थितिरियम्।

"परब्रह्म परो धर्मो धर्मो ब्रह्मात्मकः परः।
स्वयं धर्मात्मको भूत्वा व्रजेद् ब्रह्मणि तत्त्वताम्" ॥ ४ ॥

अथाऽन्त्यस्याऽष्टात्रिंशे एवं शास्त्रद्वारा निश्चयः, धाम्नि मुक्ताकारा भगवदाकारा सत्या दिव्याः सप्रकाशा द्विभुजाः सच्चिदानन्दाः, दिव्यमुक्तपुरुषप्रसेवितो मुक्तानन्दप्रदः सोऽत्र सर्वनयनगोचरो भवदिष्टदेवो भवत्सेवास्वीकर्ताऽसि, अस्य धामस्थस्य च मम स्वरूपभेदो नास्ति, सोऽक्षरादिनियन्ता सर्वेश्वरेश्वरः सर्वकारणकारणं सर्वोपर्यवतार्युपासनीयश्चेति। अथाऽन्त्यस्यैकोनचत्वारिंशे वचनामृते आत्मस्वरूपं भगवन्माहात्म्यज्ञानञ्च १ आत्मनिष्ठाबलम्, देहात्पृथक्, दुर्गुणज्ञातिरहितः, तेजस्वी ज्ञाताऽमर आत्मा। २—भगवन्माहात्म्यं तु- अनन्तब्रह्माण्डराजाधिराजः, अप्राकृतदिव्यसुखराशिः सुषुप्सिगतजीवविरामदाता, देवेश्वरेश्वराण्यो यत्पादरजः शिरोभिरावहन्ति, सर्वसृष्टिचातुर्यम्, बीजप्रसवजातीयप्रवाहादिकलाः, इत्येतादृशज्ञानरीत्या संगी सत्संगी प्रोक्त इति।

अथ तत्त्वज्ञानम्,-जडस्य चेतनस्य वा पदार्थस्य भावो मूलस्वरूपं तत्त्वं तस्य ज्ञानम्, मूलस्वरूपज्ञानं हि मोक्षोपयोगि, तथा च-मोक्षोपयोगिज्ञानविषयत्वं तत्त्वलक्षणम्, सूक्ष्मस्थूलचिदचिद्विशिष्टशरीरी योऽनुसन्धीयते स मूलतत्त्वात्मकः। मोक्षश्चेद्दशमूलतत्त्वभूतात्मस्वरूपज्ञानाद्भवति, धर्मज्ञानवैराग्यभक्तिषु पराकाष्ठापन्नेषु सद्यो मुक्ता भवन्तीति सुधासिन्धुसारसन्दोहनम्।
दुःसार-कारि-शुभलोह-सुपद्म-मध्यवृत्तश्रिकाऽ-न्त्य-धरणीश-महोललक्ष्यः।
पाराऽऽर्षविद्-वितरणाऽऽकरुणाऽक्षिवीक्ष्याऽऽसन्दोह-सन्धति-चृषाऽङ्गवरोऽस्तु मे मुद् ॥५॥

पण्डित-श्रीकृष्णवल्लभाचार्यः 'स्वामिनारायणः' काव्यकुशलः
श्रीमद्दार्शनिकपञ्चाननः षड्दर्शनाचार्यः, नव्यन्यायाचार्यः, साङ्ख्ययोगवेदान्त-मीमांसातीर्थः, श्रीस्वामिनारायणसम्प्रदायसकलतत्त्वहार्दाऽभिज्ञश्च।
श्रीस्वामिनारायण मन्दिरम्, जूनागढ (सौराष्ट्र)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भगवतः श्रीस्वामिनारायणस्य

संक्षिप्तजीवनदर्शनम्

१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ

श्रीस्वामिनारायणाय नमो नमः

महर्षिश्रीशतानन्दमुनिविरचितं

श्रीहरिवाक्यसुधासिन्धावुपोद्घातप्रकरणम्

श्रीहरिर्जयति धर्मनन्दनः सर्वजीवहितमानुषाकृतिः ।
भक्तिपोषक उदारविक्रमो ब्रह्मधामपतिपूरुषोत्तमः ॥ १ ॥

गोलोकब्रह्मधाम्नो निरतिशयदयापूर्णमानन्दमूर्त्ति
पातुं सद्धर्मवर्त्माऽसुरगुरुविहतं भूतले कोसलेषु ॥
भक्तौ धर्मान्नृमूर्त्या समुदितमखिलप्राणिसंसारहारं
कृष्णं ध्यायाम चित्ते कलिमलहरणं स्वामिनारायणाख्यम् ॥ २ ॥

स जयति सहजानंदस्वामी सत्यो जगद्गुरुः श्रीमान् ।
यत्पादाश्रयमात्रात् त्रुट्यति संसारबंधनं सद्यः ॥ ३ ॥

निजाश्रितानां कृपया स पुंसामुन्मूलयन्संशयजालमीशः ।
जगाद भूयांस्यनुभूतियुंजि सांगस्वभक्त्याढ्यवचोमृतानि ॥ ४ ॥

शतद्वयं सर्वहिताय वर्णैः स्पष्टैस्तु तेषामधिकं द्विषष्ट्या ।
यथाश्रुतं सद्भिरलेखि मुक्तानंदादिभिः साधु यथामनीषम् ॥ ५ ॥

तावंत्यहं वागमृतानि तस्य प्रभोर्निदेशेन तदीयतुष्ट्यै ।
सुसौष्ठवौदार्यमयैः सुपद्यैः स्फुटं शतानन्दमुनिर्ब्रवीमि ॥ ६ ॥

अस्ति श्रीमति गोलोके सर्वलोकविभूषणे ।
नित्याविभूतममलं कार्ष्णं धामोत्तमोत्तमम् ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अप्रमेयमनाद्यं तं निर्गुणं नित्यमद्वयम् । अखंडं सच्चिदानंदरूपं मायातमःपरम् ॥ ८ ॥
कोटिकोट्यर्कचंद्राग्निप्रभाभासुरमुज्ज्वलम् । भक्तैरेकांतिकैरेव प्राप्यं कृष्णप्रसादतः ॥ ९ ॥
यदुच्यते ब्रह्मपुरं ब्रह्म चामृतमक्षरम् । चिदाकाशं च परमव्योमाथ परमं पदम् ॥ १० ॥
श्रीकृष्णो भगवांस्तत्र सदा स्वामी विराजते । सप्रेमराधालक्ष्मीभ्यामर्च्यमानपदांबुजः ॥ ११ ॥
अक्षरात्माऽक्षरपरः सर्वकारणकारणम् । कर्त्ता नियंता सर्वेषां स्वप्रकाशश्च सर्ववित् ॥ १२ ॥
नैकांडजननस्थानलयलीलश्च निर्गुणः । ब्रह्मभूतानंतकोटिमुक्तोपास्यांघ्रिपंकजः ॥ १३ ॥
मायापुरुषकालादिस्वशक्तिप्रेरको वशी । नैकब्रह्मांडराजाधिराजः स्वच्छन्दवर्त्तनः ॥ १४ ॥
कोटिकंदर्पलावण्यो जलदश्यामसुंदरः । अनर्घ्यदिव्यविविधवासोभूषणभूषितः ॥ १५ ॥
रत्नेन्दुसारमुकुटशेखरालिविराजितः । पूर्णशारदचंद्रास्यमंदहासमनोहरः ॥ १६ ॥
सदयांबुजपत्राक्षो मकराकृतिकुण्डलः । गोपीगोपानंदकरो वेणुवादनतत्परः ॥ १७ ॥
अनेककोटिसूर्येंदुप्रकाशातिप्रभोज्ज्वलः । चक्रादिभिर्मूर्त्तिमद्भिः सेवितश्च निजायुधैः ॥ १८ ॥
श्रीदामाद्यैश्च नंदाद्यैः पार्षदप्रवरैस्तथा । अणिमादिभिरैश्वर्यैर्विद्याद्याभिश्च शक्तिभिः ॥ १९ ॥
अनंतकल्याणगुणरत्नाब्धिर्दिव्यविग्रहः । संस्तूयमानचरितो सूक्तैश्च निगमैरपि ॥ २० ॥
व्यूहस्य वासुदेवादेः केशवादेश्च धारकः । वराहाद्यवताराणां धर्त्ता भक्तजनेष्टदः ॥ २१ ॥
वेदादौ प्रोच्यते यश्च परं ब्रह्म परात्परः । नारायणो वासुदेवस्तथा परमपूरुषः ॥ २२ ॥
परमात्मा च विष्णुश्च प्रधानपुरुषेश्वरः । परमेश्वर ईशेशः पुरुषोत्तम इत्यसौ ॥ २३ ॥
भगवानात्मनामात्मा वर्षे स भुवि भारते । प्रादुर्भवति सद्धर्मरक्षार्थं च युगे युगे ॥ २४ ॥
सांप्रतं च कलेः प्राप्य बलं भुवि समेधितैः । असुरांशगुरुक्ष्मेशैः क्लिष्टं धर्मं सुरक्षितुम् ।२५।
अधर्मं चोन्मूलयितुं पातुं भक्तानृषींश्च सः । निजभक्तिं प्रथयितुं सर्वाभीष्टप्रदां पराम् ॥
स्वदिव्यमूर्त्तौ जनताचेतसां च समाधये । सकलैश्वर्यजुष्टेन जीवकल्याणकारिणा ॥ २७ ॥
आत्मीयेनैव रूपेण जज्ञे हरिरिति श्रुतः । जन्मकर्माणि तस्यादौ कथयामि समासतः ॥ २८ ॥
महर्षयो मरीच्याद्या एकदा बदरीवने । दर्शनार्थमुपाजग्मुर्नरनारायणप्रभोः ॥ २९ ॥
दृष्ट्वार्चयित्वा च विभुं ते निषेदुस्तदंतिके । तानपृच्छन्नृणां क्षेमं प्रभुस्तद्धितकृत्तपाः ॥ ३० ॥
प्रोचुस्ते जायमानं तमसुरोपद्रवं भुवि । तावद्धर्मोऽपि तत्राऽऽगात् सहमूर्त्या स्वभार्यया ॥३१॥
तं दृष्ट्वा सोद्धवस्तत्र निषण्णो भगवानपि । मानयित्वा स्वपितरमुपावेशयदासने ॥ ३२ ॥
उवाच च मुनिप्रोक्तं तस्मै तद्वृत्तमप्यसौ । तदादरात्स शुश्राव विप्रास्ते चाप्यनाकुलाः ।
एवमेकाग्रचित्तेषु तेषु शृण्वत्सु तद्वचः । कैलासान्मुनिरभ्यागाद् दुर्वासास्तद्दिदृक्षया ॥ ३४ ॥
भगवन्मुखदत्ताक्षाः पिबंतस्तद्वचोऽमृतम् । तमागतं न ददृशुस्ते समाधिस्थिता इव ॥ ३५ ॥
नारायणोऽपि नापश्यत्तं वार्त्तासक्तमानसः । तदा मुनिः स आत्मानं मेने तदपमानितम् ॥३६॥
मानभंगसमुद्भूतक्रोधाग्निविवशोऽथ तान् । सर्वानपि शशापासावूर्ध्वंदोरुच्चतर्ज्जनिः ॥ ३७ ॥
न सन्मानः कृतो यस्माद्भवद्भिरिह मे ततः । मानुष्य आसुरीं पीडां सर्वेऽपि प्राप्स्यथ द्रुतम् ॥
तच्छ्रुत्वा सहसा सर्वे बभूवुर्व्यग्रचेतसः । सद्यो धर्मः समुत्थाय तं प्रणम्याऽक्षमापयत् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नापमानः कृतोऽस्माभिर्महर्षे बुद्धिपूर्वकम् । मान्यस्य तव तस्मात्त्वं कर्त्तुं महस्यनुग्रहम् ॥४०॥
एवं संप्रार्थितो विप्रो धर्मेण विनयेन सः । उवाचानुग्रहं कुर्वन् शृणु धर्म वचो मम ॥ ४१ ॥
अज्ञानजोऽपि मे शापो नान्यथा भविता क्वचित् । किंतु नारायणो ह्येष ततो मोचयिताऽस्तु वः ॥
मनुष्यभूतयोः पुत्रो दंपत्योर्वामसौ भुवि । भूत्वा युवां मुनींश्चैतानसुरेभ्योऽविता ध्रुवम् ।४३।
इत्युक्त्वा स प्रभुं नत्वा पुनः श्वेताचलं ययौ । अथाह भगवान्भीतं शापादाकस्मिकाद् वृषम् ।।
निष्कारणमिमं शापं निवारयितुमीश्वरः । भवाम्यथापीच्छयासौ कारणात् स्वीकृतो मया॥४५॥
अत्रमेंऽश्चासुरा अस्मिन्वर्षे प्राप्य बलं कलेः । संत्येधितास्तदुच्छेदः सांप्रतं मे चिकीर्षितः ॥
अतोऽहं त्वत्सुतो भूत्वा तदुच्छेदं समाचरन् । मनुष्यभूतान्सर्वान्वो रक्षिष्यामि न संशयः ।

अतो यथेष्टं भुवि मानुषेषु सर्वेऽपि यूयं भवताऽपशंकम् ।
त एवमुक्ताः प्रभुणा वृषाद्याः प्रणम्य तं जन्म नरेष्वगृह्णन् ॥ ४८ ॥

कोसलेष्वस्ति देशेषु पुरमिट्टारसंज्ञकम् । बालशर्माभिधस्तत्र बभूव द्विजसत्तमः ॥ ४९ ॥
पण्डितोपपदः सामवेदी सावर्णिगोत्रजः । सारवज्ज्ञातिरखिलशास्त्रविद्धर्मसंस्थितिः ॥ ५० ॥
भार्या भाग्यवती नाम्ना तस्यासीच्च पतिव्रता । तयोः पुत्रो धर्मदेवो बभूव मुनिशापतः ॥५१॥
विक्रमार्कक्ष्मेशशके रसांकनगभूमिते । एकादश्यां प्रबोधन्यां मध्याह्ने प्रादुरास सः ॥ ५२ ॥
देवशर्मेति तन्नाम द्वादशेऽह्नयऽकरोत्पिता । उपनीतो यथाकालं सोथासीत्सद्गुणाकरः ॥५३॥
अस्ति तस्मिञ्जनपदे छुप्पयो ग्राम उत्तमः । कृष्णशर्माभिधस्तत्र ब्राह्मणोऽभूदुदारधीः ॥ ५४ ॥
भार्या तस्य भवान्याख्या शुद्धबुद्धिरभूत्सती । मूर्त्तिस्तयोरभूत्पुत्री मुनिशापाद् वृषांगना ॥५५॥
शकाब्देऽष्टांकसप्तेंदुप्रमिते कार्त्तिके शुदि । पौर्णमास्यां दिनांते स जज्ञे प्रेमवतीति ह ॥५६॥
बाल्येपि सा कृष्णभक्तौ निरता नितरामभूत् । ततो भक्तिरिति ख्याता बभूव जगतीतले ॥५७॥
कृष्णशर्माऽथ कन्यां स्वां बुद्धिशीलगुणान्विताम् । अनुरूपाय विधिवत्प्रददौ देवशर्मणे ॥५८॥
जामातरं च स्वगृहे संप्रार्थ्य तमवासयत् । पित्रासौऽनुमतस्तत्र समुवास यथासुखम् ॥५९॥
गृहस्थधर्मानखिलान्सपत्नीको यथाविधि । आचचार ततो लोके धर्मसंज्ञामवाप सः ॥ ६० ॥
धर्मनिष्ठः कृष्णभक्त इति लोकाः सुमेधसः । तमेवैकं हि निर्दोषं सर्वदा बहु मेनिरे ॥ ६१ ॥
तदा मत्सरिणो दुष्टा असुरांशा नरा भृशम् । तं मुहुः पीडयामासुः सभार्यमतिनिर्दयाः ।६२।
सपत्नीकस्ततस्तीर्थयात्रामुद्दिश्य निर्गतः । तद्ग्रामात्स उपेयाय धीरो वृंदावनं वनम् ॥ ६३ ॥
तावत्तत्र मरीच्याद्या मुनिशप्ता महर्षयः । तत्र तत्र नृपूत्पन्ना आययुर्दैत्यपीडिताः ॥ ६४ ॥
समदुःखैरुपेतस्तैर्द्धर्मस्तत्र महामतिः । कृष्णमाराधयामास श्रद्धालुर्दृढनिश्चयः ॥ ६५ ॥
तस्मै प्रसन्नः श्रीकृष्णः साक्षाद्दत्वा स्वदर्शनम् । उवाच यूयमचिरान्निर्भया वै भविष्यथ ॥६६॥
कृष्णावतारे निहता असुरा भूरिशो मया । सांप्रतं भुवि जातास्ते तेषु ये तीव्रवासनाः ॥ ६७ ॥
निबद्धवैरा मयि ते युष्मान् ज्ञात्वैव मामकान् । पीडयंति भृशं तेषामुच्छेदो भविता द्रुतम् ६८
नारायणर्षिरूपेण प्राप्य त्वत्पुत्रतामहम् । हरिकृष्ण इति ख्यातः करिष्ये रक्षणं हि वः ॥६९॥
विधाय तेषामुच्छेदं धर्ममेकांतिकं भुवि । अहं प्रवर्त्तयिष्यामीत्युक्त्वा कृष्णस्तिरोदधे ॥ ७० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्थं हरेः प्रसादं स प्राप्य स्वग्राममाययौ । हरिप्रसाद इत्याख्यां तत एवाप च क्षितौ ॥ ७१ ॥
अचिरेणाऽथ कालेन भगवानसुरांतकः । आविरासीत्ततो भक्तौ भक्तानंदमहोदधिः ॥ ७२ ॥
शके नगाग्निवस्विदुमिते मासि मधौ शुदि । नवम्यां निश्यऽभूद्राविर्मुहूर्त्ते स तु पंचमे ॥ ७३ ॥
तदा महोत्सवो धर्मगृहेऽभूच्च दिवौकसः । कुसुमान्यभिवर्षन्तो दुंदुभीःस्वानवादयन् ॥७४॥
हर्षादप्सरसोऽनृत्यन् जगुर्गंधर्वकिन्नराः । आशिषो ददतश्चक्रुर्वेदघोषं महर्षयः ॥ ७५ ॥
प्रसन्नानि मनांस्यासन्सतां च त्रिदिवौकसाम् । सभयान्यसुराणां च सर्वेषां धर्मविद्विषाम् ।७६।
मंगलानि जगुर्नार्यो विप्राश्च ददुराशिषः । ववुः सुखकरा वाता निर्मलेन्दूद्भ्वऽभूच्च खम् ॥ ७७॥
ददौ दानानि विप्रेभ्यो धर्मः कृत्वा च जातकम् । आनंद एव सर्वत्र तदाऽभूज्जगतीतले ॥७८॥
वालग्रहा दिने षष्ठे तत्राऽऽयुः कोटरादयः । जिघांसूंस्तान्स्वदृष्ट्यैव स बालोऽद्रावयद्दहन् ॥७९॥
मार्कंडेयोऽथ तत्रैत्य शतरात्रव्यतिक्रमे । अभ्यर्च्याभ्यर्थितः पित्रा नामकर्माऽकरोद्विभोः ॥८०॥
निजाश्रितापद्धरणात्कर्कराशिजनेरपि । हरिरित्यभिधां तस्य स चकारादितो मुनिः ॥ ८१ ॥
स्वस्मिन्भक्तहृदाकर्षाच्चैत्रमासजनेस्तथा । कृष्णवर्णाच्च विदधे कृष्ण इत्यभिधां ततः ॥ ८२ ॥
चंद्रोपमः सदाह्लादे दैत्यत्रासे यमोपमः । भवितेत्यभिधां चक्रे हरिकृष्ण इति द्विजः ॥८३॥
त्यागज्ञानतपोयोगैर्भविता शंकरोपमः । बालोऽसावित्यसौ चक्रे नीलकंठाभिधां ततः ॥ ८४ ॥
द्वात्रिंशल्लक्षणैश्चैष भाव्यो भूरि जनेश्वरः । सर्वेषां वः कष्टहर्त्तेत्याह धर्मं ततो मुनिः ॥८५॥
ततः सद्वस्त्रभूषाद्यैस्तेन सन्मानितो मुनिः । प्रयागं प्रययौ सोऽथ सभार्योऽतिमुदं ययौ ।८६।
मातृपितृज्ञातिजनान्सुखयन्बाललीलया । बालो हरिः प्रतिदिनं ववृधे बालचंद्रवत् ॥ ८७ ॥
हरिप्रसादः संस्कारान् यथाकाल यथाविधि । अन्नाशनादीन् क्रमशश्चकार च महोत्सवम् ॥८८॥
चौलांतेऽब्दे तृतीयेऽथ कालीदत्तासुरो हरिम् । जिघांसुस्तद्दृशा मुह्यन्मुहुर्भ्रान्त्वा ममार ह ।८९।
असुरोपद्रवाद्भीतो धर्मो ग्रामं विहाय तम् । सभार्यः ससुतोऽयोध्यामेत्याऽऽवासमथाऽकरोत् ॥
तत्र कृतोपनयनोऽष्टमेऽब्देऽधीतवान् हरिः । सांगवेदपुराणादीन्कालेनाल्पेन धर्मतः ॥ ९१ ॥
ततश्चतुर्भ्यो निश्चित्य बुद्ध्या सारचतुष्टयम् । अलेखयत्पृथक्कृत्य तच्चाऽरक्षन्निजांतिके ॥ ९२ ॥
तत्र श्रीमद्भागवतात्स्कंधौ दशमपंचमौ । श्रीवासुदेवमाहात्म्यं स्कांदात्सारमलेखयत् ॥ ९३ ॥
भारताद्भगवद्गीतां विष्णुनामसहस्रकम् । तथा विदुरनीतिं चेत्येतं सारमलेखयत् ॥ ९४ ॥
धर्मशास्त्राच्च सकलाद्याज्ञवल्क्यस्मृतिं स च । अलेखयत्पृथक्सारमिति सारचतुष्टयम् ॥९५॥
धर्मज्ञानविरागाढ्यां भक्तिं मात्रे स वत्सरे । एकादश उपादिश्य दिव्यां तस्यै ददौ गतिम् ।९६।
पित्रे यथावत्स्वज्ञानं दत्त्वा तस्मा अपि प्रभुः । ददौ दिव्यां गतिं तौ च मोचितौ विप्रशापतः ।
तत्पार्श्वे एव तावास्तां दिव्यदेहौ सदास्थितौ । हातुमैच्छद्गृहं सोपि नैष्ठिकव्रतमास्थितः ॥ ९८ ॥
अनापृच्छ्यैव बंधूःस्वांस्तीव्रवैराग्यवेगतः । तपसे कृतसंकल्प एकाकी निर्ययावुदक् ॥ ९९ ॥
स्वाच्छादनं तु कौपीनमैणं चर्म च मेखलाम् । दंडं कमंडलुं भिक्षापात्रं च जलगालनम् ।१००।
दधद्यज्ञोपवीतं च कंठे द्वे तुलसीस्रजौ । सचंद्रकोर्ध्वपुंड्रांकं करे च जपमालिकाम् ॥ १०१ ॥
शालग्रामं बालकृष्णं समुद्गेऽल्पक एकके । संस्थाप्य वस्त्रखंडेन बद्ध्वा कंठे दधच्च तम् १०२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दधत्सारचतुष्कस्य पुस्तिकां स्कंधलंबिताम् । उत्तरन्सरयूं दैत्यं स्वक्षेपकममोहयत् ॥ १०३ ॥
हिमालयोपत्यकासु चरन्कतिपयैर्दिनैः । मुक्तनाथं स संप्राप्यत्र क्षेत्रेऽकरोत्तपः ॥ १०४ ॥
उग्रेण तपसा साक्षात्प्रासादयदहस्करम् । मासान्कतिपयांस्तत्र स्थित्वाऽन्यवनमभ्यगात् १०५ ॥
महत्यरण्ये विचरन् शार्दूलादिभयंकरे । गोपालसंज्ञं योगींद्रं वटाधस्ताददर्श सः ॥ १०६ ॥
तेनातिमानितः प्रीत्या वर्षमेकं तदंतिके । वसन्नष्टांगयोगस्य चकाराभ्यासमादरात् ॥ १०७ ॥
सिद्धयोगोऽल्पकालेन तस्मै दत्वा स्ववेदनम् । प्रापय्य तं सिद्धगतिमादिवाराहमागमत् १०८॥
नीलकंठस्तपः कुर्वंस्तीर्थानि विचरंस्ततः । प्राप्तः सीरपुरं भूपो यत्राभूत्सिद्धवल्लभः ॥ १०९ ॥
राज्ञाऽतिमानितस्तत्र चातुर्मास्यमुवास सः । सिद्धाभिमानिनां दर्पमसुराणामपानुदन् ॥ ११०॥
साधुं गोपालदासाख्यमावत्तदभिचारतः । दुष्प्रतिग्रहकुष्णांगं विप्रं चाघादमोचयत् ॥ १११॥
ततो देव्याः स कामाक्ष्याः समीपग्राममाययौ । तत्र विप्रः पिबैकोऽभून्महाकाल्या उपासकः ॥
मंत्रयंत्राभिचाराद्यैः स्वग्राममागतानैर्थिकान् । मांत्रिकानपि यश्चक्रे स्वशिष्यान्मद्यपाग्रणीः ॥ ११३॥
महाभिमानिनं स्वस्मिन् युंजंतं मंत्रदेवताः । तं हरिस्वौजसा चक्रे शिष्यमेवाऽपराजितः । ११४।
ततो ययौ नीलकंठो नवलक्षाख्यपर्वतम् । स्वदर्शनेन तत्रत्यान्सिद्धसंघानमोदयत् ॥ ११५ ॥
गंगासागरमेत्याऽथ नावोत्तीर्य सखाडिकाम् । कपिलस्येक्षणं चक्रे तत्र मासमुवास च ॥ ११६॥
ततो जगन्नाथपुरीं प्राप्य मासान्दशावसन् । तत्रस्थासुरसंघानां स्वौजसाऽपाहरन्मदम् । ११७।
तदतिक्रमविभ्रांतास्तेऽसुरास्तु परस्परम् । शस्त्रैर्निहत्य निधनं प्रापुः सद्यः सहस्रशः ॥ ११८ ॥
आदिकूर्मं ततः प्रायात्ततोऽसौ मानसे पुरे । सत्रधर्मनृपद्वाराण्युचिच्छेदासुरव्रजम् ॥ ११९ ॥
वेंकटाद्रिं ततः कांचीं गत्वा श्रीरंगमावसन् । अमोचयद् दुराचारात्तत्रत्यान्वैष्णवव्रजान् । १२०।
तत्र मासद्वयं स्थित्वा सेतुबंधमुपाययौ । ततः सुंदरराजं स दृष्ट्वाऽरण्यमगान्महत् ॥ १२१ ॥
तत्र पंचाहमन्नांबु न प्राप्तः षष्ठवासरे । मध्याह्ने कूपमासाद्य नित्यकर्म समाचरत् ॥ १२२ ॥
शालग्रामं ताम्रपात्रे निधाय निगमं पठन् । चतुःकुण्ड्युदकेनासावभिषेकं समाचरत् ॥ १२३ ॥
अतीव तृषितः शालग्रामस्तदखिलं जलम् । पीत्वाऽतृप्यत साश्चर्यं तदासौ हृद्यचिंतयत् ॥ १२४॥
तृषात्वस्य निवृत्तैव क्षुन्निवृत्तिः कथं भवेत् । नास्त्यन्नं वा फलाद्यत्र नैवेद्यं कल्पयामि यत् १२५॥
इति चिंतयतस्तस्य सन्निधौ शंकरः स्वयम् । गौर्या सह वृषारूढः प्रागस्थात् कार्पटाकृतिः ॥
मानयित्वा सविश्वर्थमुपेत्य ध्यानमास्थितम् । ददौ सक्तु प्रस्थमस्मै यावदर्थं स चाग्रहीत् १२७॥
शालग्रामाय नैवेद्यं तेन कृत्वाथ तत्स्वयम् । बुभुजे हरिकृष्णोपि ततो भूतपुरीमगात् ॥ १२८॥
तत्र रामानुजाचार्यप्रतिमादर्शनार्चने । कृत्वा कुमारिकाक्षेत्रं स जगाम तपोनिधिः ॥ १२९ ॥
ततो दृष्ट्वा पद्मनाभमुपगम्य जनार्दनम् । प्रापाऽऽदिकेशवं चायान्मलयाख्यं कुलाचलम् ॥ १३०॥
साक्षिगोपालमालोक्य पुंडलीकपुरं ययौ । श्रीविट्ठलेशनिकटे तत्र मासद्वयं स्थितः ॥ १३१ ॥
ततः स दंडकारण्ये विचरन्नासिके पुरे । श्रीरामदर्शनं कृत्वा त्र्यंबकेश्वरमाययौ ॥ १३२ ॥
उत्तीर्य तापीं रेवां च महीं साभ्रमतीं ततः । भीमनाथेक्षणं कृत्वा गोपनाथमुपाययौ ॥ १३३ ॥
पंचतीर्थी स विदधत्प्राप लोजपुरं ततः । रसेषुवस्विंदुमिते शके षष्ठ्यां नभोवदि ॥ १३४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्रोद्धवावतारस्य श्रीरामानंदवर्णिनः । मुक्तानंदादयः शिष्या दृष्ट्वा तं बहु मेनिरे ॥ १३५ ॥
साधुलक्षणसंपन्नान् ज्ञात्वा तान्सह तैरसौ । उवास कतिचिन्मासान्प्रीणयंस्तान्सदुक्तिभिः १३६॥
एवं तीर्थानि विचरंस्तत्र तत्र स्थितं नृपु । उन्मूल्याऽधर्ममेकांतधर्ममस्थापयत्प्रभुः ॥ १३७ ॥
अथ तैः साधुभिः साकं ग्रामे सौ पिप्पलाह्वये । प्राप्तं रामानंदमुनिं श्रुत्वा तं द्रष्टुमाययौ ॥

ज्येष्ठासितद्वादशिकादिनेऽसौ ददर्श तं नैष्ठिकवर्णिवेषम् ।
प्रणम्य भक्त्या निषसाद तस्य पार्श्वे भृशं तेन च मानितोऽसौ ॥ १३९ ॥

दर्शनान्नीलकंठस्य भृशमानंदमेत्य सः । अपृच्छत्तस्य वृत्तांतमतिकृशतनोस्ततः ॥ १४० ॥
सोऽथाशेषं स्ववृत्तांतं जन्मादितद्दिनावधि । अनुक्रमेणाकथयत्सर्वेषां शृण्वतां सताम् ॥ १४१ ॥
जन्मस्थानं च पितरौ गोत्रं वेदं गुरुं स्वकम् । इष्टदेवं तपोयोगं तीर्थयात्राक्रमं तथा ॥१४२॥
यथावद्विस्तरेणाह तच्छ्रुत्वा सोऽब्रवीन्मुदा । अस्मदीयोसि भद्रं ते प्रेष्ठोऽसि मम निश्चितम् ॥
प्रयागे त्वत्पिता धर्मो दीक्षां मत्प्राप वैष्णवीम् । मदाज्ञया कृष्णभक्तिं मुमुक्षुभ्य उपादिशन् ॥
कोसलेष्ववसत्तस्य पुत्रस्त्वं नैष्ठिकव्रती । तातात्धिकोऽसि स्वगुणैः श्रुतपूर्वोऽसि सज्जनात् ॥
यथासुखं वसात्रेति श्रुत्वा तद्वचनं हरिः । प्राप्तानंदोऽवसत्तत्राऽऽनंदयंस्तं च तच्छ्रितान् ॥
एकादश्यां प्रबोधन्यां दीक्षां भागवतीं ततः । स प्रापाऽथ गुरुस्तस्य नामद्वितयमाह सः १४७॥
सहजानंद इत्येकं सदानंदस्य दर्शनात् । अन्यन्नारायणमुनिरिति तद्गुणदर्शनात् ॥ १४८ ॥
संवत्सरे व्यतीतेऽथ तस्य निर्दोषतां स्वयम् । धर्मपालनसामर्थ्यं साधुतां च गरीयसीम् ॥१४९॥
दृष्ट्वा धर्मधुरां स्वीयां सर्वसद्गुणमंडिते । नैष्ठिकेंद्रे न्यधात्तस्मिन्सर्वसाधुजनप्रिये ॥ १५० ॥
मार्गशुक्लत्रयोदश्यां योगधारणया स्वयम् । मानुषं देहमुत्सृज्य विशालामगमत्पुनः ॥ १५१ ॥
ततः कृष्णो गुरोः कृत्वा यथाविध्यौर्ध्वदैहिकम् । प्रतापं प्रथयन् स्वस्य चकाराऽधर्मकृंतनम् ॥
स्वगुरोराश्रितान्साधून्वर्णिनो गृहिणश्च सः । सच्छास्त्रस्योपदेशेन समभावयदादरात् ॥१५३॥
स्वप्रतापेन चेतांसि तेषां स्वस्मिन्समाकृषत् । ततो दिग्विजयं चक्रे स्वशिष्यैः परिवारितः॥१५४॥
नानादेशेषु विचरन्नुत्खनन्वृषवैरिणम् । धर्मज्ञानविरागाढ्यां भक्तिं प्रावर्त्तयद्भुवि ॥ १५५ ॥
असुरांशगुरून् जित्वा वादैः पापकृतो बहून् । सद्धर्मे वर्त्तयामास मद्यमांसादि हापयन् ॥

अलौकिकैश्वर्यमवेक्ष्य तस्य देशेषु सर्वेषु नराश्च नार्यः ।
तदाश्रयं साधु विधाय सर्वे तस्यैव भक्तिं विदधुश्च साक्षात् ॥ १५७ ॥

सद्यः समाधिं बहवोऽभिलेभिरे तदीक्षयैवाऽकृतसाधनास्ते ।
तस्मिन्नवबंधुर्दृढबुद्धिमीशो जज्ञुस्तमेवाखिलकारणं च ॥ १५८ ॥

कांश्चिच्छ्रीकृष्णरूपं च गोलोकेऽक्षरधामनि । लक्ष्मीराधाद्युपेतं स्वं दर्शयामास स प्रभुः ॥१५९॥
वैकुण्ठे विष्णुरूपं स्वं लक्ष्मीनंदादिसेवितम् । कांश्चित्प्रदर्शयामास समाधौ नृन्स ईश्वरः ॥
निरन्नमुक्तोपेतं स्वं महापुरुषरूपिणम् । श्वेतद्वीपेऽमृते कांश्चित्स समाधावदीदृशत् ॥ १६१ ॥
कांश्चिदव्याकृते युक्तं लक्ष्मीकीर्त्यादिशक्तिभिः । स्थितं स्वं भूमरूपेण दर्शयामास मानवान् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नारायणर्षिरूपेण संस्थितं बदरीवने । नरादियुक्तं स्वं कांश्चित्समाधौ नूनदर्शयत् ॥ १६३ ॥
योगेश्वरस्वरूपेण स्थितं स्वं क्षीरवारिधौ । लक्ष्म्यादियुक्तं कांश्चिचादर्शयच्छेषशायिनम् ॥१६४॥
हिरण्मयाख्यपुरुषरूपेणादित्यमंडले । संस्थितं स्वं नरान् कांश्चित्समाधौ समदर्शयत् ॥१६५॥
कांश्चिच्च यज्ञपुरुषरूपेणाग्नेयमंडले । संस्थितं स्वं स भगवान्दर्शयामास मानवान् ॥ १६६ ॥
अवस्थात्रितयातीतं सच्चिदानंदलक्षणम् । दृष्ट्राख्यं ब्रह्मरूपं स्वमैक्षयत्कांश्चन प्रभुः ॥ १६७ ॥
कांश्चिद्वैराजरूपेण स्थितं स स्वमदर्शयत् । कांश्चिच्च दर्शयामास द्वीपखंडाधिदेवताः ॥१६८ ॥
षड्क्रदेवताः कांश्चित्क्रमेणादर्शयत्स च । क्वचिद् दूरस्थभक्तेभ्यः प्रादात्साक्षात्स्वदर्शनम् ।१६९।
क्वचिद् दूरस्थभक्तैः स्वे गृहे स्वप्रतिमांतिके । बुभुजे घृतनैवेद्यमाश्चर्यं जनयन्स च ॥ १७० ॥
अंतकाले क्वचिद्भक्तान्निनीपुर्धाम चात्मनः । तद्ग्रामकमेत्य साक्षात्स्वमैक्षयत्स निजानिजान् १७१।
अलौकिकैश्वर्यमित्थं दर्शयं तं जनान् हरिम् । सहस्रशो जना दृष्ट्वा साश्चर्यं विविदुः प्रभुम् ॥
स्वं स्वं मतं स्वस्वगुरून् हित्वा ते दृढनिश्चयाः । तमेव भेजुः प्रत्यक्षं दीक्षाग्रहणपूर्वकम् १७३॥
वादेन जेतुं संहत्य बहवो मतवादिनः । न शेकुस्तं तदा नत्वा प्रोचुः प्रांजलयोऽखिलाः १७४॥
स्वमेवैकोऽसि भगवानिति विद्मोऽद्य निश्चितम् । दिदृक्षामः स्वेष्टदेवान् कृपया तान्प्रदर्शय १७५॥
अथ तत्कृपया सद्यः समाधिं प्राप्य ते हृदि । स्वस्वेष्टदेवान्ददृशुः स्वस्वशास्त्रश्रुतान्पृथक् १७६॥
वल्लभीयास्तथा माध्वा नैंबादित्याश्च वैष्णवाः । तं बालकृष्णं ददृशुर्वृंदावनविहारिणम् ॥१७७॥
रामानुजास्तु ददृशुः श्रीमन्नारायणं च तम् । रामभक्ता रामरूपं ब्रह्मज्योतिश्च शांकराः ॥१७८॥
शैवाश्च पार्वतीकांतं सौरास्तं च हिरण्मयम् । दैवीरूपं तथा शाक्ता गाणपत्या गणाधिपम् १७९॥
पिंगांबरं च यवना जैनास्तीर्थंकरं च तम् । ददृशुर्व्युत्थितास्तेऽथ तं जगुः सर्वकारणम् ॥१८०॥
ततस्तदाश्रयं कृत्वा भेजुः प्रत्यक्षमेव तम् । एवं प्रताप एकांतधर्मं सोऽस्थापयत्क्षितौ ॥१८१॥
आढ्यैः स्वभक्तैर्गृहिभिः सोऽन्नसत्राण्यचीकरत् । विष्णुयागमहारुद्रातिरुद्रांश्च यथाविधि ॥
अतीतृपच्च मिष्टान्नैर्ब्राह्मणान्स सहस्रशः । दानानि दापयामास तत्र तत्र च भूरिशः ॥१८३॥
साधुब्राह्मणदेवार्चा अहिंसांश्च मखान्मुहुः । कारयामास चाधर्मपाखंडोच्छेदनं भुवि ॥ १८४ ॥
यत्र यत्राचरद् भूमौ तत्र तत्र स सर्ववित् । स्वभक्तान्बोधयामास सच्छास्त्राणां रहोऽखिलम् ।
धर्ममात्मपरज्ञानं वैराग्यं भक्तिमुत्तमाम् । यथावत्कथयामास सभेदं च सविस्तरम् ।१८६।
एवमानंदयन्भक्तान्सोऽवसद् दुर्गपत्तने । अभयक्ष्मेशतत्पुत्रभक्तिवश्यस्तदालये ॥ १८७ ॥
जन्माष्टम्यन्नकूटादीन्वसंस्तत्र महोत्सवान् । महद्भिरेव संभारैः सोऽनुवर्षमकारयत् ॥ १८८ ॥
साधवो वर्णिनस्तत्र गृहिणो नैकदेशतः । तद्दर्शनार्थमाजग्मुस्तेषु तेषु मुहुर्मुहुः ॥ १८९ ॥
नानाविधांशुकाभूषागंधपुष्पस्रगादिभिः । पुपूजुस्ते च भक्त्या तं यथाशक्ति यथोचितम् १९०
साधून्सहस्रशस्तत्र ब्राह्मणांश्चोत्सवेषु सः । भक्ष्यभोज्यैर्बहुविधैस्तर्पयामास सादरम् ॥१९१॥
हरेस्तस्यांगचिह्नानि चेष्टा नैसर्गिकीस्तथा । कथयामि समासेन तदीयध्यानसिद्धये ॥ १९२ ॥
प्रभोरस्यांघ्रितलयोर्मध्येस्तः शोणयोर्द्वयोः । अविच्छिन्ने ऊर्ध्वरेखे जाते मूलाग्रयोर्द्विधा ॥१९३॥
दक्षपादतलेंऽगुष्ठसमीपेस्ति सुशोभनः । मिलन्निवोर्ध्वरेखाया भागं चैवाग्रिमं यवः ॥१९४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्रैवोभयतश्चोर्ध्वरेखामस्त्यञ्जमंकुशम् । ध्वजाष्टकोणवज्राणि स्वस्तिकश्च सजांबवः ।। १९५ ।।

दक्षपादांगुष्ठनखे रेखास्त्येका च पाटला । अंगुष्ठस्य बहिर्भागे तिलको वर्त्ततेऽस्य च ।। १९६ ।।

उपांगुष्ठांगुलीवामपार्श्वेऽस्ति तिलकस्तथा । अंत्यांगुलिबहिर्भागे तिलकश्च नखांतिके ।। १९७ ।।

वामपादतले चोर्ध्वरेखाया वामभागतः । अस्त्यसंस्पृष्टमन्योन्यंश्यामबिंदुद्वयं प्रभोः ॥ १९८ ॥

तत्रैव च फणाभ्याशे वर्त्तते व्योमलक्षणम् । संस्पर्शमूर्ध्वरेखायास्तच्च प्राप्नुवदीक्ष्यते ॥ १९९ ॥

अन्यान्यपि च लक्ष्माणि संति तत्र धनुर्वटः । मत्स्यस्त्रिकोणः सुरभिचरणश्चार्द्धचंद्रकः ॥२००॥

सर्वेपि नखरास्तस्य पादयोरुभयोरपि । उत्तुंगाः शोणवर्णाश्च संति तेजस्विनस्तथा ॥ २०१ ॥

उपरिष्टादंगुलीनां दशानामपि पादयोः । तनूरुहाणि सूक्ष्माणि भवंत्येव मृदूनि च ॥ २०२ ॥

अंगुष्ठतत्समीपस्थांगुल्योरुभयपादयोः । पादुकाकीलिका घृष्टेश्चिह्नं भवति वर्त्तुलम् ॥ २०३ ॥

अष्टांगयोगाभ्यसनं पुरा कृतवतः प्रभोः । गुल्फयोस्तदधस्ताच्चासनघृष्टेश्च लक्ष्मणी ॥ २०४ ॥

पंचांगुलोर्ध्वंगुल्फाच्च दक्षांघ्रेस्तिलकोऽसितः । किणो वृक्षक्षतेरूर्वावाग्यतोवर्त्ततेऽस्य च् २०५

पंचांगुलोर्ध्वं वामांघ्रेर्गुल्फादस्ति तिलो महान् । जंघायां निकटे चाऽल्पतिलः सूक्ष्मोपि वर्त्तते ॥

अस्यैव चरणस्यापि जानुनोर्बहिरेककः । पूर्वस्मात्किंचनन्यूनः किणो भवति तद्विधः ॥ २०७ ॥

परिधानीयवस्त्रस्य घर्षणाच्च कटिद्वये । अस्तिरेखाऽसितातिर्यगुदरे च वलित्रयम् ॥ २०८ ॥

गंभीरवृत्तनाभेश्च वलयाऽग्रेऽस्ति दक्षिणे । तिलो वामे ततः किंचिद्दूरे च भवति प्रभोः ॥२०९॥

दक्षिणेऽथ हरेः कुक्षौ भवत्येकस्तिलो महान् । द्वितीयस्तु ततः किंचिद् दृश्यतेऽल्पस्तदंतिके २१०

नाभेरूर्ध्वंत्र्यंगुलांते वर्त्ततेऽस्य तिलास्त्रयः । वामे दक्षे च नलके तत्रैकैकोंतरा परः ॥ २११ ॥

तत्र यो मध्यमस्तस्मादूर्ध्वंतो द्व्यंगुलांतरे । वर्त्तते तिल एकश्च मिताहारत्वसूचकः ।। २१२ ॥

वामे तिलानां महतां कुक्षिकक्षांतरालगा। चतुर्णां पंक्तिरस्त्येका सूक्ष्माणां च तदंतिके ।२१३।

आवर्त्तो हृदि तस्यास्ति रोम्णां श्रीवत्ससंज्ञकः । पंचांगुलमुरोमध्य आरक्तार्द्धेंदुलक्षणम् ।२१४ ।

तन्मध्ये वामतः किंचिद्भवत्येको महांस्तिलः । ततो त्र्यंगुलदूरे च तिलोऽस्त्यन्योपि वामतः ।।

तस्मात्तिलाद् द्व्यंगुलांते वामतोस्त्यपरस्तिलः । लक्ष्मणी तत्समुद्राया वर्त्तते च स्तनोपरि ।।२१६।।

चतुस्तिलोर्ध्वपंक्तिश्च दक्षबाह्वतिकेंतरे । अंगुलाधो बाहुमूलात्तत्समुद्राकिणोस्ति च ॥ २१७ ॥

तत्पार्श्वे बाह्यतः सूक्ष्मा वर्त्तते च चतुस्तिली । अधस्तात्कूर्परस्योर्ध्वं मणिबंधात्तिलद्वयी ॥२१८॥

स्वामिनारायणस्यास्य मूलतस्त्र्यंगुलांतरे । अधस्तात्तत्समुद्राया लक्ष्मणं स्पष्टमीक्ष्यते ॥ २१९ ॥

वामस्याथ भुजस्यास्य मूलतस्त्र्यंगुलांतरे । अधस्तात्तत्समुद्राया लक्ष्मणं स्पष्टमीक्ष्यते ॥ २२० ॥

अधश्च कूर्पराद्धस्तोर्ध्वभागे वर्त्तते तिलः । तत्रैको विद्यते तस्य तर्जनीमध्यमांतरे ॥ २२१ ॥

अंतर्भागे तिलः सूक्ष्मस्तर्जनीकरजांतिके । करपृष्टांतराले च तिल एकोऽस्य वर्त्तते ।। २२२ ।।

रक्तोत्तुंगाश्च तीक्ष्णाग्रा दोष्णोः संति नखा हरेः । ईषच्छ्यामसुरेखे च तले कोकनदोपमे २२३।

उभाभ्यां मणिबंधाभ्यामूर्ध्वमष्टांगुलोत्तरे । भवतस्तत्समुद्रांकौ कूर्परौ चासितावुभौ ।। २२४।।

तिलो महानल्पकश्च जत्रुणोर्भवतोंतरे । अधस्तात्तस्य च हनोर्वर्त्तते तिल एककः ।। २२५ ।।

वामस्कंधाद्द्व्यंगुलाधः सरोमा पृष्ठतस्तिलः । एकश्च तदधोन्यश्च वर्त्तते तदधस्तिलः ।। २२६ ।।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घाटायास्त्र्यंगुलाधस्ताद्वंशास्थ्नो वामतस्तिलः। एकोऽथ दक्षिणांसस्य पश्चाद्भागेऽस्ति सोल्पकः२२७
वंशास्थिमध्यतो दक्षभागे तिलचतुष्टयम्। अस्त्यथो नासिकापार्श्वे दक्षेस्त्येकस्तिलो महान् २२८
अस्मादूर्ध्वं नेत्रकोणादधोस्त्येकस्तिलोऽल्पकः। शीतलास्फोटसूक्ष्मांका नासिकोपरि संति च॥
चक्षुषोरुभयोस्तस्य पक्ष्मणोरुभयोरपि। पतंत्युन्मीलने सूक्ष्मा वलयोऽधस्तथोपरि॥ २३०॥
मुखे दक्षिणतोऽधस्तादाद्यदंष्ट्रांतरेऽसितम्। लक्षणं वर्त्तते तस्य जिह्वाऽब्जदलसन्निभा २३१
अंतरे वामकर्णस्य विंदुर्भवति मेचकः। भाले तस्योर्ध्वपुंड्रांक उत्तुंगविततेऽस्ति च॥ २३२॥
भालस्य दक्षिणे भागे केशेभ्योऽधोऽस्ति लांछनम्। दक्षश्रवणशष्कुल्याश्चाऽधोऽस्त्येकस्तिलोऽल्पकः
तालुदेशेतिलोस्त्येक एकश्चास्ति शिखाग्रतः। तिलास्त्रयः शिखापश्चाद्दक्षभागेऽस्य संति च॥
रूपसौंदर्यमाधुर्यजुष्टा पुष्टाऽतिशोभना। मनोहरा घनश्यामा मूर्त्तिः शांताऽस्य वर्त्तते॥२३५॥
अस्ति दुर्गपुरे मूर्त्तिर्गोपीनाथस्य यावती। उन्नताऽस्यापि मूर्त्तिश्च तावत्येवोन्नतास्ति हि॥२३६॥
सामुद्रिकोक्तसल्लक्ष्मलक्षितावयवाकृतेः। हरेरुक्तानि लक्ष्माणि वीक्ष्याण्येतानि चिंतने २३७॥
भक्तिधर्मात्मजस्याऽस्य हरेरथ निसर्गजाः। चेष्टाविशेषाः कथ्यंते हृदि तत्स्मृतिहेतवः॥२३८॥
जितनिद्रः सोऽनुदिनमुपांत्ये क्षणदाक्षणे। उत्थाय कुरुते दंतधावनं चाप्लवं ततः॥ २३९॥
वासःप्रमार्जितांगोर्ध्वमार्द्रस्नानांशुकस्य सः। कृत्वोरुमध्ये निष्पीड्य ततो मार्ष्ट्यंघ्रिजानु च॥
सितवासो धृतिरुचिः सितं सूक्ष्मं घनं शुचिः। अंशुकं परिधत्तेऽसौ कटिबंधदृढं ततः॥२४१॥
उत्तरीयांशुकंश्वेतं परिवीयाऽथ पादुके। धृत्वा पद्भ्यां शुचिस्थानं गत्वापीठे निषीदति।२४२।
संध्यादि कृष्णपूजांतं वर्णीन्द्रः श्रीहरिस्ततः। स्वीयं नित्यविधानं च यथाविध्यनुतिष्ठति॥
कर्णपृष्ठेंऽशुकं कृत्वा संव्यानं भोजनक्षणे। वाममाकुंच्य चोत्तभ्य दक्षं पादं निषीदति॥२४४॥
पूर्वास्य उत्तरास्यो वा हरिर्दक्षिणकूर्परम्। दक्षजानूपरि दधद्गुंकृ मुहुरपः पिबन्॥ २४५॥
यं यं पदार्थं जानाति भुंजानः स्वादु सद्रसम्। तं तं निजेष्टभक्तेभ्यो दापयत्यादराद् भृशम् २४६
मितभोजनशीलोऽसौ समये भोजनस्य च। उद्गारमाचरंस्तुंदे परिवर्त्तयते करम्॥ २४७॥
कस्मैचित्कर्हिचित्प्रीतो निजभक्तजनाय च। आत्मनो भोजनस्थालं दत्ते वा दापयत्यसौ॥२४८॥
वामस्कंधे पटीं कृत्वा कट्यां चावध्यतां दृढम्। परिवेषयति प्रीत्या साधून्भोज्यानि भूरिशः २४९
आदने हरिभक्तानां चादृतः परिवेषणे। श्राद्धः प्रीतो भक्ष्यसंज्ञा वदंश्चरति पंक्तिषु॥ २५०॥
वर्षासु वाशरत्काले स्नातुं भक्तजनैः सह। उन्मत्तगंगामच्छोदां याति दुर्गपुरांतिके॥२५१॥
प्रशंसंस्तन्नदीतोयं साकं तैः स्वाननेक्षणैः। बहुधैव जलक्रीडां हर्षयंस्तान्करोत्यसौ॥ २५२॥
दोर्द्वयांगुलिसंरुद्धनासानेत्रश्रवोंतरः। स निमज्जति नद्यादौ चिरं तत्र च वर्त्तते॥ २५३॥
जलादुन्मज्जति यदा तदा दक्षिणपाणिना। परिमार्ज्य स्ववदनं गंडूषान्कुरुते ततः॥ २५४॥
नद्यां तिष्ठन् गापयति कृष्णपद्यानि साधुभिः। स्वयं च गायन्सोत्साहं तालिका वादयन् क्वचित्॥
स्नात्वाऽवलंब्य स्वप्रेष्ठभक्तपाणिं स्वपाणिना। प्रहृष्टवदनैः साकं नद्या निःसरति स्वकैः॥२५६॥
बध्नन् शीर्षपटं धत्ते तदग्रेणैव शेखरम्। तत्पेचकं च भ्रूकुटौ कृत्वा बध्नात्यसौ दृढम्॥२५७॥
आरुह्याऽश्ववरं नद्या वृतो भक्तैः सहस्रशः। सुखयन्स्वेक्षकदृशः स्वावासं समुपैति सः।२५८।
यदा चलत्यसौ तर्हि वामस्कंधे सितां पटीम्। तिर्यग्विधाय कुरुते दक्षदोश्चालनं मुहुः॥२५९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सनक्तकं दक्षपाणिं चालयंश्चलति क्वचित् । निसर्गसत्वरगतिः सोऽनुद्रुतनरव्रजः ॥ २६० ॥
वामकुक्षौ वामपाणिं कृत्वाऽन्यं च सनक्तकम् । चालयंश्चलति क्वापि चटचटध्वनिपातुकः २६१
क्वचित्कार्याय तिष्ठन्वा शनकैर्भवति व्रजन् । मंदं मंदं ताडयति मुष्टयोरुं दक्षिणं तदा ॥२६२॥
क्वचित्तु जनसंमर्दे उत्थिते रजसि क्षितेः । दधाति मुखनासाग्रे नक्तकं स्वस्य पाणिना ॥२६३॥
मंचे निषीदति क्वापि स्वाच्छन्ने गुप्तदोरके । चक्रके वापि मंचस्थे पार्श्विके दीर्घवर्त्तुले ॥२६४॥
आस्ते वीरासनेनैव क्वापि क्वापितु वाससा । आबध्य जानुनी प्रायश्चोपष्टभ्यैव पार्श्विकम् ।२६५।
निषीदत्यासने यत्र तत्रावष्टभ्य पार्श्विकम् । प्रसारितैकपादेऽन्यं निधत्तेऽङ्घ्रिं क्वचिच्च सः ॥२६६॥
क्वचिन्निषण्ण सव्यांघ्रेरूर्ध्वं रेखोपरि प्रभुः । दक्षपाण्यंगुलीमूर्ध्वं शनैरावर्त्तयत्यऽसौ ॥ २६७ ॥
जिह्वैकभागं दंताग्रावष्टब्धं च विधाय सः । प्रायो निषीदतीत्येषा तस्य साहजिकी क्रिया २६८
उपविष्टः कर्हिंचिच्च मोटयन्नात्मकंधराम् । गृहीत्वा चिबुकप्रांतौ कह्लागं वादयत्यऽसौ ॥२६९॥
यदा क्वचित्स्वभक्तेन पृष्ठं संवाहयत्यसौ । स्वस्य वक्षस्तले तर्हि पार्श्विकं निदधाति च ॥२७०॥
आसीनो यत्र कुत्रापि तुलसीजपमालिकाम् । दक्षदोर्मध्यमा मध्यपर्वण्यावर्त्तयत्यऽसौ ॥२७१॥
द्विगुणीकृत्य तां वामे करे धृत्वाऽन्यपाणिना । क्रीडन्निव क्वचिद्द्वौ द्वावाकर्षति च तन्मणी २७२
कृष्णवार्त्तारतः क्वापि मालांतां करमध्ययोः । दधानं संकलीकृत्य ताभ्यां वर्षत्यऽसौ मुहुः २७३।
जपमालाक्वचित्स्वस्य पार्श्वे न स्याद्यदा तदा । गणयत्यंगुलीनां च पर्वभिर्मनुमीशितुः ॥२७४॥
निमील्य नेत्रकमले ध्यायन्नात्मानमात्मनि । क्वचिदास्ते क्वचिच्चास्तेऽनुन्मीलितविलोचनः २७५॥
सवाद्यं सत्सु गायत्सु क्वचिद्ध्यायन्निषीदति । चमत्कृत्यैव जागर्त्ति क्वचिच्च ध्यानयोगतः २७६॥
क्वचित्सदसि भक्तानां मध्यस्थो वादयंस्त्रुटिम् । कराभ्यां वा करेणापि साकं गायति तैरसौ ॥
तालिका वादयित्वोच्चैः क्वचिद्गायत्सु सत्स्वऽसौ । कृष्णपद्यानि तैः साकं तथा कुर्वन् सुगायति ॥
क्वचित् कृष्णकथां श्रृण्वन् स्वयं पौराणिकांतिकम् । शनैः शनै रसाद्याति प्रजहन्निजमासनम् ।
सवादित्रं च भक्तेषु कीर्त्तयत्सु क्वचिद्धरिम् । एवं तदंतिकं याति वार्त्ता वा तैः सहाचरन् ॥
श्रृण्वन् कथां भगवतो मुहुर्वक्ति हरे इति । तद्रसाविष्टचित्तत्वात्तथाऽन्यासु क्रियास्वपि २८१॥
क्रियांतरं यदा चास्य याति स्मृतिपथं तदा । विलोकयन्निजान्भक्तान् पुरःस्थान् स्मयते ह्यसौ ॥
वार्त्तां कुर्वन् क्वचित्प्रीत्या श्रृण्वन्वापि हरेः कथाम् । गापयंस्तं च वा क्वापि किंचिद्ध्यांतर्विचारयन्॥
स्वस्थ आस्ते यदा तर्हि भोक्तुं पृच्छेच्च वार्चितुम् । पुष्पाद्यैर्योऽमुमागच्छेत्तस्मै क्रुध्यत्यसौ भृशम्
क्वचित्सदसि भक्तानां निषण्णः पीठ उत्तमे । धर्मज्ञानविरागाढ्यां भक्तिं तान्बोधयत्यऽसौ ॥
तेषामेवाग्रतः क्वापि रहस्यं सांख्ययोगयोः । पंचरात्रस्य च ब्रूते वेदांतस्य क्वचित् स्फुटम् २८६
धर्मादिवार्त्तां सदसि यदाऽसौ च चिकीर्षति । तदा स्वान्मौनयत्पादावूर्ध्वंदोस्तालिवादनैः ॥
यदा महासभायां तु वार्त्तामेव चिकीर्षति । तदा तूत्थाय पीठात्स्वान्मौनयत्येवमेव हि ॥२८८॥
कुर्वन्धर्मादिवार्त्तां च तदेकाग्रमनस्तया । उत्तरीयमधः स्रंसन्नानुसंधत्त आत्मनः ॥ २८९ ॥
क्वचित्सभोपविष्टोऽसावात्मभक्तान् परस्परम् । प्रश्नोत्तराणि बहुधा कारयत्यात्मनः पुरः ॥
तत्रापि केनचित् प्रश्ने पृष्टेऽन्यैर्दुष्करोत्तरे । करोत्यानंदयन्सर्वान्स्वयमेव तदुत्तरम् ॥ २९१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णवार्त्तां क्वचित्कुर्वन् पुष्पगुच्छं पुरोगतम् । कुसुमं वा महादोर्भ्यां विमर्दयति संसदि ॥
वार्त्तां कुर्वन् क्वचित्साकं निजभक्तैः पुरःस्थितैः । स्वनक्तकस्यैकदेशं धृत्वा गुणयति ह्यऽसौ ॥
नानादेशागतैः स्वीयभक्तैः प्रीत्या कृतां क्वचित् । उत्सवाहेषु महतीं पूजामंगीकरोत्यसौ २९४॥
क्वचिद्भक्तैरर्प्यमाणाः पूजार्थं कुसुमस्रजः । उच्चासनस्थ आदत्ते यष्ट्या दोष्णाऽथवा पदा २९५
क्वचित्स्ववीक्षामात्रेण पुरुषान् योषितोपि च । समाधिं कारयत्याशु ततश्चोत्थापयत्यथ ॥२९६॥
आह्वातुं स्वांतिके कंचिद्दूरस्थं सदसि क्वचित् । करोत्यसौ नेत्रसंज्ञां तर्जन्याकुंचनं च वा ॥
मल्लिकादिस्रजं वाऽसौ जंबीरादिफलं क्वचित् । मन्वानः शीतलं स्वाक्ष्णोर्मुहुः स्पर्शयति प्रभुः ॥
कृष्णस्य कीर्त्तनं क्वापि श्रवणं क्वापि गायनम् । कुर्वन्वा कारयन्नास्ते कथां ध्यानं च वा क्वचित् ॥
कृष्णालयानि च क्वापि साधुब्राह्मणभोजनम् । विधापयन्वर्त्ततेऽसौ न विनासत्क्रियां क्वचित् ॥
यद्भक्तिधर्मसंबंधिकार्यमारभते स्वयम् । शैघ्र्यं समापने तस्य वर्त्ततेऽस्य स्वभावतः ॥ ३०१ ॥
आदावन्विष्य झटिति करेणादाय नक्तकम् । मुखे दधदसौ छिक्कामाचरत्यायतध्वनि ॥३०२॥
द्विस्त्रिर्वा युगपच्चासौ छिक्कयत्येवमेवहि । निष्कामभक्तविहितस्वसेवातिरुचिः प्रभुः ॥३०३॥
जृंभमाणो हरिहरीत्येवमुच्चारयन्नसौ । नयने करपद्मेन द्विस्त्रिर्वाऽऽमृशति क्वचित् ॥ ३०४ ॥
क्वचिन्नर्मप्रसंगे स्वैरतिहासविधित्सया । धत्तेऽग्रतो मुखाब्जस्य करेण निजनक्तकम् ॥ ३०५ ॥
देशांतरादुपायातान्सतोऽन्यांश्चात्मनः प्रियान् । दृष्ट्वा सद्यो मुदोत्थाय स्वजते निर्भरं क्वचित् ॥
क्वचित्प्रीत्या स्वभक्तस्य शीर्ष्णि धत्ते करद्वयम् । कस्यचिच्च स्पर्शयति हृदि स्वांघ्रितलद्वयम् ॥
स्वाज्ञां सद्यो विधित्सतं तां वा संपाद्य चागतम् । कंचिद् दृष्ट्वा मुदा तस्य हृदि धत्तेंघ्रिपंकजे ॥
अतिप्रीतोऽथ कस्मैचित्स्वधृतां कुसुमस्रजम् । ददाति शेखरं वापि क्वचित्स्वीयांशुकानि च ॥
अत्युदारस्वभावः स्वप्रेष्टं बहुधनं च वा । दातुमिच्छति यत्तत्तु दत्ते पात्राय तत्क्षणम् ॥३१०॥
करपादांगुलीनां च कुरुते मोटनं क्वचित् । स्वांतिकस्थेन भक्तेन कारयत्यपि वा क्वचित् ३११॥
कंचिदप्यार्त्तमालोक्य श्रुत्वा वासौ कदाचन । सहसा रामरामेति वदत्यति दयाभृतः ॥३१२॥
दुःखितं तु जनं वीक्ष्य यं कंचिदपि चेतसि । भृशं खिद्यन् दयार्द्रोऽस्मै प्रीत्योपकुरुते ह्यऽसौ ॥
क्वचित्कंचित्ताडयंतं दृष्ट्वा कंचन देहिनम् । हांकारेणैव तं सद्यो निषेधति दयानिधिः ॥३१४॥
अपकर्षवचः श्रुत्वा केनाप्युक्तं सतः प्रभोः । भक्तस्याऽन्यस्य वा खिन्नस्तद्वक्तारं जुगुप्सति ॥
क्वापीषद्गदसंचारे सति स्वांगे स पश्यति । दक्षदोर्नाडिकां सव्यकरांगुल्यास्तु वैद्यवत् ॥३१६॥
उत्तिष्ठति यदा गंतुं स्वावासं सदसस्तदा । जय सच्चिदानंदेति ब्रुवन्साधून्नमत्यसौ ॥ ३१७ ॥
उत्तिष्ठन्सदसः क्वापि ब्रूते गंतुं निजाश्रमम् । सतो नमन् जयस्वामिनारायण गिरं स च ॥
मार्गेऽश्वं क्वचिदारुह्य व्रजंस्तत्कंधरोपरि । लंबयित्वा पादमेकं तं चालयति लीलया ॥ ३१९ ॥
ललाटे तिलकं कुर्वन्निव पाण्यंगुलिद्वयम् । ऊर्ध्वंचाधः प्रणयति यदा स्वपिति तह्यसौ ३२०॥
स्वापकाले स्वतुलसीमालामादाय पाणिना । दक्षिणेन भजन् कृष्णं करोति शयनं निशि ॥
शयनं कुरुते यर्हि तदा प्रावारवाससा । न मुखं पिदधातीति वृत्तिस्तस्य स्वभावतः ॥ ३२२ ॥
शयानं गाढनिद्राणं स्पृशेत्तं यदि कश्चन । तर्हि सद्यः प्रबुद्ध्यैनं ब्रूते कोसीति संभ्रमात् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवंविधाः संति हरेरनेके चेष्टाविशेषाः ससुलक्षणावै ।
यो भावयेत्तान् हृदयेऽनुवस्त्रं तस्मै स दद्यान्निजदर्शनं हि ॥ ३२४ ॥

एवंभूतेन वसता हरिणा दुर्गपत्तने । सुधातुल्यानि वाक्यानि यानि प्रोक्तानि भूरिशः ॥३२५॥
ततो ग्रामांतरं गत्वा यानि प्रोक्तानि तेन च । धर्मज्ञानविरागात्मदृढभक्तिमयानि ह ॥३२६॥
कतिचित्तेषु दृश्यंते यथामति यथा श्रुतम् । तदेकांतिकभक्तानां प्रीत्यै पद्यैर्मनोरमैः ॥ ३२७ ॥

समासतः प्रोक्तमिदं चरित्रं श्रीधर्मसूनोरिह यो मनुष्यः ।
पठिष्यति श्रोष्यति वापि भक्त्या स लप्स्यते वै पुरुषार्थसिद्धिम् ॥३२८॥

इति श्रीहरिवाक्यसुधासिन्धौ शतानंदविरचिते उपोद्घातप्रकरणम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भगवतः श्रीस्वामिनारायणस्योपदेशो दार्शनिकसिद्धान्तश्च

२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणाय नमो नमः

महर्षिश्रीशतानन्दमुनिविरचितः

श्रीहरिवाक्यसुधासिन्धुः

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । चतुर्थ्यां सहसः शुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य सतां मठे । निजभक्तसभामध्ये न्यषीदत्स सितांवरः ॥ २ ॥
अथोवाच स्वयं साधून्प्रीतः स्वाननचक्षुषः । साधनेष्विह सर्वेषु कठिनं यत्तदुच्यताम् ॥ ३ ॥
इति पृष्टाः सदःस्थास्ते यथामति तदुत्तरम् । चक्रुस्तदऽयथा ज्ञात्वा स्वयमेवाब्रवीत्प्रभुः ॥४॥
अखंडं भगवद्रूपे स्थापनं मनसः सदा । एतदेवाऽतिकठिनं सर्वसाधनतो मतम् ॥ ५ ॥
येनैतत्साधितं तस्य त्वितोऽन्यत्किंचनाधिकम् । प्राप्यं नास्तीति शास्त्रेषु निश्चित्योक्तं महर्षिभिः
यद्यद्भक्तेप्सितं वस्तु तत्तत्पूरयति ध्रुवम् । चिंतामणिरिव ध्याता मूर्त्तिः सा परमात्मनः ॥७॥
जीवेशब्रह्ममायानां स्वरूपाणि पृथक् पृथक् । भक्तो यदि दिदृक्षुः स्यात्तर्हि तानीक्षतेऽधुना ८॥
वैकुण्ठादीनि धामानि स्वेप्सितानीक्षते च सः । अतो महच्च कठिनमेतत्साधनमीरितम् ॥ ९ ॥
इति प्रश्नोत्तरं श्रुत्वा प्रसेदुः सर्वसाधवः । अथ गोवर्द्धनो भक्तस्तमपृच्छद्वणिग्वरः ॥ १० ॥
या प्रोक्ता कृष्ण ते माया तस्या रूपमहं हरे । इच्छामि ज्ञातुमित्युक्तः श्रीहरिस्तं समब्रवीत् ॥
यद्यदेतद्ध्यानकर्त्तुरंतरायकरं भवेत् । मयैव सा तु विज्ञेया ययाहं मम ते नृणाम् ॥ १२ ॥
इति प्रश्नप्रतिवचः श्रुत्वाऽतिप्रीत आससः । प्रश्नान्तरं चकाराऽथ मुक्तानंदः सतांवरः ॥१३॥
प्रभो भागवता अंते पिंडं हित्वाऽत्र भौतिकम् । यांत्याप्य कीदृशं देहं कथं तव परं पदम् ॥
तमुवाच ततः स्वामी चिन्मयं दिव्यविग्रहम् । कृष्णेच्छयैव संप्राप्य यांति गोलोकधाम ते १५॥
तत्र कश्चित्समारुह्य तार्क्ष्यं कश्चिन्महारथम् । याति कश्चिद्विमानं च तान्समाधिस्थ ईक्षते १६ ॥
अथ तं हरजिद्भक्तः पप्रच्छ स्वबुभुत्सितम् । प्रभो मत्प्रश्नमाकर्ण्य कर्त्तुमर्हसि चोत्तरम् १७॥
बहुकालं कुर्वंतोपि सत्संगं स्वतनौ यथा । दैहिके चास्ति संप्रीतिस्तथा तत्र न जायते ॥ १८ ॥

२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्र किं कारणमिति तेन पृष्टोऽब्रवीद्धरिः । नास्त्यस्य पुंसो भगवन्माहात्म्यज्ञानमंजसा ॥१९॥
माहात्म्यं ज्ञायते सम्यक् सतामेव प्रसंगतः । मुमुक्षुभिर्नरैः श्रद्धा तद्वाक्ये क्रियते यदि ॥२०॥
तत्स्वभावोपरि यदा सन्निर्वार्त्ता विधीयते । तदा तत्त्यजनाशक्तो दोषं गृह्णाति सत्सु सः २१॥
तेन पापेन तेष्वस्य न प्रीतिर्जायते दृढम् । पुण्यतीर्थकृताघस्य वज्रलेपत्वमस्ति च ॥ २२ ॥
अन्यत्र कृतपापानां लयः संगात्सतां भवेत् । लयस्तेषु कृतानां तु न विना तदनुग्रहम् ॥ २३ ॥

दोषं न गृह्णीत सतां यदांऽग तदैव सत्स्वेष उदारहार्द म् ।
प्राप्नोति तस्माद् गुण एव तेषां ग्राह्यः सदा नैव कदापि दोषः ॥२४॥
श्रुत्वा हरेर्वाक्यमिति प्रसन्नो भक्तः स आसीदमृतोपमानम् ।
अन्येपि सर्वे मुदितास्तमीशं नत्वोपदेशं तमधारयंश्च ॥ २५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ प्रथमस्तरंगः ॥ १ ॥

शकाब्दे विक्रमार्कस्य रसाश्वसुभूमिते । पंचम्यां सहसः शुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे रात्रौ स उत्तम नृपालये । उच्चासने निषण्णोऽभूत्स संसदि सितांबरः ॥ २ ॥
तं प्रणम्य मयारामः पप्रच्छ ब्राह्मणोत्तमः । विरक्तेर्ब्रूहि मे भेदान्कनीयोमध्यमोत्तमान् ॥ ३ ॥
तमुवाच हरिर्विप्र श्रृणु प्रश्नोत्तरं तव । वैराग्यं त्वरुचिः कृष्णेतरवस्तुषु सर्वथा ॥ ४ ॥
औदासीन्यं हृदि सदा शब्दादिविषयेषु यत् । रमणीयेष्वपि भवेदुत्तमः स प्रकीर्त्तितः ॥ ५ ॥
प्रारब्धकर्मलब्धांस्तान् भुंजानोप्याज्ञया प्रभोः । अनासक्तो जनकवद्वर्त्तेष्वेष उत्तमः ॥६॥
व्यावहारिककार्याणि साक्षाद् दृष्टफलान्यपि । आक्रष्टुं तन्मनः क्वापि शक्नुवंति न सर्वथा ॥
निरंतरं दोषदर्शी शत्रुवद्विषयेषु सः । देशकालादिवैषम्येऽप्यवाप्नोति न विक्रियाम् ॥ ८ ॥
सच्छास्त्रसाधुभगवत्सेवासु निरतः सदा । कामाद्यलुप्तविज्ञानो ज्ञेयोऽसौ लक्षणैरिति ॥ ९ ॥
अरुच्याऽर्थेषु रम्येषु समः पूर्वेण मध्यमः । किंतु देशादिवैषम्ये न स्थिराऽस्य स्थितिर्भवेत् ॥
ज्ञेयः कनीयोवैराग्यः सामान्यार्थेषु सर्वथा । न रुची रुचिरार्थेषु सा यद्धृदि भवेदिति ॥११॥
सतां प्रसंगं कृत्वैव साध्यं वैराग्यमुत्तमम् । मुमुक्षुणा यतो ज्ञानं भक्तिश्च स्याद् बलीयसी ॥

इति वचोमृतमीशमुखोद्गतं द्विजवरः स निपीय तुतोष ह ।
मुनिजना अपि तद्दृढतां ततो विदधुरात्मनिवेदनपंडिताः ॥ १३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्वितीयस्तरंगः ॥ २ ॥

शकाब्दे विक्रमार्कस्य रसाश्वसुभूमिते । षष्ठयां मार्गशिरःशुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य सतां मठे । निषण्णोऽसौ वृतो भक्तैः सितांबरधरोऽब्रवीत् ॥ २ ॥
अखंडं दृश्यते येन कृष्णमूर्त्तिर्निजे हृदि । तेनापि सर्वदा कार्यः प्रसंगः कृष्णसेविनाम् ॥ ३ ॥
यत्र यत्रावताराश्च जाता भगवतो भुवि । तत्स्थानं तत्र तल्लीलाः सर्त्तव्याश्च तदाश्रिताः ॥४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देहांतसमये क्वापि वैषम्याद्देशकालयोः । कृष्णविस्मरणेऽप्येतत्स्मृतिस्तत्स्मारिका भवेत् ॥ ५ ॥
ततोऽसौ भौतिकं देहं हित्वाप्नोति परां गतिम् । अतोऽहमपि प्रत्यब्दं कारयामि तदुत्सवान् ॥
जन्माष्टम्याद्युत्सवेषु सर्वान्साधूंश्च वर्णिनः । ससंगिनो गृहस्थांश्च करोम्येकत्र संगतान् ॥७॥
एषामेकतमस्यापि स्मरणात्पापकारिणः । नरस्यापि भवेन्मुक्तिरंत इत्यवधार्यताम् ॥ ८ ॥

इति निपीय वचोमृतमीशितुर्मुखसरोजविनिःसृतमुत्तमम् ।
सकलसाधुजना गृहिणश्च ते विदधतो हि तथैव मुदं ययुः ॥ ९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ तृतीयस्तरंगः ॥ ३ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । सप्तम्यां सहसः शुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य सितांबरः । नानादेशायातभक्तैः परीतो हरिरब्रवीत् ॥ २ ॥
शृण्वन्तु भक्ताः सर्वेपि ये स्युर्भागवता नराः । तैः परस्परमीर्ष्या तु न कार्या सर्वथा क्वचित् ॥
तदानंदानंदसाधुस्तमाहेर्ष्या तु कर्हिचित् । दुर्जयत्वात्स्वभावस्य हृदये संभवेत्प्रभो ॥ ४ ॥
स्वाम्युवाचाऽथ तं साधो कार्येर्ष्या यदि तर्हि तु। यथा कृता नारदेन तथा कार्या न चाऽन्यथा॥
नारदर्षिस्तु तुंबुरुश्चाप्येकदा देवगायकः । दर्शनार्थं रमाभत्तुर्वैकुण्ठं धाम जग्मतुः ॥ ६ ॥
लक्ष्मीनारायणं भक्त्या दृष्ट्वा नत्वा निषेदतुः । वल्लकीं वादयंश्चक्रे गंधर्वो गानमुत्तमम् ॥७॥
तेन तुंबुरुगानेन प्रीतो लक्ष्म्या सहाच्युतः । स्ववस्त्रभूषादानेन प्रीणयामास तं मुदा ॥ ८ ॥
तस्मा ईर्ष्यन्नारदोऽथ गानविद्यामधीतवान् । ततश्च गायनं विष्णोरंतिके विदधौ मुनिः ॥ ९ ॥
तमाह भगवान्विष्णुरीर्ष्यामानमदापहः । तुंबुरोरिव ते गानं नैतच्छ्रोतृमनोहरम् ॥ १० ॥
ततः स ईर्ष्यया विप्रः सांगया गानविद्यया । अधिको भवितुं तस्मात्तपसाराधयच्छिवम् ११॥
प्रसन्नः शंकरस्तस्मै सांगां गानकलां ददौ । ततः प्रीतः पुनर्विष्णोरंतिके गानमाचरत् ॥ १२॥
तमब्रवीद्रमाकांतो गायनं तेऽतिशोभनम् । किंतु तुंबुरुगानेन साम्यं त्वस्य न विद्यते ॥ १३॥
इत्युक्ते तेन स मुनिर्विमना मुहुरादरात् । अशिक्षद्गायनकलां गंधर्वादिभ्य उत्तमाम् ॥१४॥
एवमभ्यसतस्तस्य विष्णुं प्रीणयतः पुनः । कालो महान् व्यतीयाय सप्तमन्वंतरात्मकः ॥ १५ ॥
तथापि नोक्तं हरिणा साम्यं तुंबुरुणा यदा । निर्मानः स तदा तस्मादशिक्षत्तत्तुलालये ॥१६॥
ततो विष्णुमुपेत्यासौ जगौ तं भगवांस्तदा । प्राह नारद गानं ते समं तुम्बुरुणाऽधुना ॥१७॥
इत्युक्त्वा स ददौ तस्मै वासांस्याभरणानि च । ततः प्रीतः स हित्वेर्ष्यां सख्यं तुम्बुरुणाऽकरोत्।
एवमीर्ष्यास्वभावेन कार्येर्ष्याऽन्यगुणग्रहा । न त्वन्यद्द्रोहहेतुः सा कार्या पश्चादिवत्क्वचित् ॥

श्रुत्वेति वाक्यं सुधया समानं मुनिः स चान्येपि हरेः सदःस्थाः ।
प्रणम्य भक्त्या शिरसाऽऽदरेण हितोपदेशं जगृहुर्विनीताः ॥ २० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुर्थस्तरंगः ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । अष्टम्यां सहसः शुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामी त्यागिगृहिसदोंऽन्तरे । उपविष्टः शुक्लवासा उत्तमक्ष्मेशमंदिरे ॥ २ ॥
प्रीत्या तानब्रवीत्स्वीयान् भवद्भिः सर्वदा हृदि । ध्यातव्या राधिकाकृष्णमूर्त्तिः शुद्धेन चेतसा ॥
यद्यपि ध्यायमाना सा न दृश्येत तथापि तत् । ध्यानं न सर्वथा त्याज्यं विषादाद्दीर्घदृष्टिभिः ॥
इत्याग्रहिषु भक्तेषु धीरेषु भगवत्कृपा । महती जायते तेषां वश्यो भवति च प्रभुः ॥ ५ ॥
तस्मात्कृष्णः सर्वदा चिंतनीयो भुक्तिं मुक्तिं दातुमीशः स एव ।
इत्याश्रुत्य श्रीहरेर्वाचमासन् हृष्टाः सर्वे ते सदःस्थाः सुधाभाम् ॥ ६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ पंचमस्तरंगः ॥ ५ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । नवम्यां सहसः शुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे राज्ञ उत्तमस्यालये हरिः । त्यागिगृहिसभांतःस्थः सितवस्त्रोऽब्रवीत्स्वकान् ॥ २ ॥
विवेकिनोऽत्र सत्संगे पश्यंति स्वागुणान् धिया । भगवत्तजनानां तु गुणान् गृह्णन्ति ये सदा ॥
भगवत्तजनप्रोक्तं स्वागुणत्याजनं वचः । हितमेवेति मन्यन्ते न तु तद्दुःखमण्वपि ॥ ४ ॥
ईदृशास्ते तु पुरुषाः सत्संगे प्रतिवासरम् । प्रतिष्ठां महतीं यांति शोध्या दोषास्ततो निजाः ॥
येऽत्राऽविवेकिनस्ते तु स्वदोषान्मन्वते गुणान् । भगवत्तजनगुणानगुणानेव चात्मनि ॥ ६ ॥
हितोपदेशं महतां मन्यमाना विपर्ययम् । कल्पयंति च तेष्वेव दोषान् युक्तिबलेन ते ॥ ७ ॥
एवंविधास्तु सत्संगे प्रत्यहं यांति लाघवम् । गुणाभिमानोऽतस्त्याज्यः स्वस्मिन्सत्सेवयाऽदरात् ॥
ये सेवंते श्रद्धया साधु पुंसस्तेषां सर्वो लीयतेऽत्राऽविवेकः ।
इत्थं श्रुत्वा तस्य पीयूषकल्पां वाचं सर्वे तोषमापुः सदःस्थाः ॥ ९ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ षष्ठस्तरंगः ॥ ६ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । दशम्यां सहसः शुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्ष्माभुजः प्रभुः । त्यागिगृहिसभांतःस्थोऽब्रवीत्स्वीयान् सितांशुकः २ ॥
अध्यात्मवार्त्ता शास्त्रेषु यत्र यत्रोदितास्ति सा । तत्र तत्रापि दुर्बोधा विद्यते विदुषामपि ॥३॥
याथातथ्येन सा ज्ञेया ततो जीवादिलक्षणैः । अन्वयव्यतिरेकाभ्यां विविच्यैव सुनिश्चितैः ॥४॥
जीवादिलक्ष्मसांकर्यभ्रमः स्यात्तेन न क्वचित् । स्वयंप्रकाशानंदोऽथ तमपृच्छत्पुरः स्थितः ॥५॥
जीवेशब्रह्मणां स्वामिन् कृष्णस्य ते च तत्त्वतः । अन्वयव्यतिरेकाभ्यां लक्षणानि पृथक्पृथक् ६॥
वक्तुमर्हसि सर्वज्ञ तद्बुभुत्साऽस्ति मे हृदि । इति पृष्टः स सर्वेशस्तं जगाद यथागमम् ॥७॥
स्थूलादिदेहत्रितये तादात्म्येन त्ववस्थितिः । जीवस्य सोऽन्वयः प्रोक्तस्तस्य येनाऽस्ति संसृतिः ।
चिद्रूपस्वप्रकाशत्वे अच्छेद्यत्वादि चाऽस्य तु । व्यतिरेको निगदितो यत्स्थितिर्मुक्तिरुच्यते ॥९॥
विराडादिषु तादात्म्यं देहेष्वीशस्य तु त्रिषु । लक्ष्माऽन्वयेन गदितं तथोत्पत्त्यादिकर्तृता ॥१०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवस्थानं ब्रह्मतया मायातीतत्वमस्य च । लक्षणं नित्यमुक्तत्वं व्यतिरेकेण कीर्त्तितम् ॥ ११ ॥
पुरुषस्य च मायायाः सूर्यादीनां प्रशास्तृता । नैकांडाश्रयतेत्युक्तं ब्रह्मणोऽन्वयलक्षणम् १२ ॥
सर्वत्र व्यापकत्वेपि व्योमवत्तदसंगिता । कृष्णस्यानुगधामत्वं व्यतिरेकोऽस्य गद्यते ॥ १३ ॥
क्षराक्षराणां सर्वेषां हृदि साक्षितया स्थितिः । पुरुषोत्तमपर्यायकृष्णस्याऽन्वयलक्षणम् ॥१४॥
लीलाविहरणं राधादिभिः परमधामनि । तिरोभावेऽपि कालादेर्व्यतिरेकोऽस्य चोदितः ॥१५॥
अन्वयव्यतिरेकाभ्यां विविच्येत्थं हि तत्त्वतः । जीवादीनां लक्षणानि ज्ञातव्यानि मनीषिभिः ॥
जीवेशब्रह्मकृष्णानां मायायाश्चापि वास्तवः । अस्त्यनादिरयं भेद इति जानीहि निश्चितम् १७॥

इति हरेर्वचनं स सुधासमं मुनिगणैः सह सादरमीशतुः ।
मुनिवरस्तु निशम्य मुदं परामधिजगाम जनाश्च सदःस्थिताः ॥ १८ ॥

इति श्रीशतानंदमुनिविरचिते हरिवाक्यसुधासिंधौ सप्तमस्तरंगः ॥ ७ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । एकादश्यां मार्गशुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामिनृपोत्तमगृहे स्वयम् । निजभक्तसभासंस्थः स्वानुवाच सितांशुकः ॥ २ ॥
कृष्णतद्भक्तसेवायां सर्वा इंद्रियवृत्तयः । वर्त्तेरन् यस्य तस्याशु स्यादंतःकरणं शुचि ॥ ३ ॥
अनंतजन्मपापानि तस्य नश्यंति च द्रुतम् । ततोऽस्य भगवद्भक्तिः पुष्टिमाप्नोत्यभीष्टदाम् ॥४॥
स्त्रीस्पर्शादिषु यस्येह वर्त्तेरन्विषयेषु ताः । तस्यांतःकरणं याति भृशं मलिनतां खलु ॥ ५ ॥
भ्रष्टो भवति कल्याणवर्त्मनः स च सर्वथा । तस्माद्योज्यानींद्रियाणि कृष्णवर्त्मनि सद्धिया ॥६॥
स्वाधिकारानुरूपेषु सच्छास्त्रविहितेष्वतः । नियमेषु दृढं स्थित्वा भोक्तव्या विषयास्त्विह ७ ॥
साधुसंगः सदा कार्यो नियमस्थितिसिद्धये । सर्वथा तद्विरोधी तु न कुसंगः कदाचन ॥ ८ ॥
एवं हि वर्त्तमानस्य देहेऽहंता च दैहिके । ममत्वं नाशमायाति कृष्णे प्रीतिश्च वर्द्धते ॥ ९ ॥

वैराग्यमाप्नोति स कृष्णभिन्ने रम्येपि सर्वत्र नरः पदार्थे ।
श्रुत्वेति वाचं सकलाः सुधाभां भक्ता हरेः प्रापुरतीव मोदम् ॥ १० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावष्टमस्तरंगः॥ ८ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । द्वादश्यां सहसः शुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामी गृह उत्तमभूभृतः । त्यागिगृहिसभांतःस्थो जगाद स्वान् सितांबरः ॥ २ ॥
कृष्णस्य निश्चयो यस्य प्रत्यक्षस्य भवेद्धृदि । भक्तिं च दर्शनं तस्य कुर्वन्नपि च यः पुमान् ॥३॥
अपूर्णकाममात्मानं मन्येत न्यूनमंतरे । इत्थं च मनसि स्वीये जानीयान्मतिजाड्यतः ॥ ४ ॥
अस्यैव रूपं गोलोके दिव्यं तेजोमयं यदा । द्रक्ष्याम्यहं तदैव स्यां पूर्णकामो न चान्यथा ॥५॥
इत्यज्ञानवतस्तस्य पुंस आस्यात्कदाचन । श्रोतव्या नैव भगवद्वार्त्ताप्यत्र मुमुक्षुणा ॥ ६ ॥
प्रत्यक्ष एव यस्य स्याद् दृढनिष्ठा नराकृतौ । तद्दर्शनादिनात्मानं पूर्णं मन्येत चाऽत्र यः ॥ ७ ॥
तन्मुखादेव भगवद्वार्त्ता निजहितेच्छुना । श्रोतव्या तत्प्रसंगश्च कर्त्तव्यो भक्तिवृद्धये ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनिच्छतेऽपि स्वादन्यत्तस्मै प्रीतः स्वधामनि । अलौकिकं निजैश्वर्यं बलाद्दर्शयति प्रभुः ॥ ९ ॥
गोलोकाधिपतिर्यो हि स एवास्त्यऽत्र नेतरः । स्वतंत्रः स्वेच्छयैवाऽसौ नराकारेण दृश्यते १०॥
वेषांतरं धृतवतो नटस्येवास्य सर्वथा । स्वरूपभेदो नास्त्येव ज्ञेयमित्थं मनीषिभिः ॥ ११ ॥
अतः प्रत्यक्षमासाद्य कृष्णं तदितरत्क्वचित् । वाञ्छनीयं न वै वस्तु कार्या निष्ठा दृढाऽत्र च ॥

इति वचोमृतमादरतो हरेः श्रुतिपुटेन निपीय सदोगताः ।
हरिजनाः परमामगमन्मुदं भगवति प्रकटेऽत्र दृढाशयाः ॥ १३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ नवमस्तरंगः ॥ ९ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । मार्गशुक्लत्रयोदश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे राज्ञाबुत्तमक्ष्मापतेर्गृहे । त्यागिगृहिसदःसंस्थो हरिरूचे सितांबरः ॥ २ ॥
मामकैः पुरुषैः संगः कृतघ्नस्य तु देहिनः । कर्हिचिन्नैव कर्त्तव्यस्तल्लक्षणमहं ब्रुवे ॥ ३ ॥
कुर्वतस्तीर्थयात्रां मे कैशोरे दैवयोगतः । संगः सेवकरामाख्यकृतघ्नस्याऽभवत्पथि ॥ ४ ॥
वेंकटाद्रेः सेतुबंधं व्रजता स मया सह । आगतो वेषतः साधुः पुराणज्ञश्च निर्दयः ॥ ५ ॥
मया तु साधुबुध्यैव संगस्तस्य कृतः पथि । रोगार्त्तः सोऽभवद्भूरि विरेकशिथिलांघ्रिकः ६ ॥
अशक्तश्चलने मार्गे पपात ज्वरितश्च सः । रुरोद बहुधा को मां पानीयमपि पास्यति ॥ ७ ॥
शतकं हेममुद्राणां मत्समीपेऽस्ति सद्धनम् । किंतु सेवाकरः कश्चिन्नास्ति मे किंकरोम्यहम् ॥८॥
एवं रुदंतं तं साधुं प्रावोचं कृपया ह्यहम् । साधो मा कुरु चिंतां त्वं करिष्ये सेवनं तव ॥९॥
ततः समीपे ग्रामस्य कस्यचित्पुष्पवाटिकाम् । सह तेन शनैर्गत्वा वटाधो वासमाचरम् ॥१०॥
वटेपि भूतसाहस्रमासीत्तत्र बुभुक्षितम् । कृष्णप्रतापात्तत्त्वावां नापीडयदवासभि ॥ ११ ॥
आहृत्याऽथ मया तत्र कदलीपत्रसंचयम् । तस्य शय्या कृता मृद्वी सेवा नित्यं च दासवत् ॥
आहारयन्मया ग्रामादन्नमाज्यादि सोऽन्वहम् । स्वोदराभृतिपर्याप्तं दत्वा स्वधनमातुरः १३ ॥
तदन्नं पाचयित्वाऽहं यथारुचि तमादयम् । विरेकिणोऽस्याऽकरवमपि पायुविशोधनम् ॥१४॥
भैक्षेण वर्त्तमानोऽहं क्वाप्यलाभ उपोषितः । निश्छद्म मासद्वितयं तमसेवेऽनुवर्त्तनैः ॥ १५ ॥
तथापि कर्हिचित्तेन नोक्तं पाकेऽत्र साधिते । आवामद्याव यद्द्रव्यं मम पार्श्वेऽस्ति पुष्कलम् ॥
गतप्रायेऽथ तद्रोगे सेतुबंधाय निर्गतौ । आवां तत्स्थानतो मार्गे स भारं मामवाहयत् ॥१७॥
सपादद्रोणमानं तद्भारं तूदवहं पथि । मालामात्रं स तु करे धृत्वाऽगच्छद्दिने दिने ॥ १८ ॥
नीरोगोप्येवमकरोत्पथि पाथेयमेककः । स्वधनाप्तं स बुभुजे न स्वल्पमपि मे ददौ ॥ १९ ॥
ततस्तं दांभिकं ज्ञात्वा कृतघ्नमतिनिर्दयम् । सङ्गः परिहृतस्तस्य कृतघ्नो ज्ञेय ईदृशः ॥ २० ॥
यः कृतस्वाघनिर्वेशं नरं पापयुतं वदेत् । सोपि कृतघ्नवज्ज्ञेयो वर्ज्यस्तस्य च संगमः ॥ २१ ॥

श्रुत्वेति वाक्यं सुधयोपमेयं हरेः सदःस्थाः पुरुषाः प्रसेदुः ।
परोपकारप्रवणस्य तस्य प्रणेमुरंघ्रिद्वयमादरेण ॥ २२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ दशमस्तरंगः ॥ १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । मार्गशुक्लचतुर्दश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामी गृह उत्तमभूभुजः । त्यागिगृहिसभांतःस्थः स्वानाह विशदांशुकः ॥२॥
वासनायाः क्षयो यावन्नस्याद्धृदि मुमुक्षताम् । तावदेकांतभक्तत्वं न स्यात्कृष्णस्य निश्चितम् ३॥
तं प्रणम्य पप्रच्छाऽथ ब्रह्मानंदः सदुत्तमः । वासनायाः स्वरूपं त्वं वक्तुमर्हसि मामिति ॥४॥
तम्मुवाच हरिर्भुक्ता दृष्टा वा विषयाः श्रुताः । ये तेषां पुनरासीच्छा हृदि सा वासना मता ॥५॥
कृत्वा प्रसंगं महतां कृष्णमाहात्म्यसंविदा । सा येन नाशिता तस्य कृष्णभक्तिः स्थिरा भवेत् ॥
कृष्णेतरपदार्थेच्छा नष्टा यस्य भवेद्धृदि । ब्रह्मभूतः कृष्णभक्तः स एवैकांतिको मतः ॥ ७ ॥
विनाशनीया तत एव सा तु भक्तेन कृष्णस्य विविक्तबुद्ध्या ।
इत्थं सुधाभं वचनं निशम्य हरेः स साधुर्मुमुदे ससभ्यः ॥ ८ ॥
इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकादशस्तरगः ।। ११ ।।

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । मार्गशीर्षे पौर्णमास्यां वचोमृतमिदं हरेः ॥ १ ॥
हरिर्दुर्गपुरे तत्र गृह उत्तमभूभुजः । त्यागिगृहिसदोंतःस्थो निजानूचे सितांबरः ॥ २ ॥
पुरुषं प्रकृतिं कालं तत्त्वानि च यदा पुमान् । वेत्ति स्वरूपतः सम्यक् तद्बंधात्तर्हि मुच्यते ॥
मुक्तानंदोऽथ तं साधुर्नत्वा पप्रच्छ सत्पते । बुभुत्साम्यहमेतेषां स्वरूपाणि पृथक्पृथक् ॥ ४ ॥
तम्मुवाच हरिः साधो रूपाण्येषां तु लक्षणैः । ब्रुवे पुराणप्रथितैर्ज्ञातव्यानि पृथक्पृथक् ॥ ५ ॥
नियंता प्रकृतेस्तस्या विजातीयः स्वयंप्रभः । अनाद्यंतोऽक्षरः सत्यः सर्वज्ञो दिव्यविग्रहः ॥ ६ ॥
क्षेत्रज्ञः सकलाकारप्रवृत्तेर्हेतुरीश्वरः । इत्येतैर्लक्षणैर्ज्ञेयः पुरुषः प्रकृतिं शृणु ॥ ७ ॥
नित्या च भगवच्छक्तिस्त्रिगुणा चिज्जडात्मिका । निर्विशेषा जीवमहत्तत्त्वादिक्षेत्रमन्वया ॥८॥
इत्युक्ता प्रकृतिस्तस्याः साम्यस्थगुणचालनः । कालो ज्ञेयो महत्तत्वं चित्तैकथ्येन प्रकीर्त्तितम् ॥
शुद्धसत्त्वमयं शान्तं कूटस्थं चातिनिर्मलम् । जगदंकुररूपं च ज्ञेयं तदपि लक्षणैः ॥ १० ॥
शान्तघोरविमूढात्माऽहंकारस्त्रिगुणो मतः । भूतानामिंद्रियाणां तद्देवानां चापि कारणम् ॥११॥
मनस्तु कामनाहेतुः सर्वेन्द्रियनियंतृ च । दुर्निग्रहं च संकल्पविकल्पात्मकमुच्यते ॥ १२ ॥
ज्ञेया निश्चयकर्त्री धीर्ज्ञानविज्ञानरूपिणी । संशयश्च विपर्यासः स्मृतिर्निद्रा च तद्गुणाः १३॥
महत्तत्त्वमहंकारो मनो बुद्धिश्चतुष्टयम् । अंतःकरणमित्युक्तं शुद्धे यत्र हरिः स्फुरेत् ॥ १४ ॥
श्रोत्रं त्वक्चाऽक्षि रसना घ्राणं ज्ञानेंद्रियाणि हि । वाक्पाणिश्चरणः पायुर्मेढ्रं कर्मेंद्रियाणि च
बाह्येन्द्रियाणामेतेषां दशानां लक्षणानि तु । नियतस्वस्वविषयग्राहकत्वं पृथक्पृथक् ॥ १६ ॥
शब्दग्राहि मतं श्रोत्रं त्वक् स्पर्शग्राहिणी तथा । रूपग्राहकमक्षि स्याद्रसना च रसग्रहा ॥१७॥
घ्राणं गंधग्राहकं चेत्येता ज्ञानेंद्रियक्रियाः । कर्मेंद्रियक्रियास्तूक्तिः पणोऽर्युत्सर्जने रतिः ॥१८॥
शब्दः स्पर्शो रूपरसगंधामात्रा इतीरिताः । तत्र शब्दः खस्य मात्राऽर्थाशयोद्दष्टृलिंगकः ॥
शीतोष्णादिगुणः स्पर्शो मात्रा चाऽसौ नभस्वतः । रूपं तु तेजसो मात्रा नीलपीतादिभेदवत् ।
मात्रांभसो रसः प्रोक्तो मधुराम्लादिभेदवान् । गंधः पृथिव्या मात्रा च सौरभ्यादिभिदोदितः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नभो नभस्वत्तेजांसि वारि भूरिति पञ्चकम् । महाभूताख्यमुदितं सर्वदेहादिकारणम् ॥ २२ ॥
अवकाशदमाकाशं धिष्ण्यं प्राणेंद्रियात्मनाम् । व्यूहनश्चलनो वायुः शब्दगंधादिनायकः ॥२३॥
द्योतनं पाचनं पानं तेजश्च हिममर्दनम् । क्लेदनं पिंडनं शीतं प्राणनाप्यायनं जलम् ॥ २४ ॥
आकारहेतुः पृथिवी सर्वकारणकर्म्यपि । एवं स्वरूपाण्येतेषां ज्ञेयानि बंधमुक्तये ॥ २५ ॥
जन्माद्यपि तथैतेषां ज्ञातव्यं तत्सहायकृत् । अतः क्रमेण तद्ब्रूमि सर्वे शृण्वन्तु साधवः ॥२६॥
श्रीकृष्णो भगवानादावक्षराख्यपुमात्मना । मायायामीक्षणेनैव स्वेच्छया गर्भमादधौ ॥ २७ ॥
ततः प्रधानपुरुषकोटयश्चाभवन्मुने । ब्रह्माण्डकोटयस्तेभ्यो भवंति स्वेश्वरेच्छया ॥ २८ ॥
तत्रैकतमब्रह्माण्डसंभवः कथ्यते मया । तेनानुमेयः सर्वेषामण्डानामपि संभवः ॥ २९ ॥
कृष्णः पुरुषरूपेण प्रधाने गर्भमीक्षणम् । दधाराऽथ महत्तत्त्वं चित्तात्मकमभूत्ततः ॥ ३० ॥
तस्मादभूदहंकारस्त्रिगुणस्तत्र सात्त्विकात् । मन इन्द्रियदेवाश्च राजसादिन्द्रियासवः ॥ ३१ ॥
तामसाच्छब्दतन्मात्राद्वाराकाशमजायत । ततः स्पर्शस्ततो वायुस्ततो रूपं ततोऽनलः ॥ ३२ ॥
ततो रसस्ततश्चापस्ततो गंधस्ततश्च भूः । भिन्नभिन्नस्वभावानि तत्त्वान्येतानि देवताः ॥ ३३ ॥
अन्तर्यामितया कृष्णाविष्टान्येतानि सर्वशः । संहत्य जीवेशतनूः स्वस्वांशैः ससृजुस्ततः ॥ ३४ ॥
विराट्सूत्राव्याकृताख्यं देहत्रितयमीशितुः । जीवदेहत्रयं स्थूलसूक्ष्मकारणसंज्ञितम् ॥ ३५ ॥
विराड्देही तु वैराजः सात्त्विकः सर्वपालकः । हिरण्यगर्भः सूत्रांगो जगत्स्रष्टा च राजसः ।३६।
तामसोऽव्याकृतात्मेशः सर्वसंहारकारकः । वैराजस्यायुषः कालो द्विपरार्द्धावधिः स्मृतः ॥३७॥
सहस्रयुगपर्यन्तं दिनं रात्रिश्च तावती । तस्य यावद्दिनं तावत् त्रिलोक्या वर्त्तते स्थितिः ॥३८॥
एकस्मिन्वासरे तस्य चतुर्दश चतुर्दश । भवन्तीन्द्राश्च मनवो जगतः स्थितिहेतवः ॥ ३९ ॥
त्रैलोक्यं नाशमायाति तद्रात्रौ प्रलयेऽखिलम् । दैनंदिनः स प्रलयः प्रोक्तो नैमित्तिकस्तथा ४०
द्विपरार्द्धावसाने तु विराड्लोकाश्चतुर्दश । प्रलयं यांति सांवर्त्तपवनानलवारिभिः ॥ ४१ ॥
महदादीनि तत्त्वानि प्रधानपुरुषौ तथा । प्रकृतौ लयमायांति प्राकृतः प्रलयोऽस्त्यसौ ॥ ४२ ॥
कृष्णेच्छया सा प्रकृतिर्लीयतेऽक्षरतेजसि । यदा तदासौ प्रलय आत्यंतिक इतीरितः ॥ ४३ ॥
एवं विश्वभवादीनि यो विजानाति तत्त्वतः । तस्य कृष्णे भवेद्भक्तिर्विरक्तिरितरत्र च ॥ ४४ ॥
प्रलये कृष्णभक्तास्तु भगवद्धाम यांति हि । मायायामेव लीयंते जीवा अन्ये तु सर्वशः ॥४५॥
मुक्तानंदस्तदाऽपृच्छत्कृष्ण ते धाम कीदृशम् । तन्मे ब्रूहीत्यथ स्वामी तमुवाच सतां प्रियः ४६
नित्यमप्राकृतं दिव्यं सच्चिदानंदमक्षरम् । ब्रह्माख्यं धाम तत्प्रोक्तं कृष्णस्यानंतमुज्ज्वलम् ४७ ॥
दृष्टांतं कथयाम्येकमनुमेयं च तेन तत् । यदा काचमयी भूमिः स्यादियं सचराचरा ॥ ४८ ॥
तारा नभसि यावत्यस्तावंतः स्युश्च भास्कराः । तदा यथा तैर्द्योतेत सा भूर्भूरि प्रभोज्ज्वला ॥
तथा तेजोमयं धाम ज्ञेयं तदनिरूपणम् । समाधौ तच्च पश्यंति केचिद्भागवता इह ॥ ५० ॥

हित्वा स्वदेहं भुवि कृष्णभक्ताः प्रयांति तद्धाम सुरादिवंद्यम् ।
इत्थं हरेर्वागमृतं स साधुः पीत्वाऽऽप तोषं च तथेतरेऽपि ॥ ५१ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ द्वादशस्तरंगः ॥ १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । मार्गासितप्रतिपदि वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे रात्रौ दुर्गे उत्तमभूभुजः । वेद्यामधो निबंतरोर्वासुदेवालयांतिके ॥ २ ॥
न्यषीदन्मञ्चके स्वामी चंचच्छोणांबरद्युतिः । कंठलंबितमुक्तास्त्रग्मुक्ताशेखरराजिमान् ॥ ३ ॥
त्यागिभिर्नैकदेशीयैर्नैकैर्भक्तजनैर्वृतः । तं प्रणम्य पप्रच्छेदं नित्यानंदो महामुनिः ॥ ४ ॥
एकैकोस्ति प्रतिवपुजीवो वाऽनेक ईश्वरः । एक उच्येत चेत्प्लक्षवटादौ तद्विरुध्यते ॥ ५ ॥
छिन्नप्लक्षादिशाखानामन्यत्रारोपणे पुनः । तादृग्वृक्षांतरोत्पत्तेस्तदेकत्वं कथं भवेत् ॥ ६ ॥
एकस्य बहुधाभावश्छेदनादित्यपि प्रभो । न संभवेदक्षरत्वादच्छेद्योऽयमिति स्मृतेः ॥ ७ ॥
अनेक इति पक्षेपि न जीवो देहमंतरा । तिष्ठेत्तद्देहबाहुल्यं त्वत्र नैवोपलभ्यते ॥ ८ ॥
श्रीहरिस्तमुवाचाऽथ शृणु साधो रमापतेः । विश्वोत्पत्त्यादिहेतू द्वे शक्तिप्रकृतिपूरुषौ ॥ ९ ॥
ताभ्यां वैराजरूपोऽसौ ब्राह्मकल्पे निजां गतः । ब्रह्मादिस्तंबपर्यंतं ससर्ज निखिलं जगत् १०॥
पाद्मादौ तु ब्रह्मरूपो मरीच्यादिक्रमेण सः । देवदैत्यमनुष्यादीन् स्थावरांश्च ससर्ज ह ॥ ११ ॥
अंतर्यामिस्वरूपेण शक्तिद्वययुतश्च सः । प्रतिजीवं स्थितो दत्ते तत्तत्कर्मफलं प्रभुः ॥ १२ ॥
केचित्सत्त्वमया जीवाः संति केचिद्रजोमयाः । केचित्तमोमयाः संति तद्गुणाः कर्महेतवः १३॥
तेषां गुणानुरूपाणां कर्मणामीश्वरः फलम् । ददाति तादृशान्देहान्दत्त्वोच्चमध्यमाधमान् ॥१४॥
जरायुजानंडजांश्च स्वेदजानुद्भिदस्तथा । दत्ते देहान् यथाकर्म न वैषम्यं स्वतः प्रभौ ॥ १५ ॥
जीवकर्मानुसारेण देहाद्देहांतराण्यपि । स एव सृजति यथा कश्यपाद्विविधाः प्रजाः ॥ १६ ॥
अंतर्यामिण एवेशात्सजीववपुरुद्भवः । भवतीत्येव जानीहि जीवशक्त्या न किंचन ॥ १७ ॥
एकैकस्मिन्नतो देहे जीव एकैक एव हि । न त्वेको बहुधा क्वापि जायते स्वौजसा मुने ॥ १८ ॥
ईशशक्तिवशतो हि जंतवो यांति देहमुत तं त्यजंति च ।
इत्थमीशवचनामृतं मुनिः सोऽपरे च ततपुर्निपीय ते ॥ १९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रयोदशस्तरंगः ॥ १३ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । मार्गकृष्णद्वितीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे हरिरुत्तमभूभुजः । अधो निंबतरोर्वेद्यां न्यषीदच्चारुमंचके ॥ २ ॥
अंतरीयं चोत्तरीयं सितं शीर्षपटं दधत् । पीतपुष्पस्त्रगापीडावतंसांश्च मनोहरान् ॥ ३ ॥
त्यागिभिर्गृहिभिर्भक्तैर्नानादेशागतैर्वृतः । जातिपुष्पं दक्षदोष्णा भ्रामयन्नब्रवीन्मुनीन् ॥ ४ ॥
विहाय स्वगृहं त्यागी भूतो नातिविरागवान् । तदल्पवासनाश्चापि विचारेण त्यजन् हृदः ॥ ५ ॥
देहेन नियमान्सर्वान् यथावत्परिपालयन् । ईदृशो भगवद्भक्त एकोस्ति दृढनिश्चयः ॥ ६ ॥
अन्यस्तु कश्चिन्निवसन् गेहे भगवदाज्ञया । उदासीनः कृष्णभक्तस्त्यागिवच्चाल्पवासनः ॥ ७ ॥
पृच्छामि प्रश्नमेतं वः कः श्रेष्ठ उभयोरिति । मुक्तानंदस्तदा प्राह श्रेष्ठस्त्यागीति भाति मे ॥८॥
स्वाम्युवाच कथं मंदवैराग्यः श्रेष्ठतां गतः । कृष्णाज्ञया वसन् गेहे कथंन्यूनस्ततो मतः ॥९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ततः स बहुधा तस्य समाधानं वदन्नपि । नाऽशक्नोत्तमथाहेश त्वमेवास्योत्तरं कुरु ॥ १० ॥
उवाच श्रीहरिः साधो युक्तमत्रोत्तरं शृणु । तीव्रवैराग्यवान् यस्तु त्यागी स्याच्छ्रेष्ठ एव सः ११
त्यागी यो मंदवैराग्यः स तु स्वादुरसादिकान् । संप्राप्य विषयान्भूयो भ्रश्यत्येव तदिच्छया १२
प्राप्य वा दैहिकं दुःखं स च त्यागं जिहासति । ईदृशात्त्यागिनः श्रेष्ठो गृहस्थो धर्मसंस्थितः ॥
स हि दैवोपपन्नेषु सुखदुःखेषु नित्यदा । उदासीनो विचारेण स्वं न्यूनं त्यागिनो विदन् ॥१४॥
सावधानस्ततः कृष्णं नित्यं भजति सादरम् । एते तु मुख्यास्तद्धर्मा भवंति श्रैष्ठ्यहेतवः ॥१५॥
आपद्यपि यथापूर्वं सत्सेवाचरणं मुदा । कल्पद्रुलाभवत्साधुसंगमाहात्म्यवेदनम् ॥ १६ ॥
कलत्रपुत्रवित्तादेर्नश्वरत्वावबोधनम् । महादुःखेप्यशैथिल्यं भगवन्निश्चयस्य तु ॥ १७ ॥
एतद्धर्मविशिष्टत्वाच्छ्रेष्ठः प्रोक्तो गृही मया । त्यागी तु श्रेष्ठः समतो यो नष्टाशेषवासनः ॥१८॥
प्राप्नोति भगवद्धाम देहांते सोऽक्षराभिधम् । दृढनिश्चयबुद्धित्वाद् दुर्ल्लभं शिथिलात्मनाम् १९
इत्युक्त्वाऽगापयत्सद्भिर्मुक्तानंदकृतानि सः । कृष्णतद्भक्तमाहात्म्यबोधकृत्कीर्त्तनानि च ॥ २० ॥
मुक्तानंदोऽपृच्छदंते या मतिः सा गतिस्ततः । अस्मिन् वाक्ये त्वंतकाले यथा बुद्धिस्तथा गतिः
प्रोक्ताऽस्त्यथांतकाले तु तीव्रवेदनया क्वचित् । भक्तस्यापि मतिः कृष्णे न स्थिरा प्राग्वदीक्ष्यते ।
अंते विस्मृतकृष्णस्य गतिस्तस्यास्ति कीदृशी । एतन्मे ब्रूहि भगवन्नित्युक्तो हरिरब्रवीत् ॥ २३ ॥
साक्षात्कृष्णस्य संप्राप्तिः पुंसो यस्यास्ति तस्य तु । स्मृतौ वा विस्मृतावंते कृष्णस्य स्याच्छुभा गतिः
सर्वथा रक्षणं तस्य यमादिभ्यो हरिः स्वयम् । विधाय निजधामैव सद्यस्तं नयति ध्रुवम् ।२५।
नाऽपमृत्युभयं तस्य कालकर्मभयं न च । जगन्नियंतुर्भक्तो यः स एवोक्तोऽकुतोभयः ॥ २६ ॥
भगवद्विमुखो यस्तु पापबुद्धिः पुमानिह । देहांते नरके घोरे पात्यते स यमानुगैः ॥ २७ ॥
अल्पवेदनयाऽन्येन भाषमाणोपि कश्चन । यदि म्रियेत सोऽभक्तस्तथापि निरये पतेत् ॥ २८ ॥
अभाषमाणो मूढो वाक्रोशन्वा भूरिवेदनः । देहांते भगवद्भक्तो भगवद्धाम याति हिं ॥ २९ ॥
तस्मात्त्वदुक्तवाक्येपि सर्वदा या मतिर्नृणाम् । सेवांते गतिरित्येव ज्ञातव्योऽर्थः प्रमाणतः ३०॥
कृष्णतद्भक्तसंप्राप्त्या भक्ता जानाति सर्वदा । कल्याणं मे जातमिति सोंते सद्गतिमेति हि ३१
कृष्णकार्ष्णाश्रयाभावाच्छ्रेयो मे न भविष्यति । इत्यभक्तो मतौ वेत्ति ततोंते यात्यधोगतिम् ३२
अतोऽत्र सर्वैर्भगवद्भक्तैर्भाव्यं प्रयत्नतः । प्रीतिमन्यत्र हित्वैव भक्तत्वं ह्यतिदुर्लभम् ॥ ३३ ॥
भक्तो दास इति प्रोक्तस्तद्धर्मस्त्वात्मनः प्रियम् । हित्वैव स्वामिनो नित्यं प्रियं कार्यमितीरितः ॥
स्वामिभोग्यपदार्थानां भोगानिच्छा च चेतसि । अनुवृत्तिः सर्वदा च तस्य रुच्यनुसारिणी ।३५।
इदृग्भक्तेन हित्वैव देहात्ममतिमंजसा । विशुद्धात्मस्वरूपेण भजनीयो हरिः सदा ॥ ३६ ॥

इति प्रभोर्वागमृतं निपीय साधुः स चान्येपि सदःस्थभक्ताः ।
मुदं परां प्राप्य तदीयपादपद्मं नमंति स्म धृतोपदेशाः ॥ ३७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुर्दशस्तरंगः ॥ १४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । मार्गकृष्णतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य नरेशितुः । त्यागिगृहिसदःसंस्थो हरिरूचे सिताम्बरः ॥ २ ॥
भक्तिर्यस्य भवेत्कृष्णे स वर्त्तेतेत्थमन्वहम् । यद्यद्वदिष्यति वचः स्वयं कृष्णो नराकृतिः ॥ ३ ॥
तद्भक्तो वापि तत्तन्मे कार्यमस्ति निरन्तरम् । इति निश्चयवान् कुर्यात्प्रतीक्षां तस्य सादरम् ४॥
एतावत्तु वचस्तस्य मंतुं शक्यं मया न हि । इति तु क्वापि स ब्रूयाद् भ्रान्त्यापि स वचः पुमान् ।
हृदये भगवन्मूर्त्तेर्द्धारणे शूर एव सः । वैक्लव्यं नाप्नुयात् क्वापि धारणे तददर्शने ॥ ६ ॥
नित्यं नवनवश्रद्धस्तद्ध्याने हृदयोत्थितान् । दुःसंकल्पान्व्यपनयेन्न तु तद्ध्यानमुत्सृजेत् ॥७॥
महान्माहात्म्यमीशस्य विबुध्यात्मानमात्मना । मन्येत पूर्णकामं च ध्यानाभ्यासपरायणः ॥८॥
कृष्णमूर्त्तिं धारयतो हृदि तत्स्फुरणं यदि । न जायेत तथाप्येष मुहुस्तद्ध्यानमाचरेत् ॥ ९ ॥
एवं कुर्वन् दीर्घदृष्टिरादेहपतनादपि । निर्वेदं नाप्नुयात्क्वापि हृदि तद्दृढनिश्चयात् ॥ १० ॥
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् । इति कृष्णवचः स्मृत्वा न ध्यानविरतो भवेत् ॥

एकांतिको भक्त उदीरितोऽसौ सद्वाक्यविश्वस्त उदारबुद्धिः ।
इति प्रभोर्वागमृतं निपीय सर्वे सदस्था मुदिता बभूवुः ॥ १२ ॥
इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ पञ्चदशस्तरंगः ॥ १५ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । चतुर्थ्यां सहसः कृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे कृष्ण अभयिक्ष्मेशमंदिरे । भूरित्यागिगृहिसभासंस्थः प्राह सितांशुकः ॥ २ ॥
कृष्णभक्तस्य यस्य स्यात्सम्यक् सदसदर्थयोः । विवेकः स हि जानीयात्स्वनिष्ठानगुणानपि ॥३॥
विवेकस्य बलेनैव जह्यादपि सतांस्ततः । कार्ष्णानां तु गुणानेव गृह्णीयादितरांस्त्यजन् ॥ ४ ॥
प्राकृतावपि कृष्णे तु नेक्षेत ह्यगुणं क्वचित् । भगवान् वा तदीयो वा यद्यत् स्वं वचनं वदेत् ५
तत्तज्ज्ञात्वा परं सत्यं संशयीत न तत्र च । असतो लक्षणैर्ज्ञात्वा तत्संगं दूरतस्त्यजेत् ॥ ६ ॥
सतां वाक्याद्वपुः प्राणेन्द्रियहृद्भ्यो विलक्षणम् । सत्यं द्रष्टारमात्मानं सम्यग्विद्यान्मृषेतरत् ७
एवमात्मस्वरूपेण वर्त्तमानो मनोभवैः । संकल्पैरेकतां नैव प्राप्नुयात्स कदाचन ॥ ८ ॥
स्वधर्मदूषणं येन स्यात्तत्कर्म स नाचरेत् । सर्वं विचारं गृह्णीयात्स्वानुकूलं न चान्यथा ॥ ९ ॥

एवंविधः स्यादिह यः स भक्तो ज्ञेयः सुधिभिः सदसद्विवेकी ।
इति प्रभोस्तस्य वचोऽमृतं ते निपीय सर्वे मुदिताः सदःस्थाः ॥ १० ॥
इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षोडशस्तरंगः ॥ १६ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । मार्गस्य कृष्णपंचम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामी सितसूक्ष्मघनांबरः । व्यराजतोत्तमावास प्रांगणे पीठ उत्तमे ॥ २ ॥
कथां शृण्वन् भागवतीं वृतो वैष्णवराजिभिः । किंचिद्विचार्य हृदये कथांते सोऽब्रवीत्सतः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शृण्वंतु सर्वे मद्वाक्यं साधवोऽन्ये च मच्छ्रिताः। असत्सत्संगिषु स्वल्पः कुसंगोऽपीक्ष्यते क्वचित्।
अद्यारभ्य स निष्कास्यः सर्वतोऽपि मदाज्ञया। निरुत्साहत्वमेवाऽस्य रूपं धर्मादिपालने ॥५॥
केचिद्वदंति भगवद्वाक्यं धर्माश्च कोंजसा। शक्तो भवेत् पालयितुं शास्त्रज्ञोऽपि पुमानिह।६।
अतः स्वशक्त्या तत्ते च पाल्या अथ महाप्रभुः। अधमोद्धारकोऽस्तीति कल्याणं नः करिष्यति ॥
केचिद्वदन्ति भगद्रूपं धारयितुं हृदि। सामर्थ्यं न भवत्येव ध्यातुः क्वापि देहिनः ॥ ८ ॥
भगवानेव यं प्रीतस्तद्धारयति पुरुषम्। स एव शक्नुयात्तस्य धारणे स्वेच्छया तु न ॥ ९ ॥
कृत्वेत्थं शिथिलां वार्तां कांश्चिद्धीरान्नरानपि। कुर्वन्ति शिथिलांस्ते च कुसंगोऽयमुदीर्यते १०॥
अद्यारभ्य ततो वार्ता निरुत्साहा तु केनचित्। पुंसा पुंसु न कर्त्तव्या स्त्रिया स्त्रीषु च कर्हिचित्
सोत्साहानां नराणां तु नैवासाध्यं हि किञ्चन। अत उत्साहयुग्वार्ता कर्तव्या मामकैः सदा ॥
निरुत्साहां तु यो वार्तां कुर्यादज्ञानतः क्वचित्। सोऽपि कुर्यादेकदिनमुपवासं स्वशुद्धये ॥
इत्थं हरेर्वाक्यसुधां निपीय तदीयशिष्याः पुरुषाः स्त्रियश्च।
भूमावऽवर्तत तथैव सर्वे धर्मादिदार्ढ्ये निरता बभूवुः ॥ १४ ॥
इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ सप्तदशस्तरंगः ॥ १७ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। कृष्णषष्ठ्यां सहोमासे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं अभयेः सगृहांगणे। मंचे न्यसीदत्स्वस्थानादेत्य यामेंऽतिमे निशः ॥ २ ॥
सितवासाः स भक्तान् स्वानाह्वयामास सर्वशः। तदंतिकमुपेत्याशु न्यषीदंस्ते प्रणम्य तम् ॥
कृत्वा विचारं स्वहृदि मुहूर्त्तमथ सोऽब्रवीत्। शृणुतैकेन मनसा यूयं सर्वे मदाश्रयाः ॥ ४ ॥
स्निग्धभक्ताः स्थ मे यूयमतो गुह्यमपि ब्रुवे। एतां बुद्धिं य आतिष्ठेद्भवेन्मुक्तः स एव हि ॥
अन्यस्तु न भवेन्मुक्तः साधनैर्बुद्धिकल्पितैः। वेदशास्त्रपुराणादिपठनश्रवणादिभिः ॥ ६ ॥
नानाविधपदार्थानां सम्बन्धेऽपि बहिः सति। तद्योगेच्छान्तरे न स्याच्चैतदेव सुखं मम ॥ ७ ॥
तदिच्छाऽल्पाऽपि चेदन्तरुत्तिष्ठेन्मे कदाचन। तदैव कुर्यां तत्त्यागमन्यथा न सुखं भवेत् ॥८॥
एवंविधः स्वभावो हि वर्तते मम सर्वदा। ईदृक् स्वभावो यस्य स्यात् स मुक्तः स च मे प्रियः।
भक्तानां हृदि विक्षेपं केषांचिद् वीक्ष्य चेतसि। मया विचारितं तस्य कारणं किं भवेदिति ॥
न तावदंतःकरणं तद्धेतुः सर्वथा भवेत्। किं त्वस्ति निश्चितं ज्ञानं तत्रात्मपरमात्मनोः ११॥
तद्बलं तु समासाद्य प्रमादो वर्तते खलु। साक्षात्कृष्णस्य सम्प्राप्तिरात्मज्ञानं ममास्ति च १२॥
अतो न कार्यशेषोऽस्ति ममेत्येवं प्रमादिता। अस्तीत्येतावदेवाऽस्य सदोषत्वं विभाव्यते ॥१३॥
विशेषेण तु दोषोऽत्र ज्ञानेन्द्रियागतो मया। निश्चितोऽस्ति विचारेण संक्षेपेण वदामि तम् १४॥
नानाशब्दाननेकार्थान् श्रोत्रे शृण्वति तद्गताः। शुभाशुभागुणास्त्वन्तःकरणं प्रविशन्ति हि ॥
शुभेन याति नैर्मल्यं कालुष्यमशुभेन च। गुणेनैवान्तःकरणं वासो रंगवशाद्यथा ॥ १६ ॥
हिंस्रस्वैरिस्वैरिणीनां निर्मर्यादनृणां यदा। शृणोति शब्दांस्तर्ह्येव कालुष्यमुपयाति तत् ॥
यथा सुरायाः पानेन पुंसो भंगारसस्य वा। विदोऽपि स्याद्धि वैचित्र्यं तथातच्छ्रवणेन च ॥१८॥
श्रुतः शब्दो भगवतस्तदीयानां च शोभनः। शोधयत्यन्तरं सद्यः पानीयमिव कातकम् ॥१९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं स्पृश्याः पदार्थाश्च सन्त्यनेकविधा इह । त्वगिंद्रियमुपादत्ते तत्तत्स्पर्शाननेकधा ॥२०॥
शुभाशुभा गुणास्तेषां यान्त्यंतःकरणं ततः । शुभैः स्यात्तस्य नैर्मल्यं कालुष्यमितरैस्तथा ॥
सुरापानादिदृष्टान्तो योज्यः सर्वत्र पूर्ववत् । पापिस्पर्शोऽशुद्धिहेतुः सतां स्पर्शश्च शुद्धिकृत् ॥
अयोग्यता भवेत्स्वस्य यदि सत्स्पर्शने तदा । तदंघ्रिस्पृष्टभूरेणुस्त्वचा स्पृष्टव्य आदरात् ॥२३॥
चक्षुर्गृह्णाति यद्रूपं तदप्येवमनेकधा । शुभोऽशुभो गुणस्तस्याप्यन्तरे शुद्ध्यशुद्धिकृत् ॥ २४ ॥
कृष्णस्य च तदीयानां पदार्थानां समीक्षणम् । अन्तःशुद्धिकरं ज्ञेयं पापिनां तदशुद्धिकृत् ॥
जिह्वया स्वादनीयो यो रसः सोऽप्यस्तिऽनैकधा । जिह्वा गृह्णाति तं तस्य गुणास्त्वन्तर्विशन्ति हि॥
जातिदुष्टं भावदुष्टं स्पृष्टं चाशुचिदेहिना । कृष्णानर्पितमन्नादि स्वादितं ह्यंतरांघकृत् ॥ २७ ॥
विपरीतं त्वेतदेव ह्यन्तःकरणशुद्धिकृत् । भवतीत्यवगन्तव्यं प्राह्यान्नेनैव रंधितम् ॥ २८ ॥
घ्राणं गृह्णाति यं गन्धं सोऽप्यस्त्येवमनेकधा । अशुचिद्रव्यपापिष्ठगंधोंतरमलावहः ॥ २९ ॥
कृष्णतद्भक्ततद्वस्तुगंधो घ्रातश्च नासया । सद्योंतःकरणं शुद्धं करोतीत्यवधार्यताम् ॥ ३० ॥
एवं विज्ञाय पञ्चापि विषयाः शुद्धिहेतवः । सेव्यास्तद्विपरीतास्तु परिहार्या विदूरतः ॥ ३१ ॥
एतेषां सेवनमपि स्वस्वधर्माविरोधतः । कर्तव्यं न तु तं हित्वा युष्माभिर्मदुपाश्रितैः ॥ ३२ ॥
यतो ज्ञानेन्द्रियाण्येव भक्तिविक्षेपहेतवः । अतस्तानि नियम्यैव वर्त्तनीयानि सत्पथे ॥ ३३ ॥
दुर्दान्ताश्वानि वै तानि रज्ज्वा बुद्ध्या मदुक्तया । नियच्छेत् पुरुषो धीरः स्वार्थभ्रष्टोऽन्यथा भवेत् ॥
सनकादिसमानोऽपि यस्तु योगी प्रमादवान् । कामचारादिन्द्रियाणां सोऽपि यायादधोगतिम् ॥
इन्द्रियाणां स्वविषयाहारशुद्ध्यैव शुद्ध्यताम् । यात्यन्तःकरणं तत्र कृष्णध्यानं च सिद्ध्यति ॥
पञ्चस्वेकतमस्यापि मलिनाहारदापने । मालिन्यं तत्प्रयात्येव नियच्छेत्सकलान्यतः ॥ ३७ ॥
अन्तःकरणविक्षेपे वाह्यसंगोऽपि कारणम् । यादृक् संगो भवेत्पुंसस्तादृशं हि मनो भवेत् ३८ ॥
सप्तभौमे महासौधे दर्पणालिविराजिते । स्रग्गन्धवासोऽलंकारजुष्टस्त्रैणसभा भवेत् ॥३९॥
वेश्यानृत्यं सवादित्रं चषकाश्च सुराभृताः । तत्र स्युरुपदंशाश्च धूपाश्चागुरुजा अपि ॥ ४० ॥
भक्तोऽपि तत्र गत्वा चेन्निषीदेत्तर्हि तन्मनः । शुद्धमप्यन्यथैव स्याद्दोषात्संसर्गसंभवात् ४१॥
धर्मज्ञानविरागाढ्यभक्तिवार्तां च कुर्वताम् । कंथाजीर्णाम्बरधृतां सभा स्यादुटजे सताम् ॥
तत्र गत्वा निषीदेच्चेद्दुराचारोऽपि कश्चन । तदा तस्य मनो दुष्टमपि स्यादन्यथैव हि ॥४३॥
एवं संसर्गजा दोषा गुणाश्च सुधिया सदा । विवेचनीयाः कर्तव्यः सतां संगो न चासताम् ॥
सदसद्व्यक्तिविज्ञानं सुधियामेव जायते । कुधियां पशुतुल्यत्वात्कुतस्तत्संभवो भुवि ॥ ४५ ॥
अतः सुधिभिर्युष्माभिस्त्यागिभिर्गृहिभिस्तथा । सत्संग एव कर्तव्यो निःश्रेयसकरो नृणाम् ॥
असदाचरणत्यागभगवद्भक्तिबोधनम् । कुधीभ्योपीह कर्तव्यं मन्येरंस्ते वचो यदि ॥ ४७ ॥
भक्तो भूत्वा तु यः कश्चिद्भक्तमण्डलगोऽपि सन्। दुराचारोऽत्र दृश्येत स निष्कास्यः स्वमण्डलात्
अन्यथा तु भवेत्स्वेषामभद्रं संगदोषतः । सर्पदष्टांगुष्ठ इव त्याज्योऽतो दूरतः स तु ॥ ४९ ॥
एतन्मम वचः सर्वैर्माननीयं हि सर्वथा । तेनैव मंस्ये परमां सेवां युष्मत्कृतामहम् ॥ ५० ॥
सफलीकरणाच्चाहं मच्छ्रमस्याऽऽशिषोऽपि वः । दास्याम्यथैकत्र सर्वे वत्स्यामोऽन्तेऽक्षरे वयम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्संगमिन्द्रियायाममसत्यागं च यः पुमान् । नाचरिष्यति मे भूत्वा मम तस्य च दूरता ॥
ब्रह्मरांक्षसतां चापि स प्राप्स्यति न संशयः । भवे भ्रमन्कचित्काले भक्तेः फलमवाप्स्यति ५३॥
मदाचारं तु यो दृष्ट्वा तथा वर्तिष्यते पुमान् । अल्पसत्त्वोऽल्पबुद्धिः स प्राप्स्यत्येवाऽऽपदं द्रुतम् ॥
पराभाव्यो न विषयैर्ऋषिर्नारायणो यथा । भवाम्यनादिमुक्तश्च स्वतंत्रः स्वस्वरूपदृक् ॥ ५५ ॥
गच्छंस्तस्वविषयं चाहमंतःकरणमात्मनः । अनायासेन गृह्णामि सद्यो व्याघ्र इवोरणम् ॥ ५६ ॥
नास्ति दृग्विषयोऽन्यस्य तत्कुतस्तस्य निग्रहः । अतो दृष्ट्वा मदाचारं तथाचर्यं न केनचित् ॥
सम्प्राप्य तत्तद्विषयप्रसंगं शुद्धतात्मनः । सनकादिसमस्यापि दुर्लभाऽन्यस्य का कथा ॥५८॥
तादृशः पुरुषो लोके न दृष्टो न श्रुतः क्वचित् । न भूतो न भविष्यश्च वर्तमानोऽपि नास्ति हि ।
आभाषयामि यच्चाहं प्रीत्या कञ्चन मानवम् । प्रीत्या पश्यामि वा कंचित्प्रीत्या कुर्वे च भोजनम्
वस्त्राभूषणपुष्पस्रक्शेखरादींश्च यद्दधे । तत्सर्वं कृपया कुर्वे तत्तज्जीवसुखाप्तये ॥ ६१ ॥
न तु स्वस्य सुखावाप्त्यै व्यापारो मम कश्चन । दैहिको वाचिको वापि मानसोऽप्यस्ति निश्चितम्
अतो न मम दृष्टान्तो ग्राह्यो विषयसेवने । आहारशुद्धिरक्षाणां विधातव्यैव सर्वथा ॥ ६३ ॥
सर्वत्रेयं च मद्वार्ता युष्माभिः परमादरात् । प्रवर्त्तनीया तेनाहं तुष्टिमेष्यामि वै भृशम् ६४ ॥

इत्युक्त्वा स तु गुरुरीश्वरो निवासं प्रायात्स्वं तमथ तदाश्रिताः प्रणम्य ।
तेऽपि स्वं स्वमयुरवाप्तभूरिहर्षा आपीयामृतमिव तद्वचो निकेतम् ॥ ६५ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धावष्टादशस्तरंगः ॥ १८ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । पौषशुक्लप्रतिपदि वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे सायं वेश्मन्युत्तमभूभुजः । त्यागिगृहिसदोंतःस्थो हरिः प्राह सिताम्बरः ॥ २ ॥
मुमुक्षोः पुरुषस्येह ह्येकयैवात्मनिष्ठया । प्रीत्या वाप्येकया कार्यं विरक्त्या वा न सिद्ध्यति ॥
एकेन वा स्वधर्मेण श्रुतिस्मृत्युदितेन च । स्वेष्टसिद्धिर्भवेन्नैव ततः साध्यं चतुष्टयम् ॥ ४ ॥
सत्यामप्यात्मनिष्ठायां विना प्रीतिं रमापतौ । कृष्णप्रसादैकलभ्यमैश्वर्यं नाप्यते महत् ॥ ५ ॥
प्रीतौ सत्यामपि हरावात्मनिष्ठां विना क्वचित् । देहाभिमानोद्भवतः सा न सिद्धिप्रदा भवेत् ॥
कृष्णप्रीतिश्चात्मनिष्ठा दृढवैराग्यमन्तरा । विषयासक्तिदोषेण भवेतां सिद्धिदे कथम् ॥ ७ ॥
भक्तिज्ञानैकलभ्यस्याऽलाभाद्ब्रह्मसुखस्य च । केवलेन विरागेण नार्थसिद्धिर्हि देहिनः ॥ ८ ॥
केवलेन तु धर्मेण न त्रिलोक्या बहिर्गतिः । ऋते धर्माच्चात्मनिष्ठाभक्त्यरागो न सिद्ध्यतः ॥९॥
तच्चतुष्कमिदं यस्य दृढं स्यात्सत्समागमात् । स एव हरिभक्तेषु पूर्ण इत्युच्यते बुधैः ॥ १० ॥

स्यान्न्यूनमेतेष्विह यन्मुमुक्षोस्तत्साधनीयं सदुपासनेन ।
इति प्रभोस्ते वचनं सुधाभं निशम्य तत्तथ्यममंसतैव ॥ ११ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धावेकोनविंशस्तरंगः ॥ १९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । पोषशुक्लद्वितीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य क्षितीशितुः । प्राग्द्वारालयवेद्यां स न्यषीदत्तूलिकासने ॥ २ ॥
सितशीर्षपटे पीतपुष्पशेखरराजितः । पीतपुष्पस्रजं कंठे तद्गुत्तंसौ च कर्णयोः ॥ ३ ॥
दधत्सितांतरीयश्च सितसूक्ष्मां चतुष्पटीम् । वसानः साधुगृहिभिर्वृतः सदसि भूरिभिः ॥४॥
पप्रच्छ भक्तान्स्वास्यैकदृशस्तानथ स प्रभुः । अज्ञानिष्विह सर्वेषु कोऽधिको भवतां मतः ॥५॥
इति पृष्टाः सदःस्थास्ते कर्त्तुं तस्योत्तरं यदा । नाशक्नुवंस्तदा स्वामी स्वयमाह तदुत्तरम् ।६।
सदसद्रूपद्रष्टास्ति जीव एव वपुःस्थितः । बाल्याद्यवस्था द्रष्टा च न स्वात्मानं स पश्यति ॥७॥
शब्दादीन्विषयांश्चासाविन्द्रियैः श्रवणादिभिः । ज्ञात्वा भुंक्ते न चात्मानं वेत्ति भुंक्ते न तत्सुखम्
आत्मा ज्ञाता ह्यसावेव सर्वाज्ञान्यधिको मतः । असावेव जडश्चोक्तो व्याकुलोऽथ च पामरः ॥
अथाह तं शुकमुनिः प्रभुं नत्वा सदःस्थितः । आत्मनो दर्शने स्वामिन् स्वातंत्र्यं नेक्ष्यते नृणाम्
यस्य नात्मदिदृक्षा स्यात्तादृशो नास्ति कश्चन । त्वद्भक्तो भुवि किंत्वस्य तत्सामर्थ्यं न विद्यते ॥
यदि तत्स्यात्तदा त्वेष किमित्यऽज्ञानितां भजेत् । इति तस्य सतो वाक्यं श्रुत्वा श्रीहरिरब्रवीत् ॥
सत्संगो यस्य जातोऽस्ति तस्य तु स्वात्मदर्शने । परात्मदर्शने चापि स्वातन्त्र्यं विद्यते खलु ॥
यदा तदुद्योगमसौ कुर्यादीक्षेत तं तदा । हेतुः प्रमाद एवास्ति तस्यात्मानीक्षणे मुने ॥ १४ ॥
मायया विवशो जीवो ह्यंतर्दृष्ट्या दिने दिने । स्वप्नं सुषुप्तिकां वापि यात्यवस्थामनीप्सिताम् ॥
स्वेच्छयात्मावलोकाय त्वंतर्दृष्टिमसौ क्वचित् । न करोतीत्यतोऽज्ञानिमुख्यः प्रोक्तस्तदीक्षकैः ॥
कृष्णप्रतापमालोच्य योंतर्दृष्टिं करोत्यऽसौ । स्वरूपं सहसा भास्वद्भासुरं वीक्षते पुमान् ॥१७॥
प्रकाशे विमले तस्मिन् साक्षात्कृष्णं च वीक्षते । नारदादिरिव स्याच्च ततः सोऽतिसुखी नृपु ॥

कार्यः प्रमादो न ततोऽत्र भक्तैर्मेदाश्रितैरात्मसमीक्षणादौ ।
श्रुत्वेति वाचं ससुधां मुनीन्द्रस्तुतोष चान्येपि हरेः सदःस्थाः ॥ १९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ विंशतितमस्तरंगः ॥ २० ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । पौषशुक्लतृतीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामी वेद्यामुत्तमभूपतेः । प्राग्द्वारवेश्मनःश्वेताखिलवासा उपाविशत् ॥ २ ॥
निजभक्तसभामध्ये क्रियमाणं सदुत्तमैः । वीणामृदंगादिवाद्योपेतं शुश्राव गायनम् ॥ ३ ॥
स्वतोषणार्थमेवाऽथ तद्गायनपरिश्रमम् । जानन्नंतर्दृशा किंचिद्विचार्य क्षणमब्रवीत् ॥ ४ ॥
स्वधर्मज्ञानवैराग्योपेता भक्तिर्दृढा तु या । सैवाऽस्ति भगवत्तोषहेतुरित्यवगम्यताम् ॥ ५ ॥
सांगैषा भक्तिरेवात्र धर्म एकांत उच्यते । तद्वंतः साधवो ह्यऽत्र सत्संगे संति सांप्रतम् ॥ ६ ॥
भक्ता एकांतधर्मस्था ब्रह्माख्यं धाम वैष्णवम् । अक्षरं यांति देहांते यद्गत्वा न पुनर्भवः ॥ ७ ॥
अतो गृहस्थैरपि मे धर्म एकांत आदरः । कर्त्तव्यः सर्वथा येन सर्वदुःखक्षयो भवेत् ॥ ८ ॥
क्रियासु क्रियमाणासु सर्वास्वऽप्यत्र चेतसि । चिंतनीयः कृष्ण एव यथादृष्टो यथाश्रुतः ९ ॥
अविक्षिप्तेंतरे कृष्णो द्रष्टव्योन्तर्दृशा चिरम् । विक्षिप्ते तु विधातव्यं बहुधा साख्यचिंतनम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देहेंद्रियांतःकरणदेवताविषयादितः । बोद्धव्यः पृथगात्मा तु ध्येयं शुद्धेतरैं पुनः ॥ ११ ॥
देहेऽहंता न कार्याऽत्र ममता दैहिकेषु च । यतस्तेषां न नियमो दृश्यते भ्रमतां भवे ॥ १२ ॥
चतुरशीतिलक्षाणि श्रूयन्ते देहजातयः । अनुभूता हि ताः सर्वाः सर्वैरपि च देहिभिः ॥१३॥

नास्ति सा स्त्री क्वचिद्यस्यां जीवो नाऽजनि कश्चन ।
सा च स्त्री क्वापि नास्त्येव या न भुक्ता हि केनचित् ॥ १४ ॥

स च नास्ति पुमान्कश्चिद्यस्तु नारीवपुर्धृता । अभुक्तः केनचित्क्वापि जीवेन भवति ध्रुवम् १५
तत्तद्देहेष्वऽथो तत्तद्दैहिकेषु पुरा कृताम् । अहंतां ममतां चाऽद्य यथा केपिं न कुर्वते ॥ १६ ॥
तथैव वर्त्तमानेषु देहदेहानुबंधिषु । अहंता ममता नैव कर्तव्या नश्वरेष्विह ॥ १७ ॥
अतः सत्यात्मरूपः सन्नऽसत्स्वेतेषु सर्वथा । हित्वासक्तिं भगवति सज्जेत पुरुषः सुधीः ॥१८॥
माहात्म्यातिशयज्ञानं विना कृष्णस्य सर्वथा । प्रीतिर्नस्यादतो नित्यं सेव्याः संतस्तदाश्रये ॥१९॥
ईदृग्ज्ञानविहिनस्तु सत्संगी पशुवन्मतः । कृष्णप्रतापाच्छ्रेयस्तु तस्याप्यग्रे भविष्यति ॥ २० ॥
किंत्वेकांतिकभक्तोऽसाविति ख्यातिं तु नैत्यसौ । प्राप्यमेकांतिकेनैव ब्रह्मधामाऽचिरध्वना ॥
द्वेधोक्तमक्षरं ब्रह्म मूर्त्तं चामूर्त्तमित्यऽदः । मूर्त्तं तत्रास्ति कृष्णस्य सेवायां दिव्यविग्रहम् ॥२२॥
अमूर्त्तं धाम कृष्णस्य स नित्यं तत्र राजते । चिदाकाशादिपर्यायैस्तद्वेदाऽन्यत्र तूदितम् ॥२३॥
भक्ता एकांतिका येऽत्र देहांते तेऽपि धाम तत् । प्राप्याऽक्षरसधर्माणः सेवंते कोटिशो हरिम् ।
अतः सत्संगिभिः सर्वैः प्राप्य धामाऽक्षरं बृहत् । तन्मुक्तपंक्तौ स्थास्याम इति कार्योऽत्र निश्चयः ॥
सुखं तदितरत्सर्वं तुच्छमित्यवधार्य च । एकांतिकत्वे यन्न्यूनं तत्साध्यं तूर्णमंजसा ॥ २६ ॥
योऽत्र कृष्णेतरद्रव्ये लुब्धः स्यान्मायिके नरः । स कृष्णधाममार्गास्सिद्ध्यादौ सक्तिमाप्नुयात्
ततोऽसौ भगवन्मार्गाद्भ्रष्टो भूत्वातिदुःखितः । जायतेऽतः प्रयत्नेन हेयाः कृष्णान्यवासनाः ॥

अनन्यचेता भजतीह कृष्णं यस्तस्य सौख्यं हि परत्र चात्र ।
इति प्रभोर्वाक्यसुधां निपीय सर्वेपि भक्ता मुदिता अभूवन् ॥ २९ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धावेकविंशस्तरंगः ॥ २१ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभू मिते । पौषे चतुर्थ्यां शुक्लायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे कृष्णः प्रागास्योत्तमवेश्मनः । वेद्यां पीठोत्तमे भक्तैर्नैकैर्वृत उपाविशत् ॥ २ ॥
पुष्पापीडावतंसस्त्रग्राजितं विशदांशुकम् । उपतस्थुः साधवस्तं वादित्रोपेतगायनैः ॥ ३ ॥
तेभ्यः प्रसन्नः स विभुर्मुहूर्त्तं वाद्यगायनम् । निशम्याथाऽब्रवीद्वाचं सर्वे शृणुत साधवः ॥४॥
वाद्योपेते कृष्णपद्यगायने श्रोतृरंजने । क्रियमाणे कृष्णमूर्त्तिस्मृतिश्चेत्तत्सुगायनम् ॥ ५ ॥
अन्यथात्वऽपगानं तन्न गायकहितावहम् । न च तेन मनःशांतिरभ्यस्तेनापि जायते ॥ ६ ॥
पद्यगानमतो विष्णोर्नाम संकीर्त्तनादि च । तन्मूर्त्तिस्मृतियुक्कार्यं ध्यानं तेन च सिद्ध्यति ७॥
कृष्णमूर्त्तिं स्मरंत्येके भजनावसरेऽन्वहम् । नान्यत्र तन्मतं तुच्छमनभ्यस्तास्मृतेस्तदा ॥ ८ ॥
यस्य क्रियासु सर्वासु कृष्णमूर्त्तिस्मृतिर्भवेत् । नित्यं भजनकालेपिं स्यात्तस्यैव मनः स्थिरम् ॥
बहिर्भ्रमत्सर्वकालं ध्यानकाले मनः कथम् । स्थिरं स्याद्भगवन्मूर्त्तौ विनाऽभ्यासं प्रमादिनः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतः सर्वेंपु कालेपु सर्वास्वपि क्रियासु च। कृष्ण एव मनो धार्यं सावधानमुमुक्षुणा ११ ॥

वचःसुधामात्मगुरोस्त इत्थं निपीय संतस्तमथ प्रणम्य।
तथा करिष्याम इतीरयित्वा गानं पुनश्चक्रुरनुज्ञयाऽस्य ॥ १२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्वाविंशस्तरंगः ॥ २२ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। सहस्यशुक्लपञ्चम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे राज्ञ उत्तमस्यालये प्रभुः। प्राग्द्वारे स वहिर्वेद्यां न्यषीदद्भक्तसंसदि ॥ २ ॥
दधत्सितं शीर्षपटमंतरीयं च तादृशम्। कौसुंभं च कटिपटं विशदं चांगरक्षकम् ॥ ३ ॥
स्वयमेव स कारुण्यात्स्वीयान्प्रत्यब्रवीद्वचः। सर्वैर्मदाश्रितैर्नित्यं कार्यं सच्छास्त्रसेवनम् ॥ ४ ॥
वेदादीनि मतान्यष्टौ सच्छास्त्राणीह यानि तु। श्रीवासुदेवमाहात्म्यं तेपु प्रेष्ठतमं मम ॥ ५ ॥
भगवद्भक्तिरीतिर्या मुमुक्षूणामपेक्षिता। सा तु तत्रैव सुस्पष्टमुक्तास्तीति ममादरः ॥ ६ ॥
भगवंतं सेवमाना भक्तास्तत्र द्विधोदिताः। भक्ता एकांतिकाश्चेति ज्ञातव्यास्ते तु लक्षणैः ॥७॥
तत्राद्यानां निश्चयः स्यात्सम्यक् कृष्णस्य चेतसि। किंतु देहात्मधीयुक्तास्ते भजेयुरतंद्रिताः ॥८॥
अन्ये तु देहत्रितयपरशुद्धात्मरूपिणः। अतिप्रकाशे तत्रैव साक्षात्कृष्णमुपासते ॥ ९ ॥
अतिप्रकाशात्मरूपं त ईक्षंते सदैव हि। कृष्णं च साक्षात्तत्रैव सदेक्षंतेऽतितेजसम् ॥ १० ॥
सति देहेपि ते ज्ञेया नित्यं ब्रह्मपुरस्थिताः। तादृग्भावस्ततः सर्वैः साधनीयः प्रयत्नतः ॥११॥
भवेद्देहात्मधीर्यावद्भक्तानां श्रीपतेरिह। तावद्विघ्नभयं तेषामस्ति त्याज्या ततस्तु सा ॥ १२ ॥
महतामपि भक्तानां क्वचिद्देहात्मधीवशात्। महत्यभूद् दुर्दशेति पुराणेषु श्रुतं मया ॥ १३ ॥
शिवस्य मोहान्मोहिन्यां सरस्वत्यां च वेधसः। अहल्यायां सुरेशस्य तारायां सा विधोरभूत् ॥
परीक्षितस्तथात्वेन राज्ञोऽभूत्संशयो हृदि। कृष्णस्य रासलीलायां नृत्वसंभावनेन च ॥ १५ ॥
एकांतिकत्वात्तु शुको लीलासु निखिलास्वपि। निःसंशयो यथावत्ताः स्वयं त्याग्यप्यवर्णयत् ॥
देहात्मबुद्धिविलयो ध्यातकृष्णप्रसादतः। भवेदतः कृष्ण एव मनो धार्यं प्रयत्नतः ॥ १७ ॥
भक्तस्य कृष्णे मनसो धार्यमाणस्य यत्नतः। वृत्तिर्द्विधा भवेत्तत्र वर्त्ततैका तु केशवे ॥ १८ ॥
प्रेमात्मिका च साऽन्या तु स्यात्स्वस्मिन् ध्यानकर्त्तरि। सविचारा हि सा ज्ञेया दुःसंकल्पापनोदनी
एवमभ्यसतो वृत्तिः कृष्ण एव स्थिरा भवेत्। तत एकांतिकोऽसौ स्यात्तस्या एकांतभावतः ॥
न करोत्येवमभ्यासं यस्तु तस्य मनः क्वचित्। चांचल्यं न जहात्येव ततो नाप्नोत्यसौ शमम्।
क्षणं कृष्णे क्षणं वित्ते क्षणं देहे च दैहिके। भ्रमता मनसा नैव स्थितिरीदृगवाप्यते ॥ २२ ॥
यथा कश्चिद्ध्रदं भर्त्तुकाम एकं निषिंचति। एकस्मिन्दिवसे तस्मिन् गर्त्ते पानीयकुंभकम् ॥
पुनर्दिने द्वितीये वा तृतीये तत्र सिंचति। भ्रियेत न ह्रदस्तेन शताब्देनाप्यनेहसा ॥ २४ ॥
क्रियेताऽल्पाऽप्यखंडा चेदंबुधारा तदा तु सः। भ्रियेताऽप्यल्पकालेन वद्र्धमानांबुनाऽन्वहम् ॥
तथा कृष्णेपि भक्तस्य मनो धारयतः क्वचित्। न स्थिरं जायते तद्धि कालेन बहुनापि वै २६॥
अन्वहं धारयेद्यस्तु क्रियासु निखिलास्वपि। मनोऽखंडं भगवति तस्यैव स्यात्स्थिरं हि तत् ॥

एकान्तिकत्वास्य एव यत्नः सदा विधेयः सुधिया नृलोके।
श्रुत्वेति वाचं मुदिताः सुधाभां ते तस्य भक्ता अवदंस्तथेति ॥ २८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रयोविंशस्तरंगः ॥ २३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । शुक्लषष्ठ्यां सहस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे राज्ञ उत्तमस्यैव वेश्मनः । प्राग्द्वारस्य बर्हिर्वेद्यां निषण्णो भक्तसंसदि ॥ २ ॥
अंतरीयोत्तरीये च सिते शीर्षपटं तथा । नीशारं च दधच्छोणं स्वीयान्प्रत्यब्रवीत्प्रभुः ॥ ३ ॥
एकांतिकानां भक्तानां ज्ञानेन ब्रह्मणि स्थितिः । या जायते समासेन भवद्भ्यः कथयामि ताम् ।
यथैव मायापुरुषौ तत्कार्याण्यखिलानि सः । नेक्षेत सोऽक्षरं पश्येत्सच्चिदानंदलक्षणम् ॥ ५ ॥
तत्रैकरसचैतन्यप्रकाशोऽतिमहत्यसौ । कृष्णमूर्त्तिं विना दिव्यां नान्यमाकारमीक्षते ॥ ६ ॥
कृष्णमूर्त्तिमपि क्वापि नेक्षते तेजसः पृथक् । क्वचित्तु तां च तत्तेज उभयं स समीक्षते ॥ ७ ॥
एषा ज्ञानस्थितिः प्रोक्ता ज्ञानप्रलय इत्यपि । साक्षात्कृष्णे मनःस्थैर्यादेव तत्प्राप्तिरंजसा ॥८॥
प्रत्यक्षकृष्णमहिमा यावान्बुद्धोऽस्ति येन सः । हृदि प्रकाशं तावंतं वीक्षते चिन्मयं पुमान् ॥९॥
तावंतश्चैव संकल्पा हृदि वैषयिका अपि । नष्टाः स्युरथ तावंतं शृणोति प्रणवध्वनिम् ॥ १० ॥
यथावद्येन माहात्म्यं सत्सच्छास्त्रनिषेवया । ज्ञातं कृष्णस्य भक्तेन नष्टसंशयमात्रकम् ॥११॥
स तु सर्वत्र संपूर्णं प्रकाशं परिपश्यति । शृणोत्यतिमहांतं च मधुरं प्रणवध्वनिम् ॥ १२ ॥
कृष्णेतरपदार्थानां संकल्पा अखिला अपि । भवंति नष्टास्तस्यैव ब्रह्मीभूतः स चोच्यते ॥१३॥
एतदर्थावबोधाय दृष्टांतः कथ्यते मया । जंबीरशकलस्यार्द्धं यथा कश्चन चूषति ॥ १४ ॥
अम्लत्वं तस्य दंष्ट्रासु जायते न तु तन्महत् । अतः स चर्वति शनैश्चणकानपि पूरुषः ॥ १५ ॥
अथार्द्धमेकं जंबीरं द्वे वा त्रीणि च चूषति । क्रमेणैवाम्लताधिक्यं यांति तस्याऽखिला द्विजाः ॥
ततो मृद्वोदनमपि नाऽत्तुं शक्नोत्यसौ पुमान् । कुतस्तरां तु चणकान्मुद्गान्वा शनकैरपि ॥
भूरिजंबीरचूषस्य दंतस्थादनशक्तयः । सकला अपि नश्यंति स च स्याच्छीरदोपमः ॥ १८ ॥
तथाऽस्य पुंसः श्रीकृष्णमाहात्म्यानुभवस्य तु । तारतम्यात्तारतम्यं प्रकाशेक्षादिषु स्मृतम् १९॥
कृष्णमाहात्म्यानुभूतिर्यस्याऽऽधिक्येन सर्वथा । अंतर्बहिश्च तस्य स्यात्प्रकाशेक्षादिकं भृशम् २०॥
बाह्यांतःकरणैस्तत्तद्विषयांश्चणकानिव । अम्लदंतैर्ग्रहीतुं स न क्षमो जायते क्वचित् ॥ २१ ॥
कृष्णमाहात्म्यविज्ञाप्त्या ज्ञानस्थितिरियं मया । प्रोक्ता स कृष्णस्तु विभुः कालमायानियामकः ।
गुणातीतो निर्विकारो ज्ञेयः सर्वेश्वरेश्वरः । श्रेयोर्थमेव जीवानां स्वेच्छया भाति मर्त्यवत् २३॥
तस्मिन्नप्रधियो मूढा आसुरीं प्रकृतिं श्रिताः । दृष्टांतेनात्मनो दोषान् निर्दोषे कल्पयंति हि ॥
दोषैस्तत्कल्पितैः कृष्णो दोषस्पृग्नैव जायते । प्रत्युत प्रविशंत्येव कल्पकेष्वेव तेऽखिलाः २५॥
मन्यंते कामिनं कृष्णं ये ते स्युः कामिनो ध्रुवम् । क्रोधिनं लोभिनं चैनं विदंतः स्युस्तथा स्वयम्
अपि त्वाकृतिमेनं ये विद्युर्निर्दोषमंजसा । सदोषा अपि ते तु स्युर्निर्दोषास्तत्प्रतापतः ॥ २७॥
इति ब्रुवंतं कृष्णं तं ब्रह्मानंदोऽब्रवीन्मुनिः । स्वामिन् पृच्छाम्यहं किंचिच्छ्रुत्वा कुरु तदुत्तरम् ।
सतां येषां हृदि स्यात्ते कृष्णस्य निश्चयोऽजसा । संकल्पा अपि नष्टाः स्युरिंद्रियाणि वशे तथा ।
अपूर्णकामता तेषामपि ह्यवतिष्ठते । तस्य किं कारणमिति पृष्टो हरिरुवाच तम् ॥ ३० ॥
ईदृशानामपि सतां ह्यपूर्णत्वमानिता । येषां स्यात्ते तु यान्त्येव विदुषामुपहास्यताम् ॥३१॥
वशेंद्रिया असंकल्पाः प्रत्यक्षकृष्णनिश्चयाः । संतोऽत्र यद्यपूर्णाः स्युः पूर्णाः के तर्हि सन्मताः ।
एत एव हि शास्त्रेषु पूर्णा धन्याश्च कीर्त्तिताः । कृतार्थाश्च ततो ज्ञेया तैरेव निजपूर्णता ॥३३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कामादिदावदग्धेऽत्र लोके धन्या वयं परम् । यदत्र साक्षात्कृष्णो नः प्राप्तः संतश्च तच्छ्रिताः ।
तत्प्रसादेन जित्वैव कामादीनांतरान् रिपून् । ब्रह्मरूपात्मना कृष्णोपासनां कुर्महे तथा ॥३५॥
इति मत्वा सदा स्थेयं तैर्महानंदसंभृतैः । भाग्यवंतस्त एवोक्ता विद्वद्भिर्नारदादिवत् ॥ ३६ ॥
ये त्वनेवंविदः संतः प्राप्तपूर्णगुणा अपि । अपूर्णमिव मन्यंत आत्मानं ते हि बालिशाः ॥३७॥
यथा प्राप्यात्मकरे देवादेरपि दुर्लभम् । चिंतामणिं तद्गुणाज्ञा मन्येरन् स्वं हि निर्द्धनम् ॥
तथा तेऽपीति जानीहि संतः स्वन्यूनताविदः । न हि तेष्वस्त्यपूर्णत्वं स्वमाहात्म्यं विदुर्न ते ॥
एते तु पूर्णाः संत्स्येव वक्तव्यं नाऽत्र किंचन । सामान्यस्याऽपि भक्तस्य यन्महत्ताऽस्ति भूयसी ।
यदि कश्चित्कृष्णभक्ते दोषो दृश्येत तर्हि सः । सत्संगकृष्णभक्तिभ्यां नंक्ष्यत्यस्येति गम्यताम् ।
बुद्धिमद्भिर्महद्भाग्यं ज्ञेयं तस्याऽतिदुर्लभम् । प्रत्यक्षकृष्णं यदसौ प्रपन्नो दृढनिश्चयः ॥ ४२ ॥
संस्कारोप्यस्य विज्ञेयो महान्प्राग्जन्मसंभवः । सत्सत्संगो यदस्याऽद्य जातः संसृतिखंडनः ॥

भक्तस्य साक्षात्कमलाधवस्य ग्राह्या गुणा न त्वगुणः कदापि ।
हरेर्निपीयेति सुधां तु वाचं तुतोष साधुः स तथेतरे च ॥ ४४ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ चतुर्विंशस्तरंगः ॥ २४ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । सहस्यशुक्लसप्तम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे प्रातस्त्यागिशालामुपेत्य सः । साधुभिः कल्पिते पीठे न्यषीदत्ते च तत्पुरः ॥ २ ॥
प्राङ्मुखः शुक्लवसनो गृहिभक्तैश्च वेष्टितः । सतः प्रत्यब्रवीत्प्रीत्या स्वयमेव दयानिधिः ॥ ३ ॥
संतः शृणुत यूयं वो वदाम्येकाग्रमानसाः । धर्मस्थस्यापि भक्तस्य हरेरंतरपूर्णता ॥ ४ ॥
परमार्थतया याऽस्ति सा तु तेनाऽतियत्नतः । अपनेया सम्यगाभ्यां साधनाभ्यां ब्रुवे च ते ॥५॥
आत्मनिष्ठा दृढा कृष्णमाहात्म्यस्य च वेदनम् । एते भवेतां यस्याऽत्र स संपूर्ण इतीयताम् ६
अत्रैतयोरेकतरन्न्यूनत्वे न्यूनता हृदि । भक्तस्य वर्त्तेत ततः साध्यमेतद् द्वयं दृढम् ॥ ७ ॥
एतयोर्न्यूनता त्वस्य दुःखदा नेह केवलम् । समाधावपि यत्साऽमुं भृशं दुःखाकरोति हि ८ ॥
मया ह्योऽत्रैकभक्तस्य समाधिः कारितो महान् । स भूरितेजः शब्दांश्च दृष्ट्वा श्रुत्वाऽत्रसद् भृशम्
दंदह्यते मया स्वामिन्नित्युवाच स मां ततः । आत्मज्ञानोपदेशेन मयाऽसौ बोधितश्चिरात् १०
आश्वासनार्थं च मया तस्य वार्त्ता कृता च ताम् । कथयाम्यवधार्या सा भवद्भिर्ध्याननिवेदिभिः ॥
कुर्वन्समाधिं पुरुष आदौ कृष्णदृढाश्रयः । स्थानं गणपतेर्याति तत्र तं च समीक्षते ॥ १२ ॥
तेजः पश्यति तत्रासौ दिव्यं नादं शृणोति च । ततो ब्रह्माच्युतादीनामूर्द्ध्वं स्थानानि गच्छति ॥
यथा यथा व्रजत्यूर्ध्वस्थानमेष तथा तथा । तत्र तत्राऽनुभवति तेजोनादप्रभूतताम् ॥ १४ ॥
शतस्कूर्जथुवद्भीमान् यदा नादान्निशाम्यति । तदा तु त्रस्यति भयादतिधीरोप्यनात्मवित् ॥
त्यक्तमर्यादाब्धिनिभं यदा तेजश्च वीक्षते । तदा बिभेत्यसौ यद्वद्विश्वरूपेक्षणेऽर्जुनः ॥ १६ ॥
आत्मज्ञानादिसंपन्नास्त्विह भीतिं न यांति हि । अतस्तत्साधनोद्युक्ताः संति भक्ता विवेकिनः ।
समाधिरेष गदितो द्वेधा योगविशारदैः । प्राणरोधाच्चित्तरोध एकोऽन्यस्तद्विपर्ययः ॥ १८ ॥
योगाष्टांगाभ्यासतस्तु प्राणरोधेन चेतसः । भक्तानां योगिनां रोधो भगवत्येव जायते ॥ १९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साक्षात्कृष्णस्य माहात्म्यज्ञानतो भक्तयोगिनाम् । चित्तरोधात्प्राणरोधस्तस्मिन्स्यादतिहार्दतः २०
तदा त्रुट्यंति सकला विषयांतरवासनाः । एकवृत्ति ततश्चित्तं कृष्ण एव निरुध्यते ॥ २१ ॥
महाकूपाद्यथा कोशविंशत्या निःसरज्जलम् । भिन्नभिन्नस्रवैर्गच्छेन्मंदवेगं भवेद्धि तत् ॥ २२ ॥
एकेनैव प्रवाहेण तद्गच्छेद्यदि तर्हि तु । शीघ्रवेगं चानिवार्यं नृभिः स्यात्सबलैरपि ॥ २३ ॥
तथा दशेंद्रियद्वारा तत्तदर्थानभिव्रजत् । शुभाशुभारूच्छतविधाज्ञायते तत्सहस्रधा ॥ २४ ॥
अनैकांतिकवृत्तित्वादऽस्थिरेणाऽबलेन च । न तेन कार्यसिद्धिः स्यान्मुमुक्षोः कापि देहिनः २५
यत्त्वेकवृत्ति सबलं कृष्ण एव च सुस्थिरम् । रम्यैरपींद्रियार्थैस्तदाक्रष्टुं नैव शक्यते ॥ २६ ॥
कृष्णेतरेषामर्थानां यदा चिंतनवर्जितम् । चित्तं निर्वासनं तद्धि निरुद्धं ज्ञेयमच्युते ॥ २७ ॥
एवं चित्तनिरोधेन प्राणरोधो भवेद्धरौ । प्राणरोधाच्चित्तरोधो यः स तु प्रथितोऽस्ति हि ॥२८॥
अष्टांगयोगस्याभ्यासं विनापि कृष्णचेतसाम् । समाधिसिद्धिर्भवतीत्यर्थो ह्यवधार्यताम् ॥२९॥
संतोऽतः सुधियो लोके योगं भूरिपरिश्रमम् । हित्वा कृष्णैकपूर्णार्थाः कुर्वते तदुपासनम् ॥
मदुक्तसाधनद्वंद्वबलाधिक्यमतो मतम् । यस्याशानां हृदि सदा स्थिरा स्यात्पूर्णकामता ॥३१॥
धर्मनिष्ठैस्ततो भक्तैर्भजनीयो नवधा हरिम् । आत्मनिष्ठा च माहात्म्यज्ञानं साध्यं हरेर्दृढम् ।३२।
स्नानसंध्यादिको धर्मो यथा विप्रस्य नैत्यकः । धर्मनिष्ठा भक्तिनिष्ठा तेषां नित्या तथाऽस्ति हि ॥
पूर्वोक्तसाधनाभ्यासः संतः कार्यस्तु सर्वथा । अपूर्णं मन्यमानानां पूर्णता तेन सेत्स्यति ॥ ३४ ॥
स्वपूर्णताभिमानेन नोद्विच्यं साधुभिः क्वचित् । तथा सति स्वीशकृपा भवेदग्न्युप्तबीजवत् ॥
अतो यथोक्तं हृदि साधु बोध्यमुक्त्वेति कृष्णः स्वनिकेतमायात् ।
संतोपि तद्वागमृतं सदःस्थाः पीत्वा तथेत्यूचुरुदारसत्त्वाः ॥ ३६ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ पञ्चविंशस्तरङ्गः ॥ २५ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । सहस्यशुक्लैकादश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमेनस्य वेश्मनः । प्राग्द्वारस्य बहिर्वेद्यां स्वासने स उपाविशत् ॥ २ ॥
सितसर्वांबरः शीर्षपटसत्कुन्दशेखरः । मंदारकुसुमोत्तंसो वृतस्त्यागिगृहिद्विजैः ॥ ३ ॥
प्रगायतः कीर्त्तनानि सवाद्यं स सतोऽब्रवीत् । क्षणं कीर्त्तनगानं वो विरमय्य मदीरितम् ॥४॥
कीर्त्तनं श्रूयतां सर्वैरित्युक्तास्ते तथा व्यधुः । निश्चितार्थं ततो वाक्यं स जगाद जगद्गुरुः ।५।
रसिकानि कीर्त्तनानि गायतां राधिकापतेः । तस्मिन्नेव रसः स्याच्चेत्तर्हि तद्धि सुगायनम् ॥६॥
अन्यथा तु महत्येव हानिर्भवति गायताम् । यदेषां तुल्यता जाता कृष्णे कृष्णेतरेषु च ॥७॥
बोध्या भक्तास्तु रसिकास्त एव जगतीतले । येषां कृष्णेतरार्थेषु रसः क्वापि न संभवेत् ॥८॥
कृष्णसंबंधवत्येव शब्दे यस्य रुचिर्भवेत् । न तद्भिन्ने स्त्र्यादिशब्दे स सत्यो रसिको मतः ॥९॥
कृष्णसंबंधिसंस्पर्श एव यस्य रुचिर्भवेत् । न त्वहिस्पर्शवस्त्रादिस्पर्शे स रसिको हि सन् १०॥
कृष्णसंबंधिरूपेक्षा रुचिरेकैव यस्य च । न तु स्त्र्यादिदिदृक्षा स्यात्स भक्तो रसिकोऽस्ति सन् ॥
कृष्णार्पितान्नास्वादे स्याद्रुचिरेकैव यस्य च । न तदन्यरसास्वादे स एव रसिको हि सन् ॥१२॥
कृष्णनिर्माल्यपुष्पादिघ्राणे यस्य रुचिर्भवेत् । न त्वन्यसौरभघ्राणे स सत्यो रसिको मतः ॥१३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं भागवतान् पंच विषयान्प्राप्य मोदते । यथा तथेतरार्थाप्त्या हृष्येत्स तु मतोऽधमः ॥१४॥
एवंवृत्तस्य भक्तिस्तु व्यर्था ज्ञेया रमापतेः । सत्यत्वेपि हरेर्भक्तभावदोषात्तथोच्यते ॥ १५ ॥
यथा भागवतानेव विषयानुपयुंजताम् । पुंसां जाग्रदवस्थायां सत्या रसिकता मता ॥ १६ ॥
तथा स्वप्नेपि भगवत्संबंध्यर्थनिषेविणाम् । सत्यं रसिकभक्तत्वं न त्वन्येषां मतं मया ॥१७॥
एवं सदैकमनसा कुर्वतां कृष्णचिंतनम् । हृदि तन्मूर्त्तिरेकैव भाति नान्यत्तु किंचन ॥ १८ ॥
तामेव पश्यतामल्पकालेन हृद्यलौकिकम् । प्रकाशते ब्रह्मतेजस्तत्र सैव च भासते ॥ १९ ॥
तस्माद्भवद्भिरप्येवमुच्चैः कीर्त्तनगायने । रसिकैः कृष्ण एव स्वं धार्यं नान्यत्र मानसम् ॥२०॥
गायनं क्रियते यर्हि भवद्भिर्मम सन्निधौ । तदा मयैकाग्रहृदा कृष्ण एव विचिंत्यते ॥ २१ ॥
कर्त्तुं तत्रांतरायं तु नैव शक्नोति कश्चन । ईदृग्बलिष्ठो हृदये विचारो वर्त्तते मम ॥ २२ ॥
एवं तेन स्वदृष्टांतः शिक्षार्थं हरिणोदितः । स्वयं तु तदुपास्योऽस्ति कृष्ण एव नराकृतिः ॥२३॥

वचनामृतमित्थमीशितुः सकला भक्तजना निशम्य ते ।
हृदये दधति स्म सादरं प्रणमंति स्म च तं हितावहम् ॥ २४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ षड्विंशस्तरंगः ॥ २६ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । सहस्यशुक्लद्वादश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य महीभुजः । सतां मठे प्रभुर्वेद्यां सन्निर्मितशुभासने ॥ २ ॥
पश्चिमास्यः प्रातरेत्य त्यागिगृहिसदोंतरे । उपविष्टः क्षणं ध्यात्वा सत्त ऊचे सितांशुकः ॥ ३ ॥
भजनेच्छाऽत्र सर्वेषां कृष्णस्य हृदि वर्त्तते । तथापि तत्तज्ज्ञाने तु वर्त्तते भिन्नभिन्नता ॥ ४ ॥
तत्र ज्ञानेन येनाऽत्र भगवान् हृदि सर्वथा । निवासं कुरुते सम्यक् श्रूयतां तद्वदामि वः ॥५॥
विधृता येन पृथिवी वारामुपरि तिष्ठति । ताराचक्रं चांतरिक्षे लोकाः स्वर्गादयस्तथा ॥ ६ ॥
सूर्याचंद्रमसौ यात उदयास्तमने तथा । वर्षंत्यंबूनि वर्षासु मेघाश्चापि यदाज्ञया ॥ ७ ॥
काले काले पुष्पफलं सूयंते तरवोऽपि च । मर्यादां न जहात्यब्धिर्वर्षास्वपि यदाज्ञया ॥ ८ ॥
अंबुबिंदोः स्त्रीजठरे जायंतेंघ्रिकरादयः । यदिच्छयैदृशाश्चर्यगुणो यो भगवान् प्रभुः ॥ ९ ॥
स एवाद्य नराकारः साक्षान्मां मिलितोऽस्ति हि । यान्याश्चर्याणि प्रागासंस्तान्यनेन कृतानि च ॥
करोत्यद्य तथाऽग्रे च करिष्यत्ययमेव हि । एवं यद्भगवज्ज्ञानं तज्ज्ञानं मतमुत्तमम् ॥ ११ ॥
तथैवं ज्ञानिनः स्वस्य क्वचिन्महति पूजने । ताडने वा गजारोहे खरारोहेपि वा क्वचित् १२ ॥
स्वर्णे लोष्टे रिपौ मित्रे रम्यरूपकुरूपयोः । मानेऽपमाने च भवेत्समत्वं येन सर्वदा ॥ १३ ॥
तत्रापि ज्ञानमुत्कृष्टं तद्वतो हृदि नित्यदा । ज्ञेयो भगवतो वासः स चाऽर्च्यो हि सुरादिभिः ॥
स च स्वाश्रयिणां नृणां समुद्धर्ता भवार्णवात् । अनन्तकल्याणगुण आधारो जगतां स च १५॥
स्वेंद्रियस्थाच्युते नाऽसावन्येषां सर्वदेहिनाम् । नेत्रादीनामिंद्रियाणां समर्थोऽस्ति प्रकाशने १६
एवं शक्तस्य तदपि ज्ञेयं सामर्थ्यमेव हि । तुच्छजीवकृतस्यापि स्वापमानस्य यत्क्षमा ॥ १७ ॥
असावेव महान् प्रोक्तो न तु ज्ञत्वाभिमानिनः । स्फारदम्भीषितात्पज्ञाः स्वसिद्धत्वप्रदर्शकाः १८
माया यास्ते तु विज्ञेया जीवा न तु तदीशितुः । गंतारोऽते यमपुरं स्वाश्रितैः सह ते जनैः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

महत्ता प्राकृतेष्वेव तेषां च न सतां गणे। यथैकाश्ववतां पुंसां पंचाश्वादेस्तथैव हि ॥ २० ॥
आपातरमणीयेषु मायिकेष्विह वस्तुषु। रम्यताधीर्भवेद्यस्य स गृहस्थोऽप्यसन्मतः ॥ २१ ॥
सत्संगस्य प्रतापेन स्याच्छ्रेयस्तस्य यद्यपि। तथापि सात्वतेष्वस्य गणना नैव जायते ॥ २२ ॥
तस्मात्साक्षात्कृष्ण एव कुर्याद्वासं यथा हृदि। सर्वथैव तथावृत्यं त्यागिना गृहिणापि च ॥२३॥
इत्युक्त्वा प्रभुरुच्चार्य नमन्साधून् पुरःस्थितान्। जयसच्चिदानन्देति स्वावासमगमत्ततः ॥२४॥

इति धर्मसूनुवचनं पीयूषं ते निपीय मुनिसंघाः।
गृहिणश्च तत्सदःस्था ओमिति जगदुश्च तं नत्वा ॥ २५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ सप्तविंशस्तरङ्गः ॥ २७ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। पौषशुक्लचतुर्दश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य क्षितीशतुः। आसन्भुक्त्यै सतां श्रेण्यो वासुदेवालयांगणे ॥ २ ॥
तदातत्सन्मुखे पीठे निषण्णः स्वास्तृते हरिः। सितसूक्ष्मांबरधरः प्रीतः प्रोवाच तान्स्वयम् ॥
साक्षात्कृष्णो हि भगवान् हितायैव नृणामिह। कृपयैव नराकारं धृत्वा चरति भूतले ॥ ४ ॥
तदाश्रिताश्च ये संतस्तेपि संति दयालवः। अदृष्टा अपि भूतानां वदंति हितमेव हि ॥ ५ ॥
यदा तु हृद्गता दोषा नश्येयुः सकलास्तदा। हृदि स्थिरा स्याद्भगवद्भक्तिः श्रेयस्तया भवेत् ६॥
अतस्तद्दोषनाशार्थं कृपया हरितज्जनाः। बोधयंति नरान्वाक्यैः सप्रमाणैरुपागतान् ॥ ७ ॥
मुमुक्षवो नरास्तत्र संति ये ते तु भूयसा। आदरेणैव गृह्णंति गुणबुद्ध्यैव तानि तु ॥ ८ ॥
ततस्तदुक्तरीत्यैव जहतो दोषमात्मनः। हरिं भजंतो निर्विघ्नं मुच्यंते भवबंधनात् ॥ ९ ॥
विषयासक्तमनसो ये नरास्ते तु तेष्वपि। दोषं स्वस्मिन् गुणं मत्वा भ्रश्यंत्येव सदध्वनः १०॥
भ्रष्टो भविष्यन् पुरुषो गृहिणां त्यागिनां तथा। सत्संगिनामप्यगुणं गृह्णीयात्केवलं कुधीः ११॥
मन्येत सुज्ञमात्मानमज्ञानेवेतरांस्तु सः। हृदि मुह्यन्नहोरात्रं क्वापि सौख्यं न चाप्नुयात् ॥
न निद्रां प्राप्नुयाद्रात्रौ धूमितार्द्रोल्मुकोपमः। कदाप्यक्षीणरोषोऽसौ विवृद्धाशुभवासनः १३॥
चिह्नैरेवं विधैरेष भ्रष्टो भावीति बुध्यताम्। एतस्माद्विपरीतस्तु भविष्यश्च महानिति ॥ १४ ॥
वासनानां भवेद् वृद्धिः शुभानामेव तद्धृदि। प्रत्यहं हरिभक्तानां गुण एवाविशेत्तथा ॥ १५ ॥
महत्तामेव विद्यात्स त्वन्येषां कृष्णसेविनाम्। न्यूनतां स्वस्य विद्याच्च वर्त्तेताऽऽनंदतः सदा १६॥
यथा यथा स सत्संगं कुर्यात्प्रतिदिनं पुमान्। तथा तथाऽस्य हृदये नैर्मल्यं जायते भृशम् १७॥
ईदृशैर्लक्षणैर्ज्ञेयः सत्संगी स पुमान्बुधैः। वर्द्धिष्यमाणभक्तिर्वै पतिता न च सत्पथात् ॥१८॥

हितार्थिनाऽतो हरिभक्तशिक्षावाक्यानि धार्याणि हितानि चित्ते।
इति प्रभोर्वाक्यसुधां निपीय ते श्रवःपुटैस्तोषमवापुरंतरे ॥ १९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावष्टाविंशस्तरंगः ॥ २८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । पौर्णमास्यां सहस्यस्य वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे प्रत्यग्द्वारोत्तमगृहांगणे । त्यागिगृहिसभामध्ये सोऽराजद्धवलांबरः ॥ २ ॥
सितपुष्पस्रगापीडः सपुरःस्थान्सतोऽब्रवीत् । प्रष्टव्यं कस्यचित्किंचिद्यदि तर्हि स पृच्छतु ॥३॥
गोपालानंदसाधुस्तं पप्रच्छाऽथ कृतानतिः । धर्मज्ञानविरागाढ्यभक्तेः किं बलवर्द्धनम् ॥ ४ ॥
तं स्वाम्युवाच सद्देशकालसंगाश्च सत्क्रिया । एतच्चतुष्टयं तस्या वृद्धिकृज्ज्ञेयमंजसा ॥ ५ ॥
असद्यद्देशकालादिचतुष्कं तन्मुमुक्षताम् । तस्याः शातनकृज्ज्ञेयं सांगाया अपि निश्चितम् ॥
सदसद्देशकालादिलक्षणानि तु शास्त्रतः । ज्ञातानि संति भवता प्रश्नस्येत्युत्तरं तव ॥ ७ ॥
मुक्तानंदोऽथ पप्रच्छ तं प्रणम्य विवेकवान् । प्रभो पृच्छाम्यहं किंचिच्छ्रुत्वा कुरु तदुत्तरम् ८
कस्यचित्तत्र भक्तस्य पूर्वं कलुषमंतरम् । भवत्यथाग्रे विमलं जायते साधुसंमतम् ॥ ९ ॥
तत्र किं पूर्वसंस्कारो हेतुः किं वास्ति ते कृपा । पौरुषं वास्ति किं तस्य वक्तुमेतत्त्वमर्हसि १०॥
तं स्वाम्युवाच संस्कारः क्वचिदस्त्येव कारणम् । क्वचित्कृपा हरेः क्वापि पौरुषं चेति गम्यताम् ।
प्राग्जन्मोपार्जितं स्वेन चैतद्देहनिबंधनम् । प्रारब्धं कर्मसंस्कारशब्देनाऽत्र विवक्षितम् ॥१२॥
तत्कारणं फलं यत्तल्लोकेष्वस्त्येव विश्रुतम् । यथा मृगार्भासक्त्यादि भरतस्यार्भकस्य ह ॥१३॥
यथा वा मम देहोऽयं घोरे पर्यटतो वने । नाऽपतच्छतशो मृत्युकारणैरपि संगतैः ॥ १४ ॥
यथा वाऽतिदरिद्रस्य स्यादकस्माद्धनागमः । तथाऽकस्मात्सन्मतिः स्यादसद्बुद्धेर्नरस्य चेत् १५॥
तदा तु तत्र विज्ञेयं प्रारब्धं कर्म कारणम् । तद्धि लोके प्रसिद्धं स्यात्सर्वेषामपि चित्रकृत् ।१६।
कृपयाऽथ हरेर्यत्स्यात्तत्राऽऽरब्धं न कारणम् । यथा सांदीपनेः पुत्रो विमुक्तो नरकादिति १७ ॥
यथा वा पंचवर्षस्य ध्रुवस्य स्तवने हरेः । वेदाद्यर्थस्य सहसा जातं स्फुरणमंजसा ॥ १८ ॥
तथाऽतिशुद्धभावेन संप्रीतस्येच्छया हरेः । वरदानेन वा तस्य तत्सतां वा महात्मनाम् ॥ १९ ॥
सद्बुद्धिरुदियाद्यस्य तत्र ज्ञेया हरेः कृपा । या पौरुषेण सद्बुद्धिप्राप्तिः सा त्वस्ति सर्वतः ॥
कृत्वा संगं सतां तेभ्यो ज्ञानेनाऽऽप्तेन यो निजाम् । जहाति कुमतिं तत्र विज्ञेयं तस्य पौरुषम् ।
संस्कारादित्रयस्येत्थं निर्मलीकरणे नृणाम् । अंतरस्य स्वतंत्रत्वं भवतीत्यवधार्यताम् ॥ २२ ॥

पीत्वेति वाक्यामृतमीश्वरस्य तुष्टः स तं साधुवरो ननाम ।
संतो गृहस्थाश्च तथेतरेऽपि तमानमंति स्म मुदं प्रपन्नाः ॥ २३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकोनत्रिंशस्तरंगः ॥ २९ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । पौषकृष्णप्रतिपदि वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे सायं दुर्गे उत्तमभूभुजः । वासुदेवालयाभ्याशवितर्दौ स उपाविशत् ॥ २ ॥
शुक्लवासाः शुक्लपुष्पस्रगापीडावतंसकः । सितपुष्पांगदस्त्यागिगृहिसंघैः परिश्रितः ॥ ३ ॥
शृण्वन् श्रीकृष्णपद्यानि गीयमानानि साधुभिः । भक्तानुवाच स्वाग्रस्थान् किंचिन्मां पृच्छतेति सः
दीनानाथाभिधो विप्रस्तमथाऽपृच्छदानतः । संकल्पा मनसि स्वामिन् जायंते शतशः क्वचित् ।
तथापि तेषां हृदये वासना नाऽनुभूयते । कर्हिचित्तु प्रभो द्वित्राः संकल्पाः प्रभवंति च ॥६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथापि वासना तेषां मुहुर्हृद्यनुभूयते । अत्र यत्कारणं तन्मे वक्तुमर्हसि सर्ववित् ॥ ७ ॥
भक्तस्य तव कृष्णस्य संकल्पानां मनोभुवाम् । केनोपायेन च भवेन्निवृत्तिस्तं च मे वद ॥ ८ ॥
स्वाम्युवाचाऽत्र हेतुस्तु तमआदिगुणत्रयम् । अस्तीति द्विज जानीहि तद्विवेकं वदामि ते ॥ ९ ॥
सर्वदा गुणयोगेन स्वप्ने जाग्रति चात्मनि । असंख्याता हि संकल्पा उत्पद्यंते वियन्ति च १०
मनसो लक्ष्म संकल्पात्मकमित्येव यत्स्मृतम् । तस्मादखंडमेवाऽत्र संकल्पोत्पत्तिरस्ति हि ११ ॥
ज्ञायंते तत्र कतिचित् स्थूला एव भवादृशैः । धीमद्भिरेव सूक्ष्मास्तु दुर्ज्ञेया विदुषामपि ॥
तमो रजः सत्त्वमिति गुणाः संत्येव देहिनाम् । परस्परं ते च मिश्रा वर्त्तंते मतिसंगताः ॥१३॥
एकैकस्तु मिश्रोपि प्राधान्येनावतिष्ठते । तस्यानुरूपाः संकल्पा उद्भवंति निजांतरे ॥ १४ ॥
तमसस्तत्र मुख्यत्वे जाड्यस्याधिकता भवेत् । नानुसंधिर्भवेत्तत्र संकल्पानां तु तद्भुवाम् ॥ १५ ॥
ततो नैकतमस्यापि संकल्पस्य पुनः स्मृतिः । सुषुप्ताविव जायेत पुंसां सूक्ष्मधियामपि ॥ १६ ॥
सत्त्वस्य सति मुख्यत्वे संकल्पा ये भवंति ते । विचारेणापनोद्यंते तत्संस्कारस्ततो न वै ॥ १७ ॥
प्राधान्ये रजसो ये तु संकल्पा यांति संभवम् । तेषां तु जायते विप्र वासना ह्यंतरे नृणाम् १८॥
गुणानां हेतुतैवं तत्संस्काराभावभावयोः । ज्ञातव्या चाथ तेषां ते वच्म्युपायं निवर्त्तने ॥ १९ ॥
मनो यदा भगवति लीनं स्यात्तर्हि सर्वशः । संकल्पा विलयं यांति नोत्पद्यंते हरीतरे ॥ २० ॥
मनोलयस्तु सांगाया भक्तेर्दार्ढ्याद्धरौ भवेत् । तच्चैकांतिकभक्तानां स्यान्निष्कैतवसेवया ॥
तस्मात्संकल्पनाशेच्छुः कुर्यात्तामेव नित्यदा । नैवेदृशं नृणामन्यत्साधनं किंचिदस्ति हि २२ ॥

सत्संगभूरिप्रथितप्रतापात्संकल्पनाशोऽत्र भवेन्मुमुक्षोः ।
इति प्रभोर्वागमृतं स पीत्वा द्विजस्तुतोषाप्यपरे च सभ्याः ॥ २३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रिंशस्तरंगः ॥ ३० ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । पौषकृष्णद्वितीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे भूपतेरुत्तमस्य सः । वेद्यां न्यषीदत्प्रागास्य स्वावासस्य सितांशुकः ॥ २ ॥
चारुपीठोपविष्टं तं त्यागिगृहिगणावृतम् । योगानंदः पप्रच्छेदं नत्वा तद्गुणगायकः ॥ ३ ॥
साक्षादीशस्य ते भक्तौ भवेतामिह कौचन । वाचाऽप्यपीडकस्तत्र निवृत्तिपर एककः ॥ ४ ॥
एकस्ते तत्र भक्तानां सेवनेऽन्नांशुकादिभिः । प्रवृत्तः किंतु वाचाऽन्यं पीडयेदपि तत्कृते ॥ ५ ॥
एतयोरुभयोर्मध्ये कतरः श्रेष्ठ उच्यताम् । तेनेति पृष्टः सद्द्वारा सोऽचिकीर्षत्तदुत्तरम् ॥ ६ ॥
तेन श्रावितत्प्रश्न उत्तरार्थं च चोदितः । मुक्तानंदः सह ब्रह्मानंदेनाह तदुत्तरम् ॥ ७ ॥
अत्रेतरः श्रेष्ठ इति प्रतिभात्यावयोर्यतः । दास्येन भजतस्तस्य भक्तिरस्त्यधिका हरेः ॥ ८ ॥
भक्त्याधिक्यबलं यस्य स समर्थो मतो बुधैः । दुर्बलोऽन्यस्तु यो हीनः कृष्णतद्भक्तसेवया ॥९॥
इति श्रुत्वा तयोर्वाक्यं श्रीहरिः स्वयमब्रवीत् । यथावदेव साधुभ्यामाभ्यां प्रश्नोत्तरं कृतम् ॥
सत्सेवने प्रवृत्तश्च कृष्णाज्ञादृढसंस्थितिः । यस्तस्मिन् यदि कश्चित्स्याद्दोषो ग्राह्यः सतां न सः ॥
तादृशेष्वपि भक्तेषु दोषं गृह्णाति यः स तु । कृष्णेपि दोषं गृह्णीयान्नृनाट्यमनुकुर्वंति १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कल्याणहेतोर्जीवानामाविर्भावं निजेच्छया। जातं विष्णोः स च ब्रूयास्त्वदृष्टांतेन कर्मजम् ॥
तच्चरित्रेषु दिव्येषु श्रुतिमात्राघहारिषु। स कल्पयेत् प्राकृतत्वं दोषदर्शी न संशयः ॥ १४ ॥
शिशुपालादयः पूर्वमसुरांशा नरा भुवि। कृष्णचित्रचरित्राणि दोषरूपाण्यकीर्त्तयन् ॥ १५ ॥
बालग्रहवधं प्राहुः स्त्रीहत्यां च वृषाकृतेः। वधं दैत्यस्य गोहत्यामेव ते तुच्छबुद्धयः ॥ १६ ॥
रासे बह्वाकृतित्वं च विश्वरूपादिदर्शनम्। ऐंद्रजालिकमित्याहुः कालीयदमनादि च ॥ १७ ॥
तद्भक्तान् पांडवांश्चाहू राज्यलुब्धान् गुरुद्रुहः। कुलक्षयकरान् केचिद् द्रौपदीं पशुधर्मिणीम् ॥
नैतावता भगवतस्तद्भक्तानां च कर्हिचित्। जगत्कल्याणकारित्वे जायतेऽन्यपि विक्षतिः ॥
गुणा एव ततो ग्राह्याः सतां न त्वगुणः क्वचित्। दोषदर्शी तु विज्ञेयो ह्यसुरः शिशुपालवत् ॥
एवं भगवता प्रोक्तः स साधुः पुनरब्रवीत्। ग्रहणं गुणमात्रस्य सतां युक्तं त्वयोदितम् ॥२१॥
महत्सु साधुषु तथा वृत्तिस्तु बहुधा नृणाम्। जायते न त्विहाऽल्पेषु भक्तेष्वपि तु सर्वथा ॥
श्रीहरिस्तमुवाचाऽथ श्रुणु साधो वचो मम। भक्तानां महदल्पत्वमादौ विज्ञेयमंजसा ॥ २३ ॥
व्यवहारेषु नैपुण्याद्धाधिक्याद्वयसस्तथा। महत्त्वमस्ति लोके हि चाऽल्पत्वं तद्विपर्ययात् २४ ॥
तथाऽत्र नास्ति तर्त्किनु कृष्णस्य दृढनिश्चयात्। संस्थितेस्तस्य वाक्यं च महत्वं चाऽन्यथेतरत् ॥
इदानीं त्विह सत्संगे भक्ताः सर्वेपि मामकाः। महांत एव संत्येते गुणद्वययुतत्वतः ॥ २६ ॥
कृष्णोऽस्मानक्षरातीतः साक्षात्प्राप्तो नराकृतिः। इति निश्चित्य वर्त्तंते तदाज्ञायां ह्यतंद्रिताः ॥

देहस्वभावोद्भवदोष एषां न ग्राह्य एवाऽत्र इति प्रभोः सः।
साधुस्तथाऽन्ये च निपीय वाचं पीयूषमापुः प्रमुदं सदःस्थाः ॥ २८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकत्रिंशस्तरंगः ॥ ३१ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। पौषकृष्णतृतीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे वेद्यां प्रातराभयिवेश्मनः। प्रत्यगास्यस्य सत्पीठे निषण्णः स सितांबरः ॥ २ ॥
सितसूनस्रगापीडो भालकेसरपुंड्रकः। नैकत्यागिगृहिवृतः साधून्प्रोवाच गायतः ॥ ३ ॥
पृच्छामि किंचिद्वः संतस्तच्छ्रुत्वा कुरुतोत्तरम्। इत्युक्ते तेन तैः प्रीतैः सोनुमोदित ऊचिवान्।
संतः श्रृणुत संत्येव देहिनो द्विविधा इह। भक्ताः संसारिणश्चेति द्वयेऽपि विषयैषिणः ॥ ५ ॥
किं त्वस्ति तेषां भोग्येषु विषयेष्वपि पंचसु। प्राकृताप्राकृतत्वेन भेदः सच्छास्त्रवर्णितः ॥ ६ ॥
संति संसारिणामाद्या भक्तानामितरे तथा। स्वस्वेषु विषयेष्वेते रमन्ते स्वेच्छयाऽनिशम् ॥७॥
ग्राम्यं गीतं स्त्र्यादिरूपस्पर्शौ चाऽशुचिभक्षणम्। सुगंधिपुष्पाद्याघ्राणमर्थाः संसारिणां मताः ॥
कृष्णगीतं कृष्णरूपस्पर्शौ कृष्णप्रसाद च। अन्नोदकं कृष्णशेषापुष्पवृंदादलादि च ॥ ९ ॥
विषयाः पंच भक्तानां मतास्तेषु हि ते रताः। संसारिणो ग्राम्यगीतप्रमुखेष्विव देहिनः ॥१०॥
संसारिणो यथा स्वीयान् न हातुं विषयान् क्षमाः। तथा भक्ता अपि स्वांश्च संसिद्धा नारदादयः
भक्ताः समाधिनिष्ठाया अपि कृष्णकथादिभिः। आकृष्यंते हि विषयैरिति दृष्टं शुकादिषु ॥१२॥
एवं हि साधवो यूयमपि भक्ताः स्थ वै हरेः। अतः स्वविषयेष्वेव रमध्वं नेतरेष्वपि ॥१३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति पृष्टाः स्वगुरुणा साधवस्ते तमब्रुवन् । स्वामिन्भक्तोचितेष्वेव विषयेषु रमामहे ॥ १४ ॥
मनसाऽपि क्वचिद् ग्राम्यानर्थान्नो कामयामहे । एष त्वत्पादसेवायाः प्रतापोऽस्मासु वर्त्तते ॥
साधूदितं साधुवचः स इत्थं निशम्य हृष्टो वृषनंदनोऽभूत् ।
सुधायमानं वचनं च तस्य निशम्य तेऽप्यापुरतीव मोदम् ॥ १६ ॥
तस्मिन्नेव दिने स्वामी पिचुमंदतरोरधः । तद्दुर्ग एव भक्तैः स्वैर्वृतः सायमुपाविशत् ॥१७॥
उच्चपीठे निषण्णं तं प्रणम्य पुरतः स्थितः । दीनानाथो द्विजवरः पप्रच्छ प्रांजलिः प्रभुम् १८॥
स्वामिन्काले क्वचिच्चित्ते हरेस्ते स्मृतिरंजसा । सुखेन जायते काले यत्नेनापि क्वचिन्न च ॥१९॥
तत्र यत्कारणं तन्मे वक्तुमर्हसि तत्त्वतः । इति पृष्टस्तेन हरिरब्रवीदग्रजन्मना ॥ २० ॥
कृष्णध्यानस्य निष्पत्तावनिष्पत्तौ च कारणम् । वर्त्तते गुण एवेति ध्यात्रा बोध्यः स तत्त्वतः ॥
अंतरे परिवर्त्तन्ते गुणाः सत्त्वं रजस्तमः । तत्र सत्त्वोदये ध्यानं तन्नैर्मल्यात्सुसिद्ध्यति ॥२२॥
उद्गमे रजसस्तु स्युः संकल्पा बहवोंतरे । तेन ध्यानं भगवतो ध्यातुर्भवति दुष्करम् ॥२३॥
उद्गमे तमसस्तु स्याच्छून्यप्रायं निजांतरम् । ध्येयस्फूर्त्तिर्न तेन स्याद् ध्याता क्लिश्यति तेन च ।
ध्यात्रांऽतःकरणे तस्माद्विदित्वा गुणवर्त्तनम् । सति सत्त्वोदये कार्यं ध्यानं न त्वन्यथा प्रभोः ॥
उदये तमसो ध्यानं न कार्यं जाड्यसंभवात् । संकल्पानां बहुत्वाच्च रजसोऽप्युदये तथा २६ ॥
तदानीं त्वात्मनो रूपं ज्ञेयं संकल्पतः पृथक् । तत्रैवास्ते कृष्ण इति स्मर्त्तव्यो बहिरेव सः ॥
संकल्पोदयतः क्लेशो वृथा कार्यो न सद्धिया । निष्प्रयोजनसंकल्पात्मकमेवास्ति यन्मनः ।२८।
बालस्य मर्कटादेश्च चापल्यं हि स्वभावजम् । यथास्ति तद्वत्सरजोमनसोपीति बुध्यताम् ॥२९॥
स्वभावः खलु सर्वस्य दुस्त्यजोऽस्तीति निश्चयात् । क्लेशं हित्वैवात्मदर्शी बहिः कृष्णं स्मरेत्तदा ॥
संकल्पशांत्युपायं वा योगं सदुपदेशतः । साधयेत्प्रयतो धीमान्न त्वकार्यं क्वचिच्चरेत् ॥ ३१ ॥
श्रुत्वा सुधाभामिति तस्य वाणीं जगद्गुरोः स द्विज आप तोषम् ।
भक्ताः सदःस्था अपरे च सर्वे तमानमंति स्म मुदं प्रपन्नाः ॥ ३२ ॥
इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्वात्रिंशस्तरंगः ॥ ३२ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । सहस्यकृष्णपंचम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं श्रभयेर्धर्मनंदनः । कृष्णालययुजो वेद्यां वेश्मनः स व्यराजत ॥ २ ॥
निषण्णं स्वास्तृते पीठे तं सर्वेपि तदाश्रिताः । परिवृत्य निषेदुः सस्मितवक्त्रं दिनात्यये ॥ ३ ॥
मुक्तानंदस्तमप्राक्षीत्प्रणम्य प्रहसन्मुखम् । प्रोक्तानि ते साधनानीश शास्त्रेषूक्तानि भूरिशः ॥ ४ ॥
तत्राप्येकं बलीयो यत् साधनं तत्तु मे वद । येनैकेन कृतानि स्युः साधनान्यखिलान्यपि ॥
आश्रयोऽतिदृढः स्याच्चेच्छ्रीकृष्णस्य नृणामिह । तेनैकेनैव भगवान् संप्रसीदति निश्चितम् ॥६॥
कृष्णप्रसादहेतुभ्यः सर्वेभ्योपि महत्तरम् । एतद्धि साधनमिति ज्ञातव्यं श्रेय इच्छता ॥ ७ ॥
स चाश्रयश्चतुर्द्धैव सच्छास्त्रेषु निगद्यते । वैश्वासिकः स्वार्थिकश्च स्नैहिको ज्ञानिकस्तथा ॥ ८ ॥
आद्यस्तत्र तु सच्छास्त्रे वाक्ये च महतां सताम् । विश्वासदार्ढ्यात्संजातः प्रह्लादादेरिवेयताम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भक्तीष्टदोऽस्ति भगवानिति देवऋषेर्गिरि । विश्वासं दृढमापन्नः प्रह्लादो ह्याश्रयद्धरिम् ॥ १० ॥
एवमन्येपि बहवः पुरुषा योषितोऽपि च । विश्वस्य वाचि महतां हरिमाशिश्रियुर्दृढम् ॥ ११ ॥
राज्यैश्वर्यारोग्यधनाद्याप्त्यै यस्त्वाश्रयो हरेः । स स्वार्थिक इति ज्ञेयो ध्रुवादीनामिवाऽचलः ॥
स्वार्थे सिद्धेप्याश्रयं तु तस्य ते शक्तिदर्शनात् । न जहत्यादेहपातादसुरस्तु जहात्यपि ॥ १३ ॥
सौंदर्यादीक्षणेनाऽथ सौहार्देनापि वा हरेः । संबंधेनापि वा स्नेहादाश्रयः स्नैहिको मतः १४॥
स्निग्धा भक्ताश्च ये ते तु कृष्णं वा तत्क्रियां विना । क्षणमात्रमपि स्थातुं न शक्ता व्रजवासिवत्
सच्छास्त्राभ्यासतः संगाद्विदुषां च सतां मुहुः । सम्यक् कृष्णस्य माहात्म्यं विदित्वा सर्वतोऽधिकम्
मायापुरुषरूपेण विश्वोत्पत्त्यादिकर्तृताम् । सगुणत्वं निर्गुणत्वं ज्ञात्वा भगवतस्तथा ॥ १७ ॥
अन्वयव्यतिरेकौ च कालादीनां नियंतृताम् । आविर्भावतिरोभावौ नृनाट्यं चाऽस्य मोहकम् ॥
परत्वं चात्मदेहत्वं पुरुषोत्तमतां च यः । ज्ञात्वा तस्याश्रयः पुंभिः क्रियते ज्ञानिकस्तु सः १९॥
अयं हि कर्हिचित्कैश्चिदपि चाल्यो न तात्त्विकः । कृष्णस्य नरनाट्ये च मोहभ्रमहरो नृणाम् ॥
स्वयं कृष्णेन तद्वंतो देवर्षिसनकादयः । प्रोक्ता ह्यात्मसमा भक्तास्ते समर्थाश्च सर्वतः ॥ २१ ॥
एवं चतुर्विधः प्रोक्तः कृष्णस्याश्रय आत्मनाम् । अतिश्रेयस्करः सर्वसाधनेभ्यो महत्तरः ॥२२॥
एककेनापि तेनैव कृतेनेह मुमुक्षुणा । कृतानि साधनानि स्युरखिलान्यपि निश्चितम् ॥ २३ ॥

इति हरेर्वचनामृतमुत्तमं स च मुनिर्मुनयोऽप्यपरेखिलाः ।
हृदि निपीय दधुश्च तुरीयकं हरिसमाश्रयमेव दृढं व्यधुः ॥ २४ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ त्रयस्त्रिंशस्तरंगः ॥ ३३ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । सहस्यकृष्णैकादश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामी दुर्गं उत्तमभूभुजः । तद्वेश्मनो बहिर्वेद्यां पीठोत्तम उपाविशत् ॥ २ ॥
सितांबरधरः पुष्पहारापीडावतंसकान् । दधद्भक्तैः परिवृतस्त्यागिभिर्गृहिभिस्तथा ॥ ३ ॥
सवाद्यं साधुगीतानि कृष्णपर्याान सादरम् । श्रुत्वा प्रसन्नं पप्रच्छ ब्रह्मानंदस्तमानतः ॥ ४ ॥
परात्परतः कृष्णस्त्वमानंदनिधिश्च तम् । हित्वाऽन्यत्राऽतितुच्छेऽर्थे लगंते चित्तवृत्तयः ॥ ५ ॥
तत्र यत्कारणं तन्मे वक्तुमर्हसि सत्पते । इति पृष्टः प्रभुस्तेन तं प्रोवाच मुने श्रृणु ॥ ६ ॥
यदा भगवता सृष्टं विश्वमेतत्स्वमायया । तदानीमेव तद्वृध्यै स्नेहपाशोपि निर्मितः ॥ ७ ॥
तन्निबद्धमिदं सर्वं कलया भ्राम्यतीशितुः । घटीयंत्रशलाकेव सूक्ष्मशिल्पविदो भुवि ॥ ८ ॥
अतः साहजिकी प्रीतिः स्त्रियाः पुंसि स्त्रियां च नुः । पुत्रवित्तगृहादौ च द्वयोरप्यत्र जायते ९॥
मायैव सा भगवतो ज्ञेया विश्वविवर्द्धनी । तन्निवृत्तिस्तु दुःसाध्या विदुषामपि कामिनाम् १०॥
मायापरोऽपि भगवान्स यदा श्रेयसे नृणाम् । आविर्भवेन्नृपु क्षोण्यां श्रयेयुस्तं तदा नराः ११॥
द्विविधास्तेऽपि तत्रैके संति संस्कारिणोऽपरे । संस्काररहितास्ते च ज्ञातव्या लक्षणैरिह १२॥
प्राक् श्रीकृष्णतदीयेक्षाश्लादिसेवादिकर्मणाम् । संस्कारोत्र भवेद्येषां ते हि संस्कारिणो मताः ॥
तेषां जाते सतां संगे तद्वार्त्तासु रुचिर्भवेत् । कृष्णस्य निश्चयस्तूर्णं भवेत्स च दृढो भृशम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अंजसैव प्रवृत्तिः स्यात्तद्भक्तावेव सर्वथा । तदन्यत्राऽतिवैराग्यं स्वधर्मे चाऽचला स्थितिः ॥ १५॥
समर्थाश्च भवेयुस्ते स्वीयस्निग्धान् परानपि । स्नेहपाशान्मोचयितुं प्रीतिं कारयितुं प्रभौ ॥ १६॥
सज्जंते तुच्छसौख्येषु न तेषां चित्तवृत्तयः । एवं संस्कारिणो लक्ष्यास्तदन्ये च विपर्ययात् १७॥
अत्रैव जन्मनि भवेद्येषां संगः सतां हरेः । तेषां गुणात्मकस्वीयप्राक्कर्मानुसृता मतिः ॥ १८ ॥
अभ्यस्तैर्ग्राम्यविषयसौख्यैराकृष्यते मुहुः । ततो भगवतो भक्तावंतराया भवंति हि ॥ १९ ॥
प्राक्सत्संस्कृतिहीनानां तेषां ये तु विवेकिनः । ते सद्भिर्बोधिता भूयो वर्त्तन्ते स्वीयसत्पथे २०॥
तस्माद्विचक्षणैः स्वीयमंतःकरणमंजसा । सर्वदैवाऽवधातव्यं यथा न कुपथं व्रजेत् ॥ २१ ॥
क्वचित्पूर्वाभ्यासवशाद्व्रजेच्चेत्कुपथं तदा । सद्यस्तत्तत आकृष्य हरौ योज्यं हठादपि ॥ २२ ॥
कृष्णमाहात्म्यातिशयविज्ञानाभावतः खलु । सत्संगिनामपि मनः कृष्णादन्यत्र गच्छति ॥२३॥
सतां प्रसंगं कृत्वाऽतः श्रोतव्यो महिमा हरेः । स्वधर्मज्ञानवैराग्यं संपाद्यं सह तेन च ॥२४॥
कुपथे व्रजतो भीतिर्यमाज्ज्ञेया च संसृतिः । कृष्ण एव रुचिः साध्या हेयमन्यत्तु सर्वथा ॥२५॥
इति प्रश्नोत्तरं श्रुत्वा प्रसन्नोऽभूत्स सत्तमः । मुक्तानंदोऽथ पप्रच्छ प्रणम्य प्रांजलिर्हरिम् २६॥
निःश्रेयसाय जीवानां हरे त्वं पुरुषोत्तमः । क्षोण्यां नृषु प्रजातोसि स्वभावमजहत्स्वकन् ॥
पुरुकृच्छ्रेऽत्र संसारे कर्मभिर्भ्रमतां नृणाम् । साक्षात्त्वैव संप्राप्तिर्दुर्लभा तपआदिभिः ॥२८॥
स चेत्करुणया प्राप्तः स्वयमेव भवांस्तदा । प्राप्तव्यमन्यत्किमपि देहिनां नावशिष्यते ॥ २९ ॥
त्वदीयानंदतश्चाऽन्य आनंदो नाऽवशिष्यते । यतः सर्वानंदनिधिस्त्वमेवेति श्रुतिर्जगौ ॥ ३० ॥
तथापि त्वां तमत्रापि प्राप्ताः केचन पूरुषाः । प्राप्तये तुच्छसौख्यस्य कुतः क्लिश्यंति मे वद ३१॥
तमुवाच हरिः साधो शृणु तत्कारणं ब्रुवे । साक्षात्कृष्णमिह प्राप्ता भवंति बहवो नराः ३२ ॥
तेषां ये तस्य वचने वर्त्तेरन् दृढनिश्चयाः । त एवाऽत्र सुखं तस्य प्राप्नुयुर्न तु तेऽखिलाः ३३ ॥
ये यावद्वचनं तस्य लुंपंत्यन्यप्रसंगतः । ते प्राप्नुवंति तावंतं क्लेशं तुच्छार्थलिप्सया ॥ ३४ ॥
अतोऽष्टांगब्रह्मचर्यप्रमुखानि यमाः स्वकाः । पालनीयाः प्रयत्नेन त्यागिभिर्मदुदीरिताः ॥ ३५ ॥
मदाश्रितैश्च गृहिभिः परस्त्रीवर्जनादयः । पाल्याः स्वधर्मा यत्नेन क्लेशः स्यादन्यथा भृशम् ॥
भगवद्विमुखानां तु सुखदुःखे स्वकर्मभिः । भक्तानां तु हरेराज्ञापालनत्यागतश्च ते ॥ ३७ ॥

अतः स्वधर्मे स्थितिरादरेण सर्वैर्विधेयेति वचो निशम्य ।
सुधासमं तस्य मुनिः स चान्ये तदाश्रिता मोदमगुः सदःस्थाः ॥ ३८ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ चतुस्त्रिंशस्तरंगः ॥ ३४ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । सहस्यकृष्णद्वादश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स उत्तमे । पीठे निंबद्रुमाधस्तात्संन्यषीदसितांशुकः ॥ २ ॥
पौष्पैर्हारैः सुवस्त्राद्यैः शेखरैश्चार्चितो निजैः । वृतो नानाभक्तगणैः सतः प्रोवाच स स्वयम् ३॥
पृच्छामि भवतः किंचित्तच्छ्रुत्वा कुरुतोत्तरम् । कश्चिदेकः पुमानस्ति स्वल्पबुद्धिरविश्रुतः ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथाप्यसौ वर्त्तमानः सम्यक् श्रेयोध्वनीक्ष्यते। द्वितीयस्तु पुमानस्ति बहुबुद्धिश्च विश्रुतः ॥
महत्स्वप्यगुणं कंचिद्भासमानं प्रदर्शयेत्। तथाप्यसौ भागवतमध्वानमतिगच्छति ॥ ६ ॥
अत्र को हेतुरस्तीति पृष्टास्ते साधवो यदा। सम्यक्तदुत्तरं दातुं नाऽजानन्सोऽब्रवीत्तदा ॥ ७ ॥
अहमेवोत्तरं वच्मि यूयं शृणुत साधवः। द्वितीयस्याऽस्य पुंसस्तु मतिरस्त्येव भूयसी ॥ ८ ॥
तथाप्यस्याऽस्ति हृदये श्रीहरेर्वाऽगुणः सताम्। तेन सा दूषितास्तीति प्राप्नोत्येव विपर्ययम् ९॥
यथा विषाक्तं न क्षीरं पुष्टिहेतुः सितायुतम्। तथा सदोषधिषणा श्रेयोहेतुर्न देहिनः ॥ १० ॥
दुष्टधीः पुरुषस्तस्माच्छ्रेयोध्वनि न वर्त्तते। सत्संग्यपि पुमांस्तस्मात्पतत्येव न संशयः ॥ ११ ॥
जन्मांतरेऽपि स भवेद् द्रोग्धा कृष्णस्य तत्सताम्। सद्वृत्तिर्न भवेत्तस्य न चासौ भाषणोचितः ॥
अदूषितमतिस्त्वल्पधिषणोऽपि पुमानिह। श्रेयोवर्त्मस्थितत्वेन सर्वथा संगमोचितः ॥ १३ ॥
मुक्तानंदोऽथ पप्रच्छ साधुस्तं सद्गुरुं प्रभो। दुष्टधीः पुरुषः क्वापि स्यान्न वा कृष्णसन्मुखः ॥
तमब्रवीद्धरिः साधो चतुरः संत्यजेदिह। छद्मेर्ष्याक्रोधमानांश्चेत्कृष्णे तत्सत्सु चापि सः ॥
तदा तु क्वापि कृपया महतां तदसन्मतिः। नश्यत्येषामन्यतमे शिष्टे तु स्यान्न तत्क्षतिः १६ ॥
आसुरीं मतिमाश्रित्य भजन् कृष्णमपीह सः। देहांते स्याच्छिवगणो दैत्यानामधिपोपि वा ॥

तते भजेद्वैरधियैव कृष्णं तस्मात्स्वदोषाः सकलाः प्रहेयाः।
इत्थं वचः साधुवरः स तस्य श्रुत्वाऽमृतं प्राप मुदं तथाऽन्ये ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पंचत्रिंशस्तरंगः ॥ ३५ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। पौषकृष्णत्रयोदश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स भूभुजः। न्यषीदद्दुत्तमे पीठे पिचुमंदतरोरधः ॥ २ ॥
सितांबरः पीतसितपुष्पहारान् गले दधत्। कर्णयोः श्वेतकुसुमगुलुंछौ च सुशोभनौ ॥ ३ ॥
उष्णीषे धारयन् श्वेतरक्तपुष्पावंतसकौ। कौसुमं कंदुकं दक्षे करे च परिवर्त्तयन् ॥ ४ ॥
त्यागिभिर्गृहिभिश्च स्वैर्भक्तैः परिवृतो मुदा। निरीक्षमाणस्तानूचे स्वयमानंदयन्प्रभुः ॥ ५ ॥
साधुर्यस्त्यक्तगार्हस्थ्यः कृष्णादन्यत्र तस्य चेत्। प्रीतिस्तुच्छपदार्थे स्यात्तदा ज्ञेयः स गर्हितः ॥
आढ्यानामग्रतो रंको यथोत्करकणोच्चयी। तथैवाऽग्रे सतां सोपि दृश्यतेऽतिलघुः पुमान् ॥७॥
पापिनं मन्यते स स्वं तमन्ये च तथाविधम्। तस्मात् प्रीतिर्न कर्त्तव्या पदार्थे मायिके सता।
क्व तुच्छा वस्त्रपात्राद्याः संग्रहानुचिताः सताम्। पूर्णानंदः क्व भगवान् सदा सच्चिंतनोचितः ॥
अतः प्रीतिर्हरावेव कार्या सद्भिः सदा मुदा। धर्मज्ञानविरागेषु तत्सेवौपयिकेषु च ॥ १० ॥

साधुः स मान्यो भवतीह यः स्यात्कृष्णानुरक्तः समहेमलोष्टः।
इत्थं तदीयं वचनामृतं ते निपीय भक्ता मुदिता अभूवन् ॥ ११ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ षट्त्रिंशस्तरंगः ॥ ३६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । पौषकृष्णचतुर्दश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स भूपतेः । अधो निंबतरोः स्वामी पीठ उच्च उपाविशत् ॥ २ ॥
सितवासाः पीतसितपुष्पस्रगवतंसकः । पीतपुष्पापीडधरो भूरिभक्तगणावृतः ॥ ३ ॥
वीक्षमाणो निजान्भक्तान् दृशा सदययाऽखिलान् ।
स्वयमेवाऽब्रवीत्प्रीत्या स सतः पुरतः स्थितान् ॥ ४ ॥
साधवः संति बहवः परित्यक्तगृहाश्रमाः । तेषां तीव्रविरागस्य ज्ञस्य त्यागोऽत्र शोभते ॥ ५ ॥
अविरक्तस्य चाऽज्ञस्य त्यागस्त्वत्यागसन्निभः । यतोऽस्य जन्मभूम्यादिस्मरणं जायते मुहुः ॥६॥
तुच्छार्थस्नेहबद्धत्वात् कृष्णे स्नेहोऽस्य नोद्भवेत् । ततोऽस्य नेक्ष्यते किंचिदपि त्यागफलं खलु ॥
अनुभूतस्य हृदये संस्कृतस्य पुनः स्मृतिः । यस्य न स्यात्तादृशस्तु विरलः पुरुषो भुवि ॥ ८ ॥
अतोऽत्र त्यागिनां येषां त्यक्तगेहादिसंस्मृतिः । भवेत्तैः सा समुन्मूल्या स्वात्मज्ञानेन तत्त्वतः ॥
आत्मा तु सच्चिद्रूपोस्ति जडाद्भिन्नः शरीरतः । न तस्य गृहसंबंधो न चैव स्वजनादयः १०॥
न चाऽस्य जातिर्न कुलं न संबंधश्च कस्यचित् । स एवास्मीति निश्चित्य दैहिकं न स्मरेत्सुधीः ।
स्वजनानां स्मृतिर्नैव कर्त्तव्या दययाऽपि च । यतस्तेषां न संख्यास्ति ह्यानंत्यादेव जन्मनाम् ।
पूर्वं देहा ह्यसंख्याता धृतास्त्यक्तास्तथात्मना । तेषां स्वजनवंशाश्च बहवः संति भूतले ॥ १३ ॥
अज्ञानेन यथा तेऽत्र विस्मृताः संति सर्वशः । ज्ञानेनैव तथाऽत्रत्या विस्मर्त्तव्या विवेकिभिः ।
आत्मज्ञानेन यस्य स्युर्गृहाद्या विस्मृता इह । कृष्णेऽथ प्रीतिमान् गाढं स्यात्स एवास्ति मे प्रियः
साक्षात्कृष्णश्च तत्सेवानिरता येऽत्र पूरुषाः । भवंति यादृशाः सर्वे लय आत्यंतिकेऽपि ते १६॥
तादृशा एव साकारा वर्त्तंते न त्वलिंगिनः । एवं विद्याच्च यः सम्यग्विभीयान्न कुतश्चन ॥१७॥
शुष्कज्ञानिवचोभिर्यद्बुद्धौ मोहो न संभवेत् । कृष्णं च तज्जनान् विद्यान्निराकारान् न च क्वचित्
अयमेव जगत्कर्त्ता हरिरस्ति न चेतरः । विनेच्छामस्य न पतेच्छुष्कं पर्णमपि द्रुमात् ॥ १९ ॥
ईदृग्निश्चयमासाद्य देहभिन्नात्मवेदनः । कृष्णेतरपदार्थेषु वैराग्यं यो दृढं श्रितः ॥ २० ॥
वर्णाश्रमोचितं स्वस्य धर्मं च परिपालयन् । कृष्णं प्रीत्या भजेन्नित्यं यः स मेऽतिप्रियो मतः ।
सुखदुःखे स नाप्नोति कालमायास्वकर्मभिः । नाऽऽज्ञास्ति तेषां तस्मिन्यन्न यमस्य च कर्हिचित्
कृष्णेच्छयैव सर्वं स सुखं दुःखं च विंदति । स एव वंद्यः सर्वेषां मान्यः पूज्यश्च कथ्यते २३॥
तत्पादाब्जरजोऽस्माभिरपि मूर्द्धाऽत्र धार्यते । सर्वदा दर्शनं तस्य कांक्ष्यते च सहाऽमरैः २४॥
ईदृग्निष्ठामनापन्नः केवलं पौरुषेण यः । इच्छति स्वस्य कल्याणं त्यक्त्वा माहात्म्यमीशितुः २५।
बालिशः स तु बाहुभ्यां तितीर्षति यथार्णवम् । मज्जनोन्मज्जनाद्भूय उपहास्यश्च जायते ॥२६॥
कृष्णप्रतापमालंब्य कुर्वन् भक्तिं तु यः सुधीः । स तूपविश्य नौकायां पारं यात्यजसांबुधेः ।
भक्त एवंविधो ज्ञानी देहांते चिन्मयाकृतिः । ब्रह्मधामैव संप्राप्य सेवायां वर्त्तते हरेः ॥२८॥
तद्दर्शनं पातकसंघहर्तृ कृष्णेक्षया तुल्यमिहेति वित्त ।
इति प्रभोस्ते वचनं निशम्य भक्ताः सुधाभं मुदितास्तमार्चन् ॥ २९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्तत्रिंशस्तरंगः ॥ ३७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । माघशुक्लप्रतिपदि वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं आभयिक्षितिपस्य सः । न्यषीदच्चक्के सायमश्वशालाग्रतः शुभे ॥ २ ॥
सितवासाः परिदधद्धोरकीयांगरक्षकम् । भक्तसंघैः परिवृतो नानादेशसमागतैः ॥ ३ ॥
चिरं विचार्य तानूचे स्वयमेव दयानिधिः । शृण्वंतु साधवः सर्वे गृहिणश्च वचो मम ॥ ४ ॥
यूयं सत्संगिनः सर्वे भवथैव मदाश्रिताः । सावधानतयैवाऽत्र स्थेयं नैव प्रमादतः ॥ ५ ॥
सत्संगो यद्दिनाज्जातो भवेद्यस्याऽत्र मोक्षदः । तत आरभ्य तेनाशु विचारः कार्य आदरात् ॥६॥
ईदृग्गुणोऽहं प्रथमे वर्षे आसं द्वितीयके । ईदृशश्च तृतीयेऽथ तुरीयेऽभवमीदृशः ॥ ७ ॥
एवं विचारः कर्त्तव्यः प्रत्यब्दं स्वमनीषया । वृद्धिर्गुणानां द्रष्टव्या दोषाणां तत्र च क्षयः ॥८॥
सत्संगस्य प्रतापेन गुणा मय्येत आगताः । एतावंतश्च दोषा मे प्रक्षीणाः प्राक्तना हृदः ॥ ९ ॥
एवं निश्चित्य ये स्वस्मिन्न भवेयुर्गुणाः शुभाः । सत्सेवया चाग्रहेण ते संपाद्याः प्रयत्नतः ॥१०॥
दोषाश्च येन नष्टाः स्युस्तन्नाशे कार्य उद्यमः । प्रमादस्तत्र हातव्यः सर्वथैव मुमुक्षुणा ॥ ११ ॥
प्रत्यब्दं प्रतिमासं वा विचारं कुर्युरीदृशम् । ये तेषु हि गुणाः सर्वे वसेयुः कृष्णतुष्टिदाः ॥१२॥
य एवं नैव कुर्वन्ति बहुकालं प्रमादतः । तेषां न जायते हृत्स्थदोषाणां प्रक्षयः खलु ॥ १३ ॥
यथैवानीयमानानि नित्यं स्युर्वणिजो गृहात् । धान्यादीनि निजं नाम लेखयित्वात्मवृत्तये १४॥
तेषां मूल्यं मासि मासि न दीयेत प्रमादतः । यर्हि तर्हि व्यतिक्रांते काले भूयसि वेगिनि १५॥
तद्दानं जायते नूनं दुष्करं व्यवहारिणाम् । तथैव कालबाहुल्ये दुष्करं दोषनाशनम् ॥ १६ ॥
दोषस्थितौ तु हृद्दुष्टवासनावासितं भवेत् । ततः कृष्णसुखं किंचिदपि नाप्नोति वै भजन् ॥
अंतकाले ततोऽस्य स्याज्जगदर्थस्मृतिर्हृदि । देहं तदनुरूपं च ततः प्राप्नोति स ध्रुवम् ॥१८॥
राजर्षिर्भरतः साक्षादृषभस्य हरेः सुतः । अंतकाले मृगस्मृत्या मृगदेहमवाप हि ॥ १९ ॥
तस्मात्सुधीः प्रयत्नेन मनो निर्वासनं यथा । स्यात्स्वकीयं तथोद्योगं कुर्यादत्राऽऽशु सर्वथा ॥
वासनामूलसंकल्पक्लिष्टाः केचन साधकाः । उपवासैर्निजं देहं शोषयंति बृहद्व्रताः ॥ २१ ॥
देहे शुष्के मनः शुष्कं भवेद्यद्यपि निःस्मरम् । तथाप्येतत्साधनं तु यावज्जीवं सुदुष्करम् ॥२२॥
शुष्को देहो भवेद्यावत्तावच्छुष्कं मनो भवेत् । देहपोषे पुनः पुष्टं मनो भवति निश्चितम् २३॥
तस्मात्कृत्वा मिताहारं चरित्राणां सतां पतेः । सर्वदा चिंतने योज्यं सावधानतया मनः ॥२४॥
नानाविधचरित्रेषु कृष्णस्यैव नराकृतेः । रममाणं मनस्तस्मिन्सज्जते प्रीतिमाप्नुवत् ॥ २५ ॥
मनोदुर्वासनानाश एतदेव हि साधनम् । उत्कृष्टं भवतीत्येव मत्वा साध्यं निरंतरम् ॥ २६ ॥
गृहिणामपि सर्वेषां सुसाध्यं ह्येतदस्ति हि । तस्मात्तैरपि यत्नेन साध्यमेतद्विरक्तवत् ॥ २७ ॥
राज्यं कुर्वन्नपि क्षित्यां जनको हि गृहाश्रमी । मनोनिर्वासनत्वेन प्रख्यातो ज्ञानिनां वरः २८ ॥
एवं कार्यो गृहिजनैर्व्यवहारोऽत्र बाह्यतः । मनस्तु वासनाहीनं कार्यं तेनैव सर्वथा ॥ २९ ॥
गृहदाहादिकापत्तावपि तेषां महात्मनाम् । नोदेति हृदये शोको ममत्वाभावतः खलु ॥ ३० ॥
यथा स्वनगरीदाहे दृश्यमानेपि भूपतेः । जनकस्य न शोकोऽभूत्तथा तेषां न जायते ॥ ३१ ॥
चरित्राणि हरेर्यानि स्वदृष्टानि सतां मुखात् । श्रुतानि वाऽतिमर्त्यानि नृनाट्यानुसृतानि च ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तान्येव सर्वदा येऽत्र मनसैवाऽभ्यसंति ते । दुःसंकल्पभवान् क्लेशान् नाप्नुवंत्ययथोत्थितान् ॥
एवंविधानाशक्तस्तु वर्त्ततैव जितात्मनाम् । मंडलेऽत्र सतां येषां संकल्पानुदयो हृदि ॥ ३४ ॥
रजोगुणातिवेगेन जायमानाः स्व आत्मनि । तेषामेवाऽग्रतो वाच्याः संकल्पा न तु दुर्हृदाम् ॥
महांतस्ते यथा स्वीयदुःसंकल्पप्रशांतये । यत्ताः स्युर्हि तथैव स्वं प्रपन्नानामपि ध्रुवम् ३६ ॥
अचिरेणैव कालेन स्वानुभूतसदुक्तिभिः । संकल्पानुदयं ते हि कारयेयुः कृपालवः ॥ ३७ ॥
बहिर्विधृतसद्वेषा दुःसंकल्पभृतांतराः । ये तेषां तु प्रपत्तौ स्यात्फलं किन्तु मुमुक्षुताम् ॥ ३८ ॥
बोद्धुं पतिव्रताधर्मं यथा नारी सुवासिनी । उपेता बालविधवां फलं प्राप्नोत्यनीप्सितम् ॥
यथा वा सर्पभवनमातिथ्यसुखलिप्सया । गतो भुजंगमो हर्षात्प्राप्नोत्येवाऽनभीप्सितम् ४० ॥
दुःसंकल्परुजां तद्वद्दांभिकोपगमादिह । नेष्टलाभो भवेत् क्वापि प्रत्युत स्यादनीप्सितम् ४१ ॥
सेव्यास्तत्यागिनः सत्या उन्मूलितमनोरुजः । स्वहार्दं कथनीयाश्च स्वेष्टसिद्धिर्यतो भवेत् ४२ ॥
त एव त्यागिनः सत्या येषां निर्वासनं मनः । त्यक्तं नैव स्मरेयुर्ये मलवत्स्वजनादि च ॥४३॥
अंतरायान् हरेर्ध्याने जह्युर्ब्रह्मात्मना तु ते । धर्माधर्मादिसंकल्पान् धर्मं भागवतं श्रिताः ॥
त्यज धर्ममधर्मं चेत्यमुं श्लोकं हि नारदः । शुकं प्रोवाच तस्यापि हार्दमेतत्प्रतीयते ॥ ४५ ॥
त्यक्त्वात्मनोऽन्यत्सकलं देहप्राणेंद्रियात्मनाम् । द्रष्टुः कृष्ण उपास्यस्तैर्ब्रह्मरूपात्मना सदा ४६
आत्मानंदोऽथ पप्रच्छ हरिं साधुः प्रणम्य तम् । देहादन्यतरस्येश ब्रूहि रूपं म आत्मनः ४७॥
श्रीस्वाम्युवाच तं साधो श्रृणु तत्त्वं समासतः । ज्ञाता देहेंद्रियादीनामात्मा बोध्यः पृथक् पृथक्
एषां स्वरूपवक्ता च श्रोता मंता प्रमापकः । सर्वक्रियाणां कर्त्तेत्थमात्मास्तीत्यवधार्यताम् ॥४९॥

श्रुत्वा हरेरिति वचः स सुधोपमेयं तुष्टोऽभवन्मुनिवरश्च सभानिषण्णः ।
सर्वे तदीयचरणांबुजभक्तिभाजः संतश्च तं गुरुवरं स नमंति हृष्टाः ॥ ५० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावष्टात्रिंशस्तरंगः ॥ ३८ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । तपःशुक्लतृतीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स भूपतेः । न्यषीदत्स्वास्तृते मंचे पिचुमंदतरोरधः ॥ २ ॥
पीतपुष्पोत्तंसहारशेखरालिविभूषितः । श्वेतवासास्त्यागिभिश्च गृहिभिर्भूरिभिर्वृतः ॥ ३ ॥
वेदांतशास्त्रवित्कश्चिद् ब्राह्मणस्तत्र संसदि । निषण्ण आसीत्तं दृष्ट्वा सोऽपृच्छत्सर्ववित्स्वयम् ॥
भवन्मते ह्येकमेव सत्यं ब्रह्माऽस्ति निर्गुणम् । न तु जीवेशमायाश्च न शास्त्राणि च जगन्न च
इयं वार्त्ता तु नास्माकं हृदये याति निश्चयम् । श्रुतापि कर्हिचिन्नैव मता भवति सर्वथा ॥६॥
यदि सत्या भवेत्तर्हि प्रमाणं तत्र कथ्यताम् । श्रुतिर्वापि स्मृतिः सूत्रं न त्वन्यत्कल्पितं वचः ॥
व्यासवाक्ये प्रतीतिर्नो बहुधा वर्त्तते ततः । तत्प्रमाणं यदि भवेत्तर्हि निःशंकमुच्यताम् ॥८॥
इति संचोदितस्तेन विप्रः स बहुयुक्तिभिः । कुर्वन्नप्युत्तरं नैव तच्छंकाहरणेऽशकत् ॥ ९ ॥
स्वपृष्टार्थसमाधाने तं विलोक्याऽक्षमं स च । स्वयमेवाऽब्रवीत्स्वामी तस्योत्तरमसंशयम् ॥१०॥
भगवद्भजनाभ्यासान्मुक्ता विंदंति यां स्थितिम् । सा द्विधा सविकल्पैका निर्विकल्पेति चाऽपरा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आद्यायां तत्र पश्यंति जीवेशाद्यखिलं पृथक्। द्वितीयायां तु नेक्षंते मुक्ताः किंचित्पृथग्वरेः॥
यथा हेमाद्रिमारूढा अधोदृष्ट्या पृथक्पृथक्। नगान्वृक्षान्नरादींश्च तदाधारं च भूतलम्॥१३॥
वीक्षंत एवमेवैते सविकल्पसमाधयः। अनुलोमदृशा सर्वं वीक्षंते हि पृथक् पृथक्॥ १४॥
लोकालोकनगारूढास्त्वेतत्किंचित्क्षितेः पृथक्। न पश्यंति यथा तद्वदन्येप्येतद्वरेः पृथक् १५
यथासूर्यरथस्थानां दिवारात्रिभिदा न हि। तथा भेदो न वै तेषामन्येषां तु स विद्यते॥१६॥
तद्दृष्ट्यैवैकमेवास्ति ब्रह्म न त्वन्यदण्वपि। तेन नाऽसत्यता ज्ञेया जीवादीनां तु सर्वथा १७॥
सर्वासत्यत्ववाक्यानि यानि वेदादिषु द्विज। भवंति तानि तेषां हीत्येवमेवाऽस्ति निश्चितम् १८
ततः सत्या वस्तुतो वै जीवेशनिगमादयः। मुमुक्षुभिरिति ज्ञात्वा भजनीयः सदा हरिः॥१९॥
एवं वेदादिसिद्धांतमज्ञात्वैकत्ववादिनः। जानंति शास्त्रवचसां न पूर्वापरबाधिताम्॥ २०॥
निर्विकल्पस्थितिं येऽत्र न प्राप्ता अपि केवलम्। अधीत्य किंचिद्वेदांतं श्रुत्वा वा प्राकृतं च तम्
सर्वस्याऽसत्यतां प्राहुर्यथेष्टाचरणे रताः। ते तु नारकिणः संतीत्यस्माकं निश्चितं मतम्॥ २२॥
अत्र चेत्संशयः कश्चिद्भवेच्चेतसि कस्यचित्। तर्हि पृच्छा विधेयेति श्रुत्वा तस्य वचः प्रभोः२३॥
स ब्राह्मणः प्रणम्याह नष्टा मे संशयाः प्रभो। त्वामेवाऽद्य प्रपन्नोऽस्मि सद्गुरुं श्रितमुक्तिदम्॥

इत्युक्त्वा स तु शरणं हरिं प्रपेदे पीयूषं वचनमथाऽस्य कर्णकंसैः।
पीत्वाऽऽपुः परममुदं सदोनिषण्णास्तद्भक्ता अपि सकला ववंदिरे तम्॥ २५॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकोकोनचत्वारिंशस्तरंगः॥ ३९॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। चतुर्थ्यां तपसः शुक्ले वचोमृतमिदं हरेः॥ १॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स भूपतेः। न्यषीददुत्तमे पीठे पिचुमंदतरोरधः॥ २॥
सितांबरधरः पीतपुष्पहारादिभूषितः। वृतो मुनिगणैर्भक्तैर्नानादेशागतैः स्वकैः॥ ३॥
मुक्तानंदस्तमानम्य पप्रच्छ प्रांजलिर्मुनिः। समाधिर्द्विविधः स्वामिन्स्मर्यते योगवेदिभिः॥ ४॥
सविकल्पो निर्विकल्पश्चेति तौ य उपागताः। उभयेषां पृथक्तेषां लक्ष्माणि ब्रूहि मेंऽजसा ५॥
इति पृष्टो हरिस्तेन तमुवाच मुने शृणु। सविकल्पस्थितिमतां वच्मि लक्षणमादितः॥ ६॥
उपासकानां येषां स्यात् कृष्णमूर्त्तौ मनःस्थितिः। शुभा एव हि संकल्पास्तेषां स्युर्नेतरे क्वचित्॥
स्याम तुल्या नारदेन सनकेन शुकेन वा। तपः कुर्याम मुनिभिर्गत्वा वा बदरीवनम्॥ ८॥
गत्वा श्वेताह्वयं द्वीपं तपस्तत्र विधाय च। भवेम वा श्वेतमुक्तैः समा आहारवर्जिताः॥ ९॥
समाधिभाजां येषां स्युर्विकल्पा ईदृशाः शुभाः। योगशास्त्रे त एवोक्ताः सविकल्पसमाधयः
समाधिभाजां येषां तु विकल्पानुदयो हृदि। ये चाप्याऽक्षरसाधर्म्यं श्रीकृष्णे मग्नमानसाः॥
कृष्णभक्तास्त एवोक्ता निर्विकल्पसमाधयः। श्रुत्वेति वाक्यं स हरेर्मुनिभूयस्तमब्रवीत्॥१२॥
भक्तिश्चोपासना शास्त्रे वर्णिते प्राप्तये तव। तयोर्भेदमपि स्वामिन्प्रसंगाद्वक्तुमर्हसि॥ १३॥
तमब्रवीदथ हरिर्मुने शृणु वदामि ते। पर्यायशब्दौ द्वावेतौ भक्तिश्चोपासना क्वचित्॥ १४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्वचित्वस्त्युभयोर्भेदः शब्दयोस्तं च कीर्त्तये । प्रेम्णा कृष्णस्य भजनं नवधा भक्तिरुच्यते ।
श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् ॥ १६॥
उपासना तु श्रीकृष्णे सदा साकारभावना । ब्रह्मीभूतस्यापि भवेत् स्वस्य दृढतरांतरे ॥ १७ ॥
श्रुतिस्मृतिप्रमावाक्यैः सा निराकारवादिनाम् । न क्वापि प्राप्नुयाद् ह्रासं प्रत्युत स्याद्दृढैव हि
साकारनिष्ठयेदृश्या कृष्णस्यैवांतिके सदा । स्थितिः सेवकधर्मेण कथितोपासना बुधैः ॥ १९ ॥

उपासनाया इति तेऽथ भक्तेर्मया पृथक्त्वं गदितं सुबुद्धे ।
श्रुत्वेति वाक्यं स्वगुरोः सुधाभं मुनिस्तुतोषाऽप्यपरे च भक्ताः ॥ २० ॥

इति श्रीज्ञानानंदविरचिते हरिवाक्यसुधासिन्धौ चत्वारिंशस्तरंगः ॥ ४० ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । माघस्य शुक्लपंचम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स भूपतेः । अधो निंबतरोर्वेद्यां न्यषीदन्मंच उत्तमे ॥ २ ॥
सितसर्वांबरः पीतपुष्पहारालिमंडितः । पीतपुष्पमयान्बिभ्रदापीडांश्चावतंसकौ ॥ ३ ॥
नानादेशागतैः स्वीयैर्भक्तैश्च मुनिभिर्वृतम् । नृसिंहानंदसाधुस्तं नत्वा प्रांजलिरब्रवीत् ॥ ४ ॥
स्वामिन्वेदांत एकोऽहं बहु स्यामिति पठ्यते । तस्याऽर्थमित्थं बहवः पंडिताः कुर्वते भुवि ५॥
सर्गादौ भगवानेव स्वेच्छया बहुरूपताम् । यातीत्यतः सर्वमिदं स्थावरं जंगमं हरिः ॥ ६ ॥
इति कृतस्तैरर्थस्तु बहुभ्योपीह रोचताम् । अस्माकं तु त्वदीयानां स नोत्तरति वै हृदि ॥ ७ ॥
अच्युतस्य च्युतिर्न स्यात्क्षरता नाऽक्षरस्य च । जीवत्वादि कथंकारं वाच्यं भगवतस्ततः ॥ ८ ॥
वेदांतवाक्यस्याऽस्याऽतस्त्वमेवार्थं यथार्थतः । वक्तुमर्हस्यभिज्ञेति पृष्टः श्रीहरिरब्रवीत् ॥ ९ ॥
श्रीकृष्णो भगवानस्ति सर्वकारणकारणम् । प्रकाशकानां सर्वेषां स चैवास्ति प्रकाशकः ॥ १० ॥
सर्गादावक्षरं ब्रह्म वीक्षते स सिसृक्षया । अबुध्येतां तदा तत्र लीनौ प्रकृतिपूरुषौ ॥ ११ ॥
ततोऽक्षरात्मना मायापुरुषाभ्यां बभूवतुः । तेनेक्षिताभ्यां प्रकटौ प्रधानपुरुषौ मुने ॥ १२ ॥
तदात्मना वीक्षिताभ्यां तेन ताभ्यां महानभूत् । तदात्मनेक्षितात्तस्माच्चाहंकारोऽभवत्त्रिवृत् ॥
तदात्मनेक्षिताच्चास्माद्भूतार्थेंद्रियदेवताः । कृष्णेनाविर्भवंति स्म तैर्विराण्महदादिभिः ॥ १४ ॥
एवं कारणरूपेण सर्वत्रापि तदन्वयात् । सर्वरूपः स एवेति वेदादिषु निगद्यते ॥ १५ ॥
प्रवेश्य पात्रानुगुणं तत्रापि ज्ञेयमस्य च । तारतम्यं दारुयोगाद्वह्नेरिव न वस्तुतः ॥ १६ ॥
वेदस्तुतौ हि स्वकृतविचित्रेत्यत्र कीर्त्तितम् । पद्य एतच्च कृष्णस्य सर्वात्मत्वविवक्षया ॥ १७ ॥
सर्वं समाप्नोषि ततोसि सर्वं इति तं मृधे । गीतायामर्ज्जुनः प्राह जीवादित्वं न तस्य तत् ॥
श्रुतौ हि नित्यो नित्यानामिति तन्नित्यतोदिता । न त्वेवाहं जातु नासमित्यादौ च स्मृतावपि ॥
अतो नित्याश्चेतनाश्च जीवा ईशाश्च सर्वशः । कृष्णाद्भिन्ना भवंतीति श्रीभाष्ये निर्णयः कृतः ॥
उत्पत्तिराविर्भावश्च तिरोभावो लयः स्मृतः । कृष्णेच्छयैव जीवादेर्जन्मनाशौ तु न क्वचित् २१॥
सर्वेषां कारणत्वेन प्रकाशकतया तथा । प्रेरकत्वेन कृष्णस्याऽन्वयस्तद्रूपतोच्यते ॥ २२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्तत्प्रकाश्यानुरूपं स्वप्रकाशप्रदर्शनात् । तारतम्यं च तस्योक्तमिति बोद्धव्यमंजसा ॥ २३ ॥
इति साधो त्वदुक्तायाः श्रुतेरर्थों मयोदितः । एवमेव हि विज्ञेयं भक्तैर्मां कृष्णमाश्रितैः ॥२४॥
श्रुत्वेति वाचं स सुधोपमेयां धर्मात्मजस्याप मुदं मुनींद्रः ।
श्रुत्यर्थमन्येपि तमेव चित्ते दधुः सदःस्था गतसंशयाश्च ॥ २५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकचत्वारिंशस्तरंगः ॥ ४१ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । माघमासे शुक्लषष्ठ्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स उत्तमे । पीठेऽधस्तान्निंबतरोर्न्यषीदद्विशदांबरः ॥ २ ॥
प्रतीचीनमुखः स्वीयभक्तसंघैर्वृतो दधत् । पीतपुष्पस्रगापीडान् पुष्पगुच्छौ च कर्णयोः ॥ ३ ॥
उपविष्टाश्च तत्राऽऽसन्सभायां शास्त्रिणो द्विजाः । तत्र वेदांतिनो दृष्ट्वा तानुवाच स्वयं हसन् ॥
वेदांतशास्त्रे निपुणा यूयं भवथ भो द्विजाः । अतः पृच्छामि किंचिद्वस्तच्छ्रुत्वा कुरुतोत्तरम् ५॥
अधीतभूरिवेदांता बहवः पंडिता इह । प्राहुर्विधिनिषेधांस्तु मिथ्या वेदोदितानपि ॥ ६ ॥
तद्बोधकांश्च निगमानपि मिथ्या वदंति ते । तत्प्राप्यान्स्वर्गनरकान् गुरुशिष्यांश्च सर्वशः ७॥
ब्रह्मैवैकं सत्यमस्ति न त्वन्यत्किमपीति ते । वदंति तत्र का तेषां वेदनाऽस्तीति कथ्यताम् ॥८॥
निःशंकं वर्त्तमानानां यथेष्टाचरणे भुवि । शिष्यांश्च तत्रेरयतां गतिः का वाऽस्ति निश्चिता ॥९॥
इत्थं पृष्टा भगवता विप्राः शास्त्रविदोपि ते । यदोत्तराय नो शेकुस्तदोवाच स एव तत् ॥१० ॥
वेदांतिनां तु सर्वेषामाद्याचार्योऽत्र भूतले । श्रीशंकरः प्रसिद्धोऽस्ति तस्याऽऽचारस्तु नेदृशः ॥
स हि स्वशिष्यान्संन्यस्तान् दंडकुंड्याद्यधारयत् । गीताविष्णुसहस्राख्यापाठं च विष्णुपूजनम्
ब्राह्मणस्यैव च गृहे भिक्षामाज्ञापयत्तथा । स्वयंपाकानाचरणं शौचं गृहि चतुर्गुणम् ॥ १३ ॥
चातुर्मास्यान्यतीतानि यस्य स्युरधिकानि तम् । न्यूनचातुर्मास्ययतिः प्रणमेदित्यशिक्षयत् १४॥
एवं विधिनिषेधं च संप्रवर्त्तयताऽमुना । वेदांतार्थो नाधिगतोऽधिगतोऽद्यतनैः किमु ॥ १५ ॥
ततः केवलवेदांतग्रंथाध्ययनमात्रतः । लोके विधिनिषेधापनुदो मूढतमा मताः ॥ १६ ॥
शास्त्रे विधिनिषेधापनोदो यस्त्वस्ति वर्णितः । तद्धेतुस्तु न सम्यक्तैर्ज्ञायते विषयात्मभिः १७॥
तमहं वच्मि निर्व्वाधं श्रूयतां सनिदर्शनम् । यथा महांबुधेर्मध्ये व्रजंती स्यान्महातरी ॥१८॥
तस्यां तु ये वर्त्तमाना वीक्षमाणा इतस्ततः । नाऽर्वाक्तटं ते पश्यंति न परं च तटं नराः ॥
तटद्वयगतानद्रीन्नेक्षंते महतोपि च । तदा वृक्षान्मनुष्यांश्च वीक्षेरंस्ते कुतस्तराम् ॥ २० ॥
जलमेवैकमीक्षंते दिक्ष्वष्टस्वपि नेतरत् । तदा वदंति तेत्वेकं जलमेवाऽस्ति सर्वतः ॥ २१ ॥
तथा ब्रह्मणि ये प्राप्ता निर्विकल्पस्थितिं नराः । ते हि जीवेशमायादीन्नेक्षंते ब्रह्मदर्शिनः ॥२२॥
ततो वदंत्येकमेव ब्रह्माऽस्त्यन्यन्न किंचन । तद्दृष्ट्या नास्ति जीवादि वस्तुतः सर्वमस्ति तत् ॥
तद्दृष्ट्या च विधिर्मिथ्या निषेधश्च न वस्तुतः । अतस्तत्स्थित्यनापन्ननृणां तद्वचनं न सत् २४॥
स्त्रीद्रव्यरससंसक्ताः सद्बुद्ध्या चाऽप्रमादतः । कुर्वंतोऽपि व्यवहृतिं तौ मिथ्येति वदंत्यहो ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अधमा एव ते ज्ञेया नास्तिका निरयंगमाः। यतो निजाचार्यपथमुल्लंघ्योत्पथगामिनः ॥२६॥
स्वयं श्रीशंकराचार्यो नृणां पापंडिसंगजम्। अपनेतुं नास्तिकत्वं देवार्चाः प्रत्यतिष्ठिपत् ॥२७॥
भजगोविंदमित्यादीन् स्तवान्विष्णोः शिवस्य च। रवेर्गणपतेश्चाऽसौ व्यधाद्देव्याश्च भूरिशः।
येषां श्रवणतः पुंसां देवतास्वखिलास्वपि। उद्धवे सत्यताबुद्धिस्तथा चक्रे स सर्ववित् ॥ २९ ॥
ज्ञानिनो नाममात्रेण पुमांसस्त्वधुनातनाः। किंचित्संश्रुतवेदांता दूरे ब्रह्मात्मदर्शनाः ॥ ३० ॥
अप्याहुः सर्वमिथ्यात्वं यथेष्टाचरणे रताः। न शुभं दर्शनं तेषां न च तैर्भाषणाद्यपि ॥ ३१॥
ये ये विधिनिषेधाः स्युः सच्छास्त्रेषूपपादिताः। ते ते सर्वेपि विज्ञेयाः सत्या एवेत्यसंशयम्।
जीवाः स्वरूपतो नित्याः कृष्णाद्भिन्नाः परस्परम्। असंलग्नाश्च विज्ञेयाश्चिद्रूपा मायया वृताः।
नानायोनिषु भुंजानाः स्वस्वकर्मफलानि ते। भ्रमंत्युपर्यधो मध्ये तत्तद्देहाभिमानिनः ॥३४ ॥
निष्कारणातिकृपया तेषु नारायणः स्वयम्। मानुष्यविग्रहं धत्तेऽप्यतिमानवसत्क्रियः ॥३५॥
मनुष्यदेहमापन्ना ये जीवास्तेषु ये सताम्। मुखाच्छ्रुत्वा तन्महत्त्वं तस्मिन् स्निह्यन्ति नान्यतः।
त एव संसृतेर्मुक्ता यांत्यंते ब्रह्मधाम वै। तस्मिन्नेवानुरज्यंते भुव्यतो ये विचक्षणाः ॥ ३७ ॥
तं विहायाऽत्र येऽन्यत्र स्निह्यंतश्च निजेच्छया। त्यक्तसच्छास्त्रमर्यादास्ते तु यांत्येव संसृतिम्।
ज्ञात्वाऽज्ञात्वापि ये कृष्णे स्निह्येयुर्न्राकृतौ नराः। ते भूत्वैव गुणातीता यान्त्यंते ह्यक्षरं पदम्।
कृष्णस्य मायातीतत्वात्तत्संबंधबलेन वै। तरंति मायामत्रैव प्राकृता अपि देहिनः ॥ ४० ॥
कामभावेनापि तस्मिन्नतिस्निग्धा व्रजांगनाः। निर्गुणे निर्गुणा भूत्वा ब्रह्मधाम प्रपेदिरे ॥४१॥
यदस्ति निर्गुणः कृष्णः सच्चिदानंदविग्रहः। तत एव हि ता जाता निर्गुणा इति गम्यताम्।
प्रागर्षभोपि भरतः कृपयापि मृगार्भके। स्नेहान्मृगत्वमगमज्ज्ञानी त्यागी च योगिराट् ॥
तस्मात्सत्ये कृष्ण एव स्नेहात्स्यात्सद्गतिर्नृणाम्। स्त्र्यादौ स्नेहात्प्राकृते तु स्यादेवाऽसद्गतिः खलु
अन्यथा त्वखिला लोकाः सर्वं ब्रह्मेति वादिनः। पुंसु स्त्रियः स्त्रीषु नरा मुक्ताः स्युरनुरागिणः
तथातु न भवंत्येते भूतयोनिं तु यांति ते। बलांतोत्रैव दृश्यंते यत्र स्नेहोऽस्ति तं नृपु ॥४६॥
कृष्ण एव ततः स्नेहः कार्यस्त्वप्रतिपादिता। पाल्या विधिनिषेधाख्यमर्यादा च मनीषिभिः ॥
उल्लंघ्यतां वर्तमाना यांत्यंते यमयातनाः। इत्येव धर्मशास्त्रेषु बहुधा प्रतिपादितम् ॥४८॥
इति हरिवचनं ते सत्यमेवेति मत्वा निजमतमपहाय श्रेयसे शिश्रियुस्तम्।
अमृतमिव च पीत्वा तच्छ्रुताश्चापरे तत्परममुदमवापुः सत्पतिं ते च नेमुः ॥ ४९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्विचत्वारिंशस्तरंगः ॥ ४२ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। माघस्य शुक्लसप्तम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य च वेश्मनः। बर्हिर्वेद्यां शुभे मंचे स न्यषीदत्सितांशुकः ॥ २ ॥
वृतः स्वभक्तैर्बहुभिस्त्यागिभिर्गृहिभिस्तथा। पीतपुष्पस्रजो बिभ्रत् पीतपुष्पावतंसकः ॥ ३ ॥
पीतपुष्पमयापीडः स विलोक्याऽखिलान्द्विजान्। उवाच सर्वे शृण्वंतु संतः पृच्छामि किंचन ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीमद्भागवते प्रोक्तं भक्तास्त्वेकांतिका हरेः । मुक्तिं चतुर्विधां नैव वांछंत्यन्यातिदुर्ल्लभाम् ॥
सालोक्यसार्ष्टिसामीप्यसारूप्यानीति सोदिता । तत्र स्थितिर्भगवतो लोके सालोक्यमुच्यते ॥
सार्ष्टिर्मुक्तिस्तु भगवत्समानैश्वर्यमीरिता । स्थितिः समीपे कृष्णस्य सामीप्यमिति चोच्यते ७ ॥
सारूप्यं भगवद्रूपतुल्यरूपोपलंभनम् । एतां चतुर्विधां भक्ता नेच्छंतीच्छंति सेवनम् ॥ ८ ॥
कुतो नेच्छंति तां ते तु भक्ता मे वदतोत्तरम् । इति पृष्टाः साधवस्ते यथामत्युत्तरं ददुः ९ ॥
अयथार्थं तदाश्रुत्य स्वयमेवाह तान् प्रभुः । कृष्णाद्ये किंचिदिच्छेयुः सकामास्ते हि तज्जनाः ।
एकां विहाय तत्सेवां नेच्छेयुर्ये तु किंचन । निष्कामास्ते मता भक्ता उक्ताः पूर्वेभ्य उत्तमाः ॥

सेवां विना तु कृष्णस्य तल्लोके वा तदंतिके ।
स्थित्या वाऽतिसमृद्ध्याऽपि किन्नु ताद्रूप्यतः फलम् ॥ १२ ॥

एकत्वाख्या च या मुक्तिः शास्त्रे भवति पंचमी । सतां साप्यनुपादेया सेवासिद्धेस्तदैक्यतः ॥
निष्कामभक्तानेतांस्तु स्वांतिके रक्षति प्रभुः । सप्रेम तत्कृतां सेवा प्रीत्यैवांगीकरोति हि ।१४।
अनिच्छद्भ्योपि तेभ्योऽसौ महैश्वर्यसुखानि च । दुर्लभानि सकामानां ददाति निजधामनि ॥
एत एव हि गीतायामर्ज्जुनं प्रति शौरिणा । भक्ता ज्ञानिन इत्युक्ता उत्तमा आत्मवत्प्रियाः ॥

अतो भवद्भिस्त्विह सर्वथैव कृष्णस्वरूपेतरवासनाः स्वाः ।
हेया इतीशस्य वचोमृतं ते निपीय हृष्टा अभवन्सदःस्थाः ॥ १७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रिचत्वारिंशस्तरंगः ॥ ४३ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । शुक्लाष्टम्यां माघमासे वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य व्यराजत । निंबद्रुमतले वेद्यां पीठाग्रे स सितांबरः ॥ २ ॥
सितपुष्पस्रगापीडो वृतो भक्तैः सहस्रशः । त्यागिभिर्गृहिभिश्चासौ सतोऽपृच्छत्पुरः स्थितान् ॥
स्नेहः कार्यो भगवति सर्वथैव तदाश्रितैः । एवमस्ति पुराणादौ रूपं तस्य नु कीदृशम् ॥ ४ ॥
अथ ब्रह्मानंदमुनिस्तमुवाच त्वदीश्वरात् । ऋते सर्वत्र जगति निःस्पृहत्वं स उच्यते ॥ ५ ॥
प्रोवाच तं हरिः साधो नैतदस्योत्तरं भवेत् । रूपं त्वेतद्विरागस्य स्नेहस्य तु वदाम्यहम् ॥६॥
कृष्ण एवानुरागः स्यात्पुंसो गाढतरो हृदि । स्नेहः स उदितः प्राज्ञैः पर्यायः प्रेम यस्य च ।७।
यतोऽखंडं हृदि भवेत्तस्यैव स्मरणं सदा । संकल्पोऽप्यन्यविषयो नोदियाच्च कदाचन ॥ ८ ॥
स्नेहस्य परिपूर्णस्य लक्षणं ह्येतदेवहि । यत्र क्वचाऽन्यसंकल्पो न्यूनता तत्र तावती ॥ ९ ॥
पूर्णस्नेहवतां क्वापि नान्यसंकल्पसंभवः । देशकालादिवैषम्ये स चेत्स्यात्तद्व्यथा भवेत् ॥१०॥
स्वादुभोक्तुर्यथा पुंसो भोज्यान्ने केनचित्क्वचित् । धूलिकर्करनिक्षेपे कृते यादृग्व्यथा भवेत् ॥
तादृश्येव भवेत्तेषां सति तस्मिन्व्यथा ध्रुवम् । एतत्तु सर्वैरपि मे भक्तैश्चित्यं स्वचेतसि ॥१२॥
अथ ब्रह्मानंदमुनिस्तं पप्रच्छ महाप्रभो । ईदृक्स्नेहोद्भवे पुंसां साधनं वक्तुमर्हसि ॥ १३ ॥
तमुवाच हरिस्तत्र साधनं त्वेकमेव हि । नित्यं सतां प्रसंगेन तन्माहात्म्यावबोधनम् ॥ १४ ॥
ऊचे तदा सोमवर्मा प्रसंगं कुर्वतां सताम् । नित्यदापि स नास्माकं जायते हेतुरत्र कः ॥१५॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हरिरूचेऽथ नृपते सतामेव न केवलम् । प्रसंगो वोऽस्ति किंत्वस्ति देहदैहिकयोरपि ॥ १६ ॥
अतो न भगवत्येव स्नेहदार्ढ्यं प्रजायते । अथ बालध्रुवो विप्रस्तं पप्रच्छ कृतानतिः ॥ १७ ॥
देहदैहिकयोः स्वामिन्नहंताममते तथा । संकल्पाश्च तदीया ये तेषां नाशः कथं भवेत् ॥१८॥
तमुवाच हरिस्तेषां नाशस्तु स्याद्विवेकतः । जडस्य वपुषस्तत्स्थचिद्रूपस्यात्मनस्तथा ॥ १९ ॥
जडचैतन्ययोः सम्यग्वैधर्म्येऽवगते सति । अहंतात्मनि चिद्रूपे दृढा स्यात्सत्प्रसंगतः ॥ २० ॥
नश्येद्देहाभिमानोऽथ तन्नाशे दैहिकेषु च । ममता लीयते सद्यस्तत्संकल्पास्ततोऽखिलाः ॥२१॥
देहाभिमानिनामेव ममता दैहिकेष्विह । तत्संकल्पास्ततः स्युर्वै नात्मत्वेवाभिमानिनाम् २२॥
इदमेव महन्मौर्ख्यं गृहस्थस्य गृहेष्विव । देहेऽहंता वृथैवेति साऽतस्त्याज्या मुमुक्षुभिः ॥२३॥
कारितं तुन्नवायेन यथा कश्चन कंचुकम् । परिधायाऽप्यात्मभिन्नं मन्येतात्मानमेव तम् ॥२४॥
ततः स तुन्नवायं तं तद्भार्यामपि चात्मनः । मन्येत पितरौ मौर्ख्यात्तथा देहाभिमान्यपि २५॥
स्वस्माद्भिन्नेपि देहेऽसौ कृत्वाऽहंतां तदीयकौ । पितरावात्मपितरौ मन्यतेऽतोऽज्ञ एव सः ॥
यद्येतौ स्वस्य पितरौ तर्हि जन्मांतरेष्वपि । देहानां पितरो नैका आसन्स्वस्यैव ते न किम् २७॥
नानायोनिगतास्ते हि यदि स्वस्यैव तर्हि तु । एतयोस्तेषु च स्वस्य ममता तुल्यतोचिता २८॥
अतो यथा विहीनानामहंता वपुषां नहि । ममता दैहिकानां च तथा कार्या न सांप्रतम् २९॥
सत्संगिनामात्मनिष्ठाभ्यासादीदृग्मतिर्भवेत् । संसाध्या सा गृहिजनैस्त्यागिभिस्तु विशेषतः ॥
देहाभिमानमूलश्च मानो वर्णाश्रमोद्भवः । आत्मनिष्ठां विना नैव त्यागिनामपि नश्यति ॥३१॥
नायाति साधुता तावद्यावद्देहाभिमानिता । त्यक्तगेहादिसंकल्पा अपि तेषां न यांति हि ३२ ॥
ब्रह्मात्मना विहायैव देहदैहिकभावनाम् । कृष्णं भजेत्स्वधर्मस्थो मतः साधुः स एव मे ३३ ॥
दुर्लभस्तादृशः साधुर्न दूरेऽहि हरिर्यतः । स एव सेव्यः सर्वेषां भवबंधविमोचकः ॥ ३४ ॥

निशम्य पीयूषसमां स वाचमित्थं हरेर्ब्राह्मण आप तोषम् ।
संतश्च सर्वे गृहिणोपि भक्ताः प्रपेदिरे निर्भरमेव मोदम् ॥ ३५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुश्चत्वारिंशस्तरंगः ॥ ४४ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । दशम्यां तपसः शुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्येशमंदिरे । वितर्द्यावुत्तमे पीठे स न्यषीदत्सितांबरः ॥ २ ॥
स्वभक्तत्यागिगृहिभिर्वृतं तं दक्षिणाननम् । पप्रच्छ गोपालानंदः साधुवर्यः कृतानतिः ॥ ३ ॥
स्वामिन्वेदांतिनः केचित्कृष्णं त्वाहुर्निरंगकम् । पठंति च श्रुतीस्तत्र तदर्थप्रतिपादिकाः ॥ ४ ॥
नारदादिसमास्त्वन्ये भक्तास्त्वामेव सांगकम् । वदंति सप्रमाणं च तत्र केषां मतं हि सत् ॥
तमुवाच हरिः साधो भगवान्सांगकः सदा । भूरितेजो दिव्यमूर्त्तिरस्तीत्येव मतं हि सत् ६ ॥
सच्चिदानंदरूपं यत्पूर्णं ब्रह्मास्ति सर्वतः । तेजस्तस्यैव तज्ज्ञेयं निःप्रतीकमनावृतम् ॥ ७ ॥
स ऐक्षतेति श्रुत्युक्तं सर्गादौ प्रकृतीक्षणम् । निःप्रतीकस्य कृष्णस्य क्वापि नैवोपपद्यते ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यस्य चक्षुर्भवेत्तस्य स्युरंगान्यपराण्यपि। कृष्णः सांगक एवेति ततो ज्ञेयो विचक्षणैः ॥ ९ ॥
शास्त्रे यत्र निःप्रतीको भगवान्वर्णितो भवेत्। स तु प्राकृतदोःपाद्यंगाभावात्तथोदितः १० ॥
सांगको वर्णितो यत्र भवेच्छास्त्रे स तत्र च। दिव्यविग्रहता तस्य ज्ञेयाऽमायिकता तथा ११ ॥
निषेधो यत्र चांगानां सच्छास्त्रे स्यात्कृतो हरेः। स तु ज्ञेयः प्राकृतानां दिव्यानां तु न कुत्रचित् ॥
यत्र सांगकशब्देन पाणिपादमुखादिभिः। सहितत्वं ह्यवयवैः प्रोक्तं भगवतो भवेत् ॥ १३ ॥
तद्धीनत्वं निःप्रतीकशब्देनेति च तत्र तु। अंगैरप्राकृतैर्दिव्यैर्विशिष्टः कृष्ण उच्यते ॥ १४ ॥
तदंगतेजो यत्तत्तु निरंगं बृहदुच्यते। तत्राभेदविवक्षैव तयोर्ज्ञेया विचक्षणैः ॥ १५ ॥
जलं यथा निःप्रतीकं सांगोऽस्ति वरुणोऽमरः। यथा ज्वाला निःप्रतीका सांगोऽस्त्यग्निश्च देवता
यथा चार्कः सप्रतीक आतपोऽस्ति निरंगकः। तथा कृष्णः सप्रतीकस्तेजोब्रह्म निरंगकम् १७॥
सर्वान्वयेन सर्वेषां नियंतृत्वान्महोऽपि तत्। मूर्त्तवत्कार्यकारित्वादमूर्त्तमपि मूर्त्तवत् ॥ १८ ॥
तस्मात्कृष्णो नित्यसिद्धदिव्यावयववानिति। ज्ञात्वोपास्यः सदा भक्तैः सिद्धांतो मन्मतोऽस्त्ययम्

इति वचोमृतं श्रीहरेर्मुनिः स तु निपीय तत्सत्यमित्यवैत्।
सकलसाधवोऽन्ये च तज्जना मुदमुपेत्य तं प्राणमन् प्रभुम् ॥ २० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ पंचचत्वारिंशस्तरंगः ॥ ४५ ॥

शकाब्दे विक्रमार्कस्य रसाश्वसुभूमिते। एकादश्यां तपःशुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य गृहांतिके। हरेर्वेद्यां न्यषीदत्स सितवासा वरासने ॥ २ ॥
भक्तसंघैः परिवृतं नत्वा तं दक्षिणाननम्। विप्रः पप्रच्छ वेदांती प्रश्नं माहेश्वराह्वयः ॥ ३ ॥
सर्वस्यापि प्रपञ्चस्य समाधौ विलयो हरे। श्रूयते तत्र नभसो लीनता जायते कथम् ॥ ४ ॥
तमुवाच हरिर्ब्रह्मंस्त्वत्प्रश्नस्योत्तरं शृणु। अवकाशात्मकः प्रोक्त आकाशो जगदाश्रयः ॥ ५ ॥
स चापि द्विविधः प्रोक्तो भौतिकश्च महानिति। तत्राद्यः सविकारोऽस्ति तमोरूपस्तमोजनिः ॥
अन्यस्तु सर्वतः पूर्णः सर्वाधारो निराश्रयः। वर्त्तते सच्चिदाकाश इति प्रोक्तश्च योगिभिः ॥७॥
स सावरणब्रह्मांडकोटिषु व्यापकोऽस्ति च। तिर्यगूर्ध्वमधो मध्ये बहिस्तासां च संश्रयः ॥८॥
स पदार्थस्तु नास्त्येव न व्याप्तस्तेन योऽभितः। यत्सूक्ष्मेऽणौ च तद्भागेप्यस्ति सोंतश्च तद्बहिः
प्रकृतौ पुरुषे चापि ब्रह्मांडानां सकारणे। तत्कार्येषु च सर्वेषु बहिरंतश्च वर्त्तते ॥ १० ॥
अवकाशात्मको यर्हि स न चेत्प्रकृतौ भवेत्। पुरुषेक्षात्तगर्भस्य तर्हि सूतिः कथं ततः ॥ ११ ॥
पुंसः प्राप्तस्य गर्भस्य प्रसवोऽत्र स्त्रिया यथा। तथैव जायते तस्या ब्रह्मांडस्याखिलस्य हि ॥१२॥
एवं सर्वत्र सोऽस्त्येव हेतौ कार्ये च सर्वतः। महदादाविति ज्ञेयं नान्यथा सर्गसंभवः ॥१३॥
श्वासोच्छ्वासविमोकोपि देहिनां तेन जायते। अतोऽसौ जगदाधारः प्रकाशात्मक उच्यते १४॥
प्रकृतेः पुरुषस्यापि तस्मिंश्चै वर्त्तमानयोः। विकाशो जायते क्वापि संकोचश्च हरीच्छया ॥१५॥
कार्यकारणरूपेण विकाशः प्रकृतेर्मतः। तत्तदंतर्यामितया विकाशः पुंस उच्यते ॥ १६ ॥
कृष्णेच्छया वा कालेन ब्रह्मांडविलये सति। पुरुषांगे तिरोभावः संकोचः प्रकृतेर्मतः ॥ १७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदा पुंसः स्वस्वरूपस्थितिः संकोच उच्यते । कूर्मांगानामिवैतौ च तत्र ज्ञेयौ हरीच्छया १८॥
अन्वयो व्यतिरेकश्च प्रकृतौ प्राकृतेषु च । पुरुषस्यैव भवतो न तस्यैषां भवे लये ॥ १९ ॥
प्रागेव विद्यमानस्य तस्य संभवतो न तौ । आविर्भावतिरोभावाश्रयोऽण्डानां स तु स्थिरः २०॥
कृष्णप्रसादात्तद्दृष्टिं विद्यां दहरसंज्ञिताम् । प्राप्नुयाद्यः स तु पुमान् सर्वं ब्रह्मैव पश्यति ॥
एवं भूतस्य चानादेरस्य नैव जनुर्लयौ । वक्तुं शक्यौ क्वचित्तौ तु भौतिकस्यैव कीर्त्तितौ ॥२२॥
तमोरूपः शून्यधर्मा सोऽनेनैक्यमुपेत्य वै । प्रकाशेन चिता चांडे बहिरंतश्च वर्त्तते ॥ २३ ॥
अष्टांगयोगाभ्यासेन कृष्णस्यैवेच्छयाऽथ वा । समाधिमाप्नोति पुमांस्तत्रासौ याति लीनताम् ॥
विकाशस्तस्य तूत्पत्तिसंकोचश्चोदितो लयः । नतु स्वरूपनाशोऽस्य लय इत्यत्रधारय ॥ २५ ॥
समाधौ जीववृत्तीनां प्रातिलोम्येन वर्त्तने । जायमाने भगवति ब्रह्मतेजोविलासिनि ॥ २६ ॥
मनःप्राणेंद्रियाणां च प्रातिलोम्येन कर्षणम् । सहसा जायते पुंसः स्फुरितं श्रीहरिं प्रति २७॥
नाडीनां कर्षणं वृत्तिव्याप्यानां च तदैव हि । जायतेऽथैति संकोचं तत्स्थाकाशोपि सर्वतः ॥
ध्यातुः पुंसस्तदा देहः काष्ठवज्जायते जडः । एषाऽऽकाशस्य संकोचावस्था लय इतीर्यते ॥२९॥

इत्युत्तरं ते द्विजवर्य दत्तं प्रश्नस्य कश्चिद्यदि संशयोऽत्र ।
स्यात्तर्हि पृच्छा क्रियतां त्वयेति वदंतमूचे स हरिं प्रणम्य ॥ ३० ॥
चिरंतनो मेऽद्य गतो हि संशयो न पृच्छ्यमत्रेत्यथ तत्सदःस्थिताः ।
तद्वाक्यमापीय सुधोपमं बुधास्तेऽपि प्रसन्नास्तुतुपुस्तदाऽखिलाः ॥ ३१ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षट्चत्वारिंशस्तरंगः ॥ ४६ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । द्वादश्यां तपसः शुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्षितिपस्य सः । पीठेऽधस्तान्निंबतरोर्न्यषीदद्धवलांशुकः ॥ २ ॥
नानादेशीयभक्तौघवृतः स्वान्स्वयमब्रवीत् । शृण्वंतु सादरं सर्वेऽप्यवधार्यं वचो मम ॥ ३ ॥
भक्ता एकांतिका येऽत्र संति कृष्णस्य विश्रुताः । भवेयुस्तेषु चत्वारः सर्वेश्चैव गुणा इमे ॥४॥
धर्मो ज्ञानं च वैराग्यं भक्तिश्चेत्यतिदुर्लभाः । अंगप्रधानभावेन भवेत्तेषां तु वर्त्तनम् ॥ ५ ॥
प्रधानभावेनैकस्मिन्वर्त्तमानेऽपरे त्रयः । अङ्गभावेन वर्त्तेरन् भक्तेषु श्रीहरेर्गुणाः ॥ ६ ॥
सेव्यः कृष्णो हि सर्वेषां तद्भक्तः सेवको मतः । तत्र धर्मः प्रधानं स्याद्यस्य तल्लक्षणं ब्रुवे ॥७॥
निर्दंभं परिचर्यैव कृष्णस्य च तदात्मनाम् । भक्तानामिति तद्धर्मो जातिधर्मेण संयुता ॥ ८ ॥
शास्त्रे भक्तस्तत्प्रधानो धर्मनिष्ठ इतीर्यते । कृष्णतद्भक्तसेवायां स्याद्रतोऽसौ यथोचितम् ॥ ९ ॥
कृष्णमंदिरवाप्यादिनिर्माणेऽस्य रुचिर्भवेत् । नैवेद्याय च कृष्णस्य नानाभोज्यप्रसाधने ॥ १० ॥
कृष्णस्य च सतां वासे लेपसंमार्जनादिषु । रुचिः स्यात्कृष्णभक्तानां पादसंवाहनेऽस्य च ॥११॥
श्रुतिकीर्त्यर्चनादीनि कुर्यान्निश्छद्म स प्रभोः । तस्य शास्त्रे भागवतधर्माढ्येऽतिरुचिर्भवेत् ॥
शक्नुयान्न च स स्थातुमेतेष्वेकतमं विना । धर्म्येवं लक्षणैर्ज्ञेयो ज्ञानवंतमथो ब्रुवे ॥ १३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स हि सन्मात्ररूपेण वर्त्तेताऽजस्रमात्मना । कृष्णं चेयात्सर्वपरं निर्दोषं दिव्यविग्रहम् ॥ १४ ॥
वार्त्तां तदाश्रयां कुर्यात्तच्छास्त्रं चानुरागवान् । सन्मात्रवृत्तिविक्षेपासहिष्णुप्रकृतिश्च सः ॥१५॥
एवं ज्ञानप्रधानो यो ज्ञाननिष्ठः स कीर्त्यते । कृष्णभक्तोऽथ वैराग्यप्रधानं वच्मि लक्षणैः ॥
कृष्णेतरपदार्थेषु सर्वत्रैवारुचिः सदा । यस्य मुख्या स वैराग्यनिष्ठो भक्तः प्रकीर्त्यते ॥ १७ ॥
मलवत्त्यक्तगेहादेर्विस्मृतिस्तस्य सर्वदा । स्याच्च स त्यागिनामेव सङ्गं कुर्याद्धरातले ॥ १८ ॥
त्यागाविरोधिनीं भक्तिं कृष्णस्याप्याचरेत्स तु । त्यागप्रधानवार्त्तां च त्यागशास्त्ररुचिर्भवेत् १९॥
अरुचिः स्यादतितरां तस्य त्यागविरोधिनः । पदार्थस्य तु संप्राप्ताविह वैषयिकस्य च ॥ २० ॥
एवं वैराग्यवान् ज्ञेयो भक्तिमानथ कथ्यते । कृष्णस्वरूप एवैका प्रीतिर्दृढतराऽस्य हि ॥२१॥
ततोऽन्यत्र स्ववृत्तिं तु धातुं नैव क्षमेत सः । प्रेम्णैव कारयेत्कृष्णं वासोलंकारधारणम् ॥२२॥
कृष्णमानुष्यचरितश्रवणेऽस्य रुचिर्भृशम् । भवेत्तथैव शास्त्रेपि कृष्णमूर्त्तिनिरूपणे ॥ २३ ॥
प्रीतिर्भक्तेषु तस्य स्यात्तेषां कृष्णानुरागिताम् । दृष्ट्वैव ह्यन्यथा त्वात्मपुत्रादावपि न क्वचित् ॥
कृष्णसंबंधिनीष्वेव क्रियास्वस्य च नित्यदा । प्रवृत्तिः स्यादिति प्रोक्तो भक्तिनिष्ठो हि पूरुषः ।
एवं चतुर्विधा भक्ता भवंत्यत्र रमापतेः । तत्र यस्य गुणो मुख्यो यः स्यात्कार्यः स वै दृढः ॥
भक्तः कोपि भवेन्नैव मुख्यमेकं गुणं विना । किंतु तस्य तदज्ञानाद्व्यभिचारमुपैति सः ॥२७॥
तस्माद्भवद्भिरपि मे भक्तैः स्वस्वगुणो दृढः । कर्त्तव्योऽतिप्रयत्नेन स हि श्रेयस्करो मतः ॥२८॥
इत्युक्तास्तेऽप्योमिति तं प्रोचुः सर्वेपि सादरम् । नित्यानंदोऽथ साधुस्तं पप्रच्छ विनयानतः ॥
चतुर्विधेष्वप्येतेषु गुणदोषविवेचनम् । अस्ति चेत्कथयेत्युक्तो हरिकृष्णस्तमब्रवीत् ॥ ३० ॥
एतेषां लक्ष्मभूता ये धर्माः प्रोक्ता मया मुने । ते गुणाः संति दोषास्तु ज्ञातव्यास्तद्विपर्ययाः ॥

निर्दोषसद्गुणचतुष्टयशालिनो ये भक्तास्त एव हरिवच्छ्रितमुक्तिदाः स्युः ।
संतो वचोमृतमिति स्वगुरोर्निपीय प्रापुर्मुदं च सकला गृहिणः सदःस्थाः ॥ ३२ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ सप्तचत्वारिंशस्तरंगः ॥ ४७ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । माघशुक्लत्रयोदश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्षितिपस्य सः । पीठोत्तमे निंबतरोरधस्तात्समुपाविशत् ॥ २ ॥
प्रत्यङ्मुखः श्वेतवस्त्रो नानाभक्तगणावृतः । स्वयमेवाब्रवीद्भक्तान्सर्वान्साधुपुरःसरान् ॥ ३ ॥
भक्तैः प्रतिदिनं प्रातः स्नात्वा कृष्णस्य पूजनम् । कर्त्तव्यमथ पूजांते स्तुत्वेदं याच्य ईश्वरः ४॥
नारायण हरे स्वामिन् शरणागतवत्सल । कृपासिंधो महाराज त्वमेव शरणं मम ॥ ५ ॥
मा क्रोधाच्च लोभाच्च मोहाद्देहाभिमानतः । ईर्ष्याया मत्सरान्मानात् पाहि मां पापकर्मणः ॥
प्रत्यहं तव भक्तानां संगं देहि दिवानिशम् । असतां संगमः क्वापि न स्यात्पाहि तथा सदा ७॥
चतुर्विधा असंतो हि संति लोकेषु विश्रुताः । कौंडाश्च नास्तिकाः शक्ताः शुष्कज्ञानिन इत्यमी ।
तत्र संगेन कौंडानां पारदार्ये रतिर्भवेत् । ब्रह्मचर्यव्रतं येन सद्यो नश्यति मुक्तिदम् ॥ ९ ॥
संगेन नास्तिकानां तु स्यान्निरीश्वरता हृदि । कर्मणामेव सत्त्वं च भ्रष्टत्वं च सदध्वतः ॥ १०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शाक्तानामिह संगेन मद्यमांसाशने नृणाम् । प्रवृत्तिः स्यात्स्वधर्माच्च भ्रष्टत्वमचिरेण हि ॥ ११ ॥
शुष्कज्ञानवतां संगात्त्वत्त्वदीयांगखंडनम् । जीवेशमायामिथ्यात्वं स्याच्चोपासनभ्रष्टता ॥ १२ ॥
चतुर्विधासतां संगादनर्थापात ईदृशः । भवतीति ततः कृष्ण पाहि मामिह सर्वथा ॥ १३ ॥
एवं हरिः प्रत्यहमेव याच्यस्तत्पूजकैर्भक्तजनेष्टदाता ।
इति प्रभोस्तस्य वचोमृतं ते भक्ताः सदःस्था दधति स्म भावे ॥ १४ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधावष्टाचत्वारिंशस्तरंगः ॥ ४८ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । माघशुक्लचतुर्दश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे संध्यायामुत्तमस्य सः । पीठोत्तमे निंबतरोरधस्तात्समुपाविशत् ॥ २ ॥
पीतपुष्पस्त्रगापीडान् दधत् पौष्पौ करस्त्रजौ । सितांबरधरो नानाभक्तसंघपरिश्रितः ॥ ३ ॥
ब्रह्मानंदस्तमप्राक्षीत्प्रश्नं तेन प्रचोदितः । मनोवृत्तेस्त्वयि हरे धारणे जायते श्रमः ॥ ४ ॥
मायिकेषु पदार्थेषु भक्तस्यापि तु सा प्रभो । गच्छति स्वयमेवात्र कारणं वक्तुमर्हसि ॥ ५ ॥
तमुवाच हरिः साधो मनोवृत्ती रमापतौ । भक्तस्य तु सदा तिष्ठेदभक्तस्य तु सा हठात् ॥ ६ ॥
भक्तस्य लक्षणं ह्येतद्विना कृष्णं तु नान्यतः । मनोवृत्तेर्गतिरिति प्रोक्तं निगमवेदिभिः ॥ ७ ॥
सांसारिकपदार्थेषु तस्य यन्मनसोर्पणम् । तत्तु दुष्करमेवास्ति हरौ विषयिणामिव ॥ ८ ॥
नानुरागि भवेद्यस्य हरावेवात्र मानसम् । तं भक्त इति को ब्रूयात्समं वैषयिकात्मना ॥ ९ ॥
ब्रह्मानंदोऽथ तं नत्वा भूयः पप्रच्छ सत्पते । कृष्णे त्वयि मनोवृत्तेर्धारणे किन्नु साधनम् १०
तमुवाच हरिस्तत्र साधनं शृणु निश्चितम् । त्राकृतिर्भगवान्साक्षात्स्वेन दृष्टो भवेत्तु यः ॥ ११ ॥
माहात्म्यं तस्य बोद्धव्यमादौ सद्भयो यथातथम् । ततस्तद्दर्शनं कार्यं प्रीत्यांतश्च बहिर्मुहुः ॥ १२ ॥
तन्मूर्त्तिर्निर्निमेषाभ्यां दृश्याऽक्षिभ्यां चिरं बहिः । ततोंतरे च सा धार्येत्यंतर्दृष्टिरुदीरिता ॥ १३ ॥
एतयैव मनःस्थैर्यं प्रपन्नस्य भवेद्धरिम् । साधनेन तु नान्येन तपोव्रतजपादिना ॥ १४ ॥
कृष्णं विना तु तद्धामवीक्षणं वा निजांतरे । षट्चक्रामरवीक्षापि नांतर्दृष्टिः सतां मता ॥ १५ ॥
अंतर्बहिर्वा श्रीकृष्णवीक्षैवांतर्दृशिर्मता । सैवाभ्यस्ता मनःस्थैर्यं कृष्णे कारयति ध्रुवम् ॥ १६ ॥
निशम्य तस्येति वचः स साधुर्गुरोः सुधातुल्यमवाप तोषम् ।
सभ्याश्च सर्वे गृहिणश्च संतस्तं प्राप्ततोषा विनयेन नेमुः ॥ १७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकोनपंचाशत्तमस्तरंगः ॥ ४९ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । माघकृष्णप्रतिपदि वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे सौधस्योत्तमभूभुजः । वेद्यां पीठोत्तमे प्रातः स न्यषीदत्सितांशुकः ॥ २ ॥
वृतः सहस्रशो भक्तैस्त्यागिभिर्गृहिभिश्च सः । सतः पुरःस्थानपृच्छद्वाचा संप्रीणयन्प्रभुः ॥ ३ ॥
संतः कुशाग्रबुद्धिर्यस्तेन ब्रह्माऽप्यते परम् । इति हि श्रूयते वेदे पुराणे भारतादिषु ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यावहारिककार्येषु नैपुण्यं यस्य सोऽस्ति सः । किं वा शास्त्रपुराणार्थबोधने निपुणोऽस्ति सः ॥
इति पृष्टास्तेन संतः कर्त्तुं शक्तास्तदुत्तरम् । नासन् यदा तदोचुस्ते त्वमेवास्योत्तरं कुरु ॥६॥
तदाब्रवीत्स शृण्वन्तु सर्वेऽस्योत्तरमादरात् । स्वश्रेयसे य उद्युक्तः स वै ज्ञेयः कुशाग्रधीः ।
लौकिकव्यवहारेषु निपुणा अपि केचन । श्रेयोध्वानमनाश्रित्य यान्त्यन्ते यमयातनाः ॥ ८ ॥
तथैव वेदशास्त्रादौ निपुणाः परबोधकाः । अप्यंते यांति निरयान् श्रेयोवर्त्मानपाश्रयात् ॥९॥
अतः कुशाग्रधिषणा नैवैते स्थूलबुद्धयः । किं मायिकेषु नैपुण्यैरंते यद्यमयातनाः ॥ १० ॥
अतो धियोऽतिनैपुण्यं लौकिकेवाऽस्तु वैदिके । माऽस्तु वा श्रेयसे स्वस्य यो यत्तः स कुशाग्रधीः
सुधियो मायिकेष्वेव यदि प्राकृतलोकवत् । सक्ताः पदार्थेषु तदा विशेषः कोपि तेषु नो १२॥
या निशा सर्वभूतानामिति श्लोकेऽर्जुनं प्रति । उभयेषां विशेषो हि गीतायां हरिणोदितः ॥
कृष्णभक्तौ स्थूलधियो निष्क्रिया निशि सुप्तवत् । स्युः कुशाग्रधियस्तस्यां जागरूका इवोद्यताः ।
तुच्छार्थेषु स्थूलधियो जागरूका इवोद्यताः । स्युः कुशाग्रधियस्तेषु निष्क्रिया निशि सुप्तवत् १५.
वैधर्म्येणैवमेतेषां द्वयानामपि धीमताम् । विशेषो दर्शितस्तस्मात्कार्ष्णा दर्भाग्रबुद्धयः ॥१६॥
स्वश्रेयसेभिरताः पुमांसस्ते बुद्धिमंतो ह्यपरे तु मूर्खाः ।
इति प्रभोर्वाक्यसुधां निपीय सर्वेपि भक्तास्तुतुषुः सदःस्थाः ॥ १७ ॥
इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ पंचाशत्तमस्तरंगः ॥ ५० ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । माघकृष्णद्वितीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमक्षितिपस्य सः । पीठोत्तमे बहिर्वेद्यां न्यषीदद्धवलांशुकः ॥ २ ॥
नानादेशागतत्यागिगृहिभक्तगणावृतम् । पूर्णानन्दस्तमप्राक्षीत्साधुः प्रश्नं पुरःस्थितः ॥ ३ ॥
साक्षात्तेऽक्षरनाथस्य गुणातीतस्य दर्शनम् । चक्षुषा गुणकार्येण निश्चयश्च धिया कथम् ॥ ४ ॥
इति मे संशयं हृत्स्थमपाकर्तुं त्वमर्हसि । इति पृष्टस्तेन हरिः साधुना तमभाषत ॥ ५ ॥
मायिकैः करणैर्ग्राह्याः पदार्था मायिकाः खलु । गृह्येत तैर्यदि हरिस्तदाऽसौ मायिको भवेत् ॥
इति प्रश्नाशयस्तेऽस्ति तत्र वच्म्युत्तरं मुने । मायिकैः करणैर्ग्राह्यो भगवान्नास्ति कर्हिचित् ॥
एतदर्थावबोधाय कार्याणां करणात्मता । व्यापकत्वं च हेतूनां व्युत्क्रमेण प्रदर्श्यते ॥ ८ ॥
पृथिवीयं हि पंचाशत्कोटियोजनविस्तृता । तस्यां तज्जाः पदार्था ये संति कुम्भपटादयः ॥९॥
सर्वेपि ते तया व्याप्ता बहिरंतश्च सर्वतः । सा च तेभ्यः पृथगपि वर्त्तते निजधामनि ॥ १० ॥
एवंविधक्षितेर्दृष्ट्या पदार्थाः सकला अपि । पृथ्वीरूपा एव संति न तु ते स्वस्वरूपतः ॥११॥
जाता हि सांभसः क्षोणिरेकदेशेऽस्ति तस्य च । तच्च तां सर्वतो व्याप्तं बहिरंतश्च वर्त्तते १२
तद्दृष्ट्या नेक्ष्यते पृथ्वी तदेवैकं तु वीक्ष्यते । तेजसस्तच्च संभूतमेकदेशेऽस्ति तस्य तत् ॥ १३ ॥
अंतर्बहिश्च तद्व्याप्तं हेतुना स्वस्य तेजसा । तद्दृष्ट्या नेक्ष्यते वारि तेज एवैकमीक्ष्यते ॥ १४ ॥
एवं क्रमेण विज्ञेया कार्याणां कारणात्मता । वायौ नभस्यहंकारे महति प्रकृतौ तथा ॥१५॥
एकदेशात्सा च पुंसः सर्गकाले समुद्गता । अंतर्बहिश्च तां व्याप्य स्थितोऽस्ति पुरुषः स तु ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तद्दृष्ट्या नेक्ष्यते माया पुमानेवैक ईक्ष्यते । ईदृशाः पुरुषा जाता महामायैकदेशतः ॥ १७ ॥
सा महापुरुषस्यैकदेशादुत्पद्यते मुने । आविर्भूतोस्ति सोप्यादावक्षरस्यैकदेशतः ॥ १८ ॥
अंतर्बहिश्च तं व्याप्य स्थितं तत्कृष्णधाम च । कोटिसूर्येंदुसंकाशं सच्चिदानंदलक्षणम् ॥ १९ ॥
अनेककोटिब्रह्मांडाधारोऽनंतमनादि च । तदीयदृष्ट्या त्वस्त्येकं ब्रह्मैव न तु पूरुषः ॥ २० ॥
तत्र स्थितोऽस्ति भगवान्सर्वकारणकारणम् । अनेककोटिब्रह्मांडोत्पत्तिस्थितिलयक्रियः ॥ २१ ॥
सर्वात्मात्मा स्वतंत्रश्च सर्वशक्तिपतिः प्रभुः । परात्परतरः शुद्ध ईश्वराणामपीश्वरः ॥ २२ ॥
सर्वत्र कारणत्वेन सोऽन्वितोऽस्ति स्वतेजसा । व्यतिरिक्तश्च धाम्नि स्वे राजतेऽनेकशक्तिभिः ॥
स यदा कृपया जीवकल्याणाय धरातले । प्रत्यक्षो जायते नॄणां धृतदिव्यनराकृतिः ॥ २४ ॥
तदा कृत्वा सतां संगं तस्य माहात्म्यमीदृशम् । अवगत्याश्रयं सम्यग्ये कुर्वंति नरा इह ॥२५॥
तेषां बाह्यान्यांतराणि करणान्यखिलान्यपि । तादात्म्यं प्राप्य तं साक्षात्कुर्वंतीत्यवगम्यताम् ॥
एवं स्वेनैव भगवान्स्वयं निश्चीयते ध्रुवम् । नान्यथा निश्चयं तस्य कर्तुं शक्यं हि मायिकैः ॥
वेध्यते हीरकेणैव यथा वै हीरकस्तथा । स्वयं ग्राह्योस्ति भगवान्स्वेनैवेत्यवगम्यताम् ॥ २८ ॥
दृश्यंते ह्यसुरा लोके तं पश्यंतोऽपि सर्वदा । साक्षात्कृष्णोऽयमित्येवं निश्चेतुं न क्षमा इह ॥

मायातीतो मायिकैश्चक्षुराद्यैः कृष्णो नैव ग्राह्य इत्थं हरेस्तु ।
वाक्यं श्रुत्वा सोऽमृताभं तुतोष प्रीतिं चापुस्तत्सदस्यास्तदीयाः ॥ ३० ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धावेकपंचाशत्तमस्तरंगः ॥ ५१ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । माघकृष्णतृतीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वितर्द्यावुत्तमे पीठे न्यषीदद्विशदांशुकः ॥ २ ॥
वृतश्च भूरिभिर्भक्तैः कथांते शांतिपर्वणः । तच्छ्रुतार्थं हृदि दधत्सतः प्रोवाच स स्वयम् ॥ ३ ॥
सांख्येन योगेन च यः स्वरूपं राधिकापतेः । वेदांतपंचरात्राभ्यां विद्यात्पूर्णः स नान्यथा ॥४॥
शास्त्रैश्चतुर्भिरेतैस्तत्स्वरूपं परमात्मनः । निश्चेतव्यं प्रयत्नेन स्यात्पूर्णज्ञानवान् यतः ॥ ५ ॥
मुक्तानंदोऽथ पप्रच्छ तं त्वमेतैः प्रभुर्यथा । शास्त्रैर्ज्ञेयस्तथा मह्यं वक्तुमर्हसि तत्त्वतः ॥ ६ ॥
एष्वेकेनापि साक्षात्त्वद्रूपज्ञानेऽत्र तद्विदाम् । न्यूनत्वं किंतु भवति तदपि ब्रूहि मे हरे ॥ ७ ॥
तमब्रवीद्धरिः साधो प्रतिपाद्यार्थमंजसा । तेषां चतुर्णां शृणु मत्तस्याद्यत्संशयः क्वचित् ॥८॥
चतुर्विंशतिरुक्तानि सांख्ये तत्त्वानि कापिलैः । लक्षणानि च सर्वेषां तेषामपि पृथक् पृथक् ॥९॥
ततस्तेभ्यः पृथग्भूतस्तत्प्रकाशक ईरितः । पंचविंशो हि पुरुषः क्षेत्रज्ञो भगवानिति ॥ १० ॥
योगे जीवः पृथक् प्रोक्तश्चतुर्विंशतितत्त्वतः । षड्विंशो भगवांश्चोक्तः पतंजलिमतानुगैः ॥ ११ ॥
मायिकाकाररहितः स्वतंत्रो दिव्यविग्रहः । समस्तकल्याणगुणैरुपेतश्च स वर्णितः ॥ १२ ॥
वेदांते तु परं ब्रह्म भगवान् सर्वकारणम् । व्यापको निर्गुणश्चोक्तो निराकारोऽखिलाश्रयः ॥१३॥
पंचरात्रे चतुर्व्यूहो वासुदेवादिभेदतः । निर्गुणः स गुणश्चोक्तो भगवानवतारधृत् ॥ १४ ॥
तत्र केवलसांख्येन सम्यग्ज्ञानं न जायते । यतस्तत्र न जीवात्मा पृथगुक्तो हि तत्त्वतः ॥ १५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्ञायतेऽतः पंचविंशो जीवात्मैव हि पुरुषः । न त्वसौ परमात्मा वै तत्त्वान्यात्माऽवबोधने ।१६।
योगेनाऽप्येवमेकेन सम्यग्ज्ञानं न जायते । मूर्त्तिमांस्तत्र यत्कृष्णः षड्विंशोऽस्ति निरूपितः १७।
परिच्छिन्नत्वमेवाऽतो मूर्त्तस्याऽस्याऽवगम्यते । न तु तस्यैव सर्वत्र पूर्णता च नियंतृता ॥१८॥
वेदांतेनाऽप्यथैकेन सम्यग्ज्ञानं न जायते । यत्तत्र निर्गुणः कृष्णो निराकारश्च वर्णितः ॥१९॥
दिव्यविग्रहतां तस्य प्राकृतेंद्रियहीनताम् । मायागुणैर्हीनतां च कल्याणगुणशालिताम् ॥२०॥
कृष्णस्यातो न बोद्धुं तु शक्यते तेन संभ्रमात् । वेदांतिनस्ततः केचिन्निराकारं वदंति तम् ॥
पञ्चरात्रेण चैकेन सम्यग्ज्ञानं न जायते । यत्साकारस्य कृष्णस्यावतारास्तत्र कीर्त्तिताः ॥२२॥
ततस्तेषूपासकानामेकदेशस्थधीस्तथा । मनुष्यभावापत्तिश्च जायते प्रायशो नृणाम् ॥ २३ ॥
न तु तेषां पूर्णतां च सर्वांतर्यामितां तथा । शक्यते सर्वथा बोद्धुं केवलेनैव तेन तैः ॥२४॥
शास्त्रैश्चतुर्भिरेवाऽतः सम्यग्बोधस्तु जायते । नृणां कृष्णस्वरूपस्य भक्तानां धीमतामिह २५ ॥
शास्त्रेणैकेन या ज्ञाने भक्तस्य न्यूनता भवेत् । शास्त्रांतरैः सा तु नश्येत्पूर्णं ज्ञानं च सिद्ध्यति
एकपादं भवेज्ज्ञानं शास्त्रेणैकेन च प्रभोः । द्वाभ्यां द्विपादं भक्तस्य त्रिपादं च त्रिभिर्ध्रुवम् ।
पूर्णं ज्ञानं चतुर्भिः स्यादतः शास्त्रज्ञसाधुतः । सम्यगेवाऽवगंतव्यश्चतुःशास्त्रार्थ आदरात् २८॥
शास्त्रं विना स्वतो यस्तु ज्ञानी वास्यादुपासकः । तावुभौ दांभिकौ ज्ञेयौ स्वस्वाध्वानवबोधिनौ

श्रुत्वेति वाक्यं स मुनिः सुधाभं तस्य प्रभोः प्राप मुदं मनीषी ।
तथापरे सभ्यजनाश्च तोषं प्रपद्य तं ते स्म नमंति भक्त्या ॥ ३० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्विपञ्चाशत्तमस्तरंगः ॥ ५२ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । नवम्यां तपसः कृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स वेश्मनः । वेद्यां प्रत्यङ्मुखः पीठे स्वास्तृते समुपाविशत् ॥ २ ॥
सितं वासः परिदधद्धवलं चांगरक्षकम् । दधत्कौसुम्भमुष्णीषं तादृक्च कटिबंधनम् ॥ ३ ॥
पौष्पान् हारान् शेखरांश्च दधद्भक्तगणावृतः । प्रश्नं प्रष्टुं सतोऽग्रस्थान्प्रैरयत्सदयेक्षणः ॥४ ॥
मुक्तानंदोऽथ साधुस्तं प्रणम्याऽपृच्छदीश्वर । पुरुषाः कृतसत्संगा वर्त्तंत इह भूरिशः ॥ ५ ॥
तेषां प्रतिदिनं केचिद्वर्द्धमानमहागुणाः । समीक्ष्यंतेऽथ केचित्तु क्षीयमाणगुणा नराः ॥ ६ ॥
अत्र किं कारणमिति पृष्टस्तेनाऽब्रवीद्धरिः । गुणा दोषाश्च सर्वेषु भवंति पुरुषेष्विह ॥ ७ ॥
तत्राधिकाः केषुचित्स्युर्गुणा अल्पास्तथेतरे । केषुचित्त्वधिका दोषा गुणास्त्वल्पा नरेषु वै ॥८॥
ये संतोऽत्र हरेर्भक्तास्ते स्वेंद्रियदमादिना । विजित्य प्रायशो दोषान्वर्त्तयंति गुणान् हृदि ॥९॥
एवं सत्यत्र ये तेषां संगं कुर्युः सतां नराः । तेषां च चेद् गुणानेव गृह्णीयुर्नेतरान् पुनः १०॥
तर्हि ते तु प्रतिदिनं वर्द्धमानमहागुणाः । भवेयुरचिरेणैव यायुः सिद्धदशामपि ॥ ११ ॥
क्वाचित्कान् दैहिकान् दोषांस्तेषां स्वाभाविकांश्च वा । ये त्वल्पानपि गृह्णीयुर्हित्वा भूरिमहागुणान्
तेषां तु प्रत्यहं सर्वे क्षीयमाणा गुणा नृणाम् । अचिरेणैव नश्यंति यांत्यंते ते च हीनताम् १३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतो नैवागुणो ग्राह्यः सतामिह मुमुक्षुभिः । येन साहजिकेनापि विनष्टिर्महती भवेत् ॥१४॥
मर्यादामैश्वरीं हित्वा वर्त्तेरंस्ते यदि क्वचित् । तदा तु तेषां तद्दोषग्रहणं नास्त्यनर्थकृत् ॥१५॥
हरिभक्तगुणागुणग्रहस्त्विह सत्संगिजनस्य केवलम् ।
गुणवृद्धिविनाशकारणं भवतीत्येव मुनेऽवगम्यताम् ॥ १६ ॥
इति प्रभोर्वागमृतं स पीत्वा मुनिर्मुदं प्राप तथा सदस्थाः ।
सर्वेऽपि संतो गृहिणश्च भक्ताः प्रपेदिरे तोषममुं प्रणेमुः ॥ १७ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ त्रिपञ्चाशत्तमस्तरंगः ॥ ५३ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । दशम्यां तपसः कृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्ष्मेशितुर्गृहे । मंचोत्तमे बहिर्वेद्यां स्वास्तृते स उपाविशत् ॥ २ ॥
वलक्षपरिधानीयः सत्कौसुंभोत्तरीयकः । सहैमतंतुकाभ्राभकौशेयोष्णीषशेखरः ॥ ३ ॥
अनेकस्वाश्रितत्यागिगृहस्थैः परितो वृतः । मुक्तानंदस्तमप्राक्षीत्साधुवर्यः कृतानतिः ॥ ४ ॥
स्वामिन् श्रीमद्भागवतैकादशे निमिभूपतिः । धर्मान्भागवतान् ज्ञेयानपृच्छदाह तं कविः ॥५॥
संक्षेपात्कविना प्रोक्तास्त एव मुनिनाऽग्रतः । प्रबुद्धेनातिविस्ताराद्योगिना कथिताः पुनः ॥ ६ ॥
तत्पोषणं भवेद्येन सम्यग्मोक्षस्य गोपुरम् । विवृतं च भवेत्तन्मे प्रभो वक्तुं त्वमर्हसि ॥७॥
तमुवाच ततः स्वामी शृणु साधो ब्रवीमि तत् । सतामेकांतिकानां वै संगात्तत्पोषणं भवेत् ॥
दृढं स्वधर्मं वैराग्यं ज्ञानं स्वात्मपरात्मनः । माहात्म्यज्ञानसहितां कृष्णभक्तिं च ते दृढाम् ९॥
संश्रिताः सर्वभावेन तेषां स्युः सततं मुने । कृष्णार्था एव सकला बाह्यांतःकरणक्रियाः १० ॥
विवृतं तत्प्रसंगेन मोक्षद्वारं भवेदिति । कपिलो मातरं प्राह भगवांस्तद्वचो ब्रुवे ॥ ११ ॥
प्रसंगमजरं पाशमात्मनः कवयो विदुः । स एव साधुषु कृतो मोक्षद्वारमपावृतम् ॥१२॥
अतो यथाऽत्र गृहिणः पुत्रवित्तगृहादिषु । प्रसंगोऽस्ति दृढस्तद्वत्कार्यः सत्सु मुमुक्षुभिः ॥१३॥
पप्रच्छाऽथो शुकमुनिस्तं प्रभो स्वीयधर्मतः । आपद्यपि महत्यां यो न चलेल्लक्ष्म तस्य किम् ॥
प्रोवाच हरिकृष्णस्तं योऽल्पस्य महतोऽपि वा । पालने कृष्णवचसः श्राद्धः स न चलेत्ततः ॥
ईदृक्स्वभावः पुरुषः कृतार्थो भविता ध्रुवम् । इति ज्ञेयं बुद्धिमता विश्वासार्हः स चेत्यपि १६॥
इति प्रभोर्वाक्यसुधां स साधुर्निपीय मोदं परमं जगाम ।
सदो निषण्णा अपरे च सर्वे तदीयभक्ता अपि तं प्रणेमुः ॥ १७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुःपञ्चाशत्तमस्तरंगः ॥ ५४ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । एकादश्यां तपःकृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः । स्वावास उत्तमे पीठे स न्यषीदत्सितांशुकः ॥ २ ॥
वृतं स्वभक्तनिकरैः प्रसन्नमुखपंकजम् । पप्रच्छ मुक्तानंदस्तं साधुवर्यः कृतानतिः ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्संगं कुर्वतोऽप्यत्र भक्तौ कृष्णस्य ते हरे। पालने च यमानां नो दार्ढ्यं कस्यचिदीक्ष्यते ४॥
तत्र यत्कारणं तन्मे कृपया वक्तुमर्हसि। हरिरूचेऽत्र हेतुस्तु ह्यसद्देशादिसेवनम् ॥ ५ ॥
देशकालक्रियासंगाः संतोऽसंतश्च सन्ति हि। सद्बुद्धेर्हेतवस्तत्र संतोऽसंतस्त्वसद्धियः ॥ ६ ॥
सत्संगिनोपि त्रिविधा भवंति पुरुषा इह। उत्तमा मध्यमाश्चाऽथ कनिष्ठा इति विश्रुताः ॥७॥
कृष्णभक्तेस्तारतम्यात्तेषां भेदस्तु कीर्त्तितः। तत्रोत्तमाः कृष्णभक्तौ रताः स्युः सर्वथैव हि ८ ॥
तेऽप्यसद्देशकालादिसेवया स्युरसद्धियः। तर्हीतरेषां का वार्त्ता सेव्याः संतस्ततस्तु ते ॥ ९ ॥
बलिष्ठप्राक्संस्कृतेस्तु पुंसः कस्यचिदेव हि। नाऽसद्देशादिबाधः स्यात्सर्वेषां न न कर्हिचित् ॥
सद्देशादिं श्रितस्यापि पुंसोऽत्र यदि कस्यचित्। असत्येव मतिस्तिष्ठेन्न तु सा निर्मला भवेत् ॥
तत्र त्वस्य प्राग्भवीयं ज्ञेयं दुष्कर्म वै महत्। इह वा कस्यचिद् द्रोहः साधोर्जात इतीर्यते ॥
अन्यथा न भवेदेवं वैपरीत्यं तु तस्य हि। नश्येत्तदपि सत्सेवां कुर्यान्निश्छद्म चेत्स तु ॥१३॥
तां त्वकुर्वन्सतां संगं कुर्वन्संगं च पापिनाम्। पापकर्मरुचिर्मूर्खो वदत्येवमसंगतम् ॥१४॥
बहुकालं करोम्यत्र सत्संगमहमादरात्। तथापि मे मनो नैव स्थिरं भवति निर्मलम् ॥१५॥
इत्थं वदंस्त्वधमतमो बोध्यः स पुरुषो ध्रुवम्। सर्वथाऽतः सतां संगः कार्यो नैवाऽत्र पापिनाम्

इति प्रभोस्तस्य वचो निशम्य सुधायमानं स मुनिश्च संतः।
सर्वेपि भक्तास्तुतुपुः सदःस्थाः प्रसन्नवक्त्रं च ववंदिरे तम् ॥ १७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ पञ्चपञ्चाशत्तमस्तरंगः ॥ ५५ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। द्वादश्यां तपसः कृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्ष्मेशितुर्गृहे। वेद्यां परिस्तृते मंचे स उपाविशदीश्वरः ॥ २ ॥
श्वेतं धोत्रं परिदधत्कौसुभं च शिरःपटम्। सस्वर्णतंतुं कौसुंभमुत्तरीयपटं दधत् ॥ ३ ॥
नानादेशागतस्वीयभक्तसंघपरिश्रितः। पद्यं शृण्वन् गीयमानं सवाद्यं साधुभिः प्रभोः ॥ ४ ॥
प्रीतो भूत्वा गायनांते स त ऊचे स्वयं प्रभुः। भक्ताश्चतुर्विधाः स्वस्य गीतायां हरिणोदिताः ५॥
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी चेत्यथ तेष्वपि। ज्ञानी तु नित्ययुक्तैकभक्तित्वेन विशेषितः ॥६॥
भक्तभावो भगवतश्चतुर्णामस्त्यथापि वै। ईदृग्गुणेन श्रेष्ठत्वे ज्ञानिनो हेतुरस्ति कः ॥ ७ ॥
प्रश्नस्यास्योत्तरं ब्रूतेत्युक्तास्तेपि यथामति। कुर्वंतोप्युत्तरं नैव यथार्थं विविदुर्यदा ॥ ८ ॥
तदोवाच स शृण्वंतु सर्वेप्युत्तरमस्य यत्। माहात्म्यवेदनं विष्णोर्ज्ञानिनस्त्वस्ति सर्वथा ॥९ ॥
नष्टाः कृष्णेतराः सन्ति सर्वास्तस्य च वासनाः। इतरेषां तथात्वं तु सम्यङ्नास्तीति गम्यताम्।
अतः कृष्णेतरास्तेषां शिष्टाः संत्येव वासनाः। तस्मान्न ज्ञानिभक्तेन त्रयाणामस्ति तुल्यता ॥
इच्छद्भिस्त्विह तत्साम्यं ज्ञेयं माहात्म्यमीशितुः। संगं कृत्वैकांतिकानां यतः स्याद्वासनाक्षयः।
तेष्वतिन्यूनतैवैषा या कृष्णेतरवासना। कृष्णमाहात्म्यबोधेन सोन्मूल्या तैः प्रयत्नतः ॥१३॥
वैराग्यतीव्रतैव स्यान्निर्वासनहृहि ध्रुवम्। तद्योगाच्चेदहंकारः स्यात्तदा न्यूनतात्र सा ॥ १४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बलेन वात्मज्ञानस्य भक्तिदार्ढ्यबलेन वा । मानश्चेत्संभवेत्तर्हि भक्ते साप्यतिहीनता ॥ १५ ॥
मानी रंकं कृष्णभक्तं दृष्ट्वा न विनयान्नमेत् । तदग्रे प्रांजलिनं स्यान्न प्रशंसेच्च तं गिरा ॥१६॥
अतोत्र न्यूनता प्रोक्ता भक्ते ज्ञानादिमानिनि । तथा ज्ञानविरागाद्या विवर्द्धंते न तद्गुणाः ॥
मानस्तंभिनि भक्ते स्याद् गुणानामल्पतैव हि । न तु तेषां महत्ताऽत्र दृष्टांतोपि निगद्यते १८॥
खन्यमाने नृभिः कूपे ह्यधः पाषाण उद्गते । तदभिज्ञष्टांकिकस्तं दृष्ट्वा वदति तद्गुणान् ॥१९॥
अश्माऽयं सावकाशोऽस्ति टंकाघाते यतो रवः । अस्मादुदेति गंभीरस्तदत्राऽस्ति जलं महत् ॥
अयं त्वश्मास्त्यऽतिघनो यदस्मादुपरिध्वनिः । टंकाघाते जायतेऽथो स्फुलिंगा व्युच्चरंत्यतः ॥
अतः कोशार्द्धमात्रं वा कोशपादमितं जलम् । उद्भविष्यति कूपेऽत्र न कोशमितमप्यदः २२॥
काठिन्यगौरवाल्पाभ्यामश्मनोऽत्र यथांबुनः । अल्पता गौरवे प्रोक्ते तथा मानेपि दृश्यताम् ॥
भक्ते मानस्तंभवति स्याद् गुणाल्पमवर्द्धनम् । अल्पोदकमहाकूप इव सोपि महान्मतः ॥२४॥
भक्तो गलितमानस्तु वर्द्धमानमहागुणः । महान्महाकूप इव भूयंबुनिभृतोऽक्षयः ॥ २५ ॥
निःस्तंभस्यैव हृदये साक्षान्नारायणः सदाः । भक्तस्य कुरुते वासं निःस्तंभः स ततो भवेत् २६॥
मुक्तानंदोऽथ पप्रच्छ मानः सद्गुणसंभवः । केनोपायेन जेतव्यस्तं ब्रूहाऽशाऽब्रवीद्धरिः ॥
माहात्म्यं कृष्णभक्तानां सद्भयः सच्छास्त्रतस्तथा । यथावदेव ज्ञातव्यं मानं यस्य जिहासता ॥
साष्टांगप्रणतिः कार्या कृष्णभक्तेभ्य आदरात् । कार्या तत्परिचर्या च ताभ्यां मानो विलीयते ॥
तीव्रवैराग्यतोऽनन्यभक्तेर्वा ब्रह्मनिष्ठया । जातो मानो यस्य नश्येद्धरिस्तस्मै प्रसीदति ॥ ३० ॥
प्रमाणमत्राऽनुभवो ज्ञातव्यो ध्यानिनां नृणाम् । मानोद्गमेऽतितीव्रा दृग्ध्याने कृष्णस्य दृश्यते ॥
निर्मानैः साऽतिमधुरा दृश्यतेऽस्य च हृत्कजे । सर्वथाऽतः प्रहातव्यो मानस्तंभो मुमुक्षुणा ॥
लोकदृष्ट्या समानोऽत्र बलवान् यद्यपीक्ष्यते । तथापि स बली नैव निर्मानो बलवान्मतः ३३॥
महत्त्वसूक्ष्मताधिक्यात्पृथ्व्यादीनि यथोत्तरम् । बलवंतीह भूतानि संति चत्वारि यद्यपि ३४ ॥
आकाशः शून्यधर्मत्वान्निर्बलश्च जनेक्षया । तथाप्यसौ बली ज्ञेयस्तेभ्यो यतस तदाश्रयः ३५॥
बलिष्ठोपि यथाकाशो लोकदृष्ट्याऽस्ति निर्बलः । निर्मानोऽतिबली तद्वदज्ञैर्निर्बलवन्मतः ३६॥
बलिष्ठगुणयुक्तो हि बलवानिति निश्चयात् । मानं हित्वा भजेत्कृष्णमात्मनिष्ठः सुधीः पुमान् ॥
पप्रच्छ मुक्तानंदस्तं पुनः स्वामिन्वपुस्त्रयात् । भिन्नोऽस्त्यात्मेति जानीमः सम्यगेव सतां मुखात्
तथापि तत्साहचर्यान्नानासंकल्पयोगतः । कथं स जायते दुःखीत्युक्तस्तं हरिरब्रवीत् ॥ ३९ ॥
पक्वता ज्ञाननिष्ठाया यदा पुंसो भवेत्तदा । दैहिकं सकलं दुःखं सुखं चापि विलीयते ॥ ४० ॥
सच्छास्त्रश्रुतिमात्रेण सद्वाक्यश्रवणेन वा । न जायते सा तु सम्यक् किंतूपासनया हरेः ॥४१॥
ये ये सिद्धदशां प्राप्ताः सार्वज्ञ्यं वापि देवताम् । ते ते सर्वेऽपीष्टदेवोपासनेनैव नान्यथा ४२॥
यावद्यस्योपास्तिबलं तस्य स्यात्तावदेव हि । दुःखकार्श्यं चात्मसुखमल्पेऽल्पं भूरि भूरिणि ४३॥
कृष्णोपास्तिरतः साध्या ज्ञाननिष्ठासु सिद्धये । साध्यस्य सिद्धिर्नैव स्याद्विना साधनसंपदम् ॥
व्रजांगनावद्यस्य स्यात्प्रेम स्वाभाविकं हरौ । तस्यैव किंचित्कर्त्तव्यं नास्त्यन्यस्य तु विद्यते ॥४५॥
उपासनायाः सिद्धिश्च कृष्णस्य स्यात्तदैव हि । माहात्म्यवेदनं सम्यग्यदा स्यात्सन्निषेवया ४६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अक्षराद्यधिपो योऽस्ति स एवाऽत्र नराकृतिः । निजभक्तसुखायैव स्वेच्छया भाति नान्यथा ॥
त्राकृतिर्दृश्यमानोपि स एवास्ति न चेतरः । अयमेव समाधौ यद् दृश्यतेऽतिप्रकाशवान् ४८॥
कोट्यर्काभनखद्योतो ह्यक्षरादौ य ईश्वरः । राधालक्ष्म्यादिभिर्दिव्यसामग्र्या सेव्यतेऽनिशम् ४९
स एवाऽत्र दिवारात्रौ सूर्येंदुभ्यां प्रकाशितः । सेवितः प्राकृतजनैर्वर्त्तते च नरो यथा ॥५०॥
एष एव हि सर्गादौ जगत्कर्त्ताऽथ पोषकः । भवतीत्यादिमाहात्म्यं ज्ञेयं साश्चर्यमीशितुः ५१॥
देहांतेऽपि महापापी यन्नामस्मरणादपि । मुच्यते सर्वपापेभ्यः स साक्षान्मिलितोऽस्ति माम् ॥
इति निश्चित्य कर्त्तव्या निश्छद्मोपास्तिरीशितुः । तयात्मनिष्ठादार्ढ्यं स्यान्न दुःखं दैहिकं ततः ॥

इति प्रभोस्तस्य सुधोपमेयं वचो निशम्याप मुनिः स तोषम् ।
भक्ताः सदःस्था अपरे च सर्वे मोदं प्रणेमुर्हृदये तमाप्ताः ॥ ५४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षट्पञ्चाशत्तमस्तरंगः ॥ ५६ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । फाल्गुनाद्ये द्वितीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्याश्रमे सताम् । सितवासा वृतो भक्तैर्न्यषीदत्सोंशुकासने ॥ २ ॥
साधून्स ऊचे प्रष्टव्यं स्याच्चेत्किंचन कस्यचित् । स तर्हि पृच्छत्वित्युक्ते मुक्तानंदस्तमब्रवीत् ॥३॥
स्वामिन्संसृतिमुक्तेर्यदसाधारणकारणम् । स्यात्तद् ब्रूहीति पृष्टोऽसौ प्रोवाच श्रृणु सन्मते ॥४॥
राधापतेः स्वरूपस्य माहात्म्यस्य च तत्त्वतः । वेदनं यत्तदेवोक्तं परमं मुक्तिकारणम् ॥ ५ ॥
गाढस्नेहाद्भगवति मुक्तिर्भवति देहिनाम् । इत्यपि श्रूयते तत्र ज्ञातव्यास्यैव हेतुता ॥ ६ ॥
स्नेहोपि द्विविधो ज्ञेयस्तत्राद्यो गुणवित्तिजः । श्रीकृष्णस्य द्वितीयश्च ज्ञेयः साहजिको मुने ॥७॥
यथा स्त्रीपुत्रवित्तादौ स्नेहः स्वाभाविको दृढः । तथैव साक्षात्कृष्णे स्यात्स साहजिक उच्यते ॥
अविचारित एवाऽसौ यः स्नेहः स्याद्वरो स तु । तथैव सर्वदा रक्ष्यो न कार्याऽत्र विचारणा ॥
न च तर्कबलेनापि स्थापनोत्थापने क्वचित् । कर्त्तव्ये तस्य भक्तेन देहपातावधि ध्रुवम् ॥ १०॥
गुणज्ञानोद्भवः स्नेहो येषां स्यात्ते तु पूरुषाः । कुशाग्रधिषणा अल्पधियश्चेति द्विधोदिताः ॥११॥
तत्राद्यानां प्रतिदिनं वर्द्धमानः स पुष्यति । हरेर्नरानुकरणेऽप्यसौ न ह्रसति क्वचित् ॥ १२ ॥
इतरेषां तु कृष्णस्य त्राकृतेः प्राकृतक्रियाम् । क्वचिद् दृष्ट्वाऽनीशतर्कात्सद्य एव स लीयते १३॥
जन्मांतरे ततस्तेषां तत्फलं तु भविष्यति । कुशाग्रधिषणैर्भाव्यं सर्वैर्भक्तैरतो ध्रुवम् ॥ १४ ॥
कुशाग्रधिषणानां तु माहात्म्यज्ञानसंभवे । दुःस्वभावी महाविघ्नः स्नेहेप्यस्तीति गम्यताम् १५
कार्यः प्रयत्नो भक्तैः स्वदुःस्वभावापनुत्तये । अतः प्रागभवन् भक्ताश्च्युताः श्रेयोध्वनो यतः ॥
स एव मुक्तिमार्गैकप्रतिबंधोस्ति सर्वथा । दुःखसंपादितमहागुणेषु स कलंककृत् ॥ १७ ॥
अथो शिवानंदमुनिस्तं पप्रच्छ सतां पतिम् । मुक्तिमार्गस्तु सत्संगो दुःस्वभावोऽत्र विघ्नकृत् ॥
मुक्तिवर्त्मस्थितिरुचेरपि पुंसः स वर्त्तते । कथं तस्य निवृत्तिः स्यादिति पृष्टोऽब्रवीद्धरिः ॥१९॥
भवेत्स्वभावो यो यस्य मुक्तिवर्त्मनि विघ्नकृत् । अतिशत्रुधिया तस्मिन्न भवेदरुचिर्यदि ॥२०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तर्हि तस्य न सत्संगप्रेप्सा पूर्णाऽस्ति निश्चितम् । तेन दुष्टः स्वभावोपि शत्रुवद्विदितो न च ॥
यथा स्वमित्रं किंचित्स्यात्तेन चात्मसहोदरः । हन्येत चेत्तदा तस्मिन्मित्रधीः स्यान्न पूर्ववत् २२
किंतु तन्मारणोद्योग एव वर्त्तेत सोऽन्वहम् । मित्रसंबंधतो भ्रातृसंबंधस्याधिकत्वतः ॥ २३ ॥
तथैव दुःस्वभावोऽत्र येन स्वक्षेमवर्त्मभित् । विदितः स्यात्स तु सदा तस्मिन्स्यादतिवैरिधीः २४
नित्योद्युक्तश्च तन्नाशे स भवेद्यत्ततोऽस्य तु । सत्संगेऽस्ति रुचिर्वह्वी सा च तस्मिन्न विद्यते २५॥
सत्संगरुचिना तस्मात् पुंसा हेयः स यत्नतः । तथा कर्तुं समर्थोस्ति जीवो नास्त्येव दुर्बलः २६
इंद्रियाणि मनः क्षेत्रं स त्वस्ति क्षेत्रवित्परः । अतो यदिच्छेत्तत्कुर्यादत्र नास्त्येव संशयः २७॥

गिरं सुधां तस्य स इत्युदारां निपीय साधुश्च तथा सदःस्थाः ।
अन्येपि भक्ताः सकलाः प्रतोषं संप्राप्य तं भक्तपतिं प्रणेमुः ॥ २८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ सप्तपञ्चाशत्तमस्तरंगः ॥ ५७ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । तपस्यशुक्लपञ्चम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य सदाश्रमे । न्यषीदत्स्वासने स्वामी सितवासा वृतो निजैः ॥ २ ॥
पप्रच्छ मुक्तानंदस्तं प्रभो भक्तजनाः सदा । ध्यायंति कृष्णं हृदये निषद्य त्वां रहःस्थले ॥३॥
तेषां मध्येपि केषांचिद्धृदि राजसतामसाः । वेगास्तदोद्भवंतीति न ध्यानसुखमाप्यते ॥ ४ ॥
तद्वेगशांत्युपायं मे वक्तुमर्हसि तत्त्वतः । इति पृष्टो हरिस्तेन साधुना तं जगाद ह ॥ ५ ॥
गुणोद्रेके हेतवस्तु त्रयः संति सतां मताः । देहाध्यासः कुसंगश्च तथा प्राक्कर्मसंस्कृतिः ॥ ६ ॥
आत्मानात्मविचारेण तत्राद्यस्तु निवर्त्तते । सत्संगेन द्वितीयोपि दृढेन विनिवर्त्तते ॥ ७ ॥
आभ्यामुभाभ्यामपि यो दुर्निवार्यः स चांतिमः । निवर्त्तते सोपि सतां प्रसत्त्या महतां भृशम्
तया हि शुभतां यांति संस्कारा मलिना अपि । रंकोपि राजतां यायाद्भवेन्मूर्खोपि पंडितः ॥
इत्युक्तवंतं तं साधुरानंदानंद ऊचिवान् । अतिप्रसन्नता स्वस्मिन्केन स्यान्महतां सताम् ॥१०॥
श्रीस्वामी तमुवाचाऽथ स तां प्रीतिमभीप्सता । सर्वदा तेषु निश्छद्म वर्त्तितव्यमनाकुलम् ॥
यत्र यत्र रुचिस्तेषां तत्तत्साध्यं प्रयत्नतः । यत्र यत्राऽरुचिश्चैषां तत्तद्धेयं च सर्वथा ॥ १२ ॥
लोकलज्जामहंकारं हित्वा मानं च सर्वथा । तद्दास्यमेव कर्त्तव्यं तद्वाचश्चावधारणम् ॥ १३ ॥
कामः क्रोधो मदो मोहो लोभ ईर्ष्या च मत्सरः । तृष्णाद्या दूरतो हेया दोषा धर्मविरोधिनः ॥
एवं दोषविहीने च निश्छद्मादिगुणान्विते । प्रसीदंति भृशं संतः पुंसि नित्यमनुव्रते ॥१५॥
महानुभावानंदोऽथ साधुः पप्रच्छ तं प्रभो । दोषाः सत्संगिनः सर्वे नश्येयुः केन हृद्गताः १६
हरे त्वद्भक्तिवृद्धिश्च केन स्यात्तस्य चान्वहम् । इति पृष्टः स तेनेशः प्रोवाच श्रृणु सन्मते १७॥
संतो महांतो येऽत्र स्युस्तेषामेव निषेवया । तद्गुणग्रहपूर्वं वै दोषा नश्यंति हृद्गताः ॥१८॥
यथा यथा गुणानेव तेषां गृह्णाति पूरुषः । तथा तथा भक्तिरपि वृद्धिमेत्यस्य चाऽन्वहम् ।१९।
श्ववत्काम्यपि निष्कामः स्यात्तन्निष्कामताग्रहात् । तथा क्रोध्यपि निष्क्रोधः स्यात्तन्निष्क्रोधताग्रहात्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवमन्येपि नश्यंति दोषास्तेषां गुणग्रहात् । पुंसः सत्संगिनोऽथ स्याद्भक्त्या भक्तस्तयोत्तमः ॥
पदार्थे दुःखद इव शब्दादौ विषये शुभे । अभावः सहजो यस्य वर्त्तेत हृदि सर्वदा ॥ २२ ॥
स्यात् कृष्ण एवातिरुचिस्तदीयेषु च यस्य सः । उत्तमः कथितः कृष्णभक्तः सद्भिः सदुत्तमः ।
सद्दास्यमेकमवधेहि ततस्तु दोषनाशस्य साधनमथो हरिभक्तिवृद्धेः ।
इत्थं प्रभोरमृतवाचमसौ निपीय सर्वे च मोदमगमन्नपरे सदःस्थाः ॥ २४ ॥

इति श्रीशतानंदमुनिविरचिते हरिवाक्यसुधासिंधावष्टपञ्चाशत्तमस्तरंगः ।। ५८ ।।

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । तपस्याद्यचतुर्दश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य महीभुजः । वेद्यां न्यषीदत् पीठेऽसौ वासुदेवालयांतिके ॥ २ ॥
सितांबरधरं नानाभक्तसंघैर्वृतं च तम् । मुक्तानंदः पृच्छति स्म साधुश्चंदनचर्चितम् ॥ ३ ॥
प्रेम्णो हेतुं त्वयि हरे वदाऽसाधारणस्य मे । इति पृष्टस्तेन हरिस्तमुवाच मुने श्रृणु ॥ ४ ॥
योऽयमेव हरिः साक्षादित्येवं त्वाकृतौ प्रभौ । आत्मप्राप्ते प्रतीतिर्या सा तद्धेतुरुदीरिता ॥५॥
तस्य माहात्म्यविज्ञानमप्यन्यो हेतुरस्ति च । कालादिभ्यो महत्त्वं यत्तन्माहात्म्यमितीरितम् ॥
मायापुरुषकालानां स्वभावगुणकर्मणाम् । तत्त्वादीनां च कर्त्तृत्वं ब्रह्मांडानां न विद्यते ॥७॥
किंतु स्वतंत्रकर्त्तृत्वमेकस्यैव रमापतेः । अस्त्यन्यस्य तु तच्छक्त्या कर्त्तृतोक्ताऽस्ति न स्वतः
इति निश्चित्य यः कृष्णं त्वाकृतिं सर्वकारणम् । सर्वेषां च नियंतारं ज्ञात्वा भजति सादरम् ॥
तस्य पुंसो भगवति प्रेम स्यात्सर्वतोऽधिकम् । अतस्तदिच्छुना तस्य महत्त्वं बोध्यमंजसा १०
इत्युक्तवंतं तं भूयः पप्रच्छ स मुनिः प्रभो । एवं कृष्णमहत्त्वादि जानात्येव हि कश्चन ॥११॥
तथापि तस्य न प्रीतिर्दृश्यते नितरां त्वयि । अत्र किं कारणमिति पृष्टः प्रोवाच तं हरिः ।१२॥
माहात्म्यवेदिनः पुंसो यद्यपि प्रेम बाह्यतः । न दृश्यते हरौ भूरि तथाप्यस्ति तदंतरे ॥१३॥
स च भक्तः स्वयमपि तन्न जानाति तत्त्वतः । तथाऽप्यन्येन विदुषा बोधितो वेत्ति स ध्रुवम् ।
समुद्रोल्लंघने शक्तिं यथा स्वस्थां मरुत्सुतः । यथा च नाऽविदच्छक्तिं प्रलंबघ्नौ निजां बलः
तावन्यबोधितौ तां च सम्यग्विविदतुः खलु । तथाऽन्यबोधितः सोपि तद्वेत्स्यति न संशयः ॥
इति तस्य वचोमृतं स साधुर्मतिमानाप निपीय भूरितोषम् ।
गृहिणोऽगृहिणश्च तत्सदःस्था अपरे चापि तदीयभक्तिभाजः ॥ १७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकोनषष्टितमस्तरंगः ॥ ५९ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । तपस्य कृष्णाद्यतिथौ वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य महीभुजः । न्यषीदद्युत्तमे पीठे सितवासाः स सन्मठे ॥ २ ॥
सितपुष्पस्रगापीडो वृतो भक्तव्रजैश्च सः । स्वयमेवाब्रवीत्साधून्स्वपुरःस्थान् दयानिधिः ॥३॥
साध्येषु साधनेष्वत्र भक्तैर्निजहितैषिभिः । वासनाक्षय एवैकः सर्वथा साध्य आदरात् ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तं संपादयता त्वादौ विवेक्तव्या रुचिर्निजा । कियत्यस्तीन्द्रियार्थेषु कृष्णे सा कियतीति च ।५।
अर्थेष्वस्त्यधिका कृष्णे न्यूना किं वाऽधिका हरौ । न्यूना साऽर्थेषु वा तुल्या वर्त्तते ह्युभयत्र च ॥
तत्र कृष्णे यदि न्यूना समा वा सा भवेत्तदा । यत्नेन वर्द्धनीयैव ह्रसनीया परत्र च ॥ ७ ॥
मनुष्याणां च दिव्यानां विषयाणामशेषतः । क्षयिष्णुत्वं च दुःखत्वं सुनिश्चित्य प्रमाणतः ८॥
महद्भिरपि भूपालैः कृष्णसौख्याय सर्वथा । कृतं तत्त्यागमपि च निश्चित्यात्ममनीषया ॥ ९ ॥
न कर्त्तव्या रुचिस्तेषु मुक्तानामपि बंधनी । तदरुच्यैव नूनं स्यात् पुंसां तद्वासनाक्षयः ॥१०॥
सत्संगकृष्णसत्कीर्त्तिश्रवणादिभिरेधते । कृष्णे रुचिश्च विषयातिरुचिर्ह्रासमेति हि ॥ ११ ॥
तदभ्यासवतः पुंसो रुचिसाम्यं भवेत्पुरा । शब्दादौ च ततो ग्राम्ये न्यूना भवति सा द्रुतम् ॥
ततः पश्चापि विषया जागताः शोभना अपि । मलवच्चैव रोचंते भगवद्रसवेदिने ॥ १३ ॥
ततः शुभाश्चाशुभाश्च ते तु तस्य स्वभावतः । समा एव भवंतीति ज्ञातव्यो वासनाक्षयः १४॥
एवं निर्वासनतया वर्त्तनं सर्वदैव यत् । एकांतिकस्य भक्तस्य स धर्मः परमो मतः ॥ १५ ॥
स्थितस्तु वासनाशेषः समाधिस्थमपि द्रुतम् । देहाभिमानिनं कुर्यात्ततो निर्वासनो भवेत् ॥
मुक्तानंदस्तमूचेऽथ नत्वा साधुः सतां पते । वासनानाशने मुख्यानुपायान्वक्तुमर्हसि ॥ १७ ॥
अस्माकमिदमेवैकं साध्यं भवति वै सताम् । इत्युक्तवंतं तं संतं हरिरूचे मुने शृणु ॥ १८ ॥
आत्मनिष्ठादार्ढ्यमेकं वैराग्यं विषयेष्वथ । कृष्णमाहात्म्यातिशयज्ञानं चेति त्रयो हि ते ॥१९॥
एभिर्जाते वासनानां क्षये भक्तस्य चेतसि । कापि मे वासना नाऽभूदित्येवं भासते स्फुटम् ॥
सद्भयो निर्वासनेभ्यो हि प्राप्तैरेभिः सुसाधनैः । एवं निर्वासनत्वं तु जायते नान्यथा क्वचित् ॥

ग्राम्योपि निर्वासनिको नरः स्यान्निश्छद्मनिर्वासनसत्प्रसंगात् ।
इति प्रभोर्वाचमसौ निशम्य हृष्टः सुधाभां ससदःस्थ आसीत् ॥ २२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षष्टितमस्तरंगः ॥ ६० ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । तपस्यांत्यतृतीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः । वेद्यां मंचे न्यषीदत्स पिचुमंदतरोरधः ॥ २ ॥
सितांबरं श्वेतपुष्पहारापीडधरं वृतम् । भक्तसंघैश्च तं मुक्तानंदः पप्रच्छ संनतः ॥ ३ ॥
कामलोभक्रुधां स्वामिन् योगाद्भीतेश्च नः क्वचित् । धैर्यस्यापगमो न स्यात्केनोपायेन तं वद ॥
इति पृष्टस्तेन हरिस्तं संतं प्रत्युवाच सः । आत्मनिष्ठायुजा भक्त्या न स्याद्धैर्यस्य विप्लवः ॥५॥
आत्मैवाऽहं न देहोस्मीत्येवं या दृढभावना । सैवैका कृष्णभक्तस्य धैर्यस्थैर्येऽस्ति कारणम् ॥६॥
आत्मनिष्ठायुजा भक्त्या त्वंतकालेपि मापतेः । भवेन्न धैर्यापगमो नूनमन्यत्र किं पुनः ॥ ७ ॥
प्रश्नस्योत्तरमित्युक्तं तव साधो मयांजसा । अन्यश्चेत्संशयः कश्चित्तर्हि पृच्छोत्तरं ब्रुवे ॥ ८ ॥
सोऽपृच्छत्तं पुनः साधुस्त्वां भजंतं हरिं प्रभो । सिद्धयो ह्युपतिष्ठंत इति भागवते श्रुतम् ॥९॥
भक्त्यंतरायरूपास्ता अपक्कं भक्तमेव वा । पक्कमप्युपयांतीति पृच्छाम्यस्योत्तरं वद ॥ १० ॥
पक्कं भागवतं योगधारणाविदमेव ताः । उपयांति ह्यपक्कस्य भक्तस्य त्वतिदुर्लभाः ॥ ११ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परीक्षार्थं तस्य हरेराज्ञयैव हि ता अपि । आयांति पत्युः सिद्धीनां नतु स्वातंत्र्यतो मुने ॥१२॥
तत्र निर्वासनो भक्तो न ताः पश्यत्यपि क्वचित् । इतरस्तु प्रसह्यैव वशे तासां भवत्यरम् १३॥
यदा निर्वासनो भक्तः सिद्धीरपि न वीक्षते । तदा तस्य वशे कृष्णः स्वयमेव भवत्यलम् ॥१४॥
यस्त्वन्यवासनाहीनः कृष्णार्पितनिजाखिलः । गृह्णाति साद्रं नित्यं कृष्णवाचोऽप्रिया अपि ॥
तस्याधीनो भवत्येव प्रीतो भक्तप्रियो हरिः । यथा पुरा दैत्यपतेर्बलेरात्मनिवेदिनः ॥ १६ ॥
साक्षात्कृष्णस्य भक्तेन ततस्तद्गुदितानि तु । अप्रियाण्यपि वाक्यानि सद्यो ग्राह्याणि सादरम् ॥
एवं स्वस्मिन्नतिप्रेम्णो भक्तस्य हृदयाद्धरिः । प्रेमरज्ज्वा बद्धपादो गंतुं शक्नोति न क्वचित् १८॥

ब्रह्माचर्यं देहदुःखादिभीत्या प्रत्याख्येयं कृष्णवाक्यं न भक्तैः ।
इत्थं वाक्यं तस्य पीयूषतुल्यं पीत्वा साधुः सोऽहृष्यच्चापरेऽपि ॥ १९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकषष्टितमस्तरंगः ॥ ६१ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । चतुर्थ्यां फाल्गुनस्यांते वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे नृपतेः सौधचत्वरे । उच्चपीठे न्यषीदत्स सितसूक्ष्मांशुकत्रयः ॥ २ ॥
सितपुष्पस्रगापीडभक्तसंघैः परिश्रितम् । स्वयंप्रकाशानंदस्तं पप्रच्छ प्रांजलिः प्रभुम् ॥ ३ ॥
श्रीमद्भागवते स्वामिन् सत्यशौचादयस्त्वयि । शुभा गुणा भगवति नित्याः संतीत्युदीरितम् ४॥
ते च त्वां सेवमानेषु भक्तेषु त्वत्प्रसादतः । आविर्भवंतीत्यपि च श्रूयते तत्र सत्पते ॥ ५ ॥
ते कीदृशेषु भक्तेषु कथं चाविर्भवंति तत् । ब्रूहीत्युक्तः स तं स्वामी प्रोवाच शृणु सन्मते ॥६॥
कृष्णस्य त्वाकृतेः साक्षाद्यथार्थो यस्य निश्चयः । भवेद्भक्तस्य तस्मिन् हि गुणा आविर्भवंति ते ।
कालकर्मस्वभावानां प्रकृतेः पुरुषस्य च । कर्त्ता नियंता तद्भिन्नः स्वतंत्रः कृष्ण एव हि ॥ ८ ॥
उत्पत्तिस्थितिसंहारकर्त्ताँडानामपि स्वयम् । निर्लेप एव भवतीत्येवं यस्यास्ति निश्चयः ॥ ९ ॥
न कुतर्कैर्न पाखंडैर्न मतांतरवादिभिः । नाऽसच्छास्त्रैश्चाऽपनोद्यो भवेत्तस्य स सर्वथा ॥ १० ॥
ईदृग्निश्चयिनः पुंसः संबंधो राधिकापतेः । संजात इति बोद्धव्यं भजतां भक्तता यतः ॥११॥
संबंधो वस्तुनो यस्य पुंसः स्याद्यस्य तस्य तु । गुणास्तस्मिन्प्रवर्त्तंत इति लोकेऽत्र दृश्यते ॥१२॥
चक्षुर्दीपस्य संबंधं साक्षाद्याति यथा यदा । तत्प्रकाशगुणं प्राप्य तमस्यर्थांस्तदेक्षते ॥ १३ ॥
तथा कृष्णस्य संबंधं भक्तः प्राप्यैव तद्गुणान् । अनायासेन सत्यादीन् प्राप्नोत्यमरदुर्लभान् ।
कृष्णवच्च ततो भक्तो निर्बंधः सन्निजेप्सितम् । कार्यं विधातुं शक्नोति स्वतंत्रस्तत्प्रसादतः १५॥
एवं वदंतं सदसि कृष्णनिश्चयिनः फलम् । निर्विकारानंदसाधुर्नत्वा पप्रच्छ तं प्रभुम् ॥ १६ ॥
ईदृग्निश्चयवंतोऽत्र केपि संतो न ते गुणान् । प्राप्नुवंत्युत मानेर्ष्यामुख्यान् दोषांस्तु यांति ते ।
तत्र किं कारणमिति पृष्टः स्वामी जगाद तम् । जीवास्तु द्विविधा ज्ञेया लोके दैवास्तथाऽऽसुराः ।
अभयाद्याश्च दंभाद्या गुणा दोषाः पृथक् पृथक् । गीतायामुदितांस्तेषां श्रीकृष्णेनार्ज्जुनं प्रति ॥
प्राप्यापि कृष्णसंबंधमुभयेपि निजान् गुणान् । स्वाभाविकांश्च दोषांस्ते न हातुं शक्नुवंति हि ॥
गुणिनस्तत्र दैवास्तु संबंधाद्राधिकापतेः । तद्गुणान्प्राप्नुवंत्येव दोषवंतस्तु नेतरे ॥ २१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आसुरेषु तु जीवेषु कश्चिदेव क्वचित्पुमान् । हित्वा स्वदोषान् गुणवान्भवेन्महदनुग्रहात् ॥२२॥
अज्ञानतो वा दंभाद्वा शुश्रूषा महतां सताम् । जाता दोषान्निहंत्येव महांतो ह्यत एव ते ॥२३॥
दैवेष्वपि च जीवेषु यदि कश्चित्प्रमादतः । अवजानाति बुद्ध्या वा रंकं भक्तं हरेः क्वचित् २४॥
सोपि स्यादासुर इव गुणहीनश्च दोषयुक् । नाविर्भवंति कृष्णस्य गुणास्तस्मिन्नपि ध्रुवम् ॥२५॥
अतोऽपमानो न क्वापि कार्यो दुर्बलदेहिनः । बहवो नाशमापन्ना यतस्तेनाऽऽशु योगिनः ॥
अंतर्यामितया तस्मिन्वर्त्तमानो रमापतिः । सहते नैव तं क्वापि दीननाथ इति श्रुतः ॥ २७ ॥
रुष्टः स तस्य सहसा विनाशं कुरुते स्वयम् । कारयत्याऽऽशु वाऽन्येन तस्मात्कार्यो न स क्वचित् ।
प्रीतः कृष्णो रुष्टतां याति यस्माद्दीनावज्ञा नैव कार्या तदत्र ।
इत्थं वाचं तस्य साधुः सुधाभां पीत्वा हृष्टः सोऽभवच्चाऽन्यभक्ताः ॥ २९ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ द्विषष्टितमस्तरंगः ॥ ६२ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । सप्तम्यां फाल्गुनस्यांते वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्षितिपस्य स्वः । प्रत्यङ्मुखनिकेतस्य वेद्यां मंच उपाविशत् ॥ २ ॥
सितधौत्रः सितोष्णीषः सितप्रावरणस्तथा । सितपुष्पस्रगापीडो भक्तसंघैः परिश्रितः ॥ ३ ॥
तं नृसिंहानंदमुनिर्नत्वा पप्रच्छ भो हरे । कुर्वंति बहवस्तेऽत्र साक्षात्कृष्णस्य निश्चयम् ॥ ४ ॥
तत्र त्वन्निश्चये यस्य न्यूनता हृदये भवेत् । संकल्पाः कीदृशास्तस्य भवेयुरिति मे वद ॥ ५ ॥
तमुवाच हरिर्यस्य निश्चये न्यूनता भवेत् । तस्य कृष्णातिमर्त्यैहादर्शनाद्धृदि मुह्भवेत् ॥ ६ ॥
क्वचिन्नृनाट्ये कृष्णस्य दुर्बलत्वादिवीक्षणे । खेदः स्यादनुतापश्च दुःसंकल्पाश्च भूरिशः ॥ ७ ॥
अनिवार्यैः पीडितस्तैर्वदेत्कृष्णस्य सोऽगुणान् । बहुकालं मया सेवा कृता कृष्णस्य भावतः ८ ॥
दुःसंकल्पांस्तथाप्येष न नाशयति मे हृदः । एवं स्वदोषमविदन् दोषान्कल्पयति प्रभौ ॥ ९ ॥
स्वदृष्टांतेन कृष्णेपि कामादीनांतरान्रिपून् । सोऽनिवार्यान्विजानाति ततस्तं वेत्ति मर्त्यवत् ॥
न्यूननिश्चय एवं हि कृष्णे प्राकृतमर्त्यधीः । दोषसत्त्वं तर्कयति त्यक्ततद्दिव्यभावनः ॥ ११ ॥
इत्युक्तवंतं परमचैतन्यानंद आह तम् । दृढनिश्चयिनो नुस्ते संकल्पाः कीदृशा हरेः ॥ १२ ॥
तमुवाच हरिः स स्वं पूर्णं मन्येत सर्वदा । न मे प्राप्यं च साध्यं च किंचिदस्तीति चांतरे ॥
अस्ति साक्षाद्धरिर्यत्र तद्धामाप्यस्ति तत्र हि । एते संतश्च तद्भक्ता नारदादिसमाः किल १४ ॥
संति सत्संगिनश्चैत उद्धवाक्रूरसन्निभाः । तद्भक्ताश्च स्त्रियोप्येता द्रौपदीगोपिकासमाः ॥१५॥
एवं स्युस्तस्य संकल्पा दृढनिश्चयिनो हरेः । आनंद एव वर्त्तेत हृदि तस्य च सर्वदा ॥ १६ ॥
अतो भक्तेन कृष्णस्य तत्त्वतो दृढनिश्चयः । कर्त्तव्यः सोऽनिवार्यो हि क्वापि केनापि केनचित् ॥
श्रृण्वंतु साधवः सर्वे तमहं वच्मि वः स्फुटम् । येन कृष्णे नराकारे क्वापि स्यान्नैव संशयः ॥
सर्वेभ्योऽपि वरिष्ठेभ्यो महत्त्वं राधिकापतेः । श्रुतिस्मृतिपुराणाद्यैर्वर्णितं वर्त्तते भृशम् ॥ १९ ॥
यथेह राजकीयानां सौधयानादिवैभवः । यः स्यात्ततो महानेव तत्पतेः स्यात्स भूभुजः २० ॥
तथैव ब्रह्मविष्ण्वादेः पुराणादिषु वर्णितः । कृष्णाज्ञावर्त्तमानस्य वैभवोऽपार एव हि ॥ २१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णस्य तन्नियंतुस्तु ततोऽप्यधिक एव सः । इत्येवमनुमातव्यं यतः स पुरुषोत्तमः ॥ २२ ॥
क्रमेणानेन बोद्धव्यं महत्त्वं कमलापतेः । सूक्ष्मत्वं कारणत्वं च कार्यव्यापकता तथा ॥ २३ ॥
इहाकृतिभ्यः सर्वाभ्यो महती दृश्यते मही । ततोऽप्यस्ति महद्वारि सूक्ष्मं व्यापि च कारणम् ॥
ततोप्यस्ति महत्तेजस्तद्धेतुस्तस्य चाश्रयः । ततः सूक्ष्मं च तद्व्यापि तस्मादस्ति महान्मरुत् ॥
सूक्ष्मः स तेजसस्तस्य कारणं च तदाश्रयः । तद्व्यापकोऽथ तस्मात् खं महत्सूक्ष्मं च कारणम् ॥
अहं महान् प्रधानेशौ मूलप्रकृतिपूरुषौ । उत्तरोत्तरतश्चैते वर्त्तंतेऽनुक्रमात्ततः ॥ २७ ॥
पूर्वपूर्वाधिकं चैषां महत्त्वं सूक्ष्मता तथा । कारणत्वं च कार्येषु व्यापित्वमपि वर्त्तते ॥ २८ ॥
पुरुषादक्षरं ब्रह्म वर्त्तते हि महत्तरम् । अणुवत्परिवर्त्तंते यत्र ब्रह्माण्डकोटयः ॥ २९ ॥
प्रकाशकानां सर्वेषां तदेवास्ति प्रकाशकम् । कारणानां कारणं च सच्चिदानंदमव्ययम् ॥ ३० ॥
अग्रतस्तन्महत्ताया इतरेषां तु सर्वशः । महत्त्वमग्रे करिणो यूकानामिव दृश्यते ॥ ३१ ॥
अतस्तस्य महत्तां तु शक्ता वर्णयितुं न वै । वेदाः शास्त्रपुराणेतिहासादय इयत्तया ॥ ३२ ॥
ईदृक्तदपि कृष्णस्य धामास्तीशेश्वरस्य हि । महत्त्वं तस्य तु तदा को वा वर्णयितुं क्षमः ३३ ॥
स एव पुरुषद्वारा जगत्सर्गावनाप्ययान् । करोत्यतः सर्वकर्त्ता नियंता चाश्रयः परः ॥ ३४ ॥
किंच लोकेऽन्यसापेक्षं यन्महत्त्वं निगद्यते । तदप्यहं ब्रुवे येन हरेर्ज्ञायेत तत् परम् ॥ ३५ ॥
मध्ये पिपीलिकादीनां सूक्ष्माणामिह देहिनाम् । महत्त्वं दृश्यते नूनं दंशस्य स्थूलदेहिनः ३६॥

महत्त्वं चटकस्याऽथ दंशानामपि मध्यतः । चटकानामथो मध्ये महत्त्वं वायसस्य च ॥ ३७ ॥
महत्त्वमस्ति मेषस्य वायसानां तथांतरे । अश्वस्य मध्ये मेषाणामश्वानां करिणस्तथा ॥ ३८ ॥
करिमध्ये महत्त्वं च लघुशैलस्य दृश्यते । मध्ये लघूनां शैलानां शैलस्य महतोऽपि च ॥३९॥
लोकालोकस्य शैलानां मध्ये च महतामपि । महत्त्वं विश्वदेहस्य वैराजस्य ततोऽस्ति च ॥४०॥
नाभ्यब्जनालमूलस्यानुपलंभात्तु वेधसः । महत्ता विश्वरूपस्य प्रसिद्धा लोकवेदयोः ॥ ४१ ॥
ब्रह्माण्डविग्रहानेककोटिवैराजपूरुषाः । एकैकस्मिन्रोमकूपे वर्त्तंते यस्य चाणुवत् ॥ ४२ ॥
तदक्षरं ब्रह्म ततो महदेवेति कीर्त्तितम् । तद्वैभवं वर्णयितुं सहस्रास्योपि न क्षमः ॥ ४३ ॥
महद्वयोऽप्यस्य महतो दिव्याकारवतोऽपि च । रूपं दृग्विषयो नास्ति सूक्ष्मस्यैवातिसूक्ष्मतः ॥
वैराजस्य विराट्संज्ञं रूपं चातिमहत्त्वतः । यथा दृग्गोचरो नास्ति तथाऽस्याऽतिमहत्त्वतः ॥
संकोचश्च विकाशश्चेत्यवस्थाद्वितयं तु यत् । तदप्यस्य तु नास्त्येकरूपस्यैव हि सर्वदा ॥ ४६ ॥
मायाधिष्ठातृपुरुषपर्यंताः पारमस्य तु । न केपि यांति पुरुषा आकाशस्येव सर्वतः ॥ ४७ ॥
अतोऽरूपमलिंगं च निराकारं तदुच्यते । मूर्त्तं च कृष्णधामत्वान्मुक्ताधारतया च तत् ४८ ॥
तेजोमयं तत् कृष्णस्य सेवकत्वाच्च साकृति । क्वचिद्दिव्यैरवयवैः पाणिपादमुखादिभिः ॥ ४९ ॥
तस्मिन् हि परमे धाम्नि सदा कृष्णो विराजते । स्वसधर्मैरसंख्यातैर्महामुक्तैरुपासितः ॥ ५० ॥

उपासकानां कृष्णस्य तेषामेकांतभावतः । एकैकरोम्णि तेजोस्ति कोटिकोट्यर्कसन्निभम् ॥५१॥
तदा वर्णयितुं शक्यं केन कृष्णांगजं महः । स कृष्णो महसा स्वेनाऽन्वितोस्ति पुरुषादिषु ५२॥
ईदृक्सोऽतिमहांश्चातिसमर्थोऽतिमहान्प्रभुः । क्वचित्कृपावशतया जीवश्रेयो विधित्सति ॥ ५३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ततः स तेजश्चैश्वर्यं स्वस्मिन्संगोप्य चेच्छया। धृतदिव्यनराकारो नरवन्नृषु वर्त्तते ॥ ५४ ॥
ज्वालामालाकुलं रूपं तिरोधाय पुरा यथा। विप्राकृतिरभूद्वह्निस्तथाऽस्ति न्राकृतिर्हरिः ५५ ॥
नराकृतिरपि स्वीयसकलैश्वर्यसंयुतः। हरिरस्तीति यज्ज्ञानं स हि तात्त्विकनिश्चयः ॥ ५६ ॥
ईदृक् स्यान्निश्चयो यस्य हृदि तं तु कदाचन। कालः कर्म च मायाऽपि बद्धुं न प्रभवंति हि ॥
एवं निश्चयिनः पुंसो लक्ष्म वच्मि समासतः। तस्याग्रहः स्याद्भगवद्वाक्यपालन एव हि ॥५८॥
अतित्याग्यप्यसौ साधुः प्रवृत्ते क्वापि कर्मणि। हरिणा प्रेरितः कुर्यात्तदविक्लवचेतसा ॥ ५९ ॥
स्वस्य कश्चिद् दुःस्वभावो यदि स्याद्धर्मरोचकः। तदा तमप्यसौ शीघ्रं जह्यादेवाऽतियत्नतः ॥
कृष्णतद्भक्तसंबंधां क्रियामेव स सर्वदा। कुर्यादिति हि तल्लक्ष्म स न्राकृतिहरेः प्रियः ॥ ६१ ॥
नित्यानंदोऽथ साधुस्तं पप्रच्छ हरिमीश्वर। यदा कृष्णोऽवतरसि त्वं धाम्नः श्रेयसे नृणाम् ॥
तदा पुरुषवैराजादिभावं प्राप्नुवन्निह। क्रमेण जायसे किं वा सहसैव नराकृतिः ॥ ६३ ॥
इति पृष्टः स तं प्रोचे नियमोऽत्र न विद्यते। स्वतंत्रत्वाद्भगवतो यथेच्छमिह जायते ॥ ६४ ॥

इति प्रभोर्वागमृतं स पीत्वा सर्वे च संतस्तदनन्यभक्ताः।
प्रापुर्मुदं भूरितरां सदःस्था यांतं निजावासममुं प्रणेमुः ॥ ६५ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ त्रिषष्टितमस्तरंगः ॥ ६३ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। नवम्यां फाल्गुनस्यांते वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य तदालये। बहिर्वेद्यां पीठवरे न्यषीदत्स सितांशुकः ॥ २ ॥
कंठे बिभ्रत्सूक्ष्ममणिं नवीनां तुलसीस्रजम्। नानादेशागतैर्भक्तैस्त्यागिभिर्गृहिभिर्वृतः ॥ ३ ॥
प्रश्नव्याजेन गुह्यार्थं बोधयंस्तान् दयानिधिः। उवाच किंचित्पृच्छामि युष्मांस्तच्छृणुतादरात् ॥
आत्मा यस्य शरीरं च शरीरं यस्य चाऽक्षरम्। इति श्रुतिभ्यां वपुषी कृष्णस्य द्वे अपीरिते ५॥
शरीरं तत्र विकृतं निर्विकारः शरीरवान्। इत्येवास्ति प्रसिद्धिर्वै लोके वेदे च सर्वतः ॥ ६ ॥
आत्माक्षरे निर्विकारे ह्युपाधिनी त्वमायिके। तयोः कथं शरीरत्वं संभवेद्राधिकापतेः ॥ ७ ॥
वैलक्षण्यं दृश्यते च सर्वथा देहदेहिनोः। कथं तदत्र विज्ञेयमित्यस्य कुरुतोत्तरम् ॥ ८ ॥
इति पृष्टास्तेन संतस्त्वमेवास्योत्तरं कुरु। इत्याहुस्तं तदा स्वामी प्रोवाचाहं करोमि तत् ॥९॥
शरीरता तयोः कृष्णव्याप्याधीनत्वधर्मतः। व्याप्यत्वं परतंत्रत्वं शारीरो धर्म उच्यते ॥१०॥
शरीर्यपेक्षया च स्यादसमर्थं शरीरकम्। साधयेत्सर्वमेवापि शरीरी तु निजेप्सितम् ॥ ११ ॥
मूर्त्तिमान् भगवान् कृष्णः सर्वेषामपि चाऽऽत्मनाम्। तद्व्याप्यदृश्यदेहानामप्यस्त्यात्मतयास्थितः
शास्त्रेष्वपि क्वचिद्यत्र दृश्यरूपः स वर्णितः। भवेद् दृश्यात्मता तत्र ज्ञातव्याऽस्यैव वर्णिताः ॥
देहद्रष्ट्रात्मरूपेण यत्राऽरूपः स वर्णितः। भवेद् द्रष्ट्रात्मात्मतया ज्ञेयस्तत्र तु वर्णितः ॥ १४ ॥
वस्तुतस्तु स भिन्नोऽस्ति दृश्येभ्यः सर्वदेहतः। तद्द्रष्टृभ्योऽप्यरूपेभ्य आत्मभ्यो दिव्यविग्रहः।
सर्वेषां प्रेरकश्चासौ स्वतंत्रोऽस्ति नियामकः। सकलैश्वर्यसंपन्नः सर्वशेषी परात्परः ॥ १६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ईदृशः कृपया यर्हि स कल्याणाय देहिनाम्। जायते त्वाकृतिर्भूमौ नृनाट्यं विदधाति च ॥
तदा तं ये यथापूर्वं निश्चित्योपासते दृढम्। त एव तस्य साधर्म्यमैश्वर्यं चाप्नुवंति हि ॥१८॥
ते ब्रह्मभावापन्नेन स्वात्मनाऽथ निरंतरम्। सप्रेम कृष्णसेवायां वर्त्तंते परमादरात् ॥ १९ ॥
मत्वा ये तु निराकारं तं ध्यायंत उपासते। लीना ब्रह्मसुषुप्तौ ते नोद्गच्छंति पुनः क्वचित् २०॥
ऐश्वर्यं किंचिदपि ते लभंते नैव कृष्णतः। एषा वार्त्ता मया प्रोक्ता स्वेन दृष्टैव न श्रुता २१॥

कृष्णाच्च मत्तो मम भक्तिभाग्भ्यो लभ्याऽस्ति वार्त्ता न परात् किलैषा।
निपीय पीयूषमिवेति वाचं तस्याऽखिलास्ते तुतुषुश्च संतः ॥ २२ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ चतुःषष्टितमस्तरङ्गः ॥ ६४ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। चतुर्दश्यां तपस्यांते वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स्ववेश्मनः। वितर्द्यावुत्तमे पीठे न्यषीदत्स सितांशुकः ॥ २ ॥
निजभक्तैः परिवृतं साधुभिर्गृहिभिस्तथा। स्वयंप्रकाशानंदः पप्रच्छ प्रश्रयानतः ॥ ३ ॥
नाडीसुषुम्णा देहस्य वर्त्ततेंतश्च तद्बहिः। सा कीदृशी कथं चास्ते तत्त्वं योगेश मे वद ॥४॥
इति पृष्टो हरिः साधुं तमुवाच मुने शृणु। पिंडब्रह्मांडयोस्तुल्यं संस्थानं वर्त्तते ध्रुवम् ॥ ५ ॥
ब्रह्मांडे संति ये त्वर्थाः संति पिंडेऽपि तेऽखिलाः। स्थूला एकत्र सूक्ष्माश्चान्यत्रेत्येवाऽस्ति तद्भिदा।
ब्रह्मांडे संति नद्योऽत्र देहे नाड्यस्तथा स्थिताः। तत्राब्धिरत्र कुक्षिश्चेत्येवमादि विभाव्यताम्।
वैराजदेहो ब्रह्मांडं वर्णनं तस्य तत्त्वतः। श्रीमद्भागवतस्याऽस्ति द्वितीयस्कंध आदितः ॥ ८ ॥
अत्रत्येंद्रियनाडीनां वैराजस्येंद्रियैः सह। एकता वर्त्तते तां च वीक्षंते योगवेदिनः ॥ ९ ॥
अंतमाप्नोति जिह्वाया यदा योगी तदा स तु। प्राप्नोति वरुणं देवं वैराजरसनात्मकम् १०॥
एवं वाचो यदा सोंतं याति तर्ह्यग्निदेवताम्। त्वचोंतं च यदा तर्हि वायुमाप्नोति देवताम्।
एवं सर्वत्र विज्ञेयमिंद्रियेषु विचक्षणैः। इडा वामे स्थिता नाडी पिंगला दक्षिणे तथा ॥ १२॥
तयोर्मध्ये सुषुम्णाऽस्ति हृद ऊर्ध्वं विनिःसृता। तस्या अंतं तु मूर्द्धानं यदा प्राप्नोति योगवित्।
तदा वैश्वानरं देवं शिंशुमारस्थमेत्य सः। तेजोमयीं सुषुम्णां च मार्गरूपां समीक्षते ॥ १४ ॥
सा तु दीर्घा ब्रह्मरंध्रान्मायेशपुरुषावधि। अस्तीत्युक्ता सुषुम्णा ते यथांतश्च बहिः स्थिता १५॥
अथ तं परमानंदः पप्रच्छ हरिमानतः। तिसृणां बुद्ध्यवस्थानां समाधौ जायते लयः ॥ १६ ॥
तत्रादौ कतमा लीना भवतीत्यस्य मे प्रभो। वक्तुमर्हसि प्रश्नस्योत्तरं तं हरिरब्रवीत् ॥१७॥
स्नेहातिशयतो यस्य कृष्णे जाग्रति जायते। समाधिर्लीयते तस्य पूर्वं जाग्रत्ततोऽपरे ॥ १८ ॥
कृष्णं हृदा चिंतयतः समाधिर्यस्य जायते। प्राक्स्वप्नं लीयते तस्य ततो जाग्रच्च सुप्तिका १९॥
यदोपशमवान् याति समाधिं कृष्णचिंतनात्। तदाऽस्य लीयते सुप्तिरादावन्ये उभे ततः २०॥
इति प्रश्नोत्तरं श्रुत्वा साधुः स मुदितोभवत्। स्वयंप्रकाशानंदस्तं ततोऽपृच्छत्पुनः प्रभुम् ॥
ज्ञानशक्तिः क्रियाशक्तिरिच्छाशक्तिस्तथा त्वयि। वर्त्तंते ताः कथं ज्ञेया इति पृष्टो जगाद सः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जीवा एते तु यत् सत्त्वप्रधानं कर्म चक्रिरे । स्थानं तत्फलभोगस्य तेऽवस्थां याति जाग्रतम् ॥
रजःप्रधानं यत्कर्म प्राग्जीवाश्चक्रुरस्य तु । फलोपभोगस्थानं ते स्वप्नावस्थां प्रयांति हि ।२४।
तमःप्रधानमेते तु प्राग्यत्कर्म स्म कुर्वते । ते सुषुप्तिं तत्फलोपभोगस्थानं व्रजंति वै ॥ २५ ॥
स्वापं यांति यदा ते हि भवंत्यश्मोपमास्तदा । स्वं न जानंति सर्वेपि मूर्खा वा पंडिता अपि ।
स्ववर्णं स्वाश्रमं स्वार्थं स्वरूपं स्वाभिधां तथा । स्ववयः स्वक्रियादीनि नैव जानंति ते खलु ॥
तदा तान्बोधयित्वैव ज्ञानशक्त्या तदीयकम् । सर्वं बोधयति द्रष्टृरूपो हि भगवान्स्वयम् २८
एवं प्रभौ ज्ञानशक्तिः स्थिताऽस्तीत्यवगम्यताम् । क्रियाः कारयते सर्वान् क्रियाशक्तिश्च तत्स्थिता
इच्छाशक्तिः प्रभुस्था या सेच्छां कारयतेऽखिलान् । ब्रह्मांडानां च सर्गादि मुहुर्भवति वै तया
एकस्यां वर्त्तमानानामवस्थायां तथाऽऽत्मनाम् । अवस्थांतरयानं यत्तदप्यस्ति तयैव हि ॥३१॥
नहि कर्मवशा जीवा भोग्यावस्थां स्वसंश्रिताम् । हित्वा निजेच्छया यातुमन्यावस्थां क्षमा क्वचित् ।
फलप्रदाता सर्वेषां कर्मणामस्ति हीश्वरः । अतस्तदिच्छयैवैते भुंजते कर्मजं फलम् ॥ ३३ ॥
एतास्तु शक्तयो नॄणां गुणकर्मानुसारतः । ज्ञानादीन्प्रेरयंतीति वैषम्यं न जगत्पतेः ॥ ३४ ॥

एवं हि शक्तित्रयवर्त्तनस्य रीतिर्मयोक्तेति वचः सुधाभम् ।
निपीय तस्याऽऽप मुदं स साधुरन्ये च संतो गृहिणश्च तत्र ॥ ३५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ पञ्चषष्टितमस्तरंगः ।। ६५ ।।

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । अमायां फाल्गुनस्यांते वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य तदालये । प्राग्द्वारे स बहिर्वेद्यां न्यषीदन्मंच आसने ॥ २ ॥
सितांशुको नैकदेश्यभक्तसंघैः परिश्रितः । उवाच साधून्स्वाग्रस्थान् स्वयमेव हितोद्यतः ॥३॥
श्रीमद्भागवते वासुदेवादेरस्ति वर्णनम् । चतुर्व्यूहस्य तज्ज्ञानरीतिं वच्मि समासतः ॥ ४ ॥
निर्गुणं वर्णनं क्वापि क्वाप्यस्ति सगुणं च तत् । तत्राद्यं वासुदेवस्य सर्वोपास्यस्य वर्त्तते ॥ ५ ॥
अन्यत्संकर्षणादीनां त्रयाणामस्ति निश्चितम् । तत्र भ्राम्यति धीः श्रोतृवक्तॄणां निर्गुणे पदे ॥६॥
आकारो वासुदेवस्य नास्तीत्येवाऽवयंति ये । भ्रांता इति विज्ञेया अनुपासितसात्वताः ॥ ७ ॥
तेषामेव हि दुर्बोधाः शब्दाः शास्त्रेषु संति हि । निर्गुणव्यापकाऽरूपज्योतीरूपाऽक्रियादयः ॥८॥
भक्ता एकांतिका एव हरेर्मुह्यंति नाऽत्र हि । सदुपासनया तेषां शब्दयाथार्थ्यनिश्चयात् ॥९॥
मायागुणैर्विहीनत्वान्निर्गुणः परमेश्वरः । निजधामस्थ एवाऽसौ सर्वत्र व्यापकोऽस्ति च ॥१०॥

मूर्त्तः सूर्यः स्वतेजोभिर्जगद् व्याप्याऽस्ति तत्पृथक् ।
यथा तथा सोपि मूर्त्तः कांत्या व्याप्याऽस्ति तत्पृथक् ॥ ११ ॥

सदा दिव्याकृतेरस्य रूपं स्वपरिणामि यत् । अतोऽरूप इति प्रोक्तो निराकारश्च स क्वचित् ॥
कोटिकोट्यर्कवत्स्वांगतेजोव्याप्ततया स च । ज्योतीरूप इति प्रोक्तो दुर्लक्ष्यावयवत्वतः ।१३॥
निराधारं यतस्तेजो नैव कुत्रापि दृश्यते । अतस्तदंगाधारं तत्तेजो ब्रह्मेति कथ्यते ॥ १४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अलिप्तत्वात्कर्मभिश्च देवासुरनरादिवत् । अक्रियः कथितः शास्त्रे सर्वकर्त्तापि स प्रभुः ॥१५॥
एवं ह्येकांतिका भक्ताः सप्रमाणमवेत्य तम् । सदा दिव्यनराकारं भजंतेऽनन्यभक्तितः ॥१६॥
दिव्यविग्रह एवाऽस्ति हरिस्तत्संगतस्ततः । दिव्यतां यांति बहवः प्राकृता अपि देहिनः ॥१७॥
द्विजपुत्राहृतौ कृष्णः सार्ज्जुनः प्राकृतं रथम् । प्राकृतैर्वाजिभिर्युक्तमारुह्याऽगाच्च वारुणीम् १८
स द्वीपान् सप्तसप्ताऽब्धीन् लोकालोकं व्यतीत्य च । मायारूपं तमश्छित्त्वा ब्रह्मतेजोऽगमत्परम्
तत्र भूम्नो भगवतो द्विजपुत्रान् समानयत् । रथाश्वादि तदा सर्वं वस्त्वाऽऽपद्दिव्यरूपताम् ॥
प्राकृतं प्रकृतौ वस्तु न लीयेताऽन्यथा कथम् । कथं वा प्राकृतस्य स्याद् ब्रह्मणः प्राप्तिरंजसा २१
अतो नराकृतिरपि कृष्णोऽस्त्येवाऽक्षरात्परः । अमायिकाकृतिर्दिव्यरूप इत्यस्ति सन्मतम् २२॥
भ्रांतास्त्वन्ये निराकारं ब्रह्मेत्येव विदुस्ततः । संसरंति निरालंबास्ते तद्ग्राह्यं सतां मतम् २३

एकांतिकास्ते हि भवंति भक्ता ये साकृति ब्रह्म दृढं विदंति ।
इति प्रभोस्तस्य वचो निशम्य सर्वेपि संतस्तुतुषुः सुधाभम् ॥ २४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षट्षष्टितमस्तरंगः ॥ ६६ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । चैत्रस्य शुक्लसप्तम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य सदाश्रमे । वाम्रासने साधुकृते न्यषीदत्स सितांबरः ॥ २ ॥
सद्भिश्च गृहिभिर्भक्तैर्वृतः स स्वयमब्रवीत् । साधवः श्रृणुताऽहं वः सर्वान्पृच्छामि किंचन ।३।
कश्चिदस्ति पुमानेको विरक्तश्चैहिके सुखे । श्रीकृष्णसेवासौख्येच्छुः स्वधर्मज्ञानभक्तिमान् ॥४॥
यत्किंचित्कर्म कुर्यात्तद्भगवत्प्रीतिहेतुकम् । स्ववृत्तितुल्यवृत्तीच्छुः स्वसंगिपुरुषस्य च ॥ ५ ॥
गुणास्तस्याऽत्र मोक्षेच्छा वायायुः पुंसि कीदृशे । नैवायायुः कीदृशे च तन्मे वदत सत्तमाः ॥
उवाच मुक्तानंदस्तं भगवंस्तद्गुणेच्छुना । मुमुक्षुणा तु सुरवन्मान्योऽसौ गुणमंडितः ॥ ७ ॥
तद्वाक्यानि च मान्यानि सत्यान्येवेति सर्वदा । वृत्त्यं तथैव निश्छद्म संनियम्येंद्रियाणि च ।८।
मुमुक्षौ चेदृशे नूनमायायुस्तस्य ते गुणाः । इत्युत्तरं मया स्वामिन्दत्तं तुभ्यं यथामति ॥ ९ ॥
तमुवाच पुनः स्वामी युक्तं दत्तं त्वयोत्तरम् । न्यूनमत्रास्ति यत्तत्तु मुने तुभ्यमहं ब्रुवे ॥१०॥
तादृग्गुणं नरं दृष्ट्वा बोध्यमित्थं निजांतरे । अयं महान् हि पुरुषो भक्तः सर्वात्मना हरेः ११
सहस्रशो जना एनं मन्यंते पूजयंति च । तथाप्यविक्रियः किंचित्सुखं नेच्छति दैहिकम् १२
अहं तु पामरः सौख्यमिच्छाम्यैहिकमल्पकम् । लक्ष्म किंचिच्च भगवद्भक्तस्य मयि नास्ति हि ॥
एवं यस्तद्गुणानेव गृह्णीयात्स्वागुणांस्तथा । शनैः शनैर्गुणास्तस्मिन् साधोरायांति सर्वशः ॥
यस्तु साधोर्गुणान् हित्वा शोभनानन्यदुर्लभान् । कल्पयेद्गुणांस्तस्मिंल्लौकिके पुरुषे यथा १५॥
भोक्तुं पातुं च वसनं परिधातुं च भाषितुम् । महानपि न वेत्त्येष विवेकं लौकिकं स्विति ॥
तस्मिंस्तु पुरुषे क्वापि भक्ते वेदांतगेऽपि च । कालेन महताऽप्येव नायात्येकोपि सद्गुणः ।१७।

निपीय वाक्यामृतमित्युदारं धर्मात्मजस्याप मुदं स साधुः ।
अन्ये च सर्वेपि सदोनिषण्णाः संतो गृहस्थाश्च तदीयभक्ताः ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ सप्तषष्टितमस्तरङ्गः ॥ ६७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । नवम्यां चैत्रिकस्याद्ये वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य महीभुजः । स न्यषीदत्पीठवरे वेद्यां धृतसितांशुकः ॥ २ ॥
भक्तव्रजैः परिवृतः स पुरस्थान्सतोऽब्रवीत् । किंचित्पृच्छाम्यहं संतः साधून्वो भगवत्प्रियान् ।
ततोऽनुमोदितः सद्भिस्तान् पप्रच्छ स सद्गुरुः । कृष्णार्चा कृष्णवन्मान्येत्येवं घंटापथोऽस्ति हि
दुर्भिक्षकाले प्रागत्र समाधिर्मासमास मे । तत्राऽहमगमं नित्यं पुरुषोत्तमपत्तनम् ॥ ५ ॥
तत्र काष्ठमयीं मूर्त्तिं प्रविश्याऽऽसं रमापतेः । तद्द्वारेण च तत्रत्यभक्तहार्दं समाविदम् ॥६॥
समाधिनिष्ठा अत्राऽपि संति वर्त्मनि भूरिशः । येऽन्यदेहं प्रविश्यैव विद्युस्तद्धार्दमंजसा ॥७॥
योगींद्रोपि शुकस्तातं द्रुमानाविश्य चाब्रवीत् । एवमस्ति प्रसिद्धिर्हि लौकिकी वैदिकी तथा ८
कृष्णो महांतः संतश्च प्राप्तयोगमहोदयाः । इच्छा स्वस्य भवेद्यत्र तत्र कुर्युः प्रवेशनम् ॥ ९ ॥
अतः कृष्णः स्वयं दत्ते स्वार्चां भक्तजनाय याम् । तस्यां निजेच्छया साक्षात्प्रविश्यैव विराजते
अतः साक्षाद्भगवतो मर्यादा पाल्यते यथा । तथैव पालनीयाऽत्र तस्या अपि च पूजकैः ११
सतां च हृदये साक्षाद्धरिराविश्य वर्त्तते । तेषामपि ततः पाल्या मर्यादा तादृशी सदा ।१२।
एवं सत्यपि यो भक्तस्तस्यास्तेषां च कृष्णवत् । मर्यादां पालयेन्नैव यथेष्टाचरणे रतः ॥ १३ ॥
मन्येत कृष्णदत्तार्चां चित्रधात्वश्मरूपिणीम् । एकांतिकानपि सतो मन्येताऽन्यनरानिव १४
सदा स्वार्चास्वनन्येषु भक्तेषु च वसाम्यहम् । इति कृष्णस्यापि वचो वदेत्तत्स्तावकं तथा १५
तस्य भक्तस्य हृदये साक्षात्कृष्णस्य निश्चयः । वर्त्तते नास्ति वेत्येष प्रश्नो ब्रूत तदुत्तरम् ॥१६॥
इति पृष्टास्तेन संतस्तमूचुस्तस्य चेतसि । निश्चयो नास्ति कृष्णस्य साक्षात्तव नराकृतेः ॥ १७ ॥
हरिरूचेऽथ कल्याणं भविष्यत्यस्य वा नहि । संतस्तमूचुर्नैवेति ततो हरिरुवाच तान् ॥ १८ ॥
तस्मिन् दौर्मत्यमेतावदेवास्तीति न किंतु सः । यमिष्टदेवं भजते स्यात्तस्मिन्नप्यनीशधीः ॥१९॥
तस्य नास्तिकधीश्च स्यादक्षरादिषु धामसु । विद्याद्विश्वभवादींश्च स मायाकालकर्मजान् ॥२०॥
एवं स नास्तिको भावीत्युक्तवंतं हरिं मुनिः । मुक्तानन्दाभिधोऽपृच्छन्नत्वा तत्पुरतः स्थितः ॥
ईदृग्नास्तिकता तस्मिन्प्राक्तनेन कुकर्मणा । जायेत वा नास्तिकानां संगेनाऽत्र कुकर्मणाम् ॥२२॥
हरिः प्रोवाच तं सा तु भवेन्नास्तिकसंगतः । नास्तिकग्रन्थरुच्याऽथ नास्तिकग्रन्थसंश्रुतेः ॥२३॥
कामलोभक्रोधमानाहंकारेर्ष्याश्च मत्सरः । हृद्येतेषामेकतमोद्भवेऽपि प्रभवेद्धि सा ॥ २४ ॥
कामाद्यन्यतमे दोषे स्थिते वार्त्ता हरेर्हृदि । नारदादिसमोक्तापि नायायान्मंतुमंजसा ॥ २५ ॥
यस्तु श्रीमद्भागवतमुख्यान् ग्रंथानिहास्तिकान् । शृणुयात्कृष्णभक्तानामेव कुर्याच्च संगमम् २६॥
यः कृष्णमेव कर्त्तारं विद्यात्सर्वस्य तत्त्वतः । माहात्म्यं चास्य जानीयात्स स्यादास्तिकधीर्दृढम् ॥

धर्मात्मजस्येति निशम्य वाचं सुधायमानां स मुनिर्जहर्ष ।
सदःस्थिता भक्तजनाश्च सर्वे प्रपेदिरे चेतसि भूरितोषम् ॥ २८ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ अष्टषष्टितमस्तरंगः ॥ ६८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। चैत्रस्य शुक्लद्वादश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः। स न्यषीदत्पीठवरे प्रत्यग्द्वारगृहांगणे ॥ २ ॥
सितांबरं भक्तसंघवृतं तं सर्वसन्मतात्। मुक्तानंदः पुरो नत्वा पप्रच्छ प्रांजलिः प्रभुम् ॥३॥
शास्त्रेषु द्विविधो धर्मो दृश्यते श्रूयतेऽपि च। हिंसायुक्तस्तथाऽहिंस इति शिष्टैः प्रमाणितः ४॥
कस्तत्र भवति श्रेयानिति पृष्टोऽब्रवीत्प्रभुः। अहिंसः परमो धर्म इति श्रेयस्करः स हि ॥ ५ ॥
अधिकार्यनुसारेण देशकालौ विचिंत्य च। धर्मो द्वेधा निगदितस्तत्रापि बलवान् परः ॥ ६ ॥
मांसप्रियाणां क्षत्राणां हिंसा प्राप्तास्ति रागतः। तत्संकोचाय निगमे यज्ञ एवोदिताऽस्ति सा ॥
रजस्तमःस्वभावस्य त्रिवर्गनिरतस्य च। क्षत्रियस्यैवाधिकारो हिंस्रयज्ञेऽस्ति वैदिके ॥ ८ ॥
क्षत्रस्य सत्त्ववृत्तेस्तु मुमुक्षोः सदयस्य च। तत्राधिकारो नास्त्येव किंत्वहिंसमखेऽस्ति सः ९ ॥
सात्त्विकानां तु सर्वेषां मुमुक्षूणां विशेषतः। तथैव ब्राह्मणानां च धर्मोऽहिंसः सदोदितः १०॥
राजा वसुः क्षत्रियोपि पुरा यज्ञमहिंसनम्। आचचारोपरिचरस्ततः ख्यातो बभूव ह ॥ ११ ॥
एवमन्येपि बहवः क्षत्रिया अपि सद्धियः। श्रेयस्कामा विदधिरे मखान् हिंसाविवर्जितान् १२॥
अहिंस एव धर्मोऽतो निःश्रेयसकरो नृणाम्। अन्यस्तु सन्मतो नैव साधुस्तं सर्वथा त्यजेत् ॥
यत्तु कायेन वाचा वा मनसापि च सर्वथा। परहिंसानाचरणं साधोर्मुख्यो वृषः स हि १४ ॥
क्रोधाहंकारमानाद्या दोषा ये च पुरोदिताः। विवर्ज्यास्तेपि यत्नेन स्थेयं शांततया सता १५॥
सहस्रशो यद्यपि स्युः शिष्याः स्वस्य तथापि ते। स्वसाधुतामहित्वैव धर्मे स्थाप्या नचाऽन्यथा ॥

निःशेषदोषरहितो हरिपादनिष्ठः शांतस्वभाव इह दुर्लभ एव साधुः।
पीत्वा हरेरिति वचोमृतमस्युदारं साधुः ससभ्यपुरुषैः सह तोषमापत् ॥ १७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावेकोनसप्ततितमस्तरंगः ॥ ६९ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। पौर्णमास्यां चैत्रशुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमाख्यस्य वेश्मनः। प्राङ्मुखस्य बहिर्वेद्यां मंचाग्रे स उपाविशत् ॥ २ ॥
मुनिभिर्नैकदेशीयैर्भक्तसंघैः परिश्रितः। सितवासा दक्षकरे वृंदाकाष्ठस्रजं दधत् ॥ ३ ॥
भक्तानूचे स वः कश्चित्संशयो यदि तर्हि तम्। पृच्छतैतान्सतः संतो महांतश्च परस्परम् ॥४॥
तदा काकुभयो राजा नित्यानंदं स्म पृच्छति। द्वावन्योन्यविरुद्धोक्ती कौचित्तो हृदये निजे ५॥
तत्रैको विषयान् ग्राम्यान् भुंजीयेति वदत्यथ। द्वितीयो नेति च ब्रूते तौ बुभुत्सामि तत्त्वतः ॥
उवाच नित्यानंदस्तं तत्राद्यस्तु निजं मनः। द्वितीयो जीव इत्युक्ते श्रीस्वामी स्वयमब्रवीत् ॥७॥
प्रश्नस्याऽस्योत्तरमहं वच्मि त्वं शृणु भूपते। विषयप्रेरिका ज्ञेया लौकिकोक्तिजवासना ॥ ८ ॥
सदुक्तिजा वासना तु वर्त्तते तन्निवर्त्तिका। स्वसुहृद्बोधनादादौ पुमान् बुध्यति लौकिकम् ९॥
अयं पिता ते मातेयमयं भ्राता स्वसा त्वियम्। पितृव्योऽयं मातुलोऽयमियं ते महिषी च गौः।
इदं गृहं तवाऽश्वोयमिदं वस्त्रमिदं धनम्। इत्यादि बहुधा बाल्ये सुहृद्भिर्बोध्यतेऽर्भकः ११॥
लौकिकैस्तैर्लौकिकार्थान्बोधितो लौकिकः पुमान्। तद्वासनावासितहृत्सदा व्यवहरंश्च तैः १२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देहेऽहंतां च ममतां दैहिके विदधच्च सः । अतिक्रामति बाल्याद्या देहावस्थाः क्रमेण वै १३ ॥
स प्राप्नोति सतां संगं यदा कल्याणकारिणाम् । तदा तु तेषां वाक्यानि सुधीर्धारयते हृदि ।
नायं पिता न मातेयं न गृहं न धनं तव । नित्यसिद्धश्च चिद्रूपस्त्वं तु दासोऽसि वै हरेः ॥
बंधः स्याद्विषयासक्त्या मोक्षो विषयवर्जनात् । दुःखरूपेऽत्र संसारे सुखं कृष्णाश्रयाद्भवेत् ॥
इत्याद्या बह्वस्तेषां शब्दास्तद्धृदये मुहुः । प्रविशंत्यथ तैस्तस्य जायते वासितं हि हृत् ॥१७॥
एवं हि द्विविधाः शब्दास्तद्वक्तारश्च तद्धृदि । प्रविष्टाः संति तेऽन्योन्यं भवंत्येव विरोधिनः १८॥
कुरुपांडवसैन्यानि कुरुक्षेत्रे यथा पुरा । युक्तान्यभूवन् वैरीणि तथा तेऽन्योन्यवैरिणः ॥१९॥
सैनिकानां यथा युद्धं तेषां शस्त्रैरभून्महत् । तथा सदसतां शब्दैर्जायतेऽत्र परस्परम् ॥२०॥
येषां भवेद् बलोद्रेकः साहाय्यं च महीयसः । आपद्यपि तथा धैर्यं युद्धे तेषां जयो भवेत् २१॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥२२॥
एवं हि भगवद्गीतावचनं वर्त्तते ततः । भविता विजयो नूनं साधूनामेव सर्वथा ॥ २३ ॥
कृष्णो हि साधुहृदये सर्वदा वर्त्तते ततः । हृत्स्थास्ते बलिनः संतीत्येवं निश्चिनु भूपते ॥२४॥
इत्युक्तः स नृपो भूयस्तं पप्रच्छ जगद्गुरुम् । कथं बलं सतामेव हृत्स्थानां वृद्धिमाप्नुयात् ॥
असतां लौकिकानां तु ह्रासमीयाच्च तद्वद । इति पृष्टो हरिस्तेन प्रोवाच शृणु मे वचः ॥२६॥
ये त्वंतःकरणे संति संतोऽसंतश्च देहिनः । बहिश्च ये तेऽप्युभये न भिन्ना एक एव हि ॥ २७॥
बाह्यानां पोषणादेव भवेदांतरपोषणम् । यथा बिंबार्चनेनैव प्रतिबिंबार्चनं तथा ॥ २८ ॥
पुष्टानां बलवृद्धिः स्यादपुष्टानां बलक्षयः । अतः संतः पोषणीया न पोष्टव्या ह्यसाधवः ॥२९॥
यथा यथा प्रसन्नाः स्युः संतः कार्यं तथा तथा । पोषणं ह्येतदेवोक्तं तेषामित्यवगच्छ भोः ३०॥
इत्युक्तो हरिणा भूपः स भूयस्तं स्म पृच्छति । बलवृद्धिः सतामेव जाता यस्य भवेद्धृदि ३१॥
पराजयोऽसतां च स्यात्तस्य पुंसो वपुःक्षये । संप्राप्तिर्भवतो धाम्नो विद्यते नात्र संशयः ॥३२॥
युद्ध एवोभयेषां तु वर्त्तमाने पतेद्वपुः । यस्य तस्य भवेत्पुंसो गतिः का वेति मे वद ॥ ३३ ॥
तमुवाच हरिर्योऽत्र योद्धाऽतिबलिभिर्नृभिः । तीक्ष्णशस्त्रैश्च युद्ध्येत जयः स्यात्तस्य वाऽजयः ।
असंतो येऽस्य हृत्स्थास्ते नाऽशस्त्रवणिजां समाः । किंत्वार्बुदैः कोलिकैर्वा धानुष्कैः संति सन्निभाः
तैर्युद्धादनिवृत्तो यो युध्यमानो मृतोपि वा । जितमेव हि तं तस्य स्वामी स्वहृदि मन्यते ३६॥
धन्योऽयं बलिभिः साकं युद्धयते मत्प्रियेहया । पराङ्मुखो न भवतीत्येवं वेत्ति हि तत्पतिः ।
असद्भिर्युध्यमानेन चिंता कार्या न वै ततः । जितमेवेति मंतव्यं योद्धव्यं तैश्च सर्वदा ॥३८॥
इति प्रश्नोत्तरं श्रुत्वा हृष्टोऽभूत्स नराधिपः । जीवाख्यो भूमिपोऽथैतन्नित्यानंदं स पृच्छति ॥
नराकृतेर्हरेरस्य कथं स्यान्निश्चयो दृढः । इति पृष्टः स साधुस्तं प्रोवाच शृणु सन्मते ॥४०॥
कुसंगात्स्यात् परावृत्त्या सतामेव प्रसंगतः । सद्वाक्यावधृतेश्चास्य कृष्णस्य दृढनिश्चयः ॥ ४१॥
एवं वदति साधौ तं प्रत्युवाच हरिः स्वयम् । स्वस्य निःश्रेयसायैव कार्यः कृष्णस्य निश्चयः ॥
न दैहिकाय सौख्याय पुत्रवित्ताप्तये न च । नच राज्यादिहेतोर्वा कर्त्तव्यः स मनीषिणा ४३॥
काम्यो हि कृष्णसंबंधः संसिद्धौ कामितस्य तु । असिद्धौ वापि लीयेत न त्वसौ मुक्तिसाधनम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

केचित्तु सुधियः स्वस्य कामासिद्धौ स्वनिश्चयम् । हर्षेण सुदृढीकृत्य भजंते हरिमंजसा ॥४५॥
कामासिद्धौ त्वीशमतिर्जाताऽपि वचनात्स्ततः । नश्येदेव ततो धीमान् निर्निमित्तं श्रयेद्धरिम्
ननु कृष्णोऽस्ति भगवांस्तं कामेन भजेत्तु यः । कथं न तस्य संसिद्धिं कामो यायान्नरस्य भोः ।
इति चेच्छृणु कृष्णो हि सर्वकर्त्ताऽत्यधीश्वरः । तेनैव कर्ममर्यादा बद्धाः संति शरीरिणाम् ।
प्रारब्धकर्मानुसृतं फलं स ह्यंतरे स्थितः । ददाति सर्वजीवेभ्यः समवृत्तिरधीश्वरः ॥ ४९ ॥
ईश्वरत्वादतिक्रामेत्स ता यदि तदा त्विदम् । जगत्सर्वममर्यादं पश्येन्नाक्रामतीति ताः ॥५०॥
ननु तर्हि हरिं साक्षादीश्वरं भजतोऽत्र नुः । अनीश्वरं च भजतः को विशेषो नृपादिकम् ॥
इति चेच्छृणु कृष्णोऽस्ति स्वतंत्रः परमेश्वरः । स्वेच्छया जगतः स्थित्यै यथावत्ताः स रक्षति ॥
तत्रापि भूरिदुष्कर्मा स्वं भजेद्यदि तर्हि तु । तद्दुष्कर्माणि कृपया संकोचयति स प्रभुः ५३॥
कुर्याच्छूलव्यथां भोग्यां भक्तस्य कंटकव्यथाम् । आढ्यस्य भोग्यं दारिद्र्यं कुर्यादल्पधनं स च ।
एवं भोग्यं महद् दुःखं कुर्यात्स कृपयाऽल्पकम् । तत्तु कश्चिद्विजानीयात्सुधीरेव पुमानिह ॥
अन्यस्तु तस्योपकृतिमगृह्णन् प्रत्युताऽगुणान् । वदन्ननीशं तं मत्वा जहात्येव तदाश्रयम् ॥५६॥
एवं मत्वा प्रभुं भूरि व्ययितं द्रविणं मया । सतामपि कृता सेवा सद्भोज्यवसनादिभिः ॥५७॥
तथाप्यनेन न हृतः शिरोरोगोऽल्पकोपि मे । ममोपकारो न ज्ञात एषोऽग्रे किं विधास्यति ५८॥
इत्यादीनि बहून्येव स वदेन्मायिकार्थधीः । अव्यवस्थितवाक्यानि ततः प्राकृततां व्रजेत् ॥५९॥
एवं स्वकामनासिद्ध्यै कुर्वतः कृष्णसंश्रयम् । गतिरस्ति श्रेयसेऽतः श्रयणीयः स केवलम् ६०॥

इत्थं सुधासन्निभमीशवाक्यं निशम्य भक्तः स च तत्सदःस्थाः ।
संतो गृहस्थाश्च जनाः प्रहर्षं संप्राप्य चक्रुः प्रभवे नमश्च ॥ ६१ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ सप्ततितमस्तरंगः ॥ ७० ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । चैत्रासितचतुर्थ्यां च वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्यैव वेश्मनः । प्रत्यग्द्वारस्य वेद्यां स न्यषीदन्मंच उत्तमे ॥ २ ॥
सितसर्वांबरो नैकदेशायातनिजाश्रितैः । वृतः सद्भिश्च गृहिभिः शृण्वन् सत्कृतगायनम् ॥३॥
कृष्णपद्यश्रुतिप्रीतः स उवाच स्वयं निजान् । कस्यचित् संशयः कश्चिद्यदि स्यात्तर्हि पृच्छतु ४॥
सोमवर्माऽथ पप्रच्छ तं प्रणम्य कृतांजलिः । अपराधा देहिभिस्ते क्रियंते बहवो हरेः ॥ ५ ॥
त्वं तु तान् भक्तवात्सल्याक्षमसे करुणानिधिः । तत्रापि कश्चिदक्षम्यो मंतुरस्ति त्वया न वा ॥
इति पृष्टः स ऊचे तं मंतून्भक्तस्य सपतिः । क्षमते निजभक्तस्य द्रोहमेकं विनाऽखिलान् ॥७॥
अतोऽल्पस्यापि भक्तस्य हरेः कार्यो न सर्वथा । अपराधस्तं भजताऽन्यथा स्यात्संसृतिभ्रमः ८॥
किंच सर्वापराधेषु कृष्णस्याकारखंडनम् । महापराधो विज्ञेयः स कार्यः सर्वथा न वै ॥ ९ ॥
निजेऽक्षरे परे धाम्नि कोटिसूर्यादिभास्वरे । सदा दिव्याकृतिः कृष्णो भगवान् पुरुषोत्तमः ॥
मुक्तैर्विराजते दिव्यब्रह्मरूपैर्निषेवितः । स एव कृपया भूमौ जायतेऽत्र नराकृतिः ॥ ११ ॥
ब्रह्मरूपो हि तद्देहो दृश्यंते भौतिको यथा । न त्वसौ भौतिकः किंतु दिव्य इत्यवधार्यताम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतुर्विंशतितत्त्वानि देहावस्थात्रिके तथा । कृष्णांग एतत्सर्वं तु दृश्यमानं बृहद् ध्रुवम् ॥१३॥
इत्युक्त्वा ब्रह्मसाकारनिराकारत्ववादिनी । लक्ष्यीकृत्य मते साधून् सोऽपृच्छन्महतः प्रभुः १४॥
संतः पृच्छामि वः किंचित्तच्छ्रुत्वा कुरुतोत्तरम् । रामानुजः शंकरश्च महाचार्यावुभौ श्रुतौ ।
परस्परविरुद्धेस्तस्तयोरिह मते उभे । ब्रह्म साकारमित्येकमन्यद्ब्रह्म निराकृति ॥ १६ ॥
कतरत्तत्र युष्माकं हृदयेऽभिमतं सताम् । इति पृष्टास्तमाहुस्ते यथाशास्त्रं सुनिश्चितम् ॥१७॥
साकारं यत्र कृष्णाख्यं ब्रह्मोक्तं तत्प्रियं हि नः । आकृतेस्तस्य ते लब्ध्या परं निःश्रेयसं भवेत् ।
इत्युक्ते तैः प्रहृष्टोऽसौ तानुवाच पुनः प्रभुः । प्रियं यदस्ति युष्माकं तदेवास्ति प्रियं मम १९॥
तस्याऽऽप्तिरिह सर्वेषां भक्तानामद्य वर्त्तते । तस्मात्परं तु नैवास्ति ज्ञेयं प्राप्यं च किंचन ॥२०॥
तथापि तस्य गोलोकमुख्यधाम्नां ससंपदाम् । दिदृक्षा यस्य वर्त्तेत तेजस्वित्वस्य च प्रभोः ॥
ईदृशस्येह भक्तस्य भगवन्निश्चयो हरौ । आकृतावस्ति वा नेति पृच्छामि वदतोत्तरम् ॥ २२ ॥
संतस्तदोचुर्नास्त्येव निश्चयोऽस्य हरेस्तव । यदसावितरत्कृष्णाद्वस्तु त्वत्तो दिदृक्षते ॥ २३ ॥
हरिस्तानाह कोऽस्त्यत्र दोषोऽस्य यदसौ पुमान् । कृष्णस्यैव हि धामादि दिदृक्षति न चेतरत् ॥
यो भवत्सेवको यस्य चेत्तस्यैव वै भवम् । दिदृक्षेदत्र का हानिः प्रत्युतासौ गुणो मतः २५ ॥
इति पृष्टास्तेन संतस्तमूचुः सर्वविद्भवान् । करोत्वस्योत्तरमिति तदा तान् हरिरब्रवीत् ॥२६॥
भक्तस्य कृष्णधामादि दिदृक्षा तूचितैव हि । किंतु यत्र विधेया सा तत्र नास्तीत्यऽयोग्यता ॥
साक्षात्कृष्णो नराकारो वर्त्तते यत्र भूतले । तत्रैव तस्य धामादि सर्वं भवति वैभवम् २८ ॥
यदा प्रादुर्भवत्यत्र कृपया श्रेयसे नृणाम् । तदा सह स्वधाम्ना च परिवारेण जायते ॥ २९ ॥
स्वस्य आकृतिताधाम्नो भौमत्वं च नरादिता । पार्षदानामिति ज्ञेया तस्य मायैव मोहनी ॥
नृत्वदिव्यत्वयोर्भेदस्तेषां नास्त्येव सर्वथा । यत्तानेव समाधिस्था दिव्यरूपान्विचक्षते ॥ ३१ ॥
अतो यत्र भवेत्कृष्णस्तस्य तत्रैव सर्वशः । पार्षदाः शक्तयो धाम संतीत्येवाऽवगम्यताम् ३२ ॥
तस्मै भगवते दत्तमन्नवस्त्रधनादि यत् । तत्स गृह्णाति कृपया प्रीत्या भक्तहिताय वै ॥ ३३ ॥
तत्स्वीकृतं च तत्सर्वं दिव्यतामुपयाति तत् । तद्धाम्नि लभते दाता दिव्यदेहमवाप्य च ३४॥

पीयूषकल्पामिति तस्य वाचं निशम्य ते साधुजनाः सदःस्थाः ।
भक्ता गृहस्थाः सकलाश्च लब्ध्वा तोषं महांतं प्रणमंति तं स्म ॥ ३५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकसप्ततितमस्तरंगः ॥ ७१ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । एकादश्यां मधोः कृष्णे वचोमृतमिदं हरेः ॥ १ ॥
यत्र दुर्गपुरे दुर्गे उत्तमस्य महीभुजः । सौम्यास्यवेश्मनो वेद्यां न्यषीदत्स वरासने ॥ २ ॥
प्राङ्मुखं श्वेतवसनं नानाभक्तगणावृतम् । मुक्तानंदः पुरस्थस्तं प्रोवाच प्रणतः प्रभुम् ॥ ३ ॥
स्वामिंस्त्वया गतदिने राज्ञोऽग्रेऽतिहितावहा । वार्त्ता कृतेत्यश्शृणुम शुश्रूषामो वयं च ताम् ॥
तं प्रत्युवाच भगवान् सर्वे शृण्वंतु साधवः । कृष्णतद्भक्तमाहात्म्यं सम्यग्वेद्यं मनीषिणा ५ ॥
भगवन्निश्चयो यस्य माहात्म्यज्ञानयुग्भवेत् । विद्यात्सतां च माहात्म्यं यश्च सत्संगिनां नृणाम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्य कचित्कालकर्मकाठिन्यासावपि प्रभोः । भक्तिभूयस्त्वतः किंचिदप्यनर्थो न जायते ॥ ७ ॥
कृष्णस्य निश्चये तत्सद्भक्तमाहात्म्यवेदने । शैथिल्यं यस्य पुंसः स्यादन्यत्राभिनिवेशतः ॥ ८ ॥
शुभं तस्य तु नैव स्यात्सद्देशादौ भवत्यपि । दुर्बलं पीडयेद्यश्च तस्य तु क्कापि तन्न वै ॥ ९ ॥
भीष्मो हि भारते धर्मराजमित्थमशिक्षयत् । सान्वयो भस्मसाद्भावी दुर्बलावमतेरिति ॥ १० ॥

भक्तो वाऽन्योपि यो रंकः सोऽवमान्यो न तत्कचित् ।
राज्ञा वाऽऽढ्येन विदुषा महच्छ्रितेन च केनचित् ॥ ११ ॥

रंकावमंतुः पुंसश्च पुंसो मिथ्याभिशंसिनः । स्त्रीधर्मभंगकर्त्तुश्च ब्रह्महत्या भवेद् ध्रुवम् ॥ १२ ॥
कस्यचित्सति दोषे तु रहस्याहूय तं सुधीः । शिक्षयेच्छनकैर्धर्मं न तत्पापं प्रकाशयेत् ॥ १३ ॥
पतिव्रता च विधवा विश्वस्ता शरणं गता । संगानिच्छुश्च पंचैता योषा ज्ञेयाः स्वमातृवत् ॥
आसामन्यतमां गच्छन् धर्मभंगकरो भवेत् । तस्माद्रंकावमानादि न कर्त्तव्यं हि सर्वथा १५ ॥
एवं वार्त्ता नृपस्याग्रे प्रोक्ता ह्यः साधवो मया । अथ ते मुदिताः सन्तो रासलीलां जगुर्हरेः ॥
श्रुत्वा तामब्रवीत्स्वामी पुनः साधून्मुदान्वितः । श्रेयोर्थमेव हि नृणां हरेर्जन्मास्ति भूतले ॥
सर्वा अपि क्रियास्तस्य नृणामिव भवंति वै । भक्तोत्तमा विदुस्तास्तु चरित्राणीति सर्वशः ॥
भगवद्विमुखा जीवा अपकास्तज्जना अपि । तासु दोषान्कल्पयंति माहात्म्यावेदनात्प्रभोः १९ ॥
रासलीलां जगौ विष्णोः सम्यग्माहात्म्यविच्छुकः । कामदर्पापनोदाय लीलैवेयं हरेरिति ॥
अमानुषी क्रिया साहि भूरिरूपस्थितिर्यतः । स्त्रैणस्याप्यूर्ध्वमंथित्वं यच्छ्रुतेः कामनाशनम् २१ ॥
शुकाभिप्रायमेतं तु न परीक्षिदबुध्यत । सोऽपक्वः कृष्णभक्तत्वे ततस्तत्राऽऽप संशयम् २२ ॥
स कथं धर्मसेतूनां वक्ता कर्त्ताभिरक्षिता । प्रतीपमाचरद्ब्रह्मन् परदाराभिमर्शनम् ॥ २३ ॥
जीवसाधर्म्यबुद्ध्येत्थं पृच्छंतं संशयं नृपम् । माहात्म्यं बोधयामास शुकः कृष्णस्य तच्छिदे ॥
नराकृतेर्भगवतश्चरित्रेष्वेवमत्र ये । संभावयेयुर्दोषं ते पंक्तौ ज्ञेयाः परीक्षितः ॥ २५ ॥
या काचिद्भगवल्लीला सा सर्वाप्यस्ति देहिनाम् । श्रेयस्करीति विद्युर्ये शुकपंक्तौ स्थिता हि ते ॥
स्वतंत्रः स्वेच्छया कृष्णः श्रेयसे सर्वदेहिनाम् । धृत्वा नराकृतिं भूमौ करोति नरवत्क्रियाः ॥
कचित्कामं कचित्क्रोधं कचिल्लोभं भयं कचित् । मोहादींश्च कचित्स्वस्मिन् दर्शयत्यस्वतंत्रवत् ॥
सर्वा अपि क्रियास्तस्य नृणां मंगलदा मताः । श्रुता वा कीर्त्तिता दृष्टा ध्याता वाप्यनुमोदिताः ॥
एवं निश्चित्य सुदृढं भवद्भिरपि साधवः । शुकवत् कृष्णरसिकलीला गेया विरागिभिः ॥ ३० ॥
परिच्छिन्नवपुर्नॄणां स्वेक्षणादिसुखाप्तये । भवति स्वेच्छया कृष्णोऽपरिच्छिन्नवपुः स्वयम् ३१ ॥
क्षरात्मा चाक्षरात्मा च क्षराक्षरपरोऽस्ति सः । एकैकरोम्ण्यनंतांडनिवासान्महतो महान् ॥
तादृशस्येक्षणं कर्तुं जीवा ईशाश्च नेशते । अतस्तेषां दर्शनाय परिच्छिन्न इवास्ति सः ॥ ३३ ॥
नराकारेण तेनैव नृणां श्रेयो भवेदिह । अल्पानां नातिमहता रूपेण तु कथंचन ॥ ३४ ॥
अंधकारे निवसतां गृहकार्यं नृणां यथा । सांवर्त्तकाग्निना न स्याद्ब्रह्मांडक्षयकारिणा ॥ ३५ ॥
किं त्वल्पवपुषा तेन दीपरूपेण तद्भवेत् । तथैवाऽत्र नृणां श्रेयः स्यात्तेनाऽल्पवपुष्टता ३६ ॥
नृनाट्याचरणाद्भाति सोऽसमर्थ इव प्रभुः । न त्वस्ति तादृश इति तत्क्रिया मंगलावहाः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं यस्तु हरिं विद्यान्निर्दोषसकलक्रियम्। स पूर्णभक्तो विज्ञेयस्तस्य ज्ञेयं नहीतरत् ३८ ॥
इत्युक्त्वोपरतं कृष्णमूचे काकुभयो नृपः। निश्चित्यैव भवंतं यो भजेद्भक्तः स उच्यते ॥ ३९ ॥
माहात्म्यज्ञानपूर्वः स्याद्धृदि ते यस्य निश्चयः। विपरीतश्च यस्य स्यात्तयोर्लक्ष्माणि मे वद ॥
तमुवाच हरी राजन्नाद्यो यस्तस्य मानसे। इत्थं भवेयुः संकल्पा यद्दिने निश्चयस्ततः ॥ ४१ ॥
जातमेव हि कल्याणं मम त्वथ वचोऽत्र यः। मानयिष्यति मे कश्चित्तत्तस्यापि भविष्यति ४२।
कृतार्थोऽस्म्यथ यत्किंचित्कुर्वे साधनमादरात्। कृष्णस्य प्रीतये तद्धि न तु कस्यैचिदाशिषे ४३
एवमाद्यस्य संकल्पाः स्युरन्यस्य वदामि तान्। कृष्णस्तु साक्षान्मिलितोऽस्त्यत्र नास्त्येव संशयः
न श्रेयःसाधनं किंचिच्छोभनं क्रियते मया। अतो भविष्यति श्रेयो मम वा न भविष्यति ४५
माहात्म्यज्ञानहीनस्य संकल्पा एवमादयः। भवेयुरिति जानीहि जपतोपि हरेर्मनुम् ॥ ४६ ॥
अथ भूयः काकुभयो हरिकृष्णं स्म पृच्छति। मुख्यमध्यमहीनांस्ते भक्तान् बोधय लक्षणैः ४७
तमुवाच हरिर्यस्य साक्षात्स्यादात्मदर्शनम्। आत्मानमेव यो विद्यात्सच्चिद्रूपं स्वमक्षरम् ।४८।
न गुणान्दैहिकान् कांश्चित्स्वस्मिन् मन्येत कर्हिचित्। देहे चात्मगुणांश्चैव नित्यत्वादीन् विवेकवान्
आत्मस्थं भगवंतं च साक्षाद्व्यवलोकयेत्। आत्मनश्चान्यदेहस्थानपि वीक्षेत तत्त्वतः ॥ ५० ॥
प्राप्यैवमात्मनिष्ठायाः परां काष्ठामपीह यः। कृष्णमेवाधिकं विद्यात्तद्भक्तांश्चाऽनहंकृतिः ॥५१॥
स एव भक्तः कृष्णस्य परिकीर्त्तित उत्तमः। परमैकांतिकश्चात्मा हरेः सच्छास्त्रवर्णितः ॥५२॥
भगवन्निश्चयश्चात्मनिष्ठा स्यात्तदपि प्रभोः। ईर्ष्या स्याच्छ्रेष्ठभक्तेभ्यः कृष्णभक्तस्य यस्य तु ५३
स्वापमाने कृते क्वापि दोषदृष्टिर्हरावपि। यस्य स्याच्च स विज्ञेयो मध्यमोऽस्थिरधीर्नृप ॥५४॥
आत्मनिष्ठाविरहितो भगवन्निश्चयो भवेत्। हरौ च जगति प्रीतिर्यस्य स्यात्स तृतीयकः ।५५।

इति हरेर्वचनामृतमीशितुः स तु नृपश्च निपीय सदःस्थिताः।
निखिलभक्तजनाः सह साधुभिः परमहर्षमवाप्य तमानमन् ॥ ५६ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ द्विसप्ततितमस्तरंगः ॥ ७२ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते। अमायां मधुमासांते वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य निजाश्रमे। उदङ्मुखे बहिर्वेद्यां स्वासने स उपाविशत् ॥ २ ॥
वृतं सद्भिर्गृहस्थैश्च निजभक्तैः सितांबरम्। गोपालानंदसाधुस्तं पप्रच्छ विनयानतः ॥ ३ ॥
स्वामिन् कामस्य किं रूपमस्त्यथो हरिरब्रवीत्। देहे चरमधातुर्यः प्रोक्तः कामः स एव हि ४॥
पुनः स साधुः पप्रच्छ वीर्यं त्वन्नरसोद्भवम्। भवेत्कामस्य तद्रूपं कथं हरिरथाब्रवीत् ॥ ५ ॥
नाडी मनोवहाख्याऽस्ति देहे तत्र मनः स्थितम्। तत्स्थमेवाखिलांगेषु स्वशक्त्या व्याप्तमस्ति तत्
कामात्मकोऽन्नसारश्च सूक्ष्मः सर्वांगसंस्थितः। तत्स्थस्त्रीभोगसंकल्पमंथेन मथ्यते वपुः ॥ ७ ॥
नवनीतं यथा दध्न उदेति मथितान्मथा। अन्नसारस्तथा रेत उद्गच्छत्यखिलांगतः ॥ ८ ॥
मनोवहायां नाड्यां तदेकीभूयैव सर्वतः। शिश्नद्वारा बहिर्याति मनोवेगाच्छरीरतः ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तद्बोधं योगकलया योगिनो येऽत्र कुर्वते । त एव कामजेतारो नैष्ठिका ब्रह्मचारिणः ॥ १० ॥
मनोवहायाश्चाधस्ताच्छिद्रने पातो न रेतसः । येषां त एव शास्त्रेषु कथिता ऊर्ध्वमंथिनः ॥ ११ ॥
एवं वीर्यजयः कामजय इत्युच्यते ततः । वदाम्यहं वीर्यमेव रूपं कामस्य नेतरत् ॥ १२ ॥
गोपालानंद ऊचेऽथ यद्येवं तर्हि वर्ष्मणः । अंतकाले कृते दाहे तत्स्थं रेतस्तु दह्यते ॥ १३ ॥
तद्दाहे कामदाहोपि जात इत्यागतं प्रभो । तथा सत्यस्य जीवस्य कुतो देहांतरेऽस्ति सः ॥ १४ ॥
तं स्वाम्युवाच वीर्यं तु सूक्ष्मदेहेऽवतिष्ठते । तद्योगात्स्थूलदेहे तु वर्त्तते तस्य संभवः ॥ १५ ॥
अग्निना स्थूलमेवांगं दह्यतेऽन्यत्तु तद्बहिः । निर्गत्याऽन्यं स्थूलदेहं प्रविश्यास्ते हि भूतवत्
अतो न तत्स्थकामस्य दाहोस्तीत्यवधारय । इत्युक्तः स पुनः साधुस्तमपृच्छज्जगद्गुरुम् ॥ १७ ॥
एवं वीर्यस्य नित्यत्वे कामरूपस्य सत्पते । निष्कामत्वं मुमुक्षूणां कथं स्याद् ब्रह्मचारिता ॥ १८ ॥
सति वीर्ये च देहेऽस्मिन् क्वचित्कालेऽपि योगिनः । स्वप्न जाग्रति वा तस्य पातः स्यान्नात्र संशयः
योगींद्रस्येश्वरस्यापि शंकरस्य स्मरद्विषः । लक्षाब्दांतेऽप्यभूद्वीर्यपातो मोहिन्यवेक्षणात् ॥ २० ॥
अतो निष्कामतासिद्धिर्न स्यादेवेति भाति मे । इत्युक्तवंतं साधुं तमब्रवीद्भक्तिनंदनः ॥ २१ ॥
सत्यं वदसि साधो त्वं निष्कामत्वं सुदुर्लभम् । एतावतो शिवस्यापि न्यूना योगकलोदिता ॥
संत्यक्तस्त्रीप्रसंगानामन्येषां ब्रह्मचारिणाम् । स्वप्ने क्वचिद्वीर्यपातान्न शुद्धा ब्रह्मचारिता ॥ २३ ॥
अतः श्रीमद्भागवते कपिलो भगवान् जगौ । सर्वे स्त्रीखंडितधियो नारायणमृषिं विना ॥ २४ ॥
अतो मदात्मकः सोस्ति ह्यूर्ध्वरेताश्च नैष्ठिकः । अन्येपि तत्प्रतापेन तादृशाः संति तत्पदे ॥ २५ ॥
यूयं मदाश्रिताः सर्वे समाराधितमत्पदः । मत्प्रतापात्तादृशा वै भविष्यथ जितस्मराः ॥ २६ ॥
स्त्रीप्रसंगोऽष्टधा यैस्तु त्यक्तो मद्भजने रतैः । त एव मत्प्रतापेन शनैर्यास्यंति सद्गतिम् २७ ॥
वीर्यावरोध एवास्ति ब्रह्मचर्यस्य लक्षणम् । प्रसादादेव मम तल्लभ्यं न त्वन्यथा क्वचित् २८ ॥
स्त्रीसंकल्पं विनापि स्यात्स्वेदेन सह रेतसः । देहाद् बहिर्निःसरणं रोध्यं तदपि योगिभिः २९ ॥
एतच्छ्रुतं मया बाल्ये स्त्रीगंधमप्यगृह्णता । शुद्धं बृहद्व्रतं पाल्यमिति व्यवसितं ततः ॥ ३० ॥
ततोऽभ्यस्तं मया बस्तिकर्म द्विविधमादरात् । कौंजरी च क्रिया सम्यगूर्ध्वरेतस्त्वसिद्धये ॥ ३१ ॥
निशि स्वापे च गोरक्षासनं नित्यमकार्यत । येन स्वप्नेपि नैव स्यात्पातो वीर्यस्य वर्णिनः ॥ ३२ ॥
कामजित्युपयोगीनि ह्यासनान्यपराणि च । साधितानि मया चान्यद् गुरूक्तं साधनांतरम् ३३ ॥
एवं साधनजातेन निःस्वेदं मेऽभवद्वपुः । ततो रामानंदगुरुमहं प्राप्तः सतां पतिम् ॥ ३४ ॥
उपायः कारितस्तेन पुनः स्वेदोद्गमाय मे । तथापि नाभूत्स्वेदोंगे दार्ढ्यात्प्राक्साधनस्य हि ३५
अतोऽन्यसाधनेभ्योपि यत्कामजयसाधनम् । तदहं दुष्करं मन्ये योगं साधयतामपि ॥ ३६ ॥
दृढं कृष्णोपास्तिबलं विषयेषु च पञ्चसु । अतिनिर्वासनत्वस्य ग्रंथिर्यस्य भवेद्धृदि ॥ ३७ ॥
तस्यैव पुंसो भगवत्प्रसादेन महीयसा । सम्यक्कामजयः सिद्ध्येन्न त्वन्यस्य कदाचन ॥ ३८ ॥
नित्यानंदोऽथ साधुस्तं नत्वा पप्रच्छ सत्पतिम् । निर्वासनत्वे वैराग्यं हेतुरस्त्यथवेतरः ॥ ३९ ॥
केवलेन विरागेण न निर्वासनता भवेत् । कृष्णोपस्त्यात्मनिष्ठाभ्यां युक्तोऽसौ तत्र कारणम् ।
आत्माऽहं सच्चिदानंदरूपोऽस्मि वपुषः परः । पिंडब्रांडमुभे मायामये स्तोऽतो विनश्वरे ॥ ४१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मदिष्टदेवो भगवाननेकांडसमाश्रयात् । अक्षरादप्यस्ति परस्तस्य मेऽस्ति दृढाश्रयः ॥ ४२ ॥
ईदृग्निष्ठाद्वयोपेतं वैराग्यं सुदृढं मतम् । कालेन तन्नैति लयमन्यत्तु क्षणिकं मतम् ॥ ४३ ॥
औवों यथा जलस्थोपि न निर्वाति जलं पिबन् । तथा विषययोगेपि न वैराग्यं दृढं क्षयेत् ॥
वैराग्यमन्यत्तु यथा जलेनाऽग्निः प्रशाम्यति । तथा विषययोगेन सद्य एव विलीयते ॥ ४५ ॥
अतः सामान्यवैराग्यान्न निर्वासनता हृदि । यावज्जीवं सिध्यति वै साध्या तद्दृढता ततः ॥
औवंदृष्टांतवैराग्यं हृदि मे त्वस्ति सर्वदा । यथावत्तत्तु जानाति मुकुन्दो वर्णिराडयम् ४७ ॥
अन्येपि केचित्पार्श्वस्थास्तज्जानंति विचक्षणाः । ये जानंति च तेऽप्येतं प्राप्नुवंति गुणं मम ४८
ये भवेयुर्गुणाः सत्सु महत्सूपशमादयः । तान् यथावद्विजानीयुर्ये केचिदिह पूरुषाः ॥ ४९ ॥
तेपि तान् प्राप्नुवंत्येव दुर्ल्लभानपि निश्चितम् । दोषारोपास्तु ये तेषु कामादीनगुणांश्च ते ५०
ततस्तैरर्द्यमानास्ते दुःसंकल्पाकुला नराः । कुर्वंतोपि सदा संगं तेषां स्युर्ह्यतिदुःखिनः ॥५१॥
वर्णीन्द्रस्तु यथावन्मे निष्कामत्वमुखान् गुणान् । सम्यग्वेत्तीति तान्सर्वान्प्राप्य जातोस्ति मत्समः
तमेतं गुणिनं सर्वे पुमांसश्च स्त्रियोऽपि च । मदाश्रिता विजानंति तस्माज्ज्ञेया महद्गुणाः ५३
उक्तसाधनसंपत्त्या जातो निर्वासनस्तु यः । तस्येंद्रियाणि सर्वाणि कुण्ठितानि भवंति हि ॥
प्रारब्धफलभोगोऽस्य पुंसो ज्ञेयस्तथा बुधैः । जंबीराम्लितदंतस्य यथा चणकचर्वणम् ॥ ५५ ॥
निर्वासनोऽसौ पुरुषः ज्ञानिभक्त इतीरितः । उक्तसाधनहीनैश्च दुःसाध्यो वासनाक्षयः ५६ ॥
समाधिनिष्ठेऽपि नरे ग्राम्यसौख्यस्य वासना । अवशिष्यत इत्येषा दुस्त्यजेति प्रकीर्त्तिता ॥५७॥
समाधौ ब्रह्मसौख्यं यद्वित्वा यांति पुनर्बहिः । भवंति हेतवस्तत्र त्रयस्तान् श्रृणु कीर्त्तये ५८ ॥
स्वतंत्रस्य निजेच्छाऽथान्यस्याल्पसुखवासना । कृष्णेच्छा चेति ते ज्ञेयास्तत्त्याज्या ग्राम्यवासना ॥
समाधौ कोटिसूर्याभतेजोब्रह्मेक्षणाच्च यः । प्रत्यक्षभगवन्मूर्त्तौ जानीयान्न्यूनतामिह ॥ ६० ॥
तस्यापि वासनाशेषो हृदयान्नापसर्पति । विज्ञेयमत आधिक्यं साक्षात्कृष्णस्य सर्वतः ॥ ६१ ॥
तेनैव सर्वकार्याणि संसिद्ध्यंति न संशयः । एतदेव हि विज्ञेयं कृत्वा सत्संगमादरात् ॥६२॥
यः सद्भावेन मय्येव मनोऽर्पयति बुद्धिमान् । तद्धृत्स्था वासनाः सर्वा नाशयाम्यहमेव हि ॥
मुक्तानंदोऽथ साधुस्तं नत्वा पप्रच्छ हे प्रभो । मनस्त्वय्यर्पितं येन तस्य लक्ष्माणि मे वद ६४॥
येन वा नार्पितं तत्स्याद् ब्रूहि लक्ष्माणि तस्य च । इति पृष्टो हरिः साधुं तमुवाच मुने श्रृणु ॥
मम वार्त्ता दर्शनं वा यस्मिन् स्यात्समये तदा । नागतः स्यात्स्वयं तर्हि दाहः स्याद्धृदये महान्
यदा तां श्रृणुयात्तद्वा कुर्यात्तर्ह्येव यद्धृदि । शांतिः स्यान्नान्यथा नित्यं मद्दिदृक्षाऽधिका भवेत्
मद्वार्त्ताश्रवणादौ च प्रीतिर्भूरितरा भवेत् । मदादेशस्याचरणे दुष्करेपि हृदुत्सवः ॥ ६८ ॥
मत्संबंधिनि कार्ये च सर्वदैव रुचिर्भृशम् । यस्य स्यात्तेन तु मनो ज्ञेयं मय्यर्पितं मुने ६९॥
मदाज्ञया दूरगोऽपि वर्त्तते स ममांतिके । उक्तलक्ष्मविपर्यासो यत्र ज्ञेयः स चेतरः ॥ ७० ॥
सोंतिकस्थोऽपि मे भूरि दूरस्थ इति गम्यताम् । न तदीयास्ति मे चिंता स चिरेणाप्स्यतीप्सितम्
वचनामृतमित्युदारमैशं स निपीयाप मुनिर्महाप्रतोषम् ।
अपरे च तदीयपादभक्ता गृहिणश्चाऽगृहिणः सदोनिषण्णाः ॥ ७२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रिसप्ततितमस्तरंगः ॥ ७३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । एकादश्यां राधशुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीक्षितः । पीठोत्तमे न्यषीदत्स पिचुमंदतरोरधः ॥ २ ॥
सितवासा वृतो भक्तैर्बहुभिः परितः स च । स्वयमेवाब्रवीद्भक्तान् वचसा प्रीणयन्भृशम् ॥३॥
वैराग्यं स विवेकं स्याद्यस्य भक्तस्य मानसे । सुदृढं चादृढं तस्य ज्ञेयं लक्षणमादितः ॥ ४ ॥
सम्यग्माहात्म्यबोधेन हरेस्तत्सुदृढं मतम् । तस्यैव न्यूनतायां तददृढं चेति गम्यताम् ॥ ५ ॥
परीक्षा तस्य तु भवेदापत्काल उपागते । सुदृढं न निवर्त्तेत त्वदृढं तन्निवर्त्तते ॥ ६ ॥
सांप्रतं भूपतेरत्र शात्रव्यापदुपागता । अभूत्तदा तु चित्ते वस्तस्य जातं परीक्षणम् ॥ ७ ॥
अथ सर्वानुमत्येन मुक्तानंदस्तमब्रवीत् । त्वद्भक्तत्वान्नृपस्याऽस्य पक्षपातोऽस्ति नो हरे ॥ ८ ॥
बुद्धिपूर्वः स एवास्ति न त्वबुद्धिकृतः प्रभोः । सत्युत्कर्षे त्वदीयानां बहवः स्युस्त्वदाश्रिताः ९॥
अन्यथा वैपरीत्यं स्यादित्यापद्यस्य भूपतेः । किंचिच्छोकोऽभवदथो हर्षोऽस्य विजयेऽस्ति हि ॥
श्रुत्वेति साधुवचनं हरिः प्रोवाच तद्गुरुः । यूयं श्रीकृष्णभक्ताः स्थ सर्वकर्त्ता च स प्रभुः ॥
न तदिच्छां विना वृक्षात्पक्वं पर्णमपि क्षितौ । वायुः पातयितुं शक्तो बलिष्ठोपीति बुद्ध्यताम् ॥
न तदिच्छां विना यर्हि कार्यं किमपि जायते । हर्षशोकौ तदा भक्तोऽप्यज्ञवत्कुरुते मृषा १३॥
वृद्धिः सत्संगिनां पुंसां क्षयो वापीच्छया हरेः । भवितेत्येव निश्चित्य सदा सेव्यः स एव हि ।

श्रुत्वेति वाचं स सुधासमानां हरेस्तु संतो गृहिणश्च भक्ताः ।
सर्वेपि तोषं परमं प्रपद्य तां धारयंति स्म हृदंबुजे स्वे ॥ १५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ चतुःसप्ततितमस्तरंगः ॥ ७४ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । एकादश्यां राधकृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य नरेशितुः । मंचासने न्यषीदत्स वेद्यां निंबतरोरधः ॥ २ ॥
पीतपुष्पस्रगापीडं वृतं भक्तैः सहस्रशः । पप्रच्छ सूरो नृपतिस्तं प्रणम्य सितांशुकम् ॥ ३ ॥
कुले स्याद्यत्र ते भक्तः साक्षात्कृष्णस्य तद्भवाः । उद्धरंत्येव संसारात्पुरुषा एकविंशतिः ॥ ४ ॥
संशयो जायते तत्र कीदृशा उद्धरंति ते । तत्कुले द्वेषिणोऽपि स्युः साक्षात्ते त्वसतामपि ५ ॥
तेषां दुष्कर्मणां मुक्तिर्विना साधनसंपदम् । कथं भवेदित्यापृष्टस्तमूचे धर्मनंदनः ॥ ६ ॥
कृष्णभक्ते यदि स्नेहः कुलजानां नृणां भवेत् । तदा तु कृष्णमाहात्म्यात्तेषां मुक्तिर्भवेद्भवात् ॥
दश भूता भविष्याश्च दश ये कुलपूरुषाः । तेपि तद्भक्तमाहात्म्यं जानीयुर्यदि लोकतः ॥ ८ ॥
अहो अस्मत्कुले कृष्णभक्तो जातो महामतिः । अतोऽस्माकं महद्भाग्यमिति ये विद्युरंजसा ९ ॥
सर्वे ते कुलजास्तर्हि कृष्णस्यैव प्रतापतः । संसृतेरुद्धरंत्येव विपरीतास्तु नैव ते ॥ १० ॥
कृष्णभक्ते स्नेहवशाद्वंश्यानां मुक्तिरीरिता । तद्द्वेषिणां तु स्यात्कुलजानामपि ध्रुवम् ॥ ११ ॥
तद्द्वेषाद् भ्रष्टमतयो यांत्यंते यमयातनाः । तद्वंशजा अपि नराः संशयो नात्र विद्यते ॥१२॥
भक्ते स्नेहादसंबंधा अप्यन्ये देहिनो भवात् । मुच्यंते तर्हि तत्कुल्या मुच्येरन्नित्यसंशयम् ॥
अथ पप्रच्छ नांजस्तं क्षत्रियो हरिमानतः । हरे त्वन्निश्चयः पुंसां श्रेयसः साधनं परम् १४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सोऽल्पो वा परिपूर्णो वा कथं बोध्यो विचक्षणैः । तमुवाच हरिर्भक्तं श्रूयतां क्षत्रियर्षभ ॥
स्वधर्मज्ञानवैराग्यभक्तिभिः सहितो हरेः । नराकृतेर्निश्चयो यः परिपूर्णः स उच्यते ॥ १६ ॥
एतेष्वेकतमस्यापि न्यूनत्वे स मतोऽल्पकः । इति प्रश्नस्योत्तरं ते कथितं हृदि चिंतय १७ ॥
श्रुत्वेति वाचं स हरेः सुधाभां क्षत्रर्षभो हर्षमवाप चित्ते ।
सदोगता भक्तजनाश्च सर्वे ससाधवस्तोषमवापुरेव ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पंचसप्ततितमस्तरंगः ॥ ७५ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । प्राग्ज्येष्ठशुक्लैकादश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः । पीठोत्तमे निजावासे स व्यराजत्सितांशुकः ॥ २ ॥
मुख्यैः सद्भिः परिमितैर्वृतश्च ब्रह्मचारिभिः । तानुवाच स्वयं प्रीतः स्वस्वभावं प्रकाशयन् ३ ॥
मम भक्तजनेष्वस्ति प्रीतिरत्र न संशयः । ते तु ज्ञेयाश्चतुर्दोषरहिता एव नेतरे ॥ ४ ॥
दोषास्तु क्रोध ईर्ष्या च कपटो मान इत्यमी । तत्र क्रोधस्तथेर्ष्या द्वौ मानमाश्रित्य तिष्ठतः ॥
एतेष्वेकतमो यस्मिन्स भक्तोऽपि न मे प्रियः । कामी तु नितरामेव नैव मेऽस्ति प्रियः क्वचित् ॥
यमानहिंसाप्रमुखान् नित्यं पालयतस्तथा । सत्संगे तिष्ठतोऽप्यस्य विश्वासो नास्ति मे किल ॥
ज्ञात्वेति मत्स्वभावं यो हित्वा दोषानिमान् द्रुतम् । स्वाप्रियेऽपि च मद्वाक्ये मत्प्रियायैव तिष्ठति ॥
स पक्कः खलु सत्संगी तस्मिन्स्वाभाविको मम । वर्त्तते नितरां स्नेह इति जानीत सत्तमाः ९ ॥
इति साधुजना वचोमृतं निजनाथस्य निपीय हर्षिताः ।
हृदयांबुरुहे निधाय तत्प्रणमंति स्म तमादरेण ते ॥ १० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षट्सप्ततितमस्तरंगः ॥ ७६ ॥

शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते । द्वितीयज्येष्ठामावस्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । प्रत्यग्द्वारस्य वेद्यां सत्पीठेऽराजत्सितांबरः ॥ २ ॥
सद्भिश्च गृहिभिर्भक्तैर्वृतस्तानब्रवीत्स्वयम् । भगवन्निश्चयबलं सर्वेषामस्ति वो दृढम् ॥ ३ ॥
तेन क्वापि स्वधर्मस्य न कार्यं खंडनं धिया । यतस्तदासुरं कर्म तत्कर्त्ता चाऽसुरो मतः ॥ ४ ॥
भगवन्निश्चयवति पुंसि भागवता गुणाः । आयांति निजधर्मस्थे धर्मं प्रति धरोदिताः ॥ ५ ॥
ततः स साधोः कृष्णेन प्रोक्तैरौपगविं प्रति । गुणैः स्यादिह विख्यातः स्वाश्रितस्यापि मुक्तिदः
अतो ज्ञानस्य भक्तेर्वा बलमाश्रित्य कर्हिचित् । न धर्मखंडनं कार्यं मनसा वचसाऽपि च ॥७॥
यो धर्मभंगवार्त्ताकृद्भक्तलिंगधरोपि सः । ज्ञेयो मद्विमुखो नूनं गुरुद्रोही च नारकी ॥ ८ ॥
स्वधर्मं पालयन् कृष्णं भजेत्प्रीत्याऽत्र यो नरः । स एव भौतिकं देहं त्यक्त्वा याति परं पदम् ॥
संतस्तमथ पप्रच्छुः स्वामिन्भक्तोऽत्र कश्च ते । एकांतिकोऽपि देहांते दृश्यतेऽर्त्तिं व्रजन् भृशम् ॥
वाच्यमानोपि शक्नोति भाषितुं नैव किंचन । द्वित्राण्यहानि न ब्रूते तमोलीन इव स्वपन् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दृश्यमानोऽपक्व इव भक्तस्ते कश्च कुत्रचित् । अंतकाले व्यथाहीनो दृश्यतेऽतिसमर्थवत् ॥१२॥
आत्मीयैः सह संभाष्य म्रियते च स्वतंत्रवत् । अत्र यत्कारणं तन्नो वक्तुमर्हसि सत्पते ॥१३॥
सद्भिरित्थं स संपृष्ट ऊचे श्रृणुत साधवः । इत्थं भावे द्वयोरंते द्वौ हेतू स्तो वदामि तौ ॥१४॥
काल एकोऽपरोऽवस्था शुभे ते चाशुभे मते । ताभ्यां शुभाभ्यां शोभेते नाऽशुभाभ्यां तयोर्मृती
कृष्णशक्तीरितस्तत्र कालः सर्वत्र संचरन् । चतुर्युगात्मको नृणां हृदये परिवर्त्तते ॥ १६ ॥
तत्रांते यदि सत्यं स्यात्तदा मृत्युः सुशोभते । स्यातां युगे मध्यमे चेत्तदा किंचित्स शोभते १७
कलिश्चेदंतकाले स्यात्तदा मृत्युर्न शोभते । कालस्य परिवृत्त्येत्थं सत्यसत्यौ मृती मते ॥ १८ ॥
अग्रे गतिस्तयोः स्वानुष्ठितधर्मानुसारिणी । भवतीत्यवगंतव्यं नात्र कालप्रधानता ॥ १९ ॥
अथाऽवस्थाः शरीरेषु जाग्रत्स्वप्नसुषुप्तयः । परिवर्त्तंत इत्यासु मृतावेकतमा भवेत् ॥ २० ॥
तत्रांते यदि जाग्रत्स्यात्तदा तद्वांस्तु पूरुषः । देहं जहात्यन्यजनैर्वेदन्नैव यथातथम् ॥ २१ ॥
स्वप्नो वर्त्तेत चेत्तर्हि देहांते सोपि पूरुषः । अयथार्थं वदन्किंचिरयजति भ्रांतवद्वपुः ॥ २२ ॥
सुषुप्तिर्यदि वर्त्तेत तदांते सोपि पूरुषः । म्रियते हि तमोलीनस्त्वब्रुवाणश्च किंचन ॥ २३ ॥
एवं त्ववस्थाभेदेन मृती उक्ते शुभाशुभे । तयोरग्रे गतौ हेतुर्नैवावस्थेति गम्यताम् ॥ २४ ॥
पक्वभक्तो हरेर्धाम देहांते सद्य एव हि । प्राप्नोत्यथाऽपक्वभक्तः कालेनेति तयोर्भिदा ॥ २५ ॥
मृत्युना शोभनेनापि नाऽभक्तस्य गतिः शुभा । अशोभनेन तेनापि नास्ति भक्तस्य दुर्गतिः ॥
सम्यगाराधितः कृष्णो देहांते भक्तमात्मनः । स्वधाम प्रापयत्येव देवानामपि दुर्लभम् ॥२७॥
जातेपि शोभने मृत्यौ कृष्णाभक्तं तु भास्करेः । दूता नीत्वा यमपुरं यथाकर्मार्दयंति हि २८॥
एवं शुभे चाशुभे वा देहपाते तु संशयः । लोकरीत्या न कर्त्तव्यः कृष्णभक्तस्य कर्हिचित् २९॥
ब्रह्मात्मैक्यं दृढं प्राप्य यस्तु कृष्णं भजन्नरः । स्वातंत्र्येण वपुर्जह्यान्माहात्म्यं वर्णयन् हरेः ३०॥
सामर्थ्यं तस्य तु ज्ञेयमीश्वरस्येव दुर्लभम् । तादृग्भक्तस्तु विरलः क्वचिद्भवति भूतले ॥ ३१ ॥

इति श्रीहरेर्वाक्यपीयूषमेतन्निपीय प्रसन्नास्त आसन् सदस्थाः ।
गृहस्थाश्च संतः स्ववासं व्रजंतं नमंति स्म भक्त्या तमीशेश्वरेश्वरम् ॥ ३२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ सप्तसप्ततिमस्तरंगः ॥ ७७ ॥

शकाब्दे विक्रमार्कस्य नगाश्वसुभूमिते । शुचिशुक्लतृतीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्यास्य वेश्मनः । वेद्यां प्रत्यङ्मुखस्याऽसौ मंचोत्तम उपाविशत् ॥२॥
सितपुष्पस्रजं कंठे दधत्सितनवांशुकः । वृतः सहस्रशो भक्तैस्त्यागिभिर्गृहिभिस्तथा ॥ ३ ॥
परीक्षमाणाः स निजान्सतो विद्यार्थिनोऽब्रवीत् । प्रष्टव्यं वो भवेद्यत्तन्मां पृच्छत पृथक् पृथक् ॥
शिवानंदस्तदा ज्येष्ठो नत्वा पप्रच्छ तं प्रभो । कथं ज्ञायेत भक्तानामचलस्तव निश्चयः ॥ ५ ॥
हृदि पुंसो भवेद्यस्य कृष्णस्याऽचलनिश्चयः । हरेः सर्वाः क्रियास्तस्य भासेरन् हि शुभावहाः ॥
कामः क्रोधो भयं शोकः प्रीतिर्जयपराजयौ । इत्यादि यद्धरेः कर्म तत्सर्वं तस्य मंगलम् ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न दोषबुद्धिः क्वापि स्याद्धरेर्निंद्येपि कर्मणि । तस्य पुंसः स विज्ञेयः श्रीकृष्णाचलनिश्चयः ॥८॥
निर्मानानंद ऊचेऽथ त्वयि त्वत्पुरुषेषु च । न दोषधीर्भवेत् क्वापि येन तत्साधनं नु किम् ॥९॥
सम्यक् कृष्णस्य माहात्म्यं सद्भ्यो विज्ञाय निश्चयम् । ये कुर्युर्दोषधीस्तेषां तस्मिन् क्वापि भवेन्न हि
एवं कृष्णस्य भक्तानां महत्तां सद्भ्य एव ये । सम्यग्विद्युर्नरास्तेषां भवेत्तेषु न दोषधीः ॥११॥
प्रज्ञानानंदसाधुस्तमथापृच्छन्महाप्रभो । तिसृष्ववस्थास्वीक्षा स्यात्कथं कृष्णस्य ते सदा ॥१२॥
तन्नुवाच हरिर्यस्य प्राक्संस्कारः शुभो बली । स्यात्तस्य वीक्षा तिसृषु स्यादवस्थासु वै हरेः १३॥
अतिस्नेहेन वा सा स्यात्कामेन च भयेन च । द्रौपद्या इव गोपीनामिव कंसस्य वा यथा १४॥
कनिष्ठोऽथ शिवानंदो नत्वा पप्रच्छ तं प्रभो । बद्धमूलः कथं ज्ञेयः सत्संगो हृदि ते नृणाम् ॥
कामक्रोधादयश्चांतः शत्रवोऽत्र मुमुक्षताम् । केनोपायेन नश्येयुस्तन्मे त्वं वक्तुमर्हसि ॥ १६ ॥
हरिरूचेऽथ तं यस्य पक्षपातो भवेद् दृढम् । पुंसः सत्संगिनः स्वीयकुटुंबिन इवादरात् ॥१७॥
तस्यैव हृदये बद्धमूलः सत्संग ईयताम् । तस्यैव हि विनश्येयुरांतराः शत्रवोपि च ॥ १८ ॥
पक्षपातं विना त्वत्र सत्संगिप्रवरोपि सन् । अंते हास्यति सत्संगमित्येव प्रतिभाति मे ॥१९॥
एवमुक्तः स हरिणा साधुस्तुष्टोऽभवत्ततः । आत्मानंदो यवीयांस्तं पप्रच्छ कृतवंदनः ॥ २० ॥
स्वं तिरस्कृत्य संतस्ते ब्रूयुः शिक्षावचस्तु यत् । तत्तथ्यमिति मन्येत कीदृक्पुंसात्र सादरम् ॥
मुमुक्षुर्यश्च निर्मानो महत्तां च सतां विदन् । स एव सद्वचस्तथ्यं हितं मन्येत नेतरः ॥२२॥
अथ तं दहरानंदः साधुः पप्रच्छ सन्नतः । असि त्वमक्षरातीतः कृष्णो वाङ्मनसात्परः ॥२३॥
सोऽत्र त्वं न्राकृतिर्भूत्वा नृणां प्रत्यक्षतां गतः । अत्र यत्कारणं तन्मे ब्रूहीत्युक्तोऽवदद्धरिः २४
अगोचरोपि भगवान् श्रेयसे कृपया नृणाम् । स्वेच्छयैव नराकारं दधच्चरति भूतले ॥ २५ ॥
त्यागानंदोऽथ पप्रच्छ तं प्रभो त्वं जनास्तव । कथं भवेयुः सुप्रीता इत्युक्तो हरिरब्रवीत् ॥२६॥
अनिच्छन् दैहिकं सौख्यं केवलं वाक्यपालने । हरेः सदोत्सुको यः स्यात्प्रीयंते तत्र ते भृशम् ॥
अथ तं लक्ष्मणानंदो नत्वा पप्रच्छ हे प्रभो । ईदृग्भगवतस्ते त्वत्सतां चेह समागमः ॥ २८ ॥
आश्चर्यदोऽस्ति मर्त्यानां कर्मभिर्भ्रमतां भवे । स सदैव कथं चित्ररूप इत्येव संस्फुरेत् ॥२९॥
अयं कृष्ण इमे संतः सर्वे ब्रह्मनिवासिनः । यत्र कृष्णोस्ति तत्रैव तद्धामेति च वेत्ति यः ३०॥
महद्भाग्यमिदं मे यदेभिः सह मम स्थितिः । एवं च वेत्ति यस्तस्य चित्रं वर्त्तेत चेतसि ॥३१॥
परमात्मानंदमुनिस्ततः पप्रच्छ तं प्रभुम् । आयायुः साधुलक्ष्माणि शास्त्रोक्तानि कथं नरे ३२
उवाच श्रीहरिस्तं च शास्त्रोक्तैः साधुलक्षणैः । संपन्नाः स्युर्नरा ये तान् यः सेवेताऽत्र देववत्
आयायुः साधुलक्ष्माणि तस्मिन्सर्वाणि निश्चितम् । शांतानंदोऽथ पप्रच्छ साधुस्तं विनयानतः
भक्त एकोऽस्ति कृष्ण त्वद्रूपध्यानपरायणः । अन्यस्तु नवधा भक्तिं कुर्यात्कृष्णस्य ते सदा ३५
उभयोः कतरः श्रेष्ठ इति पृष्टोऽब्रवीद्धरिः । निर्विकल्पसमाधिं चेदाद्यः प्राप्तोऽशरीरवित् ॥३६॥
तदा तु स श्रेष्ठ इति ज्ञातव्यो दुर्लभश्च सः । यस्तु ध्यानं यथाशक्ति कृत्वोत्थाय वपुःक्रियाः ॥
सकला यदि कुर्वीत न हरेः श्रवणादिकाः । तदा तु तस्मादपरो भक्तः श्रेष्ठ इतीयताम् ॥३८॥
अथाऽऽधारानंदमुनिस्तमपृच्छत्कृताननतिः । कीदृग्वृत्त्या हरे त्वं च प्रसीदेयुर्जनास्तव ॥ ३९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तमुवाच हरिः कृष्णप्रोक्तेषु नियमेषु यः । दृढं वर्त्तेत तस्मिंस्ते प्रसीदेयुरसंशयम् ॥ ४० ॥
वेदांतानंदनामा सन्नथ पप्रच्छ तं प्रभो । दुःस्वभाववशात्क्वापि कापथे स्वस्य वर्त्तनम् ॥४१॥
जातं स्यात्तेन कृष्णस्त्वं साधवोपि त्वदाश्रिताः । जाता भवेयुरप्रीताः सुप्रीताः स्युः कथं च ते ॥
यं दुःस्वभावं दृष्ट्वा ते स्वस्मिन्नप्रीततां गताः । अतिवैरधिया तस्मिन्पुनः प्रीता भवंति ते ४३ ॥
अतिवैरं दुःस्वभावे पुंसि बध्नाति तत्कृपा । जायतेऽथ तया तस्य वर्त्तेत हृदये सुखम् ॥ ४४ ॥
श्रेयोध्वगमने शक्तिर्वर्द्धते च तया ततः । आंतराः शत्रवः सर्वे नश्यंतीत्यवगम्यताम् ॥ ४५ ॥
ततो भगवदानंदो हरिं साधुः स्म पृच्छति । यादृशी भवतो भीतिः सांनिध्ये वर्त्तते प्रभो ॥
तादृश्येव परोक्षेपि कथं वर्त्तेत तद्वद । इति तेन सता पृष्टो धर्मसूनुर्जगाद तम् ॥ ४७ ॥
सम्यक् कृष्णस्य माहात्म्यं ज्ञायेत यदि तर्हि तु । प्रत्यक्ष इव भीतिः स्यात्परोक्षेपि हरौ हृदि ॥
आकृतिर्योऽत्र भगवान्स एवाऽस्त्यक्षरात्परः । नैकांडकोटिजन्मादिहेतुश्च पुरुषोत्तमः ॥ ४९ ॥
सर्वकर्त्ता च सर्वत्रान्वयेन परमाश्रयः । व्यतिरिक्तश्च सर्वेभ्यो रमतेऽक्षरधामनि ॥ ५० ॥
प्रत्यक्षं वीक्ष्य ते यादृक्तादृगेव स ईशिता । स्थावरे जंगमे चास्ति स्थूले सूक्ष्मे नियामकः ॥
न तदिच्छां विना पर्णचालनेपि क्षमो मरुत् । शुभाशुभानां सर्वेषां कर्मणां फलदश्च सः ॥
तिष्ठन् पृथ्व्यामपि पृथ्वीं शक्त्या धृत्वा स तिष्ठति । चंद्रार्काग्निप्रकाश्यांगोऽप्यस्तींद्रादिप्रकाशकः
ईदृगद्भुतसामर्थ्योऽप्यसावतिकृपावशात् । आकृत्या दर्शनं दत्ते वर्त्तते च मनुष्यवत् ॥ ५४ ॥
एवं यस्तस्य माहात्म्यं विद्यात् सम्यक् पुमानिह । प्रत्यक्षे वा परोक्षेऽपि भीतिस्तस्य भवेत् प्रभौ
पुनर्भगवदानंदः पृच्छति स्म हरिं प्रभो । एवं समर्थो हि भवानस्त्येव जगदीश्वरः ॥ ५६ ॥
देशकालादिवैषम्ये स्वस्य वा स्वजनस्य च । परित्राणे स्वसामर्थ्यं कथं नाविष्करोत्यसौ ॥५७॥
उवाच तं हरिः साधो यदा कृष्णो नराकृतिम् । धत्ते तदा तु नरवच्चेष्टते छन्नपौरुषः ॥ ५८ ॥
एवं हि सर्वशास्त्रेषु लीलाः संत्युपवर्णिताः । नराकृतेर्भगवतस्तत्कार्यो नात्र संशयः ॥ ५९ ॥
तत्रापि ब्रह्मजातौ यः साधुवेषः प्रभुर्भवेत् । क्षमैव तस्य भूषा नो पराक्रम इति स्थितिः ६०॥
अथ तं निर्मलानंदः पप्रच्छ हरिमानतः । महिमातिशयो वेद्यः सतां तेऽत्र कथं वद ॥ ६१ ॥
तमुवाच हरिर्योऽत्र भगवान्वर्तते भुवि । सर्वावतारधर्त्ताऽसौ सर्वजीवो धृतिक्षमः ॥ ६२ ॥
तस्य साक्षात्प्रभोः संत एते संत्यात्मवत्प्रियाः । स च स्वसद्गुणैरेभिः सर्वथाऽहो वशीकृतः ॥
तस्य प्रतापादेतेपि जीवकल्याणकारिणः । एवं वेद्यो भवेत्साधुमाहात्म्यातिशयोंजसा ॥ ६४ ॥
अथ नारायणानंदस्तं पप्रच्छ जगद्गुरो । अन्वयव्यतिरेकाभ्यां जीवो देहत्रये कथम् ॥ ६५ ॥
तमुवाच हरिर्जीवः सुखं दुःखं च दैहिकम् । स्वस्मिन् यदा तु मन्येत तदा ज्ञेयोऽन्वयस्थितः ।
देहेभ्यो दैहिकेभ्यश्च स्वं मन्येत यदा पृथक् । सच्चिद्रूपं तदा त्वेष व्यतिरेकस्थितो मतः ६७॥
शून्यातीतानंदमुनिरथापृच्छद्धरिं हरे । पुमान्करोति सत्संगं यदा तर्हि तु भूयसी ॥ ६८ ॥
सत्सु सत्संगिषु प्रीतिः सादरा दृश्यतेऽथ सा । कालेन क्षीयते तत्र हेतुर्यस्तं वद प्रभो ६९ ॥
करोति यर्हि सत्संगं तदा धीरस्त्यलौकिकी । सत्स्वथो तत्परिचयं करोति प्रत्यहं पुमान् ७० ॥
स्वभावदोषं दृष्ट्वाऽथ तेषामल्पं च दैहिकम् । तं तु स्वीयकुबुद्ध्याऽसौ महांतं मन्यते हृदि ७१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ततोऽसद्वासनाविष्टहृदयादपसर्पति । सत्सु प्रीतिः प्रतिदिनं क्षीयमाणेति गम्यताम् ॥ ७२ ॥
विचारेण यदा चाऽसद्वासनां तु जहाति सः । तदा सत्सेवया नित्यं यथापूर्वस्थितिर्भवेत् ॥
प्रसादानंदसाधुस्तमथापृच्छत्प्रभो नृणाम् । मोक्षस्य साधनं मुख्यं ब्रूहीत्युक्तोऽवदद्धरिः ॥७४॥
संतो यथा वदेयुः स्वं तथा कार्यमसंशयम् । एतदेव हि मोक्षस्य मुख्यं जानीहि साधनम् ७५।
ततस्तं त्रिगुणतीतानंदः पप्रच्छ सत्पते । देशकालादिवैषम्ये कथं स्थेयं त्वदाश्रितैः ॥ ७६ ॥
तमुवाच हरिर्यर्हि काचिदापदुपाव्रजेत् । आपद्धर्मस्तदा पाल्यो गम्यं चाऽन्यत्र सर्वथा ॥७७॥
अथापृच्छन्निर्विकारानंदस्तमवरः प्रभो । कृष्णनिश्चयिनोऽप्येति नाऽसती वासना कथम् ॥७८॥
कृष्णनिश्चयिनोऽप्यस्य कृष्णमाहात्म्यवेदनम् । सम्यङ्नास्तीति जानीहि हेतुं तस्याः स्थितौ मुने
योगानंदस्ततो ज्येष्ठस्तमपृच्छत्प्रभोस्तव । निश्चये सत्यपि प्रीतिस्त्वत्कथादौ कथं न हि ॥ ८० ॥
धार्मिस्तं प्राह तस्यापि कृष्णमाहात्म्यवेदनम् । सम्यङ्नास्तीति न प्रीतिः कथादौ जायते प्रभोः
माहात्म्यावगमो यर्हि भवेत्कृष्णस्य तर्हि तु । तं विनाऽन्यत्र न प्रीतिः क्रियमाणापि जायते ।
सत्सु कृष्णे तत्कथादौ प्रीतिः साहजिकी भवेत् । ततः प्रतोषानंदस्तं पप्रच्छ हरिमानतः ८३॥
नवधा भक्तिरचला भवेत्कृष्णे कथं त्वयि । तमुवाच हरिः सा स्यात्तन्माहात्म्यावबोधनात् ८४॥
वासुदेवादयो व्यूहाः केशवाद्याश्च मूर्त्तयः । मत्स्याद्या अवताराश्च सर्वेऽप्यस्यैव संति हि ८५॥
इत्थं प्रत्यक्षकृष्णस्य माहात्म्याधिक्यवेदनात् । तस्मिन्नवविधा भक्तिरचला स्यान्न संशयः ॥८६॥

इति हरेरतुलं वचनामृतं सकलसाधुजनास्तु निपीय ते ।
गृहिजनाश्च गताखिलसंशयाः परमतोषमवाप्य तमानमन् ॥ ८७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावष्टसप्ततितमस्तरंगः ॥ ७८ ॥

॥ प्रथमप्रकरणं समाप्तम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणाय नमो नमः

सारङ्गनगरे

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । श्रावणासितपंचम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे दुर्गेऽसौ जीववर्मणः । सौम्याख्यस्य बहिर्वेद्यां वेश्मनः पार्श्विकादिभिः ॥ २ ॥
शोभमाने पीठवर्ये गृहित्यागिगणावृतः । न्यषीदच्छ्वेतवसनः प्रहसद्वदनांबुजः ॥ ३ ॥
मुक्तानंदस्तमप्राक्षीत्प्रश्नमेतं कृतांजलिः । तदाग्रसंस्थः सुमतिः साधुवर्यः प्रणम्य च ॥ ४ ॥
जितं जगत्केन मनो हि येनेत्यस्ति सत्पते । पद्यं प्राचीनमस्यार्थो मनोजेता हि विश्वजित् ॥ ५ ॥
एवं सति मनः स्वीयं मया जितमिति प्रभो । कथं ज्ञेयं भक्तियोगमभ्यसद्भिस्त्वदाश्रितैः ॥६॥
श्रीस्वाम्युवाच तं साधो शृणु वच्म्येतदुत्तरम् । शब्दादिपंचविषयनिवृत्तं तु मनो जितम् ॥७॥
प्रवृत्तानि निजार्थेषु हृषीकाणि स्वभावतः । मनोऽनुयाति च यदा तदा तदजितं मतम् ॥८॥
साधुप्रसंगसंप्राप्तसाधनेन दृढेन तु । परावृत्तानि तेभ्यः स्युरिंद्रियाणि यदा मुने ॥ ९ ॥
तदा तेभ्यः परावृत्तं मनोपि ज्ञेयमात्मनः । स्वस्थानस्थं च तद्बुद्ध्या जितमित्यवधार्यताम् ॥
अन्यथा त्वजितं ज्ञेयं तन्मनोनिग्रहोद्यतैः । प्रत्याहारः साध्यतेऽतस्तज्जयाय महात्मभिः ॥११॥
इति श्रुत्वा हरिवचो मुक्तानंदमुनिः पुनः । प्रीतस्तं प्रभुमप्राक्षीत्सर्वसंशयनाशनम् ॥ १२ ॥
इंद्रियाणां स्वविषयनिवृत्तेः साधनं प्रभो । यत्स्याद् दृढतरं तन्मे कृपया वक्तुमर्हसि ॥ १३ ॥
केचिद्वदंति वैराग्यमिह साधनमीश्वर । प्रीतिं कृष्णे त्वयि त्वेके तत्त्वं ब्रूहि सुनिश्चितम् ॥१४॥
आत्मनिष्ठा च माहात्म्यज्ञानं साक्षाद्रमापतेः । परं साधनमत्रेति मुने जानीहि निश्चितम् १५॥
तत्रात्मनिष्ठा देहात्मविवेकेनात्मनि स्थितिः । चिद्रूपोऽहं जडो देहो नित्योऽहं नश्वरं वपुः १६॥
शुद्धोऽहमशुचिर्देहो वपुर्दुःखमहं सुखम् । एवं विवेकतो देहात्पृथगात्मस्थितिर्भवेत् ॥ १७ ॥
देहाभिमानविलयात्तया पुंसो विवेकिनः । विषयेभ्यो निवर्त्तन्ते हृषीकाण्यखिलान्यपि ॥ १८ ॥
भक्तिं हरौ विदधता माहात्म्यं तस्य सर्वथा । यथा ज्ञेयं तथा वच्मि येन भक्तिर्भवेद् दृढम् १९॥
आत्माऽहं परमात्मासौ साक्षात्कृष्णः परात्परः । अनंतकोटिब्रह्मांडाधीशो राधारमेश्वरः ॥२०॥
गोलोकवैकुण्ठबृहत्पुरश्वेतादिधामपः । ब्रह्मादीनां नियंताऽसौ पुरुषोत्तम एव हि ॥ २१ ॥
असावेव हरिः साक्षान्मदात्मन्यपि सर्वदः । विराजते हि सततं सच्चिदानंदविग्रहः ॥ २२ ॥
निमेषमात्रमप्यस्य दर्शनं देवदुर्लभम् । अनन्ताण्डस्थविषयसुखादप्यधिकं च तत् ॥ २३ ॥
एकरोम्णि स्थितं यत्तु सुखमस्याऽस्ति ते न च । न साम्यं यांति संहत्य कोट्यंडस्थसुखान्यपि ॥
बृहद्धाम्नोंतिके चास्य देवधामानि सर्वशः । प्रयांति निरयौपम्यं मोक्षधर्मेष्वितीरितम् ॥ २५ ॥
एवं साक्षाद्धरिं हित्वा परमानंदरूपिणम् । कथमिच्छामि विषयांस्तुच्छांश्च नरकोपमान् २६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं यः कृष्णमाहात्म्यं बुद्ध्या चिंतयते हृदि । विषयेभ्यो निवर्त्तंते तस्य सर्वेन्द्रियाण्यपि २७॥
आत्मज्ञानाच्च भगवन्माहात्म्यावगमादिह । जातं वैराग्यमखिला निवर्त्तयति वासनाः ॥२८॥
पुंसोऽस्य च पुनर्नैव जायंते विषयैषणाः । अस्यैव च मनः साधो जितमित्युच्यते बुधैः ॥२९॥
एतत्साधनहीनस्तु प्रीतिं कुर्वन्नपीश्वरे । चारुशब्दादिसंप्राप्तौ हित्वा तं तत्र सज्जते ॥ ३० ॥
क्वापि पुत्रकलत्रादिप्रसक्त्या वा हरिं त्यजेत् । रोगादिपीडया वाऽसौ विषयाप्राप्तितोऽपि वा ॥
यावत्स्याद्विषयप्राप्तिस्तावदस्य तु केशवे । प्रीतिः स्यात्तदभावे तु यात्यसौ पामरोपमाम् ॥३२॥
ततोऽसौ नैव शोभेत पूर्ववद्भक्तवेषधृत् । बाल्ये श्वा रमणीयोपि वार्द्धके विकृतो यथा ॥३३॥
इति विषयनिवृत्तेः साधनं ते मयोक्तं तदिह समवगत्य स्वं मनो जेयमुग्रम् ।
वचनममृतमित्थं श्रीहरेः साधुवर्यः स सहसकलसभ्यैर्धारयामास चित्ते ॥ ३४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकोनाशीतितमस्तरंगः ॥ ७९ ॥ १ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । षष्ठीतिथौ नभःकृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारङ्गनगरे भवने जीववर्मणः । वेद्यां न्यषीदत्पीठेऽसौ धृतसर्वसितांशुकः ॥ २ ॥
स्वयंप्रकाशानंदस्तं गृहित्यागिगणावृतम् । उदङ्मुखं च पप्रच्छ प्रणम्यैव तदाज्ञया ॥ ३ ॥
साक्षात् कृष्णे त्वयि क्षोण्यां करुणात्तनराकृतौ । भवेन्मुमुक्षोर्भक्तस्य स्नेहो गाढतरः कथम् ॥
तस्मिंस्तवेति च ब्रूहीत्युक्तस्तं हरिरब्रवीद् । रूपकामस्वार्थलोभगुणेभ्यः स्नेहसंभवः ॥ ५ ॥
तत्र रूपविशेषाद्यः कृष्णे स्नेहो भवेन्नृणाम् । सतु तस्मिन् क्वचिद्दृष्टे वैरूप्ये नश्यति ध्रुवम् ॥
एवं कामस्वार्थलोभजातः स्नेहो महानपि । स्वस्वहेतोरसिद्धौ हि नश्यत्येवेति दृश्यते ॥ ७ ॥
स्नेहोदयतिरोधाने नृणामित्थं नराकृतौ । कृष्णे भवेतां भक्तानां तन्माहात्म्यमजानताम् ॥८॥
कृष्णस्य तु न रूपाद्यैर्भक्तेषु स्नेहसंभवः । तेषां मायामयत्वाच्च स्वस्य मायापरत्वतः ॥ ९ ॥
जातो गुणेभ्यः सद्भयो यः स्नेहः स तु भवेद् दृढः । तत्र कृष्णे नित्यसिद्धाः संति ते त्वनपायिनः
पृथिवीधर्मसंवादे श्रीमद्भागवते हि ते । वर्णिताः संति तान्सद्भयो ये कृष्णाश्रयिणो विदुः ॥
तत्सम्यग्ज्ञानतः कृष्णे तेषां स्नेहो भवेद् दृढः । भक्तेषु तस्य स्नेहोपि गुणैरेव भवेत्प्रभोः ॥१२॥
यैस्ते संपादिता अत्र सद्वार्त्ताश्रवणादिभिः । हरेस्तेषु भवेत्स्नेहस्तस्मिंस्तेषां च वै दृढः ॥१३॥
ऊचेऽथ सोमवर्मा तं विद्मस्तव गुणान्हरे । त्वद्भक्तानां गुणान्सम्यग्न विद्मस्तव संमतान् ॥१४॥
गुणा अपि श्रुता द्वेधा लौकिकाऽलौकिका इति । भवंति तत्र के स्वामिन्भवत्स्नेहस्य हेतवः १५।
तमुवाच हरिः किं स्याल्लौकिकैस्तैस्त्वलौकिकैः । भवेत्स्नेहस्य दार्ढ्यं तु वपुर्वाणीमनोभवैः १६॥
तत्र कृष्णेन सद्भिश्च निषिद्धानां तु कर्मणाम् । तन्वाऽनाचरणं क्वापि दैहिकोऽसौ गुणो मतः ॥
अतारुण्यं क्वचिद्देह उन्मादस्य तु संभवे । तत्तनूकारणं कृच्छ्रैर्दैहिकोऽसौ गुणस्तथा ॥ १८ ॥
क्रियमाणो व्रते कृच्छ्र आहाराल्प्याद्वपुर्यदि । पतिष्यतीति ज्ञायेत तथापि तदवर्जनम् ॥ १९ ॥
यः स्वस्य शरणं कृष्णो महांतश्च तदाश्रिताः । ते तस्य रक्षणं कुर्युः कार्या चिंता न तस्य तत् ॥
कृष्णस्य तच्छ्रितानां च निश्छद्म निजशक्तितः । शुश्रूषणं श्रद्धया यत्स च देहगुणो महान् २१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतैर्देहगुणैः कृष्णे स्नेहो गाढो भवेन्ननु । भक्तस्य च हरेस्तस्मिन् वाचो वच्म्यथ ते गुणान् ॥
कस्यापि प्राणिनो येन दुःखं स्यात्तादृशस्य तु । अनुक्तिर्वचसः क्वापि वाचोऽसौ कथितो गुणः ॥
सद्भिर्महद्भिः स्वस्य स्याच्छास्त्रवादो नृप क्वचित् । जायेत च मुहुस्तत्र जयः स्वस्यैव संसदि ।२४।
तथापि तत्र निर्मानं सप्रणामं च भाषणम् । तदुत्कर्षापादनं च वाचोऽसावपरो गुणः ॥२५॥
किंच क्वचिद्भगवता महद्भिर्वा स्वमीरितम् । विधिवाक्यं तस्य सद्यः करिष्य इति माननम् २६।
यद्यपि स्वस्य तद्वाक्यं कार्यार्हं न भवेदिह । तथापि तस्य वचसा तदानीं स्वादराद् ग्रहः ॥२७॥
अयोग्ये तत्र वचसि स्वस्याशंका तु या भवेत् । समये सा तु प्रष्टव्या प्रभुं वा सत एव वा ॥
तस्यास्ते हि समाधानं कुर्युर्लोकहितोद्यताः । योग्यमेव वदेयुश्च वचसोऽसौ गुणोऽपरः ॥२९॥
गुणैरेतैर्हि वचसो गाढस्नेहो भवेद्धरौ । भजतस्तत्र च हरेर्मनसोऽथ गुणान् शृणु ॥ ३० ॥
दर्शने श्रवणे ध्याने पूजादौ च रमापतेः । तस्यैकाग्र्यं गुणः प्रोक्तः स्वेष्टसिद्धिर्यतो भवेत् ३१।
दर्शने तत्र कृष्णस्य तस्यैकाग्र्यं यदस्ति ह । तत्तु विज्ञायते पुंभिरल्पज्ञैरपि लक्षणैः ॥ ३२ ॥
एकाग्रं हि मनो यस्य पुंसः स्याद्वीक्षणे हरेः । स दृशा हरिमेवैकं वीक्षतेऽन्यन्न किंचन ॥३३॥
मुहुर्दृष्टमपि प्रेम्णा नवं नवमिवेश्वरम् । वीक्षतेऽनुसवं तस्याऽलौकिकत्वं हृदि स्थिरम् ॥ ३४ ॥
कृष्णं स पश्यन् वस्त्वन्यद्यत्किंचिद्दृक्पथागतम् । स्यात्तन्नैवानुसंधत्ते स्थावरं वापि जंगमम् ॥
इष्वेकाग्रमना यद्वद्व्रजंतं स्वाग्रतो नृपम् । नापश्यदात्रेयगुरुरिषुकारस्तथा हि सः ॥ ३६ ॥
यदीदृगेकमनसा दर्शनं तद्धि दर्शनम् । प्रशस्यते सत्पुरुषैर्भक्तिपोषणमुत्तमम् ॥ ३७ ॥
एवं बहिः पश्यतः स्यादंतरेपीक्षणं हरेः । अंतर्बहिश्चेक्षणं यत्तत्सम्यग्दर्शनं मतम् ॥ ३८ ॥
अतो मुमुक्षुभिः पुंभिर्बहिरंतश्च नित्यदा । दर्शनं क्रियते साक्षात् कृष्णस्य प्रयतात्मभिः ३९॥
पश्यंतमीदृशं वीक्ष्य भगवांश्च तदाश्रिताः । प्रीयंते हृदयेऽत्यंतमात्मीयं मन्वतेऽथ तम् ॥४०॥
इतस्ततश्चलदृष्टिर्यस्तु कृष्णमिहेक्षते । सतु कृष्णं च वस्त्वन्यत्साधारण्येन पश्यति ॥ ४१ ॥
न तस्य दृक् स्थिरा कृष्णे न चेक्षणसुखं हरेः । न प्रीतिश्च हरेस्तस्मिन्न सतां च तदात्मनाम् ४२
नाऽलौकिकत्वं कृष्णस्य हृदि तस्य च संभवेत् । यत्तस्य कृष्णवीक्षापि भवत्यन्येक्षया समा ४३।
कृष्णाद् दृग्वृत्तिमाकृष्य प्राकृते नरि वा स्त्रियाम् । पश्चादौ वा योजयतो भक्तत्वं तस्य न प्रभोः
ध्यानादावपि कृष्णं स प्राकृतैर्मनुजादिभिः । सहितं तुल्यभावेन वीक्षते न त्वलौकिकम् ४५ ॥
बहुधारेण मनसा चपलेक्षणमीक्षकम् । वेद्म्यहं सत्तमाश्चान्ये लौकिकेक्षोऽयमित्यमुम् ॥ ४६ ॥
भावः कार्श्यमुपैत्येव तस्य कृष्णेऽनुवासरम् । ततस्तदीयमर्यादामप्यतिक्रम्य याति सः ॥४७॥
दिने दिने परावृत्तिं प्राप्नुवन्नोद्धवाध्वनः । सोऽचिरात्प्राकृतजनैर्याति साम्यं न संशयः ॥४८॥
तस्माद्यथा नरः कामी तरुणीमेकचेतसा । सप्रेम पश्यति चिरं नैवाऽन्यत्स्वंतरागतम् ॥ ४९ ॥
तथैव दर्शनं प्रीत्या कार्यं कृष्णस्य सर्वदा । तदंतरागतं त्वन्यन्नानुसंधेयमण्वपि ॥ ५० ॥
एवं हि पश्यतः कृष्णमाद्येक्षायामिवाऽन्वहम् । अलौकिकत्वनूत्नत्वे दृशः स्यातां न जीर्णता ॥
कृष्णस्य दर्शन इव श्रुत्यर्चाचिंतनादिषु । ऐकाग्र्यं मनसः कार्यं तद्गुणोऽसौ महान् यतः ।
श्रवणं पूजनं ध्यानं विधिनापि कृतं नृणाम् । स्थैर्यं विना तु मनसः शास्त्रोक्तफलदं नहि ५३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इंद्रियेष्विह सर्वेषु चक्षुः श्रोत्रंच चेतसः । आकर्षकं विशेषेण भवतीतस्ततो द्रुतम् ॥ ५४ ॥
तस्मात्तयोर्नियमनं तत्तद्विषयधावनात् । मुमुक्षुणा विशेषेण कर्त्तव्यं सर्वथैव हि ॥ ५५ ॥
अन्यथा ग्राम्यरूपाणि मुहुर्दृष्टानि च श्रुताः । ग्राम्याः शब्दा ध्यानकाले स्फुरंति क्लेशहेतवः ।
दर्शने श्रवणे विष्णोश्चक्षुःश्रवणवृत्तयः । नियंतव्याः प्रयत्नेन विषयांतरधावनात् ॥ ५७ ॥
नियम्यमाना अपि ता यायुश्चेद्विषयांतरम् । तदेंद्रियद्वयं सम्यगुपदेष्टव्यमात्मना ॥ ५८ ॥
साक्षाद्भगवतो हित्वा प्रेक्षणं श्रवणं च वा । धावतो ग्राम्यविषयान्को लाभस्तव दुःखदान् ५९॥
आनंदमूर्तिः श्रीकृष्णस्तत एव सुखोदयः । तद्भिन्ना विषयाः सर्वे दुःखदा मायिकत्वतः ॥६०॥
न चास्ति ते सिद्धदशा यत्सर्वत्रात्मनेप्सितम् । सिद्धयेद्वै साधनदशा तव त्वय्यापि दृश्यते ॥
इतस्ततस्ते भ्रमतो न सिद्धिः स्वेप्सितस्य हि । दुःखाय स कुतस्तर्हि मृषान्यत्र सुखेहया ६२॥
यदि किंचित्क्वचित्तत्र सुखं तुच्छमवाप्स्यसि । तत्कर्मफलमत्युग्रं नरकं प्राप्स्यसि ध्रुवम् ॥६३॥
तस्माद्धित्वाऽन्यविषयांस्तुच्छान् दुःखांश्च मायिकान् । सर्वेश्वरेश्वरे कृष्णे नैश्चल्यं कुरु सर्वथा ॥
स्थैर्यं लब्धवतः कृष्णे तव सिद्धदशा द्रुतम् । भविष्यति ततः सर्वं वांछितं सिद्धिमेष्यति ६५॥
यद्यद्रूपं च शब्दो वा ब्रह्मांडे ते जिघृक्षितम् । तत्तत्प्राप्स्यसि सद्यस्त्वं तदा त्वत्र न संशयः ॥
ब्रह्मादिरूपतुल्यं स्वं रूपं श्रीराधयोरिव । भक्तिं वा यदि कृष्णे त्वं वांछिष्यसि तदाप्स्यसि ॥
यदि सिद्धदशाप्राप्तेः प्रागेवारब्धकर्मणः । समाप्त्या देहपातः स्याद्देहांते तां तदाप्स्यसि ६८।
वृत्तिस्थैर्यं विना कृष्णे कस्यचित्क्वापि वेप्सितम् । सुखं नैव भवेत्तस्मात्तं त्यक्त्वाऽन्यत्र न व्रजेः
चक्षुःश्रोत्रेंद्रिये इत्थमुपदेश्ये मुमुक्षुणा । उक्ता गुणाश्च संसाध्याः कृष्णे स्नेहमभीप्सता ७० ॥

कायिकादिगुणशालिनि भक्ते स्नेहवृद्धिरनुवासरमत्र ।
स्याद्धरेः खलु सतां च हरौ सा तस्य सद्गुणरतेरपि नूनम् ॥७१ ॥
सुधामिवेत्थं वचनं निपीय हरेः स भक्तश्च सदःस्थिता ये ।
तदाश्रितास्तेऽपि सहर्षमीशं प्रणम्य तं तद्धृदये दधुः स्वे ॥ ७२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावशीतितमस्तरंगः ॥ ८० ॥ २ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । नभसः कृष्णसप्तम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे भवने जीववर्मणः । मंचासने बहिर्वेग्रामसौ सायं व्यराजत ॥ २ ॥
सितवासा गृहित्यागिनिजभक्तजनावृतः । प्रसन्नश्रीमुखांभोजः पुष्पगुच्छं करे दधत् ॥ ३ ॥
स्वयंप्रकाशानंदस्तं तदानीं साधुसत्तमः । प्रणम्य प्रांजलिः प्रश्नमेतं पप्रच्छ सादरम् ॥ ४ ॥
उपचारैर्बहुविधैः कृष्णं साक्षान्नराकृतिम् । त्वामर्चेद्भक्त एकोऽन्यो भक्तो मानसिकैस्तथा ५ ॥
तयोर्विशिष्टः कतर इति मे ब्रूहि सत्पते । इति पृष्टः स भगवान्साधुवर्यं तमब्रवीत् ॥ ६ ॥
यो भक्तः पूजयन्कृष्णं प्रेम्णा हृष्टतनूरुहः । भवेद्गद्गदकंठश्च तत्स्वरूपैकचिंतनः ॥ ७ ॥
स बाह्यैरुपचारैर्वा मानसैः कृष्णमर्चतु । भक्तो विशिष्ट एवासौ ज्ञातव्यः साधुसंमतः ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथाविधत्वरहितः साक्षात्कृष्णस्य पूजकः । द्विविधोऽपि स भक्ताख्यो न श्रेष्ठो न च सन्मतः ॥
यैर्यैः साक्षाद्धरेः पूजा बाह्यैर्वाऽत्र मनोमयैः । कृतोपचारैः सप्रेम ते ते भक्ता हि विश्रुताः ॥
अथाऽपृच्छत्सोमवर्मा तं हरिं प्रणतोऽग्रतः । त्वदर्चां विदधत्प्रेम्णा ज्ञेयः कैर्लक्ष्मभिः पुमान् ॥
तमुवाच हरिर्धीमन् लक्षणं तस्य ते ब्रुवे । पूजने सेवने विष्णोः श्रद्धा स्यात्तस्य भूयसी १२ ॥
कथावार्त्ताकीर्त्तनादावतिश्रद्धावृतः स च । कृष्णस्य भूरिमाहात्म्यं विदंस्तद्भक्तसख्यभाक् १३ ॥
कृष्णार्चादौ भूरिकालं व्यतीतमपि सोंऽतरे । विद्यात् क्षगार्द्धवत्प्रेम्णा ततोऽन्यत्र विपर्ययम् ॥
नवधापि भवेद्भक्तिर्नूत्नेवाऽस्याऽनुवासरम् । न त्वेकापि क्वचिज्जीर्णा गौणी वापि महात्मनः ॥
मुक्तानंदोऽत्र दृष्टांतो ज्ञेयः साधुः सदग्रणीः । श्रद्धा भक्तिर्भवत्यस्य नूतना नूतनाऽन्वहम् ॥
आयातोऽहं यदा पूर्वं सौराष्ट्रे लोजपत्तनम् । तत्राऽस्य यादृशी श्रद्धाभक्तिर्माहात्म्ययुग्वरैः ॥
मयाऽवलोकिताऽद्यापि तादृश्येवाऽनुवासरम् । नूत्नेव दृश्यते ह्येवं भक्तो ज्ञेयः स लक्षणैः ॥
ईदृक्श्रद्धां तथा कृष्णमाहात्म्यज्ञानमंतरा । कृष्णांतिकस्था अपि नो भक्ताः स्युर्यादवा इव ॥
नित्यं कृष्णं सेवमानास्तेऽन्यं भूपमिवार्थिनः । अपि नाऽत्र ख्यातिमापुर्नच भक्ताभिधामपि ॥
उक्तलक्षणसंपन्न उद्धवस्त्विह सर्वतः । भक्तोत्तम इति ख्यातः प्रभोश्चाप्यात्मवत्प्रियः ॥ २१ ॥
अतस्तादृक्प्रीतिसिद्ध्यै श्रवणं मननं तथा । अभ्यसंति निदिध्यासं श्रद्धावंतो मुमुक्षवः ॥२२ ॥
इति श्रुत्वा हरेर्वाक्यं साधुः पप्रच्छ सन्मतिः । निर्विकारानंदनामा तं प्रणम्य कृताञ्जलिः ॥
श्रवणं मननं स्वामिन्निदिध्यासं त आत्मनः । साक्षात्कारे साधनानीत्याहुर्वेदांतवेदिनः २४ ॥
तेषामहं लक्षणानि शुश्रूषामि त्वदाननात् । साक्षात्कृते त्वयि कृष्णे प्रीतिः सिध्यति तैर्यथा ॥
इति तेन स संपृष्टः साधुना धर्मनंदनः । तमुवाच शृणु मुने तेषां लक्ष्माणि ते ब्रुवे ॥ २६ ॥
कृष्णभक्तमुखादेव कृष्णस्यैव शुचिस्थले । कथावार्त्ताकर्णनं यदंजसाऽव्यग्रचेतसा ॥ २७ ॥
श्रवणं तत्समाख्यातं मननं तु पुनः पुनः । श्रुतस्यार्थस्य रहसि मनसाऽभ्यसनं मतम् ॥ २८ ॥
मननेन स्वहृद्याप्तसंस्कारस्याऽथ तस्य यत् । स्मरणं सर्वकालं स्यात्तन्निदिध्यासनं मतम् २९ ॥
एवमभ्यसतः पुंसः प्रसादात्परमात्मनः । स्फूर्त्तिः स्यात्सहजा नित्यं तस्यैव त्राकृतेर्हृदि ३० ॥
साक्षात्कारः स कथितो दर्शनं च तदुच्यते । श्रवणादिभिरेतैर्हि कृष्णे प्रीतिर्दृढा भवेत् ३१ ॥
आत्मनः श्रवणाद्यैश्च तीव्रवैराग्यशालिनः । दर्शनं स्यादात्मनोऽपि ब्रह्मचर्यदृढस्थितेः ॥ ३२ ॥
कृष्णाश्रयं विना तत्तु दुष्करं विदुषामपि । श्रवणादीन्यतो भक्ताः कृष्णस्य चाऽत्र कुर्वते ३३ ॥
मननं च निदिध्यासो द्वे मुख्ये ह्यत्र साधने । नेष्टसिद्धिर्विना ते तु पुंसः श्रवणमात्रतः ॥३४ ॥
प्रत्यक्षस्यापि कृष्णस्य दर्शनं तद्द्वयं विना । साक्षात्कारफलं नैव धत्ते श्रवणवन्नृणाम् ॥ ३५ ॥
तद्युतं दर्शनं येषामत्र कृष्णस्य वर्त्तते । ते पूर्णकामा मोदंते क्लिश्यंत्यन्ये त्वभक्तवत् ॥ ३६ ॥
साक्षाद्दृष्टस्य कृष्णस्य येषां मननमंतरे । वर्त्तते स्मृतिमात्रेण तेषां स स्फुरति द्रुतम् ॥ ३७ ॥
इतरेषां तु दृष्टोऽपि ध्याने स्फुरति नैव सः । केचिद्देतदविद्वांसो वदंतीत्थं मदाश्रिताः ॥३८ ॥
वयं तु नित्यं ध्यायामो बहुकालं हरिं हृदि । तथापि नैव पश्यामस्तस्यैकांगमपि ध्रुवम् ३९ ॥
मद्रूपादर्शने तेषां हेतुरुक्तोऽवगम्यताम् । अनुभूतस्य मननं तत्स्फूर्त्तौ बीजमस्ति यत् ॥ ४० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मायिकोऽपि पदार्थोऽत्र नामतः स्फुरति क्वचित् । दिव्यो भावस्तर्हि कुतोऽनभ्यस्तो हृदि संस्फुरेत्
तच्छ्रुतस्य च दृष्टस्य साक्षात्कारकृते प्रभोः । विधेयो मननं यत्नो भुवि सत्संगिनाऽन्वहम् ॥

श्रद्धावद्भिः सुधीभिः श्रवणसुखमहासाधनैः स्वीयभावे
साक्षात्कारे मुरारेरवगत इह वै स्याद् दृढा प्रीतिरेषाम् ।
इत्थं पीत्वा हरेर्वागमृतमनुपमं ते सभक्ताः सदःस्थाः
प्रीताः कृत्वा प्रणामं तदुदितमनने चक्रुराशु प्रयत्नम् ॥ ४३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकाशीतितमस्तरंगः ॥ ८१ ॥ ३ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । कृष्णाष्टम्यां नभोमासे वचोमृतमिदं हरेः ॥ १ ॥
सारंगपत्तने तत्र जीववर्मनृपस्य सः । गृहवेद्यां पीठ उच्चे न्यषीदद्धवलांशुकः ॥ २ ॥
त्यागिभिर्गृहिभिश्च स्वैर्नानादेशागतैर्वृतम् । स्वयंप्रकाशानंदस्तमपृच्छत्साधुरानतः ॥ ३ ॥
गृहे गृहीव देहेऽस्मिन्नात्माऽस्ति पृथगेव हि । तथाप्यैक्यं तयोः स्वामिन् सर्वदैवानुभूयते ४ ॥
अतो यथा तयोरैक्यं नानुभूयेत कर्हिचित् । तथा मां कृपया शाधि सर्वेप्येतद्बुभुत्सवः ॥५॥
तमुवाच हरिः प्रीतः शृण्वेतत्कथयामि ते । ज्ञेयमेतद्धि सर्वेषां सर्वथैव मुमुक्षताम् ॥६॥
श्रुत्वा वाऽधीत्य सच्छास्त्रं सेवित्वा च गुरुं सतः । श्लोकेनैकेन वाऽनेकैर्ज्ञेयमस्त्येतदंजसा ।७।
ययाऽऽत्मा नात्मनोरैक्यभ्रमः स्यान्न हृदि क्वचित् । सैव संवित्सु स्त्रं धत्ते दुःखामिश्रं न चेतरा
स्वरूपलक्षणं तस्मात्तयोर्भेदावबोधकम् । बोद्धव्यमादितः सद्भिर्वैलक्षण्यं ततः स्फुरेत् ॥ ९ ॥
जडो दुःखमयः शश्वन्नश्वरश्च विकारवान् । मलमूत्रादिनिभृतो व्याप्यो रोगाद्युपद्रुतः ॥१०॥
आद्यंतवान्सावयवो नैकरूपश्च मायिकः । दृश्यश्च भौतिकः पिंडो देहो नात्मेति दृश्यताम् ११
चिद्रूपो ज्ञानवान्नित्यो निर्विकारः सुखात्मकः । स्थिरः सदैकरूपश्च स्वप्रकाशोऽतिनिर्मलः १२
असंगी व्यापको द्रष्टा दिव्योऽच्छेद्यादिलक्षणः । अनंगोऽमायिकोऽमृत्युरात्माऽस्तीत्यवधार्यताम्
इत्यात्मानात्मनोः सम्यक् सत्सच्छास्त्रप्रसंगतः । स्वरूपलक्षणं बुद्ध्वा कार्यं तत्परिशीलनम् ॥
तेन पक्वं भवेद्भेदविज्ञानं देहदेहिनोः । ततो न वपुषो धर्मा दृश्येरन्नात्मनि क्वचित् ॥ १५ ॥
सच्चिदानंदरूपोऽहं शरीरं तद्विपर्ययः । कथं भवेद् द्वयोरैक्यं तेजस्तिमिरयोरिव ॥ १६ ॥
अनेनाऽनुभवेनैव दृढीभूतेन सर्वदा । न देहधर्मानुभवः क्वाप्युदेत्यात्मनि ध्रुवम् ॥ १७ ॥
आत्मानात्मविवेकोऽयं यावन्न स्याद् दृढीकृतः । देहधर्मैः प्रपीड्यंते तावदत्र मुमुक्षवः ॥१८॥
एतदभ्यासशैथिल्यात्सतामपि क्वचित्क्वचित् । देहधर्मानुभूतिः स्यात्तया च पशुधीरपि ॥१९॥
देहेऽहंता च ममता दैहिके यर्हि जायते । तदा स्त्रीरसवित्तादौ सक्तिर्भवति दुःखदा ॥२०॥
यथाऽमृतसमे भोज्ये गरोऽल्पोऽप्यतिदुःखदः । एवमात्मसुखे क्वापि देहाहंधीर्हि दुःखदा २१॥
सुधिया येन यत्नेन विवेकोऽसौ दृढीकृतः । आत्मनिष्ठः स वै मुक्तो बद्धोऽन्यो निरयं व्रजेत्
तस्मादभ्यासयोगेन सेवया चात्मवेदिनाम् । आत्मनिष्ठैव संसाध्या विजातीयनिरासतः ।२३।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यो देहदैहिकगणे सदुपासनेन निर्वासनो भजति भावभरेण कृष्णम् ।
भक्तः स एव गदितः स च देहपाते यात्यक्षरं भगवतः परमं हि धाम ॥ २४ ॥

मुक्तानंदोऽथ तं नत्वा पप्रच्छ प्रांजलिः प्रभुम् । स्वामिन्निर्वासनत्वस्य किमात्यंतिकसाधनम् ॥
कृतेन येनैकेनापि साधनान्यखिलान्यपि । कृतानि स्युः साधनं मे तादृशं वक्तुमर्हसि ॥२६॥
तमुवाच हरिः साधो श्रृणु ते वच्मि साधनम् । यन्निर्वासनतासिद्धेरसाधारणमीरितम् ॥२७॥
श्रद्धा च भक्तिः श्रीकृष्णे वाचि तस्य च तत्सताम् । प्राज्ञबुद्धिश्च शास्त्रोक्ततन्माहात्म्यावबोधनम्
निर्वासनत्वसंसिद्धेः साधनानि महर्षयः । चत्वार्येतानि जगदुस्तत्रात्यंतिकमंतिमम् ॥ २९ ॥
सद्भ्यः श्रीकृष्णमाहात्म्यं येन चित्तेऽवधारितम् । सोऽल्पान्यसाधनोऽप्याशु भवेन्निर्वासनः पुमान्
माहात्म्यज्ञानमेकं चेद् दृढं तर्हीतराणि तु । त्रीणि स्युर्बलवंत्येव दुर्बलान्यपि तद्बलात् ॥३१॥
माहात्म्यज्ञानरहिता भक्तिः साक्षाद्धरावपि । वर्द्धमानापि सा नाशं परिणामे ह्यवाप्स्यति ३२
बाला कन्या वर्द्धमाना क्षयोपेता भवेद्यदि । प्रागेव यौवनप्राप्तेर्यथा पञ्चत्वमृच्छति ॥ ३३ ॥
तथा भक्तिर्वर्द्धमाना माहात्म्याज्ञानयुग्यदि । कृष्णप्रसादात्प्रागेव रक्ष्यमाणापि नश्यति ॥३४॥
यत्नेनाप्यर्जिताः शांतिदांतिमुख्या गुणा अपि । माहात्म्यज्ञानहीनस्य पुंसोंऽते यांति हि क्षयम् ।
माहात्म्यज्ञानयुक्तस्य सर्वे ते यत्नमंतरा । आगत्य हृदि वर्त्तन्ते गुणाः कल्याणकारिणः ॥३६॥
तस्माच्छ्रीकृष्णमाहात्म्यमंजसा सत्प्रसंगतः । सच्छास्त्रसेवनाद्वापि वेदितव्यं प्रयत्नतः ॥ ३७ ॥
तद्युक्ता भक्तिरीशस्य भक्तस्य हृदि सद्गुणान् । संपादयंती सकला नाशयत्येव वासनाः ३८ ॥
अत आत्यंतिकं वच्मि माहात्म्यज्ञानमीशितुः । भक्तस्य वासनानाशे साधनं साधुसत्तम ॥३९॥
योगानंदोऽथ साधुः श्रीहरिं तद्गुणगायकः । प्रणम्य विनयेनैव पृच्छति स पुरः स्थितः ४०
श्रद्धया भजतः साक्षात्कृष्णं स्वामात्मनिष्ठया । निर्वासनत्वपक्कत्वमसंपन्नं भवेद्यदि ॥ ४१ ॥
तथाभूतस्य देहांते का गतिर्भविता प्रभो । श्रूयते निरयप्राप्तिर्वपुरात्मधियस्त्विह ॥ ४२ ॥
इति तेन सता पृष्टो भगवान्भक्तिनंदनः । प्रोवाच श्रृणु साधो त्वं भक्तस्य भगवान् गतिः ४३
भजता श्रद्धया कृष्णमात्मनिष्ठाऽतियत्नतः । संपादनीया लोकेऽत्र परत्र च सुखावहा ॥ ४४ ॥
प्रयत्ने क्रियमाणेऽपि तत्सिद्धेः प्राग्वपुःक्षयः । यदि स्यात्तर्ह्यपि हरिः स्वभक्तं रक्षति ध्रुवम् ४५
नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति । इत्यस्ति भगवद्वाक्यं नाऽतोऽसौ यात्यधोगतिम् ॥
अपक्कस्यात्मनिष्ठायां भक्तस्य निरयश्रुतिः । याऽस्ति तत्रापि निरयशब्दार्थं कथयामि ते ॥४७॥
वैभवादेव लोकानां विमानाप्सरश्चादयः । सर्वे निरयशब्देन मोक्षधर्मेषु कीर्त्तिताः ॥ ४८ ॥
ते हि तुच्छसुखाः कृष्णधाम्नोऽस्यानंदरूपिणः । पुरतो निरयैस्तुल्याः संतीति निरया मताः ॥
तान् यांति शिथिला भक्ता न तु ते यमयातनाः । देवा भूत्वा देवलोके तत्स्थान्भोगान् हि भुंजते
देवत्वांतेऽथ मानुष्यं पुनस्ते प्राप्य भूतले । चोदिताः पूर्वसंस्कारैः सांगां भक्तिं वितन्वते ५१
सम्यङ्निर्वासना भूत्वा देहांते ब्रह्मधाम ते । यांतीत्यपक्कज्ञानस्य भक्तस्य गदिता गतिः ।५२।
ततोऽल्पवासनेनाऽत्र कृष्णभक्तेन चेतसि । न्यूनत्वशंकया स्वस्य धैर्यं हाप्यं न कर्हिचित् ५३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नाऽहं देहोऽस्मि चिद्रूप आत्मैवेति निजांतरे। भावयद्भिर्हरिः सेव्यो भक्तैः सोऽस्तीष्टसिद्धिदः ॥

हरिहरिजनवाचि श्रद्दधानैर्मदीयैरविरतमिह कार्यो वासनानाशयत्नः।
इति वचनसुधां ते तस्य पीत्वा तथासौ सदसि सकलभक्ताः संस्थितास्तोषमापुः ५५

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्व्यशीतितमस्तरंगः ॥ ८२ ॥ ४ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। नवम्यां नभसः कृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे निशांते जीववर्मणः। व्यराजतोच्चपीठेऽसौ वेद्यां धृतसितांबरः ॥ २ ॥
त्यागिगृहिवृंदवृतं तं प्रणम्य सदुत्तमः। मुक्तानंदोऽथ पप्रच्छ सत्पतिं संशयच्छिदम् ॥ ३ ॥
त्राकृतेस्ते भुवि स्वामिन् कृष्णस्य जगदात्मनः। नामस्पर्शेक्षणादीनां महिमा श्रूयते महान् ॥
स किं त्वदीयभक्तानामेवाऽस्ति फलदायकः। जीवानां वेह सर्वेषामपीत्यस्योत्तरं वद ॥ ५ ॥
तमुवाच हरिः साधो शृणुस्वोत्तरमंजसा। इंद्रियाणां क्रिया नृणां शास्त्रेपूक्ता द्विधाऽखिलाः ॥६॥
समनस्काश्चाऽमनस्का इति तत्रादिमा हृदि। वासना जनयंत्येव निश्चलाश्चाऽविनश्वराः ॥ ७ ॥
विषयाणां स्मृतिस्तासां चिरकालेऽपि जायते। विस्मर्यमाणा अपि ते शक्या विस्मर्तुमेव नो ॥
अमनस्काः क्रियास्तु स्वान्विषयान् हृदि दुर्बलाः। नैव स्मारयितुं शक्ता दूरितान्कालवेगतः ॥
एवं सत्यत्र ये भक्ता अभक्ता वापि मानवाः। विष्णोर्नामोच्चरेयुर्वा कुर्युस्तत्स्पर्शनादिकम् १०
मनसा सह तच्चेत्स्यात्तर्हि तेषां तु तत्फलम्। स्यादेव सर्वं शास्त्रोक्तं स्मृतिर्विष्णोश्च सर्वदा ॥
मनोवृत्तिविहीनं तु नामसंकीर्त्तनादिकम्। भक्तानामपि नैव स्याद्यथोक्तफलदं खलु ॥१२॥
कृष्णस्य दर्शनं तेषां प्रत्यहं कुर्वतामपि। ध्यानकाले भवेन्नैव स्फूर्त्तिस्तस्य रहस्यपि ॥ १३ ॥
न चैवं संति भक्तानामभक्तैः सह तुल्यता। ज्ञेयोभयेषां तु यतो विशेषोऽस्ति महान् मुने ॥
साक्षात्कृष्णमिह ज्ञात्वा संश्रित्य नवधा च तम्। ये भजेयुस्त एवोक्ता भक्ता इति हि मानवाः ॥
ते तु कृष्णप्रतापेन देहांते सद्य एव हि। प्राप्स्यंति भगवद्धाम मुक्ताः संसृतिबंधनात् ॥१६॥
अन्येषां तु भवेत् पुण्यं कृष्णेक्षाकीर्त्तनादिजम्। यत्संस्कारात्करिष्यंति भक्तिं जन्मांतरेऽपि ते
ततः कालेन यास्यंति सद्गतिं ते तु पुरुषाः। एवं विशेषो विज्ञेय उभयेषां महामते ॥ १८ ॥
तस्मात्कृष्णेक्षणादीनि येषां स्युर्मनसा सह। त एव तत्फलं सर्वं लभंत इति निश्चयः ॥१९॥
यथा गोप्यो व्रजे चक्रुः समनस्कं रमापतेः। स्पर्शमीक्षां कीर्त्तनं च प्रापुः सर्वं च तत्फलम् ॥
श्रीमद्भागवतादौ तद्वर्णितं विस्तरेण हि। तथाऽत्र तानि येषां स्युस्ते स्युस्तत्फलभागिनः ॥२१॥
कृतान्यप्यन्यथा तानि विस्मृतिं यांति कालतः। ततः स्युरकृतानीव पुनस्तत्स्मृत्यसंभवात् ॥

शास्त्रोक्तभक्तिफलसिद्धय ईशवीक्षामुख्यं विधेयमिह कर्ममनोनुयातम्।
श्रुत्वेति वाक्यममृतं स हरेस्तु साधुः प्रापन्मुदं च सकला अपि तत्सदःस्थाः ॥ २३ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ त्र्यशीतितमस्तरंगः ॥ ८३ ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। दशम्यां नभसः कृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे सदने जीववर्मणः। वेद्यां न्यषीदत्स्वपीठे सितवासाः स सत्पतिः ॥ २ ॥
नैकदेशीयभक्तौघवृतं तं कृतवंदनः। पप्रच्छ सन्मुखे तिष्ठन्नित्यानंदः सदग्रणीः ॥ ३ ॥
जाग्रदादिष्ववस्थासु वर्त्तंते इतरे अपि। द्वे द्वे तिसृष्वपि स्वामिन्निति वेदांतिनो विदुः ॥ ४ ॥
तासां विविच्य रूपाणि विविसाम्यहमंजसा। इति पृष्टः स सर्वार्थवेत्तोवाच मुने श्रृणु ॥ ५ ॥
जाग्रत्स्वप्नं सुषुप्तिश्च तिस्रो मिश्रगुणात्मिकाः। अवस्थागुणसांकर्यात्संति मिश्राः परस्परम् ६॥
वैराजस्थित्यवस्थायाः कार्यं सत्वगुणात्मिका। नेत्रस्थानकृतावासाऽवस्था जाग्रदितीरिता ॥७॥
स्थूलदेहाभिमानेन विश्वसंज्ञस्य चात्मनः। बाह्यांतःकरणैर्यत्र सविवेकं यथार्थतः ॥ ८ ॥
शब्दादिबाह्यविषयभोगः स्यात्पूर्वकर्मणाम्। अनुसारेण तत्सत्वप्रधानं जाग्रदुच्यते ॥ ९ ॥
अत्र चेद्विषयान्भ्रांत्या भुंक्त आत्माऽयथार्थतः। रजःप्रधानसत्वात्मजाग्रत्स्वप्नः स उच्यते ॥
भुंजान एव विषयान् शब्दादीनपि जाग्रति। शोकश्रमादिना विद्याद्विवेकाभावतो न चेत् ॥
तमःप्रधानसत्वात्मजाग्रत्सुप्तं तदुच्यते। एकस्यामप्यवस्थायामेवमन्ये उदीरिते ॥ १२ ॥
हिरण्यगर्भस्योत्पत्त्यवस्थाकार्यं गलस्थितिः। रजोगुणात्मिकाऽवस्था संप्रोक्ता स्वप्नसंज्ञया ॥
आत्मनस्तैजसाख्यस्य सूक्ष्मदेहाभिमानिनः। विनाश्यस्थिरभोगाप्तिः पूर्वकर्मानुसारतः १४ ॥
समनस्केंद्रियैर्यत्र बुद्ध्या च स्यात् प्रियाऽप्रिया। रजःप्रधानः स प्रोक्तः स्वप्न इत्यवधारय ॥
स्वप्नेऽपि जाग्रति यथा शब्दादीन्विषयांस्तथा। विवेकेनैव भुंजीत जानन्नात्मा यदा तदा १६॥
सत्वमुख्यरजोवृत्तिस्वप्नोजाग्रत्तदुच्यते। प्राप्तिरप्यत्र मंत्रादेः सत्या भवति कर्हिचित् ॥१७॥
भुंजानोऽपि स्वाप्नभोगान्विद्याज्जाड्येन तान्न सा। तमःप्रधानकरजआत्मकस्वप्नसुप्तिका ॥
ईश्वरप्रलयावस्थाकार्यं च तमआत्मिका। हृदयस्थानगाऽवस्था सुषुप्तिरिति कीर्त्तिता ॥ १९ ॥
वृत्तयोंऽतर्बहिः खानां तथा विषयवासनाः। यत्र कारणदेहे स्युर्लीनाः कर्तृस्ववेत्तृते ॥ २० ॥
तस्याऽभिमंतुः प्राज्ञस्य सगुणब्रह्मणो मुने। सुखलेशेऽतिलीनत्वं भवेत्सा सुप्तिरीरिता ॥ २१ ॥
कर्मसंस्कारतः कर्तृवृत्तेरुत्थानमत्र यत्। स्वप्नो रजो मुख्यतमोमयसुप्तौ च स स्मृतः २२॥
जाग्रत्स्वप्नव्यथातापाद्विशंत्यास्तत्र यत्सुखे। कर्तृवृत्तेः प्रातिलोम्यज्ञानं भवति कर्हिचित् ॥२३॥
सत्वमुख्यतमोमय्यां सुप्तौ तज्जाग्रदुच्यते। धीमंतस्तद्विजानंति पुरुषाः सूक्ष्मदर्शिनः ॥ २४ ॥
एकैकस्यामवस्थायामेवं वेदार्थवेदिभिः। अन्ये द्वे द्वे अवस्थे हि विवेकेन प्रकीर्त्तिते ॥ २५ ॥
अवस्थाभेदविज्ञानमेवं स्यादात्मनो यतः। तत्तुरीयमिति प्रोक्तं वेदांतेषु परं पदम् ॥ २६ ॥
द्रष्टेति च तदेवाहुस्तत्तत्कर्मफलप्रदम्। अंतर्यामीति ब्रह्मेति परब्रह्मेति चागमाः ॥ २७ ॥

श्रुत्वाऽवस्थाभेदमीशोक्तमित्थं नित्यानंदो भूय एवं तमूचे।
बुद्धोऽवस्थाभेद एष त्वदुक्तो वाचो भेदाञ्छ्रोतुमिच्छामि नाथ ॥२८॥

परादिभेदतो वाचं बुधाः प्राहुश्चतुर्विधाम्। बुभुत्सामि स्फुटं तां च जीववैराजदेहयोः ।२९।
तमुवाच हरिः प्रीतो विदंस्तत्सूक्ष्मदर्शिताम्। मुने परा च पश्यंती मध्यमा वैखरीति वाक् ॥
भेदैश्चतुर्विधा प्रोक्ता जीववैराजयोर्बुधैः। तत्र वैराजपुरुषे तस्या भेदान्वदामि ते ॥ ३१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आदौ वैराजशिरसि सहस्रदलपंकजे । कृष्णो विद्वाऽक्षरब्रह्मात्मकं नादं व्यधात्स्वयम् ।३२।
सुषुम्णावर्त्मना सद्यो नाभिकंदं स तस्य तु । व्याप्योदूर्ध्वं ववृधे तस्मान्महाप्राणेन संयुतः ॥
अधोमुखं नाभिपद्मं कदलीकोशवत्स्थितम् । तेनैवाऽभूदूर्ध्वमुखं हृदयावधि तस्य च ॥३४॥
तस्य यो नाभिकंदे तु नादोऽभूत्सा परेति वाक् । वेदोत्पत्त्यै भगवता बीजत्वेन प्रकाशिता ३५
तेजःप्रवाहरूपाऽथ नाभिकंदात्तु तस्य सा । संप्राप्य हृदयाकाशं पश्यंत्याख्यामवाप च ॥३६॥
मध्यमाख्यां कंठदेशं प्राप्यालभत तस्य सा । वदनं प्राप्य याति स्म वैखर्याख्यां च सा ततः ॥
ऊर्ध्वं गच्छत्यधो गत्वा जलयंत्रे यथा जलम् । नाभिमेत्य मुखं याति नादोऽपि शिरसस्तथा ॥
अर्द्धमात्रा मकारश्चाप्युकारोऽकार इत्यमी । वर्णास्ताभ्यः समभवंस्तत्तत्स्थानेषु भासुराः ३९ ॥
कृष्णेच्छया संहतेभ्यस्तेभ्योऽभूत्प्रणवध्वनिः । तस्माच्च वर्णाः सकलास्तेभ्यो वेदा इति क्रमः ॥
नाभिहृत्कंठवक्त्रेषु जीवस्याप्येवमुद्भवः । वाचो भवति कृष्णेच्छावशादेव चतुर्विधः ॥ ४१ ॥
आंतरस्त्रिविधस्तत्र दुर्ज्ञेयो विदुषामपि । तुरीयमेव जानंति वाग्भेदं त्वखिला नराः ॥ ४२ ॥
वैखर्यामेव जीवस्य वाचो भेदचतुष्टयम् । मया तु निश्चितं गुह्यमपि स्पष्टं वदामि ते ॥ ४३ ॥
योंऽतर्यामी कर्मफलप्रदाता पुरुषोत्तमः । स एव जीवश्रेयोर्थं जायते न्राकृतिर्भुवि ॥ ४४ ॥
तदा तद्रूपचरितधामादि वर्णयेद्यया । जीवब्रह्मेशादिरूपं विविच्यात्सा तु वाक् परा ॥ ४५ ॥
पदार्थान्मायिकानत्र विषयांश्च यथार्थतः । वर्णयेत्सविवेकं च यया सा वैखरी तु वाक् ॥४६॥
यया तु वर्णयेदेतान् भ्रांतिमानयथार्थतः । पुरुषः सा तु कथिता मध्यमासंज्ञिका हि वाक् ४७
यया त्वेतान् क्वचिद् ब्रूयाज्जाड्येनाऽव्यक्तवर्णकम् । बालवत्सा तु गदिता पश्यंतीसंज्ञिका च वाक्
एवं जाग्रदवस्थायां प्रोक्ता वाणी चतुर्विधा । अन्यत्राऽवस्थयोः सा तु समाधिस्थैरभीयते ॥

श्रुत्वेति वाचं स हरेः सुधाभां तुतोष साधुस्तु विवेकशाली ।
सदःस्थितास्तत्पदभक्तिभाजः सर्वे जनाश्चापुरदभ्रतोषम् ॥ ५० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुरशीतितमस्तरंगः ॥ ८४ ॥ ६ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । एकादश्यां नभःकृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे वसतो जीववर्मणः । वेद्यां पीठोत्तमे स्वामी स न्यषीदत्सितांबरः ॥ २ ॥
नानादेशागतस्वीयभक्तमंडलमध्यगम् । मुक्तानंदस्तमानम्य पप्रच्छेत्थं सतां वरः ॥ ३ ॥
श्रीमद्भागवतस्याद्याध्यायश्रीधरटिप्पणे । नैमिशारण्यशब्दार्थे लिखिताऽऽख्यायिकाऽस्ति हि ॥
मनोमयस्य चक्रस्य नेमिः शीर्येत यत्र तत् । क्षेत्रं पुण्यतमं ज्ञेयं धर्मानुष्ठानसिद्धिदम् ॥ ५ ॥
इति तत्रोक्तमस्त्यस्य बुभुत्साम्यर्थमंजसा । इति पृष्टो हरिस्तेन तमुवाच दयानिधिः ॥ ६ ॥
अस्यार्थं श्रृणु ते वच्मि स्वीयानुभवनिश्चितम् । चक्रं मनोमयं यत्तन्मन इत्यवधारय ॥ ७ ॥
दशेंद्रियगणो नेमिस्तस्यास्ति भ्रमणाश्रयः । पराङ्मुखत्वं स्वार्थेभ्यस्तस्य प्रोक्ता च शीर्णता ॥ ८ ॥
तद्धेतुस्त्विह सत्संगः पुण्यक्षेत्रं ततस्तु सः । सत्कर्मणां हि संसिद्धिस्तत्रैवाऽऽशु भवेन्नृणाम् ॥
तत्क्षेत्रसेविनां पुंसामिंद्रियाणां निजार्थतः । वैमुख्यं भवति क्षिप्रं धर्मवृद्धिश्च जायते ॥ १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

खानां विषयवैमुख्ये मुमुक्षूणां मनो हरौ । स्थिरं स्यान्नष्टचांचल्यं विषयासक्तिवर्जितम् ॥११॥
शीर्णनेमि यथा चक्रमभ्रमं स्यात्तथा मनः । परावृत्तेंद्रियगणं विषयेभ्योऽभ्रमं भवेत् ॥ १२ ॥
यथा निष्फलको बाणो लक्ष्यं वेद्धुं न शक्नुयात् । निरिंद्रियं मनस्तद्वद्विषयग्रहणेऽक्षमम् ॥
जितेन्द्रियमनोवेगाः सत्संगक्षेत्रसंश्रयात् । ये तेषामेव सिद्धयेद्धै सद्धर्माचरणं द्रुतम् ॥ १४ ॥

प्रश्नोत्तरं ते मुनिवर्य चेत्थमिति प्रभोस्तस्य वचो निपीय ।
सुधां सतोषं सह तत्सदस्थैः प्रापद् गृहस्थैश्च विरक्तपुंभिः ॥ १५ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ पञ्चाशीतितमस्तरंगः ॥ ८५ ॥ ७ ॥

शकाब्दे विक्रमार्कस्य नगाश्वसुभूमिते । द्वादश्यां नभसः कृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे मंदिरे जीवबर्मणः । स न्यषीदत्पीठवरे बहिर्वेद्यां सितांशुकः ॥ २ ॥
नैकदेशागतैर्भक्तैस्त्यागिभिर्गृहिभिश्च तम् । वृतं पप्रच्छ चैतन्यानंदः साधुः कृतानतिः ॥ ३ ॥
ईर्ष्या त्याज्येति भो स्वामिंस्तवाज्ञा वर्त्तते हि नः । यथार्थं लक्षणं तस्याः शुश्रूषामीति मां वद ॥
तमुवाच हरिः साधो ज्ञातव्येर्ष्या तु सैव यत् । परोत्कर्षासहिष्णुत्वं मानमूलं च तापकृत् ॥
मानो हृदि भवेद्यस्य तस्य चेर्ष्याक्रुधादयः । दोषाः समुद्भवंत्यन्ये हातव्यास्ते प्रयत्नतः ॥६॥
ईर्ष्यावान् पुरुषः क्वापि स्वसमस्याऽसमस्य वा । सन्माननादिमुत्कर्षं न सोढुं शक्नुयात्खलु ॥

ज्ञात्वेत्थमीर्ष्यामिह लक्षणेन सत्संगिना साऽऽशु हृदः प्रहेया ।
इति प्रभोर्वागमृतं स पीत्वा मुनिस्तुतोषाऽप्यपरे च सभ्याः ॥ ८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षडशीतितमस्तरंगः ॥ ८६ ॥ ८ ॥

शकाब्दे विक्रमार्कस्य नगाश्वसुभूमिते । त्रयोदश्यां नभःकृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरात्कुण्डलग्राममागतः । सोऽमरक्षत्रगेहस्य वितर्द्यां पीठ उत्तमे ॥ २ ॥
आस्ते स्म शुभ्रवसनो भक्तसंवसमावृतः । मुक्तानंदस्तमानम्य पृच्छति स्म महामतिः ॥ ३ ॥
महाराजाऽत्र मर्त्यानां हृदयेषु युगान्यपि । प्रवर्त्तंत इति स्वामिन् श्रुतं प्राग्भवदास्यतः ॥४॥
क्वचित्सत्यं क्वचित्त्रेता क्वचिच्च द्वापरः कलिः । प्रवर्त्ततेऽत्र को हेतुस्तन्मे त्वं वक्तुमर्हसि ॥ ५ ॥
इति पृष्टस्तमवदत्स्वामी त्वं शृणु सत्तम । गुणेभ्यो हृदयस्थेभ्यः प्रवर्त्तंते युगानि तु ॥ ६ ॥
सत्त्वात्सत्यं प्रभवति त्रेता च रजसो गुणात् । रजस्तमोभ्यां तु युगं द्वापरस्तमसः कलिः ॥७॥
एवं युगानि चत्वारि प्रभवंति गुणत्रयात् । अथ मुक्तानंदमुनिः पुनः पप्रच्छ तं प्रभुम् ॥ ८ ॥
युगप्रवृत्तिमूलानां गुणानां हेतुमीश्वर । ब्रूहि भक्तिविशेषं च कर्त्तव्यं गुणिनां नृणाम् ॥ ९ ॥
हरिरूचेऽथ तं साधो कर्म स्वीयं पुरा कृतम् । हेतुर्गुणप्रवृत्तेस्तु ज्ञातव्यो हि शुभाशुभम् १०
सात्त्विकं कर्म यस्य स्यात्स सत्त्वप्रकृतिर्भवेत् । यस्य स्याद्राजसं कर्म स भवेच्च रजोगुणी ।११।
कर्म स्यात्तामसं यस्य भवेत्स च तमोगुणी । गुणानुरूपाः कुर्युस्ते क्रियाः सर्वे शुभाशुभाः १२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र ये सात्त्विकास्तैस्तु ध्यानाभ्यासो विशेषतः । कर्त्तव्यो बुद्धिनैर्मल्यात्प्रीत्या श्रीराधिकापतेः
राजसानां तामसानां ध्यानं साधयतामपि । न तत्सिद्धिर्भवेत्क्वापि चित्ते मालिन्यदोषतः १४
तस्मात्तैस्तु हरेर्भक्तिः कर्त्तव्या श्रवणादिका । ध्यानं तु संसाधयितुं नैव यत्नश्च नाऽऽग्रहः १५
आत्मनिष्ठा च संसाध्या ज्ञेयश्च महिमाऽपि तैः । अजामिलादिपतितपावनः खलिवति प्रभोः ॥
सांकेत्येनापि नाम्नैव पतितान् पाति यः स हि । प्रत्यक्षो मां तु मिलितस्तन्नामानि गृणामि च ॥
अतो मे भजतः कृष्णं भीतिर्नास्त्येव संसृतेः । कृतार्थोऽस्मीति मंतव्यं संतः सेव्याश्च भावतः ॥
रजस्तमोगुणैरेवं पुरुषैर्धर्मसंस्थितैः । कार्या विशेषतो भक्तिरिति प्रश्नोत्तरे तव ॥ १९ ॥
मुक्तानंदोऽथ तं भूयः पप्रच्छ हरिमीश्वर । तमोगुणप्रधानानां पुंसामस्ति कलिर्हृदि ॥ २० ॥
स केनचिदुपायेन निर्वृत्तिं प्राप्नुयान्न वा । इति पृष्टः स तं प्राह निवृत्तिः स्यात्कलेरपि ॥२१॥
कृष्णतत्साधुवचने विश्वासो यस्य वै दृढः । तेषु प्रीतिः स्थिरा च स्यान्नश्येत्तद्धृदयात्कलिः ॥
कलिं तमश्च तन्मूलं तस्मादत्र जिहासता । स्थाने स्थित्वैव सत्संगः कर्त्तव्यः शुद्धभावतः २३
स्वयंप्रकाशानंदोऽथ पुरःस्थो हरिमब्रवीत् । भगवन्स्थानशब्दार्थं वक्तुमर्हसि मेंऽजसा ॥२४॥
तमुवाच हरिः साधो स्वधर्मः स्थानमुच्यते । वर्णानामाश्रमाणां च स एव परमाश्रयः ॥२५॥
तत्र स्थित्वैव गृहिभिर्भवद्भिः साधुभिस्तथा । कर्त्तव्या भगवद्भक्तिः स्थानभ्रष्टत्वमन्यथा ॥२६॥
तस्मान्मदाज्ञयाप्येष आपद्यपि च कर्हिचित् । नैव त्याज्योऽन्यथा भक्तिः फलदा नैव जायते
मत्पूजा गृहिभिर्यद्वद्वस्त्रभूषाधनादिभिः । क्रियते साधुभिस्तद्वत्कार्या पुष्पदलादिभिः ॥२८॥
एवं सर्वत्र बोद्धव्यं नातो हित्वा तमण्वपि । कार्यं कर्मेति हृदये मम वागवधार्यताम् ॥२९॥

श्रुत्वेति वाणीममृतायमानां हरेः स चान्येऽपि तदीयभक्ताः ।
तथा करिष्याम इति स्वशीर्ष्णा तां धारयामासुरवाप्ततोषाः ॥ ३० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ सप्ताशीतितमस्तरंगः ॥ ८७ ॥ ॥ ९ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । चतुर्दश्यां नभःकृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्रासौ कुण्डलग्रामात्पुनः सारंगपत्तनम् । व्रजन्मार्गे स्तंभनाख्यं ग्राममापत् सह स्वकैः ॥२॥
तस्योपशल्ये प्लक्षस्य छायायां पीठ उत्तमे । ग्राम्यानीते निषण्णोऽभूत्स वृतो भूरिभिर्जनैः ॥३॥
सितांबरधरं तं च तद्भक्ता गानकोविदाः । प्रेमानंदादयः संत उपतस्थुः पुरःस्थिताः ॥ ४ ॥
महासदसि तत्राऽसौ वीक्ष्य तद्ग्रामवासिनः । प्रांजलीन्विनयानम्रान् पिपासून्स्ववचोऽमृतम् ॥
विरमय्याऽऽशु सद्गानं तानुवाच स्वयं प्रभुः । शृण्वंतु सर्वे मद्वाचं पुरुषा योषितोऽपि च ॥६॥
जनाः संति भुवि द्वेधा धार्मिकाश्चाप्यधार्मिकाः । लक्षणैस्ते तु बोद्धव्याः स्वहिताय मनीषिभिः
तत्र ये धार्मिकास्तेषु न स्याच्चौर्यं न पैशुनम् । न पारदार्यं नाऽभक्ष्यभक्षणादि च पातकम् ८॥
तेषु स्वधर्मो नित्यं स्यात्सच्छास्त्रप्रत्ययस्तथा । भीत्येशस्य न ते क्वापि कुर्युस्तत्सेत्वतिक्रमम् ॥९॥
ग्राम्याः पौरा जनाः स्वीयबांधवाश्चाप्यसंशयम् । विश्वासं कुर्वते तेषां जानंति च ऋतं वचः ।
तेभ्य एव सतां संगः सत्यानां रोचते ध्रुवम् । अधार्मिकास्तु ये तेषु भवेदेतद्विपर्ययः ॥११॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्राणिहिंसा चौर्यमदनास्तिकत्वानृतानि च । अपेयपानं चाऽभक्ष्यभक्षणं तेषु नित्यदा ॥ १२ ॥
परस्त्रीलुब्धमनसां सुरामद्यामिषाशिनाम् । तेषां कोऽपि न विश्वासं करोति स्वः परोऽपि वा ॥
सत्सत्संगे रुचिस्तेषां न स्यान्मलिनचेतसाम् । सत्संगिभ्यः परेभ्योऽपि ते द्रुह्यन्ति कलिप्रियाः ॥
धर्माधर्मवतामित्थं ज्ञात्वा लक्ष्माणि बुद्धिमान् । मुमुक्षुः श्रेयसे स्वस्य धर्मिमार्गमनुव्रजेत् ॥
कृत्वा प्रसंगं साधूनां ज्ञात्वा कृष्णं भजेत्तु यः । स एव संसृतेर्मुक्तो भवेन्नान्यस्तु कर्हिचित् ॥

इति वचःसुधया पुरुतर्पिता निजहिताय तदाश्रयमाचरन् ।
तमविदंश्च जनाः परमेश्वरं पुरमगात्स च जीवनृपस्य तत् ॥ १७ ॥

अथ सारंगनगरे निकाय्ये जीववर्मणः । वहिर्वेद्यां शुक्लवासाः स न्यषीदच्छुभासने ॥ १८ ॥
भक्तमंडलमध्यस्थः स्वयमेव प्रभुः सतः । निरीक्षमाणः प्रोवाच सर्वे शृण्वंतु साधवः ॥१९॥
सत्संगमत्र ये कृत्वा श्रद्धयाऽनन्यभावतः । भजंति कृष्णं प्रयताः स्वधर्मस्थाश्च नित्यदा ॥२०॥
देहांते ते व्रजंत्येव धाम तस्याऽक्षराभिधम् । गोलोकं वापि वैकुण्ठं श्वेताख्यं वा यथारुचि ॥
अतिदूरे तानि संतीत्याहुः केचन पंडिताः । समीपा एवेति विदुर्योगीन्द्रा इह केचन ॥ २२ ॥
अत्र वो निश्चितं वच्मि स्वानुभूतिप्रमाणतः । बहिर्दृष्ट्येक्षमाणानां तानि दूरे भवंति हि ॥२३॥
अंतर्दृष्ट्या पश्यतां तु समीपे संति तानि वै । एतेषां हि मतिः सूक्ष्मा स्थूला ज्ञेया बहिर्दृशाम् ।
जडे देहे यथा जीवश्चिद्रूपोऽस्ति विलक्षणः । एवं जीवेऽपि भगवान् स्वप्रकाशोऽस्ति सर्वदा ।
एवमंतर्दृशः कृष्णं विदुरात्मशरीरिणम् । यत्र कृष्णोऽस्ति तत्रैव तद्धामादीति निश्चितम् ॥२६॥
सर्वथेत्थं विदुर्येऽत्र तेभ्यः कृष्णः स पार्षदैः । तद्धामादि च नास्त्येव दूर इत्यवधार्यताम् २७॥
ईदृशाः कृष्णभक्ता ये श्वेतमुक्तैः समाहिते । तद्दर्शनं च भगवद्दर्शनेन समं मतम् ॥ २८ ॥
अनीदृशास्तु ये भक्तास्तेप्येतेषां समागमम् । यदि कुर्युर्दृढं तर्हि तत्समाः स्युरसंशयम् २९॥
यथाऽहिफेनं व्यसनी पुमानापद्यपि क्वचित् । त्यक्तुं न शक्नुयात्तद्वद्ये कुर्युस्तत्समागमम् ॥३०॥
निर्मानवर्त्तनास्ते हि तेषु स्नेहेन सेवया । यांति तत्पदवीमंते ज्ञात्वा कृष्णं यथार्थतः ॥ ३१ ॥

श्रुत्वेति सर्वे हरिकृष्णवाक्यं पीयूषकल्पं सदसि प्रसन्नाः ।
संतश्च भक्ता गृहिणोऽपि लोका बभूवुरीशं प्रणमंति तं स्म ॥ ३२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावष्टाशीतितमस्तरंगः ॥ ८८ ॥ ॥ १० ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । अमायां नभसः कृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे गृहेऽसौ जीववर्मणः । सितांवरः पीठवरे न्यषीदत्स्वसभांतरे ॥ २ ॥
अब्रवीद्विनयानम्रो मुक्तानंदः प्रणम्य तम् । पृच्छामि त्वामहं स्वामिन् यत्कुरुष्व तदुत्तरम् ३॥
पौरुषेण कियानर्थो मनुष्याणां भवेदिह । तव कृष्णस्य कृपया कियानर्थश्च सत्पते ॥ ४ ॥
इति पृष्टः सता तेन स उवाच जगद्गुरुः । तव प्रश्नोत्तरं साधो ब्रवीमि शृणु सादरम् ॥५॥
यः शास्त्रगुरुवाक्याभ्यां दृढवैराग्यवान्भवेत् । श्रद्धालुरात्मनिष्ठश्चाऽहिंस्रो धर्मप्रियः शुचिः ॥६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अष्टांगयुग्ब्रह्मचर्यः कृष्णमाहात्म्यवित्तथा । स एवैवंविधगुणः पौरुषेण भवेन्मुने ॥ ७ ॥
अहंममत्वमायाया देहदैहिकयोरसौ । नष्टत्वान्मुच्यते जन्ममृत्युसंसृतितः खलु ॥ ८ ॥
एतादृशे हि पुरुषे कृपा भगवतो भवेत् । तयेति गुणवान्स स्याप्याप्य तस्याक्षरं पदम् ॥ ९ ॥
निरंजन इति श्रुत्या महिमा स्यैव वर्ण्यते । मायांजनविहीनेन साम्यं यत्प्राप्यते हरेः ॥ १० ॥
साम्यं साधर्म्यमित्युक्तं प्राप्नोति परमं स तत् । न बध्यतेऽतो हरिवत्कर्मभिश्च शुभाशुभैः ॥
अतिस्नेहेन लक्ष्मीवत्प्राप्नोत्यैक्यं क्वचिद्धरौ । क्वचित्पृथक् स्थितो भक्त्या सेवते तद्वदेव तम् ॥
क्रियासु च स्वतंत्रत्वं प्राप्नोति भगवानिव । ईदृक्सामर्थ्यसंप्राप्तिः कृपया भवति प्रभोः १३ ॥
इति प्रश्नोत्तरं श्रुत्वा साधुः स प्रीतिमानभूत् । नित्यानंदोऽथ पप्रच्छ प्रणम्य तमुदारधीः ॥
उक्तसर्वांगसंपन्ने स्यात्ते भक्ते कृपा हरेः । न्यूनेंऽगे सति कस्मिंश्चित्कस्यचित्का भवेद्गतिः १५ ॥
स्वाम्युवाचाऽथ सततं श्रृणु साधो महामते । स तु नात्यंतिकीं मुक्तिं प्राप्नोति पुरुषो ननु ॥
वैराग्यब्रह्मचर्यात्मनिष्ठाश्रद्धादिकेषु यः । अंगेष्वेकेन हीनः स्याद्धामेयात्सोऽक्षरेतरत् ॥ १७ ॥
द्वित्रांगहीनस्तु पुमान् देवलोकानवाप्नुयात् । येऽक्षरस्याऽग्रतः प्रोक्ता भारते निरयोपमाः ॥
देवो भूत्वा पुनरसौ मानवीं योनिमाप्नुयात् । पुनर्देवः पुनर्मर्त्यः स इत्थं जायतेऽनघ १९ ॥
भक्तत्वाद्धीनयोनिं तु नैवासौ लभते क्वचित् । अनेकजन्मसंसिद्धस्ततो याति परां गतिम् २० ॥
यदोक्तलक्षणैर्युक्तो भवेत्सद्गुरुसंश्रयात् । कृपया स हरेस्तर्हि यात्यंतेऽस्याऽक्षरं पदम् ॥ २१ ॥
भक्तस्तत्र गुणातीते स चोक्तगुणवान् भवेत् । तस्मान्मदाश्रितैर्भाव्यं सर्वांगनिभृतैरिह ॥ २२ ॥
यदा कृष्णेतराः सर्वा नाशमेष्यंति वासनाः । तदा ब्रह्मगतिर्भाव्या नान्यथेति विनिश्चयः २३॥
इति वाक्यं गुरोः श्रुत्वा नित्यानंदस्तुतोष सः । नृसिंहानंदनामाऽथ साधुः पप्रच्छ तं नतः ॥
देहेनानेनैव भवद्भक्तो निर्वासनः प्रभो । उपायेन भवेत्केन ब्रूहि मेऽथाब्रवीद्धरिः ॥ २५ ॥
विदित्वा कृष्णमाहात्म्यं यथावत्सद्वय आदरात् । भजेदेकांतभक्त्या तं योऽप्रसक्तो जितेंद्रियः ॥
तस्यास्मिन्नेव देहे वै नित्योद्युक्तस्य देहिनः । हरेः प्रतापात्सर्वासां वासनानां क्षयो भवेत् २७ ॥
वासनानां क्षयो यस्य न जातो वार्द्धकावधि । मृत्यूपांत्यमुहूर्त्तेऽपि यदि तस्यापि माधवे २८ ॥
एकांतिकी भवेद्भक्तिस्तदाऽसौ तत्प्रसादतः । भूत्वा निर्वासनः सद्यो ब्रह्मधामाप्नुयात्प्रभोः ॥
तस्माद्विधाय सत्संगं नित्यं माहात्म्यमीशितुः । श्रुत्वा दृढतरा भक्तिः कार्याऽस्मिन्निष्टसिद्धिदा ॥

इति प्रभोर्वाचमसौ निशम्य सुधासमां प्राप्य पुरुप्रहर्षम् ।
भक्तिं दृढामाचरति स्म कृष्णेऽपरे च ये तत्पदसंश्रयास्ते ॥ ३१ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावेकोननवतितमस्तरंगः ।। ८९ ।। ।। ११ ।।

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । भाद्रशुक्लप्रतिपदि वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे निलये जीवशर्मणः । वेद्यां मंचोत्तमे स्वामी स न्यषीदत्सितांबरः ॥ २ ॥
त्यागिभिर्गृहिभिर्भक्तैरनेकैः परितो वृतम् । निर्विकारानंदनामा साधुः पप्रच्छ तं नमन् ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वामिंस्त्वत्सजने के के गुणा नित्यमवस्थिताः । आयांति च पुनर्यांति के के तद्वक्तुमर्हसि ४ ॥
सोऽब्रवीच्छृणु सद्बुद्धे सत्सु नित्यास्त्विमे गुणाः । आत्मनिष्ठा स्वधर्मश्च दृढनिश्चय ईशितुः ॥
आगच्छेयुर्गुणास्त्वन्ये गच्छेयुश्च क्वचित् क्वचित् । मुने प्रश्नोत्तरं त्वित्थं तवास्तीत्यवधारय ६ ॥
मुक्तानंदस्ततोऽपृच्छद् व्यक्तिर्देहात्मनोः पृथक् । ज्ञातापि नःपुनः स्वामिन् कथं प्राप्नोति विस्मृतिं
तमुवाच ततः स्वामी व्यक्तिर्देहात्मनोर्यदि । पृथग्ज्ञाता भवेत्सम्यक् तर्हि सा नैति विस्मृतिम् ।
यथा कृष्णस्वरूपस्य सम्यग्जातोऽत्र निश्चयः । नापयाति क्वचित्तद्वद्देषापि सुदृढा मुने ॥ ९ ॥
यदि मन्येत देहोऽहमिति क्वचिदसौ पुमान् । तथाप्यसौ न दृश्येत स्वस्वरूपतयाऽस्य हि १० ॥
देहात्मबुद्धेराभासः क्वचिद् दृश्येत चेदसौ । मनोभ्रमोऽतो मिथ्यैव न तु सा तस्य तात्त्विकी ॥
पक्वज्ञानवतः पुंसः सदाऽऽत्माहमिति स्थितिः । आत्मापि ब्रह्मरूपश्च तत्र कृष्णं स पश्यति ॥
स्वयंप्रकाशानंदोऽथापृच्छत्साधुर्हरिं नमन् । विचार आत्मरूपस्य कीदृक्कर्त्तव्य ईश्वर ॥ १३ ॥
स्वाम्युवाच यदा द्रष्टा जीवोंऽतःकरणेक्षगः । आस्ते तदा बहिः स्थूलदेहार्थान् विस्मरत्यसौ ॥
अंतःकरणतद्द्रष्ट्रोरंतरे यत्तदा स्थिरः । विचारस्तेन संवीक्ष्या मनोबुद्ध्यादिवृत्तयः ॥ १५ ॥
एवं समीक्षमाणस्य लीयंते ता अशेषतः । तदैव भगवन्मूर्तिध्यानं तेन विधीयताम् ॥ १६ ॥
यावन्न वृत्तयो लीना भवेयुस्तावदेव तु । ता एव वीक्ष्याः परितः कार्यं ध्यानं तु न प्रभोः १७
ज्ञानेंद्रियाणि स्थूलेऽथ यदा स्वविषयान् प्रति । गच्छेयुश्च तदा कार्यो विचारः सुधिया द्विधा
तत्रेंद्रियादीयमानविषयाकार आदिमः । नश्वरा दुःखरूपाश्च विषया इति लक्षितः ॥ १९ ॥
अक्षगोलकगद्रष्ट्राकारः साधो द्वितीयकः । द्रष्टा तु सच्चिदानंदरूप एवेति लक्षितः ॥ २० ॥
एवं विदधतः पुंसो विचारो द्विविधोऽप्यसौ । एकीभवत्यथाऽर्थेभ्यो विच्छिद्यंतेऽक्षवृत्तयः २१
विनेदृशं विचारं तु विषयेभ्योऽक्षवृत्तयः ॥ बलात्कृष्टा अपि मुने तत्प्रीतिं न त्यजंति हि २२
परावृत्ता विचारेण यास्तास्तु न पुनः क्वचित् । सज्जंते विषयैः स्वीयैरिति जानीहि निश्चयम् २३
यावद्भवेयुर्विषयोन्मुखास्तास्तावदेव तु । ध्यानं न कार्यं कृष्णस्य कार्यं तासु स्थिरासु तु ॥२४॥
वर्त्तेत यावद्द्रष्टा च स्थूलदेहेऽभिमानवान् । तावत्सूक्ष्मांतःकरणवृत्तीस्त्वीक्षेत न क्वचित् २५
यदांतःकरणं पश्येत्तदा स्थूलं च विस्मरेत् । द्रष्टृदृश्यविचारेण तत्तद्धर्मान् पृथग्न्यसेत् ॥२६॥
जन्मादीनथ बाल्यादीन् स्थूलत्वादींश्च दैहिकान् । धर्मान्न्यसेद्देह एव न त्वात्मनि विवेकवान् ॥
अच्छेद्यादीन् सदादींश्च धर्मानात्मनि विन्यसेत् । एवं विवेकाभ्यसनं मुहुः कर्त्तव्यमादरात् ॥
बाह्यांतःकरणानां च यावद्वृत्तिबलं भवेत् । तावन्न स्वास्थ्यमास्थेयं कर्त्तव्यश्चैव उद्यमः २९॥
पीडाऽरीणां भवेद्यावत्तावद्राजा यथा सुधीः । राजासनसुखं नैव भुंक्ते भुंक्ते च तत्क्षये ॥३०॥
तथा भक्तोऽपि यावत्स्वेंद्रियांतःकरणार्दनम् । स्यात्तावदप्रमत्तस्तत्प्रतीकारपरो भवेत् ॥ ३१ ॥

इति निपीय हरेर्वचनामृतं मुदमवाप्य स चाखिलसाधवः ।
हृदि निजेशविचिंतनसिद्धये तदुदितात्मविचारमकुर्वत ॥३२॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ नवतितमस्तरंगः ॥ ९० ॥ १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । भाद्रशुक्लद्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे निलये जीववर्मणः । बहिर्वेद्यां वरे पीठे स न्यषीदत्सितांशुकः ॥ २ ॥
भक्तसंघैः परिवृतं प्रसन्नं तमुदङ्मुखम् । मुक्तानंदो नमस्कृत्य पप्रच्छ प्रांजलिः सुधीः ॥ ३ ॥
भगवन्निश्चयो यस्य प्राक्तु ते भवति प्रभोः । तिरोहितः स च पुनर्भवतीतीह दृश्यते ॥ ४ ॥
स किं प्रागेव हृदये न जातः किंतु बाह्यतः । यद्वा स हृदि जातोऽपि नश्यति क्वापि कारणात् ।
यद्वा स ते प्रभोर्भक्तैः कार्यते शास्त्रसंमतैः । आश्चर्यकारिभिस्ते सच्चरितैरतिमानुषैः ॥ ६ ॥
तं च क्वचिद्विदधतो नृनाट्यजनमोहनम् । वीक्ष्य तच्चरितं ते तु तुच्छप्राकृतकर्मवत् ॥ ७ ॥
अनीश्वरक्रिया ह्येषा कुतः स्याच्छास्त्रसंमता । तस्मान्नायं हि भगवानिति ज्ञात्वा त्यजंति किम् ।
इति पृष्टः सता तेन तमुवाच वृषांगभूः । प्राक् स तादृग्न जातोऽस्ति बाह्यतोऽपि न वा मुने ।
कुसंगेन न मानुष्यदृष्ट्या नष्टो न सोऽस्त्यतः । कृष्णस्य त्वाकृतेः सत्यः स्याच्छास्त्रेणैव निश्चयः ॥
अशास्त्रसंमतः क्वापि निश्चयो नैव संभवेत् । जातो वा कस्यचित्क्वापि तिरोधत्तेऽल्पकालतः ।
यस्य यस्याऽस्ति स दृढः स ज्ञेयः शास्त्रसंभवः । भगवद्भक्तवाक्यानि शास्त्रबाह्यानि न क्वचित् ।
बहुधा नरनाट्यानि शास्त्रेष्वेव रमापतेः । वर्णितानि चरित्राणि संति खल्वद्भुतानि च ॥ १३ ॥
अतो नास्त्येव चरितं त्वाकृतेर्ननु तस्य तत् । यत्स्याच्छास्त्रबहिर्भूतं पुंसो निश्चयनाशकृत् ॥ १४ ॥
भगवद्भक्तलक्ष्माणि शास्त्रात्सम्यक् प्रतीयते । अतः शास्त्रप्रमाणानां जायते कृष्णनिश्चयः ॥
धर्मप्रवृत्तेर्मूलं च शास्त्रमेवास्ति सर्वथा । सम्यग्धर्मं विदुरतः शास्त्रज्ञा आचरंति च ॥ १६ ॥
अगम्यस्त्रीवर्जनादि यो धर्मोऽन्यत्र दृश्यते । धर्मज्ञपूर्वजपरंपरासंप्राप्त एव सः ॥ १७ ॥
नैव शास्त्रप्रतीतिः स्याद्यस्य चेतसि तस्य तु । कृष्णस्य निश्चयो न स्याद् दृढं धर्मे च न स्थितिः

वाचं सुधामिति निपीय गुरोः स साधुर्नष्टस्वसंशय उवाह मुदं तथाऽन्ये ।
भक्ता जनाः सदसि साधुगृहस्थसंज्ञाः सर्वे च तं सुखनिधिं मुदिताः प्रणेमुः ॥ १९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावेकनवतितमस्तरंगः ॥ ९१ ॥ १३ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । भाद्रशुक्लतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे गृहे जीवाख्यभूपतेः । पीठोत्तमे बहिर्वेद्यां न्यषीदत्स सितांबरः ॥ २ ॥
पीतपुष्पमयोत्तंसः पीतपुष्पसुशेखरः । सत्पीतपुष्पहारालिः प्रतीचीनमुखांबुजः ॥ ३ ॥
स्वभक्तैः साधुगृहिभिर्नानादेशागतैर्वृतम् । स्वयंप्रकाशानंदस्तं प्रश्नं पप्रच्छ सद्गुरुम् ॥ ४ ॥
प्राप्तानां तव सद्धाम भक्तानां पतनं ततः । भवतीत्यत्र को दोषस्तेषां तिष्ठति हृद्गतः ॥ ५ ॥
श्रूयते हि पुराणेषु धाम्नो वैकुण्ठतस्तव । पतनं द्वाःस्थयोर्भूमौ जयस्य विजयस्य च ॥ ६ ॥
तथा गोलोकधाम्नोऽपि राधाश्रीदामभक्तयोः । अन्योन्यशापात्पतनं हेतुरत्रास्ति कः प्रभो ॥ ७ ॥
इति पृष्टो हरिः साधुं तमुवाच मुने शृणु । यः प्राप्तो भगवद्धाम भक्तः स न पतेत्ततः ॥ ८ ॥
वैकुण्ठाद्द्वाःस्थयोर्भूमौ पतनं यदभून्मुने । तत्तु कृष्णस्येच्छयैव न त्वन्यत्तत्र कारणम् ॥ ९ ॥
स्वेनैव पार्षदौ स्वस्य पातितौ तेन कुर्वता । भक्तापराधासहनस्वस्वभावप्रदर्शनम् ॥ १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वैकुण्ठादपि सद्द्रोही पतत्येवेति तेन च। विस्तारितं सन्माहात्म्यं सात्वतांपतिना खलु ॥
कृष्णेच्छया यत्पतनं पतनं तन्न लौकिकम्। लीलैवैषा भगवत इति जानंति तद्विदः ॥ १२ ॥
जन्मत्रयांते च पुनस्तस्य धाम तदेव तौ। प्रतिपन्नौ यथापूर्वं तत्सेवायां च तस्थतुः ॥ १३ ॥
पतितस्तु स विज्ञेयो यो न पूर्वस्थितिं व्रजेत्। तस्मात्तत्पतनेनैव कर्त्तव्यः संशयो मुने ॥१४॥
एवमेव हि गोलोकाद्राधाश्रीदामपातने। कृष्णस्येच्छैव विज्ञेया न तु रीतिर्हि लौकिकी १५.
भुवि लीलेच्छया तेन सद्धर्मं पातुमासुरात्। स्वयमेवावतरता ततस्ताववतारितौ ॥ १६ ॥
कृष्णेच्छामंतरा त्वेकं वैकुण्ठादेस्तु धामतः। केनापि हेतुना क्वापि भवेत्पातो न कस्यचित् १७.
कृष्णेच्छा तु स्वतंत्राऽस्ति किं किं न विदधीत सा। जडं कुर्याच्चेतनं या चेतनं च जडं पुनः ॥
ज्ञानवैराग्यधर्मैर्युक्तामेकांतिकीं हरेः। भक्तिं विदधते तेषां पातशंका न कुत्रचित् ॥१९॥
श्वेतद्वीपस्थभक्तैस्ते लभंते तुल्यतामिह। इति प्रश्नोत्तरं तेऽस्ति किंचित्पृच्छामि वोऽप्यथ २०.
कृतानुमोदनः सद्भिस्तान्स पप्रच्छ सर्ववित्। जिहीर्षुस्तद्बुद्धिगतं विपर्यासांशमीश्वरः ॥२१॥
उक्तं सनत्सुजातीये भारतोद्योगपर्वणि। त्यजेत्प्रमादमोहौ यस्तरेन्मृत्युं स वा इति ॥ २२ ॥
तावेव मृत्यू चेत्युक्तं ततस्तौ भगवज्जनैः। सर्वथा परिहातव्यौ मृत्युमाशु तितीर्षुभिः ॥२३॥
एवं सत्यपि कृष्णस्य माहात्म्यमवलंब्य ये। तौ हातुं न यतंतेऽत्र भक्तास्त्यक्तगृहा अपि २४:
तेषामेवंविधे ज्ञाने हेतुः को वाऽस्ति साधवः। आदौ विचार्य तं सम्यक् ततो मह्यं स कथ्यताम् ॥
इति पृष्ट्वा स्थिते तूष्णीं हरौ तस्य पुरःस्थितः। स्वयंप्रकाशानंदस्तं प्रोवाच विनयानतः २६
यः स्याद्भक्तस्तु भवतः स त्वन्माहात्म्यगौरवात्। प्रमादमोहनाशादौ यत्नं कुर्यात्कुतः प्रभो २७.
अनायासेन तन्नाशो भवेच्चेद्भवतु प्रभो। अनष्टौ वा वराकौ तौ किं कर्त्तारौ प्रभोः पुरः ॥२८॥
एवं ब्रुवंतं तं साधुं हरिः प्रोवाच सस्मितम्। तयोर्नाशे न यत्नं यः कुर्याद्भक्तो यथाबलम् ॥
विदध्याद्यश्च तं साधो तयोः कतर उत्तमः। इति संचोदितस्तेन साधुः प्रोवाच तं पुनः ॥
अत्राद्यस्तव माहात्म्यबलग्राह्यत उत्तमः। न त्वन्यः साधनबलग्राहीत्युक्तोऽब्रवीद्धरिः ॥३१॥
पतिव्रता पतिमिवाऽनन्यभावेन यो हरिम्। भजते भक्त इत्याख्यां स एवाप्नोति सन्मताम् ॥
प्रमादमोहयोस्त्यागे यस्य चिंता न सर्वथा। स भक्तः श्रेष्ठ इत्युक्तो भवता त्यागिना मुने ॥
यथा पतिव्रता नारी पश्यंती पुरुषांतरम्। रंजयेत्करताल्याद्यैर्बिभियान्न कुतश्चन ॥ ३४ ॥
सापि श्रेष्ठा भवेत्तद्वत्स श्रेष्ठो भवता मतः। यथार्थभक्तो यस्त्वन्यः स तु न्यूनस्ततो मतः ३५ ॥
यथा सत्यन्यपुरुषवीक्षास्पर्शौ त्यजेत्सुधीः। स्वधर्मभंगात् पत्युश्च भीता तिष्ठेच्च सर्वदा ३६ ॥
तथा प्रमादमोहौ यस्त्यजेत्सद्धर्मभंगतः। धर्मरक्षककृष्णाच्च भीतस्तिष्ठेच्च सत्पथे ॥ ३७ ॥
वदतां तमपि न्यूनं तं युष्माकं त्यागिनां मतिः। विपर्यस्तेति मे भाति तस्माद्वेद्यं न हीदृशम् ॥
प्रमादमोहौ शत्रू द्वौ सद्भिर्हेयौ प्रयत्नतः। अन्यथा दुःखदौ स्यातां तौ सतोऽप्यसतो यथा ॥
यथा हि मादकं वस्तु भक्षितं मत्तयेद्ध्रुवम्। बालं युवानं वृद्धं वा पंडितं वाप्यपंडितम् ॥
शत्रुद्वयं तथैवैतत्पीडयेदात्मधारकम्। असज्जनं सज्जनं वा पुमांसं योषितं तथा ॥ ४१ ॥
विशेषं सदसत्पुंसोरेतावंतं विबुद्ध्यताम्। आद्यः शक्नोति तौ हातुं साधनैर्नेतरस्त्विति ॥४२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतः सता प्रयत्नेन हेयौ मायेतितावुभौ । स्थूलादिदेहभिन्नेन कार्या भक्तिस्तथाऽऽत्मना ४३॥
इति श्रीहरिवाक्येन नष्टबुद्धिविपर्ययाः । स्वयंप्रकाशानंदाद्या बभूवुस्तत्र साधवः ॥ ४४ ॥
प्रहृष्टास्तेऽथ तं नत्वा पप्रच्छुः संशयं प्रभुम् । तत्त्वात्मके स्थूलदेहे सूक्ष्मदेहे च सत्पते ॥४५॥
समानि संति तत्त्वानि द्वयोर्न्यूनाधिकानि वा । इति पृष्ठः स सर्वज्ञ ऊचे श्रृणुत साधवः ४६॥
स्थूलदेहे तु तत्त्वानि महाभूतानि पंच वै । सूक्ष्मदेहे तु तत्त्वानि भवंत्येकोनविंशतिः ॥ ४७ ॥
ज्ञानेन्द्रियाणि पंचैव पञ्च कर्मेंद्रियाणि च । प्राणाः पञ्चांतःकरणचतुष्कमिति तानि वै ॥४८॥
स्थूलेऽपि स्यादनुस्यूतं यदा सूक्ष्मं तदा क्रियाः । सर्वा अपि यथार्थाः स्युरन्यथा तु न वै तथा
तथाहि स्थूलकर्णेन विना सूक्ष्मगतं भवेत् । श्रोत्रेंद्रियं तु शब्दस्य न यथार्थावबोधनम् ५०॥
एवं दृगादौ सर्वत्र तदीयविषयग्रहः । न जायते विना सूक्ष्मं स्थूलमात्रेण देहिनाम् ॥ ५१ ॥
स्थूलदेहेऽप्यतः पंचतत्त्वे सूक्ष्मशरीरकम् । एकोनविंशतितत्त्वात्मकमस्त्यनुसंहितम् ॥ ५२ ॥
एवं सति स्थूलदेहे ज्ञातव्यानि विवेकिभिः । चतुर्विंशतितत्त्वानि मिश्रैस्तैर्जायते क्रिया ५३॥
एवं सूक्ष्मेऽप्यऽनुगतं ज्ञातव्यं स्थूलमंजसा । उभाभ्यां मिश्रिताभ्यां तद्भोगसिद्धिर्हि जायते ॥
स्वप्नेऽप्यऽतः स्त्रियासंगे वीर्यपातो य उद्गतः । स दृश्यते स्थूलदेहे ज्ञेयमैक्यं ततस्तयोः ५५॥
तस्मात्सूक्ष्मशरीरेऽपि विज्ञेयानि मनीषिभिः । चतुर्विंशतितत्त्वानीत्युभयोस्तत्त्वतुल्यता ५६ ॥
इति प्रश्नोत्तरं श्रुत्वा संतस्तं पुनरूचिरे । देहयोरुभयोस्तौल्यं त्वयोक्तं स्थूलसूक्ष्मयोः ५७ ॥
तदा तु क्रियमाणानां कर्मणां स्थूलसूक्ष्मयोः । संबंधेऽपि भवेत्तौल्यं तत्तथाऽस्त्यन्यथाऽस्ति वा ॥
तानुवाच हरिः संतः कर्म संबंधतुल्यता । उभयोरस्ति वपुषोर्नृणां तदभिमानिनाम् ॥ ५९ ॥
दृढाभिमाने स्थूलस्य लेपः स्यात्तज्जकर्मणाम् । यथा तथैव सूक्ष्मस्याप्यभिमाने भवेत्स च ६० ॥
कर्मणां सूक्ष्मजातानां क्वचिदाल्प्यं यदीरितम् । धैर्यदानाय जीवस्य तद्धि ज्ञेयं न तत्त्वतः ६१ ॥
यस्य नाहंकृतो भावस्तस्य तु स्थूलदेहजैः । बंधनं कर्मभिर्नास्ति न च सूक्ष्मशरीरजैः ॥ ६२ ॥
आत्मैवाऽहं न देहोऽस्मीत्येवं स मनुते सदा । ततोऽस्य नास्ति संबंधः सुखदुःखैः शरीरजैः ॥
देहाभिमानिनस्त्वस्ति तत्संबंधो द्वयोरपि । वपुषोस्तद्भवं दुःखं सुखं च स्वप्नजाग्रतोः ॥६४॥
देहाभिमानिनस्त्वंते यमदूतेक्षणं भवेत् । ततो मूर्च्छादेहपातौ भवेतां नरकस्ततः ॥ ६५ ॥
आत्मनिष्ठस्य भक्तस्य त्वंतकाले भवेद्धरेः । दर्शनं वा तदीयानां देहपातस्ततो भवेत् ॥ ६६ ॥

देहे मृतेऽसौ धृतदिव्यमूर्त्तिर्ज्ञानी तु भक्तोऽक्षरधाम याति ।
इति प्रभोस्तेऽमृततुल्यवाचं निशम्य संतो मुदिता बभूवुः ॥ ६७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्विनवतितमस्तरंगः ॥ ९२ ॥ १४ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । चतुर्थ्यां प्रौष्ठपच्छुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे गेहे जीवाख्यभूभुजः । स व्यराजन्महापीठे वेद्यां धृतसितांशुकः ॥ २ ॥
नानादेशागतस्वीयभक्तमंडलमध्यगः । उवाच स्वयमेवाऽसौ साधून्प्रति पुरःस्थितान् ॥ ३ ॥
संतः श्रृणुत वः प्रश्नं पृच्छाम्येकं तदुत्तरम् । विचार्य कुरुतेत्युक्त्वा पृष्टवान् संशयापहृत् ४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वौ कौचिद्भवतो भक्तौ साक्षात्कृष्णस्य सेवकौ । तत्रातिप्रीतिमान् कृष्णे भवत्येको नराकृतौ ॥५॥
कृष्णेक्षणं विना स्थातुं शक्नुयान्नाप्यसौ क्षणम् । लोकेऽपि प्रेमबहुलं तस्य दृश्येत सर्वथा ॥६॥
अन्यस्तु भक्त आत्मज्ञस्तीव्रवैराग्यवांस्तथा । कृष्णेऽपि प्रीतिमानस्ति स्वधर्मं परिपाति च ॥७॥
किंतु लोके न विदितं प्रेम स्यात्तस्य पूर्ववत् । पूर्वभक्ते त्वात्मनिष्ठा वैराग्यं च न वर्त्तते ॥ ८ ॥
तथापि तस्य सा भक्तिर्लोकेऽत्यंतं हि शोभते । तद्वदस्य तु भक्तस्य भक्तिर्लोके न शोभते ॥९॥
एवंविधावुभौ भक्तौ तयोर्मध्ये क उत्तमः । अत्रोत्तरं भवंतो मे कथयंतु यथोचितम् ॥ १० ॥
इति पृष्टे तेन सर्वसतामनुमतेन तम् । स्वयंप्रकाशानंदाख्यः साधुः प्रोवाच संनतः ॥ ११ ॥
ज्ञानवैराग्यहीनोऽपि त्वय्यतिप्रीतिमांस्तु यः । श्रेष्ठः स एव इत्युक्ते तेन तं हरिरब्रवीत् ॥१२॥
आत्मनिष्ठाविरक्तिभ्यां रहितं भक्तमुत्तमम् । मन्यसे तन्न वै सम्यग्मतं तव विचारितम् ॥१३॥
आत्मनिष्ठाविहीनस्य पुंसो देहाभिमानिनः । न चिरस्थायिनी भक्तिः कृष्णे प्रेमवतोऽपि यत् ॥
देहेऽतिसुखदान् पंच विषयान् यर्ह्यवाप्स्यति । असौ तदा तु तेष्वेव सद्यः प्रीतिं करिष्यति १५॥
ततोऽस्य कृष्णे प्रीतिश्च नैव स्थास्यति निश्चितम् । अतः श्रेष्ठः कथं स स्यादित्युक्तः प्राह तं स सन्
यस्य स्याद्विषयप्रीतिर्भक्तो नाऽस्मन्मतो हि सः । वयं तु गोपिकातुल्यप्रीतिं तं कथयामहे १७॥
तमुवाच हरिः साधो संपन्नाः सकलैर्गुणैः । आसन् गोप्यो हि न त्वेव प्रेममात्रेण संयुताः १८॥
वाक्ये तासां हि नैपुण्यं राजनीतिविदामिव । अभूच्च विविदुः कृष्णमपि सम्यग्यथोचितम् १९॥
यासां विज्ञत्वमालोक्य लौकिकालौकिकार्थवित् । उद्धवोऽपि यदुश्रेष्ठः साश्चर्यं प्रणनाम ताः ॥
कृष्णाज्ञयोपदेष्टुं ता व्रजं यातः सुधीः स च । तद्वाक्यश्रुतिनिर्मानस्ता एव स्वगुरुं व्यधात् ॥
तत्पार्श्वे प्रेषणं स्वस्य कृष्णेन विहितं तु यत् । तमनुग्रहमेवासौ महांतं ह्यवैन्मुने ॥ २२ ॥
नन्वीदृग्बुद्धिमत्यस्तु सर्वास्ता न भवंति चेत् । शृणु तास्त्रिविधा आसन्मुग्धाः प्रौढाश्च मध्यमाः ॥
अतो हि तासां वाक्येषु भेदो भवति वर्णितः । न तु कृष्णेऽतिशयितप्रेम्णि भेदस्तु कुत्रचित् ॥
सर्वासु कृष्णमाहात्म्यज्ञानातिशय आस च । तेनैव तास्वात्मनिष्ठा वैराग्यं चांजसाऽभवत् ॥
एकांतिक्यः पूर्णभक्तास्तस्मात्ता अवगम्यताम् । मनो न हीदृग्भक्तानां गच्छेद् ग्राम्यसुखे क्वचित् ॥
शब्दादीन्कृष्णसंबंधानेव ते विषयानिह । इच्छंति दासभावेन नान्यदीयांस्तु कर्हिचित् २७ ॥
मनसाऽप्यन्यविषयाकांक्षा तेषां न विद्यते । ज्ञानवैराग्ययुक्तास्ते पश्यंतीश्वरमात्मनि ॥ २८ ॥
भक्तेषु तेष्वतिप्रीतिः कृष्णे यद्यपि बाह्यतः । न दृश्यते तथाप्यस्या मूलबंधो दृढोऽस्ति हि ॥
अतः क्वापि कुसंगाद्यैस्तद्ध्रासो नैव जायते । भक्तः श्रेष्ठो मतस्तस्माज्ज्ञानवैराग्यभक्तिमान् ३०॥
केवलप्रेमभाजस्तु परिणामो न तादृशः । यतः स्त्रैणादिसंबंधे तन्नाशो बहुधेक्ष्यते ॥ ३१ ॥
यथा ग्रीष्मे भुवि तृणबीजाभावोऽत्र वीक्ष्यते । तथाप्यंबुदयोगेऽस्यां भवत्याशु तदुद्भवः ३२ ॥
तथा प्रेमवतोऽप्यस्य विषयेहा न दृश्यते । तथापि स्त्रैणयोगादौ भवेदेव तदुद्भवः ॥ ३३ ॥

मुमुक्षुणाऽतोऽत्र सतो निषेव्य ज्ञानादियुग्भक्तिरजस्य साध्या ।
इतीशवाचं स सुधां ससभ्यः साधुर्निपीयातिमुदं प्रपेदे ॥ ३४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ त्रिनवतितमस्तरंगः ॥ ९३ ॥ ॥ ९२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । नभस्यशुक्लपंचम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे निलये जीववर्मणः । वेद्यां पीठोत्तमे स्वामी स न्यषीदद्सितांशुकः ॥ २ ॥
त्यागिभिर्गृहिभिर्नैकैर्नानादेशागतैर्निजैः । वृतं तं परमानंदः साधुः पप्रच्छ संनतः ॥ ३ ॥
श्रीमद्भागवते स्वामिन् गदितं बदरीवने । नरनारायणऋषिर्भगवान् धर्मनंदनः ॥ ४ ॥
क्षेमाय स्वस्तये नृणां विदधाति तपो महत् । तर्हि सर्वेऽपि न कुतो यतंते श्रेयसे नराः ॥ ५ ॥
तेनेति पृष्टो मुनिना हरिः प्रोवाच तं मुदा । अस्योत्तरं तु तत्रैव स्कंधे भवति पंचमे ॥ ६ ॥
मानुष्यं दुर्लभं ज्ञात्वा वर्षेऽस्मिन्भारताह्वये । आत्मानं सर्वजीवानां ये स्वं शरणमाप्नुयुः ७ ॥
अनुग्रहाय तेषां हि त्यक्तदेहानुबंधिनाम् । तपस्विवेषः कृपया करोति स तपो महत् ॥ ८ ॥
धर्मज्ञानविरागोपशमैश्वर्यादिभिर्गुणैः । युक्तं ह्युपचितैस्तच्च प्रलयावधि संश्रितः ॥ ९ ॥
तेनैवात्मवतां तेषां नृणां धर्मादयो गुणाः । स्वल्पा अपि विवर्द्धंते न चिरादेव सन्मते १० ॥
ततस्तेषां सुहृदये ब्रह्मतेजसि भूयसि । उपलंभो भवेत्साक्षात्कृष्णस्य जगदात्मनः ॥ ११ ॥
एवं हि तपसा तस्य स्वाश्रयं कुर्वतां नृणाम् । श्रेयो भवति निर्विघ्नं सर्वेषां तु न देहिनाम् ॥

वचोमृतं स्वस्य गुरोः स इत्थं निपीय मोदं मुनिराप चान्ये ।
सभ्या जनाः संशयशल्यहीना हृष्टाश्च भूत्वा प्रणमंति तं स्म ॥ १२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुर्नवतितमस्तरंगः ॥ ९४ ॥ ॥ १६ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । सायं षष्ठ्यां भाद्रशुक्ले वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरेऽगारे जीवाख्यभूपतेः । पीठोत्तमे बहिर्वेद्यां स न्यषीदद्सितांशुकः ॥ २ ॥
भक्तसंघसभामध्ये स्थितोऽसौ सदयेक्षणः । प्रोवाच साधून् संभाष्य महत्त्वं स्वस्य बोधयन् ॥
परात्परतरः कृष्ण इति शास्त्रेषु गीयते । परत्वं तत्तु कृष्णस्य यथाधिकृति बुद्ध्यते ॥ ४ ॥
यथा यथा स्यान्नैर्मल्यं भजनाभ्यासतो धियः । तथा तथा सूक्ष्मदर्शी वेत्ति तत्परतां पुमान् ॥
देहाभिमानो भक्तस्तु अवस्थाभ्यः परोऽच्युतः । तत्साक्षी चेति जानाति परत्वं हृदये हरेः ६ ॥
भक्त्यभ्यासवशाद्योऽत्र देहत्रितयतः परम् । क्षेत्रज्ञं सत्यमात्मानं स्वं रूपं मन्यते स तु ॥७ ॥
आत्मनः पर एवास्ति तत्साक्षी भगवानिति । परत्वं बुद्ध्यते विष्णोर्महत्त्वं च ततोऽधिकम् ८॥
एवं यावद्यस्य बुद्धिनैर्मल्यं तावदेव सः । सूक्ष्मं हरेः परत्वं च महत्त्वमपि बुद्ध्यते ॥ ९ ॥
पिपीलिकात आरभ्य तिमिंगिलगिलावधि । पिबंतः सलिलं वार्द्धेः स्थूलांगा उत्तरोत्तरम् ॥
स्वस्वशक्त्यनुसारेण ते सर्वेऽपि यथांबुधेः । अगाधत्वं महत्त्वं च विदुर्भक्तास्तथा हरेः ॥ ११ ॥
यथा चाऽल्पा महांतश्च खे पतंतः पतत्रिणः । यथाशक्ति तदानंत्यं विदुर्भक्तास्तथा हरेः १२ ॥
मशकाश्चटकाश्चिल्लाः श्येनानलपतत्त्रिपाः । तारतम्येन नभसो महत्त्वमवयंति हि ॥ १३ ॥
उपासका हरेरेवं यथाशक्ति रमापतेः । महत्त्वं तारतम्येन विदुर्नांतं तु तस्य वै ॥ १४ ॥
मरीच्यादिसमास्तत्र केचिद्भक्ता भवंति च । ब्रह्मादिसदृशाः केचिद्वैराजसदृशाः परे ॥ १५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संति केचित्समा भक्ताः प्रधानपतिरूपकैः । शुद्धप्रकृत्यधिष्ठातृपुरुषैः सदृशाः परे ॥ १६ ॥
अक्षरब्रह्मधामस्थैर्मुक्तैः संत्यक्षरात्मभिः । समा भक्ता हरेः केचिदक्षराधिपतेः प्रभोः ॥१७॥
तत्राद्यास्तु हरेर्भक्ता ज्ञातव्या मशकोपमाः । द्वितीयाश्चटकैस्तुल्यास्तृतीयाश्चिल्लकोपमाः १८॥
श्येनोपमाश्च विज्ञेया हरेर्भक्तास्तुरीयकाः । पंचमाश्चाऽनङ्गैस्तुल्याः षष्ठास्तु गरुडोपमाः १९॥
एते भक्ता हरेस्तस्य महत्त्वं तारतम्यतः । यथाशक्ति विदुस्तस्य त्वंतं केप्याप्नुवंति नो ॥२०॥
यो यः कृष्णोपासनेन सामर्थ्याधिक्यमाप्तवान् । स स कृष्णस्य महिमाधिक्यमेवाऽवगच्छति ॥
स्वामिसेवकभावोऽतस्तस्य तस्याऽधिकं दृढः । जायते न तु कस्यापि महिम्ना कृष्णतुल्यता २२॥
भजतः कृष्णमादौ तु प्रकाशः स्वस्य जायते । खद्योतवदथो भूयः कुरुते स उपासनाम् ॥२३॥
यथा यथोपासना च वर्द्धतेऽस्य तथा तथा । आवृतिर्भेदमाप्नोति प्रकाशो वृद्धिमेति च ॥२४॥
दीपवद्दीपिकावच्च होलावद्दाववत्ततः । विद्युच्चंद्रार्कसंवर्त्तवह्निवच्चैधते क्रमात् ॥ २५ ॥
महाभूताग्निवच्चांते प्रकाशो वर्द्धतेऽस्य च । सामर्थ्यं च सुखं चैव वृद्धिमेति क्रमेण वै ॥२६ ॥
यस्य यस्य प्रकाशादेराधिक्यं जायते स सः । वेत्ति कृष्णमहत्त्वस्याधिक्यं शक्त्यनुसारतः २७॥
प्रकाशादिवृद्धिभेदाद्भेदा मुक्तेषु कीर्त्तिताः । यस्याधिक्यं प्रकाशादेः पूर्वस्मादधिको हि सः २८॥
इत्युक्त्वा प्रोत्थितो धार्मिरूर्ध्वदक्षिणपाणिना । अवलंब्याम्लिकाशाखां प्राङ्मुखः पुनरब्रवीत् ॥
चंद्रबिंबमिदं संतः पौर्णमास्यां विदूरतः । स्वर्णाल्पस्थालवल्लोकैरल्पमात्रकमीक्ष्यते ॥ ३० ॥
यथा यथा तत्समीपं गच्छेत्कश्चन पूरुषः । तथा तथा वीक्षतेऽसौ तन्महत्तामनुक्रमात् ॥३१ ॥
अतिसांनिध्यमाप्तस्तु महत्त्वाधिक्यमस्य सः । अतिदूरवीक्षते यद्वत्तथा मुक्तः पुमान् हरेः ॥३२॥
भक्त्यभ्यासप्रतापेन नष्टमाया महावृतिः । यथा यथैति सांनिध्यमक्षरात्परतो हरेः ॥ ३३ ॥
तथा तथा वीक्षते वैतन्महत्तामुपासकः । उत्तरोत्तरमाधिक्यादपारामेव निश्चितम् ॥ ३४ ॥
एवं हि कृष्णस्य महत्तमत्वं ज्ञात्वा परत्वं च स सेवनीयः ।
इति प्रभोर्वागमृतं सदःस्थास्ते तस्य पीत्वा तुतुषुश्च संतः ॥ ३५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ पंचमनवतितमस्तरंगः ॥ ९५ ॥ १७ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । शुक्लाष्टम्यां भाद्रपदे वचोमृतमिदं हरेः ॥ १ ॥
तत्र सारंगनगरे दुर्गे जीवस्य चालये । वेद्यां पीठोत्तमे स्वामी सितवासा उपाविशत् ॥ २ ॥
नानादेशागतस्वीयभक्तसंघसमावृतः । स्वयमेव सतो भक्तान्वीक्षमाणोऽब्रवीद्वचः ॥ ३ ॥
श्रद्धावान् पुरुषो यः स्यात्सविवेकमतिः स चेत् । तर्हि सत्संगतस्तस्य श्रद्धा सद्वचने भवेत् ४॥
स्वधर्मज्ञानवैराग्यादयः कल्पाणकारिणः । गुणा अप्यस्य हृदये शीघ्रमाविर्भवंति हि ॥ ५ ॥
कामक्रोधादयो दोषा नश्यंत्येव च सर्वशः । वर्द्धतेऽनुदिनं भक्तिः शुक्ले चद्रकला यथा ॥६॥
श्रद्धावानपि यो मर्त्यो निर्विवेकमतिर्भवेत् । स त्वसत्स्वपि विश्वासं करोत्यथ विनश्यति ॥७ ॥
गुणाः स्वधर्मप्रमुखास्तस्मिन्नोद्यंति सर्वथा । विवर्द्धन्तेऽस्य हृदये कामक्रोधादयोऽरयः ॥ ८ ॥
क्षारभूमौ सुवृष्ट्यापि न तृणाद्युद्भवो यथा । भवत्यथ नदीपूरस्तस्यां चेत्प्रवहेत्क्वचित् ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदा तस्यां पंकिलता सबीजा स्यात्ततो द्रुमाः । उद्गच्छंति महांतोऽपि बद्धमूला भवति च ॥१
तथा श्रद्धादिगुणके न स्याद्दोषोद्गमः पुरा । असज्जनप्रसंगेऽस्य पुंसो जाते तु कर्हिचित् ११॥
कामादिधुरजगद्वार्त्ताप्रवेशो जायते हृदि । ततो महांतः पाप्मान उद्गच्छंत्येव भूरिशः ॥१२ ॥
असत्प्रसंगो ह्यातव्यस्तत एव मुमुक्षुणा । कार्यः सतां प्रसंगश्च तेन हेया निजागुणाः ॥ १३ ॥
दोषः स खलु नास्त्येव यः सत्संगान्न संक्षयेत् । यत्तेन दुःस्वभावोऽपि यतमानस्य नश्यति ॥
दुःस्वभावोपशमनं सत्संगेन यथा भवेत् । अन्योपायेन तु तथा नैव स्याद्विदुषामपि ॥ १५ ॥
ये त्वनेवंविदो मूर्खास्ते तु तेन प्रपीडिताः । मुह्यंत्यऽकार्याणि मुहुः कुर्वते च कुसंगतः ॥१६॥
शयनं रोदनं वापि कलहं वाप्युपोषणम् । कुर्वंते वाऽतिसंक्लिष्टा म्रियंते ते विषयादिना १७॥
अकार्याचरणेनेत्थं दुःस्वभावो न शाम्यति । न च दुःखं ततः कार्यः सत्संगो हि विवेकिभिः ॥
विना विवेकं धर्मादिसम्पन्नोऽपि कुसंगतः । नश्येद्यथाऽतिमहती वह्निज्वालांऽम्बुदांबुना ॥१९॥
अल्पधर्मविरागादिविवेकी तेन न क्षयेत् । विद्युल्लेखांबुदेनेव स्यान्नरोऽतो विवेकवान् ॥२०॥
निर्विकारानंदसाधुरथ पप्रच्छ तं प्रभो । कथं स्वाभाविका दोषाः क्रोधाद्या नाशमाप्नुयुः २१
तं स्वाम्युवाच यो नित्यं तन्नाशे प्रयतो भवेत् । तं ते त्यजंति वै जाग्रन्नरवेश्मेव तस्कराः ।२२।
पापरूपा इमे दोषाः क्रोधाद्या नरकप्रदाः । इत्यवेत्य दृढं तेषां त्याग एवोद्यतो भवेत् ॥२३॥
तदावेशं स्वमनसि ज्ञात्वा नारायणं स्मरन् । धैर्येण सावधानः संस्तद्वशो न भवेत्सुधीः ॥२४॥
प्रवेष्टुं न ददत्स्वांते तान्दिवानिशि चोद्यतः । देहभिन्नस्वरूपानुसंधाने प्रयतो भवेत् ॥ २५ ॥
पश्येद्दोषवतां लोके शास्त्रे चापि विगर्हणाम् । क्रोधादिर्येषु कार्यस्तान्कालग्रस्तांश्च नित्यदा २६
देहाभिमाने सत्येव तत्प्रवेशो भवेद्धृदि । न स्वात्मवेदने क्वापि त्याज्याऽहंता जडे ततः ।२७।
अहमात्मास्मि सद्रूपः कृष्णभक्त इतीह यः । विद्यात्सदा सावधानो दोषा नश्यंति तस्य ते ।२८।
अप्रमत्तं नार्हयंति दोषाः स्वाभाविका अपि । आगंतुका अपि मुहुः प्रमत्तं स्वर्दयंति ते ।२९।
वणिग्यथा नामलेखेऽप्रमत्तः क्रयविक्रयी । पराभाव्या न कैश्चित्स्यात्स्यादन्यस्त्ववबलैरपि ॥३०॥
तथात्मवेदनादौ स्यादप्रमत्तस्तु यः पुमान् । स नाऽभिभाव्यस्तैर्दोषैरभिभाव्योऽपरस्तु तैः ३१
साधूनुपशमस्थान् यः सेवेत गतकैतवः । स तु शीघ्रं तत्प्रसादाज्जयेद्दोषानशेषतः ॥ ३२ ॥
मुक्तानंदोऽथ पप्रच्छ तमेवं वादिनं नमन् । दुःस्वभावात्मका दोषा भवेयुर्हि कुसंगिनः ॥३३॥
सत्संगं कुर्वतोऽप्यत्र पुरुषस्य हृदि क्वचित् । त उद्भवंतो दृश्यंते तत्र किं कारणं प्रभो ॥३४॥
स्वाम्युवाचाऽत्र यो बाल्ये कुर्यात्सत्संगमादरात् । तस्य प्रीतिर्भगवति स्यात्तद्भक्तेषु चाधिका ॥
तस्य तस्यामवस्थायां कामादीनां न संभवः । भवेदरीणामाल्प्यं वा स्यात्ततोऽस्ति रतिर्हरौ ३६॥
कामाद्युद्दीपके प्राप्ते तारुण्ये तु तरस्विनि । स चेत्प्रमत्तः सत्संगे स्यात्तदा तूद्भवंति ते ॥३७॥
कामदेहाभिमानादेरुद्भवश्च बलिष्ठता । स्याद्धि तस्यामवस्थायां प्रमत्तं तेऽर्हयंति तम् ॥३८॥
ईदृक्तारुण्यलब्धौ चेत्प्रशांतान्दोषवर्जितान् । साधूनेव निषेवेत श्रद्धयाऽन्वहमादरात् ॥३९॥
तदा तु यौवनस्यांतं युवा विकृतिवर्जितः । निर्विघ्नेनैव लभते भ्रष्टः स्यादन्यथा तु सः ॥४०॥
तारुण्य एव सत्संगो यस्य स्यात्स तु पुरुषः । महत्सु सत्स्वपि स्त्रीयदृष्टांतेन यदि क्वचित् ४१
कामादीन् कल्पयेद्दोषानसतोऽपि कुतर्कतः । तदा तु तेन पापेन स भ्रष्टो भवति ध्रुवम् ॥४२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दुःस्वभावात्मकैर्दोषैस्ततोऽसावपि पीड्यते। एवं सत्संगिनो दोषोद्गमे हेतुद्वयं स्मृतम् ॥४३॥
यं यं दोषं पुमान् सत्सु कल्पयत्यविवेकतः। तेन तेन स दोषेण स्वयमेव प्रपीड्यते ॥ ४४ ॥
सदोषोऽपि पुमानेष यदि तद्दोषनाशनम्। चिकीर्षेत्तर्हि तु सतः प्रणम्याशु क्षमापयेत् ॥४५॥
गृह्णीयाच्च गुणानेव तेषां न स्वगुणान् क्वचित्। अगुणो दृश्यमानोऽपि यदि तेषु भवेत्तदा ४६॥
मत्कुमत्यैव दोषोऽयं दृश्यते न तु तेषु सः। संभवेदिति मंतव्यं सर्वथैव मुमुक्षुणा ॥ ४७ ॥
यदि कश्चित् प्रतीयेत दोषः सत्योऽपि तेषु च। सोऽप्येतै रक्षितः कार्यवशादित्येव चिंतयेत् ॥
तद्रक्षणेऽपि नास्त्येषामेव तद्वशता क्वचित्। गुणबुद्धिर्यतस्त्वेषां न तस्मिन् किंतु दोषधीः ४९
एवं वर्त्तेत यो नित्यं गुणग्राही पुमानिह। स सर्वदोषमुक्तः सन्प्राप्नुयाद्गतिमुत्तमाम् ॥५० ॥
महानुभावानंदोऽथ साधुः पप्रच्छ तं प्रभुम्। स्वाभाविको गुणो नश्येन्न वा नश्येद्रजस्तमः ॥
यदि नश्येत्तदानीं तु कथं दुर्वासआदिषु। मुक्तेष्वपि न नष्टोऽसौ सिद्धेषु तपआदिभिः ॥५२॥
नैव नश्येद्यदि तदा मुक्तेषु स्यात्सदोषता। मायिकस्यापि तस्य स्याद्गौरवं चात्मवेदनात् ५३॥
तमुवाच हरिः साधो तन्निवृत्तिर्भवेत्खलु। अप्रमत्तो यदि भवेत्तत्प्रहाणे पुमांस्तदा ॥ ५४ ॥
देहत्रयपृथग्भूतस्वात्मज्ञानातिदार्ढ्यतः। स्वदुर्गुणेऽत्यरुच्या च शांतसाधुनिषेवया ॥ ५५ ॥
स्वस्मिन्दोषे सति हरिः प्रीतो नैव भविष्यति। इति स्वस्मिंस्तत्प्रवेशादाने चाऽप्यप्रमादतः ॥
निश्छद्मोपासितहरिप्रतापेन च सर्वथा। सर्वोऽपि दुर्गुणो नश्येत्कार्यो नैवाऽत्र संशयः ॥५७॥
एतैर्व्यस्तैर्वा समस्तैर्वा साधनैर्निजदुर्गुणः। मुमुक्षुणाऽऽशु हातव्योऽन्यथा नास्त्येव सद्गतिः।
वर्त्तते दुर्गुणो यश्च मुक्तदुर्वासआदिषु। स तु दुर्जनशिक्षायै ज्ञात्वा तै रक्षितोऽस्ति हि ॥५९॥
तथापि तद्वशत्वं तु तेषामस्तीति गम्यते। यतोऽस्ति गुणधीस्तेषां तस्मिन्न त्याज्यधीर्दृढा ६० ॥
ज्ञानदार्ढ्येन मुक्तिस्तु तेषामपि भविष्यति। किंतु नैव मुमुक्षूणामाश्रयार्हा भवंति ते ॥ ६१ ॥

इति वाक्यसुधां स सद्गुरोर्मुनिरन्ये च निपीय साधवः।
गृहिणश्च मुदं परामयुः प्रणमंति स च तं दयानिधिम् ॥ ६२ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ षण्णवतितमस्तरंगः ॥ ९६ ॥ ॥ १८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणाय नमो नमः

कार्यायने

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । द्वादश्यां भाद्रमास्याद्ये वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायने दुर्गे वास्तो राज्ञः स वेश्मनः । वितर्दावुदगास्यस्य छत्रिमंच उपाविशत् ॥ २ ॥
सितवासस्त्रयो भक्तसंघैश्च परितो वृतः । उवाच स सतोऽग्रस्थान् स्वाननैकसमीक्षणान् ॥३॥
प्रश्नोत्तराणि कुरुत यूयं सुज्ञाः परस्परम् । अथ सन्भूधरानंदः शिवानंदं स्म पृच्छति ॥४॥
कृष्णस्य निश्चयोऽस्यांतःकरणे जायतेऽथ वा । आत्मन्येवेति प्रश्नस्य साधुः सोऽप्युत्तरं ददौ ५॥
तदजातमिवालक्ष्य स्वयमेवाब्रवीत्प्रभुः । जीवो बुद्ध्याऽखिलं वेत्ति सा सर्वज्ञानकारणम् ॥
अंतःकरणमध्ये च ज्ञानकर्मेंद्रियेषु च । नखाग्रादाशिखं साऽस्ति तस्यां जीवस्तु वर्त्तते ॥ ७ ॥
ज्ञायते तत्र धीरेका तत्स्था आत्मा तु नाऽखिलैः । ह्रस्वदीर्घीभवद्वह्निज्वालास्थपवनो यथा ॥
बाह्यांतःकरणान्येष तदीयान्विषयांस्तथा । तद्द्वयक्तिकर्तृदेवांश्च युगपद्वेत्ति बुद्धिगः ॥ ९ ॥
हृत्स्थोऽतिसूक्ष्म इत्येवं ज्ञायमानोऽप्यसौ धियि । स्वशक्त्या व्यापकत्वेन महान्देहेंद्रियादिलः ।
बुद्ध्यैक्यमापन्न इव दृश्यमानोऽप्यसौ ततः । पृथगस्तीति विद्वद्भिरनुमानेन गम्यते ॥ ११ ॥
नित्यानंदोऽथ तं प्राह स्वामिन्नेतावता त्वया । प्रश्नोत्तरं कृतं यत्तन्नैव हृद्यागतं हि नः ॥१२॥
भगवन्निश्चयो बुद्धौ यो जायेत स एव हि । जीवेऽपि जात इत्येव ज्ञेयमैक्यस्थितेस्तयोः ॥१३॥
तत्राप्येवं क्रमो बोध्यः साक्षात्कृष्णस्य निश्चयः । इंद्रियेषु भवत्यादौ ततोंऽतःकरणेषु च ॥१४॥
स भवेच्च ततो जीव इत्युक्ते हरिणा पुनः । पप्रच्छ नित्यानंदस्तं निश्चयं लक्षय क्रमात् ॥१५॥
इंद्रियेषु कथं चांतःकरणे निश्चयः कथम् । जीवे च स कथं ज्ञेय इति पृष्टोऽब्रवीद्धरिः ॥१६॥
पदार्था इंद्रियैर्ग्राह्याः संति येऽत्र शुभाशुभाः । सुखदा दुःखदाश्चापि योग्यायोग्याः प्रियाप्रियाः
सर्वान् दृष्ट्वापि तान् कृष्णे भवेत्कोऽपि न संशयः । एवंविधो निश्चयो य इंद्रियेषु स ईर्यताम् ।
शमाद्याः सात्त्विका भावाः कामाद्या राजसास्तथा । क्रोधाद्यास्तामसा ये च दृश्यंते मनुजेष्विह
नराकृतौ भगवति तान् दृष्ट्वाऽपि न मानसे । संशयः स्याद्यदि तदा ज्ञेय आंतरनिश्चयः ॥२०॥
देहत्यागं भगवतः स्वतंत्रस्यापि गर्हितम् । ऋषभस्येव दृष्ट्वापि संशयो न भवेद्धृदि ॥ २१ ॥
लीलेयमिच्छया स्वस्येत्येवं यो निश्चयो भवेत् । स जीव इति विज्ञेयो बद्धमूलो हि निश्चलः ॥
तरीं श्रिता यथा वार्द्धौ मग्ना स्थूला बिलायनी । क्रष्टुं न शक्यते दाशैस्तथाऽसावपि कैश्चन ।
चैतन्यानंदसाधुस्तमथाऽपृच्छत्प्रभो भवान् । गुणातीतोऽक्षरातीतो ह्यस्ति वाङ्मनसात्परः ॥२४॥
स कथं मायिकैस्तत्त्वैर्भुवि साक्षादवाप्यते । इति पृष्टोऽवदत्कृष्ण आदौ वच्मि त्वदाशयम् २५।
देहेंद्रियांतःकरणैः साकं तेषां प्रकाशकः । तिरोभवति जीवोऽपि सुषुप्तौ यर्हि तं तदा २६ ॥
अंतस्थो भगवानेव प्रकाशयति निर्गुणः । स्वप्नेऽपि स तथा जीवं स्वाप्नभोगैः सह प्रभुः २७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जाग्रद्भोगैः सहात्मानमेवं जाग्रत्यपि प्रभुः । प्रकाशयति विश्वात्मा स्वप्रकाशोऽखिलेश्वरः २८॥
य एवंरूपिणं जीवमरूपिणमपि स्वयम् । प्रकाशयत्यसावेव तत्त्वान्यप्यखिलानि च ॥ २९ ॥
तत्त्वैः स्वस्वांशरचितं विराजं चैतदाश्रयम् । मायां प्रकाशयति च कालं तत्क्षोभकं च सः ३०॥
एतादृशो हि भगवांस्तत्त्वैर्ग्राह्यः कथं भवेत् । इति प्रश्नाशयस्तेऽस्ति शृणु तस्योत्तरं मुने ३१॥
उत्पत्तिस्थितिसंहारान्करोति जगतः प्रभुः । सुखायैव हि जीवानां नाऽत्र स्वार्थोऽस्य कश्चन ॥
बुद्धींद्रियमनःप्राणान् जनानामसृजत्प्रभुः । मात्रार्थं च भवार्थं च ह्यात्मने कल्पनाय च ३३॥
इति भागवतश्लोके पुरुषार्थचतुष्टयम् । जीवान्प्रापयितुं सृष्टिं करोतीश इतीरितम् ॥ ३४ ॥
सृष्टिः सुखाय जीवानां स्थितिश्चाऽप्यस्ति तादृशी । लयोऽपि सृतिखिन्नानां विश्रामायाऽस्ति तत्कृतः
एवं हिताय जीवानां प्रवृत्तोऽस्ति सदा प्रभुः । कल्याणायैव तेषां च महत्या कृपया स तु ३६॥
यदा नराकृतिर्भूत्वा नरवत्कुरुते क्रियाः । तदा विधाय सत्संगं तं विदुर्मानवा भुवि ॥ ३७ ॥
जना जानंतु मां सर्वं इतीच्छैवाऽस्ति यत्प्रभोः । तत एव च तं साक्षात्पश्यंति प्राकृता अपि ॥
इत्युक्ते हरिणा साधुर्भजनानंद आह तम् । एवं चेत् किं न बाधेत यतो वाच इति श्रुतिः ३९॥
तमुवाच हरिर्यद्वत्पृथिव्यादिचतुष्टयम् । अप्याकाशे वर्त्तमानं तद्भावं तु न याति हि ॥ ४० ॥
वागादीनि तथैवेशं नाप्नुवंतीति सा श्रुतिः । वदतीति न बाधोऽथ नित्यानंदस्तमब्रवीत् ४१॥
निरंजनः स परमं साम्यं यातीति हि श्रुतिः । स्मृतिश्च ज्ञानतपसा पूता मद्भावमागताः ॥४२॥
वागादीनामतद्भावे बाधः स्याद्देतयोः प्रभो । इत्युक्तो हरिरूचे तं स प्रोक्तोऽभक्तदेहिनाम् ॥
भक्तानां स्विंद्रियादीनि तद्भावं यांति सर्वथा । खस्थं यथा खतां याति लये क्ष्मादिचतुष्टयम् ॥
दिव्यमूर्त्तेर्भगवतः संबंधादिंद्रियादिकम् । दिव्यतां याति भक्तस्य ततस्तत्रैव मायिकम् ॥४५ ॥
कीटः पेशस्कृता दष्टो याति तत्समतां यथा । तथैव कृष्णसंदष्टो भक्तोऽप्यत्र न संशयः ४६॥
साम्यं देहेंद्रियादीनां कृष्णमूर्त्या यदीरितम् । तदात्मनिष्ठभक्तस्य ज्ञेयं भक्तस्य वा परम् ॥४७॥
केवलं ह्यात्मनिष्ठस्य पुंसस्तु नैव तद्भवेत् । स तु याति ब्रह्मसत्तामेव केवलमात्मना ॥ ४८ ॥

निशम्य वाणीमिति धर्मसूनोः सुधोपमां ते सकलाश्च संतः ।
तद्भक्तिभाजोऽतिमुदं प्रपद्य तमानमंति स्म तदेकचित्ताः ॥ ४९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ सप्तनवतितमस्तरङ्गः ॥ ९७ ॥ १ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । ईषशुक्लद्वितीयायां वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायने वास्तोरुदगास्यस्य वेश्मनः । वेद्यां न्यषीदत्पीठेऽसौ सितवासा वृतो निजैः ॥२॥
प्रश्नोत्तराणि विद्वद्भिस्तत्सभायां वयोवराः । संतस्तदाज्ञयाऽथाऽसौ शिवानंदं स्म पृच्छति ॥३॥
अस्त्येको मतिमान्साधुः सत्संगो यद्दिने कृतः । तत आरभ्य माहात्म्यं हरेर्वेद च तत्सताम् ॥
किंतु साधुष्वीक्ष्यमाणं गुणं दोषं पृथक् स तु । गृह्णीयादगुणं तत्र गृहीत्वापि त्यजेद्धिया ॥५॥
तौ गृह्णन्नपि नित्यं स त्यजेत्संगं सतां न हि । तन्माहात्म्यं यतो वेत्ति तादृग्दुर्लभतामपि ६॥
एकस्य तु हृदि क्वापि प्रविशेन्नाऽगुणः सताम् । एवं द्वौ भवतो भक्तौ तुल्यप्रश्नेशनिश्चयौ ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्राऽपरः श्रेष्ठ एव सद्दोषाग्रहणान्मतः। आद्यस्य दोषग्रहणे सतां किं कारणं वद ॥ ८ ॥
इत्युक्ते हरिणा साधुः शिवानंदो यदोत्तरम्। कर्त्तुं न शेके भगवदानंदस्तं तदाब्रवीत् ॥ ९ ॥
सद्दोषग्राहिणः पुंसो मतिस्त्वस्याऽस्ति केनचित्। शप्ता तपस्विनेत्येव भात्यत्रोत्तरमीश्वरः ॥१०॥
तमुवाच हरिः साधो युक्तं दत्तं त्वयोत्तरम्। अतिक्रमेण महतां धीः सतोऽपि प्रदुष्यति ११॥
स्वार्दितस्य सतः शापाद् दुर्बलस्याऽत्र वापि नुः। अशुश्रूषितयोः पित्रोः शापाद्वा दोषधीर्भवेत्
अथो भगवदानंदस्तं पप्रच्छ महाप्रभो। शापदुष्टा मतिर्भूयः पुंसः शुद्धा कथं भवेत् ॥ १३ ॥
तं प्रोवाच हरिः सा तु साधनैः प्रबलैर्मतिः। नित्योद्युक्तस्य शुद्धा स्यान्न तु पुंसः प्रमादिनः ॥
स्याद्यादृग्मलिनं वस्त्रं तादृक्तत्क्षालनं मतम्। नैवातिमलिनं तत्स्यादल्पक्षालनतोऽमलम् ॥१५॥
एवं शापातिमलिना बुद्धिः साधारणेन तु। न साधनेन शुद्धा स्यात्किंतु भूरितरेण हि १६॥
अहिंसाब्रह्मचर्यादीन् पालयंति यमानिह। संतस्तपोजपादींश्च नियमानपि ये दृढम् ॥ १७ ॥
तेभ्योऽपि शप्तधीशुद्धिमिच्छता ते विशेषतः। पालनीयाश्च वैराग्यमपि तेभ्योऽधिकं दृढम् १८
एवं प्रयतमानस्य दुष्कर्ममलिना मतिः। कालेन शुद्धिमाप्नोति सतामेव प्रसादतः ॥ १९ ॥

वचोमृतं श्रीहरिवक्त्रनिःसृतं निपीय साधुः स इतीतरे तथा।
गृहस्थलोका अपि तोषमाप्य तं ववंदिरे प्रांजलयोऽतिहर्षतः ॥ २० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावष्टनवतितमस्तरंगः ॥ ९८ ॥ २ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। ईषस्याऽसितसप्तम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायने दुर्गे वास्तुभूपस्य वेश्मनः। वेद्यामस्योदगास्यस्य स न्यषीदत्सदासने ॥ २ ॥
सितधोत्रः सितोष्णीषः सितप्रावरणांशुकः। वृतश्च सद्भिर्गृहिभिरनेकैः सोऽब्रवीत्स्वयम् ॥३॥
संतो ये साधुलक्ष्माणः संति ते ह्येव मे प्रियाः। तादृशा अपि भूयांसो वर्त्तंत इह सांप्रतम् ॥
बालोऽप्ययं शुकमुनिर्मुक्तानंद इवाखिलैः। सल्लक्षणैरुपेतो मे रोचतेऽतीव चेतसि ॥ ५ ॥
संवत्सरा मे बहुशः समीपे वसतोऽस्य हि। व्यतीताः सन्मतिस्तत्र वर्द्धमानैव दृश्यते ॥ ६ ॥
तस्मादग्रे महानेष साधुवर्यो भविष्यति। एतत्परिचयादेव निश्चितं हृदये मया ॥ ७ ॥
पुंसां गुणाश्च दोषा वा सम्यक्परिचयं विना। निश्चेतुं नैव शक्यंते केवलं बाह्यलक्षणैः ॥ ८ ॥
संति केचिद्भुवि जना बिडालबकवृत्तयः। तान् दृष्ट्वाऽल्पधियः केचिन्मन्यंते महतः सतः ॥९॥
केचिन्निर्मलहृत्कृष्णध्याननिष्ठा जितेंद्रियाः। अपि स्फारेक्षणत्वाद्यैर्धर्मैः सत्यांगिकैर्युताः १० ॥
तेन तान्केचिदल्पज्ञा असाधूनेव मन्वते। अतः परिचयादेव पुंपरीक्षा सती भवेत् ॥ ११ ॥
सहवासे सति नृणां भावेक्षाबाद्यपेयतः। मानापमानसंगाद्यैर्लक्ष्यतेंऽतर्गतं मनः ॥ १२ ॥
बाल्यं यौवनवार्द्धक्ये तिस्रोऽवस्था इमा मताः। तत्रापि यौवने प्रायो लक्ष्यंते पुंगुणागुणाः ॥

कश्चिद् बाल्ये दुष्क्रियोऽपि यौवने सत्क्रियारतः।
दृश्यतेऽथ पुमान् कश्चिद् बाल्ये सन् यौवने त्वसन् ॥१४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यस्तु बाल्येऽप्यघाज्ञीतः स्वधर्मे चाऽचलस्थितिः । भवेत्स त्विह तारुण्ये भवेद्देव महान् हि सन् ॥
दृष्टांतोऽत्र तु युष्माभिरवसेयो ममैव हि । इत्युक्त्वा तपआदिं स्वं बालचारित्रमाह तान् ॥
तं श्रुत्वा साधवो ज्ञानवैराग्यादिभरं हरेः । साश्चर्यं जहृषुः सर्वे दुष्प्रापं तं च मेनिरे ॥ १७ ॥
अथ तं भजनानंदः साधुः पप्रच्छ सद्गुरोः । अस्ति हेतुः शमः किं वा दमः साधुत्वसाधने ॥
हरिरूचे विचारेण मनसो निग्रहः शमः । बाह्येंद्रियाणामर्थेभ्यो निग्रहस्तु दमः स्मृतः १९ ॥
तत्र मानसदोषाणां शमो हेतुर्निवर्त्तने । शारीरदोषहानौ तु दम एवास्ति कारणम् ॥ २० ॥
शारीराणां चांतराणां दोषाणां सति संक्षये । ध्रुवं सिद्ध्यति साधुत्वं न त्वेकतरहानितः ॥
बुभूषुणा साधुनाऽतो दोषान्बाह्यांस्तथांतरान् । ज्ञात्वा दमशमाभ्यां ते हातव्या अप्रमादिना ॥
बह्वालोकोऽल्पकालेन बहुगंधग्रहस्तथा । बहुध्वातिक्रमस्तद्वत्स्वप्ने पातश्च रेतसः ॥ २३ ॥
उपस्थवेगप्रमुखा दोषा ज्ञेयाः शरीरजाः । संकल्पा इन्द्रियार्थानां दोषा ज्ञेयाश्च मानसाः ॥
जेया दमशमाभ्यां ते सर्वेऽप्यत्र मुमुक्षुणा । स एव साधुरुभयदोषहीनो भवेत्तु यः २५ ॥
अतो न शममात्रेण दममात्रेण वा मुने । संसिद्ध्येत्साधुता किंतु द्वाभ्यामेवेति निश्चयः २६ ॥
उभावेतौ तु गृहिणामपि सत्संगिनां हि तौ । किं पुनस्त्यागिनां तर्हि नृणां साधुत्वसाधकौ ॥
साधुसंगवतामेतावाशुसिद्धिप्रदौ मतौ । सत्संग्यपि न निर्दोषो यः स्यात्स तु महाघकृत् ॥
त्यागी भूत्वा गृहस्थार्हान् भोगानिच्छेत्तु योऽल्पधीः । उपहास्यः स लोकेषु शास्त्रेषु च विगर्हितः ॥
पथ्यौद्भवे तिष्ठतस्तु न प्राप्यास्त्यागिनो हि ते । नियमस्थितिदार्ढ्येन तस्मादिच्छेन्मवान्स तु ॥

अन्यस्त्विच्छन्कचित् क्लेशात्तुच्छान्प्राप्यापि तानिह ।
वांताशिना याति साम्यं शुना भ्रष्टः स्वधर्मतः ॥ ३१ ॥
दुर्गं यथा तस्करभीत आश्रयेत्साधूंस्तथैवोभयदोषभीतः ।
इति प्रभोस्तस्य सुधाभवाचं निपीय सोऽन्ये जहृषुश्च संतः ॥ ३२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ नवनवतितमस्तरंगः ॥ ९९ ॥ ॥ ३ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । आश्विनस्यासिताष्टम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायने दुर्गे वास्तोः सौध उदङ्मुखे । बहिर्वेद्यां महापीठे न्यषीदत्स सितांशुकः २ ॥
त्यागिगृहिसदोंतःस्थं तं प्रणम्य महामुनिः । सन्मुखस्थश्च गोपालानंदोऽपृच्छत्सदग्रणीः ॥ ३ ॥
अस्मिन्वपुषि जीवस्य वेदितृत्वं कियत्प्रभो । साक्षिणश्च कियत्तन्मे वक्तुमर्हसि तत्त्वतः ॥ ४ ॥
आनखादाशिखं बुद्धिर्देहेस्मिन्व्याप्य वर्त्तते । सर्वेंद्रियक्रियाः सा च जानाति युगपन्मुने ५ ॥
तां च व्याप्तोऽस्ति जीवात्मा ततस्तद्वेदनोक्तितः । बुद्धेस्तु वेदनं प्रोक्तं व्याप्य साक्षी च तं स्थितः
साक्षिणो वेदनोक्त्यातो जीववेदनमीरितम् । ऐक्येनैव ततो ज्ञेयं वेदनं साक्षिजीवयोः ॥ ७ ॥
नित्यानंदस्तमप्राक्षीदथ स्वामिनमानतः । साक्षी तु साक्षात्पश्येद्यः स एव कथितो बुधैः ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथाविधस्तु मूर्त्तः स्यात्तत्त्वेऽसौ व्यापकः कथम् । इत्युक्तो हरिरूचे तं मूर्त्तोऽपि व्यापको भवेत्
यथा मूर्त्तः स्वधाम्नाऽग्निर्व्याप्यैधस्तु स्वशक्तितः । तथापरेऽक्षरे मूर्त्तो हरिर्जीवेष्ववस्थितः ॥
सुधासमानामिति तस्य वाचं निशम्य तोषं स मुनिः प्रपेदे ।
वेदांतविद्यानिपुणाः सदःस्था अन्ये च संतो गृहिणश्च सर्वे ॥ ११ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ शततमस्तरंगः ॥ १०० ॥ ॥ ४ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । ईषकृष्णचतुर्दश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायनग्रामे वास्तुभूपस्य वेश्मनः । वितर्दावुदगास्यस्य पीठाग्र्ये स उपाविशत् ॥ २ ॥
सितवासा वृतो भक्तैरनेकैस्त्यागिभिस्तथा । गृहिभिः सुप्रसन्नास्यः सतोऽपृच्छत्स्वयं प्रभुः ३ ॥
कल्याणमूर्त्तिर्भगवानिति शास्त्रविदो विदुः । जीवानां श्रेयसे भूमौ नृषु प्रादुर्भवत्यसौ ॥ ४ ॥
स्वधामस्थित एवासौ तत्कर्तुं न क्षमः किमु । धृतावतार एवाऽत्र क्षमते किमु तत्कृतौ ॥ ५ ॥
नैवं वाच्यं भवेदीशे समर्थे सर्वदाऽच्युते । अतोऽवतारग्रहणे यो हेतुः स उदीर्यताम् ॥ ६ ॥
इति ते हरिणा पृष्टा यदा तत्सम्यगुत्तरे । न शेकुः साधवस्तर्हि स्वयमेव जगाद सः ॥ ७ ॥
कृष्णः संकल्पमात्रेण यद्यपि श्रेयसे क्षमः । नृणामस्ति तथाप्यत्रावतारे वच्मि कारणम् ॥ ८ ॥
भक्ताः स्वस्मिन्प्रेमवंतो ये स्युः केचन भूतले । तेषां भक्तिवशो भूत्वा तेभ्यो दातुं सुखं हरिः ॥
तदिच्छानुसृतं रूपं स्वतंत्रः सन् दधात्यथ । सकलान् पूरयत्येव भक्तानां स मनोरथान् १० ॥
प्रेमवृद्धिर्भवेत्स्वस्मिन्भक्तानां भूतले नृणाम् । इति कृष्णस्तत्सजातिर्जायते कृपया स्वयम् ११ ॥
स्वजातौ परमा प्रीतिर्देहिनां जायते ध्रुवम् । तत्रापि च विशेषेण हृद्ये गुणिनि जायते ॥ १२ ॥
अनंतकल्याणगुणमतः प्रेम्णा सुबुद्धयः । कृष्णमेव भजंत्यत्र स्नेहमुत्सृज्य मायिके ॥ १३ ॥
स्वतंत्रोऽपि तदा कृष्णस्तत्तद्भक्तमनोरथान् । संपूरयन्नस्वतंत्र इवास्ते खलु तद्वशे ॥ १४ ॥
पुत्रत्वेन सुहृत्त्वेन स सखित्वादिना क्वच । वर्त्तते सुखयन्भक्तान्स्वस्मिंस्तत्प्रेम वर्द्धयन् १५ ॥
एतद्धर्यवतारस्य मुख्यमुक्तं हि कारणम् । विनाऽवतारं पूर्येरन्नैव भक्तमनोरथाः ॥ १६ ॥
अनेकजीवश्रेयश्च धर्मरक्षाऽसुरक्षयः । इत्यादिकर्म विष्णोस्तु ज्ञायतामानुषंगिकम् ॥ १७ ॥
वचनं सुधामिति निपीय हरेः परमां मुदं मुनिजनाः प्रपेदिरे ।
गृहिणश्च तत्पदसरोजरताः सदसि स्थिता विनयनम्रकंधराः ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ एकाधिकशततमस्तरंगः ॥ १०१ ॥ ॥ ५ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । आश्विनस्यासिते दर्शे वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायने वास्तोरुदगास्यगृहांगणे । उच्चमंचमहापीठे चारुच्छत्रसुशोभिते ॥ २ ॥
दीपराजिसहस्रेण न्यषीदत्सोऽभितो वृते । सुरवारं स्वर्णवृष्टं रक्तं परिदधन्नवम् ॥ ३ ॥
नरनारायणस्वामिनारायणसुवर्णकैः । स्वर्णसूत्रीयकैः श्यामकौशनीशारमादधत् ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वर्णसूत्रीयसत्पार्श्ववल्लरीदीर्घपल्लवम्। दधत्कौसुंभमुष्णीषमभ्राभं च कटीपटम् ॥ ५ ॥
पीतपुष्पस्रगापीडो गृहित्यागिगणावृतः। भूरिकारुण्यनयनः सायं भक्तगणानतः ॥ ६ ॥
देवपुर्यागतस्वीयगृहिभक्तैः समर्पिताम्। प्रीत्याऽऽदाय महापूजां तेषां भक्तिं च वर्णयन् ७ ॥
दीनानाथाख्यविप्रेण तदाऽऽगत्य स सत्पतिः। प्रणेमे विनयेनैव मानयामास तं स च ॥ ८ ॥
महावस्त्राद्यथ दधद्भक्ततुष्ट्यै क्षणं प्रभुः। तीव्रवैराग्यशालित्वात्पात्रायाऽदित्सदस्मयः ९ ॥
तस्मा एव ततः प्रादाद्विप्राय विदुषे स तत्। तदौदार्यं जनाः सर्वे दृष्ट्वाऽऽपुरतिविस्मयम् ॥
मुक्तानंदोऽथ तं साधुः प्रणम्याऽपृच्छदीश्वर। भक्तानां कैर्गुणैस्तेषु भगवांस्त्वं प्रसीदसि ११ ॥
तमुवाच हरिर्येषु कामलोभच्छलक्रुधाम्। मानेर्ष्यामत्सराणां च त्यागः स्यात् सर्वथा मुने ॥
स्यादप्रतिहता कृष्णे भक्तिः सप्रेम येषु च। तेष्वीदृशैर्गुणैरेव संप्रसीदति हि प्रभुः ॥ १३ ॥
त्याज्येषूक्तेषु दोषेषु मत्सरो य उदीरितः। सर्वेषां सविकाराणामाधार इति मे मतम् ॥१४॥
अतः श्रीमद्भागवततत्त्वज्ञानाधिकारिणः। निर्मत्सरानेव सतो व्यासः स्वयमुदाहरत् ॥ १५ ॥
दोषेभ्यः स च सर्वेभ्यः सूक्ष्मोऽस्तीत्यस्ति दुस्त्यजः। सन्मार्गस्थितिदार्ढ्येन जीयते स मनीषिभिः
पुनः पप्रच्छ तं मुक्तानंदो मत्सरसंभवः। कुतो निमित्ताद्भवति तद् ब्रूहीत्यथ सोऽब्रवीत् ॥
स्त्रीद्रव्यस्वादुभोज्यानि स्विति तद्धेतवस्त्रयः। येषां नैतत् त्रिकं तेषु मानस्तद्धेतुरस्ति हि ॥१८॥
स्वार्थसिद्धिं विनैवान्योत्कर्षेक्षामात्रतोऽपि च। उद्देति स नृणां हृत्सु स्वार्थलब्धौ तु किं पुनः।
अस्मै भट्टाय विदुषे मयाऽद्य स्वेच्छयाऽर्पितम्। महावस्त्रादि दृष्ट्वापि स जातोऽस्तीह केषुचित्।
स्वार्थोऽल्पोऽप्यत्र नास्त्येव तथापि व्यर्थमेव सः। आत्मावबोधशैथिल्याज्जात इत्यवगम्यते ॥
महांतो ज्ञानिनः संतस्त्वत्र सत्कर्मदर्शनात्। दृश्यंत आनंदभृतः सन्मार्गे नेमिवृत्तयः ॥२२॥
तेषामीदृग्विवेकोऽस्तीत्यस्ति तेषु न तज्जनिः। ईदृग्महापूजनकृद्धन्यो भक्तो हरेरिह ॥ २३ ॥
हरिश्चास्ति महान् दाता तीव्रवैराग्यशालिनः। येन विप्राय तत्सद्यो दत्तमक्लिष्टचेतसा ॥२४॥
एवं विवेकिनस्ते हि जानंत्यमलचेतसः। हृदये परितप्यंते व्यर्थमल्पधियोऽपरे ॥ २५ ॥
किंचित्कश्चन कस्मैचिद्दत्तेऽन्यस्मै स चापि तत्। अत्राऽस्माकं गतं किं नु विदुरित्थं हि सज्जनाः
मया तु कामलोभेर्ष्याः क्रोधो मानश्च मत्सरः। हृदि प्रवेशं नो दत्ता दोषा एते कदाचन २७॥
शब्दाद्याविषयाः पंच रमणीया अपि क्वचित्। न मे रुचिकराः संति तेष्वऽभावोऽस्ति वै भृशम्
यत्तु तान् कर्हिचिदहं स्वीकरोम्यादरान् क्षणम्। तत्तु स्वभक्ततोषार्थं न तु क्वापि स्वतुष्टये २९॥
दैहिको व्यवहारो मे सर्वो देहश्च सर्वथा। रक्षितोऽस्ति हि भक्तार्थं नात्र स्वार्थोऽस्ति कश्चन ॥
निःस्पृहत्वस्वभावं मे ह्येते मत्पार्श्ववर्तिनः। मुकुंदसोमवर्माद्या जानंतीत्यवगम्यताम् ॥ ३१ ॥
यथाकथंचित्स्वं देहं वर्त्तयंतो विरागिणः। रम्येष्वर्थेषु ये भक्तास्ते पूर्णा इति निश्चयः ॥३२॥

वचोमृतं स्वामिन इत्युदारं निपीय साधुः स तथा सदस्थाः।
संतोऽपरे भूरितरप्रतोषं प्रपेदिरे तं च ववंदिरे ते ॥ ३३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ द्व्यधिकशततमस्तरंगः ॥ १०२ ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । ऊर्जशुक्लप्रतिपदि वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायनग्रामे वासुभूपालयांगणे । उच्चमंचे महापीठे द्वीपराजिपरिश्रिते ॥ २ ॥
न्यषीदत्स प्रसन्नास्यः सितवासा वृतोऽखिलैः । मुनिभिर्नैकदेशीयैर्निजभक्तगणैः प्रभुः ॥ ३ ॥
काशिदासाभिधो भक्तस्तं प्रणम्य गृहाश्रमी । पप्रच्छ प्रांजलिर्भूत्वा विनीतः सम्मुखस्थितः ॥
भगवंस्त्यागिभक्तानां विक्षेपकृदभावतः । सुस्थाप्या मनसो वृत्तिर्भवेद्देवेश्वरे त्वयि ॥ ५ ॥
व्यावहारिककार्येषु प्रसक्तानां निरंतरम् । गृहस्थानां तु बहवः संति विक्षेपहेतवः ॥ ६ ॥
अतस्तेषां मनोवृत्तिः कथं स्यात्सुस्थिरा त्वयि । तन्मे वदेति संपृष्टः स तं प्रोवाच सत्पतिः ॥
मनःस्थैर्यं भगवति वांछद्भिर्गृहिभिर्जनैः । इत्थं विचारः स्वहृदि दृढः संपाद्य आदरात् ॥८॥
जन्मान्यनेकानि मम व्यतीतानि भवार्णवे । भ्रमतस्तेषु संबंधिजना आसन्पृथक्पृथक् ॥ ९ ॥
कर्मभिर्भ्राम्यमाणेषु यत्र कुत्रापि तेषु मे । यथा नास्त्येव ममता स्नेहश्चापि कदाचन ॥ १०॥
तथा न स्नेहममते योग्ये अद्यतनेष्वपि । एवं विचार्य स्वधिया दैहिकेष्वखिलेष्वपि ॥ ११ ॥
मायामयेषु तुच्छेषु हित्वा प्रीतिं विचक्षणः । सत्संगं नित्यदा कुर्वन् यो भजेत्कृष्णमादरात् ॥
गृहस्थस्यापि तस्य स्यात्त्यागिपुंस इव स्थिरा । मनोवृत्तिर्भगवतीत्युक्तोऽसौ मुदितोऽभवत् १३॥
तदानीं बहवो भक्ता गृहिणः सद उत्थिताः । बद्धांजलिपुटाः कृष्णं प्रणम्य जगदुः प्रभो १४॥
प्रवृत्तकर्मविक्षेपान्मनःस्थैर्यमिह त्वयि । गृहिणां न भवेद्येषां तेषां का भविता गतिः ॥ १५ ॥
तानुवाच हरिस्तैस्तु कार्यः कृष्णाश्रयो दृढः । सद्भयश्च कृष्णमाहात्म्यं श्रुत्वा हृद्यवधार्यताम् ॥
अधर्मोद्धारकः कृष्णो नूनं पतितपावनः । इति निश्चित्य ते साक्षाद्भजेयुर्नियमस्थिताः ॥१७ ॥
अथ तान्स्वप्रतापेन यमादिभ्यो दयानिधिः । रक्षित्वा दास्यति हरिः सतीं गतिमितीयताम् ॥
इत्याश्रुत्य हरेर्वाचं प्रसन्नास्त उपाविशन् । पप्रच्छुरथ संतस्तं प्रणम्य जगतां गुरुम् ॥ १९ ॥
वैराग्यस्य प्रभो हेतुः कोऽस्तीत्यथ स आह तान् । प्राक्संस्कारबलात्तु केषांचिदिह जायते ।
बाल्यादेव भवेत्तेषां विरागा विषयेषु धीः । वैराग्यं वर्द्धते तच्च प्रत्यहं शुद्धचेतसाम् ॥ २१ ॥
विषयासक्तपुंसां च मुहुः संसृतिबोधकैः । सत्सच्छास्त्रवचोभिस्तत्केषांचिदिह जायते ॥ २२ ॥
तदपि द्विविधं ज्ञेयं मंदतीव्रविभेदतः । ह्रसति प्रत्यहं मंदं वर्द्धतेऽन्यत्तु सद्धियाम् ॥ २३ ॥
येषां स्यान्मंदवैराग्यं ते सद्यः स्वगृहादिकम् । हित्वैव त्यागिनो भूत्वा कंचित्कालं चरंति ह ॥
ततो भ्रष्टा भवंत्येते विद्वांसोऽपि कुसंगतः । इतरेषां तु सत्संगात्सद्धीरन्वहमेधते ॥ २५ ॥
बाधितुं शक्यते नैव सा च क्वापि बुधैरपि । भवत्येव हि निर्विघ्नं श्रेय आत्यंतिकं ततः ॥२६॥
ततोऽपृच्छन्पुनः संतः श्रेय आत्यंतिकं प्रभो । किं लक्षणं च तत्सिद्धाः किंलक्ष्माणश्च तद्वद ॥
आत्यंतिको लयो यर्हि जायते तर्हि लीयते । सह स्वकार्यैः प्रकृतिः पुरुषे सोऽपि चाक्षरे २८॥
तदैकं सच्चिदानंदरूपं तेजः प्रकाशते । ब्रह्माख्ये तत्र भगवान् राजते पुरुषोत्तमः ॥ २९ ॥
दिव्यमूर्तिः कृष्णसंज्ञो दिव्यवासो विभूषणः । सेव्यमानो महामुक्तैर्ब्रह्मभूतैः सहस्रशः ॥३०॥
अनंतशक्त्यधिष्ठाता स एव स्वेच्छया पुनः । वीक्षामात्रेण पुरुषद्वारांडान्यखिलान्यपि ॥३१॥
सृजत्यथैषु भ्रमतः कर्मतंत्रान्स देहिनः । खिन्नान् दृष्ट्वातिकृपया तेषां निःश्रेयसाय वै ॥ ३२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भूत्वा नराकृतिर्भूमौ चरत्यद्भुतचेष्टितः। नृनाट्यं विदधानं तं निर्गुणं दिव्यविग्रहम् ॥ ३३ ॥
असुरा मूढधिषणा मायिकांगं वदंति हि। दैवास्तु सुधियो मायागुणातीतं परं विदुः ॥३४॥
एष एव हि वेदांते मायिकं जीवबुद्धिगम्। भावं सम्यग्निराकर्त्तुं निर्गुणोऽरूप उच्यते ३५॥
स्वातंत्र्येणाखिलांडानामुत्पत्तिस्थितिनाशकृत्। एष एवेति या निष्ठा श्रेय आत्यंतिकं हि तत् ॥
एतस्याः पक्वतां सिद्धिं प्राप्ताः स्युर्ये तु ते नराः। दृग्गोचरे सदेक्षंते तमेव पुरुषोत्तमम् ॥३७॥

इति तद्वचनं सुधया सदृशं मुनयः सुनिशम्य मुदं परमाम्।
ययुरानतमौलय आदरतो गृहिणोऽपि च नेमुरमुं सकलाः ॥ ३८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्र्यधिकशततमस्तरंगः॥ १०३ ॥ ७ ॥

शकाब्दे विक्रमार्कस्य नगाश्वसुभूमिते। ऊर्जशुक्ले तुरीयेऽह्नि वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायनग्रामे वास्तुभूपस्य वेश्मनः। वितर्दावुदगास्यस्य स न्यषीदन्महासने ॥ २ ॥
वृतं सद्भिश्च गृहिभिः परितः सितवाससम्। पप्रच्छ मुक्तानंदस्तं प्रणम्य पुरतः स्थितः ॥३॥
वेदशास्त्रपुराणेषु भगवांस्त्वं हि कीर्त्यसे। अणोरणीयान्महतो महीयानिति च प्रभो ॥ ४ ॥
एकस्यैव द्विधा भावो विरुद्धस्ते परस्परम्। कथं संभवतीत्येतत्कृपया वक्तुमर्हसि ॥ ५ ॥
तज्ज्ञानेन च भक्तानां फलं निष्पद्यते कियत्। तच्च ब्रूहीति संपृष्टस्तेनोवाच स सर्ववित् ॥६॥
एकस्य वस्तुतो नास्ति द्विधा भावः सदुत्तम। स्थूलता सूक्ष्मता चेति द्वे शक्ती भवतः प्रभोः।
स्थूलान् पदार्थांस्तत्राद्या धारयित्वाऽस्ति संस्थिता। सूक्ष्मांश्च सकलान्सूक्ष्मा भगवांस्तूभयाश्रयः
तत्र स्थास्नुजंगमानि वपूंषि सर्वदेहिनाम्। लोकाश्चतुर्दश तथा देहः सावरणो विराट् ॥९॥
प्रधानाधिष्ठातृदेहः प्रधानं तत्त्वमादिमम्। एतद्ब्रह्मांडमेकं हि तादृशानि त्वनेकशः ॥ १० ॥
महापुरुषदेहश्च मूलप्रकृतिरित्यमी। पदार्थाः कथिताः स्थूला दृश्याश्च स्थूलदृष्टिभिः ॥ ११ ॥
अथैतेषां शरीराणामात्मानो ये पृथक् पृथक्। सर्वे सूक्ष्मा हि ते संति स्वतः शुद्धाश्च निर्गुणाः
एतेषामपि सर्वेषामाधारश्चाऽक्षरं बृहत्। अतिसूक्ष्मं तदस्तीति सूक्ष्मभावा उदाहृताः ॥ १३ ॥
तत्र स्थूलान् पदार्थांस्तु स्थूलशक्ती रमापतेः। व्याप्य प्रकाशयत्येव तेभ्यः स्थूलांतरे बहिः ॥
सूक्ष्मशक्तिस्तथा सूक्ष्मान् पदार्थांश्चांतरे बहिः। व्याप्य प्रकाशयत्यस्याः सूक्ष्मेभ्योस्त्यतिसूक्ष्मता ॥
प्रकाशकेभ्यः सर्वेभ्योऽतिप्रकाशेयमस्ति च। अतिशुद्धा च शुद्धेभ्य आकाश इव निर्मला १६॥
स्थूलाः पदार्थाः सगुणा भवंति सकला अपि। सगुणेत्यप्यतः प्रोक्ता शक्तिस्तेषां प्रकाशिका ॥
तथा सूक्ष्माः पदार्थाश्च संति सर्वेऽपि निर्गुणाः। तेषां प्रकाशिका शक्तिर्निर्गुणेत्युदिता ततः ॥
एतच्छक्तिद्वयं यस्य भगवान्सोऽस्ति कीदृशः। इति चेत्प्रकटः सोऽस्ति स्वयं कृष्णो नराकृतिः ॥
स्वनिष्ठे दर्शिते एव शक्ती द्वे अपि तेन हि। नृत्वं नाटयता भूमौ श्रेयसे सर्वदेहिनाम् ॥२० ॥
अल्पकेऽपि मुखे स्वस्य विश्वरूपं स्वमातरम्। दर्शयन्स्थूलता शक्तिमाविश्चक्रे निजेच्छया ॥२१॥
गोपदेहस्थिताञ्जीवान् धाम नीत्वा निजं परम्। ततः प्रत्यानयन्सूक्ष्मशक्तिमाविश्चकार सः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थूलशक्तिः सूक्ष्मभावान् श्रीकृष्णस्येच्छया क्वचित् । तत्क्षणं वाऽनुक्रमेण स्थूलतामपि लंभयेत्
तथैव सूक्ष्मशक्तिश्च स्थूलभावान्कदाचन । सूक्ष्मतां प्रापयेदेव वांछया परमात्मना ॥ २४ ॥
एतद्द्वयमपि क्षोण्यां तेनैवाऽक्लिष्टकर्मणा । मनुष्यभावं दधता स्वेच्छयैव प्रदर्शितम् ॥२५॥
द्वार्वतीवासिविप्रस्य पुत्रान्भूमहृतान्पुनः । प्रत्यानेतुं भूमधाम रथेनाऽगात्स साऽर्जुनः ॥ २६ ॥
साश्वं रथं तदा स्थूलं सूक्ष्मशक्त्यैव सूक्ष्मताम् । प्रापय्य च्छित्वा चक्रेण तमो मायामयं ययौ ॥
भूमांतिकस्थान्विप्रार्भान् दिव्यं सौक्ष्म्यमुपागतान् । प्रत्यानीय स्थूलभावं स्थूलशक्त्याऽनयत्पुनः
एवंविधा भगवति नराकृतावपि भूतले । अन्या अपि भवंत्येव शक्तयो हि सहस्रशः ॥ २९ ॥
अत एव महिम्नोऽस्य पारं यांति न केऽपि हि । एतदेव हि दिव्यत्वमप्यस्योह्यं नराकृतेः ॥३०॥
शक्तिशक्तिमतोः शास्त्रेष्वभेदस्य विवक्षया । शक्तिमान्भगवानेव सूक्ष्मः स्थूलश्च कीर्त्यते ३१॥
अतो न संशयः कार्यः सूक्ष्मस्य स्थूलता कथम् । स्थूलस्य सूक्ष्मता चेति शक्तिकोटिपतिः प्रभुः
एवं ज्ञात्वा भजंते तं ये तेषां कालकर्मतः । मायायाश्च भयं नास्ति वर्त्तेताश्चर्यमंतरे ॥ ३३ ॥
निपीय पीयूषमिवेति वाचं वाचस्पतेस्तस्य मुनिः सतोषम् ।
प्रापत् परं ये च सदोनिषण्णाः संतो गृहस्था अपरे च तेऽपि ॥३४॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुरधिकशततमस्तरंगः ॥ १०४ ॥ ८ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । पञ्चम्यां कार्त्तिकसिते वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायनग्रामे वेश्मनो वास्तुभूपतेः । सौम्यास्यस्य बहिर्वेद्यां न्यषीदत्स वरासने ॥ २ ॥
नैकदेशागतैर्भक्तैः सद्भिश्च गृहिभिर्वृतः । सितवासा दधत्पाणौ दक्षे तुलसिकास्रजम् ॥ ३ ॥
संतौ ब्रह्मानंदनित्यानंदौ प्रति स केपुचित् । सत्सु किंचिच्छिद्रदोषं निराकुर्वन्नुवाच ह ॥ ४ ॥
सतां त्यक्तगृहादीनां कोपतद्ग्रंथिवंधने । यदि स्यातां हृदि तदा वाच्यास्ते साधवो न वा ५॥
तावूचतुः प्रभो नैते साधवः साधुलक्षणाः । भूर्यनर्थावहक्रोधवशं यांति यतोऽत्र ते ॥ ६ ॥
क्षुत्तृट्त्रिकालगुणमारुतजैह्वशैश्नानस्नानपारजलधीनतितीर्य केचित् ।
क्रोधस्य यांति विफलस्य वशं पदे गोर्मज्जंति दुश्चरतपश्च वृथोत्सृजंति ॥ ७ ॥
इति क्रोधवशत्वस्य निंदा भागवते श्रुता । अतः सद्भिः प्रयत्नेन स जेयः क्षमया रिपुः ॥८॥
तयोरिति वचः श्रुत्वा प्रसन्नः स क्षमां प्रभुः । प्रशशंसाऽथ तं मुक्तानंदः पप्रच्छ सन् प्रभो ॥
भक्तेऽपि तेऽगुणं कंचिद् दृष्ट्वा क्रोधोदयो भवेत् । स केन नैव गृह्णीत साधनेनानुशाधि तत् ॥
यस्तु कृष्णस्य भक्तोऽस्ति तस्मिंश्चेदगुणो भवेत् । तदा कृष्णस्य माहात्म्यवेत्ता गृह्णाति तं न हि॥
अवरस्यापि भक्तस्य गुणा एव मनीषिभिः । गृह्यंते नाऽगुणः क्वापि कृष्णमाहात्म्यवेदिभिः ॥
उद्धवेन महाभागवतेनापि व्रजे गुणाः । गृहीता वर्णिताश्चापि मुहुर्वल्लवयोषिताम् ॥ १३ ॥
तासां पादरजः स्पर्शं तत्र प्राप्नुवतां क्वचित् । अपि गुल्मतृणादीनां मध्ये जन्माऽर्थितं स्वकम् ॥
ब्रह्मणाऽप्यर्थितः कृष्णो व्रजवासिषु देहिषु । भूत्वाऽहं यत्र कुत्रापि त्वत्केषु त्वां भजा इति ॥
एवं यः कोऽपि भगवन्माहात्म्यं वेत्ति पूरुषः । स तु क्वापि न भक्तस्य गृह्णीयादगुणं सुधीः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णसंबंधमापन्नान् पशुपक्षिद्रुमादिकान् । अपि सुज्ञास्तु जानंति देववत्पूजनोचितान् ॥१७॥
तदा कृष्णध्यानपूजानामस्मृत्यादिकारकान् । जानीयुर्मानवान्देवतुल्यानिति तु किं पुनः ॥
सद्भ्यो ये कृष्णमाहात्म्यं न विदुस्ते त्वसद्धियः । कृष्णस्याप्यगुणान् ब्रूयुस्तद्भक्तानां तु किं पुनः

कृष्णतज्जनमहत्त्ववेदिनो भक्तशब्दकथिता न हीतरे ।
तस्य वाचमिति सत्पतेः सुधां तोषमाप स निपीय चाऽपरे ॥ २० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पञ्चाधिकशततमस्तरंगः ॥ १०५ ॥ ६ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । दशम्यां कार्त्तिकसिते वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायनग्रामे वास्तुभूपस्य वेश्मनः । प्राङ्मुखस्य बहिर्वेद्यां व्यराजत स मंचके ॥ २ ॥
नानादेशागतैर्भक्तैस्त्यागिभिर्गृहिभिर्वृतः । सितांबरधरः स्वाग्रे निषण्णान् सोऽब्रवीत् सतः ३॥
शास्त्रेषु भगवत्प्रीतिहेतुस्तप इतीर्यते । प्रसादितो विश्वसृजा तपसैवाऽऽदितो हरिः ॥ ४ ॥
बहुकालं तपस्तप्तं नारदेन महर्षिणा । प्रीत्यै नारायणस्यैव सोढ्वा शीतातपक्षुधः ॥ ५ ॥
विष्णुस्तेन प्रसन्नोऽभूदतो येऽत्र विवेकिनः । ते तु तत्प्रीतये बुद्ध्या तप एवाचरंति हि ॥६॥
ज्ञात्वेति युष्माभिरपि देहेंद्रियदमोद्यमे । । नित्यं बुद्ध्या वर्त्तितव्यं भगवत्प्रीतिकामुकैः ॥७॥
कष्टं दैह्यं यदा कर्म फलदेशेच्छयाऽऽव्रजेत् । तदा तु तन्मुदा ग्राह्यं प्रतीकार्यं कुतो बुधैः ॥८॥
भक्तैस्तु साधुभिश्चित्ते कार्या दृढतपोरुचिः । न तु वैकुण्ठलोकादिनानाभोगैषणा क्वचित् ॥९॥
मम त्वनेन देहेन विधेयं तप एव हि । श्वेतद्वीपे बदर्यां च देहत्यागादनंतरम् ॥ १० ॥
एकेन वाप्यनेकेन जन्मना पुरुषोत्तमः । यावत्प्रीतो भवेत्तपः कुर्यां न चेतरत् ॥ ११ ॥
इतीच्छा हृदये नित्यं कर्त्तव्या मामकैर्नरैः । साक्षाद्धरिः सर्वकर्त्तेत्येवं ज्ञेयं च सर्वथा ॥ १२ ॥
कालः कर्म च मायापि तदधीना भवंति हि । न स्वतंत्राः क्वचित्तस्मान्मुख्यः कर्त्ता स ईश्वरः ॥
श्रेयोहेतुरिदं ज्ञानं नृणामित्यवगम्यताम् । एवं यो न विजानाति स पापिष्ठतमो मतः ॥१४॥
भक्तिज्ञानप्रतापेन शुकब्रह्मशिवैः समाः । भवेयुः पुरुषेणापि केचिच्चाऽक्षरसन्निभाः ॥ १५ ॥
न तु कोऽपि भवेत् क्वापि पुरुषोत्तमसन्निभः । एक एवेत्यतो वेदैर्गीयतेऽनुपमो हि सः १६ ॥
तमीश्वरेश्वरं हित्वा स्वतंत्रं सर्वशासनम् । कर्त्तारमन्यं जानीयात्तद्दीक्षाप्यघकृन्मता ॥ १७ ॥
एतद्विरुद्धवादा ये भवेयुर्भुवि पंडिताः । शास्त्राणि वा तदर्थानि त्याज्यान्याराच्च तानि ते १८॥
एवं न कुरुते यश्च कर्त्तारं वेत्ति नो हरिम् । स महानास्तिको वर्ज्यच्छायो ज्ञेयः श्वपाकवत् ॥
मुक्तानंदस्तदा साधुस्तमुवाच तदेकधीः । हरिः प्रसाद्यस्तपसेत्युक्तं हि भगवंस्त्वया ॥ २० ॥
स्रक्चंदनांशुकाभूषाभोज्याद्यैः सद्भिरादरात् । हरिं त्वाराधयेद्धित्वा तपोऽत्र किमु बाधकम् ॥
तमुवाचाऽथ स स्वामी प्रायो नास्त्यत्र बाधकम् । किं त्वेका विषयासक्तिर्बाधिका प्रतिभाति मे ॥
तत्तत्पदार्थोपभोगलालसेन स्वचेतसा । प्रसादीकरणं विष्णोः पदार्थानां तु बाधकम् ॥२३॥
यतस्तत्तत्पदार्थोपभोगात्स्याद्विषयी पुमान् । भक्तिमार्गात्ततो भ्रष्टः स्याज्जातो बाधकं हि तत् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यदि निष्कामभावेन कृष्णार्चां सत्स्रगादिभिः। कुर्यात्तर्हि तु नास्त्येव बाधिका सा तपो हि तत्
पदार्थसंगं त्यक्त्वाऽतो ज्ञात्वा कर्त्तारमच्युतम्। तस्य प्रीत्यै तपः कार्यं सद्भिरित्यस्त्येव मे मतम्
राधालक्ष्म्यादिवत्कार्यं तपोऽपि प्रेमभक्तियुक्। न केवलं देहदम इति सिद्धांतवाङ्मम ॥२७॥
अथ पप्रच्छ तं नत्वा ब्रह्मानंदः सदुत्तमः। यथेहाऽमुत्र च शुभमस्माकं स्यात्तथा वद ॥२८॥
तमुवाच हरिः प्रीतो मदुक्तमिदमेव हि। इहामुत्र च सर्वेषां निःश्रेयसकरं खलु ॥ २९ ॥
प्रणम्याऽथ तमप्राक्षीद् गोपालानंद आत्मदृक्। मतं तवैतद्भगवन्नोचते मह्यमंजसा ॥ ३० ॥
त्यागस्य तपसश्च स्याद् हृदि यस्यैषणा भृशम्। विघ्नस्तत्करणे कश्चिद्यदि स्यात्कार्यमत्र किम् ॥
इति तस्य वचः श्रुत्वा प्रसन्नः स सतांपतिः। प्रोवाच तं साधुवर्यं तद्रसज्ञं विदन् हृदि ॥३२॥
भृशैषणा यस्य भवेद्यस्य कस्यापि वस्तुनः। तदुद्युक्तः स विघ्नौघैरपि रोद्धुं न शक्यते ॥३३॥
अहमेवाऽत्र दृष्टांतो द्रष्टव्यो भवताऽनघ। तपस्त्यागरुचित्वाद्धि नासक्तो विषये क्वचित् ॥३४॥
श्रीमद्रामानंदगुरोः प्राप्तस्यांतिकमत्र मे। एकविंशतिसंख्याका व्यतिक्रांता हि वत्सराः ॥३५॥
तत्र नानाविधद्रव्यस्वर्णालंकारवाससाम्। खाद्यपेयरसानां च सेवकानां सहस्रशः ॥३६॥
संबंधे सत्यपि क्वापि मनो लुभ्यति नैव मे। त्यागैषणैव तत्रास्ति हेतुरित्यवगम्यताम् ॥३७॥
रंडा अपि स्त्रियः काश्चिदत्र कामैषणातुराः। मृतेशं बहु शोचंति सज्जंतेऽन्यनरेषु च ॥ ३८ ॥
काश्चित्तरुण्यः सधवा अपि कृष्णैषणाः स्त्रियः। त्यक्तभर्तृसुखा नित्यं भजंति हरिमादरात् ॥
विद्वांसोऽपि नराः केचिद् भृशकामैषणा भुवि। मृतां स्त्रीमतिशोचंति वार्द्धक्येऽन्यामुद्वहंति च
तारुण्येऽपि नराः केचिदशास्त्रज्ञा हरीषणाः। त्यक्तस्वतरुणीसौख्या भजंत्यन्वहमीश्वरम् ॥४१॥
एवं संत्येषणाः साधो मनुष्याणां पृथक् पृथक्। यदेषणो यः पुरुषस्तदुद्युक्तोऽस्ति सोऽन्वहम् ॥
एवं निश्चित्य भवता सद्भिरन्यैश्च मामकैः। भगवत्प्रीतये कार्यं तपस्तत्प्रेमभक्तियुक् ॥ ४३ ॥
ज्ञेयः स सर्वकर्त्तेति स्वामी चैकोऽखिलात्मनाम्। सेव्यश्च दासभावेन सर्वैर्मान्येति वाङ्मम ॥

श्रुत्वेति वाक्यं स सुधोपमेयं सर्वेऽपि ते भक्तजनास्तु तस्य।
प्रणम्य तं तच्च मुदा शिरोभिः संधारयामासुरुदारचित्ताः ॥ ४५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ षडधिकशततमस्तरंगः ॥१०६॥१०॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। एकादश्यां प्रबोधन्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायनग्रामे वास्तो राज्ञो गृहस्य सः। प्रागास्यस्य बहिर्वेद्यां न्यषीदन्मंचके निशि ॥२॥
वलक्षपरिधानीयः सितशीर्षपटस्तथा। सितचित्रसुनीशारः सितप्रावरणांशुकः ॥ ३ ॥
पार्श्वस्थछत्रिहस्तस्थदीपिकाचंचदंशुकः। पीतपुष्पस्रगापीडस्त्यागिगृहिगणावृतः ॥ ४ ॥
तं सच्चिदानंदमुनिर्नत्वा पप्रच्छ हे प्रभो। किं लक्षणं प्रीतिमतः कृष्णे त्वय्यस्ति तद्वद ॥ ५ ॥
यस्य प्रीतिर्भवेत्कृष्णे स्वप्रेष्ठे स तु सर्वदा। तदाज्ञायामेव मुदा वर्त्तेत तदनुव्रतः ॥ ६ ॥
यद्यत्प्रियं भवेत्तस्य तत्तदेव समाचरेत्। तदप्रियं तु स क्वापि नाचरेदण्वपि ध्रुवम् ॥ ७ ॥
दृष्टांतत्वेन गोप्योऽत्र ज्ञेयास्ता हि सदा प्रियम्। तस्याऽचरन्न तु क्वापि किंचिदप्यप्रियं मुने ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सहाक्रूरेण मथुरां तस्मिन् गंतुं समुद्यते। लोकलज्जां विहायैच्छन्निवेद्धुं तं पथि स्थिताः ॥९॥
निवारिता भगवता कटाक्षेणाऽथ तास्ततः। न्यवर्त्तंत विदित्वैव दृढां जिगमिषां प्रभोः ॥१०॥
स्वप्रियं ता विहायैव चक्रुस्तस्यैव हि प्रियम्। तदप्रिये कृते स्वासु तत्स्नेहत्यागशंकिताः ११ ॥
क्रोशत्रयांतरेऽप्येतास्तद्दिदृक्षाकुला अपि। न जग्मुर्मथुरां तस्य रुचिं ज्ञात्वैव तादृशीम् ॥१२॥
एवं प्रीतिमतः कृष्णे लक्षणं विद्धि सन्मते। तस्य रुच्यनुसारेण वृत्त्यं नित्यं न चात्मनः ॥१३॥
यदि स्वनिकटस्थित्यां तद्रुचिश्चेत्तदांतिके। तस्य स्थेयं दूरतश्चेत्तथा स्थेयं तु दूरतः ॥ १४ ॥
स्वाप्रिये जायमानेऽपि सोढ्वा तत्तत्प्रियेहया। तदाज्ञायां सदा स्थेयमिति प्रश्नोत्तरं तव १५॥
इत्युक्त्वा तं प्रभुः सर्वान्सतोऽपृच्छत्स एव हि। कश्चिद्भक्तो भगवति प्रेमवानस्ति निर्भरम् ॥
न क्षमो विरहं सोढुं क्षणमात्रमपि प्रभोः। ग्राम्येभ्यो विषयेभ्यश्च रम्येभ्योऽपि विरागभाक् ॥
पंचेंद्रियार्थान् कार्ष्णांस्तु सेवमानः स जीवति। तदप्राप्तौ न स्वदेहं क्षमते रक्षितुं ध्रुवम् ॥
तं यदि त्वाकृतिः कृष्णः किंचित्कार्यार्थमात्मनः। विप्रकृष्टे पदे स्थातुं स्वयमाज्ञापयेन्मुदा ॥
तर्हि साऽऽज्ञा तस्य तेन पाल्या वा नेति संशयः। तत्संगभंगः स्यादाद्य आज्ञाभंगस्तथाऽन्यतः।
इति प्रश्नं हरेः श्रुत्वा यथावत्ते तदुत्तरम्। कर्तुं यदा नाभ्यजानन्नूचे तर्हि स एव ताम् २१॥
तादृशेनापि भक्तेन पाल्यैवाऽऽज्ञाऽऽत्मनः प्रभोः। यद्यत्करोति कृष्णस्तत्तज्ज्ञात्वैव हि सर्ववित्।
जानाति भजतः स्नेहं स्वस्मिन्सर्वाधिकं प्रभुः। स तच्चिंतां विहायाऽतः कुर्यात्श्रेयःप्रियं सदा ॥
यथैव निजभक्तस्य प्रियमेव भवेत्तथा। करोति कृष्णो न क्वापि ह्यप्रियं भक्तवत्सलः ॥ २४ ॥
भक्तिभाग्यत्र यत्राऽसौ स्वाज्ञया याति भूतले। तत्र तत्र स यात्येव तत्प्रेमगुणसंयतः ॥२५॥
अतो न तस्य विरहः कृष्णस्य भवति क्वचित्। कार्ष्णान्स पंच विषयान् यथेष्टं लभतेऽपि च ॥
भक्तो यथा भगवतो विरहं सोढुमक्षमः। तथैव सोढुं विरहं कृष्णो भक्तस्य न क्षमः ॥ २७ ॥
अतोऽत्र भक्तमात्रेण कृष्णस्याज्ञैव सर्वथा। पालनीयेति प्रश्नस्य संतः प्रोक्तं मयोत्तरम् ॥२८॥

सुधोपमेयामिति तस्य वाचं श्रुत्वाऽखिलाः साधुजनाः सदःस्थाः।
प्रापुः प्रहर्षं गृहिणश्च सर्वे तमानमंति स्म च ते विनीताः ॥ २९ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ सप्ताधिकशततमस्तरङ्गः ॥ १०७ ॥ ११ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। ऊर्जमासे पौर्णमास्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र कार्यायनग्रामे वेश्मनो वास्तुभूपतेः। प्राङ्मुखस्य बहिर्वेद्यां न्यषीदत्स सुमंचके ॥ २ ॥
सितसर्वांबरो नानाभक्तसंघपरिश्रितः। चारुचंदनपुष्पस्रक्शेखरैः पूजितः स्वकैः ॥ ३ ॥
स्वाज्ञया क्रियमाणानि साधुभक्तैः परस्परम्। देहत्रयानुबंधीनि शृण्वन् प्रश्नोत्तराणि च ४॥
ततः प्रीतस्तृतीयांगविवेकं स्वयमाह तान्। वपूंषि त्रीणि जीवस्य स्थूलं सूक्ष्मं च कारणम् ५॥
जीवस्य बंधनान्येव तानि मायामयानि वै। तत्र कारणमेवांत्यं लभते स्थूलसूक्ष्मताम् ॥ ६ ॥
पृथक्त्वेन न तज्जीवाद्वेत्तुं शक्यं मुमुक्षुभिः। तमोमयं च दुर्भेद्यं कठिनं वज्रसारवत् ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यदा मुमुक्षुः सत्संगं कृत्वा साक्षाद्धरिं हृदि । दृढं निश्चित्य रहसि प्रेम्णा ध्यायति निश्चलः ॥
हृदि तस्य च वाक्यानि धत्ते तं चानुवर्त्तते । तदा तु तत्प्रतापेन भवत्यात्मा ततः पृथक् ॥९॥
चिंचाबीजस्य त्वग्गर्भाविकत्वेन स्थितावपि । अग्नितापेन भिन्नौ स्तो यथा तेन तथैव तौ ॥१०॥
नास्ति कारणमायाया जीवस्याऽस्य पृथक्स्थितौ । एनं विना ह्युपायोऽन्य इति जानीत निश्चितम्
इत्युक्त्वा तान् पुनः स्वामी पप्रच्छाज्ञानमूलहृत् । स्थूलं जाग्रत्सत्त्वकार्यं सूक्ष्मं स्वप्नश्च राजसम्
प्रकाशगुणके सत्त्वे यथार्थं ज्ञानमस्ति हि । अयथार्थं च भवति मलिने तु रजोगुणे ॥ १३ ॥
एवं सत्यपि सात्विक्यामवस्थायां तु जाग्रति । श्रुतस्यार्थस्य मननं यदा सूक्ष्मे प्रजायते १४ ॥
तदैव तस्य दार्ढ्यं तु भवतीत्यनुभूयते । प्रकाशे तत्कथं नाभूदभूच्च मलिने कथम् ॥ १५ ॥
इति तत्प्रश्नमाश्रुत्य संतस्ते कर्त्तुमुत्तरम् । यदा यथावन्नाऽजानंस्तदा चक्रे स एव तत् १६ ॥
क्षेत्रज्ञ आत्मा हृत्पद्मे देहिनां वर्त्तते सदा । बाह्यांतःकरणानां स भवत्येव प्रवर्त्तकः ॥ १७ ॥
तदात्मकः सूक्ष्मदेहो निकटे तस्य वर्त्तते । अतो ज्ञानस्यातिशयस्तत्रैवास्ति विशेषतः ॥ १८ ॥
तदेव स्याद्दृढं सत्यं यत्क्षेत्रज्ञप्रमापितम् । इति प्रश्नोत्तरं प्रोक्तं स्वानुभूतिप्रमाणतः ॥१९॥
ईदृक्प्रश्नोत्तरं स्थैर्यं मनसश्च बुभुत्सवः । स्वनिर्वासनतां सम्यग्गिच्छेयुर्येऽत्र मानवाः ॥२०॥
तैः श्रद्धया मुहुः श्रव्याः सादरं प्रयतात्मभिः । ईदृश्यो भगवद्वार्त्ताः सर्वाभीष्टार्थसिद्धिदाः ॥
दानव्रततपोयोगध्यानादिभ्योऽपि सर्वथा । एता एव गरीयस्यः परमार्थप्रसाधने ॥ २२ ॥

इति वचनसुधां हरेर्निषण्णाः सदसि निपीय तदाश्रिताः समस्ताः ।
परममुदमवापुरेव संतो हृदि दधतो गृहिणश्च तां सचित्रम् ॥ २३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावष्टोत्तरशततमस्तरंगः ॥ १०८ ॥ १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणाय नमो नमः

लौहग्रामे

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। दशम्यां कार्तिकस्यांते वचोमृतमिदं हरेः ॥ १ ॥
ग्रामे लौहाभिधे तत्र सूरवर्मनृपालये। न्यषीददुत्तमे पीठे स स्वैर्भक्तगणैर्वृतः ॥ २ ॥
सितमाप्रपदीनं च सितोष्णीषं तथा दधत्। चित्रं परिदधच्छ्वेतं तूलगर्भांगरक्षकम् ॥ ३ ॥
सितप्रावारवसनो मितस्मितलसन्मुखः। साधून् पुरस्थानवदत्स्वकीयहितकृत्प्रभुः ॥ ४ ॥
भक्तैर्नारायणस्येह क्रोधाख्यो बलवान् रिपुः। सर्वथैव विजेतव्यः सुकृतक्षयकारणम् ॥ ५ ॥
रोगितश्वसमक्रोधो यं यं दशति देहिनम्। तं तं विरूपयित्वैव दुर्दशां नयति द्रुतम् ॥ ६ ॥
यदाविष्टात्सतोऽपीह कालसर्पादिवाऽपरे। बिभ्यत्यन्यप्राणहरं तं त्यजन्सुखभाग्भवेत् ॥ ७ ॥
अथापृच्छच्छुकमुनिस्तं प्रभो यदि सोऽल्पकः। हृदि जातोऽथ विज्ञातः प्रहियेतात्मसंविदा ८॥
तदा स किंचित्कुर्यात्किं मुमुक्षोरहितं न वा। तमुवाच पुनः स्वामी दुष्टो दौष्ट्यं न हि त्यजेत्
उपशल्येऽपि हुंकारं कुर्वन्व्याघ्रः पुरौकसाम्। अमारकोऽपि सर्वेषां यथाऽस्त्येव भयंकरः १०॥
यथा वाऽत्रैव सदसि भुजंगः कश्चनापतेत्। अदशन्नपि सर्वेषां भयेन द्रावको भवेत् ॥ ११ ॥
अल्पकोऽपि तथा क्रोधो न परं मारयन्नपि। भीतिप्रदो भवेदेव सोऽपि त्याज्यस्ततोऽन्यवत् ॥
इत्युक्त्वा तं प्रभुः साधून्सर्वानपि जगाद सः। प्रष्टव्यं कस्यचित्किंचित्स्याच्चेत्तर्हि स पृच्छतु ॥
तदापृच्छत्कनिष्ठस्तं निर्मानानंद ईश्वर। कामस्योन्मूलनं केन साधनेन भवेद्वद ॥ १४ ॥
श्रीस्वाम्युवाच तं साधो दृढयैवात्मनिष्ठया। अष्टांगब्रह्मचर्येण वैराग्येण दृढेन च ॥ १५ ॥
माहात्म्यातिशयज्ञानपूर्वकेण रमापतेः। उपासनेन कामस्य भवेदुन्मूलनं ध्रुवम् ॥ १६ ॥
अपृच्छद्व्रजनानंदस्तं विरक्तस्य मे प्रभो। कनिष्ठमध्यमोत्कृष्टभेदान्कथय लक्षणैः ॥ १७ ॥
तमुवाच हरिर्यस्तु त्यक्त्वा स्त्रीसंगमष्टधा। वर्त्तमानः स्वधर्मेऽपि क्वचित्स्त्र्यंगस्य दर्शने ॥१८॥
विक्रियां प्राप्नुयात्सद्यः कनिष्ठः स विरागवान्। सत्संगाद्यदि दूरे स्यात्पतेदेव न संशयः १९॥
योषां पशुमिवालोक्य विवासससमपीह यः। विक्रियां नाप्नुयाच्चेयात्तां तु दृष्ट्वा रहःस्थले २०॥
स विरक्तो मध्यमो वै कुसंगाभ्यासतः पतेत्। उत्तमस्तु न वै क्वापि स्त्रीक्षादौ क्षोभमेति हि ॥
पुनस्तं भजनानंदः साधुः पप्रच्छ सत्पते। विरक्तवज्ज्ञानिनोऽपि त्रैविध्यं वक्तुमर्हसि ॥ २२ ॥
वीक्ष्य प्रतापं कृष्णस्य त्वाकृतेरतिमानुषम्। अयं साक्षाद्धरिरिति तं विदित्वा य आश्रयेत् ॥
प्रतापानाविष्करणं क्वचिद् दृष्ट्वा नृनाटनम्। कुर्वतोऽस्य च शंकेत कनीयान् ज्ञानवान्स तु २४॥
विदित्वापि कनीयोवत्कृष्णं नरतनुं प्रभुम्। शुभाशुभचरित्राणि वीक्ष्य मुह्येत्तु तस्य यः २५॥
स मध्यमोऽथोत्तमस्तु पर्वतप्रायनिश्चयः। सर्वकर्मसु कृष्णस्य नैव मुह्येत्स कर्हिचित् ॥ २६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निश्चयः कारितः स्वस्य येन कृष्णस्य सोपि चेत् । नायं प्रभुरिति स्वं च वदेद् दुःसंगनष्टधीः ॥
तदा तमेव जानीयाद्विपर्ययमतिं ध्रुवम् । न तु स्वनिश्चयं जह्यादणुमात्रमपि क्वचित् ॥ २८ ॥
प्राप्नुयादुत्तमः सिद्धिमस्मिन्नेव हि जन्मनि । मध्यमो जन्मभिर्द्वित्रैरनेकैस्तु तृतीयकः ॥ २९ ॥
शिवानंदोऽथ तं ज्येष्ठः पप्रच्छ प्रभुमानतः । पूर्णे ज्ञाने तवाप्यंतर्नेयते स्वकृतार्थता ॥ ३० ॥
अत्र हेतुं न जानीमस्त्वं भवान्वक्तुमर्हति । इति पृष्टः सता तेन तमूचे भक्तिनंदनः ॥ ३१ ॥
कामलोभस्वादमानस्नेहाद्यांतरशत्रुभिः । दग्धाशयस्य पुंसो हि न स्यादंतः कृतार्थता ॥ ३२ ॥
पप्रच्छ नित्यानंदोऽथ साधुस्तं प्रणतः प्रभो । केनोपायेन कामाद्या नश्यंत्यांतरशत्रवः ॥ ३३ ॥
प्रोवाच तं हरिः साधो नश्येयुस्तस्य तेऽरयः । नित्यं दंडोद्यतो यः स्यात्तेषु पापिष्विवाऽर्कजः ॥
देहवाङ्मनसां दंडात्तेषां दंडो भवेत्कृतः । तत्र देहस्य दंडस्तु कृच्छ्रचांद्रायणादिभिः ॥ ३५ ॥
वाचो मौनेन सत्येन कृष्णसंकीर्त्तनेन च । विवेककृष्णध्यानाभ्यां दंडस्तु मनसो मतः ॥३६॥
एवं दंडेन नष्टाः स्युर्हृदः कामादयोऽरयः । माहात्म्यज्ञानपूर्वं तु कृष्णं भजत आदरात् ३७॥
मुक्तानंदोऽथ पप्रच्छ सत्संगं कुर्वते नराः । बहवस्तत्र यत्पूर्णो ज्ञेयः कैर्लक्षणैः स तु ॥ ३८ ॥
यस्यात्मनिष्ठा सुदृढा क्षेत्रासंगित्ववर्त्तनम् । स्यात्तथापि न यो जह्यादावपुःस्मरणाद्यमान् ॥३९॥
ब्रह्मभूतोऽपि वर्त्तेत दास्य एव हरेश्च यः । न तिष्ठेच्च क्षणमपि क्रियां कार्ष्णीं विना क्वचित् ॥
शुभाशुभाः क्रिया यश्च कुर्वंतमपि मर्त्यवत् । कृष्णं मन्येत प्रत्यक्षमाकाशवदसंश्लिष्टम् ॥४१॥
नराकारोप्येष एवानंतब्रह्मांडकारणम् । अक्षरादिधामपतिः सकलैश्वर्यसंयुतः ॥ ४२ ॥
अक्षरात्मकमुक्तौघसेवितांघ्रिश्च वर्त्तते । एवं यः कृष्णमाहात्म्यं विदित्वा तं निषेवते ॥ ४३ ॥
तस्यैव पुंसः सत्संगः पूर्णो जात इतीयताम् । कनिष्ठोऽथ शिवानंदस्तमपृच्छत्कृतानतिः ॥४४॥
इह भक्तजनाः केचित्कृष्ण ते महतां सताम् । भक्तानां भूरिमाहात्म्यं विदंति हृदयेंऽजसा ॥
केचित्तु भक्ता अप्येषां माहात्म्यं कर्हिचिद्विदुः । न चाज्ञवद्विदुः क्वापि तत्र किं कारणं वद ॥
प्रभुः प्रोवाच तं साधो धर्मनिष्ठा हि साधवः । धर्म एव प्रियस्तेषामाश्रितानां जगद्गुरुम् ॥
तन्माहात्म्यावगंतारो जनास्तु द्विविधा मताः । कुशाग्रबुद्धयस्तत्र केचिच्च स्थूलबुद्धयः ॥४८ ॥
आद्यास्तत्र विनष्टाहंकाराः स्युः साधुसेवया । अन्येषां क्वापि लीना स्यादहंता क्वापि चोद्गता ॥
उभयानपि तान्संतः क्वचिदुत्पथवर्त्तने । ततो निवर्त्तयेयुर्वै वचनैरप्रियैरपि ॥ ५० ॥
तत्राद्याः स्वहितान्येव विदंतस्तद्वचांसि हि । तेषां यथावन्माहात्म्यं विद्युरेव मुमुक्षुवः ॥ ५१ ॥
अन्ये तु यर्हि सत्संगाल्लीनाहंमतयः क्वचित् । भवेयुस्तर्हि तु सतां विद्युर्माहात्म्यमंजसा ॥५२॥
निवर्त्तकान्यधर्माच्च तद्वचांस्यप्रियाण्यपि । प्रीत्यैव बहु मन्येरन्स्वहितानीत्यवेत्य ते ॥ ५३ ॥
कुदेशकालसंगाद्यैर्देहाहंतोद्गमो यदा । तेषां भवेत्तदानीं तु भवेयुस्तेऽन्यथा धियः ॥ ५४ ॥
देहाभिमानदोषेण स्युश्च ते स्वैरचारिणः । संतोऽपि यावत्तत्कर्माऽनुमोदेरन् शुभाशुभम् ॥५५॥
तावत्तु तेषां माहात्म्यं ते विद्युर्भूरिचेतसि । संतोऽपि नः स्तुवंतीति स्वांश्च विद्युस्ततोऽधिकम्॥
निवर्त्तयेयुः स्वान् दोषाद्यदा ते स्वप्रियोक्तिभिः । तदा विद्युस्तद्वचांसि हितान्यप्यहितानि ते ॥
तन्महत्त्वस्य च ज्ञानं तेषां ह्रसति चेतसः । दोषानेव ततस्तेषां ते क्षिपंति गुणेष्वपि ॥ ५८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूर्यं रजःक्षेप इव दोषाक्षेपो महत्स्वपि। क्षेप्तुरेव विनाशाय पराव्रत्तो हि जायते ॥ ५९ ॥
महापातकिनोऽप्यस्ति धर्मशास्त्रेषु निष्कृतिः। पुंसः सदवमंतुस्तु सा नास्त्येवेति निश्चयः ६०॥
प्रतीकारो यथा नास्ति कुत्रचिद्राजयक्ष्मणः। तथैव दोषारोपस्य सत्सु नास्तीति बुध्यताम् ॥
पुंसः सत्संगिनोऽत्र स्याद्यस्य कस्यापि विच्युतिः। नियमस्य च पाल्यस्य न तया पतितो भवेत् ॥
स्यादेव पतितः सद्यः सद्दोषग्रहणादिह। आरूढयोगोऽपि पुमान्किमुताल्पकृतिः कुधीः ६३ ॥
अंगुल्याद्यंगविच्छेदसमाऽन्यनियमच्युतिः। महत्सु दोषदृष्टिस्तु शिरश्छेद इवांतकृत् ६४ ॥
अनात्मानं ततो देहं जडं निश्चित्य सर्वथा। तत्राभिमानः संत्याज्यः सन्महत्त्वावबोधहृत् ६५ ॥
अथो भगवदानंदस्तमपृच्छत्कृताननतिः। हृद्यागतः सद्गुणः केनोपायेन नश्यति ॥ ६६ ॥
उपायस्तु भवत्यत्र किं त्वसौ सुकरो न हि। तथापि तं वः कथये श्रद्धालोः स न दुष्करः ॥
हृद्यागतः स्याद्गुणो यस्याऽसौ भक्त ईशितुः। महानेवेति निश्चित्य संप्रसाद्योऽतिदैन्यतः ६८ ॥
नृत्यं तदग्रे निश्छद्म मनोवाक्कायवृत्तिभिः। सर्वथा तत्प्रियं कार्यमनुतप्यं तदागसः ॥ ६९ ॥
अहो मया महत्पापं कृतं यद्गुणः सतः। ब्रह्मरूपस्य भक्तस्य धृतो हृदि हरेरिति ॥ ७० ॥
ईदृग्विधानुतापेन खाद्यपेयशयादिषु। न स्वास्थ्यं प्राप्नुवन्नित्यं भक्त्या परिचरेच्च तम् ७१ ॥
उपाय एष एवैको हृत्स्थसद्दोषवर्जने। वर्तते नेतर इति साध्योऽसौ स्वहितार्थिना ॥ ७२ ॥

इत्थं हि वाक्यानि सुधोपमानि हरेर्निशम्यात्महितस्य संतः।
प्रपेदिरे तेऽतिमुदं च भक्ताः सदोनिषण्णा इतरेऽपि सर्वे ॥ ७३ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ नवौत्तरशततमस्तरंगः ॥ १०९ ॥ ॥ १ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। एकादश्यामूर्जकृष्णे वचोमृतमिदं हरेः ॥ १ ॥
लौहग्रामे तत्र सूरनृपवेश्मनि मंचके। न्यषीदत्स्वास्तृते स्वामी वृतो भक्तैः सहस्रशः ॥ २ ॥
नीशारं स्वर्णसूत्रीयनरनारायणाक्षरम्। श्यामं शोणं दधत्स्वर्णवृत्तांकं सुरवारकम् ॥ ३ ॥
प्रांताग्रस्वर्णसूत्राढ्यमुष्णीषं चाऽभ्रवर्णकम्। कौसुंभं स्वर्णसूत्राढ्यं दधत् कटिपटं शुभम् ४ ॥
मुक्तानंदादिभिः सद्भिर्वाद्यवादनपूर्वकम्। गीयमानानि कृष्णस्य श्रृण्वन् पद्यानि सादरम् ५ ॥
कीर्त्तनांते सतोऽप्रस्थान् प्रत्युवाच स सर्ववित्। प्रश्नव्याजेन सर्वेषां हरन्सकलसंशयान् ६ ॥
भक्तस्य कीदृशस्याऽत्र न स्यान्मरणतो भयम्। श्रेयो मे जातमेवेति माननं च भवेद्धृदि ७ ॥
इति पृष्टैः साधुभिस्तु तेन जिज्ञासुनेव तैः। त्वमेवाऽस्योत्तरं स्वामिन्कुर्वित्युक्तोऽब्रवीत्प्रभुः ॥
चतुर्विधास्तु ये भक्ता भवेयू राधिकापतेः। ज्ञानी शूरश्च विश्वस्तस्तुरीयः स्निग्ध इत्यमी ९ ॥
तेषां तु मरणाद्भीतिः सर्वथा नास्ति चेतसि। आत्मकृतार्थतायां च नास्त्येव क्वापि संशयः ॥
तत्र ज्ञानी कृष्णभक्तो ब्रह्मीभूतात्मसंस्थितेः। न बिभेति मृतेः क्वापि कृतार्थोऽस्मीति मन्यते ॥
देहेंद्रियांतःकरणं यत्स्यादुत्पथगामि तत्। सद्यो नियच्छेदुद्युक्तः शूरो भक्तः स कथ्यते ॥
आंतराः शत्रवस्तस्मात्तमांस्यर्कादिवाखिलाः। बिभ्यत्यसौ कृतार्थं स्वं मन्यते गतमृत्युभीः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नराकृतेर्भगवतो वचनेषु च तत्सताम् । विश्वासं परमापन्नो भक्तो विश्वस्त उच्यते ॥ १४ ॥
अयं सर्वेश्वरः कृष्णस्तस्यास्मीति सुनिश्चितः । असावपि कृतार्थत्वान्मरणान्न बिभेति हिं १५ ॥
स्निग्धस्तु प्रीतिमान् कृष्णे पत्याविव पतिव्रता । नान्यस्य चिंतां कुरुते मनसापि कदाचन ॥
कृष्ण एव रतस्यास्य कस्मादपि तदन्यतः । भीतिर्नास्त्येव हृदये कृतार्थस्य च तेन वै ॥ १७ ॥
चतुर्विधेभ्य एतेभ्यो येऽन्ये भक्तास्तु दुर्बलाः । तेषामस्ति भयं मृत्योः कृतार्थत्वं च नांतरे ॥
एता एव विधास्तस्माच्चतस्रः कृष्णसंश्रितैः । भवद्भिः सुदृढाः कार्यास्तदेकांतित्वहेतवः १९ ॥
प्रश्नोत्तरमिति प्रोक्तमथाऽन्यद्यदि कस्यचित् । प्रष्टव्यं किंचन भवेत्तर्हि पृच्छतु सोऽपि माम् ॥
ब्रह्मानंदस्तमप्राक्षीत्ततो नत्वा जगद्गुरो । महत्त्वं कारणस्यैव स्वकार्यादुचितं खलु ॥ २१ ॥
कथं तद्राजिकासूक्ष्माद्बीजादतिमहान् वटः । उद्गच्छतीति संपृष्टस्तमूचे धर्मनंदनः ॥ २२ ॥
यत्कारणं तत्तु सूक्ष्मं कार्यं स्थूलमिति स्थितिः । यदादौ सूक्ष्मभूतेभ्यो भूतान्यासन्महांति हि ॥
न स्थूलसूक्ष्माकाराभ्यां महत्त्वाल्पे इहोदिते । किंतु कार्यात्कारणे स्याच्छक्त्याधिक्यमितीयताम्
शक्तिः स्वाभाविकी नित्यं तन्मात्रास्वस्ति यावती । महाभूतेषु नैवास्ति तासां कार्येषु तावती ॥
कारणत्वं कारणस्य ह्येतदेव प्रकीर्त्तितम् । यत्सूक्ष्ममप्यतिस्थूलं कार्यमुत्पादयेदिति ॥ २६ ॥
एवं सूक्ष्मान्नराकारात्पुंप्रकृत्यंडकोटयः । उत्पद्यंते हरेर्योगैश्वर्यतः सर्वकारणात् ॥ २७ ॥
यथाग्नेर्ज्वालनिकरा वरुणाद्वांबुराशयः । सूर्याद्योद्यांति तेजांसि तथेशेशात्ततस्तु ताः ॥ २८ ॥
स स्वामिनारायणवाक्यमित्थं मुनिर्निशम्याऽऽप सुधोपमेयम् ।
तोषं महांतं च परे सदःस्थाः संतो गृहस्था अपि तस्य भक्ताः ॥ २९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ दशोत्तरशततमस्तरंगः ॥ ११० ॥ ॥ २ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । ऊर्जकृष्णत्रयोदश्यां वचोमृतमिदं हरेः ॥ १ ॥
लोहग्रामे तत्र सूरनृपवेश्मनि मंचके । सितसर्वांबरः स्वामी स न्यषीदत्सभास्तृते ॥ २ ॥
नैकदेशागतैर्भक्तैस्त्यागिभिर्गृहिभिर्वृतम् । नत्वा भगवदानंदस्तमपृच्छत्पुरः स्थितः ॥ ३ ॥
स्वरवत्सद्भक्तमाहात्म्यज्ञानयुग्घृदि निश्चयः । स भवेद्यस्य बुध्येत पुमान्कैर्लक्षणैरिह ॥ ४ ॥
तादृशः पुरुषः साधो कृष्णतद्भक्ततुष्टये । वर्त्तेत सर्वथा किंचिन्नाऽकार्यं चास्य तत्कृते ॥ ५ ॥
कृष्णस्य वा सतां प्रीत्यै जह्यात्सद्यः स्वकं गृहम् । राज्यं स्त्रियं वाऽन्यभोगान्कुर्यान्नैव तदप्रियम्
इत्युक्त्वा कतिचिद्भक्तान् पुंसु स्त्रीषु च तादृशान् । प्रदर्शयामास हरिर्मुकुन्दादीन् रमामुखान् ।
पुनराह च यस्तादृग्निश्चयः पुरुषो भवेत् । न तस्य क्वापि किमपि स्यादकार्यं हरेर्वचः ॥ ८ ॥
इत्युक्त्वा तत्र दृष्टांतं स्वस्यैवास.ववर्णयत् । दुष्करेऽपि गुरोर्वाक्ये निस्तर्कस्थितिलक्षणम् ॥९॥
पुनश्चाह स यस्य स्यान्माहात्म्यज्ञानयुग्घरेः । निश्चयश्च तदीयानां मत्तः स्याद्धिकरीव सः १०॥
न देहदैहिकासक्तः स च कायाधवो यथा । कृष्णग्रहग्रहीतात्मा न विद्याज्जगदीदृशम् ॥ ११ ॥
सदेहदैहिकत्राणं कृष्णान्नेच्छेच्च कर्हिचित् । इच्छेच्चेदांतरारिभ्यो रक्षामेव न चेतरत् ॥ १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स च भक्तोत्तमो भूरिकष्टं प्राप्याथवाऽब्रुवन्। सद्यो म्रियेत तदपि यायाद्भागवतीं गतिम् ॥
सुदेशे वा कुदेशेपि संस्कृतोऽसंस्कृतोऽपि वा। मृतः स भगवद्धाम याति नास्त्यत्र संशयः ॥
अन्यस्तु कष्टमप्राप्य म्रियमाणोऽपि कश्चन। दृश्येत तदपि ज्ञेयं स गंता नरकानिति ॥१५॥
हरिहरिजनमाहात्म्यावबोद्धा महीयान् जगति भवति भक्तो दुर्लभो भक्तिभाजाम्।
इति स तु हरिवाक्यं साधुरापीय संतः प्रमुदममृतमापुश्चापरे तत्सदःस्थाः ॥ १६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकादशोत्तरशततमस्तरंगः ॥ १११ ॥ ३ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। ऊर्जकृष्णचतुर्दश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
ग्रामे लौहाभिधे तत्र सूरभूपनिकेतने। सितसर्वांबरः स्वामी न्यषीदत्स वरासने ॥ २ ॥
नानादेशागतस्वीयभक्तसंघपरिश्रितम्। अखंडानंदसाधुस्तमपृच्छत्सत्पुरस्कृतम् ॥ ३ ॥
यस्त्वमक्षरधामेशोऽनंतमुक्तार्च्यपत्कजः। अनंतैश्वर्यसंपन्नो रम्यदिव्यनराकृतिः ॥ ४ ॥
स्वभक्तानां स्ववियोगाक्षमिणां सुखहेतवे। अत्र स्वेक्षादिदानेन प्रादुर्भूतो यथा तथा ॥ ५ ॥
ब्रह्मांडेष्वप्यनेकेषु प्रादुर्भवसि वा न किम्। इति पृष्टः स तातेन प्रोवाच स दयानिधिः ॥६॥
यद्देशाः स्वभक्ताः स्युस्तत्र तत्र तदा हरिः। तेषां सुखाय कृपया जायते स्वेच्छया प्रभुः ७ ॥
यथा यथा सुखं तेषां कुर्यात्कृष्णस्तथा तथा। किमप्यशक्यं नास्त्यस्य सर्वयोगकलानिधेः ॥८॥
पुनः स साधुः पप्रच्छ हरिं नारायणो भवान्। नराकृतिः सदाऽस्तीति निश्चयोऽस्त्येव वैदिकः ॥
मत्स्यकूर्मादिरूपाणि तेनैव हरिणा त्वया। धृतानि संति भूरीणि कथं तानि घटेत भोः ॥१०॥
रीतिश्च श्रेयसः स्वामिन् सर्वत्रैकविधाऽस्ति वा। बहुधाऽथ भवन्मूर्त्तिरेकधा नैकधा कथम् ॥
प्रोवाच तं हरिः साधोऽनंतैश्वर्यनिधिर्हरिः। मत्स्यकूर्मादिरूपस्तु जायते क्वापि कार्यतः ॥१२॥
यावदर्थं तत्र तत्र स्वैश्वर्यं दर्शयत्यपि। स्वयं तु द्विभुजो नित्यं वर्त्तते न्राकृतिः प्रभुः ॥ १३ ॥
साक्षाद्भगवतः प्राप्त्या श्रेय आत्यंतिकं भवेत्। इति तु श्रेयसो रीतिः सर्वत्रैकविधाऽस्ति हि ॥
भक्तानां रुचिवैचित्र्याद्भक्तिभेदात्त्वनेकधा। शास्त्रेषु श्रेयसो रीतिर्वर्णितास्ति महात्मभिः ॥१५॥
द्विभुजोऽपि क्वचित्कार्यवशाद्भवति नैकधा। चतुर्भुजोऽष्टबाहुर्वा स च क्वापि सहस्रदोः ॥१६॥
श्रेयोहेतुः कृष्णमूर्त्तिर्याऽत्रस्था सा निजेच्छया। तत्तद्भक्तेच्छया वापि तत्र तत्राऽस्त्यनेकधा ॥
एकत्रस्थस्य कृष्णस्य यद्ब्रह्मांडेषु वर्त्तनम्। तत्तु तस्य महैश्वर्यमिति ज्ञेयं कृपानिधेः ॥ १८ ॥
स्थूलसूक्ष्माकृतीन् सर्वाननेकांडस्थदेहिनः। सोऽतर्यामिस्वरूपेण व्याप्नोत्येकत्र संस्थितः १९॥
क्वचिद्व्याप्नोति कार्याय शुकादिरपि योगवान्। स्थावरान् जंगमांस्तर्हि किमु योगेश्वरो हरिः ॥
क्रिया आश्चर्यरूपा हि योगमायां वितन्वतः। सर्वा अपि हि कृष्णस्य भवंतीत्यवधार्यताम् २१
अतस्तत्र विमुह्यंति पंडिता अपि पूरुषाः। तत्त्वतस्तानजानंतः स्वौपम्यहतबुद्धयः ॥ २२ ॥
ऐंद्रजालिकमायायामपि मुह्यंति पंडिताः। कथं तद्योगमायायां न मुह्येयुर्महेशितुः ॥ २३ ॥
कृष्णाश्रयबलात्तत्र न मुह्यंति सुबुद्धयः। विबुधा अपि मुह्यंति कृष्णाश्रयबलोज्झिताः ॥२४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वतंत्रोऽतिसमर्थश्च हरिर्यद्यत्समाचरेत् । तत्तद्युक्तं सर्वमपीत्येवंज्ञा मोहवर्जिताः ॥ २५ ॥
ईशो भूत्वा किमित्येवं करोत्यनुचितक्रियाम् । इत्यादि तर्कवंतस्तु ज्ञेया मोहेन संयुताः ।२६।

बुद्ध्वा महत्तां परमेश्वरस्य सेव्यः स निस्तर्कमिहेति वाचम् ।
सुधासमानां स्वगुरोर्निशम्य प्रापन्मुदं सोऽप्यपरे च संतः ॥ २७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्वादशोत्तरशततमस्तरंगः ॥ ११२ ॥ ४ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । कार्त्तिकांत्यतिथै रात्रौ वचोमृतमिदं हरेः ॥ १ ॥
तत्र लौहाह्वयग्रामे निकेते सूरवर्मणः । निषण्णोऽभून्महापीठे स श्वेतवसनः प्रभुः ॥ २ ॥
त्यागिभिर्गृहिभिर्भक्तैरनेकैः परितो वृतः । स्वयं पप्रच्छ साधूंस्तान्सर्वांस्तत्संशयान् नुदन् ॥३॥
सतां पुरस्तान्महतां संकल्पान्कीदृशान् ब्रुवन् । पुमान्भवेन्निष्कपटो विपरीतो ब्रुवंश्च कान् ॥
स्वमुखादेव शुश्रूषूनेतत्प्रश्नोत्तरं सतः । विलोक्य तत्स्वयं स्वामी कथयामास तत्त्वतः ॥ ५ ॥
आत्मनोऽवश्यपाल्येषु ब्रह्मचर्यव्रतादिषु । यमेषु कस्यचित् क्वापि विभ्रंशो मनसा भवेत् ॥६॥
स्वविचारानिवार्योऽसौ स्त्र्यादिसंकल्प उत्थितः । वाच्य एव सतामग्रे तद्दोषरहितात्मनाम् ।७॥
दैहिकागुणवीक्षातः साधोः कस्यचनाऽगुणे । हृद्यागते स्यात्संकल्पस्तदसाधुत्वलक्षकः ॥ ८ ॥
सोऽपि तद्धीनसाधूनामग्रतो वाच्य एव हि । तथाऽनिश्चयसंकल्पो भगवन्निश्चयेऽपि च ॥ ९ ॥
एत एतादृशाश्चान्ये संकल्पाः शल्यसंमिताः । अखानिताः सत्पुरुषैः संति प्राणांतदुःखदाः ॥
तदीदृशान् ब्रुवंस्तर्कान्मतो निष्कपटः पुमान् । विपरीतोऽब्रुवन् ज्ञेयो दंभमानमदादिभिः ११॥
इति प्रश्नोत्तरं कृत्वा पुनः पप्रच्छ तान्प्रभुः । एतत्संकल्पवानंतः साधुवेषधरो बहिः ॥१२॥
बुद्धिमद्भिः कथं बोध्यो दंभदर्शितसत्क्रियः । इति प्रश्नोत्तरमपि स तानवदतोऽब्रवीत् ॥१३॥
बकवृत्तिर्दांभिकोऽसौ शीघ्रं ज्ञातुं न शक्यते । बुद्धिमद्भिः परिचयाच्चिरेण त्ववगम्यते ॥१४॥
खाद्यपेयगतिस्थानशयनश्रवणादिषु । असत्पदार्थे तत्प्रीतेर्दर्शनाद्वाऽन्यतः श्रुतेः ॥ १५ ॥
क्षीरसादेश्च संबंधे जाते रहसि कर्हिचित् । क्षुब्धवृत्तीक्षणाच्चापि स्त्रैणवार्त्तारुचेस्तथा ॥ १६ ॥
औदासीन्याच्च सद्वाक्ये तादृशोऽपि पुमान्बुधैः । ज्ञायते ध्रुवमित्युक्त्वा पुनः पप्रच्छ तान्हरिः ॥
दंभेन योऽत्र विहितभगवन्निश्चयः पुमान् । दंभेनैव हि सद्धर्मान् पालयेद्यश्च साधुवत् ॥१८ ॥
मानी च बुद्धिमान् दक्षः स्वनिश्चयवृषस्थिती । अधिके दर्शयेत्सद्भयः सप्रमाणवचाश्च यः ॥
स दंभभक्तोऽयमिति कथं ज्ञेयो मनीषिभिः । इति पृष्टास्तेन संतः कर्त्तुं शेकुर्न तूत्तरम् २०॥
तदोवाच हरिस्तस्य मानभंगो यदा भवेत् । तदैवाऽयं हि दंभीति ज्ञायतेऽशुश्रूषादिभिः ॥२१॥
न ज्ञायतेऽन्यथा स्वेष धीमद्भिरपि दांभिकः । इत्युक्त्वा तान् पुनः स्वामी साधून् पप्रच्छ धीमतः
भगवन्निश्चयाद्धर्मपालनाच्चापि पूरुषम् । कीदृक् किमवधिस्तर्कः पातयेच्च न पातयेत् ॥ २३ ॥
इति पृष्टा यदा संतस्ते तु कर्तुं तदुत्तरम् । सम्यग्नैव विदुस्तर्हि तच्चकार स एव हि ॥ २४ ॥
भगवन्निश्चये बुद्धौ जातेऽपि क्वचिदीशितुः । त्रानुकृतावसामर्थ्यलीलां दृष्ट्वा प्रदर्शिताम् ॥२५॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनीश्वरस्त्वसंकल्पो भक्तस्याप्युदियाद्धृदि । अधर्मतर्को धर्मे स्यादेवं देहसुखैषिणः ॥ २६ ॥
तर्कावुभावीदृशौ तु हृदि जातावपि क्वचित् । विचारेण सदाप्तेन विनश्येतां च मूलतः ॥२७॥
नोद्गच्छेतां पुनस्तौ चेत्कदाचन कथंचन । तदा न पातयेतां वै भक्तं भागवतात् पथः ॥ २८ ॥
न भवेतां पक्षमेकं मासं वा तौ पुनर्यदि । उद्भवेतां तदा त्वेनं पातयेतां न संशयः ॥ २९ ॥
इति प्रश्नोत्तरं श्रुत्वा हृष्टान् पप्रच्छ तान् पुनः । हरिः कस्याऽत्र विज्ञेया न ज्ञेया बद्धमूलतः
इति प्रश्नोत्तरमपि स ऊचे तानतद्विदः । बद्धमूलोऽत्र स ज्ञेयः सद्गुणादानधीस्तु यः ३१॥
रसमात्रं यथाऽऽदत्ते पुष्पेभ्यो मधुपस्तथा । सद्गुणग्रहशीलो यो बद्धमूलोऽत्र स ध्रुवम् ३२॥
गुणग्राही सतां यस्य स्वभावो न भवेत्स तु । भ्रष्टो भविष्यत्यचिरात्सत्संगान्नात्र संशयः ३३॥
इत्युक्त्वा स पुनः साधून् पप्रच्छ प्रहसन्प्रभुः । निग्रहेणेंद्रियाणां हि भक्तिर्ज्ञानं च सिद्ध्यति ।
साधुशास्त्रविचाराप्तयुक्तिभिः स तु जायते । तत्र प्राप्याः सदादिभ्यः काः का युक्तय उच्यताम्
इति ते स्वामिना पृष्टाः संतः कर्त्तुं तदुत्तरम् । तमेव प्रैरयंस्तर्हि स ऊचे श्रृणुताऽनघाः ३६॥
दृक्संयमध्यानमुद्रायमादीनां तु पालने । नासाग्रालोकनमुखाः सद्भ्यः शिक्ष्या हि युक्तयः ॥
रमाभर्तुश्च साधूनां तदीयानां महात्मनाम् । माहात्म्यातिशयं सम्यगवगंतुं तु शास्त्रतः ॥३८॥
विचित्रविश्वसर्गाद्यास्तीर्थशुद्ध्यादयस्तथा । युक्तयः प्रतिपत्तव्या अधर्मोद्धारणादयः ॥ ३९ ॥
सदसत्त्वं विनिश्चित्य पदार्थानां विचारतः । दृष्टांतयुक्तयः प्राप्याः सुखदुःखफलेक्षजैः ॥४०॥
एवं त्रिभ्योऽपि संप्राप्तनानायुक्तिभिरंजसा । बाह्यांतःकरणान्याशु जीयंते दुर्जयान्यपि ॥४१॥
पुनः पप्रच्छ धार्मिस्तान्संति देहेषु देहिनाम् । बाह्यानि चांतराणीति करणानि द्विधैव हि ४२ ॥
तत्रांतराणि जीयंते बाह्यानां निग्रहेण किम् । आंतराणां जयेनैव जीयंत इतराणि वा ॥ ४३ ॥
इति पृष्टास्तेन संतो यदा तस्योत्तराय तु । ते विचारपरा आसंस्तदा तत्प्राह स स्वयम् ॥४४॥
बाह्येंद्रियजयेनैव दमाख्येनांतराणि तु । करणानि जितानि स्युः पुंसो नियमवर्त्तिनः ॥ ४५ ॥
करणानामांतराणां केवलेन जयेन तु । न स्याज्जयो हि बाह्यानां पुंसोऽत्र स्वैरवर्त्तिनः ॥ ४६ ॥
यो द्वाररोधो बाह्यानां जयस्तेनांतराणि तु । बहिर्विषयनैराश्यं प्राप्य स्थैर्यं व्रजंति वै ॥४७॥
इत्युक्त्वा तान् पुनः स्वामी मुनीन्सर्वान् स पृच्छति । जीयंते केन बाह्यानि करणान्यांतराणि च
एतत्प्रश्नोत्तरमपि स्वयमूचे हरिः सतः । शास्त्रोक्तैर्नियमैर्बाह्यैर्बाह्यानां तु जयो भवेत् ॥४९॥
आहारनियमेनाऽथ कृच्छ्रचांद्रायणादिना । तपसा सहनेनाऽथ द्वंद्वानां तज्जयो भवेत् ॥ ५० ॥
आसनाभ्यासतः कृष्णकथासंकीर्त्तनादिभिः । बाह्येंद्रियाणि जीयंते सावधानमुमुक्षुणा ॥५१॥
माहात्म्यस्य विचारेण हरेर्ध्यानेन चेतसि । आंतराण्यपि जीयंते दृढया चात्मनिष्ठया ॥५२॥

वचनं सुधया तुलितं तु हरेरिति साधु निपीय हि साधुजनाः ।
परमामलभंत मुदं मुदिताः प्रणमंति च तं स गुरुं परमम् ॥ ५३ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ त्रयोदशोत्तरशततमस्तरंगः ॥ ११३ ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। मार्गशुक्लप्रतिपदि वचोमृतमिदं हरेः ॥ १ ॥
तत्र लौहाभिधग्रामे सूरवर्मनृपालये। सितांबरधरः स्वामी स व्यराजद्वरासने ॥ २ ॥
उष्णीषलंबमानाग्रबद्धश्वेतश्रवःपटः। स्वयमेव स पप्रच्छ साधून् भक्तगणावृतः ॥ ३ ॥
पुंसां सत्संगिनामत्र साध्यं किमतिदुर्लभम्। प्रश्नस्यास्योत्तरमसौ सतश्चिंतयतोऽब्रवीत् ४ ॥
साध्यं कृष्णैकांतिकत्वं तेषामस्त्यतिदुर्लभम्। सधर्मज्ञानवैराग्या भक्तिरेकांतिकत्वकृत् ॥ ५ ॥
इत्युक्त्वा तान् पुनः स्वामी पप्रच्छ त्यागिनो निजान्। धर्माणामिह पाल्यानां सर्वाधिकतमोऽस्ति कः
सुरक्षितेन येन स्युर्धर्माः सर्वेऽपि रक्षिताः। तथा भक्तेः साधनानां किमङ्गं साधनं मतम् ॥
येनैकेन स्थितेन स्युः साधनान्यखिलान्यपि। मुमुक्षुणा रक्षितानि तन्मे वदत सत्तमाः ॥ ८ ॥
एतत्प्रश्नोत्तरमपि स्वयमूचे कृपानिधिः। सर्वधर्मेषु मुख्याऽस्ति ब्रह्मचर्यव्रतस्थितिः ॥ ९ ॥
तयैकयैव सर्वेऽपि ज्ञेया धर्माः सुरक्षिताः। तथा भक्तेः साधनेषु मुख्यः कृष्णस्य निश्चयः ॥
येनैकेनाऽचलेनैव साधनान्यपराण्यपि। भक्तेः सर्वाणि हृत्स्थेन भवेयू रक्षितानि हि ॥ ११ ॥
एवमुक्त्वा पुनः साधूनपृच्छद्भक्तिनंदनः। कीदृशी न परावर्त्या मतिवृत्तिः कदाचन ॥ १२ ॥
कीदृशी सा च सद्वाक्यैः परावर्त्या मुहुर्मता। इति प्रश्नोत्तरमपि सोऽतद्विद उवाच तान् ॥
कृष्णनिश्चयरूपा तु मतिवृत्तिः कदाचन। न परावर्त्तनीया वै स्यादेवानिष्टमन्यथा ॥ १४ ॥
अतः सा कृष्णमाहात्म्यश्रवणादिभिरन्वहम्। पोषणीयैव यत्नेन मूलं भक्तेर्यतोऽस्ति सा ॥
क्रियासु यः स्वधीक्लृप्तकार्याकार्यत्वनिश्चयः। स सद्वचोविरुद्धश्चेत्परावर्त्यो मुहुर्मतः ॥ १६ ॥
यथा यथा वदेयुः स्वं साधवो देहिनां हिताः। तथा तथैव बोद्धव्यं कार्यं चाऽकार्यमंजसा १७॥
सद्वाक्यमनुसृत्यैव कार्यं चाकार्यमत्र ये। हृदि निश्चित्य वर्त्तंते सुखिनः स्युस्त एव हि ॥१८॥
भवेद्देवाऽशुभं पुंसां मुहुर्वै स्वैरवर्त्तिनाम्। अतः सदनुरोधेन वर्त्तितव्यं शुभेप्सुभिः ॥ १९ ॥
इत्युक्ताः साधवो हृष्टा बभूवुर्हरिणाऽखिलाः। पप्रच्छ तान् पुनः स्वामी हितायैवोद्यतो नृणाम्
त्यागी गृही वा यो भक्तः स्वधर्मस्थो भवेद्धरेः। तथापि केन दोषेण संगयोग्यो भवेन्न सः ॥
एतस्याप्युत्तरं वक्तुं तान्विलंबिन आह सः। लौकिकार्थेषु सक्तश्चेत्ससंगार्हो न वै मतः २२॥
देहाभिमानी मानी वा शिथिलो यश्च पौरुषे। एतद्दोषविगर्ह्यत्वात्संगार्हो न महानपि ॥२३॥
व्यावहारिकसंगेन प्रवर्त्ततैव लौकिके। निवृत्तधर्मापि पुमांस्तस्मात्तद्वर्ज्यता मता ॥ २४ ॥
देहाभिमानं मानं वा यदा संतोऽथवा प्रभुः। खनेयुस्तर्हि तद्वांस्तु स्याद्वै तदगुणग्रहः ॥ २५ ॥
ततस्तद्गुणानेव बोधयेत्स स्वसंगिनम्। कुर्याच्च विमुखप्रायं तत्संगोऽतः प्रहाप्यते ॥ २६ ॥
धैर्योत्साहविहीनस्तु गुणवानपि पूरुषः। स्वस्य निःश्रेयसप्राप्तिं मन्येत बहुजन्मभिः ॥ २७ ॥
निष्कामादिगुणासिश्च भगवत्कृपयाऽऽत्मनः। भवेदनेकजनिभिरिति मन्येत चांतरे ॥ २८ ॥
वार्त्तां च तादृशीमेव पुरतः स स्वसंगिनः। कुर्यात्ततश्च तद्दोषाः प्रविशेयुर्हि तन्नरे ॥ २९ ॥
अतो विहाय तत्संगं धैर्योत्साहवतः सतः। कर्त्तव्यः सर्वदा संगो गृहिणोऽपि मुमुक्षुणा ॥३०॥
कृष्णतत्सत्प्रतापेन ह्यनेनैव हि जन्मना। कामादिनाशपूर्वं मे श्रेयःसिद्धिर्भविष्यति ॥ ३१ ॥
इति निश्चित्य सत्प्रोक्तसाधनेष्वेव सर्वदा। य उद्युक्तो भवेत्तस्य संगो हेयो न कर्हिचित् ३२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तादृशोऽपि स्वाश्रितं यः शैथिल्यस्थितमंजसा। नोत्तेजयेत्सद्वचोभिस्तत्संगोऽपि न वै हितः॥
कृष्णतत्सख्प्रतापे च हित्वा केवलपौरुषम्। श्रेयोहेतुं बोधयेद्यः कार्यः संगो न तस्य च॥३४॥
स्नानार्चादौ प्रमादी च ध्याने निद्रालुरस्ति यः। सोऽपि साधुर्न संगार्हो मुमुक्षोर्गुणवानपि॥
स्वोत्कर्षख्यापनपरो यश्चान्येषु महत्स्वपि। दोषं प्रदर्शयेत्किंचित्संगार्हो न स दोषवाक्॥३६॥
उक्तदोषान्यतमयुक् सेव्यो न श्रेयसे हि सन्। लोकेषु गुणयुक्तत्वात् ख्यातोऽप्यर्हो न संगमे॥
उक्तदोषविहीनस्तु भक्तो धर्मस्थितः सदा। नातिख्यातोऽपि लोकेऽसौ संगार्हो हि मुमुक्षुताम्
इत्युक्त्वा स पुनर्धार्मिर्हृष्टान् पप्रच्छ तान् सतः। मानो रक्ष्यः कस्य पुरो न रक्ष्य इति कथ्यताम्
प्रश्नस्यास्योत्तरमपि हसन्नूचे स एव तान्। हरिभक्तस्य पुरतो मानो रक्ष्यो न कर्हिचित् ४०॥
सत्संगाद्यः परावृत्तः क्वचित्स्यात्पुरतोऽस्य तु। रक्ष्य एव सदा मानो वार्त्ता कार्या च निर्भयम्
एवमुक्त्वा पुनरपि साधून् पप्रच्छ तान्प्रभुः। हरेरपि वचः कीदृङ्नैव मान्यं तदाश्रितैः॥४२॥
इति पृष्ट्वा स एवास्य प्रश्नस्योत्तरमाह तान्। धर्मो यत्र च्यवेत्स्वस्य मान्यं तन्न वचः प्रभोः॥
अर्जुनेन यथापूर्वमश्वत्थामवधात्मकम्। न मानितं वचो विष्णोः प्रसह्या वदतोऽपि हि॥४४॥
तथैव वाक्यं कृष्णस्य स्वोक्तधर्मविरोधि चेत्। स्यात्तदा नैव मान्यं तद्भाव्यं चिरकारिणा ४५॥
तेनेक्ष्यमाणे कृष्णस्याऽपरितोषेऽपि सर्वथा। न भेतव्यं ततो यस्मात्सोऽस्ति धर्मातिवत्सलः॥
अथाऽपृच्छत्पुनः स्वामी सतो ध्याने रमापतेः। क्रियमाणे यद्यशुभास्तर्का उद्यायुरंतरे॥४७॥
समुद्र इव कल्लोला जायमाना मुहुश्च ते। केनोपायेन शम्यास्तद्ब्रूतेत्युक्तास्त ऊचिरे॥ ४८॥
अस्योत्तरं त्वमेवेश ब्रूहीत्युक्तः स आह तान्। कुतर्कोदयकाले तु न ध्यानं कार्यमीशितुः ४९॥
ध्यानं हित्वा तदा वाचा नामसंकीर्त्तनं प्रभोः। कर्त्तव्यमुच्चैर्निर्लज्जं तालीवादनपूर्वकम् ५०॥
प्रार्थनीयोऽथ भगवान् दीनबंधो दयानिधे। नारायण हरे कृष्ण तवाहं पाहि मामिति॥५१॥
एकांतिकास्तु भक्ता ये हरेस्तदभिधा अपि। कीर्त्तनीयाश्च ते प्रार्थ्यास्तेन शाम्यंति ते द्रुतम्॥
हरिकृष्णोऽथ भूयस्तान् सतः पप्रच्छ तोषयन्। सतां कः सर्वथा हेयो दोष एकोऽस्ति वै महान्
त्यक्ते यस्मिन्नेककेऽपि दोषा क्षन्येऽखिला अपि। त्यक्ता भवेयुस्तं दोषं ब्रूत मां साधुसत्तमाः॥
तथैकोऽपि गुणः कोऽस्ति सत्सु यस्मिन्नुपागते। गुणा हि शोभना अन्ये प्राप्ताः स्युः सकला अपि
एतत्प्रश्नोत्तरं वक्तुं सतश्चिरयतः प्रभुः। दृष्ट्वा तत्स्वयमेवाह सच्छास्त्रेषु सुनिश्चितम्॥ ५६॥
देहाभिमान एको हि सर्वदोषाकरो मतः। तथैवैकाऽप्यात्मनिष्ठा ज्ञेया सर्वगुणाकरः॥ ५७॥
आद्योऽतः सर्वथा सद्भिर्हातव्यो दोष ईरितः। उपादेयो गुणश्चोक्तो द्वितीयेत्यवगम्यताम्॥
पुनः पप्रच्छ तान्स्वामी कीदृग्देशोऽत्र साधुभिः। हर्याज्ञयाऽपि नो सेव्यः कीदृक् शास्त्रं च सर्वथा
इति पृष्ट्वोत्तरमपि तस्य स स्वयमाह तान्। यत्र स्वधर्मभंगः स्यान्न स्थेयं तत्र साधुभिः ६०॥
यत्र कृष्णेक्षणे सम्यग्भवत्यपि मुहुर्भवेत्। स्त्रीणामपीक्षणं तत्र सद्भिः स्थेयं न कर्हिचित्॥
स्वजनानां भवेद्यत्र मुहुर्योगो गृहात्मनाम्। यत्र चाऽधर्मबाहुल्यं यत्र मार्यामयादि च ६२॥
नृपाद्युपद्रवो यत्र गंधोऽप्यशुचिवस्तुनः। यत्र यत्राऽपशब्दानां श्रवणं च मुहुर्भवेत्॥ ६३॥
हर्याज्ञयापि न स्थेयं तत्र देशे तु साधुभिः। धर्मभक्त्योर्यत्र दार्ढ्यं स्यात्स्थेयं तत्र सर्वथा॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णाकारक्षतिर्यत्र वार्त्ता कामस्य यत्र च। तदार्षमपि शास्त्रं चेन्न सेव्यं साधुभिः क्वचित् ॥
कृतं यत्र भवेत्प्रेम्णा भगवन्मूर्त्तिवर्णनम्। अवद्धमप्याधुनिकं तच्छास्त्रं सेव्यमादरात् ॥ ६६ ॥

हरिवचनसुधामिति श्रुतिभ्यां सदसि निपीय सदुत्तमा भृशं ते।
निजहृदि परितोषमाप्य तस्मै सह गृहिभिर्विदधुर्नमस्क्रियां च ॥ ६७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ चतुर्दशोत्तरशततमस्तरंगः ॥ ११४ ॥ ॥ ६ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। मार्गशुक्लतृतीयायां वचोमृतमिदं हरेः ॥ १ ॥
लोहग्रामे तत्र सूरभूपवेश्मनि मंचके। सितवासा न्यषीदत्स स्वभक्तनिकरैर्वृतः ॥ २ ॥
तदाज्ञयाऽथ तं मुक्तानंदः पप्रच्छ सद्वरः। ऋते ज्ञानान्न मुक्तिः स्यादिति श्रुत्योच्यते प्रभो ३॥
ज्ञानेनैव हि मुक्तिश्चेत्तर्हि शास्त्रेषु भूरिशः। प्रोक्तानि साधनान्यस्यै तेषां किंनु प्रयोजनम् ४॥
ज्ञाधातोर्ज्ञानमित्येतद्भावेऽर्थे रूपमस्ति हि। अतो वेदनपर्यायं ज्ञानमित्युच्यते बुधैः ॥ ५ ॥
पदार्थविषयत्वाच्च तदनेकविधं मतम्। रूपज्ञानं रसज्ञानमित्याद्याः संति तद्भिदाः ॥ ६ ॥
तत्र किंविषयं ज्ञानं मन्यसे मुक्तिकारणम्। भवदुक्तश्रुतौ त्वस्य विषयो नोदितः स्फुटम् ७॥
तदा साधुः स तं प्राह ज्ञानस्य विषयो भवान्। अभिप्रेतः श्रुतेरस्ति मुक्तिस्तेनैव जायते ॥८॥
मायिकानां पदार्थानां ज्ञानं त्वज्ञानमेव हि। अतः साक्षात्तु भवतो ज्ञानं मुक्त्येकसाधनम् ९॥
धार्मिरूचेऽथ तं ज्ञेयो भगवान्कीदृशो मतः। यतो बहुविधान्येव संति रूपाणि तस्य तु १०॥
यत्र यत्र भवेद्यादृग्यादृक् कार्यं स्वसाध्यकम्। तत्सिद्धये तत्र तत्र तादृक्तादृक् स जायते ११॥
उत्पत्तयेऽनिरुद्धोऽसौ प्रद्युम्नः स्थितयेऽस्य च। संकर्षणः संहृतये ब्रह्मांडस्य प्रजायते ॥ १२ ॥
मत्स्यकूर्मादिरूपश्च वेदोद्धृत्यादिसिद्धये। अतींद्रियाकृतिर्ध्यानसमाध्यादौ स जायते ॥ १३ ॥
बाह्यांतःकरणैर्ग्राह्य एवं स भवति क्वचित्। क्वचित्तु केवलेनैव वेद्यः स्वानुभवेन सः ॥ १४ ॥
तत्र कीदृग्विधस्य स्यात्प्रभोर्ज्ञानेन देहिनाम्। बंधमुक्तिः पृष्ट इति मुक्तानंदस्तमब्रवीत् ॥१५ ॥
एतैः सर्वैरपि ग्राह्योऽभिप्रेतोऽस्ति भवान् हि नः। इत्युक्तः प्रहसन्स्वामी तमुवाच महामतिम्
ईदृग्विधस्तु भगवान् श्रीकृष्णोऽस्ति नराकृतिः। स तु स्वमर्जुनं प्राह गीतायामित्थमेव हि ॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१८॥
पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः। नानाविधानि दिव्यानि नानावर्णाकृतीनि च १९
मत्तः परतरं नान्यत् किंचिदस्ति धनंजय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ २० ॥
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्। इत्यादिभिः स्ववचनैः स्वं तथाविधमाह सः ॥
एवमेव च यो वेद प्रत्यक्षं तं भजेत्ततः। स एव पूर्णो ज्ञानी स्यादन्यस्तु न्यूनवेदनः ॥ २२ ॥
ईदृग्विधेन भगवज्ज्ञानेन भवबंधनात्। मुच्यते सर्वथा देही नान्यथेत्यस्ति निश्चयः ॥ २३ ॥
ईदृग्ज्ञानस्य संसिद्धौ तपोयोगादिकानि तु। बहून्युक्तानि शास्त्रेषु साधनानीति गम्यताम् २४
ज्ञानस्य साधनत्वेन मुक्तिहेतोः शरीरिणः। इतरेषां साधनानामप्युक्ता मुक्तिहेतुता ॥ २५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ईदृग्ज्ञानं भगवतो विना ब्रह्मात्मवेदिनाम् । ज्ञानस्यापि मता नूनं न्यूनता सर्वथा मुने ॥२६॥
अतः शुकादयोऽप्येवंभूताः संतो हरेर्ध्रुवम् । ज्ञानेन भक्त्या युक्तेन न्यूनतां जहुरात्मनः २७॥
भगवज्ज्ञानसहिता भक्तिर्ज्ञानस्य वै फलम् । तां विना निष्फलं तत्तु स्तूयते न मनीषिभिः ॥

ज्ञाने प्रयासमुदपास्य नमंत एव जीवंति सन्मुखरितां भवदीयवार्त्ताम् ।
स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोऽजित जितोऽप्यसितैस्त्रिलोक्याम् ॥२९॥

श्रेयस्सृतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये ।
तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥ ३० ॥
नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥ ३१ ॥

कृष्ण एव ततः सेव्यो ब्रह्मात्मज्ञानिनापि हि । ब्रह्मविदाप्नोति परमित्यादिश्रुतिशासनात् ॥
ब्रह्मभूतः प्रसन्नात्मेत्यादिगीतोक्तितोऽपि च । सेव्यः कृष्णो ब्रह्मविद्भिः श्वेतमुक्तैरिवादरात् ३३॥
ब्रह्मनिष्ठस्य भगवद्भक्त्या पूर्णं सुखं मतम् । केवलं ब्रह्मनिष्ठस्य सुख आल्प्यं ध्रुवोऽवदत् ॥३४॥

या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्किं त्वंतकासिलुलितात् पततां विमानात् ॥३५॥

भक्त्याश्रयः परं ब्रह्म प्रत्यक्षः पुरुषोत्तमः । कृष्णः स एव प्रकृतिद्वयस्याधार ईयताम् ॥३६॥
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ३७ ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥३८॥
प्रकृतिद्वयमित्थं हि गीतायां स्पष्टमीरितम् । तत्सृज्यमेव कृष्णस्य चाधारस्य जडाजडम् ॥३९॥
पृथिव्यादिचतुष्कस्य धारकव्यापकत्वतः । आधारोऽस्ति यथाकाशः शक्तिद्वययुतः सदा ॥४०॥
जायमाने पृथिव्याद्ेः संकोचेऽस्य विकाशने । भजन्नपि स तद्भावं निर्लेपोऽस्ति स्वशक्तितः ४१॥
प्रकृतिद्वितयस्यायं धारकव्यापकत्वतः । हरिस्तथास्ति चाधारः सर्वदैव स्वशक्तितः ॥ ४२ ॥
जायमाने विकाशेऽस्य संकोचे तौ भजन्नपि । अलिप्तः सर्वदा सोऽस्ति सर्वस्यात्मा ततः श्रुतः ॥
शरीरं पृथिवी यस्य शरीरं यस्य चाक्षरम् । एवमाद्या भवंत्यत्र प्रमाणं श्रुतयो मुने ॥ ४४ ॥
अन्नं ब्रह्म मनो ब्रह्मेत्यादयश्चाप्यनेकशः । ब्रह्मविद्या एवमेव वदंत्यर्थं फलेन वै ॥ ४५ ॥
सर्वाधारश्च सर्वात्मा सर्वरूपस्ततः प्रभुः । पुरुषोत्तम एवासौ साक्षात्सेव्योऽस्ति वः सदा ४६॥
नराकृतिश्चैष एव स्वयं ब्रह्मपुरेश्वरः । अनंतैश्वर्यसंपन्नः श्रुतिसंगीतसद्यशाः ॥ ४७ ॥
ईदृग्महिमवानेष भगवानिति वेदनम् । सम्यग्ज्ञानं मुक्तिहेतुरिति ज्ञेयं मुमुक्षुणा ॥ ४८ ॥
तच्छेषभूतान्यन्यानि साधनानि तु संति हि । स्वतंत्रत्वं तु नास्त्येव तेषां मुक्तिं प्रति ध्रुवम् ॥
ईदृग्ज्ञानं भवेद्येषां तथैव च तदीक्षणम् । ते पूर्णज्ञानिनो भक्तास्तेषां न्यूनं न किंचन ॥५०॥
इत्युक्तः स पुनः साधुर्हरिकृष्णमुवाच तम् । ईदृग्ज्ञानं तु यस्य स्याद्दर्शनं तु तथा न चेत् ॥
तर्हि भक्तः स पूर्णः स्यात्पूर्णकल्पोऽथ वा प्रभो । तं प्रोवाच जगत्स्वामी पूर्णकल्पः स ईयताम्
गर्भागारस्थवस्तूनि तमसापि हि तानि यः । त्वचा जानन्नपि पुमान् साक्षाद् द्रष्टा यथा न सः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथा भक्तोऽनुमानेन विदन्नैश्वर्यमीशितुः । न पूर्णः कथ्यते सद्भिः क्वचित्संशयसंभवात् ॥५४॥
एवंविधस्यापि यस्य निश्चयः स्याद् दृढः प्रभुः । ऐश्वर्यमस्त्येव सर्वं हरौ नास्त्यत्र संशयः ५५॥
किं त्वसौ स्वेच्छया स्वामी न मां दर्शयते हि तत् । ईच्छेद्दर्शयेवाऽस्य नूनमिति यो वेत्ति तत्त्वतः
सोपि ज्ञानी पूर्णं इति ज्ञातव्यो नात्र संशयः । तन्निश्चयप्रसन्नो हि हरिस्तद्दर्शयत्यरम् ॥५७॥
ईदृशो ज्ञानिभक्तो हि श्रीकृष्णेनार्जुनं प्रति । ममात्मैवेति गदितोऽनन्यभक्तः स एव च ५८॥
ईदृग्ज्ञानविहीनस्य ब्रह्माहमिति मानिनः । ब्रह्मकुद्दालकस्याऽस्ति न गतिर्निरयेतरा ॥ ५९ ॥

पीयूषं वचनमिति स्वदेशिकस्य प्रीत्युक्तं सदसि सतां मतः स पीत्वा ।
संतोषं परममवाप चापरे ये तद्भक्ता मुनिगृहिणश्च तेऽपि सर्वे ॥ ६० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पञ्चदशोत्तरशततमस्तरंगः ॥ ११५ ॥ ७ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । सहसः शुक्लपञ्चम्यां वचोमृतमिदं हरेः ॥ १ ॥
लोहग्रामे तत्र सूरनृपतेर्मंदिरे प्रभुः । भक्तव्रजैः परिवृतो मंचोत्तम उपाविशत् ॥ २ ॥
तं श्वेतवसनं मुक्तानंदोऽपृच्छत्सदग्रणीः । स एव सन् स्वभावो हि परदोषाग्रहो यतः ॥ ३ ॥
ततोऽन्यदोषग्रहणमल्पज्ञस्य तु संभवेत् । सतो बहुविदोऽप्येतद् दृश्यते क्वापि तत्कथम् ॥ ४ ॥
बहुविद्यः पुमान्साधुः स तु दोषान् गुणांस्तथा । स्वनिष्ठान् परनिष्ठांश्च यथावद्वेत्ति सर्वशः ५॥
ततः स्वनिष्ठदोषेषु जायते तस्य वैरिधीः । तन्निवारणयत्नं च यथाशक्ति करोत्यपि ॥ ६ ॥
तादृग्दोषांश्च सोऽन्यत्र यदा सत्स्वपि पश्यति । तदा तेष्वरुचिस्तस्य जायते हृदि नान्यथा ७॥
अल्पज्ञो यः स तु पुमानपश्यन् दोषमात्मनः । मौर्ख्येणैवाऽन्यगं दोषं गृह्णातीत्यबुधो मतः ॥
इति प्रश्नसमाधानं साधोस्तस्य विधाय सः । साधून् यवीयसोऽपृच्छत्प्रश्नान्कुर्वंस्तदुत्तरम् ९॥
कामक्रोधादयः संति देहिनां येंऽतरारयः । तेषां वेगस्य तीव्रत्वं मंदत्वं च यदीक्ष्यते ॥ १० ॥
तत्त्ववस्थावशादेव भवतीत्यनुभूयते । बाल्यवार्द्धकयोर्मांद्यं तीव्रत्वं यौवने तथा ॥ ११ ॥
एवं सत्यपि तीव्रत्वं तेषां यद्यौवनेऽस्ति तत् । सद्विचारेण मंदत्वं प्राप्नुयाद्वा न वोच्यताम् ॥
इति पृष्टा स्वयं स्वामी तदुत्तरमुवाच तान् । विचारेणापि मंदत्वं स्यात्तेषां तं वदामि वः १३॥
बाल्यवार्द्धकयोस्तेषां मांद्यमाहारलाघवात् । आहारवृद्ध्या तारुण्ये तीव्रत्वं चास्ति निश्चितम् ॥
एवं विचार्य यः कुर्यात्सर्वथाऽऽहारलाघवम् । कुर्यादात्मविचारं च तस्य तन्मंदता भवेत् १५॥
आत्मैवास्मीति बुद्ध्या स्वमवधीरयतो वपुः । सत्संगं कुर्वतस्तस्य नश्येत्तत्तीव्रता ध्रुवम् ॥१६॥
इति प्रश्नोत्तरं दत्वा पप्रच्छ पुनरप्यसौ । व्यसनानि भवंतीह बहून्यपि वपुष्मताम् ॥ १७॥
भंगायाः कस्यचिन्माध्व्या अहिफेनस्य कस्यचित् । द्यूतादेः कस्यचित्पुंसो व्यसनं जायते भृशम् ।
प्रारब्धकर्मवशतो जायते तन्नृणां किमु । क्रियमाणं कर्म वेति पृष्टा प्राह तदुत्तरम् ॥ १९ ॥
एतत्तु क्रियमाणं हि भवेत्पुंसः कुसंगतः । आगमापाय्यतो ज्ञेयं शक्यं हातुं च सज्जनैः ॥२०॥
श्रद्धालुनाऽऽग्रहवता धीरेणैतच्छनैः शनैः । त्यज्यते दोषबुद्ध्यैव न त्वश्रद्धप्रमादिना ॥ २१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ तं कपिलानंदोऽपृच्छत्साधुः कृतानतिः । प्राक्कर्मजो दुःस्वभावो ज्ञेयः स्वस्य कथं प्रभो ॥

कथं वाऽद्यतनो ज्ञेय इति पृष्टोऽब्रवीत्प्रभुः । प्राक्कर्मजश्चाधुनिकः स तु लक्ष्यो मनीषया २३॥

सत्संगेन च तत्त्यागोपायदार्ढ्येन यः क्षयम् । शनैः संप्राप्नुयात्सोऽसौ ज्ञेयः प्राक्कर्मसंभवः ॥

यः सत्संगेन तत्त्यागोपायाल्प्येनाऽपयाति सः । ज्ञेय आधुनिकः साधो दुःस्वभावः कुसंगजः॥

इति प्रश्नोत्तरं दत्त्वा पुनः पप्रच्छ तान् प्रभुः । चांचल्यमिंद्रियाणां यत्सद्भिस्तज्जेयमंजसा २६॥

अतश्चलानां सर्वेषामिंद्रियाणां पृथक् पृथक् । स्थैर्योपायान्वदत मे हितायैव मुमुक्षताम् २७॥

इति पृष्ट्वा सतस्तांश्च दृष्ट्वा स्वाननदर्शिनः । प्रहसन्कथयामास स्वयमेव स उत्तरम् ॥ २८ ॥

नासाग्र एव यः कुर्यात् स्थिरां दृग्वृत्तिमात्मनः । इतस्ततश्च नेक्षेत भक्तिं कुर्यात्तथाविधः २९॥

अथवा निर्निमेषाक्षः स्थिरगात्रोऽवलोकयन् । वस्त्वेकमेव घटिकां मुहूर्त्तं वा यथाबलम् ३०॥

नेत्रदाहो भवेद्यावदश्रुधारा च नेत्रतः । तावदेव समीक्षेत मुहुरेवमनाकुलः ॥ ३१ ॥

एवं प्रतिदिनं प्रीत्या कुर्वतोऽभ्यासमस्य हि । चक्षुस्त्यजति चांचल्यं वशे भवति सर्वथा ॥३२॥

सुगंधलाभ आह्लादो जायतेऽथ च नासया । अरुचिः पूतिगंधाप्ताविति स्वाभाविकी स्थितिः ॥

तत्र खेदे जायमाने दुर्गंधाप्तौ तु धीमता । स्वांगधातुमलादीनि विभाव्यानि स्वरूपतः ॥३४॥

एवं भावयतः पुंसो नासा चांचल्यमुज्झति । अथ श्रवणचांचल्यजयोपायं वदामि वः ॥ ३५ ॥

ग्राम्यवार्त्तारतां यत्नाच्छ्रुतिवृत्तिमितस्ततः । समाकृष्य मुहुर्योज्या कृष्णवार्त्तास्तु सा दृढम् ॥

निद्रालस्योदये तत्र पीठादुत्थाय सत्वरम् । तिष्ठन् पदैकेन हरिमुच्चैः संकीर्त्तयेच्च यः ॥ ३७ ॥

पुंसः श्रद्धावतस्तस्य चांचल्यं श्रवणेंद्रियम् । विहायाल्पेन कालेन वर्त्तेत वश आत्मनः ॥ ३८॥

ज्ञात्वाज्ञात्वैव शीतोष्णसहनाच्छयनाद्भुवि । अनादराच्च वपुषश्चांचल्यं त्वग्जहात्यपि ॥ ३९ ॥

करचांचल्यहानाय श्वासोच्छ्वासमनु प्रभोः । नामोच्चार्यैकैकमणिराकृष्यस्तज्जपस्रजः ॥ ४० ॥

जपे त्वरा न कर्त्तव्या मण्याकर्षः शनैः शनैः । यथाविधि विधातव्यो भक्तेन भगवन्मनोः ॥

केचिद्वदंति मनसा भृशं नामग्रहो भवेत् । न तथा जिह्वयेत्येतन्मतं मम मतं न हि ॥ ४२ ॥

गृह्यंते कृष्णनामानि जपे यावंति जिह्वया । तावंत्येवापि गृह्यंते मनसा नाधिकानि तु ४३ ॥

अतः सहैव मनसा जिह्वयोच्चार्य मापतेः । स्पष्टं नामोच्चार्यमाला दोष्णाऽऽवर्त्त्या शनैः शनैः ॥

एवं विदधतो नित्यं कालेनाल्पेन देहिनः । पाणींद्रियस्य चांचल्यमपयाति न संशयः ॥ ४५ ॥

अथ पादस्य चांचल्यमासनाभ्यासतोऽन्वहम् । तीर्थीभूतसतां पार्श्वे एव स्थित्याऽपयाति हि ॥

उपस्थस्य तु चांचल्यमकंडूयोपवासतः । आहारलाघवाच्चापि नश्येत्सिद्धासनादिभिः ॥ ४७ ॥

कंडूयनं तु शिश्नस्य खर्ज्वा इव पुनर्व्यथाम् । करोतीति न तत्कुर्यात्सुधीः कंडूं सहेत च ॥

युक्ताहाराच्च जिह्वाया अभीष्टस्याऽप्रदानतः । अपयात्येव चांचल्यं कृष्णोच्छिष्टनिषेवणात् ४९ ॥

महद्भिः क्रियमाणायां कथायां राधिकापतेः । स्वदाक्ष्यभाषणत्यागान्मानसाच्च जपान्मुहुः ५० ॥

क्वचिन्महत्कथामध्ये कृते दाक्ष्येण भाषणे । पंचविंशतिमालानामावृत्त्या कृष्णमंत्रतः ॥ ५१ ॥

आवश्यकस्यैव ऋतवचसो भाषणात्तथा । वागिंद्रियस्य चांचल्यं मुमुक्षोरपयाति हि ॥ ५२ ॥

इंद्रियाणां जयोपाया एवं ज्ञेया यथोचितम् ।
इत्युक्त्वा तान् पुनः स्वामी पृच्छति स्म सतो निजान् ॥ ५३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इंद्रियाणि भवंत्येव दुर्जयान्यखिलान्यपि । तत्रापि कस्मिन्नेकस्मिन्विजितेऽत्र मुमुक्षुणा ५४ ॥
जितानि सकलानि स्युरिति पृष्टा तदुत्तरम् । अप्यसौ स्वयमेवाह तादृक्तु रसनं मतम् ५५॥
पप्रच्छाऽथ स तान्भूयो हृदि यस्य मनोभवः । व्याप्तः स्यात्स कथं लक्ष्यो चासइछन्नांगकः पुमान् ।
इति पृष्टोत्तरं तस्याऽप्यसावेवाऽवदत्प्रभुः । दृगादींद्रियचांचल्याल्लक्ष्यते स तु धीमता ॥ ५७ ॥
इत्युक्त्वा तान् पुनरपि पप्रच्छानंदयन् हरिः । विचारेण भवेत्केन पुमान् शांतोऽपि चंचलः ॥
चंचलोऽपि भवेच्छांतो विचारेण च केन वा । इति पृष्टोत्तरं तस्याप्याह स स्वयमेव तान् ॥
शांतस्तु कृष्णतद्भक्तमाहात्म्यं चिंतयेन्मुहुः । ततोऽसौ नवधा भक्तौ प्रवर्त्तेतादराद्धरेः ॥ ६० ॥
परिचर्यां च भक्तानां प्रीत्या कुर्वीत सोऽन्वहम् । एवं स शांततां हित्वा चांचल्यं लभते पुमान् ॥

कुर्यादात्मविचारं च चंचलस्तु पुमान्मुहुः ।
ब्रह्माऽस्म्यात्माऽस्म्यलिंगोऽस्मि स्थिरोऽस्म्याकाशवत्सदा ॥ ६२ ॥

एवं मुहुश्चिंतयतश्चांचल्यमपयाति हि । शांतो भवेत्स चेत्युक्त्वा पुनः पप्रच्छ तान् हरिः ॥
श्रीमद्भागवतादीनि सच्छास्त्राण्यष्ट संति नः । तत्राऽस्ति किंचिद्धेयं वा नास्ति प्रकरणं बुधैः ॥
सर्वमप्यस्त्युपादेयं किं वेत्युक्तास्त उत्तरम् । कर्तुं व्यचारयन् यर्हि तदा तत्स्वयमाह सः ॥
बहून्येतेषु शास्त्रेषु संति प्रकरणानि ह । प्रमाणान्येव सर्वाणि संति तानीति बुध्यताम् ॥ ६६ ॥
भगवंतं प्रपन्ना ये भक्तास्तेषां पृथक् पृथक् । यथाधिकारं स्थितयः संति तेषूपवर्णिताः ६७ ॥
अतो ग्राह्याणि सर्वाणि किंतु तत्रात्मनः स्थितिः । यथाधिकारं ग्राह्याऽन्या नैव न्यविषयत्वतः ॥
पप्रच्छाऽथ स तान्भूयः सतो यूयं हि साधवः । सर्वेऽपि तुल्यवयसः सतीर्थ्या भवथाऽनघाः ॥
तुल्यसंगास्तुल्यशास्त्राः तुल्यभोजनवाससः । तुल्योपदेशमंत्राश्च भवथ त्यक्तदैहिकाः ॥ ७० ॥
तथापि संतो युष्मासु तारतम्यं विचक्षणाः । कथं पश्यंति तद् ब्रूत विचार्यैव निजांतरे ॥७१॥
संतस्तु संति ते वृद्धा धार्मिकाः समदर्शिनः । तेष्वतः पक्षपातोऽपि वक्तुं नैव हि शक्यते ॥
इति पृष्टा भगवता नाऽजानंस्ते तदुत्तरम् । यदा तदा तदूचेऽसौ तेषां श्रद्धां विवर्द्धयन् ७३ ॥
श्रद्धायास्तारतम्येन न्यूनाधिक्यं भवत्स्वपि । यथार्थदर्शिनः संतो गृह्णंतीत्यवगम्यताम् ७४ ॥
येषु श्रद्धाऽधिका तांस्ते पश्यंतीह समेधितान् । सा न्यूना येषु तान्न्यूनांस्ते पश्यंति न चान्यथा
येषां सत्परिचर्यायां सद्वचस्सु च सत्पतेः । श्रद्धाऽधिका स्याद्भक्तौ च रक्षेयुस्तेऽधिकं वृषम् ॥
अतोधिका मतास्ते तु धर्मवृद्धैर्हि साधुभिः । सत्संगिनोऽपि येऽश्रद्धास्ते तु न्यूना मता हि तैः ॥

वचनामृतमित्यनेकभक्तप्रियकर्तुर्वृषनंदनस्य सर्वं ।
श्रवणेन निपीय तोषमापुः परमं साधुगृहस्थभक्तसंघाः ॥ ७८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षोडशोत्तरशततमस्तरंगः ॥ ११६ ॥ ॥ ८ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । सहोमासे शुक्लषष्ठ्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र लौहाभिधग्रामे निलये सूरवर्मणः । सितसर्वांबरः स्वामी पीठोत्तम उपाविशत् ॥ २ ॥
साधुभिर्गृहिभिर्भक्तैर्बहुभिः परितो वृतः । प्रश्नोत्तराणि कुरुत मिथ इत्यवदत्ततः ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्मानंदस्तदाऽखंडानंदं पप्रच्छ तद्गुरुः । धर्मज्ञानविरागाणां हेतुं भक्तेश्च मां वद ॥ ४ ॥
ततस्तदुत्तराशक्तं तं दृष्ट्वा सोऽब्रवीत्स्वयम् । तत्तदर्थकशास्त्राणां श्रवणात्तत्तदुद्भवः ॥ ५ ॥
मन्वादिभिः प्रणीतानां स्मृतीनां श्रवणान्नृणाम् । उदियाद्धर्मनिष्ठा च भयं स्यात्पापकर्मणः ॥
बृहदारण्यमुख्यानां तथोपनिषदां श्रुतेः । गीताशारीरकादेश्च ज्ञाननिष्ठोदयो भवेत् ॥ ७ ॥
ज्ञानात्कालस्वरूपस्य वैराग्यस्योदयो भवेत् । लयाः कालेन जायंते नित्यनैमित्तिकादयः ॥ ८ ॥
ब्रह्मादितृणपर्यंतं भक्ष्यं कालस्य वै जगत् । एवं नानापुराणेषु शृण्वतः कालतीव्रताम् ॥ ९ ॥
उदेति सर्वतः पुंसो वैराग्यं तुच्छतेक्षणात् । विरक्तानां प्रसंगेन मिथ्यात्वस्य च निश्चयात् ॥
भगवद्भक्तमुखतः श्रीमद्भागवतश्रुतेः । श्रुतेश्च पञ्चरात्रस्य भवेद्भक्त्युदयो नृणाम् ॥ ११ ॥
विश्वसर्गादिरूपाया लीलायाश्च रमापतेः । विभावनात्समाहात्म्यतद्धामैश्वर्ययोस्तथा ॥ १२ ॥
प्रतिखंडं भगवत उपास्यत्वावधारणात् । प्रीत्या कृष्णावताराणां श्रवणाच्चरितस्य च ॥ १३ ॥
भक्तिः पुष्टिमवाप्नोति धर्माद्यैः सहिता त्रिभिः । एवं चतुर्णां विज्ञेयं धर्मादीनां तु कारणम्

धर्मनंदनमुखाब्जनिःसृतां वाक्सुधामिति निपीय तौ तथा ।
साधवः स गृहिणोऽपरेऽपि ये तेऽपि तोषमखिलाः प्रपेदिरे ॥ १५ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ सप्तदशोत्तरशततमस्तरंगः ॥ ११७ ॥ ६ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । अष्टम्यां सहसः शुक्ले वचोमृतमिदं हरेः ॥ १ ॥
ग्रामे लौहाभिधे तत्र सूरक्षितिपमंदिरे । स व्यराजत सत्पीठे सितसर्वांबरः प्रभुः ॥ २ ॥
नानादेशागतैर्भक्तैः सद्भिश्च गृहिभिर्वृतम् । नित्यानंदस्तमप्राक्षीत्साधुवर्यः कृतानतिः ॥ ३ ॥
स्निग्धानां स्त्र्यादिषु नृणां स्नेहो द्वेधाऽत्र दृश्यते । गाढः साधारणश्चेति वियोगासहनात्मकः ॥
येषां तत्रादिमस्ते तु स्वाभीष्टविरहे सति । प्राणानपि जहत्येव विवशाः किमुतेतरत् ॥ ५ ॥
अन्ये तु स्वेष्टविरहे वर्त्तंते विकला इव । नतु प्राणांस्त्यजंतीति तेषां भेदोऽपि दृश्यते ॥ ६ ॥
एवं कृष्णे त्वयि स्निग्धा भक्ता अपि मता द्विधा । केचित्साधारणस्नेहा गाढस्नेहाश्च केचन ॥
तत्राद्यास्ते तु विरहे वर्त्तंते विकला इव । अन्ये त्वसूनपि स्वीयान् जहतीत्यपि दृश्यते ॥ ८ ॥
एवं हि द्विविधा जीवा लौकिके चाप्यलौकिके । भवंति वर्त्मनि विभोः स्निग्धत्वे तुल्यवृत्तयः
स्वकीयकर्मणैवैते भवंत्येतादृशाः किमु । किंवा स्वभावतोऽनादिकालीनाः संति हीदृशाः १०॥
इति पृष्टः प्रसन्नस्तमूचे प्रेमवतीसुतः । जीवाः स्वभावतो नैव भवंतीदृशवृत्तयः ॥ ११ ॥
किंतु स्वकर्मभिर्वैते भवंत्येतादृशा ध्रुवम् । यथा भवंति कर्माणि तान्यहं वच्मि वस्तथा ॥१२॥
विशेषसत्तया जीवो हृत्स्थः सामान्यसत्तया । व्याप्तोऽस्ति करणान्येष बाह्यान्याभ्यंतराणि च
तस्य सत्तां विना तानि क्रियाः कर्तुं स्वतः क्वचित् । जडत्वान्नैव शक्तानि संति चापशरादिवत्
जीवानां वृत्तयस्त्रेधा कथ्यतेऽतो महर्षिभिः । स्वकीयांश्चांतःकरणानुगाश्चेंद्रियगा इति ॥१५॥
वेगोऽथ जीववृत्तीनां कर्मणां करणे त्रिधा । भवतीत्यवगंतव्यो योगशास्त्र उदीरितः ॥ १६ ॥
आद्यो मंदस्ततो मध्यस्तीव्रश्चोक्तस्तृतीयकः । तत्तद्वेगविशिष्टैव वृत्तिर्वस्तुनि सज्जति ॥ १७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

याद्दग्वेगा जीववृत्तिः पदार्थे यत्र सज्जति । ताद्दगेव हि कर्मापि जायते तत्र तत्क्षणम् ॥१८॥
त्रैविध्यात्कर्मणामित्थं तज्जः स्नेहोपि देहिनाम् । मंदो मध्यस्तथा तीव्रो भवतीत्यवगम्यताम् ॥
पदार्थेषु यथा स्नेहतारतम्यं शरीरिणाम् । तथैव कृष्णे भक्तानामपि तद्भवति ध्रुवम् ॥ २० ॥
इत्युक्तो हरिणा नित्यानंदः पप्रच्छ तं पुनः । त्रैविध्यं वृत्तिवेगानां गुणैर्वाऽस्त्यन्यहेतुना ॥२१॥
भेदास्तु वृत्तिवेगानां नैव संति गुणैः कृताः । सामग्रीतारतम्येन भवंति गुणिनां हि ते ॥२२॥
इंद्रियाण्येव गच्छेयुः पदार्थान् प्रति यर्हिंतु । मंदो वेग इति ज्ञेयं वृत्तीनां सूक्ष्मबुद्धिभिः ॥२३॥
यदेंद्रियाणि गच्छेयुः पदार्थान्मनसा सह । तदा तु मध्यमो वेगस्तासां ज्ञेयो मनीषया ॥२४॥
विशेषसत्तया साकमात्मनो यर्हि तानि तु । समनस्कानि गच्छेयुरर्थान्वेगस्तदांतिमः ॥ २५ ॥
मनो जीवेनानुगतमक्षं यदधितिष्ठति । तद्वृत्तिवेगस्तीव्रः स्यादन्वीयुश्चेतराणि तत् ॥ २६ ॥
एकस्मिन्निंद्रिये प्रायो वृत्तिवेगस्य तीव्रता । सर्वस्य दृश्यतेऽथ स्यात्स्नेहस्तदनुसारतः ॥ २७ ॥
मुक्तानंदस्त्वथाऽपृच्छदेकस्मिन्निंद्रिये प्रभो । वृत्तिवेगान्वद स्पष्टं विद्यामन्यत्र येन तान् २८ ॥
तमुवाच हरिर्वेगं त्रिविधं वच्मि लोचने । वालास्तरुण्यो वृद्धाश्च संत्यत्र त्रिविधाः स्त्रियः २९॥
चक्षुषा दर्शने तासां समभावो भवेद्यदि । वृत्तिवेगस्तदा मंदः केवलेंद्रियदर्शनात् ॥ ३० ॥
तरुण्या वीक्षणाद्यर्हि विकारः स्याच्च नान्ययोः । समनस्केंद्रियेक्षातो वृत्तिवेगः स मध्यमः ॥
संकल्पाः स्युर्यदा दुष्टाः सर्वासामपि वीक्षणात् । तीव्रो वेगः स वै जीवमनश्चक्षुर्भिरीक्षणात् ॥
इति प्रश्नोत्तरं श्रुत्वा कृष्णोक्तं स तु तोष सन् । ब्रह्मानंदोऽथ तं साधुः प्रणम्याऽपृच्छदीश्वरम्
रूपव्यक्त्या वयोव्यक्त्या सह जातेपि वीक्षणे । वालायुवतिवृद्धानां सुंदरीणां कदाचन ॥३४॥
हृदि क्षोभो भवेन्नैव कस्यचित्तरुणस्य चेत् । तर्हि तल्लोचने वेगो ज्ञातव्यः कतमस्त्रिषु ॥३५ ॥
सम्यग्ज्ञानात्तीव्रवेग इति तु प्रतिभाति नः । किंतु तत्कार्यमांद्येन जायते तत्र संशयः ॥३६॥
तमुवाच हरिर्वेगस्तीव्र एवैष ईर्यताम् । तथापि तत्सदोषत्वात्तत्कार्ये नास्ति तीव्रता ॥ ३७ ॥
शीघ्रशिल्पोपि पुरुषो वातरुद्धवपुर्यथा । कुर्यात्कार्यं मंदमेव ज्ञेयो वेगोऽप्यऽसौ तथा ॥३८ ॥
यथाऽत्र दोषसंचारो जायते तन्निशम्यताम् । स्त्रीषु दोषा भृशं संति मोक्षाध्वप्रतिबंधकाः ३९।
सद्भ्यः सच्छास्त्रतस्ते च श्रुताः संत्यमुना पुरा । मननं च ततस्तेषां सर्वेषां हृदये कृतम् ॥
स्त्रीदौष्ट्यनिश्चयो बुद्धौ ततो जातोऽस्ति तस्य च । प्रविष्टोऽस्त्यथ जीवेऽसौ साक्षिणापि प्रमाणितः
एवं स पक्कतां प्राप्यात्मनो वृत्तिषु वर्त्तते । क्रियाः श्रवणवीक्षाद्यास्ताभिर्जीवः करोति हि ॥४२॥
प्रवर्त्तते यदा स्त्रीणामाकारे लोचनं तदा । तदन्वेति मनस्तच्च जीवोऽपि परवानिव ॥ ४३ ॥
जीववृत्तिगतस्तर्हि सोऽपि तद्दोषनिश्चयः । ता एतीत्यरुचिस्तत्र जायते न तु कामधीः ॥ ४४ ॥
सशर्करेऽपि पयसि पतितेऽहिगरे सति । तद्भोग्यधीर्न तद्द्रष्टुर्यथाऽस्यापि तथा न सा ४५॥
तत्क्षीरद्रष्टा तत्पाने प्राणनाशादिकान् यथा । दोषान् ज्ञात्वा निवर्त्तेत तथा वेत्त्येवमेष च ॥
रक्तास्थिमलमांसादिभृता स्त्री निर्दयांतरा । सर्पिणीव त्वचा मृद्वी श्रेयोध्वपरिपंथिनी ॥४७॥
संसृतिभ्रमहेतुश्च परत्राऽत्र च दुःखदा । दुष्पूरकामा सर्वस्वहंत्रीत्येषा न मे हिता ॥ ४८ ॥
नास्ति स्त्री दुर्लभा क्वापि सुलभा सर्वयोनिषु । बहुजन्मसु सा भुक्ता तद्भ्रमामि भवे मुहुः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एक एव हि सत्संगो दुर्लभः सर्वजन्मसु । इयमेवाऽस्ति तत्रैका विलरूपा न संशयः ॥५०॥
इति ज्ञात्वा सदोषेक्षः काष्ठपुत्तलिकामिव । पश्यन्नपि स तास्तेन क्षोभं नाप्नोति पक्वधीः ॥
वेगप्रश्नोत्तरं त्वेतद्दत्तं ते मुनिसत्तम । स्त्रीक्षणेऽप्यमनःक्षोभे वच्मि हेत्वंतरं शृणु ॥ ५२ ॥
यस्य स्यादात्मनिष्ठायाः पक्वता जनकादिवत् । तस्यापि स्त्रीक्षणात्क्षोभो न स्याद्राज्यादितोऽपि च
आत्मैकः सुखरूपोऽस्ति न तु स्त्रीवपुरादि तु । अन्यत्र यत्सुखं तत्तु स्वात्मजं न तु तद्भवम् ॥
देहादात्मा यदाप्येति वपुरादि तदाऽखिलम् । जुगुप्सितं हेयमेव भवतीतीक्ष्यतेऽखिलैः ५५ ॥
आत्माहं ब्रह्मरूपोऽस्मि महापुरुषसेवया । तथाविधोऽपि कृष्णस्य दासोऽहं राधिकापतेः ॥५६॥
आत्मात्मा चाऽक्षरात्मा च सोऽस्ति कृष्णः परात्परः । ब्रह्मरूपानंतकोटिमुक्तसंघनिषेवितः ॥
द्युपतय एव ते न ययुरंतमनंततया त्वमपि यदंतरांडनिचया ननु सावरणाः ॥
ख इव रजांसि वांति वयसा सह यच्छ्रुतयस्त्वयि हि फलंत्यतन्निरसनेन भवन्निधनाः ॥ ५८ ॥
यस्यैवं महिमानं च श्रुतयो वर्णयंत्यपि । कारुण्येन नराकारः स कृष्णः शरणं मम ॥ ५९ ॥
आत्मानं च परात्मानमेवं यो बुध्यतेंऽजसा । न तस्यापि भवेत्क्षोभः स्त्रीसमीक्षादिना मुने ६०॥
मानेऽपमाने राज्ये वा भिक्षायां प्रतिवेश्म च । स्वर्णे लोष्टे च समता भवत्यस्याऽरिमित्रयोः ॥
ब्रह्मीभावादात्मनश्च परब्रह्मदृढाश्रयात् । दृष्टिरस्याति महती वर्त्तते सर्वतोऽधिका ॥ ६२ ॥
अतो न दिव्यभोगानामपीच्छा तस्य वर्त्तते । तदा लौकिकभोगानां स्त्र्यादीनां गणना कुतः ॥
पक्वज्ञानी भवेदेवं यः स प्रोक्तः सुखी पुमान् । यो वा विश्वस्य सत्स्वीशं भजेत्स च न चेतरः ।
यश्च मूढतमो लोके यश्च बुद्धेः परं गतः । तावुभौ सुखमेधेते क्लिश्यत्यंतरितो जनः ॥६५॥
इत्यादिवचसामर्थो ह्ययमेवास्ति निश्चितः । इति प्रश्नोत्तरं श्रुत्वा मुनिराप मुदं स च ॥६६॥
ब्रह्मानंदादयः संतस्ततस्तं प्रोचुरीश्वर । ईदृक्प्रश्नोत्तरं कर्तुं शक्तः कोऽप्यत्र नास्ति हि ॥६७॥
स्वयमेवाऽथ पप्रच्छ भगवान्महतः सतः । दुःखमेवास्ति मायायां सुखं वाऽप्यस्ति किंचन ॥
इति श्रुत्वा प्रभोः प्रश्नं मुक्तानंद उवाच तम् । केवलं दुःखदा माया दुःखरूपैव साऽस्ति यत्
इत्युक्ते तेन तं स्वामी प्राह सत्त्वं रजस्तमः । गुणाः संत्येव मायायास्तत्र सत्त्वं सुखात्मकम् ॥
ज्ञानवैराग्यशांत्याद्या तत्संपच्च सुखात्मिका । एवं सति कथं माया दुःखदैवेति कथ्यते ॥७१॥
विद्याशक्त्या मोक्षकरी सा चोक्ता बहुदेहिनाम् । अतो न दुःखरूपेति वक्तुं शक्या विवेकिभिः
इत्युक्ते तेन तं संतः सर्वेऽप्याहुस्त्वमेव हि । प्रश्नस्याऽस्योत्तरं ब्रूहीत्युक्तो नारायणोऽब्रवीत् ॥
ज्ञेया माया द्विरूपैव सुखदा दुःखदेति च । सुखदा कृष्णभक्तानामन्येषां दुःखदैव सा ॥७४॥
सौम्यरूपश्चोग्ररूपः संयमिन्यां यथा यमः । पुण्यात्मनां पापिनां च वर्त्ततेऽसौ तथेयताम् ॥
देहेंद्रियांतःकरणं मायायाः कार्यमस्ति यत् । बंधकृन्नास्ति तदपि भक्तानां भक्तिपुष्टिकृत् ७६॥
इत्युक्तवंतं तं मुक्तानंदः प्राह प्रभो यदि । माया त्वदाश्रितानां तु सुखदैवेति कथ्यते ॥ ७७ ॥
तर्हि भक्ता यदा ध्यानं कुर्वंति विजये तव । मनोरूपा तदा माया संकल्पैर्दुःखदा कथम् ७८॥
कृष्णाश्रयो दृढो येषां माहात्म्यज्ञानपूर्वकः । तेषां तु सा न संकल्पैर्दुःखदेत्यवगम्यताम् ॥७९॥
भक्तस्याप्याश्रये यस्य स्याच्छैथिल्यं रमापतेः । दुःखदा तस्य तु भवेद्विमुखस्य विशेषतः ॥८०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रुत्वेति तस्याऽमृततुल्यवाचं सोऽन्ये च संतो बहुतोषमापुः ।
सदःस्थिता ये गृहिणश्च तेऽपि ततः प्रणेमुर्जगतां गुरुं तम् ॥ ८१ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावष्टादशोत्तरशततमस्तरंगः ।। ११८ ।। १० ।।

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । कृष्णाष्टम्यां मार्गशीर्षे वचोऽमृतमिदं हरेः ॥ १ ॥
ग्रामे लौहाह्वये तत्र सूरभूपस्य वेश्मनि । उपाविशच्छुभे मंचे स्वास्तृतेऽसौ सितांबरः ॥ २ ॥
वृतं त्यागिगृहस्थौघैः शुकानंदः पप्रच्छ तम् । असतां च सतां बुद्धिरस्त्यन्योन्यविरोधिनी ३॥
श्रीमद्भागवतादीनि सच्छास्त्राणीह सर्वशः । सम्यक् पठंति शृण्वंति चिंतयंत्यपि ॥ ४ ॥
असंतस्तत्र सिद्धांतं ततो गृह्णंति कीदृशम् । संतश्च कीदृशं तन्मे पृथग्गदितुमर्हसि ॥ ५ ॥
दूषिताऽस्त्यसतां बुद्धिर्दुःसंगनिजकर्मभिः । तेऽतोऽयथार्थं गृह्णंति तत्सिद्धांतं तयाखिलम् ६॥
सर्वे पुमांसो योषाश्च स्थावरा जंगमास्तथा । विराड्देहादिपुरुषादुत्पन्ना माययाऽखिलाः ॥७॥
अत आकृतयः सर्वाः संति नारायणस्य हि । ब्रह्मैव सकलं विश्वमिति वेदा वदंति च ॥ ८ ॥
अतो मुमुक्षुभिः स्वीयं वशे कार्यं मनस्ततः । यत्रासक्तं भवेत्तच्च ध्यातव्यं वस्तु नेतरत् ॥ ९ ॥
पुंसु वा स्त्रीषु पश्वादौ यत्र तस्य रुचिर्भवेत् । ध्येयं तदेव निःशंकं समाधिर्भवित्री ततः ॥१०॥
एवं स्वानुभवेनैव शास्त्रसिद्धांतकल्पकाः । असंतो निरयान् यांति मृत्वेत्यत्र न संशयः ॥११॥
अथ संतस्तु सच्छास्त्रसिद्धांतं विदुरीदृशम् । एक एव हरिर्ध्येयोऽवतारास्तस्य ये च ते ॥१२॥
देवस्य वा ब्रह्मविदोऽप्यन्यस्य त्वाकृतिस्तु या । सद्यःफलापि सा नैव ध्यातव्या पारतंत्र्यतः ॥
कृतावतारो भगवान् मिलेद्यर्हि स्वयं तदा । तस्य रूपांतरमपि न ध्येयं ध्येय एव सः ॥१४॥
प्रभुः स यत्र वर्त्तेत परिवारोऽखिलोऽपि च । तस्य तत्रैव विज्ञेयो लक्ष्यस्तस्येच्छया क्वचित् ॥
तत्स्थानमक्षरं ज्ञेयं सेवकास्तस्य पार्षदाः । शक्तयः परिचारिण्य ऐश्वर्यं चाऽक्षिसंगतम् ॥१६॥
अनंतकोटिसूर्येन्दुभासुरं यन्महश्च तत् । तस्मिन्नेवास्तीति बोध्यं क्वचिद्दृश्यं तदिच्छया ॥१७॥
एवं माहात्म्यसहितं ज्ञात्वा तं तस्य सर्वदा । भक्तिः कार्याऽत्र सुधिया लक्ष्म्येवानन्यभावतः ॥
तं विनाऽक्षरपर्यंतं स्थूलं सूक्ष्मं यदस्ति तत् । परतंत्रमिति ज्ञेयं स्वतंत्रस्त्वेक एव सः ॥ १९ ॥
सर्वात्मा चाक्षरादीनां नियंता चेश्वरेश्वरः । कालकालश्च सोऽस्तीति ध्येयः प्रोक्तः स एव हि ॥
इति सच्छास्त्रसिद्धांतं विदुः संतो यथार्थतः । अतो मुमुक्षुभिः श्रव्यः स तेभ्यो नान्यतः क्वचित्

इति हरिमुखनिःसृतां प्रहर्षं मुनिवर आप निपीय वाक्सुधां सः ।
महति सदसि तत्र ये निषण्णा मुनिगृहिभक्तजनाश्च तेऽपि सर्वे ॥ २२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावेकोनविंशोत्तरशततमस्तरंगः ।। ११९ ।।११।।

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । नवम्यां सहसः कृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
लौहग्रामे तत्र सूरवर्मणो मंदिरोत्तमे । उपाविशदसौ पीठे भूरिभक्तगणावृतः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अरुणोष्णकनीशारः सितान्यवसनः स च। पुरो निषण्णान् सदसि पप्रच्छ महतः सतः ३॥
कृष्णस्य निश्चयश्चित्ते जायते यो नृणामिह। स विकल्पो निर्विकल्प इति स द्विविधो मतः ४॥
सोप्युत्तमो मध्यमश्च कनीयानिति भेदतः। पृथक् त्रिधास्त्यतस्तेषां ब्रूत लक्ष्माणि मे पृथक् ॥
इति पृष्टाः साधवस्ते तेन कर्तुं तदुत्तरम्। तमेव प्रैरयन्सर्वे तदुवाच तदा स तान् ॥ ६ ॥
भगवान् न्याकृतिर्यावत् कामक्रोधरसादिषु। समं मनुष्यैरितरैः प्रवर्त्तेत न चाधिकम् ॥ ७ ॥
तावत्तिष्ठेन्निश्चयो यो न तिष्ठेच्च ततोऽधिकम्। सविकल्पस्य भेदोऽयं कनीयान्निश्चयस्य तु ॥८॥
अन्येभ्यो द्विगुणं नृभ्यः कामादौ वर्त्तनावधि। यस्तिष्ठेन्निश्चयो विष्णोः स भेदोऽस्यास्ति मध्यमः।
मद्यमांसपरस्त्र्यादिभोगमुख्येषु कर्मसु। लोकशास्त्रविगर्ह्येषु हरेः स्वच्छंदवर्त्तनम् ॥ १० ॥
दृष्ट्वापि यो यथापूर्वं वर्त्तेत हृदि निश्चयः। निश्चयस्योत्तमो भेदः सविकल्पस्य स स्मृतः ॥११॥
एतन्निश्चयवान्वेत्ति माहात्म्यं भृशमीशितुः। सर्वकर्त्ता सर्वभोक्ता सोऽन्तर्याम्यस्ति सर्वगः १२॥
सर्वान्वितेन तेनैव सर्वेऽपि सकलाः क्रियाः। कुर्वंतीति न काप्यस्य क्रिया भवति बाधिका ॥
माहात्म्यविद एवं हि तस्य निश्चयचालकः। न कोऽपि संशयो बुद्धौ जायते बुद्धिशालिनः ॥
क्रियाः शुभा वाप्यशुभाः कुर्वंतमिह यद्धरिम्। आकाशमिव निर्लेपं ब्रह्म मन्येत निष्क्रियम् ॥
कनिष्ठो निर्विकल्पस्य स भेदो निश्चयस्य तु। ज्ञातव्यो यत्र नास्त्येव कृष्णेऽणुरपि संशयः १६॥
रासलीलाश्रुतिप्राप्तसंशयस्य परीक्षितः। शुकेन कारितो बुद्धौ यथाऽयं तादृशः खलु ॥ १७ ॥
अस्यैतन्निश्चयवतो लये नैमित्तिकाभिधे। जायमाने समाधौ स्याद्विकारोऽल्पोऽपि न क्वचित् ॥
षडूर्मिरहितश्वेतमुक्तवचेन पुरुषः। भूत्वाऽत्यंतं विशुद्धात्मरूपोऽनन्येन चेतसा ॥ १९ ॥
अतिनिर्दोषवपुषं कृष्णं ज्ञात्वा भजेद् दृढम्। स भेदो निर्विकल्पस्य निश्चयस्यास्ति मध्यमः ॥
एतन्निश्चयिनः पुंसो लये प्राकृतिकाभिधे। समाधौ जायमानेऽपि न स्यादल्पापि विक्रिया २१॥
अणुवद्यत्र दृश्यंते साष्टावृत्यंडकोटयः। यच्चोक्तं भगवद्धाम ब्रह्म चामृतमक्षरम् ॥ २२ ॥
तेनैक्यं प्रापितेनैव स्वात्मना राधिकापतेः। अतिशुद्धेन सेवायां येन वर्त्तेत नित्यदा ॥ २३ ॥
स भेदो निर्विकल्पस्य निश्चयस्योत्तमो मतः। दुर्लभः सर्वथैवैष योगिनां महतामपि ॥ २४ ॥
एतन्निश्चयिनः पुंसो लय आत्यंतिकाभिधे। समाधौ जायमानेऽपि विकारोऽल्पोऽपि नोद्भवेत्।
एवं भेदो निश्चयस्य षड् भवंति पृथक्तया। ते विविच्य मयोक्ता वः स्वस्वनिश्चयबुद्धये ॥ २६ ॥
उत्तरोत्तरतः श्रैष्ठ्यं ज्ञात्वैतेषां मनीषिभिः। क्रमेण श्रेष्ठतां नेयः साधनैः स्वस्वनिश्चयः ॥२७॥
यथा यथा भवेत् पुंसो दृढता निश्चयस्य तु। निर्भयत्वं सुखाधिक्यं वर्द्धेत हि तथा तथा ॥२८॥
निर्विकल्पोत्तमो यर्हि निश्चयः स्याद् दृढो हरेः। तदा हि कृतकृत्यत्वं जातमत्र न संशयः ॥
निश्चयानां लक्षणानि प्रोक्तान्येतानि तु ध्रुवम्। धीमद्भिर्भगवद्भक्तैर्बोद्धुं शक्यानि नेतरैः ३०॥
चैतन्यानंदसाधुस्तमथापृच्छत्कृतानतिः। षड्भेदा निश्चयस्योक्ताः संति के तत्र हेतवः ॥ ३१ ॥
श्रद्धामुमुक्षयोः शिष्ये ज्ञानविज्ञानयोर्गुरौ। संदमध्योत्तमत्वैस्तु निश्चयस्य भिदा मताः ॥३२॥
देशः कालः क्रिया संगः शास्त्रं दीक्षा मनुस्तथा। अशुभा वा शुभा एते दद्युः स्वानुगुणं फलम्
शुभेष्वेतेषु शिष्यस्य गुरोश्च गुणसंपदि। उत्कृष्टायां भवेदेव निश्चयोत्तमतैव हि ॥ ३४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्यां तु मध्यमायां स्यान्निश्चयस्यापि मध्यता । कनिष्ठता भवेत्तस्यां कनिष्ठायां च सर्वथा ३५॥
मुमुक्षुभिरतो यत्नाच्छ्रद्धादिगुणशालिभिः । भाव्यं शुभाश्च देशाद्याः सेवनीया न चेतरे ॥३६॥
सम्यग्ज्ञानादिसंपन्नाद् गुरोश्चोपशमस्थितेः । प्राप्यं ज्ञानं भगवत इष्टसिद्धिर्भवेत्ततः ॥ ३७ ॥
श्रद्धाधिक्येन शिष्यस्य देशकालादिभिः शुभैः । गुरोस्तथोत्कृष्टतया कनिष्ठोऽप्युत्तमो भवेत् ॥
अपक्वेऽपि भवेद्यस्य निश्चये मरणं क्वचित् । जन्मांतरे भवेत्तस्य स तु पक्वो न संशयः ॥३९॥

इति निशम्य मुनिः स गुरोर्वचः परमहर्षमगात्सुधया समम् ।
मुनिगणा गृहिणश्च तथेतरे तमनमन् मुदितास्तदनुव्रताः ॥ ४० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ विंशत्यधिकशततमस्तरंगः ॥ १२० ॥ १२ ॥

शकाब्दे विक्रमार्कस्य नगाश्वसुभूमिते । दशम्यां सहसः कृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र लौहाभिधग्रामे स सूरनृपवेश्मनि । वृतोऽनेकैर्भक्तसंघैरुच्चासन उपाविशत् ॥ २ ॥
सितधोत्रः सितोष्णीषः सितकर्णपटस्तथा । उष्णकारणनीशारो वसानश्च चतुष्पटीम् ॥ ३ ॥
गोपालानंदसाधुस्तं नत्वाऽपृच्छेत्तदाज्ञया । स्वामिन् पृच्छाम्यहं किंचित्तच्छ्रुत्वा देयमुत्तरम् ॥
कीदृशं पुरुषं देशकालसंगादयोऽशुभाः । बाधंतेऽथ न बाधंते कीदृशं तद्वदांजसा ॥ ५ ॥
श्रूयंते देशकालाद्यैर्ब्रह्मरुद्रादयः पुरा । ईशा अपि पराभूताः किमुताऽन्ये सुरादयः ॥ ६ ॥
नाडिकाप्राणसंकोचपूर्वकं यस्य जायते । निर्विकल्पस्थितिः साक्षान्नारायणपदांबुजे ॥ ७ ॥
तस्यैव पुंसो देशाद्यैर्न बाधो जायते क्वचित् । अन्यस्य त्वीश्वरस्यापि जीवस्य च भवत्यसौ ॥८॥
यावत्तादृक्स्थितिं प्राप्य वर्त्तंते द्रुहिणादयः । तावत्तु तैर्न बाध्यंते बाध्यन्ते तेऽन्यथा तु तैः ॥
प्राकृतोऽपि पुमान् यावद्भगवच्चरणांबुजे । स्यान्निमग्नमनास्तावन्न बाधं याति तैः खलु ॥१०॥
सर्वदाऽकृतबाधस्तेरेको नारायणः प्रभुः । स्वतंत्रो वर्त्ततेऽथाह कपिलो मातरं प्रति ॥ ११ ॥
प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः । रोहिद्भूतां सोऽन्वधावदृक्ष्यरूपी हतत्रपः ॥१२॥
तत्सृष्टसृष्टेषु कोन्वखंडितधीः पुमान् । ऋषिं नारायणमृते योषिन्मय्येह मायया ॥ १३ ॥
बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम् । या करोति पदाक्रांतान् भ्रूविजृंभेण केवलम्
मायिकैरपि देशाद्यैर्बाधः सर्वस्य जायते । न तु साक्षाद्भगवत इति सूतोऽब्रवीन्मुनीन् ॥१५॥

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतोऽमदनोऽपि यासाम् ।
संमुह्य चापमजहात्प्रमदोत्तमास्ता यस्येंद्रियं विमथितुं कुहकैर्न शेकुः ॥ १६ ॥

तमयं मन्यते लोको ह्यसंगमपि संगिनम् । आत्मौपम्येन मनुजं व्यापृण्वानमतोऽबुधः ॥१७॥
एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः । न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ॥१८॥
भगवंतं प्रपन्ना ये न त्वन्यमनसः क्वचित् । तेऽपि तैर्नैव बाध्यंत इति कृष्णोऽर्जुनं जगौ ॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ २० ॥
एवं कृष्णं च तद्भक्तान् निर्विकल्पस्थितीन्विना । अन्ये सर्वेऽपि बाध्यंते देशाद्यैः प्रबलैर्मुने ॥
अथाऽपृच्छद्धरिं नित्यानंदो मायामयैर्गुणैः । संबद्धानां भवेदेव बाधो देशादिभिः प्रभो ॥२२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हरेस्ते गुणसंबंधे सत्यप्यस्ति स्वतंत्रता । अतो नास्त्येव तैर्बाध इति युक्तमुदीरितम् ॥ २३ ॥
त्वं कृष्णोऽतोऽखिलैः सेव्यो गुणबंधमुमुक्षुभिः । त्वत्प्रसादेन नैर्गुण्यं यायुस्ते त्वद्दृढाश्रयाः
ये तु नैर्गुण्यमापन्नाः स्थिता अक्षरधामनि । मुक्ता भवत्सधर्माणः कालमायाभयोज्झिताः ॥
तेषां च तत्र भवतो वर्त्तमानस्य धामनि । भेदः केन विशेषेण ज्ञेयश्चैतन्यरूपिणाम् ॥ २६ ॥
तमुवाच हरिस्तेषां विशेषोऽस्ति महान्मुने । राजेव कृष्णो विज्ञेयस्ते तु तत्सेवका इव ॥२७॥
तेजोविग्रहतासाम्याच्चंद्रस्ताराश्च यद्यपि । तुल्या इव समीक्ष्यंते तथाप्यस्त्येव तद्भिदा ॥२८॥
तारामंडलतश्चंद्रमंडलं वर्त्तते महत् । निवृत्तिर्नैशतमसः क्रियते शशिनैव हि ॥ २९ ॥
ओषधीनां पोषणं च सर्वासां जायतेऽमुना । एवं कृष्णस्य मुक्तेभ्योऽप्यैश्वर्यातिशयाद्भिदा ॥
कृष्णः सर्वनियंतास्ति सर्वकृत्सर्वकारणम् । अतिरूपोऽतितेजाश्च भूरिसामर्थ्यवान्प्रभुः ॥३१॥
कर्तुं समर्थोऽकर्तुं चाऽन्यथा कर्तुमपि स्वयम् । स्वतेजसि विलाप्यैतानेकः स्थातुं च स क्षमः
स्वपदे चाऽक्षरे त्वेतैः कृतां नानोपचारकैः । स्वसेवां स्वेच्छया सोंऽगीकुरुते पुरुषोत्तमः ॥३३॥
स्वावासमक्षरमपि प्रत्याकृष्यात्मनि स्वयम् । निजशक्त्यैव तान् धर्तुं स्वतंत्रः क्षमतेऽखिलान्
यथाह पृथुरूपोऽसौ पृथ्वीं त्वामंतराऽप्यहम् । धर्त्तास्मि लोकानखिलान्स्वसामर्थ्येन निश्चितम्
एवंभूतेन हरिणा साम्यं जानंति येऽधियः । अक्षरस्य च मुक्तानां ते त्वज्ञाः पापरूपिणः ॥
ईश्वरत्वं महत्त्वं च यत्राऽन्येषामुदीरितम् । तत्राऽस्यैवाऽन्वयेनैव तत्प्रोक्तमिति दृश्यताम् ॥
कार्यार्थं यत्र यत्राऽस्याऽनुप्रवेशोऽस्ति च प्रभोः । स स प्रोक्तोऽस्ति भगवानिति नैव स्वतः क्वचित्
तं विना त्वऽक्षरस्यापि भगवत्त्वं न विद्यते । कुतस्तरां विरिंचादेः सनकादेः कुतस्तमाम् ॥३९॥
अत एवाऽपरिमिता ध्रुवास्तनुभृतो यदि । इति श्लोकेऽयमेवाऽर्थः प्रोक्तो वेदैर्निजस्तुतौ ॥
एक एवास्ति भगवान् कृष्णो नान्यस्तु तत्समः । न कोपि तत्त्वमाप्नोति मद्भिरपि साधनैः
तत्सेवामेव संप्राप्ताः सःधनैस्तदुपासकाः । सैवास्ति दुर्लभा मुक्तेरपीत्याहुर्विचक्षणाः ॥४२॥
धर्मज्ञानविरागाढ्या वयमप्येतदाप्तये । भक्तिं नवविधां तस्य सादरं कुर्महे सदा ॥ ४३ ॥

एवं चकाराऽखिलशिक्षणार्थमीशोऽपि वार्त्तां तु परोक्षवत्सः ।
वाक्यामृतं तस्य निपीय चेति साधुः स चान्ये तुतुपुस्तदीयाः ॥ ४४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकविंशत्यधिकशततमस्तरंगः ॥ १२१ ॥१३॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । एकादश्यां सहःकृष्णे वचोमृतमिदं हरेः ॥ १ ॥
ग्रामे लौहाभिधे तत्र सूरवर्मनृपालये । सितांबरधरः स्वामी मंचोत्तम उपाविशत् ॥ २ ॥
भक्तैश्च त्यागिभिर्नैकैर्गृहिभिः परितो वृतः । स्वाग्रोपविष्टान्सदसि महतः सोऽब्रवीत्सतः ॥
शंकराचार्यमुख्या य आचार्या अभवन्निह । वक्ष्यादावाशयं तेषां ततश्चाहं ममापि वः ॥४॥
शुद्धाद्वैताख्यसिद्धांतः शंकरस्वामिना मतः । ऐकात्म्यजीवपरयोर्विरागाद्यस्य साधनम् ॥ ५ ॥
विशिष्टाद्वैतसिद्धांतो मतो रामानुजेन तु । जीवेशमायाभेदश्च तात्त्विको न तु कल्पितः ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आकारो वैभवैश्वर्यं दिव्यं भगवतस्तथा । दास्येनोपासना तस्य कार्या जीवैः सदेति च ॥ ७ ॥
मनुते वल्लभाचार्यो विशुद्धाद्वैतमीशितुः । बालकृष्णस्य सेवां च मुख्यमात्मनिवेदनम् ॥ ८ ॥
अथास्मदाशयमपि सर्वे शृण्वंतु सादरम् । श्रुतप्रायः स युष्माभिर्वार्त्तास्वनुगतो मुहुः ॥ ९ ॥
आशयो यस्य यादृक् स्यात्ससर्वामपि तद्गिरम् । सूचीं वा स्रग्मणीन् सूत्रमिव नित्यमनुव्रजेत्
प्रायो रामानुजस्वामिसिद्धांतोऽस्ति मतो मम । ब्रह्मात्मना कृष्णसेवा भक्तिर्मुक्तिस्तथेप्सिता ॥
कृष्णसंबंधहीनेषु विषयेष्वपि पञ्चसु । अरुचिर्भूयसी मेऽस्ति विश्वासो मनसो न च ॥ १२ ॥
ऐकात्म्यं वासुदेवेन प्राप्तोऽपि भगवानपि । ऋषभो नाग्रहीत्सिद्धीः शिक्षाया एव नः किल ॥
वशस्थस्यापि मनसो न विश्वासस्तु कर्हिचित् । मुमुक्षुणा वा मुक्तेन कर्त्तव्य इति सा मता ॥
एतस्यैव चरित्रे तां श्रीमद्भागवते शुकः । संदिग्धनृपबोधार्थं प्राग्गिरा स्पष्टमूचिवान् ॥१५॥
न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते । यद्विस्रंभाच्चिराच्चीर्णं चस्कंद तप ऐश्वरम् ॥१६॥
नित्यं ददाति कामस्य छिद्रं तमनु येऽरयः । योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥ १७ ॥
कामो मन्युर्मदो लोभः शोकमोहभयादयः । कर्मबंधश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः ॥
अत एवेदृशे त्यागे सर्वदाऽस्ति रुचिर्मम । ईदृक्त्यागिषु च प्रीतिरस्ति साहजिकी मम ॥१९॥
श्वेतद्वीपे बदर्यां वा यादृक्तपसि मे रुचिः । दिव्यलोकेषु दिव्येषु भोगेष्वपि न तादृशी ॥
सर्वेष्वप्यवतारेषु भूमौ भगवतो मम । ऋषभेऽस्ति रुचिर्बह्वी संति यत्र गुणाः सताम् ॥२१॥
किंचिन्न्यूना ततः सा च दत्ते च कपिलेऽस्ति मे । रुचिः कृष्णे तु हृदये सर्वाधिकतमा सदा ॥
सदा मंगलरूपो हि श्रीकृष्णो भगवान् स्वयम् । अवतारावतारित्वभेदो नैवाऽत्र विद्यते ॥२३॥
स्वामी नारायणः सोऽयं नित्यं हृदि मयेक्ष्यते । तिर्यगूर्ध्वमधोऽपारे स्थितः कोट्यर्कतेजसि
दिव्यसिंहासनारूढं नैकमुक्तगणैर्वृतम् । अतितेजस्विदिव्यांगं दिव्यवासोविभूषणम् ॥ २५ ॥
दिव्यचंदनपुष्पस्रक्शेखरैरर्चितं निजैः । अतिप्रीत्या तमीक्षेऽहं सादरं पुरुषोत्तमम् ॥ २६ ॥
तन्मूर्त्तिदर्शनेनैव सदानंदोऽस्ति मे हृदि । प्रतिक्षणं च पश्यामि नवं नवमिव प्रभुम् ॥२७॥
तेजोऽतिशयतः क्वापि यदा नेक्षे तदाकृतिम् । तदा तु जायते खेदो महानेव ममांतरे ॥२८॥
तेजःपुंजस्त्वखंडं मे वर्त्तते दृशि गोचरः । तथापि केवले तत्र न रुचिर्मम जायते ॥ २९ ॥
मूर्त्तिं तु तत्र पश्यामि यदा श्रीराधिकापतेः । तदैव तत्राऽतिरुचिर्जायते मे स्वभावतः ॥३०॥
अथ भक्तिस्तु तस्मिन् मे गोपीनामिव वर्त्तते । गाढस्नेहमयी नित्यं निष्कामा पर्वताचला ॥
यदा तु कामिनः पुंसः कस्यचिद्रम्ययोषिति । कामिन्या यूनि वा स्नेहं गाढं पश्याम्यखंडितम्
यदा वा कस्यचित्स्नेहं गाढं पुत्रे धनेऽपि वा । पश्यामि तर्हि संकल्प एवं मे जायते हृदि ॥
ईदृगेव हि मे स्नेहो नित्यं कृष्णे भवेदिति । कृष्णस्याऽनन्यभक्तेषु स्नेहः साहजिको मम ॥
प्रेम्णा कृष्णयशः कश्चिद्यदि गायेददंभतः । तच्छ्रुत्वा तर्हि हृदये ममानंदो भवत्यलम् ॥३५॥
धन्यः कोऽयं गायतीति प्रेषयामि तदंतिकम् । तं ज्ञातुं कंचन नरं विद्यां गत्वाऽथवा स्वयम्
दंभेर्ष्यामानकामक्रुल्लोभस्वादादिवर्जिते । धर्मे भक्तियुते पुंसि रुचिः स्वाभाविकी च मे ॥
तेनैव सौमनस्यं च स्यात्क्रियास्वखिलासु मे । अन्यथा त्वंतिकस्थेऽपि न तत्र च रुचिः क्वचित्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कामिपुंस्येव पूर्वं तु ममारुचिरवर्त्तत । सांप्रतं त्वस्ति मानेर्ष्याक्रोधित्यागिषु सा भृशम् ॥३९॥
कामी तु गृहिवन्मानं हित्वा सत्संगमाचरेत् । मानादिमांस्तु भ्रष्टः स्यान्नूनमुद्धववर्त्मनः ॥
अतस्तेषु रुचिर्नास्ति प्रोक्तः सर्वो ममाशयः । संक्षेपाच्च तमेवाहं सुबोधं वच्मि वः पुनः ॥
शंकराचार्यसिद्धांतं तत्र जानाम्यरोचकम् । रामानुजाचार्यमतश्चोपास्यः पुरुषोत्तमः ॥४२॥
तस्मिन् भक्तिश्च गोपीवद्वल्लभाचार्यसंमता । वैराग्यमात्मनिष्ठा च जडार्पभशुकादिवत् ॥४३॥
धर्मनिष्ठा ममाऽभीष्टा ज्येष्ठपांडवनिश्चिता । इत्याशयो मे संक्षेपात्स्वमुखेनैव कीर्त्तितः ॥४४॥
मया मतानामष्टानां सच्छास्त्राणामपि स्फुटम् । अयमेवाशयोऽस्तीति बुद्धिमद्भिर्विभाव्यताम् ॥

इति भक्तजनप्रशासनार्थं स्वयमीशोऽप्यवदत्स्वतोऽन्यमीशम् ।
वचनामृतमित्थमस्य संतः सकलास्ते च निपीय तोषमापुः ॥ ४६ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ द्वाविंशत्यधिकशततमस्तरंगः ॥ १२२ ॥१४॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । त्रयोदश्यां सहःकृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र लौहाभिधग्रामे सुराख्यनृपवेश्मनि । स न्यषीदत्पीठवरे सर्वैर्भक्तगणैर्वृतः ॥ २ ॥
सिताधोवसनः श्वेतोत्तमांगपटकस्तथा । ऊष्मकृद्रक्तनीशारः सितप्रावरणद्वयः ॥ ३ ॥
सितश्रवोबंधपटः कृपया लोकयन्निजान् । निषण्णान्स्वाग्रतः साधून्प्रत्युवाच स सत्पतिः ॥४॥
आत्मा देहत्रयाद्भिन्नः स्वस्त्रहृद्यवतिष्ठति । प्रकाशकस्त्वाचिद्रूपो जीवनाज्जीव उच्यते ॥ ५ ॥
आनखादाशिखं व्याप्तः प्रकाशयति सर्वतः । अध्यात्ममधिभूतं चाऽधिदैवं च स्वतेजसा ॥६॥
अध्यात्ममिंद्रियाण्याहुरधिभूतं च गोलकान् । अधिदैवं देवताश्च तेषामंतर्बहिश्च तम् ॥७॥
देवतेंद्रियरूपेण भोक्तृत्वं तस्य कथ्यते । स्वतो निराकृतेस्त्वस्य न तत्संभवति क्वचित् ॥ ८ ॥
एवं वदंतमप्राक्षीन्नित्यानंदमुनिः प्रभुम् । विशेषसत्तया जीवो देहे हृद्यवतिष्ठते ॥ ९ ॥
अन्यत्र तु प्रकाशेन व्याप्तः सामान्यतोऽस्ति चेत् । तर्हि ज्ञाने तारतम्यं कथमंगेषु वर्त्तते ॥
आत्मप्रकाशे नास्त्येव तारतम्यं स्वतो मुने । किं त्विंद्रियगतं तत्तु तद्व्याप्ते तत्र लक्ष्यते ॥
गगनस्थो यथा सूर्यो विश्वं व्याप्नोति तेजसा । तत्प्रकाश्यानुसारेण महदल्पं च दृश्यते ॥
सामान्यतस्तथैवात्मसत्ता सर्वत्र संस्थिता । अतिप्रकाश्यभेदेन तस्यां भेद इवेयते ॥ १३ ॥
स्थले जले काचभूमौ मण्यादिषु यथा रवेः । स्थितं समतया तेजस्तद्योगाद् दृश्यतेऽन्यथा ॥
देहेंद्रियांतःकरणे देवतास्त्वेवमेव हि । समोप्यात्मप्रकाशोऽस्ति तद्योगाद्विषमोपमः ॥ १५ ॥
इंद्रियाणां गोलकेभ्यः स्वच्छतास्तीति तत्र सः । विलोक्यतेऽधिक इव न तु सोऽस्त्यधिकः स्वतः
अन्योन्यमिंद्रियाणां च समत्वं नास्ति तेन च । प्रकाशे दृश्यते भेदो घ्राणचक्षुःकरादिषु ॥
करणानामांतराणामिंद्रियेभ्योऽपि वर्त्तते । स्वच्छताऽतः प्रकाशस्याधिक्यं तेषु ततोऽपि हि ॥
जीवसामान्यसत्ताया मतो ज्ञानत्वभेदतः । भेदो नैवावगंतव्यो यत्सा न विषमा स्वतः ॥
इत्युक्त्वोपरतं ब्रह्मानंदः पप्रच्छ तं प्रभोः । एकेऽतदृष्टयो जीवरूपं हृदि विचक्षते ॥ २० ॥
तत्र केचित्तु ताराभं दीपज्वालानिभं परे । रत्नदीपनिभं केचिन्मध्याह्नार्कमिवापरे ॥ २१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वस्तुतः कीदृशं तस्य रूपं भवति तद्वद । तमुवाच हरिः सम्यग्दर्शिनो नैत ईरिताः ॥ २२ ॥
हृत्स्थोऽपि स्वप्रकाशेन वपुषोंऽतर्बहिश्च सः । स्थितोऽस्ति सर्वतो व्याप्य ह्याकाश इव निर्मलः
यो योऽत्र पुरुषः साक्षाद्भगवद्ध्यानयोगतः । अंतर्दृष्टिमुपेतः स्याद्यावतीं स्वाधिकारतः ॥२४॥
स स तावंतमेवैनं स्फुरितं वीक्षतेंतरे । अतस्ते त्वात्मनो ह्येकदेशदर्शिन ईरिताः ॥ २५ ॥
प्राज्ञा ये त्वक्षिविद्यां ते नेत्रद्वारा विचक्षते । तं तस्मिन्भगवंतं च तदात्मकतया स्थितम् २६॥
एवं समाधिना ये तु स्वैकैकांगेऽपि धारणम् । कुर्वते ते तत्तदंगावकाशस्यानुसारतः ॥ २७ ॥
आत्मज्योतिः प्रपश्यंति तारतम्येन योगिनः । दृष्टांतमत्र कथये तेनैतदनुमीयताम् ॥ २८ ॥
यथा सुकाचै रचिता पुरुषप्रतिमा भवेत् । सर्वाण्यंगानि रोमादि तस्याः काचमयानि च ॥
तदंतःस्थं भवेज्ज्योतिः सर्वांगव्यापकं महत् । एकैकमंगं तस्याश्च पश्येयुरथ पूरुषाः ॥ ३० ॥
तत्र यो यो यद्यदंगं तस्याः पश्येत्स स ध्रुवम् । तत्तत्प्रतीकनलिकानुरूपं तेज ईक्षते ॥ ३१ ॥
न त्वंगसंस्थं सर्वं तद्वीक्षितुं क्षमते पृथक् । दृष्टं स्याद्येन यावत्तत्स तावत्कथयेद्धि तत् ॥ ३२ ॥
एवमेकैकांगसंस्थं यावद्यावत्तदीक्षते । यो यः स स ब्रवीत्यत्र तावत्तावत्स्वकं महः ॥ ३३ ॥
निरावरणदृष्टिं यः कृष्णोपासनदार्ढ्यतः । प्राप्तो भवेत्स आत्मानं प्रपश्यति यथास्थितम् ३४॥
इंद्रियस्थानभूता ये गोलकास्ते तु दृक्पथे । तस्य नायांत्यतः शुद्धं पूर्णं पश्यति तं परम् ३५॥
आकाशदृष्टिं प्राप्तो यः पुरुषोऽत्र भवेत्स तु । यथाऽपराणि चत्वारि महाभूतानि नेक्षते ३६॥
आत्मनोऽन्यत्तथैवाऽसौ निरावरणदृष्टिमान् । न पश्यतीति स प्रोक्तः सम्यग्दर्शीति नेतरे ३७॥
यथा यथा यस्य यस्य भवेद् दृष्टिर्निरावृतिः । तथा तथा स स पुमांस्तन्महत्तां समीक्षते ॥३८॥
कृष्णोपासनहीनस्तु स्वल्पमप्यात्मनो महः । द्रष्टुं न शक्तस्तर्ह्येनं साकल्येन कुतः पुनः ॥३९॥
नित्यानंदोऽथ पप्रच्छ तमात्मा तु निराकृतिः । करपादादिहीनत्वादस्ति ज्योतिर्मयो यदि ४०॥
तर्ह्यंतस्थस्तत्र भवान् साकारो वा निराकृतिः । आस्त इत्यमुना पृष्टः प्रावोचद्भक्तिनंदनः ४१॥
कृष्णो दिव्याकृतिर्जीवेष्वंतर्यामितया स्थितः । मूर्त्तवत्कार्यकारित्वादप्यमूर्त्तोऽस्ति मूर्त्तिमान् ॥
जीवेंद्रियांतःकरणदेवताः स्वेन तेजसा । प्रकाशयन्नाश्रयश्च तेषां सोऽस्ति नियामकः ॥ ४३ ॥
पप्रच्छाऽथ पुनः साधुः स तं जीवेषु सर्वशः । केन रूपेण भगवन्वर्त्तसे त्वं नियामकः ॥४४॥
स्वयमेव हि साक्षात्किं त्वं किं वाऽक्षररूपतः । किंवा पुरुषरूपेण वर्त्तसेंऽतर आत्मनाम् ४५॥
हरिराहाऽथ पुरुषरूपेणैव स वर्त्तते । अंतरेषु हि सर्वेषां देहिनां तत्प्रकाशकः ॥ ४६ ॥
असावेवांतरात्मा च वेदांते योगसांख्ययोः । यथारुचि यथाबुद्धि वर्णितोऽस्ति महर्षिभिः ४७॥
उद्धवस्वामिमुखतः श्रुता स्वेन च निश्चिता । मया त्वेषा कृता वार्त्ता सावधार्या मदाश्रितैः ॥

वार्त्तां निशम्येति हरेरुदारां सुधासमां प्राप मुदं स साधुः ।
अन्ये सदःस्थाश्च ततोऽतिहर्षात्तामेव सम्यग्दधुरंतरेषु ॥ ४९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रयोविंशत्यधिकशततमस्तरंगः ॥१२३॥१५॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । सहःकृष्णचतुर्दश्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र लौहाभिधग्रामे सूरवर्मनृपालये । स न्यषीदत्पीठवरे वृतोऽखिलनिजाश्रितैः ॥ २ ॥
वलक्षपरिधानीयः शुक्लमौर्द्धन्यवेष्टनः । अरुणोष्मकनीशारः सितप्रावरणांशुकः ॥ ३ ॥
श्रवणाबद्धविशदपटकः करुणानिधिः । अग्रोपविष्टान् पप्रच्छ स्वयमेव सतः प्रभुः ॥ ४ ॥
भवेयुर्हृदये यस्य तीक्ष्णा विषयवासनाः । कुण्ठिता यस्य ताः स्युश्च नष्टा यस्य च मूलतः ॥५॥
लक्षणानि पृथक् तेषां ब्रूत यूयं विचार्य माम् । इति पृष्टास्ते न संतः सम्यग्नाहुस्तदुत्तरम् ॥
अथाह तत्स्वयं स्वामी तीक्ष्णाः स्युर्यस्य वासनाः । प्रसक्तविषयेषु स्युस्तस्य त्विन्द्रियवृत्तयः ॥७॥
विचारेणापि महता तेभ्यस्ताश्च कथंचन । तेनाक्रष्टुं न शक्यन्ते त्यागिनापि नरेण वै ॥ ८ ॥
अर्थान् गत्वापि नासक्ता यस्य त्विन्द्रियवृत्तयः । सक्ता वा सुशकाः क्रष्टुं तस्य ता वित्तकुंठिताः
अर्थानामपि पंचानां सुषुप्ताविव जाग्रति । अभाव एव वर्त्तेत यस्यांतःकरणे सदा ॥ १० ॥
रमणीया अरम्याश्च यस्य स्युर्विषयाः समाः । नैर्गुण्ये वर्त्तमानस्य तस्योन्मूला मताश्च ताः ॥
इत्युक्त्वोपरतं तं च गोपालनंद ऊचिवान् । निर्मूलाः स्युः कथं सर्वाः कुंठिता अपि वासनाः ॥
स्वधर्मो ज्ञानवैराग्ये सम्यग्माहात्म्यबोधयुक् । भक्तिर्भगवतश्चेति साधनानि महांति हि १३॥
चत्वार्येतानि यस्य स्युर्दृढानि पुरुषस्य तु । तस्यैव वासनाः सर्वा निर्मूलाः स्युरशेषतः १४॥
यस्यैतेषु न्यूनता स्यान्नैव स्युस्तस्य तास्तथा । अतस्तथात्वकामेन तानि साध्यानि सर्वथा १५॥
इत्युक्त्वा श्रीहरिः साधूंस्तानपृच्छद्रमापतेः । प्रीत्यै मुमुक्षुपुंसः स्यात्साधनं किंनु वै महत् ॥
येनैकेनापि सकला नश्येयुरगुणा हृदः । संपन्नाः स्युश्च सकला धर्मज्ञानादयो गुणाः ॥१७॥
इति पृष्टोत्तरमपि तस्य स्वयमुवाच सः । माहात्म्यज्ञानयुग्भक्तिर्मता कृष्णस्य तादृशी ॥ १८॥
तयैकयापि सकला दोषा नश्यंति मानसाः । गुणाश्चायांति सकला वर्द्धते चाऽऽगता भृशम् ॥
उक्त्वेति पप्रच्छ पुनः प्रभुः कपटवान्नरः । यदि स्याद् बुद्धिमांस्तर्हि ज्ञेयः कीदृशलक्षणैः ॥
ब्रह्मानंदस्तमूचेऽथ स्वरवत्सद्भक्तविद्विषाम् । साहचर्येण तद्रुच्या स ज्ञायेत मनीषिभिः ॥२१ ॥
इत्युत्तरं मुनेस्तस्य मानयित्वा स आह तम् । बकवत्साधुवृत्तिश्चेत्स ज्ञेयः केन लक्ष्मणा ॥२२॥
तमाह स मुनिः सोऽपि दंभी ज्ञायेत धीमता । गोप्तुं शक्यं न तच्छद्म वैषम्ये देशकालयोः ॥
इत्युत्तरं हरिस्तथ्यमित्युक्त्वा तान् पुनः सतः । पप्रच्छैकोऽस्ति को दोषो दोषायंते यतो गुणाः
देवानंदस्तदा दंडी तमुवाच हरे तव । भक्तद्रोहेण सर्वेऽपि गुणाः स्युर्दोषरूपिणः ॥ २५ ॥
इत्युत्तरं मानयित्वा तस्य तं प्राह स प्रभुः । कृष्णालिंगत्वबोधोऽपि गुणानां दोषताकरः २६॥
इत्युक्त्वा स पुनः साधून् पृच्छति स्म महत्स्वपि । साधुष्वभाव आयाति पुंसस्तत्केन हेतुना ॥
इति पृष्ट्वा क्षणं स्थित्वा तस्याप्युत्तरमाह सः । सद्भावोत्पादने तु मान एवास्ति कारणम् ॥
मानो यस्मिन् भवेत्पुंसि स हि स्वस्तावकस्य नुः । बहु मन्येतैकगुणं हित्वा दोषान् सहस्रशः ॥
यस्तु स्वं न प्रशंसेच्च गुणास्तस्य सहस्रशः । हित्वैकमल्पकमपि दोषं मन्येत वै बहुम् ॥३०॥
ततश्च मनसा वाचा द्रोहं तस्य करोति सः । ततश्च वपुषा तस्माज्ज्ञेयो दोषो महान्हि सः ३१॥
प्रवीणं गुणसंपन्नं पुमांसं वापि योषितम् । प्रविश्य मानः कुरुते तद्गुणान् दोषसन्निभान् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पप्रच्छ मुक्तानंदोऽथ तं प्रभो मान ईदृशः । केनोपायेन नश्येत्तं ब्रूहीत्युक्तोऽवदद्धरिः ॥ ३३ ॥
राधारमणमाहात्म्यातिशयस्यावबोधतः । अपसर्पंति मानोऽयं विद्यादिगुणिनोऽपि तु: ॥ ३४ ॥
उद्धवः कृष्णमाहात्म्यं जानन् स्वजनिमार्थयत् । कृष्णस्निग्धव्रजस्त्रीपद्रजःस्पृश्यलतादिषु ३५॥
नीतिशास्त्रविदस्तस्य गुणिनोऽपि च धीमतः । कृष्णमाहात्म्यबोधेन नाभून्मानोऽल्पकोऽपि हि ॥
तथैव तुलसीदासो भक्तो दाशरथेरभूत् । सोऽपि श्रीराममाहात्म्यं विवेद भृशमात्मनि ॥३७॥
सोऽत आहाऽज्ञानतोऽपि निःसरेद्यस्य वक्त्रतः । रामनाम तदंघ्र्योस्त्वां मच्चर्मोपानहाविति ३८॥
एवमेव हि माहात्म्यं जानीयाद्यो भृशं हरेः । तस्य मानः कथं तिष्ठेन्नवधा भक्तिभाक्पुरः ३९॥
माहात्म्यमीशस्य ततोऽतिवेद्यं पुंसाऽऽत्मनो मानजिहासुना तु ।
इति प्रभोस्ते वचनं निपीय सुधामिवाऽऽपुः प्रमुदं च तेऽपि ॥ ४० ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ चतुर्विंशत्यधिकशततमस्तरंगः ॥१२४॥१६॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । अमायां सहसः कृष्णे वचोमृतमिदं हरेः ॥ १ ॥
तत्र लौहाभिधग्रामे राज्ञः सूरस्य वेश्मनि । पीठोत्तमे व्यराजत्स त्यागिगृहिगणैर्वृतः ॥ २ ॥
सितधोत्रः सितोष्णीषः सितश्रवणबंधनः । दधद्रक्तोष्णनीशारं सश्वेता एवंगरक्षकम् ॥ ३ ॥
पीततूलपटीं श्वेतचतुष्फालपटांतराम् । वसानः सुप्रसन्नास्यः कृपयाऽऽलोकयन्निजान् ॥४॥
बद्धांजलिपुटोऽपृच्छन्नित्यानंदस्तमानतः । भक्ता भागवतः स्वामिन्वर्त्तन्ते बहुशोऽत्र ते ॥ ५ ॥
तत्रारंभदशायां तु केचनोत्तमवृत्तयः । दृश्यंते साधव इव स्तुवंतस्त्वां च ते जनान् ॥ ६ ॥
देशकालादिवैषम्ये त एव विपरीतताम् । प्राप्नुवंत इहेक्ष्यंते त्वत्वत्सद्भक्तनिंदकाः ॥ ७ ॥
अतो देशादिवैषम्ये क्वचिज्जातेऽपि सर्वथा । येन भवत्पदाद् बुद्धिः साधनेन चलेन्न हि ॥ ८ ॥
साधुश्च साधुरेव स्यान्न तु दुष्येत्कदाचन । तत्त्वं मे कृपया ब्रूहीत्युक्तः श्रीहरिरब्रवीत् ॥ ९ ॥
देहाद्याऽनादरश्चात्मनिष्ठा वैराग्यमुत्तमम् । माहात्म्यज्ञानयुक्कृष्णनिश्चयश्च दृढो हृदि ॥ १० ॥
चतुर्भिः साधनैरेतैः साधितैस्तु कदाचन । देशादिविषमत्वेऽपि मतिः कृष्णाचलेन्न वै ११ ॥
न साधोः साधुता दुष्येत्सर्वदा श्रेष्ठ एव सः । महतां च कृपापात्रं भवेन्नारायणस्य च १२ ॥
उक्तसाधनहीनस्य विषयासक्तचेतसः । सत्सु स्यादरुचिस्तैस्तु कृते विषयखंडने ॥ १३ ॥
ततः कृष्णेऽपि तस्य स्यादरुचिर्नाकृतौ ततः । भ्रष्टः सदध्वनः कुर्वंस्तन्निंदामेव स भ्रमेत् १४ ॥
यस्य निश्चयमात्रं स्याच्छ्रीकृष्णस्य न चाऽरुचिः । विषयेषु पुमान्सोऽपि भ्रष्टः स्याद्धि तथा सति ॥
दृढीकार्याण्यतस्तानि चत्वार्यपि मुमुक्षुणा । तद्वतो हि क्वचिन्नास्ति पातशंकौद्धवाध्वनः १६ ॥
पप्रच्छाथ पुनस्तं स कश्चिद्देहाभिमान्यपि । विषयेषु प्रसक्तोऽपि कुर्वन्सत्संगमीक्ष्यते ॥ १७ ॥
स कथं तादृशोऽस्तीति पृष्टः प्रोवाच तं हरिः । भवितास्पेन कालेन सोऽपि भ्रष्टो न संशयः ॥
यदाऽस्य प्रेष्ठविषयान्महांतः साधवोंजसा । खनिष्यंति तदैवासौ तेषां द्रोहं करिष्यति १९ ॥
यदा तदा स मत्तैव यः पिबेत्सविषं पयः । देहाभिमानी विषयी भक्तोपि पतिता तथा २० ॥
सोऽद्य वा श्वः परश्वो वा पक्षमासाब्दतोंऽततः । पतिष्यति न संदेहश्छिन्नमूल इव द्रुमः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देहाभिमानहीनो योऽनासक्तो विषयेषु च । तथा सद्रूपमात्मानमेव स्वं मन्यते दृढम् ॥ २२ ॥
स्त्रीधनाद्यैः सुखी प्राप्तैः स्यामहं तैश्च वा गतैः । दुःखी स्यामीदृशो नाहं किंतु स्वेन सुखी सदा ॥
इत्यात्मनिष्ठां संप्राप्त आत्मस्थं च रमापतिम् । उपासीनो भवेद्भक्तः सतु नैव पतेत्क्वचित् ॥
क्रियमाणेऽपि विषयखंडने सद्भिरंजसा । नाऽरुचिस्तस्य सत्सु स्याद्विषयेषु तु सा भवेत् २५ ॥
इत्युक्तो हरिणा साधुः स भूयस्तं स पृच्छति । विषयेष्वरुचिर्यस्य स्यात्स ज्ञेयः कथं पुमान् ॥
विषयेष्वरुचिर्यस्य भवेत्स तु पुमानिह । तदीयास्वादसमये लक्षणैरवगम्यते ॥ २७ ॥
यादृशे तादृशे रूपे वसने शयनेऽशने । यादृश्यस्य भवेत्प्रीतिस्तथा रम्येषु तेषु नो ॥ २८ ॥
एवं रम्यपदार्थेषु तस्याऽरुच्यैव सर्वथा । स ज्ञायते तथैवाऽन्यो वैपरीत्येन पूरुषः ॥ २९ ॥
मुक्तानंदोऽथ पप्रच्छ विषयेष्वरुचिः कथम् । पंचस्वपि भवेत्पुंस इति पृष्टोऽब्रवीत्प्रभुः ३० ॥
सम्यक् कृष्णस्य माहात्म्यं यो विद्यात्तस्य सर्वथा । तुच्छत्वधीर्भवेत्तेषु ततः स्यादरुचिर्भृशम् ॥
कृष्णो हि साक्षाद्भगवान् वर्त्तते पुरुषोत्तमः । सर्वेषामात्मनामात्मा स्वप्रकाशोऽखिलाश्रयः ॥
तद्भयाद्वाति वातोऽपि सूर्यस्तपति तद्भयात् । फलंत्योषधयः सर्वास्तद्भयाच्च यथाऋतु ॥ ३३ ॥
प्रकाशयति लोकांश्च चंद्रो वह्निश्च तद्भयात् । मर्यादां न जहात्यब्धिस्तद्भयादेव तत्कृताम् ॥
रक्षंति स्वस्वमर्यादां लोकपालाश्च तद्भयात् । मृत्युश्च तस्य मर्यादां हातुं शक्नोति न क्वचित् ॥
कालः कर्म स्वभावश्च माया च पुरुषोऽक्षरम् । एतास्तच्छक्तयः संति ततोऽसौ परमेश्वरः ॥
श्रीकृष्णस्य सुखस्याग्रे तदन्यान्यखिलान्यपि । परिच्छिन्नानि तुच्छानि क्षय्याणि च सुखानि तु
एवं निश्चित्य वैराग्यं कार्ष्णेतरसुखेषु तु । संप्राप्त आत्मनिष्ठां च यः पुमान् कृष्णभक्तिभाक् ॥
तस्य पुंसस्तु सर्वेषु विषयेष्वैहिकेषु च । आमुष्मिकेष्वपि सदा वर्त्तेताऽरुचिरेव हि ॥ ३९ ॥
तथा महत्तां कृष्णस्य ज्ञात्वा तस्य दृढाश्रयम् । कुर्वतः कामलोभादिशत्रुभ्यो न भयं भवेत् ॥
तं कोऽपि कृष्णनिष्ठाया नास्ति चालयितुं क्षमः । बलं भागवतं प्राप्तं मानवो वाऽमरोऽपि वा ॥
भगवानपि तं साक्षान्निजमाहात्म्यवेदिनम् । नैव चालयितुं शक्तो वैरोचनिमिव स्वतः ४२ ॥
भक्त एवंविधोऽन्येषां भक्तानां महतां सताम् । माहात्म्यमधिकं विद्याद्गोपीनामुद्धवो यथा ॥
निर्मान एव वर्त्तेत तेषामग्रे स दासवत् । परुषामपि तद्वाचं सहेतैवं विचार्य च ॥ ४४ ॥
धन्य एवास्मि यद्वाचं सहेऽहं परुषां सताम् । कृष्णं साक्षान्नराकारं य एते समुपासते ४५ ॥
यद्येवं नाऽकरिष्यं तज्ज्ञातिबंधुनृपद्विषाम् । असहिष्ये तिरस्कारान् पापिनां स्वार्थदर्शिनाम् ॥
सत्सभायां क्वचिन्मानमप्राप्यापि स्वचेतसि । सखेदं प्राप्नुयान्नैव स्वस्यैवाऽवरतां विदन् ४७ ॥
यथा सभायां सम्राजो रंकः कश्चित्पुमान् गतः । अप्राप्य मानं नो खिद्येज्जानन्स्वानधिकारिताम्
तथैव सोऽपि जानीयात्स्वस्यैवाऽनधिकारिताम् । नष्टदेहात्मधीर्भक्तो नाऽगुणं तु सतां क्वचित् ॥
एवं हि कृष्णमाहात्म्यसम्यग्ज्ञानेन देहिनाम् । कस्को न सद्गुणः सिध्येन्नश्येत्कस्को न दुर्गुणः ॥

हरिवदनविनिःसृतां स इत्थं वचनसुधामगमन्निपीय तोषम् ।
सदसि तदितरे च ये विरक्तास्तदनुगृहाश्रमिणश्च तेऽपि भूरिम् ॥ ५१ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पंचविंशत्यधिकशततमस्तरंगः ॥१२५॥ ॥१७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते। पौषशुक्लप्रतिपदि वचोऽमृतमिदं हरेः ॥ १ ॥
ग्रामे लौहाह्वये तत्र निलये सूरभूपतेः। मंचोत्तमे निषण्णोऽभूत्सत्यागिगृहिभिर्वृतः ॥ २ ॥
सुश्वेतपरिधानीयवासाः श्वेतशिरःपटः। उष्मकारक्तनीशारः श्वेतश्रवणबंधनः ॥ ३ ॥
पीतां तूलपटीं श्वेतचतुष्फालेन संयुताम्। वसानः स सतः पश्यन् स्वयमेवाऽब्रवीन्मुदा ४ ॥
भक्त्या भगवतः श्रेयः सर्वेषामिह जायते। तस्यास्तन्निश्चयो मूलं तं तु मन्ये सुदुष्करम् ५ ॥
वार्त्तां निश्चयसंबद्धां करोम्यावश्यकत्वतः। विना तच्छ्रवणं न स्यान्निश्चयस्य तु पक्कता ॥ ६ ॥
अतः प्रियाऽप्रिया वैषा मनो दत्त्वैव सादरम्। युष्माभिरंजसा श्रव्या न तन्निर्दोषतान्यथा ॥
नराकृतौ भगवति यस्य स्यान्निश्चयो दृढः। तेन तन्मूलरूपं तु नरधर्मीति नेयताम् ॥ ८ ॥
भेदस्तु सर्वथा नास्ति मूलैतद्रूपयोर्हरेः। सकलैश्वर्ययुक्तत्वे सोऽस्ति तद्धर्मयोः परम् ॥ ९ ॥
स्वेच्छया नरवत्स्वस्मिन्निस्तेजस्त्वं विकारिताम्। बाल्याद्यवस्थावत्त्वं च कामक्रोधभयादि च ॥
नटो वेषांतरमिव लोकान् दर्शयते प्रभुः। न तु स्वभावसिद्धं तत्तस्यास्ति परमात्मनः ॥ ११ ॥
तदपि श्रेयसे नृणां कृपयेक्षयति प्रभुः। अतस्तद्दिव्यमेवेति ज्ञातव्यं नतु लौकिकम् ॥ १२ ॥
केवलं मानुषो भाव ईदृगेव हि तस्य चेत्। नित्यसिद्धस्तदा भक्त्या फलं किंनु भवेन्नृणाम् ॥
वराहरूपं धृतवान् हरिः प्रागतिकुत्सितम्। एकोर्ध्वदंष्ट्रं च खररोमशत्वक्चतुष्पदम् ॥१४ ॥
मत्स्यरूपः कूर्मरूपो नृसिंहोऽतिभयानकः। हयग्रीवो वामनश्चेत्येवमासीत्कुरूपधृत् ॥ १५ ॥
यो यो यदा यदा तेनावतारो यादृशो धृतः। तं तं तदा तदा लोकास्तादृशं समुपासत १६ ॥
भक्तास्ते वपुषोंऽते तद्धाम प्रापुस्तदा तु तम्। तादृशं तादृशं किंनु वीक्षंते तत्र धामनि ॥
तत्तद्रूपं हरिं ये च पतिभावेन भेजिरे। ते वराह्यादिभावं किं तदा स्वेषां च लेभिरे ॥ १८ ॥
तत्तत्सरूपतामुक्तिं प्रापुर्भक्ताश्च ये तदा। ते विहायाऽत्र मानुष्यं प्रापुः किं शूकरादिताम् ॥
तादृशो मूलरूपे तु संभवेदेवमेव हि। न त्वस्ति तादृशत्वं हि रमाकांतस्य सर्वथा ॥ २० ॥
यादृशं तु भवेत्कार्यं स धृत्वा तादृशं वपुः। तद्विधाय पुनः स्वेन रूपेणास्ते विहाय तत् ॥
यादृग्रूपो हरिर्नित्यं वर्त्ततेऽक्षरधामनि। तादृशं श्रूयतां वच्मि नोपमा यस्य कुत्रचित् २२ ॥
सच्चिदानंदरूपोऽतिलावण्यो दिव्यविग्रहः। योऽप्राकृतेंद्रियो दिव्यवासोलंकारमंडितः ॥ २३ ॥
दिव्यचंदनपुष्पस्रक्शेखरोत्तंसराजितः। कोटिकंदर्पसौंदर्यः शांतमूर्त्तिर्दयानिधिः ॥ २४ ॥
एकैकरोमनिर्गच्छत्कोटिकोट्यर्कतेजसा। अनेकांतिकदुर्दृश्योऽनंतशक्तिकलाधिपः ॥ २५ ॥
अनंतकोटिब्रह्मांडमहाराजो महेश्वरः। कालकालः स्वतंत्रश्च नियंता सकलात्मनाम् ॥ २६ ॥
सुरूपकोटियोषेक्षासुखादिविषयेन्द्रवम्। सुखं यदीयसौख्याग्रे प्रयात्येवाऽतितुच्छताम् २७ ॥
सोऽसौ कृष्णः सदैवास्ते द्विभुजो मुक्तमोदनः। चतुर्दोः स्वेच्छया क्वापि क्वापि चाष्टभुजस्तथा ॥
स एव हि वराहादिरूपं रामादि चेच्छया। तत्तत्कार्याय धत्ते स्वं सकलैश्वर्यमत्यजन् २९ ॥
यथोपयोगं स्वैश्वर्यं तत्र तत्र निजेच्छया। आविष्कृत्य पुनः स्वस्मिंस्तत्तिरोधापयत्यसौ ३० ॥
कृष्णो यथा स्वपितृभ्यामक्रूरायोद्धवाय च। अदीदृशच्च रुक्मिण्यै निजरूपं चतुर्भुजम् ३१ ॥
द्विबाहुश्चतुर्बाहुस्सोऽष्टबाह्वर्जुनाय तु। सहस्रबाहु रूपं च समदीदृशदिच्छया ॥ ३२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतः स सकलैश्वर्यसंपन्नो हि नराकृतिः । अस्तीत्येवावधातव्यं न ह्यसौ मर्त्यधर्मवान् ॥ ३३ ॥
नृत्वेऽपि दिव्यतैवाऽस्य बोद्धव्या सर्वदाऽस्ति सा । एनमेवार्ककोट्याभं यदीक्षंते समाधिगाः ॥
सुखिदुःखिविकारित्वं यत्तु तस्मिन्समीक्ष्यते । स्वेच्छाप्रदर्शिता सा तु लीलैवाऽस्येति गम्यताम् ॥
सापि कल्याणरूपैव नृणां न त्वन्यमर्त्यवत् । प्राकृतेत्यवधातव्यमेवं हि ज्ञानिनो विदुः ३६ ॥
अतिप्रकाशयुक् तस्य यत्सर्वेषां न दर्शनम् । जायते सापि तस्येच्छा स्वतंत्रस्येति दृश्यताम् ॥
एष पश्यतु दिव्यत्वं ममेतीच्छेद्यदि प्रभुः । तदा तु तत्स वीक्षेत प्राकृतोऽसाधनोऽपि ना ३८॥
अतः साक्षाद्भगवति न्राकारे दिव्यभावना । सर्वदैव विधातव्या मर्त्यभावस्तु न क्वचित् ॥
सामान्यतो मर्त्यभावं सर्वे पश्यंति हि प्रभौ । अयं तु भक्त इत्याख्या दिव्यभावेक्षितुर्भवेत् ॥
मर्त्यभावेक्षणे स्यातां दृष्टांतेनात्मनो हरौ । विकारित्वादिदोषौघनित्यताकर्मतंत्रते ॥ ४१ ॥
तद्दर्शी तु पुमान्नूनमचिरेणोद्धवाध्वनः । पतितः स्यान्न संदेहस्तदीक्ष्या दिव्यताऽस्य वै ४२ ॥
भक्तास्तदीया वर्त्तेरन्ननन्या ये च तेष्वपि । तत्पार्षदमतिः कार्या नाऽन्यमर्त्यसमत्वधीः ४३ ॥
मर्त्यभावान्विहायैव यतस्ते चेह दिव्यताम् । यांतीति सर्वसच्छास्त्रसिद्धांतोऽस्तीति दृश्यताम् ॥
अतो नृत्वेऽपि दिव्यत्वं ये निश्चित्य हरेरिह । भक्तिं कुर्वंति ते ज्ञेयाः पूर्णभक्ता न हीतरे ४५॥
अद्य वाऽब्दशतांते वा यदैवं निश्चयो भवेत् । तदैव भवपाशेभ्यो मुक्तिः स्यान्नान्यथा क्वचित् ॥

एषा वार्त्ता सर्वदैवावधार्या कार्याऽन्योन्यं चेति मान्या मदाज्ञा ।
इत्थं संतस्ते हरेर्वाक्सुधां वै पीत्वा हृष्टा धारयामासुरंतः ॥ ४७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षड्विंशत्यधिकशततमस्तरंगः ॥ १२६ ॥ १८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणाय नमो नमः

पञ्चालखेटे

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । चतुर्थ्यां फाल्गुनशुदि वचोमृतमिदं हरेः ॥ १ ॥
पंचालखेटे तत्राऽसौ हेमंतनृपवेश्मनः । वेद्यां न्यषीदन्महति पीठे सूक्ष्मसितांबरः ॥ २ ॥
त्यागिभिर्गृहिभिर्भक्तैर्नानादेशागतैर्वृतः । सांध्यनीराजनस्यांते सोऽप्राक्षीन्महतः सतः ॥ ३ ॥
भक्तेन धर्मनिष्ठेन प्रीतिभाजा रमापतौ । विचारः कीदृशः कार्योऽखिले स्नेहं जिहासता ॥४॥
येन पंचापि विषया रमणीया अपीतरैः । समा भवेयुरथवा तद्धीना ब्रूत तं च माम् ॥ ५ ॥
इति पृष्टा महांतस्ते संतः स्वस्वविनिश्चितम् । विचारमवदन्कृत्स्नं श्रुत्वा तं प्रभुरब्रवीत् ॥६॥
श्रुतो विचारो भवतामथ मेऽपि सुनिश्चितम् । तं वदामि यथार्थं वो मनो दत्त्वा निशम्यताम् ॥
सच्छास्त्रवचनैः कृष्णसौख्यं तर्हि विचार्यते । मायिकार्थसुखं तर्हि सर्वं यात्येव तुच्छताम् ॥८॥
सच्छास्त्रस्थैर्हि वचनैः पूर्वेषां महतामपि । निश्चीयते कार्ष्णसौख्यमहत्ता चान्यतुच्छता ॥९॥
भारते च पुराणादौ कृष्णः प्रोक्तोऽस्ति साकृतिः । जगत्सर्गादिकर्तृत्वमत एवाऽस्य च प्रभोः ॥
सच्चिदानंदरूपं यद्ब्रह्म निर्गुणमक्षरम् । अनाद्यंतं च तत्त्वस्य धामेति प्रोक्तमस्ति हि ॥ ११ ॥
ईदृक्स्वयंप्रकाशोऽसौ जीवान् मायात उत्थितान् । बुद्धींद्रियमनःप्राणैः संयोजयति च प्रभुः ॥
श्रेष्ठमध्यमहीनांश्च ततो भोगान्स तत्कृते । भोगस्थानानि च विभुर्विदधात्यखिलान्यपि ॥१३॥
ब्रह्माद्याः सूक्ष्मकीटांता देहिनस्तांश्च सर्वशः । स्वस्वकर्मानुसारेण पर्यायेणैव भुंजते ॥ १४ ॥
उत्तमास्तत्र विषया रचितास्तेन पंच ये । ते तु हीनार्थभोगोत्थदुःखस्यैव प्रशांतये ॥ १५ ॥
यथाऽऽढ्यः श्रेष्ठिकः कश्चिद्रंकपांथसुखाप्तये । छायावृक्षानुभयतः पंथानं रोपयेत्सुधीः ॥ १६ ॥
प्रपाश्च कारयेन्मार्गे धर्मशालाश्च शोभनाः । तत्र तत्रान्नसत्राणि कारयेच्च यथोचितम् ॥१७॥
तथा कृष्णोऽपि केषांचिद्देवतानां नृणामपि । पुण्यभाजां सुखायैव निर्मात्यर्थान् हि शोभनान् ॥
अनेककोटिब्रह्मांडाधीश्वरस्य हरेः पुरः । महांतोऽपि विधींद्राद्याः संति रंकजना इव ॥ १९ ॥
यथा पांथसुखं मार्गे दृष्ट्वाऽऽढ्येन कृतं बुधाः । आढ्यस्य तु सुखं गेहे निश्चिन्वंति ततोऽधिकम् ॥
तथा ब्रह्मेंद्रमुख्यानां रम्यार्थसुखमात्मनाम् । सच्छास्त्रवर्णितं बुद्ध्वा कार्ष्णं तत्त्वधिकं विदुः ॥
धीमंत इत्थं जानीयुः सत्सच्छास्त्रनिषेवणात् । भगवद्धामसौख्यस्य सर्वसौख्यातिशायिताम् ॥
अनेनैव विचारेण रमणीयार्थतुच्छता । भवेत्प्रीत्या रमाकांतं भजतः पुरुषस्य हि ॥ २३ ॥
रमणीयार्थातिसुखं यस्य यस्यास्ति देहिनः । तस्य तस्याऽस्ति तदपि भक्तियुग्धर्मजं फलम् ॥
साक्षात्कृष्णस्य तु सुखं यादृशं वर्त्तते सदा । तादृक्सुखं तु कस्यापि नास्त्येव क्वापि सर्वथा ॥
यथैवाऽस्या दीपिकायाः समीपेऽस्ति महन्महः । न तादृग्नातिदूरेऽस्यास्ततो दूरे तु किं पुनः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अष्टाविंशत्यधिकशततमस्तरंगः

पूर्णानंदनिधेस्तद्वत्साक्षात्कृष्णस्य सन्निधौ । भक्तस्याऽस्ति सुखं यादृक् ततो दूरे न तादृशम् ॥
भक्तेनाऽतो बुद्धिमता यथा कृष्णस्य सन्निधौ । वर्त्तनं स्वस्य तु भवेत्तथा कार्यं प्रयत्नतः ॥२८॥
रम्यग्राम्यार्थसक्त्या ये ततो दूरे भवंति ते । विषयैः सह नश्यंति कालध्वस्तमनोरथाः ॥२९॥
कालग्रस्तेष्वतः प्रीतिं मायिकार्थेषु सर्वथा । रम्येष्वपि विहायैव तं भजंति विचक्षणाः ॥३०॥
नृणां सुखात्सुखं राज्ञोऽधिकं तस्माद्दिवौकसाम् । ततोऽपींद्रस्य तस्माच्च विधेरस्त्यधिकं सुखम् ॥
वैराजस्याधिकं तस्मात्प्रधानपुरुषस्य तत् । मूलप्रकृतिभर्त्तुस्तद्वर्त्तते च ततोऽधिकम् ॥ ३२ ॥
ततोऽक्षरब्रह्मसुखं वर्त्ततेऽत्यधिकं त्विति । वेदादौ गीयते तस्मात्कार्ष्णं यत् स सुखांबुधिः ३३॥
एवं हि भगवन्मूर्त्तिभूरिसौख्यविचारतः । तद्भिन्ने सकले सौख्ये तुच्छताऽस्ति मतौ मम ॥३४॥
यस्याऽस्ति बुद्धिर्विमला तस्यैवेदृग्विचारतः । ग्राम्यरम्यसुखेषु स्यादौदासीन्यं हि सर्वथा ३५॥
बुद्धिमानेव पुरुषो ह्यत एवाऽस्ति मे प्रियः । कृष्णसौख्येहयान्यत्र नास्त्यस्य यद्रुचिः क्वचित् ॥
यूयं च बुद्धिमंतः स्थ संतः सर्वेऽत एव मे । अमुं विचारं गृह्णीत विचारेभ्यो वरं हि वः ॥
एतद्विचारदार्ढ्यं स्यान्मुमुक्षोर्यस्य चेतसि । कांतारस्थोऽपि मनुते स स्वं भूरिजनावृतम् ३८ ॥
एष एवेंद्रलोकस्थोऽप्यात्मानं मन्यते पुमान् । वनस्थमेव न तु तत्सुखेन सुखिनं क्वचित् ॥
हरिसुखभरप्राप्त्यै प्राप्तं विचारममुं मुदा नयत दृढतां सुज्ञा यूयं विहीनगृहाश्रमाः ।
इति हरिवचःपीयूषं ते निपीय तदोमिति प्रमुदितहृदः प्रोच्य प्रीत्या प्रभुं च ववंदिरे ॥ ४० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ सप्तविंशत्यधिकशततमस्तरंगः ॥ १२७ ॥ ॥ १ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । तपस्यशुक्लसप्तम्यां वचोमृतमिदं हरेः ॥ १ ॥
तत्र पंचालखेटेऽसौ हेमंतनृपवेश्मनः । वेद्यां न्यषीदद्भक्तौघैर्वृतः पीठे सितांबरः ॥ २ ॥
आनाय्य मोक्षधर्मं स नित्यानंदेन साधुना । सांख्ययोगाध्यायकथां कारयामास संसदि ३ ॥
ततस्तदर्थौ दुर्बोधः सर्वेषामित्यवेत्य सः । स्वयं वा तं स्फुटं भक्तान्बोधयामास तत्त्वतः ॥ ४ ॥
परमात्मा पंचविंशः सांख्यशास्त्रे प्रकीर्त्तितः । योगशास्त्रे तु षड्विंश इति भेदस्तयोर्मतः ५ ॥
आद्ये जीवेश्वरौ तूक्तौ तत्त्वेष्वंतर्गतावुभौ । चतुर्विंशतिसंख्येषु न तु भिन्नौ ततो हि तौ ॥६ ॥
मुक्तिस्तु देव मर्त्यादिगतीर्बुध्वा विरज्य च । सर्वत्र देहत्रितयपृथगात्मावबोधतः ॥ ७ ॥
यतो वाचो निवर्त्तंते इत्यादिश्रुतिबोधितः । तदा स्वानुभवेनैव परमात्माऽवगम्यते ॥ ८ ॥
योगे तूक्तः पंचविंशो जीवैः सहित ईश्वरः । परमात्मा तु षड्विंशस्तद्भक्त्या मुक्तिरात्मनाम् ॥
मतद्वयेऽथ यो दोषस्तन्निवृत्तिश्च युक्तिभिः । याभिः सद्वयोऽव्वबुद्धाभिः स्यात्तं ताश्च वदाम्यहम् ॥
सांख्ये हि भिन्नस्तत्त्वेभ्यो जीव ईशश्च नोदितः । तत्त्वान्युक्तानि मिथ्येति तत्रेदृग्दोषधीर्भवेत् ॥
यदि तत्त्वानि मिथ्यैव तर्ह्यात्मापि तदात्मकः । मिथ्येति तर्हि ज्ञानेन परमात्मानमेति कः ॥
यमाश्च श्रवणादीनि निगमेनोदितान्यपि । साधनानि मृषा च स्युराश्रयासिद्धदोषतः ॥ १३ ॥
अतोऽत्र युक्तयः शिक्ष्याः साधुभ्यस्तन्निवृत्तये । तत्त्वानि देहरूपाणि देह्यात्मा तद्विलक्षणः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वैलक्षण्यं प्रकाश्यत्वप्रकाशकतयापि च । अस्त्येतयोस्तथाप्यैक्यं तप्तायोगोलकादिवत् ॥ १५ ॥
विनात्मानं न देहस्य वृद्धिर्भवति कर्हिचित् । अतस्तदैक्यं ब्रुवते सांख्यशास्त्रविशारदाः १६ ॥
तद्भेदमवयंतीत्थं युक्तिभिर्ये सुबुद्धयः । वादिनस्ते जयंत्येव प्रतिपक्षान्न हीतरे ॥ १७ ॥
योगे तु जीवेश्वरयोश्चिद्रूपत्वाविशेषतः । पंचविंशौ तत्त्वदेहौ द्वावप्युक्तावभेदतः ॥ १८ ॥
जीवेशदेहरूपाणि तत्त्वानि तु ततः पृथक् । प्रोक्तानि खलु वैजात्याच्चतुर्विंशतिरत्र च ॥ १९ ॥
एवं सत्यत्र दोषस्तु जीवेशैक्यमतिर्मतः । विराडादितनूनां च स्थूलाद्यैस्तुल्यतामतिः ॥ २० ॥
कर्त्तव्यः परिहारोऽस्य साधुसंप्राप्तयुक्तिभिः । भेदोऽस्ति जीवेश्वरयोः सत्यस्तद्वपुषोस्तथा ॥ २१ ॥
परतंत्रोऽल्पविज्जीवः स्वतंत्रोऽन्यस्तु सर्ववित् । चिद्रूपयोरपि तयोर्विशेषो भवतीदृशः २२ ॥
पृथिव्यादीनि तत्त्वानि पंचानीश्वरविग्रहे । महांति भूतसंज्ञानि जीवदेहधराणि च ॥ २३ ॥
जीवदेहे तु पंचापि तान्यल्पानि भवंति च । एवं देहविशेषोऽपि तयोर्ज्ञेयश्च तात्त्विकः ॥२४॥
जीवेशयोरुपास्योऽस्ति परमात्मा तु तत्परः । कारणं कारणानां स ईश्वराणामपीश्वरः ॥ २५ ॥
अतः स एव सर्वेषां प्रभुर्नानावतारधृत् । साक्षादुपास्य इत्येवं युक्तयः संति योगिनाम् ॥२६॥
मतद्वयमिदं त्वन्यमतेभ्योऽपि समंजसम् । अतोऽस्ति मानितं पूर्वैर्महर्षिप्रवरैरपि ॥ २७ ॥
उभयत्र समानीव साधनानि तु संति हि । उपासनाया या रीतिः सास्ति विसदृशी भृशम् ॥
इत्युक्त्वा तान् हरिः साधूनादिश्य कृष्णगायने । मुहूर्त्तमासीद्ध्यानस्थः प्रबुद्धोऽथाऽब्रवीत्पुनः ।
विचारिते मया सम्यक्सांख्ययोगमते हृदि । पुनस्तदीयतात्पर्यं कथयामि समासतः ॥ ३० ॥
योगे कृष्णोऽस्य रूपाणि ध्येयान्युक्तानि भूरिशः । तेषु कृष्णान्वयेनैव सत्यत्वाच्छ्रेयसे नृणाम् ॥
आदावक्षरधामस्थः कृष्णो ध्येय उदीरितः । ततस्तदवरो ध्येय उक्तः प्रकृतिपूरुषः ॥ ३२ ॥
प्रधानेशस्ततस्तत्त्वानीशः सूत्रविराट्तनू । ब्रह्मादिरूपो मत्स्यादिरूपो ध्येयश्च कीर्त्तितः ॥ ३३ ॥
शालग्रामादिरूपश्च ततो ध्येयः स ईशितः । एवं योगस्य तात्पर्यमित्यासीन्मे विचारणा ॥३४॥
सांख्ये त्वाकारमात्रं विचारेण निराकृतम् । कर्त्ता विचारस्यात्मैव सत्यो ध्येय इतीरितम् ॥
तन्मताद्योगमार्गोऽयं समीचीनोऽवगम्यताम् । सालंबनश्च निर्विघ्नः सर्वजीवहितावहः ॥ ३६ ॥
अंशांशिभावज्ञानं तु दोषोऽप्यत्रेति गम्यताम् । अंशः कृष्णस्य पुरुषोऽन्यस्तस्येत्यादिको हि सः
स न ग्राह्यो भगवतोऽच्युतत्वाच्चाऽक्षरत्वतः । अखंडत्वान्निरंशत्वान्निर्विकारत्वतस्तथा ॥ ३८ ॥
यथेह भक्ताः कृष्णस्य ध्यानाद्यांति तदात्मताम् । तथा ते प्रकृतीशाद्यास्तद्भक्त्यैव तदात्मकाः ॥
तत्राप्यनादिबोधास्ते ध्येयास्तु पुरुषादयः । अपि तदात्मकां भक्ताः प्रोक्ता नैवाधुनातनाः ४०॥
तेष्वप्यस्ति हरिस्तस्याऽवताराः प्रतिमास्तथा । ध्यातव्या एव न त्वन्य इति योगस्य वै रहः ॥
सांख्येऽप्याकारमात्रस्य खंडनादल्पबुद्धयः । ध्येयान्कृष्णस्यावतारानपि मिथ्याऽत्रयंति हि ॥४२॥
अस्य दोषस्य महतो निवृत्त्यर्थं सुबुद्धिभिः । तद्रहस्यमपि ज्ञेयं वदाम्यद्य विचारितम् ॥ ४३ ॥
मायिकत्वादनात्मत्वात्तत्त्वानां देहरूपिणाम् । तन्मिथ्यात्वं दृढीकृत्य शुद्ध आत्माऽत्र वर्णितः ॥
ब्रह्मरूपेण तेनैव परमात्मा ततः परः । सेव्य इत्यत्र तात्पर्यमस्येति ज्ञेयमंजसा ॥ ४५ ॥
योगोपदेशः सांख्येन शुद्धस्यैवात्मनो मतः । अतः सांख्यविदो योगापेक्षा चास्तीति गम्यताम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतद्वेव मुमुक्षून्नृन्संतो बोधयितुं स्फुटम् । उक्तं श्रीहरिगीतायां श्रीमद्भागवतेऽपि च ॥ ४७ ॥
ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥४८॥
आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे । कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥ ४९ ॥
परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया । गृहीतचेता राजर्षे आख्यानं यदधीतवान् ५०॥
ब्रह्मात्मज्ञानिनामेवं योगोक्ता भक्तिरीशितुः । शोभते न तु सा क्वापि पुंसो देहाभिमानिनः ५१॥
बाह्यांतःकरणैर्ग्राह्याः पदार्था येऽत्र मायिकाः । तेषु सम्यगमसद्बुद्धिः स्यात्सांख्यविद एव हि ॥
तादृशस्यैव भगवद्भक्तिः स्यात्सुदृढोत्तमा । संप्रोक्ता योगशास्त्रेण माहात्म्यज्ञानपूर्विका ॥ ५३ ॥
एवं शास्त्रद्वयस्यैतन्मया हार्दं सनातनम् । विचार्य निश्चितं प्रोक्तं तत्पात्रत्वाद्धि वोऽजसा ॥५४॥
विदुः कुसंगिनो नैतदधुनातनपंडिताः । मदुक्तनद्भासमानदोषेष्वेव गुणभ्रमाः ॥ ५५ ॥
उभये ते स्वकं मार्गमुल्लंघ्यैवोत्पथं गताः । संतीत्यंते गमिष्यंति निरयन्न तु सद्गतिम् ॥ ५६ ॥
सांख्ययोगमतमित्थमादराद्वित्त यूयममलाशया इति ।
ते निपीय वचनामृतं हरेः साधवो मुमुदिरेऽपरेऽपि च ॥ ५७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ अष्टाविंशत्यधिकशततमस्तरंगः ॥ १२८ ॥ ॥ २ ॥

शकाब्दे विक्रमार्कस्य नगाश्वसुभूमिते । शुक्राष्टम्यां तपस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
पंचालखेटे तत्राऽसौ दुर्गे हेमंतभूभुजः । सितसर्वांबरो वेद्यां न्यषीदत्पीठ उत्तमे ॥ २ ॥
त्यागिभिर्गृहिभिर्निजैर्वृतस्य परितो निजैः । संतस्तस्याज्ञयाऽन्योन्यं चक्रुः प्रश्नोत्तराणि च ॥३॥
ब्रह्मानंदं तत्र मुनिः साधुः पप्रच्छ सत्तम । ईदृक्सत्संगतो दोषा नश्यंति बहवो नृणाम् ४॥
तत्रेर्ष्यामानयोर्नाशः कस्यचिन्नैव दृश्यते । वसतोऽपि सदा सत्सु तत्र हेतुश्च को वद ॥ ५ ॥
एतत्प्रश्नोत्तरं ब्रह्मानंदश्चक्रे यथामति । तत्रातुष्टं मुनिं वीक्ष्य स्वयमूचे हरिस्तु तत् ॥ ६ ॥
कुर्वतोऽपि सतां संगं हृदये यस्य तावुभौ । दोषौ स्यातां स तु पुमान्बुद्धिहीनो हि भाति मे ॥
जानात्येव गुणान्दोषान्बुद्धिमांस्त्वात्मनि स्थितान् । अन्यस्थांश्च ततो दोषान्स्वीयानाशु जिहासति
साधनेन सदुक्तेन येन तेषां क्षयो भवेत् । तत्कुर्यादतियत्नेन स तन्निर्मूलनावधि ॥ ९ ॥
निरुद्योगो न तावत्स्यात्तच्छेषो यावदंतरे । तन्नाशवार्त्ताः शृणुयादादरात्सन्मुखात्स च ॥१०॥
गुणानेव हि जानीयादन्यस्तु स्वस्य नाऽगुणान् । सदोषमपि स स्वं तु मन्येत सनकादिवत् ॥
सनकादिसमं त्वन्यं महांतं संतमप्यसौ । मन्येताऽल्पगुणं स्वस्मान्नास्य स्याद्दोषनाशनम् ॥१२॥
बुद्धिमानपि चेत्कश्चिन्नोद्यतः स्वागुणक्षतौ । तर्ह्यसावपि विज्ञेयो बुद्धिहीनसमः पुमान् ॥१३॥
बुद्धिस्तस्य च विज्ञेया भूरिदाक्ष्येण विश्रुता । अर्थेषु लौकिकेष्वेव न तु मोक्षार्थसाधने ॥१४॥
अल्पापि यस्य मोक्षार्था मतिः स्यात्सैव सज्जनैः । हितावहा बुद्धिरुक्ता पशुबुद्धिर्मतेतरा ॥१५॥
इत्युक्त्वा श्रीहरिः साधून् कृष्णस्नेहार्थकानि तान् । आजिज्ञपद्गापयितुं पद्यानि ज्ञानभास्करः ॥
कीर्त्तनांते स तान्स्वामी पुनर्भक्तान्सतोऽब्रवीत् । पद्येषु युष्मद्गीतेषु स्नेहातिशय ईरितः १७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यः श्रीकृष्णे भवेत्स्नेहः स तु मोक्षैकसाधनम् । यस्तु स्नेहोऽन्यत्र हरेः सैव मायेति बुध्यताम्
यादृक् स्नेहो भवेत्पुंसां स्त्रीषु तासां च तेष्वपि । तादृक्तेषां तु नान्योऽन्यं स्याद्वीक्षाभाषणादिभिः
स हि संसृतिहेतुत्वान्मायापाशश्च कीर्त्तितः । कृष्णे तु भक्तिरित्युक्तः स्नेहः संसृतिमोचनः २०॥
कृष्ण एव ततः स्नेहः कर्त्तव्योऽत्र मुमुक्षुभिः । मायिकत्वेन तुच्छत्वं ज्ञात्वा तदितरस्य तु २१॥
एवं पंचापि विषयाः काम्याः कार्ष्णा न चेतरे । तत्कामनायां भक्तत्वे महती भवति क्षतिः ॥
यथा षोडशसाहस्रं कृष्णपत्न्यः शताधिकम् । सांबरूपेक्षया मोहं प्राप्य प्रापुर्विगर्हणाम् २३॥
अष्टावक्रस्य च विधेस्तपस्तुष्टस्य ता वरात् । प्राप्यापि स्वपतिं कृष्णं व्यमुह्यन्नितरेहया २४॥
अत एव हि कार्ष्णेभ्यो विषयेभ्योऽपरेऽधिकम् । रमणीया अपि स्युश्चेद्धेयास्तर्ह्यपि तेऽन्यवत् ॥
रम्या गवाक्षीफलवद्विषमोदकवद् बहिः । कार्ष्णेतरा हि विषयाः परिणामेऽतिदुःखदाः ॥२६॥
कार्ष्णास्त्वरम्या इव ते भासमाना अपि ध्रुवम् । निर्गुणाः कृष्णसंबंधाद्दिव्याक्षयसुखप्रदाः ॥
सत्सच्छास्त्रोदितं तेषां माहात्म्यमवगत्य ये । यथोचितं तान् गृह्णीयुर्बुद्धिमंतस्त एव हि २८ ॥
कृष्णे च कृष्णसंबद्धे वस्तुन्येव भवेत्सदा । प्रीतिर्बुद्धिमतां संतो नान्यत्र पुरुषावधि ॥ २९ ॥
प्रीतिश्च कृष्णे कर्त्तव्या यथा भक्तैर्मनीषिभिः । तथा वदामि शृणुत प्रेयस्त्वं स्याद्यया हरेः ॥
चतुर्विंशतितत्त्वेभ्य आत्मा ज्ञेयः पृथक् परः । उन्मूलनीयास्तल्लग्ना इंद्रियाणां च वृत्तयः ॥
भूतेंद्रियांतःकरणदेवतास्तु गुणात्मकाः । तमोरजःसत्वजन्या ज्ञेयाः स्वश्च ततः पृथक् ३२ ॥
एवं निर्गुणसद्रूपात्मनैव प्रीतिरादरात् । कार्या श्रीराधिकाकांते यथाशक्त्यखिलाधिका ३३ ॥
नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः । इत्यादिश्रीभागवतवाक्यमस्त्येतदर्थकम् ॥ ३४ ॥
देहत्रयं तथावस्थात्रयं क्षेत्रमितीरितम् । तज्ज्ञाता क्षेत्रवित् प्रोक्त आत्मा स हि ततः परः ॥
सच्चिद्रूपः स एवास्मि हरेर्दासः सदा शुचिः । विलक्षणोऽतिमलिनात् क्षेत्रादस्मि जडादहम् ॥
इति निश्चित्य भगवत्यचलां प्रीतिमुद्वहन् । ज्ञानिभक्त इति प्रोक्तो गीतायां हरिणोत्तमः ३७ ॥
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ॥
खनेन्द्रियमूलानि ज्ञानदार्ढ्येन सर्वथा । अनुत्खातानि यावत्स्युरल्पशेषाणि वाऽऽत्मनि ३९ ॥
सर्वैरपींद्रियैस्तावत्कारणीयं प्रयत्नतः । ग्रहणं विषयाणां तु कार्ष्णानामेव नेतरत् ॥ ४० ॥
स्वप्राप्योत्कृष्टभगवत्सुखलोभप्रदर्शनात् । तुच्छग्राम्यसुखासक्तिस्तेषां हाप्या विवेकतः ॥ ४१ ॥
दर्शनं स्पर्शनं घ्राणं रसनं श्रवणादि च । कृष्णसंबंधहीनस्य कारणीयं न तैः क्वचित् ॥ ४२ ॥
एवं कृष्णपरत्वेन सुहृद्वच्चरतामपि । इन्द्रियाणां न विश्वासः कर्त्तव्यः क्वापि धीमता ॥ ४३ ॥
शत्रुत्वमिंद्रियाणां हि निश्चितं पूर्वसूरिभिः । योगसिद्धा अपि यतो नीता एभिरिहोत्पथम् ॥
पुरुषं कृतविश्वासमेतानि ह्यजितानि तु । न नयेयुः किमशुभं प्रमत्तं गूढशत्रवः ॥ ४५ ॥
यथा राजा निगृह्यैव निगडैः शत्रुमात्मनः । कर्मेप्सितं कारयति न तं स्वेच्छाविचारिणम् ॥
तथेंद्रियाण्यपि वशे कृत्वा तैर्भक्तिरीशितुः । विधातव्या बुद्धिमता नान्यथा तु कदाचन ४७ ॥
प्रायशो दुर्हृदो घ्नंति शत्रुं विश्वस्तमेव हि । अतो नैव गुणा ग्राह्या इन्द्रियाणां स्ववैरिणाम् ॥
यथा यथा निवृत्तिः स्यात्तेषां स्वविषयग्रहात् । तथा तथा विधातव्यं साधनं यत्नतो द्रुतम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्तु स्वधर्मो वैराग्यं कृष्णादितरवस्तुषु । कृष्णमाहात्म्यविज्ञानप्रमुखं ज्ञेयमंजसा ॥ ५० ॥
वैरित्वमेव निश्चित्य तेषामुन्मूलनं सुधीः । कृत्वाऽऽत्मनः स्वयं भूत्वा सद्रूपः श्रीहरिं भजेत्
देहावस्थेंद्रियादीनां द्रष्टात्मैवाऽस्म्यहं शुचिः । इत्येव सर्वदा वृत्त्यं दास्येन भजता हरिम् ॥
देहेंद्रियादिसंबंधं विवेकेन जिहासता । कुर्वंतात्मस्थितेर्दार्ढ्यं प्रार्थनीयो रमापतिः ॥ ५३ ॥
महाराज हरे स्वामिन् दयालो भक्तवत्सल । शत्रुभ्य इंद्रियादिभ्यः पाहि मां तव सेवकम्
संप्रार्थ्यमानोऽनुदिनमित्थं भक्तेन तत्पतिः । भगवान्सर्वतस्तस्य रक्षणं कुरुते ध्रुवम् ॥ ५५ ॥
इति वागमृतं हरेर्मुखाद्गलितं साधुजना निपीय ते ।
इतरे च तदीयसेवकाः परमं हर्षमवापुरानताः ॥ ५६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ ऊनत्रिंशदधिकशततमस्तरंगः ॥ १२९ ॥ ३ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । तपस्यांत्यतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
पञ्चालखेटके तत्र दुर्गे हेमंतभूभुजः । वेद्यां व्यराजत् स स्वामी स्वास्तृते मंचकोत्तमे ॥ २ ॥
श्वेतं वासः परिदधच्छ्वेतशीर्षपटः प्रभुः । श्वेतां वसानश्च पटीं दधद्वृंदास्रजं करे ॥ ३ ॥
मणीनावर्त्तयंस्तस्याः स्मरन्नारायणं हृदि । व्यलोकत पुरः संस्थां निजभक्तसभां मुदा ॥ ४ ॥
नानादेशसमायाता गृहिणस्त्यागिनस्तथा । तद्भक्तास्तेऽपि सर्वे तं पश्यंतोऽतिमुदं ययुः ॥
प्रीतोऽथ त्यागिनः प्राह हरिर्यूयं परस्परम् । प्रश्नोत्तरं विधत्तेति ततस्तेऽपि तथा व्यधुः ॥
ब्रह्मानंदं पप्रच्छेदं तत्र साधुं मुनिस्तु सन् । साधुवर्य मम प्रश्नं श्रुत्वा कुरु तदुत्तरम् ॥७॥
एतस्मिन्निश्चयं प्राप्य प्राक् कश्चिन्नाकृतौ हरौ । तन्नृलीलामथो वीक्ष्य संदिग्धे हेतुरत्र कः ॥८॥
इति पृष्टः स मुनिना कर्तुं तस्योत्तरं यदा । न शशाक तदा स्वामी सुविचार्याऽब्रवीत्स्वयम् ॥
प्रश्नोत्तरं तव मुने कुर्वेऽहं श्रृणु सादरम् । संशयो निश्चये यस्मिन् ज्ञातव्योऽपक्ष एव सः ॥
रूपे भगवतो द्वे वै भवतो दिव्यमानवे । तयोः सम्यगभेदेन ज्ञानं संशयनाशनम् ॥ ११ ॥
श्रुतिस्मृतीतिहासेषु मूलभूतं सनातनम् । प्रोक्तं रूपं हरेर्दिव्यमित्येवाक्षरधामगम् ॥ १२ ॥
देहिभिश्चक्षुषा रूपं यत्किंचिदनुभूयते । न तादृशं भगवतो रूपं भवति तन्मुने ॥ १३ ॥
एवं यः श्रूयते श्रुत्या शब्दो लोकेषु देहिभिः । शब्दो भगवतस्तस्य तादृशो न भवत्यपि ॥१४॥
स्पर्शस्त्वचा गृह्यते यस्तादृशस्तस्य नास्ति सः । घ्राणेन गृह्यते गंधो लोकैस्तादृङ्न चास्य सः ॥
न जिह्वया वर्णयितुं शक्यः कैश्चिदपि प्रभुः । मनःसंकल्पविषयः स च नास्त्येव देहिनाम् ॥
निश्चेतुं न धिया शक्यो न चिंत्यश्चेतसापि सः । न चाहंकारविषयस्ततोऽधोक्षज उच्यते १७ ॥
उपमीयेत येनाऽस्य रूपं भगवतो मुने । ब्रह्मांडे तादृशं रूपं नास्ति दृष्टं न च श्रुतम् ॥ १८ ॥
एवं शब्दः सुगंधश्च स्पर्शश्चापि न कुत्रचित् । संति यैरुपमीयेरंस्तस्य शब्दादयो बुधैः ॥१९ ॥
ब्रह्मांडेऽत्र तु केषांचिद्ब्रह्मेंद्रादिदिवौकसाम् । तादृग्धाम न येनाऽस्य स्थानमप्युपमीयते ॥२० ॥
यच्चानुभूयते सौख्यं भगवद्धामवासिभिः । भक्तैस्तस्यापि नास्त्येव ब्रह्मांडे तुलना क्वचित् २१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आकृतिर्यादृशी चास्य हरेरस्ति न तादृशी। कस्याप्यत्र यया साऽस्य समा प्रोच्येत कोविदैः ॥
या या आकृतयः संति ब्रह्मांडे प्राकृता हि ताः। जाताः प्रकृतिपुंयोगादस्य त्वप्राकृतास्ति सा ॥
अप्राकृतप्राकृतयोर्दिव्यादिव्यत्वतो महत्। वैलक्षण्यं भवत्येव सादृश्यं न ततस्तयोः ॥ २४ ॥
पशुपक्ष्यादिभिः साम्यं विजातीयत्वतो भुवि। मनुष्यजातेर्न भवेद्यथा तद्वत्तयोरपि ॥ २५ ॥
साजात्येऽपि मनुष्याणां समत्वं न परस्परम्। प्रायशो दृश्यते लोके व्यवहारो भिदा यतः ॥
आगतो देवदत्तोऽयं विष्णुदत्तो गतोऽधुना। इत्यादिभेदविज्ञानं कथं स्याद्भेदकं विना ॥२७॥
इह हि भ्रातरौ वैश्यौ भगमूलाभिधाविमौ। वर्णाकृतिसमौ स्तोऽतो विवर्तोऽस्त्यनयोर्नृणाम् ॥
तथाप्येतत्परिचये भेदकोऽप्यवगम्यते। भगोऽयमथ मूलोऽयमिति यद्व्यवहार्यते ॥ २९ ॥
एवं नृणामपि यदा सादृश्यं न परस्परम्। अप्राकृतप्राकृतयोर्जायते तत्कुतस्तराम् ॥ ३० ॥
अतो न भगवांस्तस्य धाम चान्योपमे मते। बाह्यांतःकरणानां चाऽगोचरे ते प्रकीर्त्तिते ३१॥
अनेककोटिब्रह्मांडाधीश्वरो दिव्यविग्रहः। अक्षरब्रह्मणि स्वीये धाम्नि नित्यं स राजते ॥ ३२ ॥
दिव्याभिः सर्वसम्पद्भिः पार्षदैर्दिव्यविग्रहैः। शक्तिभिः सेव्यमानश्च स्वतंत्रोऽस्तीश्वरेश्वरः ३३॥
भूरिपुण्यो यथा कश्चिच्चक्रवर्ती नृपाधिपः। नहुषादिरिवाज्ञायां त्रींल्लोकानपि वर्त्तयेत् ॥३४॥
शास्या ग्रामा असंख्याः स्युस्तस्य ग्रामाधिपैः सह। पट्टलाख्यैर्निजग्रामजनसंवार्चितैरपि ॥३५॥
तथा भगवतोऽनेकब्रह्मांडानि तदीश्वरैः। ब्रह्माद्यैर्नृसुराद्यच्चैः सह शास्यानि संति वै ॥ ३६ ॥
विरिंचिविष्णुगिरिशैर्ब्रह्मांडेशैः स्वयनायकः। स एव सेव्यते भक्त्या सर्वदा पुरुषोत्तमः ३७॥
स्वस्वब्रह्मांडागमार्थं तैश्च स प्रार्थ्यते मुहुः। पट्टलैश्चक्रवर्त्तीव बद्धांजलिपुटैर्मुने ॥ ३८ ॥
ब्रह्मांडग्राममेत्य त्वं कृतार्थान्कुरु नः प्रभो। शक्त्या सेवां करिष्यामो देहीक्षां कृपया त्विति ॥
एवं संप्रार्थ्यमानस्तैस्तत्तद्ब्रह्मांड ईश्वरः। स्वतन्त्र आविर्भवति यथाकार्यं वपुर्दधत् ॥ ४० ॥
देवपादःपशुन्रादिजातीनां यत्र जायते। क्रिया तदनुरूपां स करोत्येव न चान्यथा ॥ ४१ ॥
उपेंद्रः सन्नशात्स्वर्गं देववत्स नभश्चरः। मत्स्यः सन्व्यचरत्तोये मत्स्यवन्न तु भूतले ॥ ४२ ॥
वराहः सन्नवाघ्रासीद् घ्राणेन क्ष्मां वराहवत्। हेषां चकार हयवद्धयग्रीवो भवन्नसौ ॥ ४३ ॥
न्राकृतिः सन्नृवच्चासाववर्त्तत धरातले। यस्मिन् युगे यावदायुस्तावत्तत्र वपुर्दधत् ॥ ४४ ॥
युगे कृते च त्रेतायां द्वापरेऽपि स ईश्वरः। युगानुरूपं च बलं स्वस्य देहेऽप्यदर्शयत् ॥ ४५ ॥
कलौ स्वयं सांप्रतं स वर्त्ततेऽत्रत्यमर्त्यवत्। गर्भजन्मकुमारत्वाद्यवस्था दैहिकीर्दधत् ॥४६॥
कामक्रोधमदस्वादक्षुत्तृड्भीमोहमत्सरान्। स्नेहव्याधिविरागादीन् स्वस्मिन् दर्शयते नृवत् ॥
एवं हि भगवद्रूपे वेदितव्ये उभे मते। धाम्न्यक्षरे दिव्यमाद्यं द्वितीयं न्राकृति क्षितौ ॥ ४८ ॥
उभे येन सुविज्ञाते सत्सच्छास्त्रानुशीलनात्। न तस्य संशयः क्वापि न्राकृतौ भवति प्रभौ ४९॥
यथा रूपांतरधरे नटे तज्ज्ञातिरूपवित्। नाऽऽप्नोति संशयं तद्वन्मर्त्यचेष्टे हरौ सुधीः ॥५०॥
गुणा दोषाश्च दृश्यंते यद्यपीशे नराकृतौ। तथापि दिव्यभावज्ञस्तद्विशेषं हि बुद्ध्यते ॥ ५१ ॥
विरागादीन् गुणान् दोषान्कामादीनीश्वरे सुधीः। पश्यन्ननन्यसदृशान्निश्चिनोतीश इत्यसौ ॥
पूर्वं हि शंकराचार्यो जिज्ञासू रसमादिमम्। मृतराजवपुर्विष्ट्वा रेमे तद्भार्यया मिथः ॥ ५३ ॥
तदा राज्या बुद्धिमत्या तत्स्वामिदेहगोऽपि सः। न मत्पतिरसौ किं त्वाविष्टः कोऽपीति निश्चितम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं सूक्ष्मदृशा सुज्ञैस्तदसाधारणैर्गुणैः । निश्चीयते हरिरसाविति जानीहि बुद्धिमन् ॥ ५५ ॥
अल्पैश्वर्येक्षणान्नृणां यदेत्थं निश्चयो भवेत् । तर्ह्यैश्वर्यं हरिर्भूरि किं न दर्शयतीति चेत् ॥५६॥
अत्रोत्तरं मुने वच्मि सदृष्टांतं निशामय । हितं यथा भवेन्नृणां तथैव कुरुते हरिः ॥ ५७ ॥
तेजोनिधिरसौ सूर्यो नारायण इति श्रुतः । प्रत्यक्षमीक्ष्यते सर्वैर्मनुजैः प्रतिवासरम् ॥ ५८ ॥
तथापि निश्चयो नैव केषांचिद् दृश्यते भुवि । एतद्दर्शनतोऽस्माकं निःश्रेयसमभूदिति ॥ ५९ ॥
नराकृते रामकृष्णादिसंज्ञस्य तु हरेरिह । तद्भक्तस्य शुकादेश्च दर्शनात्तु स जायते ॥ ६० ॥
तयोरंगप्रकाशस्तु केनाप्यल्पोऽपि नेक्ष्यते । दीपादि वीक्ष्य देहत्वात्तथाऽप्यैवं हि निश्चयः ६१॥
अथाग्निरपि वेदादौ नारायण इतीर्यते । अहं वैश्वानरो भूत्वेत्याद्याह च हरिः स्वयम् ॥ ६२ ॥
तं सेवमानोऽनुदिनमपि कोपि न चेतसि । निश्चिनोति मम श्रेयोऽनेन जातमिति क्वचित् ६३॥
सर्वेषां भगवन्मूर्त्तेस्तदीयानां च सन्नृणाम् । दर्शनाद्यैस्तु हृदये श्रेयोबुद्धिः प्रजायते ॥ ६४ ॥
तत्रोपास्योपासकयोर्वैजात्यं हेतुरीयते । अजातीयप्रसंगो हि सौमनस्याय देहिनाम् ॥ ६५ ॥
सूर्यस्य तेजसा वह्नेः स्पर्शाद्दाहो नृणां भवेत् । अतस्तेषां तयोर्भक्तिः श्रेयोऽर्थं च न जायते ॥
दुर्वासोदत्तमंत्रेण कुंत्याऽऽहूतोऽर्क आगतः । नररूपधरो रेमे तया तेनाऽऽप सा सुखम् ॥
तेजोमयेन रूपेणाऽऽगमिष्यद्यदि भास्करः । तर्हि नाऽऽप्स्यत्सुखं सा तु तापं चाप्स्यद्धि मानवी ॥
संकोचितप्रकाशेन नृरूपेणात आगतः । विकाशितप्रकाशेन रूपेण गगनेऽचरत् ॥ ६९ ॥
एवं नृणां हितायासौ कोटिकोटिरविप्रभाम् । निजां संकोचयित्वैव नृरूपेणाऽत्र वर्त्तते ॥७०॥
धाम्न्यक्षरेऽपि स स्वेन रूपेणातिप्रभावता । विराजते समर्थस्य दुष्करं नास्ति किंचन ॥७१॥
यदि तेनैव रूपेणागमिष्यद्भगवानिह । तर्हि शंकाऽभविष्यद्वै भूतादेस्तत्र निश्चितम् ॥ ७२ ॥
दिव्यभावे भगवति नातिप्रीतिर्भवेन्नृणाम् । नहि प्रीतिर्विजातीये प्रायशो भुवि दृश्यते ॥७३॥
नृणां नृषु भवेत्प्रीतिः पशूनां पशुषु ध्रुवम् । पक्षिणां पक्षिषु मुनेऽन्येषामपि सजातिषु ॥७४॥
पार्थाय दर्शितं विश्वरूपं प्राग्धरिणात्मनः । सुखं तेन स न प्राप किंतु विक्लवतां भृशम् ॥७५॥
यदा पुनर्भगवता नृरूपं दर्शितं तदा । दृष्ट्वेदं मानुषं रूपमित्याद्याह स निर्वृतः ॥ ७६ ॥
अतः संकोचितैश्वर्यो नराकृतिर्विवर्त्तते हरिः । तदा तद्दर्शनस्पर्शौ भक्तिर्नवविधाऽस्ति च ॥ ७७ ॥
नृनाट्यगोपितमपि महैश्वर्यं हरेः क्वचित् । संजाते कार्यवैयग्र्ये प्रादुर्भूतं विलोक्य ते ॥ ७८ ॥
यथा भीष्मवधे शैघ्र्ये मनुष्यत्वास्मृतेर्विभोः । विश्वाधारस्य धरणी भारं वोढुं न चक्षमे ॥७९॥
स्वयमेव हरिः क्वापि कस्मैचित्स्व निजेच्छया । प्रदर्शयति तद्यद्वज्जलेऽक्रूराय यामुने ॥ ८० ॥
अतो नराकृतिर्विष्णुर्नृवत्कुर्वन् क्रिया अपि । सकलैश्वर्यसंपन्नो भवतीत्यवगम्यताम् ॥ ८१ ॥
एवं भगवतो रूपे न ज्ञाते यैस्तु तत्त्वतः । उदेति संशयस्तेषां नृलीलां कुर्वति प्रभौ ॥ ८२ ॥
सम्यग्ज्ञानविहीनो यो निश्चयोऽपक्व एव सः । उत्पाद्य संशयं चित्ते विनश्यत्यचिरेण वै ॥८३॥
बाल्ये हि किंचिदभ्यस्तं गद्यं वा पद्यमर्भकैः । तत्कालं कंठगतमप्यपयात्यचिरेण तत् ॥८४॥
तद्देव दृढमभ्यस्तं यांति स्मृतिपथं सदा । विस्मर्यते न निद्रायामपि यावद्वपुःक्षयम् ॥ ८५ ॥
एवं सत्प्रासया बुद्ध्या दृढाभ्यस्तस्तु निश्चयः । देशकालादिवैषम्येऽप्यपयाति न कर्हिचित् ८६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति वागमृतं हरेरसौ श्रुतिकंसेन निपीय सन्मुनिः ।
परमां मुदमाप चापरे सकलाः साधुजनाश्च तच्छ्रुताः ॥ ८७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रिंशदधिकशततमस्तरंगः ॥ १३० ॥ ४ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । कृष्णाष्टम्यां तपस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र पञ्चालखेटेऽसौ हेमंतनृपवेश्मनः । बर्हिर्वेद्यां महापीठे न्यषीदत्स्वाश्रितैर्वृतः ॥ २ ॥
शोणोष्मकरनीशारः सितधौत्रशिरःपटः । सितप्रावारवसनः प्रसन्नमुखपंकजः ॥ ३ ॥
स्वयंप्रकाशानंदस्तं नत्वा पप्रच्छ सत्तमः । मानः सर्वत्र हातव्यो रक्ष्यो वा क्वापि स प्रभो ॥

श्रीहरिरुवाच

साक्षात्कृष्णाय सद्भ्यो वा द्रुह्यर्ये भुवि मानवाः । तेषां तु पुरतो रक्ष्यो मान इत्युचितं खलु ॥
साक्षाद्धरेस्तु पुरतस्तद्भक्तानां च सर्वथा । हेय एव सदा मानो वर्त्तितव्यं च दासवत् ॥ ६ ॥
इति प्रभोस्तस्य वचो निशम्य सुधासमानं स मुनिस्तुतोष ।
सदोनिषण्णाः सकलाश्च तस्य समाश्रिताः साधुजना गृहस्थाः ॥ ७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकत्रिंशदधिकशततमस्तरंगः ॥ १३१ ॥ ५ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । नवम्यां फाल्गुनस्यांते वचोऽमृतमिदं हरेः ॥ १ ॥
पञ्चालखेटके तत्र दुर्गे हेमंतभूभृतः । वेद्यां न्यषीदत्स शुभे मंचके स्वास्तृते प्रभुः ॥ २ ॥
सितधोत्रः सितोष्णीषः सितप्रावरणांशुकः । उष्मकारुणनीशारं दधद्भक्तगणैर्वृतः ॥ ३ ॥
स्वयमेवाऽब्रवीत्साधून्प्रसन्नास्यः स सर्ववित् । मया विचार्य वहुधा निश्चितं यद्वदामि तम् ॥
अवतारा भगवतो भवंत्येव सहस्रशः । तत्र कृष्णसमो नाऽन्योऽवतारः सर्वशक्तिधृत् ॥ ५ ॥
अन्येषां स्वस्वरूपाणां भावा ये तेऽखिला अपि । अत्र संदर्शितास्तेन कृष्णः स्वयमितीर्यते ॥
स्वजन्मकाले मथुरापुर्यां लक्ष्मीशताऽऽत्मनः । चतुर्भुजेन रूपेण पितृभ्यां तेन दर्शिता ॥ ७ ॥
गोकुले च यशोदायै विश्वरूपत्वमात्मनः । प्रदर्शितं चार्ज्जुनाय वैराजत्वं महामृधे ॥ ८ ॥
अर्ज्जुनायैव दत्तं च भूमरूपस्य दर्शनम् । पुरुषोत्तमता चोक्ता स्वमुखेनैव तं प्रति ॥ ९ ॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १० ॥
राधादिसहितत्वेन गोलोकेश्वरता तथा । यमुनां प्रति गोप्युक्त्या दर्शिताऽऽद्यर्षितात्मनः ॥११॥
अक्रूराय च कालिंद्यां दर्शिता शेषशायिता । नैकांडदर्शनेनैव ब्रह्मणेऽक्षरता तथा ॥ १२ ॥
एवं स्वस्य स्वरूपाणि भिन्नस्थानगतान्यपि । तदैश्वर्याणि च स्वस्मिन् शक्तयश्च प्रदर्शिताः ॥
अतः सर्वावतारेभ्यः कृष्ण एव महानिति । दृढं निश्चित्य तद्भक्तिः कार्या सर्वैर्मदाश्रितैः ॥१४॥
एवं माहात्म्यविज्ञानपूर्विका ह्यचला मतिः । कृष्णे दृढं भवेद्यस्य स एवोक्तोऽकुतोभयः ॥१५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तादृशस्य क्वचित्स्वीयनियमस्य च्युतावपि । सर्वथा कृष्णरक्ष्यत्वादुत्तमैव गतिर्भवेत् ॥ १६ ॥

एवं श्रीहरिणात्मनि प्रकटिता लक्ष्मीधवाद्याकृती-
रैश्वर्याणि च तत्स्थितानि हृदये संस्मृत्य चित्रं गताः ।
ज्ञात्वा चाऽखिलकारणं तमभजंस्ते साधवः सर्वश-
स्तद्वाक्यामृतपानहृष्टमनसश्चान्ये गृहस्था अपि ॥ १७ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ द्वात्रिंशदधिकशततमस्तरंगः ॥ १३२ ॥६ ॥

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । एकादश्यां तपस्यांते वचोऽमृतमिदं हरेः ॥ १ ॥
पंचालखेटके तत्र दुर्गे हेमंतभूभृतः । स न्यषीदन्महावेद्यां मंचवर्ये सितांबरः ॥ २ ॥
स्वभक्तैस्त्यागिगृहिभिः प्राज्ञैः स परितो वृतः । उवाच नित्यानंदादीन् स्वाग्रस्थान्विदुषः स्वयम्
पुराणं श्रीभागवतं व्यासेन रचितं तु यत् । कृष्णस्वरूपे भक्तानां निष्ठादार्ढ्याय तद्ध्रुवम् ४ ॥
तस्य हि प्रथमश्लोके ग्रंथबीजे रमापतेः । अमायिकं रूपमुक्तं बोध्यं भक्तैस्तथैव तत् ॥ ५ ॥
यत्र त्रिसर्गोऽस्ति मृषा धाम्ना स्वेनैव यत्सदा । निरस्तकुहकं चेति भगवद्रूपमुच्यते ॥ ६ ॥
मायिकानां त्रयाणां यो गुणानां सर्ग उद्गतः । भूतेंद्रियांतःकरणदेवतालक्षणः स तु ॥ ७ ॥
नास्त्येव भगवद्रूपे सच्चिदानंदलक्षणे । दिव्येऽनंते चैकरसे शर्करारसमूर्त्तिवत् ॥ ८ ॥
भगवान्स परं ब्रह्म कृष्ण एव न चेतरत् । यतो भागवते प्रोक्तो मुहुर्ब्रह्म स एव हि ॥ ९ ॥
अतो यथाऽक्षरे धाम्नि श्रीकृष्णो दिव्यविग्रहः । अनंतैश्वर्यसंपन्नो वर्त्तते सर्वदाऽच्युतः १० ॥
तथैव त्वाकृतिरपि दिव्यमूर्त्तिः स्वयंप्रभुः । अस्तीति तत्त्वतो ज्ञेयः प्रत्यक्षः पुरुषोत्तमः ११ ॥
जन्माद्यवस्थावत्त्वेन यद्भानं तस्य देहिनाम् । योगमायैव सा तस्य विज्ञेया जनमोहनी ॥ १२ ॥
यदा तु सत्सु विश्वस्य तद्वचांसि दृढं हृदि । धृत्वा निश्छद्म सेवेत मुमुक्षुः कृष्णमत्र यः १३ ॥
तदा स एव तं विद्यादत्रिसर्गतनुं प्रभुम् । निरस्तमायाकुहकं स्वप्रकाशेन सर्वदा ॥ १४ ॥
एवं हि कृष्णपदवी दुर्ज्ञेयापि मुमुक्षुणा । बोध्या निश्छद्मभक्तेन सूत इत्याह सत्रिणः १५ ॥

स वेद धातुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः ।
योऽमायया संततयाऽनुवृत्त्या भजेत तत्पादसरोजगंधम् ॥ १६ ॥

ये त्वनेवंविदो मूढास्ते तु दिव्यतनावपि । दृष्टांतेनात्मनः कृष्णे विदुर्मायिकदेहताम् ॥ १७ ॥
तमयं मन्यते लोको ह्यसंगमपि संगिनम् । आत्मौपम्येन मनुजमिति सूतोऽवदन्मुनीन् १८ ॥
अवजानंति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानंत इति कृष्णोऽवदच्चरम् १९ ॥
अमायिकगुणत्वाद्धि निराकारश्च निर्गुणः । कल्याणगुणयुक्तत्वात्साकारः सगुणो हरिः ॥ २० ॥
इत्येव हार्दं वेदादेर्विदुस्तत्त्वदर्शिनः । तेषां न जायते मोहः कृष्णेऽन्येषां तु जायते ॥ २१ ॥
निराकृतित्वं कृष्णस्य साकृतित्वं च तत्त्वतः । न वेत्ति पंडितंमन्यो वेत्ति चेत्तत्सदूषणम् २२ ॥
साकारं मायिकैस्तत्त्वैर्निराकारं स्वरूपिणम् । स तं वेत्त्यत्र दोषं तु स ऐक्षत श्रुतिर्जगौ ॥२३॥
मायातो जननात्पूर्वं तत्त्वानामीक्षणं हरेः । अत्रोक्तं तदते तेभ्यस्तस्य विग्रह ईरितः ॥ २४ ॥

Gaṅesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देहं विना न नेत्रं स्यात्तद्विनापीक्षणं न च । अतो मायिकतत्त्वेभ्यः प्राक् कृष्णो दिव्यविग्रहः ॥
अरूपिणस्त्वीक्षणं च वक्तुं शक्यं न सर्वथा । दोषोऽत्र उभयत्रापि दृश्यते श्रुतिशासनात् ॥
अतः सुज्ञास्ततो भक्ताद्दिव्यसाकारता हरेः । ज्ञेया चाऽमायिकांगत्वं निश्चेतव्यं मुमुक्षुणा ॥
स हि कार्यवशाद्यर्हि भगवान् पुरुषे स्वयम् । निजेच्छया प्रविशति न भाति पुरुषस्तदा २८ ॥
तिरोभवति पुंतेजः प्रकाशे पौरुषोत्तमे । कृष्ण एव ततो भाति तप्तायोगोलकेऽग्निवत् २९ ॥
एवमेव हि मायायां तत्त्वेषु महदादिषु । वैराजे च विरिंचादौ देवर्षिसनकादिषु ॥ ३० ॥
तत्तत्कार्याद्यनिष्पत्त्यै कृष्णोऽखिलहितावहः । प्रविश्यैव तत्तदात्मा स्वयमेव विराजते ३१ ॥
यत्र यत्र प्रविशति प्रभुस्तत्तन्महोऽखिलम् । तिरोधत्ते हरिर्द्योते सूर्यद्योतेऽन्यभा इव ॥ ३२ ॥
तत्तत्कार्यं विधायाऽसौ तं तं हित्वा प्रभुस्ततः । पृथगास्ते स्वधाम्न्येव स्वप्रकाशो निजेच्छया ॥
स्वस्वस्वरूपेण तदा पुरुषादिश्च वर्त्तते । तत्रैश्वर्यं भागवतं दृश्यमानं वियाति हि ॥ ३४ ॥
एवंप्रतापो भगवानानंदघनविग्रहः । आस्ते नराकृतिः साक्षात्स्वेच्छयैश्वर्यमैक्षयन् ॥ ३५ ॥
चिदानंदे भगवति त्याज्यभागो न विद्यते । यथा दृष्टः स सेव्योऽतस्तत्परोऽन्यो न हीश्वरः ॥
देहावस्थादिकं यत्तु दृश्यते तत्र निर्गुणे । नटमायेव तज्ज्ञेयमज्ञानिजनमोहनम् ॥ ३७ ॥
कश्चिद्याति यथा स्वर्गमैंद्रजालिकविन्नटः । पत्नीं राज्ञेऽर्पयित्वा स्वां युद्ध्यते तत्र चाऽसुरैः ॥
विच्छिन्नसर्वावयवः पुनः पतति स क्षितौ । ततस्तत्स्त्री रुदंत्यग्नौ तदंगैः सह दह्यते ॥ ३९ ॥
पूर्ववद् बद्धशस्त्रोऽथ नट एत्य निजां स्त्रियम् । नृपं याचति साक्रोशं जनयन् जनविस्मयम् ॥
नटविद्यामजानंतस्त्वत्र तेन प्रदर्शिते । स्वर्गमागमने त्वस्य मुह्यंति कृतदर्शिनः ॥ ४१ ॥
न मुह्यंति नटोपास्त्या तद्विदस्त्विह पूरुषाः । तथैव कृष्णाचरितेऽप्यज्ञास्तज्ज्ञाश्च देहिनः ४२ ॥
एवं यो वेत्ति सत्संगं विधाय पुरुषः सुधीः । न तस्य क्वापि मोहः स्यादचिंत्यविभवे हरौ ॥
भक्तैरेकांतिकैरेव वार्त्तैषाऽप्यवगम्यते । साकारोऽस्ति सदा कृष्णोऽक्षर इत्याप्तनिश्चयैः ॥४४ ॥
सकलैश्वर्यपुष्टत्वात्स्वतंत्रत्वाच्च सत्पतेः । अरूपानंतरूपत्वे नैव मुह्यंति पंडिताः ॥ ४५ ॥
स प्रभुः कृपया सर्वदेहिनां श्रेयसे नृषु । स्वशक्तिपार्षदैश्वर्यैः सहाविर्भवतीह वै ॥ ४६ ॥
अतः साक्षाद्धरे रूपं रूपं यच्चाऽक्षरस्थितम् । तयोर्येन विदुर्भेदं ज्ञानिभक्तास्त उत्तमाः ४७ ॥
देशकालादिवैषम्यात्क्वचिदुत्पथवर्त्तने । जातेऽप्येषां न पातः स्याच्छ्रेय इव भवेत्परम् ४८ ॥
यस्त्वत्र किंचित्संदिग्धो भवेत्तस्य तु सर्वथा । नैष्ठिकस्यापि भक्तस्य श्रेयो नात्यंतिकं भवेत् ॥
साक्षात्कृष्णं विदुर्येऽत्र सर्वकारणकारणम् । नराकृति परं ब्रह्म ते ज्ञेया ब्रह्मवित्तमाः ॥ ५० ॥
एवं भगवता तेन भक्तान् शिक्षयता निजान् । विधातव्यां स्थितिं स्वस्मिन् कृता वार्त्ता स्वसंसदि ॥
श्रुत्वा तां तेऽखिला भक्तास्त्यागिनो गृहिणोऽपि च । तस्मिन्नेव दृढतरां निष्ठां विदधुरादरात् ॥

परमं वचनामृतमस्य हरेरिति कर्णपुटेन पिबेदिह यः ।
सदृढां हि लभेत हरौ परमां नरमूर्त्तिधरे स्थितिमात्मपतौ ॥ ५३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रयस्त्रिंशदधिकशततमस्तरंगः ॥ १३३ ॥ ७ ॥

Ganesh Varni Digambar Jain Institute,.Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणाय नमो नमः
दुर्गपुरे मध्यमप्रकरणम्

शकाब्दे विक्रमार्कस्य नगाश्ववसुभूमिते । पौर्णमास्यां ज्येष्ठशुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स भूपतेः । प्रत्यगास्यापवरकवेद्यां पीठ उपाविशत् ॥ २ ॥
सितांबरः श्वेतपुष्पस्रजं कंठे दधन्निजैः । वृतस्त्यागिगृहस्थौघैः परितः स्वाननेक्षकैः ॥ ३ ॥
गायनं कुर्वतः साधून्सवाद्यं करसंज्ञया । निवार्य प्रैरयत्प्रश्नोत्तरं स कुरुतेति तान् ॥ ४ ॥
मुक्तानंदोऽथ तं नत्वा पप्रच्छ प्रांजलिः प्रभो । मोहस्य रूपं कीदृक्तन्निवृत्तिः केन वा भवेत् ॥
क्षणं विचार्याऽथ हरिस्तमुवाच नृणां हृदि । वैचित्र्यं जायते यत्तन्मोह इत्युच्यते बुधैः ॥ ६ ॥
या ग्राम्यविषयासक्त्या विभ्रांतिर्जायतेंऽतरे । सैव मोहो येन पुमानंधेनैवोपमीयते ॥ ७ ॥
मयाऽस्याऽद्यैव मोहस्य रूपं हृदि विचारितम् । स्वकीयानुभवस्यैव प्रामाण्येन च निश्चितम् ॥
आसीदपररात्रे मे ध्यायतोऽद्य रमापतिम् । समाधिस्तत्र नाक्षत्रं चक्रमादौ व्यलोकयम् ॥ ९ ॥
याम्योत्तरौ ततो दृष्टावचलस्थानकौ ध्रुवौ । याम्योत्तरौ तच्चक्राक्षौ भवतो द्वौ तदाश्रितौ १०॥
मध्यभागेऽस्य चक्रस्य घटीयंत्रनिभस्य च । नक्षत्रमालिका दृष्टा सर्वतोऽपि तदाश्रिता ॥ ११ ॥
तिर्यगूर्ध्वमधस्तस्याः सकलास्तारकागणाः । दृष्टास्तच्चक्रभूपार्थौ यथा सद्रुक्मपुष्पिकाः ॥१२॥
उदयास्तमयस्थानमथैकं सूर्यचंद्रयोः । ब्रह्मांडस्थमिदं सर्वं स्वदेहेऽपीक्षितं ततः ॥ १३ ॥
क्षेत्रज्ञ आत्मा च ततस्तत्स्थोपि पुरुषोत्तमः । दृष्टः सर्वा वृत्तयो मे तस्मिन्नेवाऽलगंस्तदा ॥१४॥
अतीव सक्तास्ता यर्हि वहिर्नेयुः कथंचन । कश्चिद्भक्तस्तदाऽस्तौषीद् भृशं मामतिभावतः ॥१५॥
ततस्तु कृपया तस्मिंस्ताः परावृत्तिमाययुः । व्युत्थितोऽहं ततश्चित्ते तदैवेत्थं व्यचारयम् १६॥
समाधिप्राप्तभगवत्सुखान्मम तु वृत्तयः । कृपयैव परावृत्ता भक्तेषु न तु ताः स्वतः ॥ १७ ॥
समाधिनिष्ठस्याऽन्यस्य हित्वा भागवतं सुखम् । वृत्तयः पुनरायांति बहिः किं तत्र कारणम् ॥
विचारेण ततस्तच्च मया स्वहृदि निश्चितम् । विषयासक्तिरेवात्र हेतुरस्ति न हीतरः ॥१९ ॥
रम्याश्च मध्यमा हीना इति त्रेधा प्रकीर्त्तिताः । पंचापि विषयास्तत्र स्यादाद्येषु रुचिभृशम् ॥
प्राप्तौ तु जायमानायां श्रेष्ठार्थानां यदि क्वचित् । कश्चित्कुर्यादन्तरायं तदा तस्मिन्भवेद्धि रुट् ॥
ततो मोहो भवेत् पुंसश्चित्तविभ्रांतिलक्षणः । न हीनमध्यमार्थानां विघ्ने त्वेवं भवेद् भ्रमः ॥
सामान्यतस्तु संबंधः स्वस्वार्थैः सह वर्त्तते । सर्वेषामिंद्रियाणां हि तावता तु न विभ्रमः २३॥
गुणबुद्ध्या विशेषेण तज्जिघृक्षा यदा भवेत् । तेष्वासक्तिस्तदा तु स्यात्सैव मोहफला नृणाम् ॥
सामान्यतो विषयगा इंद्रियाणां तु वृत्तयः । तत आकृष्य शक्यंते सुज्ञैर्योजयितुं हरौ ॥२५॥
विशेषेण तु याः सक्ता रम्यभोगधियाऽत्र ताः । प्रत्याक्रष्टुं न शक्यंते विना साधनसंपदम् ॥
सद्गुरुर्भगवान्वापि तदासक्तिं यदा क्वचित् । पुंसो निषेधेत्तर्ह्येष तस्मै तस्मै च कुप्यति २७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ततोऽसौ मोहमासाद्य भ्रष्टो भवति सत्पथात् । अमुमेव हि सिद्धांतं कृष्णः प्राहार्जुनं प्रति ॥
ध्यायतो विषयान् पुंसः संगस्तेषूपजायते । संगात्संजायते कामः कामात् क्रोधोऽभिजायते ॥
क्रोधाद्भवति संमोहः संमोहात् स्मृतिविभ्रमः । स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥
अतो मोहं जिहासुर्यः पुमान्स्यात्तेन सर्वथा । तद्धेतुं विषयासक्तिं हातुं कर्त्तव्य उद्यमः ॥३१॥
कृष्णस्वरूपमाहात्म्यवेदनं सद्गुरोर्मुखात् । जगतामुदयस्थानप्रलयानां तु वेदनम् ॥ ३२ ॥
दार्ढ्यं तथात्मनिष्ठाया इत्येतत् साधनत्रयम् । उद्युक्तेनेह संसाध्यं विषयासक्तिहानिकृत् ॥३३॥
माहात्म्यवेदनाद्यस्य प्रीतिः स्यात्परमेश्वरे । किं तस्य प्राकृतैस्तुच्छैर्नश्वरैश्च सुखैर्भवेत् ॥ ३४ ॥
पारमेष्ट्यादिसौख्यानि कृष्णसौख्यकलामपि । नार्हंतीत्यत्र यो विद्यात्सज्जेत्तुच्छेष्वसौ कथम् ॥
लौकिकेषु पदार्थेषु रमणीयतरेष्वपि । एकैकमेवाऽस्ति सुखं शब्दस्पर्शादि केवलम् ॥ ३६ ॥
न ह्येकत्राऽखिलमपि दृश्यते कुत्रचित्सुखम् । कृष्णे तु सकलं सौख्यं संपूर्णं विद्यतेऽक्षयम् ॥
इति ज्ञात्वा कार्ष्ण एव दर्शनादिसुखे रतः । यो भवेत्तस्य तुच्छत्वे सर्वेऽर्थाः स्युः समा इह ॥
रमणीयेष्वरम्येषु न विशेषोऽस्य कश्चन । सुरूपस्त्रीकुरूपस्त्रीरुक्मलोष्टादयः समाः ॥ ३९ ॥
एवंविधो भवेद्यस्तु मोहस्तस्यैव देहिनः । विनष्ट इति विज्ञेयं सोऽनन्यो भक्त ईरितः ॥ ४० ॥
आत्मवद्भगवत्प्रेष्ठो ज्ञानी चोक्तः स एव हि । पतिव्रतासमा भक्तिरनेनैव च लभ्यते ॥ ४१ ॥
न हीदृशी स्थितिः प्राप्या त्वरमाणेन सत्वरम् । अनाकुलेन धीरेण प्राप्यते सा शनैः शनैः ॥
तावत्तु साधनदशा यावद्देषा दृढांतरे । न स्यादथैतद्दार्ढ्यं तु ज्ञेया सिद्धदशाऽस्य तुः ॥ ४३ ॥
एषैव साधनीयाऽत इति सच्छास्त्रनिश्चयः । वार्त्तैषा हृदये धार्या दृढं सर्वैर्मदाश्रितैः ॥ ४४ व

सुधोपमं वाक्यमितीश्वरस्य निशम्य साधुः स तथाऽपरेऽपि ।
संतो गृहस्था अपि तत्सदःस्थाः संप्राप्य मोदं हृदये दधुस्तत् ॥ ४५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ चतुस्त्रिंशदधिकशततमस्तरंगः ॥ १३४ ॥ १ ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । नभःशुक्लतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स भूभुजः । वासुदेवालयस्याग्रे न्यषीदच्चक्रकोत्तमे ॥ २ ॥
सद्भिर्गृहस्थैः परितो वृतश्च धवलांशुकः । सतो विलोकयन्स्वाग्रे निषण्णान्स्वयमाह सः ॥३॥
य आंत्यतिककल्याणं प्राप्तुमिच्छेत् पुमानिह । नारदादिसमत्वं च जयेत्सर्वेन्द्रियाणि सः ॥४॥
देहे जीवं वलितानि बाह्यांतःकरणान्यथ । बहिःस्थपंचविषयान् वलितानि च तानि वै ॥५॥
तान्येव हि निजं रूपं जीवोऽज्ञानेन मन्यते । वस्तुतः स न तद्रूपः सोऽस्ति यत्तत्प्रकाशकः ६॥
स्फुरंति विषया अंतःकरणेषु च तान्यपि । अन्योन्याध्यासतो देहे स्फुरंतीक्ष्यंत एष्वपि ॥७॥
विषयेषु प्रवर्त्तंत इंद्रियाणि पुराद्भुतम् । ततस्तान्यनुगच्छंति करणान्यांतराणि तु ॥ ८ ॥
तानि जीवोऽनुयात्येवं प्रवृत्तिर्वर्त्तते स्फुटम् । गृहीता इंद्रियैरर्था विशंति मनआदिषु ॥ ९ ॥
ततो विशंति जीवे ते तद्योगात्संसरत्यसौ । इंद्रियाण्येव हि ततो जीवसंसृतिहेतवः ॥ १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतस्तानि प्रयत्नेन जेतव्यानि मुमुक्षुणा । तज्जयस्तु स्वतो न स्यात्स्याद्युक्तस्य साधनैः ॥११॥
विनौषधं यथा रोगो गुल्मस्फोटादिरुद्भवः । न शाम्येदिंद्रियगणस्तथा साधनमंतरा ॥ १२ ॥
तत्रापि वाह्यरोगस्य स्फोटादेस्तु निवर्त्तनम् । वाह्येनैवोपचारेण लेपकल्कादिना भवेत् ॥१३॥
आंतरस्य तु गुल्मादे रोगस्य स्यान्निवर्त्तनम् । आंतरणौषधिरसप्राशनेनैव नान्यथा ॥ १४ ॥
एवं य इंद्रियद्वारा स्यादंतःकरणे नृणाम् । विषयाणां प्रवेशः स निवर्त्तेतेंद्रियौषधात् ॥१५॥
यदंतःकरणे तु स्यादर्थानां स्फुरणं दृढम् । तदांतरौषधादेव निवृत्तिं यान्ति नान्यथा ॥१६ ॥
त्यागिनामपि पुंसां तत्कथमस्तीति चेद् ब्रुवे । पूर्वं त इंद्रियद्वारा प्रविष्टाः संस्ततोऽस्ति तत् ॥
अदृष्टाश्चाश्रुता भावाः स्फुरेयुः स्वांतरे यदि । तर्हिं तेऽपींद्रियैर्ज्ञेयाः प्राग्भवेऽतः प्रवेशिताः ॥
अत आदाविंद्रियाणामेव कर्त्तव्यमौषधम् । प्रवेशद्वारभूतानां विषयाणां प्रयत्नतः ॥ १९ ॥
ग्राम्येभ्यो विषयेभ्यो यत्प्रत्याहरणमंजसा । ज्ञेयमौषधमेतेषां श्रेयःसुखमभीप्सुभिः ॥ २० ॥
चक्षुषाऽनीक्षणं बुद्ध्या स्त्र्यादेश्चास्पर्शनं त्वचा । श्रोत्रेंद्रियेणाऽश्रवणं तद्वार्त्तानां च सर्वथा २१॥
तदीयगंधाग्रहणं घ्राणेनाऽथ कदाचन । कृष्णानिवेदितान्नस्य पलादेर्जिह्वयाऽग्रहः ॥ २२ ॥
ज्ञानेंद्रियाणामित्युक्तमौषधं मुनिसंमतम् । आकृतीनां तु तच्छास्त्रनिषिद्धकृतिवर्जनम् ॥ २३ ॥
एवं कृते स्विंद्रियाणां विषयासक्तिरुद्भुतम् । शाम्यत्यथांतःकरणरुक्शांतेरौषधं ब्रुवे ॥ २४ ॥
देहो जडो विकारी च कर्मतंत्रश्च नश्वरः । आत्मा तु नित्यश्चिद्रूपो निर्विकारः प्रकाशकः ॥
वैलक्षण्यमतीवेत्थं निश्चित्य वपुरात्मनोः । न वै देहोऽहमात्माऽस्मि भिन्न एव ततः खलु ॥
न मेंऽतःकरणे नाऽस्ति संबंधो नेंद्रियैरपि । सच्चिद्रूपोऽस्मि तद्भिन्नः स्वसुखेन सुखी सदा ॥
विदित्वैवं स्वमात्मानं चिद्रूपे तत्र धारणम् । साक्षात्कृष्णस्य मूर्त्तेर्यत्तद्धयंतःकरणौषधम् ॥
करणद्वयतो रोगे विषयासक्तिलक्षणे । निवृत्ते तु विशुद्धं तत् कृष्ण एव रतं भवेत् ॥ २९ ॥
ततोऽल्पेनैव कालेन मुमुक्षोरभिवांछितम् । सिद्ध्यत्यात्यंतिकं श्रेयः स च स्यान्नारदादिवत् ॥

इत्थं हरेस्ते मुनयो वचःसुधामास्वाद्य हर्षं भृशमापुरंतरे ।
सर्वे सदःस्था गृहिणश्च तं ततः प्रणेमुरत्यादरतो हितोद्यतम् ॥ ३१ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ पञ्चत्रिंशदधिकशततमस्तरंगः ॥ १३५ ॥ २ ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । चतुर्थ्यां नभसः शुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीक्षितः । वासुदेवालयस्याग्रे चक्रके स उपाविशत् ॥ २ ॥
साधुभिर्गृहिभिश्चापि निजभक्तैः परिश्रितः । सितांवरधरः साधून् पुरःस्थान् वदति स्म सः ॥
भजतां राधिकाकांतं पुंसां द्वे वर्त्मनी इह । विद्येते ये व्रजेयुस्ते ताभ्यां सत्पदवीमियुः ॥ ४ ॥
ताभ्यामेव व्रजंतोऽत्र बुद्धिमंतोऽपि केचन । दृश्यंते संसृतिं यांतःकुर्वंतो गुरुतामपि ॥ ५ ॥
शृङ्गाररसयुग्भक्तिरात्मज्ञानं च ते उभे । वर्त्मनी स्तो यथा ताभ्यां संसृतिः स्यात्तथा ब्रुवे ॥
यदा रसयुजा भक्त्या भजेत्कृष्णं पुमांस्तदा । राधालक्ष्मीतत्सखीभिर्जुष्टो ध्येयः प्रभुर्भवेत् ॥
संयोगो विप्रलंभश्चेत्येवं वर्ण्यः शुचिस्तदा । स्युर्विभावाश्चानुभावा वर्ण्याः संचारिणस्तथा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीराधातत्सखीनां च रूपाण्यपि पृथक् पृथक् । अपश्यं तत्र वर्ण्यानि तदंगानि पृथक् पृथक् ॥
पृथक् पृथग्यदांऽगानि योषितां वर्णयेत्पुमान् । ध्यायेद्वा तर्हि स कथं निर्विकारमना भवेत् ॥
एष एवेंद्रियाणां तु स्वभावः खल्वकृत्रिमः । अर्थेषु रमणीयेषु यदतिस्निग्धता द्रुतम् ॥ ११ ॥
राधादीनां तु देवीनां वाङ्माधुर्यं सुगंधिता । यादृशं चास्ति सौंदर्यं तादृग्नास्त्येव कुत्रचित् ॥
श्रवणघ्राणचक्षुर्भिरनुभूयैतदंजसा । वर्णयित्वाऽथ वा वाचा को नामाऽविक्रियो भवेत् ॥१३॥
एतासु यस्य किंचिच्चेद्विक्रियेत मनोऽस्थिरम् । तदा स भ्रष्टः स्यादेव पुमान्निःश्रेयसाध्वनः ॥
एवं रसिकभावेन भजतां राधिकेश्वरम् । प्रोक्तं महद्विघ्नमथो आत्मज्ञानेन तद्ब्रुवे ॥ १५ ॥
आत्मज्ञानवतां त्वत्र कृष्णोऽस्मीति विपर्ययात् । बुद्धेर्यथेष्टाचरणे प्रवृत्तिर्जायते नृणाम् ॥१६ ॥
एवं हि ते विदंत्यज्ञा आत्मा ब्रह्म तदादितः । मायापुरुषरूपेण सर्गारंभे प्रजायते ॥ १७ ॥
ततस्तत्कार्यनिखिलाकृतिरूपेण जायते । तदेव तत्तद्देहस्थजीवरूपेण च स्वयम् ॥ १८ ॥
एवं हि जानतां तेषां स्वोपास्यस्याखिलात्मनः । परस्य ब्रह्मणः साक्षात्कृष्णस्याऽनवबोधतः १९॥
उपासनाखंडनं स्यादिति विघ्नं महन्मतम् । एवमात्मविदः संति भ्रष्टा निःश्रेयसाध्वनः ॥२०॥
सदध्वभ्रष्टा उभयेऽप्येते यांति हि संसृतिम् । यथा न यायुस्तामेते तथा वच्म्यधुना तु वः २१॥
विलोक्य मातरं स्वस्य स्वसारं वापि कन्यकाम् । सुरूपामपि नोदेति विक्रिया मनसि क्वचित् ॥
इयं मातेत्यादिबुद्धेर्दार्ढ्यात्तत्राऽन्यथा मतिः । यथा न जायते पुंसः कामुकस्यापि कर्हिचित् ॥
तथैव भगवद्भक्तसुंदरीष्वपि सर्वदा । जगन्मात्रादिबुद्ध्यैव नोदियाद्विक्रिया क्वचित् ॥ २४ ॥
एवं निर्दोषधीदार्ढ्यवतां पुंसां तु सर्वदा । शृंगाररसयुग्भक्त्या भवेन्निःश्रेयसं परम् ॥ २५ ॥
अन्येषां तु महान् दोषस्तया भवति निश्चितम् । निवृत्तिस्तस्य नास्त्येव प्रायश्चित्तशतैरपि ॥२६॥
अन्यस्त्रीवीक्षणादिभ्यो जातो दोषः प्रशाम्यति । अनन्यभगवद्भक्तस्त्रीणां संदर्शनादिभिः ॥२७॥
तद्वीक्षादिजदोषस्तु वज्रलेपायते ध्रुवम् । वदत्यर्थं यतः स्कांदस्मृतिरप्यमुमेव हि ॥ २८ ॥
अन्यक्षेत्रे कृतं पापं तीर्थक्षेत्रे विनश्यति । तीर्थक्षेत्रे कृतं पापं वज्रलेपो भवत्यलम् ॥ २९ ॥
अथात्मज्ञानिनां श्रेयोवर्त्मस्थितिरुदीर्यते । ययैते पदवीं यायुर्निर्विघ्नं महतां सताम् ॥ ३० ॥
निर्विकारं निरंशं च ब्रह्मास्ति श्रुतिवर्णितम् । कथं तत्सर्वरूपं स्यात्सविकारपदार्थवत् ॥ ३१ ॥
यत्त्वस्य सर्वरूपत्वं कथितं निगमेऽस्ति तत् । न वि॰ारितया किंतु हेतोः कार्यात्मकत्वतः ३२॥
सर्वकारणता सर्वाधारता ब्रह्मणोऽस्ति हि । पृथग्नाधेयमाधारात्तिष्ठेत्कार्यं च कारणात् ॥३३॥
एवं हि सर्वरूपत्वं तस्य निश्चित्य शास्त्रतः । सेव्यः कृष्णः परस्तस्मात्तदैक्यप्रापितात्मना ॥३४॥
अक्षरस्यापि कृष्णस्तु कारणं चाश्रयो मतः । प्रेरकश्चाऽत एवाऽसौ सर्वसेव्य उदीरितः ॥३५॥
एवं ज्ञात्वा तु ये कृष्णं ब्रह्मीभूतात्मना सदा । प्रीत्या भजंति ते तूक्ताः प्राप्ता एव महद्गतिम् ॥
निर्विघ्नमेते यांत्येव धाम मुख्यं रमापतेः । ज्ञेयो वर्त्मद्वयस्येत्थं गतिभेदो मुमुक्षुभिः ॥३७॥

पीयूषवत्स्वादुतरं वचस्ते धर्मात्मजस्येति निपीय सर्वे ।
संतोऽतितोषं हृदि लेभिरेऽथो सदोनिषण्णा गृहिणश्च भक्ताः ॥ ३८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ षट्त्रिंशदधिकशततमस्तरंगः ॥ १३६ ॥ ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । नभसः शुक्लपंचम्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्याऽस्य वेश्मनः । वितर्दौ प्रत्यगास्यस्य न्यषीदत्स्वासने स तु ॥ २ ॥
सितांवरः परिवृतो नानादेशागतैर्निजैः । त्यागिभिर्गृहिभिर्भक्तैः स्वाननार्पितदृष्टिभिः ॥ ३ ॥
मल्लाररागेण यशो गीयमानं स साधुभिः । श्रुत्वा कृष्णस्य संहृष्टः सतोऽपृच्छत्पुरः स्थितान् ॥
धर्मनिष्ठस्य भक्तस्याप्यापत्कालः क्व चापतेत् । यत्र धर्मे रक्ष्यमाणे भक्तिर्गच्छेद्रमापतेः ॥ ५ ॥
भक्तौ वा रक्ष्यमाणायां गच्छेद्धर्मः सुरक्षितः । तदा रक्षा कस्य कार्या त्यागो वा कस्य साधवः ॥
इति पृष्टे भगवता ब्रह्मानंदस्तमब्रवीत् । भवान्येन प्रसन्नः स्यात्तद्धि कार्यं मुमुक्षुणा ॥ ७ ॥
भवेत्प्रसन्नो हि भवान् यदि धर्मस्य रक्षया । धर्म एव तदा रक्ष्यो यदि भक्त्या तदा तु सा ८॥
तमुवाच हरिर्यर्हि प्रत्यक्षो भगवान्भवेत् । तदा तु संभवेदेवं किं कार्यमतथा यदि ॥ ९ ॥
एतत्प्रश्नोत्तरं वक्तुं नाशक्नोत्स यदा तदा । हरिराह तदा कार्यमेकं कृष्णस्य चिंतनम् ॥१०॥
सर्वथा येन तु कृतमखंडं कृष्णचिंतनम् । धर्मः सुरक्षितस्तेन भक्तिश्चात्र न संशयः ॥ ११ ॥
इत्युक्त्वा पुनरप्राक्षीन्माहात्म्यातिशयं हरेः । जानीयाद्यस्तु पतितपावनत्वादिलक्षणम् ॥ १२ ॥
सकृदुच्चारितेनापि नाम्नैकेनैव मापतेः । सद्य एव विनश्यंति पातकानि महांत्यपि ॥ १३ ॥
एवंविदस्तस्य पुंसः कथं धर्मे दृढस्थितिः । स्यात्तद् ब्रूतेति ते पृष्टाः सम्यङ् नोचुस्तदुत्तरम् १४॥
तदा तदाह स विभुः कृष्णमाहात्म्यवेदिना । विचार इत्थं कर्त्तव्यस्तेन स्वहृदये दृढः ॥१५॥
मया त्वेकांतिकेनैव भाव्यमस्ति हरेरतः । अखंडं चिंतनं तस्य कर्त्तव्यं तस्य साधनम् ॥१६॥
धर्म एव च कृष्णस्य सर्वदाऽस्त्यतिवल्लभः । यतस्तदर्थमेवासौ जायतेऽत्र युगे युगे ॥ १७ ॥
तद्द्रुहश्च निहंत्येव स ह्यधर्मरिपुः प्रभुः । अतो धर्मे मया स्थेयं भेतव्यं चाऽघकर्मणः ॥१८॥
कामक्रोधादिषु च मे यदि वृत्तिर्गमिष्यति । विक्षेपो भविता तर्हि तावान्वै कृष्णचिंतने ॥
अतः कृष्णं विनाऽन्यत्र यथा वृत्तिः क्वचिन्मम । नैव यायात्तथा नित्यं मया वृत्यं तदात्मना ॥
एवं विचार्य यः कृष्णं भजेतानन्यमानसः । स तु धर्मात् पतेन्नैव प्राप्नुयाच्चोत्तमां गतिम् ॥
ब्रह्मानंदोऽथ तं नत्वा साधुः पप्रच्छ सत्पते । कुर्म इत्थं विचारं हि त्वत्प्रसादाद्वयं हृदि ॥
तथाप्यखंडं ते कृष्ण जायते नैव चिंतनम् ! तत्र किं कारणं तन्मे सर्वज्ञो वक्तुमर्हसि ॥२३॥

श्रीहरिरुवाच

तच्छ्रद्धान्यूनतैवात्र हेतुरित्यवगम्यताम् । श्रद्धाल्पत्वे कृष्णमाहात्म्यवेदनाल्प्यमपीयताम् ॥२४॥
सति तस्मिंश्च भगवन्निश्चयाल्प्यमपीयताम् । अतः कृष्णस्य माहात्म्यं वेद्यमादौ मुमुक्षुभिः २५॥
तदित्थमवगंतव्यं भगवान्पुरुषोत्तमः । सर्वदैवाऽतिशुद्धोऽस्ति स्वतंत्रोऽविक्रियस्तथा ॥२६॥
मायापुरुषतत्कार्यसंबंधात्प्राग्यथा शुचिः । तथैव सोऽस्ति तत्स्थोऽपि निर्लेपो गगनं यथा ॥
ताम्रादयो भूनिहिता धातवो यांति विक्रियाम् । यथा तथा न हि स्वर्णं शुद्धत्वाद्याति विक्रियाम्
एवं मायिकसंबंधाज्जीवेशा यांति विक्रियाम् । यथा तथा न भगवानतिशुद्धो नराकृतिः ॥२९॥
एवं कृष्णस्य माहात्म्यं यस्तु विद्यादलौकिकम् । लौकिका विषयास्तस्य तुच्छतां यांति सर्वशः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रम्याः स्वर्ग्या अपि च ते तस्य स्युर्हि मलोपमाः । कृष्णस्य स्यात्ततोऽखंडं चिंतनं तस्य निश्चितम्
माहात्म्यवेदिनामेव कीर्त्तिर्भुव्यस्ति भूयसी । भक्तानामुद्धवादीनां श्रीकृष्णानन्यचेतसाम् ३२॥
माहात्म्यज्ञानहीनस्तु पदार्थेऽल्पेऽपि मुह्यति । अतस्तत्सर्वथा ज्ञेयं भवबंधमुमुक्षुभिः ॥ ३३ ॥
माहात्म्यबोद्धैव हरेरखंडं शक्तो विधातुं हृदि चिंतनं स्यात् ।
इति प्रभोस्तस्य सुधाभवाचं निपीय सोऽन्ये जहृषुश्च संतः ॥ ३४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्तत्रिंशदधिकशततमस्तरंगः ॥ १३७ ॥ ॥ ४ ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । नभसः शुक्लसप्तम्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्षितिपस्य सः । वासुदेवांगणे वेद्यां चक्रके समुपाविशत् ॥ २ ॥
सितवासा वृतो भक्तैस्त्यागिभिर्गृहिभिश्च सः । गायतो हरिपद्यानि विरमय्याऽब्रवीत्ततः ॥३॥
योऽत्र स्याद्भगवद्भक्तः संपाद्यं तेन तु द्वयम् । एकः पतिव्रताधर्मः शौरवीर्यं तथेतरत् ॥ ४ ॥
यथा पतिव्रता प्रीत्या भर्त्तारं सेवते सदा । अंधं वा रोगिणं वृद्धं कुरूपं वापि निर्द्धनम् ॥५॥
सा तं विनाऽन्यं पुरुषं सुरूपं तरुणं च वा । हृदापि नेच्छति क्वापि गुणिनं वापि कामुकम् ॥
दरिद्राऽपि न राजानं स्पृहयंतमपीक्षते । तथा कृष्णेतरद्भक्तस्तु भक्तो न मनसेच्छति ॥ ७ ॥
पतिव्रताधर्म एवं भक्तस्येत्यवधार्यताम् । पालयन्नमुमेवेह भक्त एकांतिको भवेत् ॥ ८ ॥
तथैव शूरवीरत्वं कृष्णनिंदासहिष्णुता । न हि शूरो राजनिंदां सहेत क्वापि तच्छ्रितः ॥ ९ ॥
साधूनां समदृक्त्वादि सर्वत्रात्मेश्वरेक्षया । पक्षपातस्तु भक्तेषु कार्य एव न पापिषु ॥ १० ॥
ध्रुवप्रह्लादसनकनारदाद्या अपि ध्रुवम् । पक्षपातं हरौ चक्रुस्तदीयेषु च नाऽघिषु ॥ ११ ॥
पक्षपातात्तु भगवद्विमुखेषु भवेद् ध्रुवम् । इह वाऽन्यत्र जनुषि तत्साम्यं नात्र संशयः ॥१२॥
एषा वार्त्ता सादरं धारणीया सर्वैर्भक्तैर्मच्छ्रितैर्मन्निदेशात् ।
इत्थं वाचं तस्य ते संनिशम्य प्रापुस्तोषं साधवश्चामृताभाम् ॥ १३ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधावष्टत्रिंशदधिकशततमस्तरंगः ॥ १३८ ॥ ॥ ५ ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । शुक्लाष्टम्यां नभोमासे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्षितिपस्य सः । वासुदेवांगणे वेद्यां न्यषीदत्स्वासने प्रभुः ॥ २ ॥
सितांबरधरो भक्तैः सोऽनेकैः परितो वृतः । सद्गीतकृष्णपद्यानि श्रुत्वा हृष्टोऽब्रवीत्ततः ॥३॥
अत्रैके यवनैस्तुल्या वदंत्येवं हि पूरुषाः । गंगोदकं चान्यजलं दृश्यते तुल्यमेव हि ॥ ४ ॥
शालग्रामशिला चान्यशिलातुल्ये उभे अपि । तुलसी चान्यवृक्षाश्च विप्राः शूद्राश्च सन्निभाः ॥
अन्नं कृष्णप्रसाद्यन्यदन्नं चापीक्ष्यते समम् । एकादश्यां चान्यदिनेऽप्युपवासः समस्तथा ॥ ६ ॥
स्वकीया परकीया च स्त्रीसमैवेह दृश्यते । रामकृष्णादयश्चान्ये दृश्यंते हि नराः समाः ॥ ७ ॥
एवं सत्यपि तद्भेदो यो लोके दृश्यते स तु । अदीर्घदृष्टिभिः पुंभिर्मृषाक्लृप्तोऽस्ति वा इति ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतो यवीयसः साधूनिह पृच्छामि सर्वशः। एतौ विधिनिषेधौ किं कल्पितौ वा ऋतौ मतौ ॥
कनीयांसोऽथ संतस्तु तमूचुस्तौ ऋतौ प्रभो। अन्यथा स्वर्गनरकौ भवेतां हि निराश्रयौ १० ॥
इत्याकर्ण्य स तद्वाक्यं कनीयांसोऽपि साधवः। यूयं सुष्ठु विजानीथेत्युक्त्वोवाच तदुत्तरम् ॥
महर्षिभिर्यच्छास्त्रेषु प्रोक्तमस्ति ऋतं हि तत्। सद्योऽदृष्टे तत्फलेऽपि दृश्यतेंऽते तु तत्खलु ॥
यथातिमहताढ्येन वणिजा हुंडिकाऽऽत्मने। दत्ता लिखित्वा च भवेन्मुद्रिताढ्योपरि क्वचित् ॥
साक्षाद्धस्तस्थितायां तु तस्यामेकापि मुद्रिका। न दृश्यते तथाप्यस्यां संत्येव बहुमुद्रिकाः १४ ॥
यतो देशांतरेऽप्येतां दृष्ट्वाऽऽढ्यस्ता ददाति हिं। कर्त्तव्य एव विश्वासस्ततोऽस्यां सर्वथात्मना ॥
महर्षिभिस्तथैवात्र स्मृतिरूपा हि हुण्डिका। लिखिताऽस्तीति तत्प्रोक्तं फलं विधिनिषेधयोः ॥
सकलं सत्यमेवास्ति संशयो नात्र विद्यते। एवं विश्वसितव्यं हि नृभिरास्तिकबुद्धिभिः ॥ १७ ॥
नास्तिकास्तु नरा यांति यथेष्टाचरणे रताः। महतो नरकानेव सत्यमेतद्वचो मम ॥ १८ ॥
पप्रच्छाऽथ कनीयांस्तमात्मानंदो महाप्रभो। अनीप्सिता अपि कुतो विशंत्यर्थास्तु चेतसि ॥
श्रीहरिः प्राह चित्तं तु वर्त्तते मधुवन्मुने। अतिस्निग्धमतस्तत्र सर्वमेव हि सज्जति ॥ २० ॥
दृष्टाः श्रुता वा ये त्वर्था अप्रिया वा प्रिया अपि। सर्वेऽपि तेऽत्र सज्जंति श्वभावोऽस्तीदृशोऽस्य हि ॥
अतो हि भगवद्भक्ता दृश्यात्तस्मात्पृथक् स्थिते। तद्द्रष्टर्यात्मनि स्वत्वं मन्यंते निर्विकारिणि ॥
तस्मान्मुमुक्षुणा पुंसा दोषान् दृष्ट्वा स्वचेतसः। नातिखेदो विधातव्य आत्मा ज्ञेयस्ततः पृथक् ॥
आत्मरूपेण भगवद्भक्तिः कार्या निरंतरम्। तयैव सर्वदोषाणां क्षयो मुक्तिश्च सिध्यति २४ ॥

इति हरेर्वचः सोऽमृतं मुनिः सकलसाधवोऽन्येऽनिपीय च।
हृदि दधुर्मुदाऽन्येऽपि तच्छ्रिता निजहितोद्यतं तं ववंदिरे ॥ २५ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधावेकोनचत्वारिंशदधिकशततमस्तरंगः ॥१३९॥६॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते। एकादश्यां नभःशुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्षितिपस्य सः। वासुदेवालयस्याग्रे न्यषीदच्चक्रकोत्तमे ॥ २ ॥
त्यागिभिर्गृहिभिर्भक्तैः परीतश्च सितांशुकः। पुरःस्थानब्रवीत्साधून् भक्तानन्यांश्च स स्वयम् ॥
अद्यास्त्येकादशी संतस्तस्याः कार्यं व्रतं यथा। सर्वेषामौद्धवीयानां तथैवाहं वदामि वः ॥ ४ ॥
अशेत भगवान् पूर्वमिंद्रियाणि मनस्तथा। अंतर्मुखानि कृत्वैव योगनिद्रासुखप्रदः ॥ ५ ॥
नाडीजंघात्मजस्तर्हि दानवो मुरनामकः। तमाजुहाव युद्धार्थं बुबुधे स तदा प्रभुः ॥ ६ ॥
एकादशेंद्रियेभ्योऽथ तस्य तेजोऽभवन्महत्। एकीभूतं च तद्दिव्यकन्यारूपमभूत्तदा ॥ ७ ॥
दृष्ट्वा तद्रूपमसुरो मुह्यंस्तामवदच्छुभे। त्वं मां वरय भद्रं ते भविष्यति न संशयः ॥ ८ ॥
कन्योवाच मम त्वस्ति प्रतिज्ञा दानवोत्तम। युधि मां यो जयेद्वीरो वरयेऽहं तमेव हि ॥ ९ ॥
ततस्तयोरभूद्युद्धं तुमुलं तत्र सा मुरम्। अहनत्तेन भगवांस्तस्यै तुष्टोऽब्रवीद्वचः ॥ १० ॥
वरं वरय कल्याणि मम कार्यं महत्कृतम्। त्वया ततः प्रसन्नोऽस्मीत्युक्ता सा चाब्रवीत्प्रभुम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकादशेंद्रियेभ्योऽहं निरन्नेभ्यस्तव प्रभो । जातेत्येकादशी नाम्ना विश्रुतास्यां तपस्विनी १२ ॥
एकादशीतिथौ सर्वे कुर्युर्मम व्रतं सदा । ग्राम्याहारो न दातव्य इंद्रियेभ्यस्तदाऽखिलैः १३ ॥
निराहारव्रतवतां पुरुषार्थचतुष्टयम् । सिध्येदिति वरं देहि प्रसन्नो यदि मे प्रभो ॥ १४ ॥
तथास्त्विति वरो दत्तस्तदा तस्यै तु विष्णुना । अत एव व्रतं ह्येतत्सर्वैः कार्यं प्रयत्नतः ॥१५॥
एषा कथा पुराणोक्ता संक्षेपात्कथिता मया । धर्मशास्त्रोदिताः पाल्या एकादश्यां यमा अपि ॥
लोभकामक्रुधां कार्यः संकल्पोऽपि न वै हृदि । अहोरात्रं विष्णुभक्तिः कर्त्तव्या श्रवणादिका ॥
इन्द्रियैर्ग्राम्यविषयग्रहणे तु कृते व्रतम् । भग्नमेवोपवासस्तु ज्ञातव्यः पशुलंघनम् ॥ १८ ॥
इन्द्रियैर्ग्राम्यविषयान् गृह्णन् यः कुरुते व्रतम् । तस्योपरि हरिर्नैव प्रसादं कुरुते क्वचित् १९ ॥
इंद्रियाहाररहितः श्वेतद्वीपस्थमुक्तवत् । यस्तस्मै भगवान् शीघ्रं प्रसीदति न संशयः ॥२०॥
कृष्णस्य दर्शनं कीर्त्तिश्रवणं गुणकीर्त्तनम् । पूजा स्तुतिर्नतिः कार्या स्वशक्त्या च प्रदक्षिणा ॥
कृष्णप्रसादमाहात्म्याद्भक्ष्यं नान्नं त्वनापदि । विना कार्ष्णीं क्रियामन्या क्रिया कार्या न तत्र च
श्वेतद्वीपस्थिता मुक्ताः सदैतत्कुर्वते व्रतम् । अस्माभिस्तु सकृत्कार्यं पक्षमध्य इदं व्रतम् ॥२३॥
श्वेतमुक्तसमत्वाप्त्यै कार्येच्छा तु सदा हृदि । कृष्णादपि तदेवार्थ्यं पूजनांते न चेतरत् ॥२४॥
इत्येकादशिकावार्त्तां विधाय स पुनः सतः । प्रोवाच ज्ञानयज्ञस्तु कार्यो नित्यं मदाश्रितैः ॥
जगत्सृष्ट्वा पुरा ब्रह्मा प्रोवाच सकलाः प्रजाः । युष्माभिः सर्वदा यज्ञो विधातव्यो यथोचितम्
तेनैव हि परं श्रेयः सर्वासां वो भविष्यति । एवं विश्वसृजा पूर्वं कृताऽस्त्याज्ञा हि सर्वतः ॥
ततः प्रवृत्तिनिष्ठा ये राजसास्तामसा जनाः । राजसांस्तामसानेव द्रव्ययज्ञांस्तु ते व्यधुः ॥
निवृत्तिमार्गनिरताः सात्त्विकाः सात्त्विकान्मखान् । चक्रुर्ज्ञानमयानेव हिंसाविरहितान्नराः ॥
निवृत्तिमार्गे संत्यन्ये योगयज्ञादयो मखाः । तत्रापि ज्ञानयज्ञस्तु मया श्रेष्ठतया मतः ॥३०॥
अंतर्दृष्ट्या वर्त्तनं यद्भक्तस्य कमलापतेः । ज्ञानयज्ञः स कथितः सर्वयज्ञोत्तमोत्तमः ॥ ३१ ॥
स्वांतरे वा बहिः कृष्णमूर्त्तेरेव समीक्षणम् । यत्सांतर्दृष्टिरुदिता बहिर्दृष्टिर्मतेतरा ॥ ३२ ॥
श्रवणं कीर्त्तनं विष्णोरर्चनादि च यद्बहिः । क्रियते सर्वमप्येतदंतर्दृष्टितया मतम् ॥ ३३ ॥
हृदि ध्यात्वा हरिं साक्षात्तस्य यच्चार्चनादिकम् । क्रियेत सा च भक्तस्य ज्ञातव्यांतर्दृशिः खलु
कृष्णस्यांशास्तु ये जीवा ज्ञानयज्ञं त एव हि । इमं कर्तुं शक्नुवंति नेतरे तु कदाचन ॥३५॥
मनःषष्ठानींद्रियाणि पञ्च योजयितुं हरौ । अशक्ता इतरे त्वेषां वर्त्तंते वश एव हि ॥ ३६ ॥
ममैवांश इति श्लोके गीतायामर्ज्जुनं प्रति । अयमेवार्थ उदितः श्रीकृष्णेनेति दृश्यताम् ॥
कृष्णनिष्ठास्तु ये धर्मास्तेंऽशाः प्रोक्ता महर्षिभिः । आगच्छंति हरेस्ते हि प्रपन्नेषु दयानिधेः ॥
कृष्णसाधर्म्यमापन्नाः शिष्याः विद्यागुरोरिव । ये ते त्वंशा हरेः प्रोक्ता जीवा इत्यवगम्यताम् ॥
इंद्रियादेर्जये शक्तिस्तेषामेव हि वर्त्तते । कृष्णे च योजने तस्य न त्वन्यस्य तु कस्यचित् ॥
सत्संगिनो न स्थ यूयमिंद्रियाणां वशे यतः । कृष्णांशा अत एव स्थ त्विति जानीत निश्चितम्
ज्ञानयज्ञोऽद्य तैर्भाव्यं तद्वशस्थैर्मदाश्रितैः । इदमेव हि सर्वेषां सच्छास्त्राणां रहो मतम् ४२॥
अहं च स्वाश्रितान् सर्वानेतदाज्ञापयामि वः । सर्वदा ज्ञानयज्ञस्याभ्यासः कार्य इति ध्रुवम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेनैव श्वेतमुक्तानां पदवीमपि यास्यथ । तादृशीच्छैव हृदये कार्या सर्वैर्मदाश्रितैः ॥ ४४ ॥
न ज्ञानयज्ञेऽलसता विधेया सत्संग एषोऽस्ति सुदुर्लभो यत् ।
इति प्रभोर्वागमृतं निपीय संतो गृहस्थाश्च मुदं ययुस्ते ॥ ४५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ चत्वारिंशदधिकशततमस्तरंगः ॥ १४० ॥ ७ ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । द्वादश्यां नभसः शुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमक्षितिपस्य सः । वासुदेवालयस्याग्रे न्यषीदत्प्रवरासने ॥ २ ॥
सितांबरधरं भक्तैर्वृतं तं च सहस्रशः । पप्रच्छ मुक्तानंदः सन् प्रांजलिर्विनयानतः ॥ ३ ॥
कश्चित्स्याद्भवतो भक्तस्तस्य चेतसि सर्वथा । जिहासा दुःस्वभावानां स्याद्भक्तौ विघ्नकारिणाम् ॥
तथापि तेषां न त्यागं कर्तुं शक्येत तेन तु । अत्र किं कारणं स्वामिन्वर्त्तते कृपया वद ॥ ५ ॥

श्रीहरिरुवाच

यस्य वैराग्यदौर्बल्यं वर्त्तेत स पुमान्मुने । स्वस्य हातुं न शक्नोति दुःस्वभावान् समुद्यतः ॥
यथा दरिद्रः पुरुषः सद्वासोन्नगृहादिकम् । वांछन्नपीह नाप्नोति तथाऽसौ स्वमनोरथम् ॥
पुनः पप्रच्छ तं मुक्तानंदस्तेत तत्र सत्पते । केनोपायेन नश्येयुरिति पृष्टोऽब्रवीद्धरिः ॥ ८ ॥
स तु सेवां सदा कुर्यात्तीव्रवैराग्यशालिनाम् । सावधानश्च वर्त्तेत कृष्णाज्ञायां निरंतरम् ॥९॥
ततोऽस्मिन् जायते कृष्णकृपातिमहती तया । दुःस्वभावा विनश्यंते सर्वेऽप्यस्य न संशयः ॥
शास्त्रोक्तानि साधनानि संत्यन्यान्यपि तैस्तु सः । कालेन बहुनाप्नोति तत्सिद्धिं प्रयतो यदि ॥
इति वाक्यसुधां हरेः स पीत्वा मुनिवर्यस्तु मुदं परामवापत् ।
इतरेऽपि सदःस्थिताश्च संतो गृहिणश्चापि तदीयभक्तिभाजः ॥ १२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकचत्वारिंशदधिकशततमस्तरंगः ॥ १४१ ॥८॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । पौर्णमास्यां नभःशुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य महीभृतः । वासुदेवालयस्याग्रे स न्यषीदत्सुचक्रके ॥ २ ॥
त्यागिभिर्गृहिभिर्भक्तैर्बहुभिः परिवेष्टितः । आनंदानंदमुनिना भक्त्या सम्यक् प्रपूजितः ॥ ३ ॥
स स्वर्णबुट्टारुणां कच्छनीं च तथाविधम् । सन्नीशारं परिदधद्धैमसूत्रकटीपटः ॥ ४ ॥
स स्वर्णसूत्रप्रांताग्रं दधच्छीर्षपटोत्तमम् । अभ्राभं च स्कंधपटं दक्षदोष्णि च रक्षिकाः ॥ ५ ॥
साधून् पुरःस्थान्स प्रोचे ज्ञानशास्त्रं नृणां हितम् । तच्छृण्वंतोपि केचित्तु प्राप्नुवंत्यन्यथामतिम्
साकारं भगवंतं तु ते जानंति निराकृतिम् । सत्यौ विधिनिषेधौ च कल्पिताविति साधवः ७॥
अतो मुमुक्षुभिः पुंभिस्तस्मिन् कृष्णस्तु साकृतिः । वर्णितोस्तीति बोद्धव्यं नान्यथा तु कदाचन ॥
वचसोऽतिक्रमः क्वापि स्याच्चेत्कृष्णस्य सोऽस्त्वपि । तदरूपत्वबोधस्तु सर्वथा मास्तु कस्यचित् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वाक्यातिक्रमदोषस्तु नश्येत्प्रार्थनया हरिः । न तन्मूर्त्तिद्रोहदोषः प्रायश्चित्तशतैरपि ॥ १० ॥
यथाशक्ति हरेर्वाक्यं पाल्यमेव मुमुक्षुणा । तन्मूर्त्तिनिश्चयबलं त्वतिरक्ष्यमसंशयम् ॥ ११ ॥
सदा साकृतिरेवास्ति कृष्ण एष नराकृतिः । सच्चिद्रूपोऽमायिकांगः स्वतंत्रो दिव्यविग्रहः ॥१२॥
सर्वाकृतीनां मूलत्वात्साकृतिश्चाऽक्षरात्परः । कालादियंता सोऽस्तीति सर्वोपर्यथवबुध्यताम् ॥१३॥
हेतुः सर्वावताराणां सोऽवतार्य्येव वर्त्तते । इति ज्ञेयो न चैवान्यैरवतारैः समो हरिः ॥१४॥
तस्मिन्नेव ततः प्रीतिः कर्त्तव्या सुदृढा सदा । तयैव संसृतेर्मोक्षः सर्वेषामस्ति नान्यथा ॥१५॥
तस्यां सत्यामपि यदि क्वचित्सन्मंडलाच्च्युतः । स्यात्कश्चित्तदपि प्रांते प्राप्नुयात्स पदं हरेः ॥
सत्मंडलस्थोऽपि पुमांस्तद्धीनस्तु विराग्यपि । देहांते नाऽक्षरं याति किंतु लोकान्सदैव तान् ॥
अतः कृष्णस्वरूपस्य रक्ष्यं सर्वाधिकं बलम् । तेन सर्वार्थसिद्धिः स्यात्तद्द्रोहः स्यात्किलान्यथा ॥
दृष्टांतमत्र कथये ज्येष्ठमध्यमपार्थयोः । धर्मशास्त्रबली पूर्वः कृष्णमूर्त्तिबलोऽपरः ॥ १९ ॥
प्रागाश्रितो धर्मशास्त्रं युद्धं नैवैच्छदर्जुनः । ततः कृष्णेन युद्धाय स्वबलेनैव योजितः ॥ २० ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः २१॥
इत्युक्तः स स्वकैः साकं निःशंको युयुधे रणे । लक्षशो जीवहिंसायां नाखिद्यद्धृदि किंचन ॥
ब्रह्महत्यादिपापानि शेकुः स्प्रष्टुं च तं न वै । कृष्णाश्रयस्यैव बलं सर्वथा दर्शितं तदा ॥ २३ ॥
क्षत्रियोऽपि रणे हिंसामल्पामपि विधाय च । युधिष्ठिरो भृशं खेदं प्राप्तवानात्ममोहनम् २४ ॥
ऋषिभिः सह कृष्णेन बोधितोऽपि न तं जहौ । धर्मशास्त्रविदाऽथाऽसौ भीष्मेणातीव बोधितः ॥
ततः कथंचित्स जहौ शोकं हृदयशोषकम् । न त्वर्ज्जुन इवोत्साहं प्राप्तवानिति दृश्यताम् ॥
अतः कृष्णस्वरूपस्य बलं रक्ष्यं दृढं बुधैः । तेनैकांतिकभक्तत्वं तेषां सिध्यति नान्यथा ॥ २७ ॥
श्रीमद्भागवतस्यापि वर्त्तते ह्ययमाशयः । भक्ता एव च तं सम्यग्विदुर्न त्वपरे नराः ॥ २८ ॥
नैतावता तु धर्मस्य शंकितव्यं हि खंडनम् । ज्ञानभक्त्योर्यतः सिद्धिर्धर्मिष्ठस्यैव जायते २९ ॥
देशकालादिवैषम्यात्क्वचिद्धर्मच्युतावपि । कृष्णमूर्त्तिबलान्नैव पातः स्यान्मोक्षवर्त्मनः ॥ ३० ॥
इत्याशयेन धर्मस्य कृष्णमूर्त्यनुरागतः । न्यूनता प्रोच्यते कृष्णभक्तप्रोत्साहनाय वै ॥ ३१ ॥
धर्मच्युतावन्यथा तु भक्त उत्साहवर्जितः । यास्याम्यधोगतिमिति भक्तौ शैथिल्यमाप्नुयात् ॥
सर्वथाऽतो भगवति प्रीतिरेव मुमुक्षुणा । साध्या तया च्युतस्यापि पूर्णमस्य फलं भवेत् ३३ ॥
यस्य स्वरूपनिष्ठायां बलं कृष्णस्य वर्त्तते । स एव पक्कः सत्संगी गुणबुद्धिर्मतोऽपरः ॥ ३४ ॥
अस्मिन्कलियुगे घोरे स्थितिरेषाऽतिदुर्लभा । तथापि सुलभैवाऽस्ति युष्मद्वाध्वजुषां नृणाम् ॥
सभास्वस्माकमीदृश्यो जायंतेऽनुदिनं तु याः । वार्त्तास्तास्तु सुराणां च मुनीनामपि दुर्लभाः ॥
अतिसूक्ष्मा अपि च ताः स्थूलबुद्धिजना अपि । सुखेनैवावगच्छंति कृष्णस्यैव प्रसादतः ३७ ॥
अतो भवद्भिस्तु कृतार्थताऽऽत्मनां पुण्यं च भाग्यं महदेव बुध्यताम् ।
इति प्रभोस्ते सुधया समं वचो निशम्य संतश्च मुदं प्रपेदिरे ॥ ३८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्विचत्वारिंशदधिकशततमस्तरंगः ॥१४२॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । नभः कृष्णतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुराल्लक्ष्मीवाटिकां समुपेत्य सः । आम्राधस्ताद्वेदिकायां न्यषीदद्वाब्ज आसने ॥ २ ॥
सितवासा वृतो भक्तैस्त्यागिभिर्गृहिभिश्च सः । स्वाग्रोपविष्टान् प्रोवाच सतो भक्तिं प्रपोषयन् ॥
श्रीमद्भागवतं भूमौ सर्वोपर्यैव वर्त्तते । साकारमेव यत्तत्र ब्रह्म व्यासेन वर्णितम् ॥ ४ ॥
तथाप्यभक्तो वक्ता तु तस्मादपि निराकृति । ब्रह्मास्तीत्येव जानाति न तु भक्तः कथंचन ॥ ५ ॥
निराकारान्न साकारब्रह्मादेरुद्भवो भवेत् । यथाकाशात्साकृतीनां घटादीनां न संभवः ॥ ६ ॥
ईदृशो भगवांस्तत्र पुराणे कीर्त्यते मुहुः । अध्यात्मादित्रयाधारस्तमहं वर्णये स्फुटम् ॥ ७ ॥
अध्यात्मनि विराट्पुंस इंद्रियाण्युदितानि हि । तदर्था अधिभूतानि ह्यधिदैवानि तत्सुराः ॥
विराड्देहं प्रविष्टेषु त्रिष्वेतेष्वपि यर्हि सः । नोदतिष्ठत्तदा कृष्णः प्राविशत्पुरुषात्मना ॥ ९ ॥
उदतिष्ठत्स तर्ह्येव सोऽतर्यामी तु पूरुषः । अध्यात्मादित्रयेऽप्यासीत्तदात्मकतया स्थितः १० ॥
एवं स्थितोऽपि भगवान् विश्वाधारतया ततः । स्वयं तु पृथगेवास्ति स्वस्वरूपेण सर्वदा ॥ ११ ॥
अग्निर्ज्वालास्वरूपेण यथा व्याप्याऽपि सर्वतः । स्वयं तु मूर्त्तिमान् भिन्नस्तत आस्ते तथैव सः ॥
एवं सदा दिव्यतनुं हरिं ज्ञात्वा मुमुक्षुभिः । तस्याश्रयो दृढतरः कर्त्तव्यः श्रेयसे ध्रुवम् ॥ १३ ॥
स्वयमेवं तु विदधदन्यं कृष्णाश्रितं नरम् । बोधयेत्परमप्रीत्या ह्येवमेव च सादरम् ॥ १४ ॥
इति वार्त्तां विधायातो हरिर्विष्ट्वा पुनः पुरम् । दुर्गे भूपस्योत्तमस्य गृहवेद्यामुपाविशत् ॥१५॥
सुखासीनं मंचकेऽथ वृतं भक्तैः सहस्रशः । अचिंत्यानंदसाधुस्तं पप्रच्छ विनयानतः ॥ १६ ॥
ज्ञानवैराग्यभक्तीनां मध्ये किं साधनं परम् । कृष्णे त्वयि प्रीतिविधौ मतं तन्मे वद प्रभो १७॥

श्रीहरिरुवाच

ज्ञानादीनां त्रयाणां ते स्वरूपं स्पष्टमादितः । कथयामि यथाशास्त्रं साधनानां हरौ रतेः ॥१८॥
ज्ञानं तु सांख्ययोगाभ्यां शास्त्राभ्यां स्याद्रमापतेः । तत्रादौ सांख्यजं ज्ञानं कथयामि समासतः ॥
सर्वत्र व्यापकोऽपीशः खमिवाऽस्त्यतिनिर्मलः । तत्तद्विकारास्पृष्टांगः सर्वाधारश्च वर्त्तते ॥२०॥
तथाहि कृष्णतापन्यां कथोपनिषदि श्रुता । व्रजौकसः प्राक् सुखयन् कृष्णो वृंदावनेऽवसत् ॥
तदाऽऽयात्तत्र दुर्वासाः श्रीकृष्णेनाऽतिमानितः । प्रेषयेः कृष्णभिक्षां त्वमित्युक्त्वा स ततो गतः
यमुनायाः परतटे नानाद्रुमसमाकुले । भिक्षां प्रतीक्ष्य न्यवसत्स च कृत्वाह्निकं मुनिः ॥२३ ॥
कृष्णः प्राह ततो गोपीर्मुनिरस्ति क्षुधाकुलः । गृहीत्वाऽतोऽन्नपात्राणि तं प्रापयत सत्वरम् ॥
गोप्य ऊचुः कथं तत्र गच्छेम सरिदंतरे । यमुना दुस्तराऽस्तीति कृष्णः प्रोवाच तास्तदा २५॥
कृष्णः सदा ब्रह्मचारी भवेच्चेद्देहि वर्त्म नः । इति तां सरितं ब्रूत ततो दास्यति वर्त्म सा २६॥
इत्युक्ताः प्रहसंत्यस्ताः पात्राण्यन्नभृतानि तु । गृहीत्वा प्राप्य यमुनां तथोचुर्वर्त्म सा ददौ २७॥
तदा ता विस्मयं प्रापुः परमं स्वस्वमानसे । उपेत्याऽथ मुनिं तेन तस्यातिथ्यमकुर्वत ॥ २८ ॥
तस्मात्कृष्णो मायिकेषु पदार्थेष्वखिलेष्वपि । स्वौपम्येनाऽऽसक्त इव दृश्यमानोऽपि नो तथा ॥
गोपीभी रममाणोऽपि यत्स शारदरात्रिषु । ब्रह्मचार्येव निर्णीतस्ततोऽसंगी शुचिः सदा ॥३०॥
कुर्वन्नपि क्रियाः सर्वा अकर्त्तैवास्ति स प्रभुः । इति सांख्यमतेनोक्तं ज्ञानं भगवतो मया ३१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योगेन साक्षात्कृष्णस्य प्रत्यंगाकारवेदनम् । प्रत्यंगं चिंतनाज्ज्ञेयमतिशुद्धनराकृतेः ॥ ३२ ॥
तत्र हीदृग्धरेर्ध्यानदार्ढ्यायोक्तं तु साधनम् । कृष्णध्यानेच्छुना सम्यग्दक्स्थैर्यं साध्यमादितः ॥
प्रतिमायां स्थिरा कार्या दृष्टिर्वा शुभवस्तुनि । बहुकालं निर्निमेषवीक्षणाद् दृक्स्थिरा भवेत् ॥
दृक्स्थैर्ये तु भवेदंतःकरणस्थिरता ध्रुवम् । तदा तु भगवद्ध्यानमनायासेन सिद्ध्यति ॥३५॥
अन्यथा तु भवेद्ध्यातुर्नानासंकल्पसंभवः । ततो न सिद्ध्यति ध्यानमत एष क्रमो मतः ॥३६॥
एतज्ज्ञानं योगशास्त्रात्प्राप्यते हि मुमुक्षुणा । इति ज्ञानं मया प्रोक्तं वैराग्यं कथयाम्यथ ॥३७॥
स्वभाव एष जीवानां यत्प्रीती रम्यवस्तुनि । रमणीयार्थलाभे स्यादरम्ये सहजाऽरुचिः ॥३८॥
मायामयपदार्थोत्थं ब्रह्मांडे वर्त्तते सुखम् । दुःखमिश्रं तदप्यस्ति दुष्प्रापं चाल्पकं चलम् ३९॥
अमायिकं भागवतं सुखं महदनश्वरम् । तत्तु स्याद्भगवद्वार्त्ताश्रवणादेः पुनः पुनः ॥ ४० ॥
प्राप्तस्य तद्रसास्वादं पुंसोऽन्यत्राऽरुचिर्भवेत् । प्राप्तस्य रौप्यमुद्रां स्यात्ताम्रमुद्रारुचिर्यथा ॥४१॥
एवं कृष्णसुखासक्तया या ग्राम्यविषयाऽरुचिः । सैव वैराग्यमित्युक्तं जीवानां मोक्षसाधनम् ॥
भक्तिस्तु सम्यग्माहात्म्यं बुद्ध्वा कृष्णस्य तस्य या । प्रीत्या सेवा सैव मता सर्वेषां सुलभा न सा
पुराब्धेर्मंथने लक्ष्मीरुत्पन्ना तत ईश्वरी । देवदैत्यनरान्सर्वान्सदोषानेव सैक्षत ॥ ४४ ॥
निर्दोषं सद्गुणगणं हरिमेकमवेत्य सा । वृत्वा प्रीत्या तमेवेशमभजत्सुस्थिरांतरा ॥ ४५ ॥
एवमत्रापि बुद्ध्वादौ हरेर्माहात्म्यमंजसा । तत्सेवा क्रियते प्रीत्या या सा भक्तिर्मता मया ॥
एतानि त्रीण्यपि मुने भगवत्प्रीतिसिद्धये । साधनानि भवंत्येव भक्तिस्तत्राधिका मता ॥ ४७ ॥
सा यस्याऽत्र भवेत्पुंसः स भक्त इति कीर्त्यते । दुर्लभः सोऽस्ति तल्लक्ष्मविशेषमपि ते ब्रुवे ॥
स्वेच्छया त्वाकृतेर्भूमौ चरतो राधिकापतेः । लौकिकानि च दिव्यानि चरित्राणि भवंति हि ॥
चतुर्भुजादिरूपाणां स्वेच्छयैव प्रदर्शनम् । गोवर्द्धनस्योद्धरणं कालियस्य प्रमर्द्दनम् ॥ ५० ॥
अनेकरूपाविष्कारः प्रबलासुरमारणम् । इत्यादीनि चरित्राणि दिव्यान्युक्तानि तस्य तु ॥५१॥
बालवत् क्रीडनं भीत्या यवनादेः पलायनम् । त्यागः स्वराजधान्याश्च द्वीपवासादि लौकिकम् ॥
दिव्येषु तत्राऽभक्तानामप्याश्चर्यं भवेन्नृणाम् । लौकिकेषु च मानुष्यनिश्चयो मूढचेतसाम् ५३॥
भक्तस्य तु चरित्रेषु लौकिकेष्वपि सर्वदा । दिव्येष्विव भवेच्चित्रं न तु मानुष्यधीः क्वचित् ५४॥
जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥
अस्य श्रीभगवद्गीताश्लोकस्याप्ययमाशयः । एतदुक्तं फलमपि प्राप्नोतीदृशभक्तिभाक् ॥ ५६ ॥
शुभैरनेकजन्मोत्थैः संस्कारैरीदृशी नृणाम् । गोपीनामिव निर्दोषा भक्तिः कृष्णे भवेत् खलु ॥

यस्येदृशी भक्तिरिहास्ति पुंसः स पूर्णकामः कृतकृत्य उक्तः ।
श्रुत्वेति वाचं स सुधोपमेयां हरेर्मुनिश्चाप मुदं तथाऽन्ये ॥ ५८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रिचत्वारिंशदधिकशततमस्तरंगः ॥१४३॥ १० ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । नभसः कृष्णपंचम्यां वचो मृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमक्षितिपस्य सः । वेद्यां निंबतरोर्मूले न्यषीदन्मंचकोत्तमे ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्यागिभिर्गृहिभिर्भक्तैरनेकैः परितो वृतः । सितांबरधरः साधूनुवाच स्वयमेव सः ॥ ३ ॥
सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः । इह श्रृण्वंति बहवः पुरुषा हि मनीषिणः ॥ ४ ॥
श्रुत्वा तेषां च विषयं त्रिवर्गमवयंति ते । ततस्तदर्थं कुर्वंति व्रतयज्ञादिकाः क्रियाः ॥ ५ ॥
गुणात्मिकाभिस्ताभिश्च तत्फलान्यपि भुंजते । त्रिलोक्यां ब्रह्मलोके वा स्वस्वकर्मानुसारतः ॥६॥
तदंते संसृतिं यांति न तु निर्भयतां क्वचित् । विना कृष्णाश्रयं नास्ति मुक्तिः कस्यापि कुत्रचित् ॥
मुक्ताः संसृतिबंधाद्ये पूर्वं तेऽप्याश्रयाद्धरेः । अत एव सुरैरुक्तं मुचुकुंदं नृपं प्रति ॥ ८ ॥
वरं वृणीष्व भद्रं ते कृते कैवल्यमद्य नः । एक एवेश्वरस्तस्य भगवान्विष्णुरव्ययः ॥ ९ ॥
एता एव क्रिया यर्हि शुभाः सर्वा गुणात्मिकाः । क्रियेरन्भगवत्प्रीत्यै ता एव स्युस्तदाऽगुणाः
भक्तिरूपा हि ता भूत्वा मोक्षमेव फलंति च । एतदुक्तं भागवते सदृष्टांतं सुरर्षिणा ॥ ११ ॥
आमयो येन भूतानां जायते यश्च सुव्रत । तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम् ॥१२॥
एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः । त एवात्मविनाशाय कल्पंते कल्पिताः परे ॥१३॥
एतदेव ततो बोध्यं सेवित्वा विदुषः सतः । येनातिदुर्लभतरनृत्वाप्तिः सार्थका भवेत् ॥१४॥
भक्तानां चाप्यभक्तानां लौकिक्यः सकलाः क्रियाः । समाना इव दृश्यंतेऽथापि भेदः फले महान्
अभक्तानां क्रियाः सर्वाः संति स्वेंद्रियतुष्टये । कृष्णार्थमेव भक्तानामिति भेदः फले मतः ॥
अतो नैष्कर्म्यरूपासु क्रियासु हरिसेविनाम् । न लौकिकक्रियाबुद्धिः कर्त्तव्याऽत्र मनीषिभिः ॥
कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः । स बुद्धिमान्मनुष्येषु स युक्तः कृष्णकर्मकृत् १८॥
अस्य श्रीभगवद्गीताश्लोकस्याप्ययमाशयः । अतो ज्ञेया हरेर्भक्ता ग्राम्यलोकविलक्षणाः ॥१९॥
कृष्णाज्ञयैव कुर्वंतो व्यवहारं तु लौकिकम् । गृहिणोऽपि नरा भक्ता ज्ञेयाः कल्याणकारिणः ॥
एवं सत्यपि ये तेषु स्वदृष्टांतेन कुर्वते । दोषबुद्धिमभक्तास्ते ज्ञातव्या निरयंगमाः ॥ २१ ॥
अधर्मः सान्वयस्तेषु निःशंको वसति ध्रुवम् । अतो वंद्याः कृष्णभक्ता यादृशास्तादृशा अपि ॥

पीत्वेति तद्वाक्यसुधां सदःस्थाः संतोषमापुः सकला हि संतः ।
अन्ये गृहस्थाश्च तदाश्रिता ये सर्वे व्रजंतं प्रणमंति तं स्म ॥ २३ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ चतुश्चत्वारिंशदधिकशततमस्तरंगः ॥१४४॥११॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । कृष्णषष्ठ्यां नभोमासे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभृतः । वासुदेवालयस्याग्रे चक्रके स उपाविशत् ॥ २ ॥
भक्तैः सद्भिर्गृहस्थैश्च परीतो धवलांशुकः । उवाच सकलान्भक्तान्साधुमुख्यान् प्रति स्वयम् ॥
श्रृण्वंतु भक्ताः सर्वेऽपि वार्त्तैका क्रियते मया । अस्त्येकं साधनं यस्यां प्रबलं श्रेयसो नृणाम्
देहे जीवः प्रकृतयो लोभक्रोधादिका अपि । भिन्ना मय्येव जटिता इति जानाति सर्वथा ॥५॥
तद्योगान्मन्यते स्वं च लुब्धं क्रुद्धं च कामिनम् । ततस्तत्परतंत्रः सन्मतिदैन्येन वर्त्तते ॥ ६ ॥
वस्तुतो न हि जीवस्य संति प्रकृतयो हिताः । चिद्रूप एव जीवोऽस्ति मृषैवमभिमन्यते ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतो मुमुक्षुणा पुंसा स्ववलंब्यं हि पौरुषम् । यथेंद्रियाणि प्राणाश्च संत्यंतःकरणानि च ॥८॥
देहे तथैवाहमस्मि किंत्वेभ्यस्त्वधिकोऽस्मि यत् । प्रकाशको नियंता च भवाम्येषामहं ध्रुवम् ॥
एवमेवाभिमंतव्यं न तु ज्ञेया स्वहीनता । सा चैषां प्रबलत्वं यत्तत्तु स्वाज्ञानतोऽस्ति हि ॥१०॥
यथा मूढो नृपः कश्चित्कस्मिंश्चिन्नगरे भवेत् । तद्वाक्यं तद्गृहनरा अपि नैव हि मन्वते ॥
एतज्ज्ञात्वा तदाज्ञां च तत्पौरा नैव मन्वते । ततश्च तद्देशनरा अपि तां नैव मन्वते ॥ १२ ॥
ततश्चानियतस्थाना अतिधूर्त्तजना अपि । तत्पुरेऽराजके स्थित्वा स्वाज्ञायां वर्त्तयंति नॄन् ॥
तथैव देहनगरे जीवो मूर्खो नृपोऽस्त्यतः । न मन्यंते तदाज्ञां तद्गृह्यास्तु मनआदयः ॥१४॥
पौरादेश्याश्चेंद्रियाणि तत्स्वाश्चापि न मन्वते । यदा तदाज्ञां तर्ह्येष जायते भूरिदैन्यभाक् १५॥
कामक्रोधादयस्तर्हि जनवंचनकोविदाः । सद्भिर्निष्कासिता भक्तैर्भ्रमंतः सर्वदिक्षु च ॥ १६ ॥
ब्रह्मांडे तद्भयादेव वसंतस्तदसंगिषु । गवेषमाणास्तत्तुल्यांस्तत्पुरे निवसंति हि ॥ १७ ॥
स्वाज्ञायां ते ततो भूपं तदीयांश्चाखिलानपि । वर्त्तयंत्यतिहर्षेण यावद्भूपस्य मूढता ॥ १८ ॥
असौ राजा यदा नीतिशास्त्रं स्वहितकृद्गुरोः । अधिगच्छति तर्ह्येव सर्वं जानाति तत्त्वतः ॥
नियंतृधर्मतां स्वस्य परेषां च नियम्यताम् । सम्यग्विदित्वा स्वाज्ञायां सर्वान्वर्त्तयति स्वयम् ॥
तदा धूर्त्ताः पलायंते प्रजाः सर्वाश्च तद्भयात् । तदाज्ञायामप्रमत्ता वर्त्तंते सर्वथा सदा ॥२१॥
तदा स्वतंत्रो भूपश्च प्राप्नोति सुखमीप्सितम् । कीर्त्तिं च महतीं लोके देहांते चोत्तमां गतिम्
एवं कायपुरे जीवोऽप्यधिगच्छति सद्गुरोः । नीतिशास्त्रं यदा तर्हि वेत्ति सर्वं यथातथम् ॥
स्वाज्ञायां मनआदींश्च तदा वर्त्तयति स्वयम् । स्वतंत्रश्च सुखी नित्यं जायते भुवि सद्यशाः ॥
जाते तस्मिन्प्रबुद्धे तु दुष्टाः प्रकृतयोऽखिलाः । कामक्रोधाद्यात्मिकाश्च निर्गच्छंत्येव मूलतः ॥
अतः पौरुषमालंब्य नीतिशास्त्रानुसारतः । स्वयं वृत्यं वर्त्तनीया मनआद्याश्च सत्पथे ॥ २६ ॥
मुक्तानंदस्तदाऽपृच्छन्नीतिशास्त्रं यदुच्यते । त्वया जीवेनाधिगम्यं तन्मे वक्तुं त्वमर्हसि ॥२७॥

श्रीहरिरुवाच

यथादेशं यथाकालं यथावस्थं यथाबलम् । स्वीयधर्मस्याचरणं परधर्मान्निवर्त्तनम् ॥ २८ ॥
समनस्कानींद्रियाणि ग्राम्यार्थेभ्यस्तु सर्वथा । आकृष्यार्थेषु कार्ष्णेषु तेषां योजनमंजसा ॥२९॥
स्वश्च देहत्रयाद्भिन्नस्तन्नियंता प्रकाशकः । आत्मास्तीत्येव निश्चित्य तेन कृष्णस्य सेवनम् ॥३०॥
सद्गुरोरिति संप्राप्य नीतिशास्त्रं सुखात्मकम् । तथैव सर्वदा वृत्यं तेनाभीष्टं हि सिद्ध्यति
अन्यथा त्विंद्रियैरेव स्वनियम्यैरपि स्वयम् । आक्रांतो दैन्यमापद्य स्यादतिक्लेशभाग्नरः ॥
तस्मात्पौरुषमेवैकं दुस्तरक्लेशसागरम् । तरितुं तु तरीरूपं भवत्यन्यन्न किंचन ॥ ३३ ॥
इति निश्चित्य धैर्येण कार्ष्णानाश्रित्य सन्नरान् । तदुक्तवर्त्मना वृत्यं पदवीमिच्छतोत्तमाम् ॥
श्रुत्वेति तस्यामृतवाचमापुर्जगद्गुरोः सोऽप्यपरे च संतः ।
तोषं महांतं गृहिणश्च सर्वे तस्यां महासंसदि ये निषण्णाः ॥ ३५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पञ्चचत्वारिंशदधिकशततमस्तरंगः ॥१४५॥१२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । नभोमासांतिमदिने वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्यावनीपतेः । कृष्णधाम्नो बहिर्वेद्यां न्यषीदच्चक्रके प्रभुः ॥ २ ॥
भक्तमंडलमध्यस्थः सितसूक्ष्माखिलांशुकः । उवाचानंदयन्स्वीयान् गुरुत्वात्स्वयमेव सः ॥३॥
हसंतो येऽत्र युष्मासु सूक्ष्मवार्त्तावबोधने । दक्षाः स्युरत्र ते सर्वे निषीदंत्वित्य मेंऽतिके ॥४॥
इत्थं भगवता प्रोक्ताश्चाहूताः करसंज्ञया । साधवो बुद्धिमंतस्तत्पार्श्वं एत्याऽऽसत द्रुतम् ॥५॥
तानुवाच ततः प्रीतो हरिः सर्वहितं वचः । शृण्वंतु सादरं सर्वे मनो दत्त्वैव साधवः ॥ ६ ॥
मयाद्य प्रोच्यते यत्तन्न स्वमाहात्म्यवृद्धये । न दंभेन न मानेन किंतु युष्मद्धिताय हि ॥ ७ ॥
अनुभूतं मयैतद्धि सर्वशास्त्रानुगामि च । रहस्यमप्यतिप्रीत्या संसदीह प्रकाश्यते ॥ ८ ॥
अत्र यो मधुरः शब्दः सुस्पर्शः सुरसश्च यः । सुरूपं च सुगंधश्च भवत्यतिमनोहरः ॥ ९ ॥
पंचस्वेतेषु मच्चित्तं क्वापि नाऽण्वपि बध्यते । आस्ते तत उदासीनं शोभनाशोभने समम् ॥
राजा रंकश्च मे तुल्यौ राज्यभिक्षाटने तथा । मानापमानौ च समे वर्त्तेते लोष्टकांचने ॥११॥
हस्त्यारोहणपद्गत्वे वर्त्तेते च समे मम । स्रक्चंदनांशुकाकल्पैः पूजकश्च रजःक्षिपः ॥ १२ ॥
भक्तेष्वपि न सर्वेषु महदल्पत्वमस्ति मे । ब्रह्मैवास्मीति च ज्ञानं तन्महत्तापि नास्ति मे ॥१३॥
वैराग्यमतितीव्रं च सद्धर्मोस्ति ममांतरे । ब्रह्मैवास्मीति च ज्ञानं तन्महत्तापि नास्ति मे ॥
यत्त्वहं कस्यचित्कुर्वे स्तुतिं निंदां च कस्यचित् । तज्ज्ञात्वोपरितः कुर्वे मनो दत्त्वा तु न क्वचित् ॥
तत्र तत्र पदार्थेऽहं स्वेंद्रियस्य नियोजये । बलाद्वृत्तिं क्षणं तत्र धारयामि च यत्नतः ॥१६॥
यदा तु यत्नशैथिल्यं तदांतर्याति सा द्रुतम् । ख उत्क्षिप्तो यथाऽश्मादिर्वेगापाये पुनः क्षितिम्
पंगुः पशुर्यथा वाऽन्यैर्बलिष्ठैरुद्धृतो बलात् । यावत्स्थितो भवेत्तावन्मुक्तः सद्यः पतेत्क्षितौ ॥
स्वकीयविषयास्वादे सा न शक्ता बलेरिता । जंबीराम्ला यथा तीक्ष्णा दंताश्चणकचर्वणे ॥
सकलेंद्रियवृत्तीनां हृद्याकाशेऽतितेजसि । स्फुरद्दिव्यतनौ कृष्णे प्रावण्यं तत्र कारणम् ॥२०॥
स तु प्रभुर्घनश्यामोऽप्यवदातोऽतितेजसा । आजानुबाहुयुगलो मनोहरपदद्वयः ॥ २१ ॥
अतिसौम्यो नराकारः किशोरः करुणानिधिः । उपविष्टः स्थितः क्वापि चलन् क्वापि स दृश्यते
तन्मुखैकदृशो मुक्ताः परितः संति कोटिशः । पश्यामि तमहं नित्यं प्रत्यक्षं पुरुषोत्तमम् ॥
एतद्देशागमात्पूर्वमप्यपश्यममुं सदा । मातुर्गर्भगतोऽप्येवं ततः प्रागपि चेश्वरम् ॥ २४ ॥
तत्तेजःपुंजमध्यस्थ एवाऽद्याहं वदामि च । युष्मानपि च पश्यामि निषण्णांस्तत्र सर्वशः ॥
एतद्दुर्गपुराद्यं तु मया किंचिन्न दृश्यते । एतादृशी स्थितिर्मेऽस्तीत्येवं जानीत सत्तमाः ॥२६॥
येन येनाऽवबुध्येत रूपमेतत्परात्मनः । पुमान्स सोऽपि मद्वत्स्यान्नासक्तः क्वापि वस्तुनि ॥२७॥
तदेव रूपं यूयं च पश्यथाऽत्रैव संसदि । अपि सम्यङ् न तज्ज्ञानमस्तीत्यन्यदपीक्ष्यते ॥२८॥
यदाज्ञास्यथ तद्रूपं यथावस्थितमंजसा । तदा सुज्ञेया विषयाः कामाद्याश्चांतरारयः ॥ २९ ॥
यस्मिंस्तेजसि तद्रूपं भवेत्येकरसे सिते । तदक्षरात्मब्रह्मादिनामभिः संप्रकीर्त्यते ॥ ३० ॥
यस्तत्र भगवान् साक्षात्स परब्रह्मसंज्ञकः । आत्मतत्त्वाभिधश्चासौ पुरुषोत्तम उच्यते ॥ ३१ ॥
स एव जायते धर्मस्थापनार्थं युगे युगे । रामकृष्णादिसंज्ञोऽत्र नराकृतिः श्रेयसे नृणाम् ॥३२॥
स्वयं तया तेषु केचिद्गुणैश्वर्यादिनाऽस्य च । केचित्ते संयतः सर्वे ततो न पृथगीश्वरात् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वभावमजहत्स्वीयं प्रादुर्भवति स प्रभुः । अतो न्राकृतिचेष्टोऽपि ज्ञेयोऽसौ परमेश्वरः ॥ ३४ ॥
मनुष्यसदृशो ह्येष न मर्त्यः पुरुषोत्तमः । अत आहाक्षरं धाम पार्थसारथिरात्मनः ॥ ३५ ॥
न तद्भासयते सूर्यो न शशांको न पावकः । यद्गत्वा न निवर्त्तंते तद्धाम परमं मम ॥ ३६ ॥
ध्यायंति न्राकृतिं येऽत्र भगवंतं मुमुक्षवः । तेषामेवैष तेजस्वी भासतेऽक्षरधामगः ॥ ३७ ॥
तीर्त्वा मायार्णवं ते च यांति तत्परमं पदम् । तेषां कालकृतांतादिभयं नास्त्येव सर्वथा ॥
स वसेद्यत्र तत्स्थानं तदीयाः परिचारकाः । तद्वस्त्रभूषायानादि सर्वं भवति निर्गुणम् ॥ ३९ ॥
यन्निर्गुणस्वरूपस्य तस्य संबंधमाप्नुयात् । तद्वस्तु निर्गुणं सद्यो भवतीत्यवधार्यताम् ॥ ४० ॥
असावेवाक्षरातीतो दयादिगुणसागरः । धत्तेऽवतारान्बहुशो यथाकार्यं धरातले ॥ ४१ ॥
प्रादुर्भावतिरोभावावतर्क्यौ तस्य देहिभिः । स्वेच्छया दधतो मूर्त्तीः स्वतंत्रस्याखिलेशितुः ॥
क्वचित्स्त्रीपुंसतः पुंसः स क्वचिज्जायतेऽन्यतः । अनन्यतः स्वयं क्वापि स्वेच्छयाविर्भवत्यसौ ॥
मर्त्यवद्भुवि हित्वा स्वां तनुं याति स्वधाम च । क्वचित्क्वचिच्च तामेव तनुं दिव्यां विधाय सः
श्रूयते मौसले कृष्णतनुमन्विष्य फाल्गुनः । संस्कार लंभयामास प्रभास इति भारते ॥ ४५ ॥
रामो दाशरथिर्दिव्यदेहो भूत्वा पदं ययौ । इति रामायणेऽस्तीति दुर्ज्ञेयौ तौ बुधैरपि ॥ ४६ ॥
अचिंत्यचरितस्याऽस्य ज्ञानं यस्य दृढं भवेत् । निःश्रेयसाध्वा तस्यैव निर्विघ्नोऽस्तीति गम्यताम्
एतज्ज्ञानं विना त्वन्यैस्तपस्त्यागादिसाधनैः । श्रेय आत्यंतिकं नास्ति श्रेयोमूर्त्तिः स एव यत् ॥
ईदृग्निश्चय एवास्ति ह्यस्माकं न्राकृतौ हरौ । तथापि तस्मिन्न कथं निरोधो जायते धियाम् ॥
इति चेच्छ्रूयतां संत ईश्वरेच्छाऽत्र कारणम् । इति जानीत नतु वः कार्यशेषोऽस्ति निश्चितम्
ईदृग्ज्ञानवतां स्वीयनियमेषु यदि क्वचित् । अपंक्तता भवेत्सापि न विघ्नायाऽस्ति कर्हिचित् ॥
एतदेव हि विज्ञातुमत एव मुमुक्षुभिः । यत्नः सर्वात्मना कार्यः सदुपासनया नृभिः ॥ ५२ ॥
एतज्ज्ञानवतोंऽते चेत्प्रारब्धवशतोऽन्यथा । देहांतरं वासनया स्यात्तत्रापि न विस्मृतिः ॥ ५३ ॥
यथा वृत्रासुरस्यासीद्भरतस्यार्षभस्य च । देहांतरेऽपि प्राग्ज्ञानं तथाऽस्यापि भवेद्धि तत् ॥ ५४ ॥
एवमेतस्य माहात्म्यमस्ति शास्त्रेषु वर्णितम् । वार्त्तैषा शिवब्रह्मादिसभास्वप्येव जायते ॥ ५५ ॥
सच्छास्त्रेष्वपि सर्वत्र वार्ता भागवती ह्यसौ । वर्णिताऽस्त्यपि सा सम्यङ् न स्वबुद्ध्यावगम्यते ॥
प्रादुर्भावो भगवतो यदा भुवि भवेत्तदा । तन्मुखाद् बुध्यते सा वा तद्भक्तेभ्यो यथातथम् ॥
ज्ञानं त्रैकालिकं चेत्स्यादेतज्ज्ञानवतो भुवि । तथाऽपि न भवेत्तस्य तद्गर्वश्च मदादयः ॥ ५८ ॥
शापं वरं वा कस्मैचित्स न दद्यान्महामतिः । कस्मैचित्क्वापि दद्याद्वा दुराग्रहविवर्जितः ॥ ५९ ॥
वर्त्तेत निर्भयः क्वापि सभयो वा क्वचिद्भवेत् । हर्षशोकविहीनोऽसौ न बुद्ध्या त्वाचरेदयम् ॥
एषा वार्त्ता दृढं सर्वैर्धारणीया सदा हृदि । एतां बोधयितुं सम्यग्धामैवेदं जनुर्नृषु ॥ ६१ ॥
भूरितेजसि यः प्रोक्तो भगवान् दिव्यविग्रहः । सोऽहमेव भवाम्यत्र स्थितो दिव्यनराकृतिः ॥
रामकृष्णादयः सर्वेऽवताराः संत्यतो हि मे । पुरुषोत्तमस्य वित्तेत्येतत् सत्यं ब्रवीमि वः ॥ ६३ ॥
ज्ञातुमित्थं न शक्येत यदि कैश्चन तर्हि तैः । ज्ञेयस्तदेकद्रष्टाऽहं तेनापि स्याद्गतिर्मयि ॥ ६४ ॥
एषा रहस्यवार्त्तेति युष्माभिर्मदुपाश्रितैः । दिने दिने नूतनेव विचिंत्या जीवितावधि ॥ ६५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत्र यत्र हरेर्वार्त्ता क्रियेताऽत्र नरान्प्रति । भवद्भिस्तत्र तत्रैषा योज्या बीजतयाऽनवाः ॥६६॥
सर्वसच्छास्त्रसिद्धांतो वार्त्तैषाऽस्ति मया कृता । साक्षात्स्वेनाऽनुभूतैव ततो नास्त्यत्र संशयः ॥
इति तस्य विभोर्वचोऽमृतं सकला भक्तजना निपीय ते ।
तदुपासनसक्तचेतसो मुदिता ह्यभवन्सदःस्थिताः ॥ ६८ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ षट्चत्वारिंशदधिकशततमस्तरंगः ॥१४६॥१३॥

शकाब्दे विक्रमार्कस्य गजाश्वसुभूमिते । भाद्रशुक्लप्रतिपदि वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीक्षितः । वासुदेवालयस्याग्रे चक्रके स उपाविशत् ॥ २ ॥
सितांबरधरो भाले दधत्कुंकुमचंद्रकम् । उष्णीषे कारवीरं च दधच्छोभनशेखरम् ॥ ३ ॥
वृतं सद्भिर्गृहस्थैश्च निजभक्तैः सहस्रशः । मुक्तानंदस्तमप्राक्षीत्साधुर्नत्वा कृतांजलिः ॥ ४ ॥
भक्तस्य ते भवद्रूपे तादात्म्यं यत्तु जायते । तत्किं समाधिना वान्योपायेन तद्भवेत्प्रभो ॥ ५ ॥

श्रीहरिरुवाच

यादृशं भगवद्रूपं मया ह्यः प्रतिपादितम् । तस्य तादृक्तया सम्यग्बोधो निःसंशयस्तु यः ॥६॥
विद्वद्भिर्वान्यशास्त्रैर्वाप्यचाल्यः पर्वतोपमः । एष निश्चय एवोक्तं तादात्म्यं श्रीहरौ खलु ॥७ ॥
एकांतिकानां भक्तानां हरेस्तत्स्यात्प्रसंगतः । समाधिनापि तन्न स्याद्विहायैनं क्वचिन्मुने ॥ ८ ॥
निर्विकल्पः समाधिश्चाप्येष एव प्रकीर्त्तितः । स यस्य स्यात्तस्य पुंसः स्वरूपं ब्रह्म निर्गुणम् ॥
प्रवृत्ते वा निवृत्ते वा वर्त्ततां सोऽत्र वर्त्मनि । तथापि ब्रह्मरूपोऽसौ ज्ञेय ईदृक्समाधिमान् ॥
नारदः सनकाद्याश्च निवृत्ते वर्त्मनि स्थिताः । सप्तर्षिजनकाद्याश्च प्रवृत्ते वर्त्मनि स्थिताः ११॥
एतेषामुभयेषां तु भगवद्रूपनिश्चयः । अस्त्येकविध एवेति निर्गुणा उभये मताः ॥ १२ ॥
सम्यक्कृष्णस्वरूपस्य निश्चयं तु विनाऽत्र ये । निवृत्तधर्मनिरतास्त्यागिनश्च जितेंद्रियाः ॥१३॥
जितकामा जितरसाः प्रशांता अपरिग्रहाः । अप्येते सद्गुणा ज्ञेयाः पतितारश्च सत्पथात् १४॥
निवृत्तधर्मे संस्थातुं भगवन्निश्चयं विना । नैव शक्यमपि प्राज्ञैर्जेतुं चांतरवैरिणः ॥ १५ ॥
कृष्णनिश्चयवंतस्तु व्यवहाराल्पबुद्धयः । अविद्वांसोऽपि विज्ञेया महांतो ज्ञानिनोऽञ्जसा १६॥
कामादींश्चांतररिपून् प्रतापात्ते तु सत्पतेः । अनायासेन सहसा जयंत्येवेति दृश्यताम् ॥१७ ॥
अमृत हरिणेति वचो भणितं स निशम्य मुनिर्मुदमाप पराम् ।
अपरे च सदःस्थितयो मुनयो गृहिणस्तुतुषुश्च तदाश्रयिणः ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्तचत्वारिंशदधिकशततमस्तरंगः ॥१४७॥१४॥

शकाब्दे विक्रमार्कस्य गजाश्वसुभूमिते । भाद्रशुक्लद्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः । वासुदेवालयस्याग्रे स चक्रके उपाविशत् ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सितांबरो वृतो भक्तैरनेकैः स्वाग्रतः स्थितान्। सतः पप्रच्छ सर्वेषां हृद्दोषान् दूरयन् स च ॥
दुष्टोऽतिकठिनः स्वस्य स्वभावो भूरिदुःखदः। केनैकेन विचारेण नाश्येताशु मुमुक्षुणा ॥४॥
यं विनाऽन्यैः सहस्रैश्च विचारैरपि नैव सः। नाश्येत तं विचारं मे वक्तुमर्हथ साधवः ॥ ५ ॥
इति श्रुत्वापि तद्वाक्यं यदा प्रश्नस्य तेंऽजसा। न चक्रुरुत्तरं तर्हि स्वयमेवाह तान् स तत् ॥
स्वस्यातिदुःखदत्वेन शत्रुरेवायमस्ति मे। सर्वोपायैरतो नाश्यः स विचार इतीरितः ॥ ७ ॥
यथा स्वशत्रुः कश्चित्स्यात् स्वस्य नानार्थनाशकः। स्वस्वसूमात्राद्यपकृद्वालिदो मर्मभिद्वचाः ॥
ईदृशस्यास्य तु द्रोह एव स्वस्य मतिर्भवेत्। तथाविधा उपायाश्च क्रियेरन् बहुशः स्वयम् ॥
अन्यैः कृते च तद्द्रोहे स्वहृदि स्यात्प्रसन्नता। तथैव दुःस्वभावेऽपि कर्त्तव्या शत्रुधीर्दृढम् ॥
तन्नाशे च सदा यत्नः सावधानतयादरात्। सद्भिश्च तस्योत्खनने क्रियमाणे सदुक्तिभिः ॥११॥
हर्षितव्यं स्वहृदये ज्ञेया आशाश्च ते दृढम्। एवं हि वर्त्तमानस्य दुःस्वभावो विनश्यति १२॥
वर्त्तनं शत्रुभावेन दुःस्वभावे यदात्मनः। तद्विनाऽन्य उपायस्तु नास्त्येव हि तदुत्खनौ ॥१३॥
इति प्रश्नोत्तरं कृत्वा पुनः पप्रच्छ तान् हरिः। धर्मज्ञानविरागेभ्यो भक्तेश्चापि यथा क्वचित्।
न भ्रश्येत् पुरुषो यस्तु तस्य मे ब्रूत लक्षणम्। तेनेति पृष्टाः संतस्ते शेकुर्नैवोत्तराय तु १५॥
तानुवाच हरिर्यस्मिंस्तेजस्तु पुरुषे भवेत्। सोत्साहगंभीरमतिः स तेभ्यो न पतेत् क्वचित् १६॥
अनाधृष्यो भवेत्कैश्चिदपि बाल्यात्तु योऽग्निवत्। यत्स्थितौ चोपहासादि कर्त्तुं बिभ्युर्नरा स्त्रियः
लघुवाक्यं च यं वक्तुं शक्नुयान्नैव कश्चन। स तेजस्वीति विज्ञेयो धर्मादिभ्यः पतेन्न सः ॥
यदि मानो भवेत्तस्मिंस्तर्हि सोऽपि न दूषणम्। मुमुक्षाया बलिष्ठत्वात्तस्य नापकरोति सः ॥

श्रुत्वेति तस्यामृततुल्यवाचं ते साधवः प्रापुरतीव तोषम्।
सभोपविष्टा अपरे च भक्ताः सर्वे तमीशं विनयेन नेमुः ॥ २० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावष्टचत्वारिंशदधिकशततमस्तरंगः ॥१४८। १५ ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते। दशम्यां प्रौष्ठपच्छुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः। उपाविशच्चक्रकेऽसौ वासुदेवालयांतिके ॥ २ ॥
भूरिभक्तसदोंतःस्थं सितांबरधरं च तम्। बद्धांजलिपुटो मुक्तानंदोऽप्राक्षीत्तदीरितः ॥ ३ ॥
मया निष्ठाद्वयं पूर्वं त्वत्त एव श्रुतं प्रभो। भवत्स्वरूपनिष्ठैका धर्मनिष्ठा तथाऽपरा ॥ ४ ॥
तत्राद्याऽर्जुनतुल्येषु भक्तेषु स्यात्तव प्रभोः। युधिष्ठिरसमेष्वेव द्वितीया च भवेन्नृषु ॥ ५ ॥
एकस्मिन् पुरुषे द्वे च वर्त्तेयातां यथा प्रभो। तथाऽनुशाधि कृपया हितकर्त्तासि देहिनाम् ॥
दृढीकारे कृते चित्त एकस्या अपरा पुनः। शिथिला जायते तस्माद् द्विदाढ्योपाय उच्यताम् ॥

श्रीहरिरुवाच

कृष्णस्वरूपनिष्ठाया दृढीकारो विधीयताम्। तेनैव धर्मनिष्ठापि भविष्यति दृढा हृदि ॥ ८ ॥
पृथिवीधर्मसंवादे श्रीमद्भागवते हरेः। सत्यशौचादयो नित्या बहवः कथिता गुणाः ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णमेव समाश्रित्य साक्षाद्धर्मस्तु वर्त्तते । तद्वंश्याश्च गुणाः सर्वे ततोऽसौ धर्मधारकः ॥१०॥
प्रोच्यते धर्मवर्माऽसौ कृष्णो धर्मधुरंधरः । अतः स्वरूपनिष्ठायामन्या साहजिकी भवेत् ११॥
केवलं धर्मनिष्ठाया दृढीकारे तु चेतसि । कृष्णस्वरूपनिष्ठा स्याच्छिथिला नात्र संशयः ॥१२॥
इति प्रश्नोत्तरं दत्वा पुनराह स तं मुनिम् । प्रष्टव्यमन्यत्किंचिच्चेत्पृच्छयतां तर्हि हृद्गतम् ॥
पप्रच्छ मुक्तानंदोऽथ तं पंच विषयाः प्रभो । वैराग्येणैव जीयंते वाऽन्योपायेन केनचित् १४॥
यमुवाच हरिः साधो वैराग्यं त्वस्तु मास्तु वा । कृष्णोक्तेंद्रियरोधाख्यनियमैः स्याद्धि तज्जयः ॥
वैराग्येण श्रोत्रवृत्तिर्दुःशक्या क्लृप्तुमंतरे । अंगुल्याद्यैः कर्णरंध्ररोधे शब्दजयोऽजसा ॥ १६ ॥
अस्पृश्यास्पर्शनेनैव त्वचा स्पर्शजयोऽजसा । स्याद् दृशाऽनर्हवस्त्वीक्षात्यागाद्रूपजयस्तथा १७ ॥
कृष्णप्रसादांबुमिश्रान्नयुक्ताहारतः सकृत् । दुर्जयोऽपि रसः साधो साधुना जीयते द्रुतम् १८॥
अयोग्यगंधानाघ्राणात्तथा गंधोऽपि जीयते । एवं पंचापि विषया जीयंते नियमैर्दृढैः ॥ १९ ॥
वैराग्यवानपि पुमान् कृष्णनिश्चयवानपि । कृष्णोक्तनियमैर्हीनो विषयैरभिभूयते ॥ २० ॥
अतो हि नियमाः पाल्या विषयान् विजिगीषुभिः । वैराग्यादिगुणोपेतैरपि भक्तैः सदांजसा ॥
यावद्देहस्मृतिस्तावन्मच्छ्रितैः सकलैरपि । यथार्हं नियमाः पाल्या इत्याज्ञा मम वर्त्तते ॥२२॥
नियमादेः पालने स्याच्छ्रद्धाया यस्य तीव्रता । तस्योत्साहोऽपि तीव्रः स्यात्तत्फलं च तथाविधम् ॥
श्रद्धा च मध्यमा यस्य तस्योत्साहोऽपि मध्यमः । मध्यमं तत्फलं च स्यान्मुमुक्षोः पुरुषस्य हि ॥
मंदा श्रद्धा च यस्य स्यात्तस्योत्साहस्तथाविधः । फलं तदनुरूपं च भवत्यत्राद्य उत्तमः ॥ २५ ॥
अखंडानंदसाधुस्तं तदाऽपृच्छत्सतां पते । तीव्रश्रद्धः पुमान्केन लक्षणेनावगम्यते ॥ २६ ॥

श्रीहरिरुवाच

कृष्णस्य दर्शने साधो जायमानेऽन्यकर्मसु । क्रियमाणेषु तस्य स्यादुग्रता च त्वरा भृशम् २७॥
वार्त्तायां जायमानायां कथायां वा रमापतेः । स्यात्तथैव त्वरा तस्य क्रियमाणान्यकर्मसु २८ ॥
भूरिकालोऽपि तस्य स्यात्क्षणवत्कृष्णकर्मसु । कृष्णाज्ञापालने प्रीतिर्भवेच्च हृदयेऽधिका ॥ २९ ॥
लोके प्रतिष्ठितस्यापि स्वस्य स्यादादरोऽधिकः । साष्टांगनमनादौ तु निर्मानं कृष्ण तत्सताम् ॥
एवंविधैर्लक्षणैस्तु तीव्रश्रद्धः पुमान्मतः । तन्मध्यमत्वमांद्याभ्यामितरौ चापि पूरुषौ ॥ ३१ ॥
तीव्रश्रद्धस्य पुंसः स्युरिंद्रियाणि वशे द्रुतम् । मंदानि कुण्ठिताग्राणि ग्राम्यार्थग्रहणे तथा ॥
मध्यमश्रद्धपुंसस्तु तानि स्युर्विषयग्रहे । कर्हिचित्कुंठिताग्राणि तीक्ष्णाग्राण्यपि कुत्रचित् ३३ ॥
मंदश्रद्धस्य तानि स्युस्तीक्ष्णाग्राण्यर्थसंग्रहे । गोप्तुं शक्यो न तद्वेगस्तेन तद्वशगत्वतः ॥ ३४ ॥
मुक्तानंदस्तदापृच्छदिंद्रियाणां तु तीक्ष्णता । अपनोद्या कथं स्वामिन् प्रबलानां मुमुक्षुणा ३५ ॥
तमुवाच हरिः साधो त्यागिनां गृहिणां तथा । मर्यादा या निबद्धास्ति हरिणा धर्मवर्मणा ॥
तस्यामेव स्वेंद्रियाणि वर्त्तनीयानि सर्वथा । इतस्ततः समाकृष्य भ्रमंत्यशुचिवर्त्मसु ॥ ३७ ॥
ऐश्वरे वर्त्मनि शुचौ चरतां साधुशिक्षया । मुमुक्षोरिंद्रियाणां तु तीक्ष्णता नश्यति द्रुतम् ३८॥
अशुच्याहारविगम इंद्रियाणां तु सन्मते । अंतःकरणमप्यस्य ह्यनायासेन शुध्यति ॥ ३९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विरक्तो वाऽविरक्तो वा स्वेंद्रियाण्यत एव हि। ऐश्वरे वर्त्मनि दृढं रक्षंस्तानि जयत्यरम् ४० ॥
अखंडानंदसाधुस्तं पप्रच्छाऽथ हरिं प्रभो। मंदश्रद्धस्य पुंसस्तु श्रद्धावृद्धिः कथं भवेत् ॥ ४१ ॥

श्रीहरिरुवाच

कृष्णतद्भक्ततद्भक्तिमाहात्म्यं साधु सन्मुखात्। तेनादावधिगंतव्यं सेवित्वा प्रत्यहं सतः ४२ ॥
सति माहात्म्यबोधे तु श्रद्धा भागवती ध्रुवम्। विवर्द्धते ततस्तेन तदेव ज्ञेयमंजसा ॥ ४३ ॥

भगवतेत्युदितं वचनं मुनिः स तु निशम्य क्षुधोपममाप्तवान्।
अतिमुदं सकलाश्च तदाश्रिता मुनिजना गृहिणश्च सदःस्थिताः ॥ ४४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावूनपञ्चाशदधिकशततमस्तरंगः ॥ १४९ ॥ १६ ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते। इषस्य कृष्णैकादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य महीभृतः। वासुदेवालयाभ्याश गृहवेद्यां महासने ॥ २ ॥
उपाविशत्स तु निशि दीपिकाद्वयशोभितः। सितांबरधरो भक्तैर्वृतः स्वीयैः सहस्रशः ॥ ३ ॥
श्रुत्वा सद्भिर्गीयमानं सवाद्यं भगवद्यशः। प्रसन्नः स तदंते तान्स्वयमेवाऽब्रवीद्वचः ॥ ४ ॥
वपुः कृष्णस्य मायोत्थचतुर्विंशतितत्वयुक्। विदंति केचन बुधाः केचित्तद्रहितं तथा ॥ ५ ॥
तेषां ज्ञानं तत्र युक्तमिति मां ब्रूत साधवः। इति पृष्टे मुनिर्मुक्तानंदः प्रोवाच तं प्रभुम् ॥६ ॥
तत्वैर्मायामयैर्युक्तं ये त्वां जानंति हे हरे। न तेषां वेदनं युक्तं मायातस्त्वं परो यतः ॥ ७ ॥
विदुस्तद्रहितं ये तु चिद्रूपं त्वां बुधा हि ते। सम्यग्जानंतीति तस्य वचः श्रुत्वाऽब्रवीद्धरिः ८ ॥
चतुर्विंशतितत्वानि कथितानि भवंति वै। सांख्यशास्त्रे सजीवानि तदाधारः परः पुमान् ९ ॥
आधाराधेययोस्त्वस्ति साहचर्यं न भिन्नता। नाधारमंतराधेयं तद्भिना च स नोच्यते ॥ १० ॥
सापेक्षत्वं च शास्त्रेषु तयोः सर्वत्र दृश्यते। अतो हरिं विना नास्ति तत्वानां तु स्थितिः पृथक् ॥
यथा पृथ्व्यादिभूतानामाधारोऽस्ति वियत्तथा। तत्वानां कृष्ण आधारस्तस्मात्तानि कथं पृथक् ॥
पृथ्व्यादिदोषासंस्पृष्टमाधारोऽपि यथा वियत्। तत्वदोषैस्तथाऽस्पृष्टस्तदाधारः स वर्त्तते १३ ॥
एवं हि भगवद्रूपे तत्वयुक्ते प्रकीर्त्तिते। को बाधोऽस्त्यथ तद्धीने कीर्त्तिते च गुणोऽस्ति कः ॥
इत्युक्तः स यदा साधुर्हृष्टो नोवाच किंचन। दीनानाथाभिधो विप्रस्तदा प्रोवाच तं नमन् १५ ॥
ध्यायेद्योऽत्र भवद्रूपं पुमान्स्वहृदयेऽन्वहम्। तत्वयुक्तं स तद्विद्यात्तत्वहीनं च वा प्रभो १६ ॥

श्रीहरिरुवाच

यथादृष्टं कृष्णरूपं ध्यात्रा तु ध्येयमंतरे। नैव तत्र तु कर्त्तव्यस्तर्कोऽयं ध्यानबाधकः ॥ १७ ॥
अनंतकोटिब्रह्मांडाधार आत्मात्मनां प्रभुः। नियंता चाक्षरादीनां कृष्णोऽस्तीत्येव दृश्यताम् ॥
न कोऽपि यस्य तर्कः स्याद्रूपे भगवतो द्विज। निर्विकल्पस्थितिं प्राप्तः स्थितप्रज्ञो मतश्च सः ॥
लोकेऽपि यस्मात्स्वार्थस्य सिद्धिर्भाव्येति बुध्यते। न तस्मिन् गृह्यते दोषः कोऽपि केनापि कुत्रचित्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तुच्छस्वार्थस्य सिध्यर्थं स दोषादपि पूरुषात् । पुंसा तु लौकिकेनापि यदि दोषो न गृह्यते ॥
तर्हि भूरिस्वार्थसिद्धिहेतौ निर्दोषविग्रहे । कथं गृह्येत भक्तेन दोषो भगवति क्वचित् ॥ २२ ॥
स्वार्थसिद्धिर्महत्यस्ति कृष्णाद्भक्तस्य वांछिता । अज्ञानपापमुक्तिश्चाप्यकुतोभयतादिका ॥ २३ ॥
चरित्रेषु च कृष्णस्य लौकिकेष्वपि दोषधीः । भक्तेन न विधातव्या प्रीत्या गेयानि तान्यपि ॥
बाललीलां रासलीलामपि तस्य यथा शुकः । विरक्तो ब्रह्मनिष्ठोऽपि जगौ निःसंशयं मुनिः ॥
तथा मुमुक्षुणाऽप्यत्र भक्तेनाप्यनुरागतः । तस्य सर्वचरित्राणि सदा गेयान्यसंशयम् ॥ २६ ॥
तथैव कृष्णभक्तानामपि माहात्म्यमंजसा । ज्ञात्वा तेष्वपि न क्वापि कर्त्तव्या दोषधीरपि २७ ॥
यथोद्धवो महाबुद्धिर्माहात्म्यं कृष्णचेतसाम् । भक्तानां बहुलं जानन्प्रशशंस व्रजांगनाः २८ ॥
तथैव बहुधा मान्या यादृशास्तादृशा अपि । कृष्णभक्तास्तु भक्तेन भक्तिमाहात्म्यवेदिना ॥
स्वेष्टदेवस्य कृष्णस्य व्यापकस्यापि सर्वतः । असंगित्वं सदा ज्ञेयं भक्तेन तु मुमुक्षुणा ॥ ३० ॥
एवं भावयतो नित्यं ध्यानं कृष्णस्य सिध्यति । न तु तर्कमतेः क्वापि ध्यायतोऽपि रहःस्थले ॥

श्रुत्वेति वाचं स सुधोपमेयां हरेस्तुतोषाऽथ सदोनिषण्णाः ।
सर्वेऽपि भक्ता गृहिणश्च संतो यांतं प्रणेमुः स्वहितोद्यतं तम् ॥ ३२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पञ्चाशदधिकशततमस्तरंगः ॥ १५० ॥ १७ ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । कृष्णषष्ठ्यां सहोमासे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे आभयेर्निजमंदिरे । न्यषीदत्तूलपट्यां स सितवासा वृतो निजैः ॥ २ ॥
सूक्ष्मां तूलपटीं शुभ्रां वसानो भारतीं कथाम् । शृण्वन्प्रयागजिद्वक्त्रात्तदंतेऽसौ सतोऽब्रवीत् ॥
कुत्सिता अत्र पुरुषाः श्रूयंते बहवो भुवि । तत्रापि द्विविधा ज्ञेया अतिदुष्टा हि पूरुषाः ४ ॥
नास्तिकाः पुरुषा ये ये शुष्कवेदांतिनश्च ते । एषां द्वयानां संगस्तु महापापाधिको मतः ५ ॥
नास्तिका रामकृष्णादीनवतारानपि प्रभोः । राजतुल्यान् विदुस्तांश्च कर्माधीनान् ब्रुवंति च ॥
असुराणां हत्यया च संगेन परयोषिताम् । निरये पातमाहुश्च तेषामप्यधमा अहो ॥ ७ ॥
कर्मपाशाद्विमुच्यंते यन्नाम्नः कीर्त्तनादपि । महापातकिनोऽप्यंते नरा नार्यः सहस्रशः ॥ ८ ॥
तत्कर्मबंधवक्तारो नास्तिका अतिपापिनः । अतस्तेषां क्वचिदपि संगः कार्यो न सर्वथा ॥ ९ ॥
कुर्वंत एव कर्माणि जीवाः कालेन भूयसा । संप्राप्य केवलं ज्ञानं यांत्यैवेश्वरतां क्वचित् ॥१०॥
एवं हि वदतां तेषां मत एको जगत्प्रभुः । अनादिरीश्वरो नास्ति श्रितजीवभवापहृत् ॥ ११ ॥
तेषां संगात्कथं न स्याद् बुद्धिभ्रंशो नृणां मतः । सर्वथा स न कर्त्तव्य इत्याज्ञा मे निजान्प्रति ॥
वेदांतिनस्तु ये संति शुष्कज्ञानाभिमानिनः । ब्रह्मैव जीवरूपेण जातमित्येव मन्वते ॥ १३ ॥
ब्रह्मरूपा वयं पूर्णाः किं कार्यं साधनैस्तु नः । ब्रह्मज्ञानं न येषां ते कुर्वंतु साधनश्रमम् ॥१४॥
एवं वदंतः कुर्वंति यथेष्टाचरणं हि ते । महापापेऽपि नास्त्येव शंका तद्धृदये क्वचित् ॥ १५ ॥
सुरापरस्त्रीलुब्धानां निःशंकं कुर्वतामघम् । एतेषामपि संगस्तु न कार्यः सर्वथा क्वचित् ॥१६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ब्रह्मरूपेण मुक्तस्त्वं वदंतः स्वस्य तेऽबुधाः। बद्धत्वं ब्रह्मणो जातं नानुसंदधते ध्रुवम् ॥ १७ ॥
ब्रह्मैव जीवरूपेण जातमस्ति यदाऽखिलम्। संसृतिभ्रमणं तस्य प्राप्तं नेति विदुश्च ते ॥ १८ ॥
एवं हि स्वमते तेषां महदस्त्येव दूषणम्। तदज्ञात्वैव मन्यंते वयं मुक्ता इति भ्रमात् ॥१९॥
वृथा मुक्तत्वाभिमतेः स्वधर्मं नैव कुर्वते। कृष्णं ज्ञात्वा स्वसदृशं तद्भक्तिं च ततो न ते ॥२०॥
सत्यास्तु ज्ञानिनो ये वै वेदवेदांतपारगाः। ते तु नित्यं विदधते भक्तिं नवविधां हरेः ॥२१॥
श्वेतद्वीपे निरन्ना ये मुक्तास्ते ब्रह्मरूपिणः। कालकाला अपि हरिं ध्यायंत्यर्चंत्युपासते ॥ २२ ॥
बदर्यां तनुमुख्याश्च ऋषयोऽपि सहस्रशः। तपस्यंतो ब्रह्मरूपा नारायणमुपासते ॥ २३ ॥
तेषां कोट्यंशतोऽप्येषां नास्ति ज्ञानं न वै बलम्। तथापीशं न मन्यंते वर्तंते च यथारुचि २४॥
मुक्ताभिमानिनस्तस्मादेते ज्ञेया हि पापिनः। यास्यंति घोरान्नरकानत्र नैवास्ति संशयः ॥२५॥
संगेन कृष्णभक्तानां सतामस्ति यथा नृणाम्। अघक्षयस्तथैतेषां संगेनैवास्त्यघोच्चयः ॥ २६ ॥
नास्तिकानामतो नृणां शुष्कज्ञानवतां तथा। संगः क्वापि न कर्त्तव्य इत्याज्ञा पाल्यतां मम ॥

इत्येकं परमहितेन तेन गीतं पीयूषं वचनमथो निपीय सर्वे।
संतोषं परममवाप्य तस्य भक्ता ओमूचुः प्रणतिपरास्तमादरात्ते ॥ २८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकपञ्चाशदधिकशततमस्तरंगः ॥ १५१ ॥ १८ ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते। सहःकृष्णचतुर्दश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स सन्मठे। सितांबरः पार्श्विकयुक्तूलपल्यामुपाविशत् ॥ २ ॥
वृतः सद्भिरुदासीनो भूरिशोकाकुलो यथा। तूष्णीं घटीं स आस्ते स्म प्रोवाचाऽथ सतोऽग्रतः ॥
शुष्कज्ञानिमतं बोद्धुं तच्छास्त्रं संश्रुतं मया। पुरा स्मृतं तदधुना तेन शोकोऽस्ति मे महान् ॥
श्रवणादपि तस्य स्यात्कृष्णोपासनखंडनम्। न श्रव्याणि ततः सुज्ञैः शुष्कज्ञानिवचांसि तु ॥५॥
किंचित्प्रयोजनवशान्मया तु श्रुतमास तत्। तथाप्यक्षोभयच्चित्तं ममापि जनयच्छुचम् ॥ ६ ॥
इत्युक्त्वासौ पुनरपि भूत्वा शोकाकुलः क्षणम्। प्रोवाच साधून् द्रढयन् श्रोतव्यं ग्रंथमादरात्।
रामानुजाचार्यकृतगीताभाष्यकथां निशि। श्रुत्वा कदाचित्सुप्तोऽहमगमं स्वप्नमद्भुतम् ॥ ८ ॥
गतोऽहं दिव्यगोलोकं तत्र कृष्णस्य पार्षदाः। सहस्रशो लक्षशश्च दृष्टास्तत्सेवने रताः ॥ ९ ॥
केचित्तु कृष्णपद्यानि सवाद्यं सुस्वरं मुदा। दृष्टा मया तु गायंतो मुक्तादिग्रथितानि वै ॥१०॥
सानंदं गायतां तेषां मत्तवद्बहुघूर्णताम्। देहस्मृतिरपि प्रायो नासीदिति मयेक्षितम् ॥११॥
तत्राहमपि तैः साकमगायं भृशमादरात्। बहुवेलं गायतो मे विचारो हृदयेऽभवत् ॥ १२ ॥
हित्वेदृशीं कृष्णभक्तिं ये शुष्कज्ञानमानिनः। यथेष्टचारिणस्ते तु महादुष्टा न संशयः ॥ १३ ॥
मदाश्रितः कोऽपि पुमान्न तन्मार्गमुपाश्रयेत्। भक्तिं धर्मं च हित्वेति तेषां कार्यं हितं मया ॥
एवं विचारयन्नेव प्रतिबुद्धोऽभवं ततः। अत एतन्निषेधार्थं मयोपायो विधीयते ॥ १५ ॥
इत्युक्त्वा सकलान्साधून् शुकानंदं जगाद सः। मन्नामपत्रिकामद्य तूर्णं शुकमुने लिख १६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्युक्त्वा लेखयामास पत्रिकां तेन साधुना। हितकृद्धरिकृष्णोऽसौ स्वाश्रितान्सकलान्प्रति ॥
लिखामि सहजानंदः पत्रिकां स्वाश्रितान् प्रति। नारायणस्मृतिर्वाच्या पुंभिः स्त्रीभिश्च मेऽखिलैः
अवतारा भगवतो जायंते भुवि ये हरेः। नरोत्तमस्य कृष्णस्याऽक्षरधाम्नो जगत्पतेः ॥ १९ ॥
धर्मसंस्थापनार्थास्ते संत्यधर्मोच्छिदस्तथा। स्वधर्मज्ञानवैराग्यभक्तितद्रक्षणाय च ॥ २० ॥
यथा सीता रघुपतौ साध्वी निष्ठां दृढां व्यधात्। तथैव तेषु सा कार्या वर्त्तमाने विशेषतः ॥
मानसं पूजनं तस्य प्रीत्या कार्यं सदा हृदि। भक्तिर्नवविधा चाऽस्य कर्त्तव्या परमादरात् २२॥
प्रत्यक्षो भगवान् यर्हि न भवेद्भुवि तर्हि तु। प्रतिमा तस्य संपूज्या यथा लब्धोपचारकैः ॥२३॥
कृष्णस्यैवेह कर्त्तव्या सदा भक्तिर्मुमुक्षुणा। न ह्यन्यदेवतायास्तु साध्वी धर्मच्युतिर्यतः ॥२४॥
कृष्णस्य वा तदर्चा या ध्यानं कार्यं च चेतसि। न त्वन्यदेवताया वा सिद्धमुक्तस्य कर्हिचित् ॥
कृष्णतद्भक्ततद्धर्ममूलोत्पाटनकारणम्। शुष्कवेदांतितद्ग्रंथसंगः कार्यो न सर्वथा ॥ २६ ॥
धर्मशास्त्रोदितो धर्मः स्वस्ववर्णाश्रमोचितः। मदाश्रितैः पालनीय इत्याज्ञा मम वर्त्तते ॥२७॥
एतामाज्ञां मदीयां ये पालयिष्यंति पूरुषाः। नारदादेरिव हरौ तेषां भक्तिर्भविष्यति ॥ २८ ॥
आज्ञामेतां च या योषाः पालयिष्यंति मे भुवि। राधादेरिव तासां च भक्तिः कृष्णे भविष्यति
आज्ञामेतां ममोल्लंघ्य वर्त्तिष्यंते निजेच्छया। ये नरा याश्च नार्यस्ते भ्रष्टा यास्यंत्यसद्गतिम् ॥
एवं पत्रीं लेखयित्वोपादाय स्वकरे च ताम्। वाचयन्प्रशशंसाऽसौ सुप्रसन्नमना अभूत ॥३१॥
विधाप्य तत्प्रतिकृतीः सोऽष्ट ता दिक्षु सर्वतः। प्रेषयित्वा प्रसन्नः स्वं प्रत्यगादाश्रमं प्रभुः ॥

संतोऽपि सर्वे वचनामृतं ते निपीय तस्येत्यगमन् प्रमोदम्।
भक्तिं दृढामेव तदीयपादपद्मे विशेषेण च तन्वते स्म ॥ ३३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ द्विपञ्चाशदधिकशततमस्तरंगः ॥१५२॥ ॥ १६ ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते। पौषकृष्णचतुर्दश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्षितिपस्य सः। वासुदेवालयस्याग्रे चक्रके समुपाविशत् ॥ २ ॥
सितधोत्रो वसानश्च सूक्ष्मां तूलपटीं नवाम्। चित्रां सितचतुष्फालोपेतां शुक्लशिरःपटः ॥३॥
स्वदर्शनोत्कभक्तौघपरीतो हरिकीर्त्तनम्। गीतं सद्भिर्निशम्याऽसौ प्रसन्नस्तान् समब्रवीत् ॥४॥
मयाऽद्य प्रश्नः पृष्टोऽस्ति स्वावाले नित्यसेवितः। सोमादीन्प्रति तस्यैव कुरुतोत्तरमंजसा ॥५॥
इत्युक्त्वाऽश्रावयत्प्रश्नं शुश्रूषूस्तान्प्रभुर्हरिः। पुंसां समाधिनिष्ठानां मायातोऽस्ति परा स्थितिः।
कृष्णस्वरूपसंबंधस्तेषामस्ति तथा दृढः। ज्ञानेन्द्रियबलाधिक्यं तेषां भाव्यमतो ध्रुवम् ॥ ७ ॥
चतुर्विंशतितत्त्वानि मायाजातानि संति हि। जडचैतन्यरूपाणि भिन्नभिन्नक्रियाणि च ॥ ८ ॥
तत्राप्यस्तीन्द्रियेभ्योऽपि ज्ञानशक्तिः किलाऽधिका। मनआदिचतुष्कस्योभयद्रष्टुस्ततोऽधिका ॥
सर्वाधिकज्ञानशक्तिः स तु जीवोऽस्ति चिन्मयः। समाधिं प्राप्नुयाद्यर्हि स साक्षाद्राधिकापतौ।
तदेन्द्रियादिद्रष्टृत्वं सहित्वा ब्रह्मरूपताम्। प्राप्नोत्यतोऽस्ति संबंधः कृष्णेनाऽस्य दृढः खलु ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं समाधिनिष्ठं तु केचिदाहुरयं पुमान् । अल्पं वेत्त्यधुना पूर्वापेक्षयेति बुधा अपि ॥ १२ ॥
तस्मात्समाधिनिष्ठस्य ज्ञानं च बलमैन्द्रियम् । अस्ति पूर्वाधिकं किं वा न्यूनं ब्रूताऽस्य तूत्तरम् ॥
एतत्प्रश्नोत्तरं वक्तुं यर्हि ते नाऽशकंस्तदा । स्वयमेवाब्रवीत्स्वामी तान् यथावत्तदुत्तरम् ॥१४॥
मायामयमिदं विश्वं सजीवं सकलं जडम् । ब्रह्मसाक्षितयाऽऽविश्य करोत्येव हि चेतनम् ॥१५॥
स्वभावो ब्रह्मणो ह्येष जडं कुर्यात्तु चेतनम् । भक्तः समाधौ तत्साम्यं यातीति ज्ञानमेधते १६॥
शक्त्याधिक्यं त्विन्द्रियाणां न समाधेः फलं मतम् । तपोवैराग्यनिष्कामधर्मयोगैस्तु तद्भवेत् ॥
शुकादिवत्सिद्धदशां तपआद्यैः समेधितैः । प्राप्नुयुः पुरुषा नूनं न केवलसमाधिना ॥ १८ ॥
आल्प्येऽपि तपआदीनां न हि सिद्धदशा भवेत् । ज्ञानं तु प्राप्नुयाद् वृद्धिं सर्वेषां हि समाधिना ।
तपआदिवृद्ध्यभावाज्जनकस्यापि भूपतेः । नासीत्सिद्धदशा किंतु ज्ञानवृद्धिः समाधिना ॥२०॥
सिद्धास्तु नारदशुकसनकादिसमा भुवि । पाताले दिवि वा यांति स्वेच्छया धाम्नि चेश्वराः ॥
सिद्धिं येषामिन्द्रियाणि प्राप्तानि तपआदिभिः । सर्वत्राऽप्यप्रतिहता तेषां भवति वै गतिः २२॥
समाधिं केवलं प्राप्ता ये तेषां त्वैन्द्रियं बलम् । न्यूनं भवेन्न तु ज्ञानं तत्तु सम्यग्विवर्द्धते २३॥
तेषां तु वर्त्तनं सर्वलोकेभ्योऽस्ति विलक्षणम् । अत एवार्जुनं प्राह कृष्णस्तत्तु तथाविधम् २४॥
या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥
अंतरात्मोन्मुखा यस्य दृष्टिर्वर्त्तेत योगिनः । तस्येंद्रियादिचेष्टासु शून्यभावो भवेद् ध्रुवम् २६॥
अतो गुणात्मकधियो ये समाधिमतां नृणाम् । नैर्गुण्यशालिनां प्राहुर्ज्ञानाल्प्यं तेन तान्विदुः ॥
यदा देहेंद्रियादिभ्यो वर्त्तंते ते पृथक्तया । तदानीं यादृशं तेषां विशुद्धं ज्ञानमस्ति हि ॥ २८ ॥
तथैव वर्त्तमानानामागत्य वपुरादिषु । तेषां ज्ञानं न वै ह्रासं प्राप्नोतीत्यवधार्यताम् ॥ २९ ॥
प्रवृत्तमार्गं हित्वैते यदा तु तपआदिषु । वर्त्तेरंस्तर्हि यायुर्वै संसिद्धिं सनकादिवत् ॥ ३० ॥

श्रुत्वेति वाचं वृषनंदनस्य ते साधवः साधु सुधोपमेयाम् ।
प्रपेदिरे भूरितरं प्रतोषं सदोनिषण्णा गृहिणश्च सर्वे ॥ ३१ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ त्रिपञ्चाशदधिकशततमस्तरंगः ॥ १५३ ॥ २० ॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । पौर्णमास्यां तपस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स भूपतेः । वासुदेवालयस्याग्रे न्यषीदत्पीठ उत्तमे ॥ २ ॥
सितांबरधरो भक्तैरनेकैः परितो वृतः । गीतं श्रुत्वा हरियशः संतुष्टः सोऽब्रवीत्ततः ॥ ३ ॥
शृण्वंतु सादरं सर्वे कुर्वे वार्त्तां हिताय वः । मया व्यासकृता ग्रंथाः सर्वे सम्यक् श्रुता इह ॥
ततस्तदीयसिद्धांतः श्रेयस्कृत्सर्वदेहिनाम् । यो धिया निश्चितस्तं वः कथयामि समासतः ॥
सर्वकर्त्ता सर्वहर्त्ताप्येकोऽस्ति पुरुषोत्तमः । तस्यैव हि चरित्राणि तद्भक्तानां च सर्वशः ॥६ ॥
तेषु ग्रंथेषु व्यासेन वर्णितानि भवंति हि । तथा वर्णाश्रमाणां च धर्माः सर्वेऽपि वर्णिताः ॥७॥
तत्र धर्मैः केवलैस्तु नृभिः सम्यगनुष्ठितैः । त्रिवर्गसिद्धिः कीर्त्तिश्च दैहिकं च सुखं भवेत् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तुरीयपुरुषार्थस्य सिद्धिस्तु हरिणा भवेत् । तदेकांतिकभक्तैश्च सेवितैर्नान्यथा क्वचित् ॥ ९ ॥
परोक्षकृष्णतद्भक्तमाहात्म्यं बुध्यते यथा । तथा प्रत्यक्षभगवत्तत्सन्माहात्म्यवेदनम् ॥ १० ॥
यत्तदेवाऽत्र कथितं निःश्रेयसकरं परम् । एष हि व्याससिद्धांतः सर्वैर्ज्ञेयः स सर्वथा ॥११॥
मानुष्यलब्धिः सफला येन स्याद्भ्रमदात्मनाम् । तममुं यत्नतो विद्यान्मुमुक्षुस्तु पुमानिह ॥
अद्य वा लक्षवर्षांते पुमान्वेत्त्यत्यमुं यदा । तदैव संसृतेर्मोक्षो भविष्यति न चान्यथा ॥१३॥
महतां नारदादीनां विधायापि समागमम् । अयमेवास्ति वेद्यो वै वेद्यं यत्ते ब्रुवंत्यमुम् ॥१४॥
प्रत्यक्षकृष्णतद्भक्तमाहात्म्यज्ञानमस्ति यत् । यस्य तत् सुदृढं तस्य क्वापि पातभयं न हि ॥१५॥
एतावतीं विधायासौ वार्त्तां भक्तहितावहाम् । श्रीवाटिकामुपागच्छत्सह भक्तजनैस्ततः ॥१६॥
तत्राप्याम्रतले वेद्यां न्यषीदन्मंचकोत्तमे । भक्ता निषेदुः पुरतस्तस्य सर्वेऽपि तद्दृशः ॥१७॥
पीतपुष्पधृतापीडो मल्लिकाकर्णभूषणः । मल्लिकापुष्पहारश्च स प्रोवाच पुनः सतः ॥ १८ ॥
जीवानामीश्वराणां च स्वप्नावस्थाऽस्ति साधवः । ईदृशी दृश्यते तत्र सृष्टिर्भोगाश्च सर्वशः ॥
तत्सृष्टिभोगरूपत्वं जीवेशा एव यांति किम् । सृष्टिर्भोगाश्च संकल्पैस्तेषामेवोद्भवंति वा ॥२०॥
जीवेशेभ्यः परः किं वा भगवानेव तादृशीम् । सृष्टिं भोगांश्च निर्माय दत्ते ब्रूताऽस्य तूत्तरम्
इति पृष्टास्तु ते संतो यदा सम्यक्तदुत्तरम् । न विदुस्तर्ह्यसावेव तदुवाचाखिलार्थवित् ॥२२॥
न जायंते सृष्टिभोगरूपां जीवेश्वरास्तदा । न कुर्वंते च संकल्पैः सृष्टिं भोगैश्च तत्र ते ॥२३॥
किंतु तेभ्यः परस्त्वीशस्तेषां कर्मफलप्रदः । भगवानेव तत्कर्मानुसारेण तदाखिलाम् ॥२४॥
सृष्टिं भोगांश्च कुरुते तद्भोगायैव मायया । जाग्रतीव तदाप्येते तत्रासक्ता भवंति हि ॥ २५ ॥
तदस्थिरत्वं भ्रांतत्वं यत्तु तत्र च वर्त्तते । तत्तु स्वप्नस्थानकंठयोगेनैव प्रतीयते ॥ २६ ॥
ईदृगेवास्ति तत्स्थानमीश्वरेण विनिर्मितम् । ज्ञानिनः कृष्णभक्ता ये ते तज्जानंति नेतरे ॥ २७ ॥
प्राधान्यमस्ति देशस्य क्वचित्कालस्य च क्वचित् । क्वचिच्च कर्मणोऽप्यस्ति मायायाश्च तथा क्वचित्
क्वचिदस्ति हरेः साक्षात्प्राधान्यमिति योगिनः । तद्भक्ता ज्ञानिनो विद्युस्तत्र तत्र यथोचितम् ॥
अज्ञास्त्वेतेष्वेकतमं स्वेन ज्ञातं तु यद्भवेत् । विद्युः सर्वत्र तस्यैव प्राधान्यं न तु पूर्ववत् ॥
एते देशादयः संति शक्तयः परमात्मनः । तत्प्रेरिताः प्रवर्त्तंते तत्तत्कार्ये तदिच्छया ॥ ३१ ॥
मंत्र्यमात्यादयः सर्वे नृपाधीना यथा तथा । तदधीना भवंत्येते स कृष्णस्तु स्वराट् प्रभुः ॥

वार्त्तां विधायेति हरिः पुनः स्वं स्थानं ततो दुर्गं इयाय राज्ञः ।
संतोऽपि ते तस्य वचोऽमृतं तत्पीत्वा मुदं भूरितरामवापुः ॥ ३३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ चतुःपंचाशदधिकशततमस्तरंगः ॥१५४॥२१॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । दशम्यां फाल्गुनस्यांते वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य नरेशितुः । वासुदेवालयाभ्याशे मंचके स उपाविशत् ॥ २ ॥
त्यागिभिर्गृहिभिर्भक्तैर्वृतः स धवलांशुकः । स्वाग्रोपविष्टानवदद्यागिनः करुणानिधिः ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भगवंतं भजंतोऽत्र वर्त्तंते बहवो नराः । तत्र केचिच्छूरसमाः संत्यन्ये शिथिला अपि ॥ ४ ॥
तत्राद्यानामेकमेव लक्ष्यं भवति सर्वदा । सर्वथा भगवद्धाम गम्यमेवेति नेतरत् ॥ ५ ॥
प्रवेशयंति नैवैते विना कार्ष्णं निजांतरे । संकल्पं कंचन क्वापि न विघ्नान् गणयंति च ॥ ६ ॥
प्रारब्धाप्ते सुखे दुःखे दैहिके तुल्यदर्शनाः । समा माने चापमाने मृत्युजीवितयोस्तथा ॥७ ॥
भजंतोऽपीतरे कृष्णं तर्कान् कुर्युः सहस्रशः । सुखे दैह्ये सहर्षाश्च दुःखे शोकाकुलास्तथा ॥
यथा देहसुखं कृष्णं भजिष्यामः शनैः शनैः । अतिकष्टेन किंतु स्यादित्येवं ते विदुर्हृदि ॥
पराभूयंत एते तु विघ्नैर्नानाविधैरपि । अतस्त्यक्त्वैव शैथिल्यं शूरैर्भाव्यं मदाश्रितैः ॥ १० ॥
कृष्णसंबंधरहिताः संकल्पा हृदये यथा । न भवेयुस्तथा यत्नः कर्त्तव्यश्चाप्रमादिभिः ॥ ११ ॥
इत्युक्त्वाह स्ववृत्तांतं दृष्टांतार्थं तु स प्रभुः । अहं पुरा श्रीनगरमगमं दुर्गपत्तनात् ॥ १२ ॥
तत्राऽकार्षं प्रतिष्ठां च नरनारायणप्रभोः । जनास्तु लक्षशस्तत्र समेताः सस्त्रियोऽभवन् ॥१३॥
देवप्रतिष्ठां कृत्वाऽहं भोजयित्वाऽखिलान् द्विजान् । जयतल्पपुरं प्राप्तो हृदि तत्र व्यचारयम्
यावंतस्तु जना दृष्टाः प्रवृत्तिर्यावतीक्षिता । तद्वासनाहृदः सर्वा निष्कास्येति विचारितम् ॥
स्थिरीकृता ततो दृष्टिः सावधानतयांतरे । तत्संकल्पं जायमानं मूलतश्चाच्छिदं ततः ॥१६॥
देहसौख्यानादरणाद्वेतद्यत्नपरिश्रमात् । मम देहेऽप्यभूद्रोगः खाद्यपेयादिविस्मृतेः ॥ १७ ॥
विचारपर एवाहं कथंचिदिह मत्तवत् । आगत्य न्यवसं संतः सदांतःस्थिरवीक्षणः ॥१८॥
ततो लक्ष्मीपुरगमाप्याग्यथाहमिहाऽभवम् । तथैव जातोऽनुदिततत्संकल्पोऽमलांतरः ॥१९॥
यदागंतुकसंकल्पा निवृत्ता हृदयान्मम । तदाऽलौकिकमाश्चर्यं दृष्टमंतर्दृशा मया ॥ २० ॥
देवा देवांगनास्तेषां भोगा नानाविधास्तथा । रमणीया दृश्यमाना आसन्नद्भुतदर्शनाः ॥२१॥
दृष्ट्वापि तान्विकारो मे कृष्णमूर्त्यैकचेतसः । यदा नाभूदणुरपि तदाऽपुर्विस्मयं सुराः ॥२२॥
आहुश्च ते मां धन्योऽसि कृष्णैकांतिकभक्तराट् । यतो मनस्ते कुत्रापि विना कृष्णं न सज्जति ॥
श्रुत्वा तेषां वचस्तत्तु मम धैर्यमभूद् दृढम् । ततो मनः प्रति मया निर्भयेनोदितं वचः ॥२४॥
जानामि त्वामहं धूर्त्तं न हि त्वां गणयाम्यहम् । त्वद् बिभेमि न वै किंचिन्नियंतासि तव ध्रुवम्
यदि कार्ष्णं विनाऽन्यं त्वं संकल्पमणुमात्रकम् । अपि कर्त्ता तर्हि त्वां चूर्णयिष्यामि तत्क्षणम्
एवमेव मया बुद्धिं चित्तं चाहंकृतिं प्रति । निर्भयं वाक्यमुदितं वर्त्तिताः स्ववशे च ते ॥२७॥
कृष्णस्यैव हि संकल्पा मनसा कारिता मया । तस्यैव निश्चयो बुद्ध्या कारितश्च न हीतरः
तस्यैव चिंतनं नित्यं चेतसा कारितं तथा । तद्दासत्वाभिमानश्चाऽहंकारेणापि कारितः ॥२९॥
ततो मार्त्यांश्च दैवाश्च संकल्पाः सकला अपि । निवृत्ता अथ दृष्टार्थाः परमां विस्मृतिं गताः
आरोग्यं च ततो देहे ममाऽभूत्खलु साधवः । इति वार्त्ता कृता तेन शिक्षणायैव तत्सताम्
स्वयं तु भगवानस्ति पूर्णकामोऽखिलार्थदः । ब्रह्मधामाधिपः सर्वेश्वरेशः पुरुषोत्तमः ॥ ३२ ॥
सर्वावतारधर्त्ता च सर्वोपरि स्थितः सदा । पुनः सतोऽब्रवीदर्थं तमेव द्रढयन् स च ॥ ३३ ॥
श्रीवासुदेवमाहात्म्ये धर्माः संति प्रकीर्त्तिताः । एकांतिकानां भगवद्भक्तानां सर्व एव हि ॥
चिद्रूपेणात्मना कार्या धर्मज्ञानविरागयुक् । भक्तिर्भगवतो नित्यमनन्येनैव भावतः ॥ ३५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णेतरो वासनाया लेशोऽपि हृदयाद्द्रुतम् । निष्कासनीयो यत्नेन न विश्वस्यं च मानसे ॥
एवंविधाः साधवो ये ते हि सर्वाधिका मताः । तेभ्यः परं भगवतो न किंचिदपि विद्यते ॥
अत एव प्रसन्नस्तान् स्वांतिके ह्येव रक्षति । सेवां मुक्त्यधिकां स्वस्य हरिस्तेभ्यो ददाति च ॥
ऐश्वर्याणि ब्रह्मधाम्नि यानि संत्यखिलान्यपि । तान्येतदर्थकान्येव भवंतीत्यवगम्यताम् ॥३९॥
यथैश्वर्यं पितुर्यत्तत्पुत्राणामेव निश्चितम् । तथैतदपि विज्ञेयं यदि प्रीतिः परस्परम् ॥ ४० ॥
यादृक्प्रतापः कृष्णस्य तद्भक्तानां च तादृशः । प्रतापो जायते नूनमाज्ञाऽप्रतिहता तथा ॥४१॥
ब्रह्मांडानामीश्वरा ये ब्रह्मरुद्रादयश्च ते । श्रीकृष्णाय यथा तद्वद्बलींस्तेभ्योऽर्पयंति हि ॥४२॥
एवं विचार्य तुच्छार्थसंकल्पांस्तैर्हृदोऽखिलान् । निष्कास्य कृष्ण एवैका निष्ठा कार्या दृढं सदा
कृष्णं चिंतामणिमिव ये तु प्राप्ता नरा इह । न तेषां दुर्लभं किंचिद्विद्यते क्वापि कर्हिचित् ४४॥

इति तस्य वचोऽमृतं मुदा सकलाः साधुजना निपीय ते ।
तुतुपुर्हृदये सदोगता गृहिणश्चाप्यखिलास्तदाश्रिताः ॥ ४५ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ पञ्चपञ्चाशदधिकशततमस्तरंगः ॥१५५॥२२॥

शकाब्दे विक्रमार्कस्य गजाश्ववसुभूमिते । एकादश्यां ज्येष्ठशुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः । वासुदेवालयस्याग्रे स न्यषीदत्सदासने ॥ २ ॥
शुक्लांबरधरो भक्तैस्त्यागिभिर्गृहिभिश्च सः । परीतः पुरतः साधूंन्निषण्णानब्रवीत्स्वयम् ॥३ ॥
विचारितं मया त्वद्य मनोरूपं हि साधवः । जीवात्पृथक्तया तत्तु सम्यङ्नैव हि दृश्यते ॥४॥
जीवस्यैतत्करः कश्चिदिति निश्चयते ततः । प्रवृत्तिस्तस्य तु द्वेधा सर्वदेहेषु वर्त्तते ॥ ५ ॥
उष्णकाले यथैवोष्णं सविषं लोकमारकम् । हिमं च हिमकाले वा तत्तथैवास्ति हि द्विधा ६॥
मनस्तदिंद्रियद्वारा विषयानभिधावति । सुखदा यदि ते तर्हि भवत्युष्णोपमं तपत् ॥ ७ ॥
सुखदा यदि ते तर्हि जायते तद्धिमोपमम् । श्रेयोमार्गादुभयथाप्येतत्पातयति ध्रुवम् ॥ ८ ॥
एकत्र सुखिनं कृत्वा जीवमन्यत्र दुःखिनम् । हिमोष्णवन्मनो ह्येतज्जीवं भ्रंशयदीक्ष्यते ॥९॥
तद्येषां विषयान्प्राप्य दुःखदान्नोत्तपेत् क्वचित् । सुखदान्प्राप्य शीतं च न स्यात्संतस्त उत्तमाः ।
बालस्वभावं च मनो ज्ञेयमेतन्मनीषिभिः । वारितोऽपि यथा बालः शस्त्राग्न्यादिं जिघृक्षति ॥
यदि तद्ग्राह्यते तेन तदा दुःखी भवेत्स तु । न ग्राह्यते तदाप्येष रुदन् दुःखायते भृशम् ॥
तथैतदपि दुःखि स्याद्विषयान् ग्राहितं भृशम् । अग्राहितं च विमुखं भूत्वा दुःखायते भृशम् ॥
अतो येषां न विषयैः सुखि दुःखि च तद्भवेत् । कृष्ण एव रतं च स्यात्साधवस्ते मया मताः ॥

सुधोपमेयां हरिवाचमित्थं निशम्य सर्वेऽपि सदोनिषण्णाः ।
ते साधवो भूरितरं प्रतोषं प्रापुस्तथाऽन्ये गृहिणोऽपि भक्ताः ॥ १५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ षट्पञ्चाशदधिकशततमस्तरंगः ॥ १५६ ॥२३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नंदाश्ववसुभूमिते । अष्टम्यां नभसः शुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरात्स्वामी लक्ष्मीवाटीमुपेत्य सः । आम्राधस्ताद्वेदिकायां न्यषीदद्धवलांशुकः ॥ २ ॥
सन्मल्लिकास्रगापीडं वृतं भक्तैः सहस्रशः । मुक्तानंदो मुनिर्नत्वा तं पप्रच्छ कृतांजलिः ॥३॥
येषां स्यादचला निष्ठाऽक्षरधामाधिपे त्वयि । तेषां कश्चन विक्षेपस्त्वंतरायो भवेन्न वा ॥ ४ ॥

श्रीहरिरुवाच

निष्ठावंतस्तु पुरुषा भवंति द्विविधा मुने । एके सांख्यविदस्तत्र योगज्ञा इतरे तथा ॥ ५ ॥
तत्र सांख्यविदो ये ते विदुः सर्वमिथत्तया । नराणां सुखमेतावदेतावच्च दिवौकसाम् ॥ ६ ॥
ब्रह्मादीनां तथैतावद्देतावद्भूबिलौकसाम् । ब्रह्मांडाद् बहिरेतावत्सुखमस्तीति तेंऽजसा ॥ ७ ॥
सप्रमाणं विनिश्चित्य कालग्रासेषु तेषु च । वैराग्यं भृशमापद्य कृष्ण एव रता दृढम् ॥ ८ ॥
प्रीतिभाजां भगवति कालकाले महासुखे । तेषां ज्ञानबलाधिक्यं भक्तानां वर्त्तते दृढम् ॥९॥
अतो न कोऽपि विक्षेपस्तेषामस्त्यंतरायकृत् । सर्वं ज्ञानप्लवेनैव वृजिनं संतरंति ते ॥ १० ॥
ये तु योगविदस्तेऽत्र वृत्तिस्थैर्यविचक्षणाः । कृष्ण एवाऽखंडवृत्तिं रक्षंत्यचलनिश्चयाः ॥ ११ ॥
देशकालादिवैषम्ये क्वचित्तेषां तु कृष्णतः । अन्यत्रापि व्रजेद् वृत्तिराल्प्याज्ज्ञानबलस्य हि ॥
येषां त्वस्त्युभयज्ञानं ते तु भक्तोत्तमोत्तमाः । क्वापि केनापि विघ्नेन नास्ति तेषां पराभवः ॥
ब्रह्मधामस्थभगवन्मूर्त्तेरप्यत्र कर्हिचित् । वृत्तिर्निमेषार्द्धमपि न तेषां गच्छति ध्रुवम् ॥ १४ ॥

हरिकृष्णमुखोद्भूतं वचस्त्विति तुल्यं सुधया निशम्य सः ।
भृशमाप मुदं सदग्रणीरितरे साधुजनाश्च तच्छ्रुताः ॥ १५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्तपंचाशदधिकशततमस्तरंगः ॥ १५७ ॥२४॥

शकाब्दे विक्रमार्कस्य नंदाश्ववसुभूमिते । कृष्णषष्ठ्यां नभोमासे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स वेश्मनः । वित्तर्द्यां दक्षिणास्यस्य न्यषीदन्मंचकोत्तमे ॥ २ ॥
सितसर्वांबरो भक्तैरनेकैः परितो वृतः । स्वाग्रोपविष्टान् पप्रच्छ साधून् स स्वयमेव हि ॥ ३ ॥
एकोऽस्ति भगवद्भक्तस्त्यागिवेषोऽखिलान् वृषान् । देहेन रक्षन्विषयभोगेच्छावान्हिजांतरे ४ ॥
अन्यस्त्वस्ति गृही भक्तः स्त्रीधनादिप्रसंगवान् । निर्वासनांतःकरणः परिचर्यारतः सताम् ५ ॥
देहांत एतयोः संतः कीदृशी भविता गतिः । सदृशी वाऽधिका न्यूना विचार्य ब्रूत तत्तु मे ॥
गोपालानन्दसाधुस्तं तदोवाच सदग्रणीः । गतिर्भविष्यति स्वामिन् पृथगेवोभयोरपि ॥ ७ ॥
त्यागी देहं विहायाऽत्र देवलोकं स यास्यति । विषयासक्तचित्तत्वान्न तु ब्रह्मगतिं प्रभो ॥ ८ ॥
भक्तत्वाद्भगवांस्तस्मै विषयांस्तदभीप्सितान् । दास्यत्यथ स तान् भुक्त्वा कालेन भविता नरः ॥
ततो विधाय सत्संगं भूत्वा निर्वासनांतरः । दृढभक्त्या भजन् कृष्णं प्राप्स्यति ब्रह्मधाम सः ॥
गृहस्थो हरिभक्तस्तु देहांते ब्रह्मधाम सः । निर्वासनांतरत्वात्तु सद्यः प्राप्स्यति निश्चितम् ११ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति प्रश्नोत्तरं श्रुत्वा हरिस्तं साधुमूचिवान् । युक्तमेव त्वया साधो कृतं प्रश्नोत्तरं त्विदम् ॥
मुक्तानंदोऽथ तं नत्वा साधुः पप्रच्छ सत्पते । अंतःस्थवासना हातुमिच्छन् कुर्यान्नरः किमु ॥

श्रीहरिरुवाच

साधूनां परिचर्यायां व्यसनं यस्य सर्वदा । जायते सुदृढं तस्य वासनानां क्षयो भवेत् ॥ १४ ॥
स्वयंप्रकाशानंदोऽथ तं पप्रच्छ हरे भवान् । अतिप्रीतो भवेत् कृष्णो येनोपायेन तं वद १५ ॥

श्रीहरिरुवाच

यथा दरिद्रावस्थायां सत्सु प्रीतिश्च दीनता । तथैव धन्यवस्थायां सा चेत्तुष्येद्धरिर्भृशम् ॥
ग्रामस्यैकस्याधिपत्ये पंचानां वा स्वकर्मणा । दशानां वा क्वचिज्जाते राज्ये पंचाशतोऽपि वा ॥
शतस्य वापि ग्रामाणां राज्ये वाऽप्यखिलक्षितेः । जातेऽपि हरिभक्तेषु सत्सु प्रीतिर्भवेद् भृशम् ॥
दारिद्र्य इव दैन्यं च तेषु स्वाद्यस्य धीमतः । पुंसस्तस्मिन् भगवतः प्रीतिः स्यादधिका ननु ॥
अथ यस्तु भवेत्त्यागी सतां सेवापरायणः । दैन्यभाक् तेषु नित्यं च मानस्तंभविवर्जितः २० ॥
भगवत्कृपया तस्य जातेष्वैश्वर्यलंभने । सत्सु प्रीतिश्च दैन्यं च यथापूर्वं भवेद्यदि ॥ २१ ॥
तर्हि तस्मिन्नपि हरेरतिप्रीतिर्भवेन्मुने । अतः संतोऽतिभावेन सेवनीयास्तदिच्छुना ॥ २२ ॥

सुधासमं वाक्यमितीश्वरस्य साधुः स चान्येऽपि निशम्य संतः ।
संतोषमापुर्भृशमंतरे ते सदोनिषण्णा इतरे च भक्ताः ॥ २३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावष्टपञ्चाशदधिकशततमस्तरंगः ॥ १५८ ॥२५ ॥

शकाब्दे विक्रमार्कस्य नंदाश्वसुभूमिते । एकादश्यां भाद्रशुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स भूभुजः । वासुदेवालयस्याग्रे न्यषीदत्पीठ उत्तमे ॥ २ ॥
सितवासा वृतो भक्तैस्त्यागिभिर्गृहिभिश्च सः । आनंदयन्निजान्सर्वान्समुवाच स्वयं हि तान् ॥
यस्तु स्याद्भगवद्भक्तस्तेन कार्यं प्रियं सदा । कृष्णस्य च तदीयानां नाप्रियं तु कदाचन ॥ ४ ॥
भक्त्यंतरायकर्त्ता तु स्वसंबंधिजनोऽपि चेत् । तर्हि त्याज्यः स यत्नेन स्वस्वभावश्च तादृशः ५॥
भगवद्विमुखानां च पक्षः कार्यो न कर्हिचित् । भरतेन यथा मातुः पक्षपातः कृतो न हि ६ ॥

आत्मज्ञानं च वैराग्यं यथा धर्मो य आत्मनः ।
दृढः स्याद् गुणता तेषां कार्या भक्तेस्तु मुख्यता ॥ ७ ॥

एषामन्यतमो यस्तु भक्तौ स्यादंतरायकृत् । गुणोऽपि स तु विज्ञेयो नूनं दोष इवाहितः ॥८॥
एवं यो यो भवेद्दोषः स स शोध्यः प्रयत्नतः । न तु दोषोऽपि गुणवन्मान्यो मानिजनैरिव ९॥
भजतां राधिकाकांतं पुंसामेवागुणः क्वचित् । न ग्राह्योऽथ ग्रहीतव्यो गुण एव हि तद्गतः ॥
योऽन्येषु दोषदर्शी स्यात्स्वस्मिंस्तु गुणदृक् पुमान् । सत्संगी हरिभक्तोऽपि स स्वर्द्धविमुखो मतः ॥
कृष्णतद्भक्तदोषेक्षा स्वगुणेक्षा च यस्य सः । प्राप्तोऽपि पदवीमुच्चामचिरेग ततः पतेत् ॥ १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्युक्त्वा ब्रह्मवैवर्त्तपुराणोक्तां तदर्थिकाम् । राधाश्रीदामपतनकथामकथयत्स च ॥ १३ ॥
ततः स प्राह यो भक्तः स्वस्यैवाऽगुणदृग्भवेत् । गुणग्राही तथाऽन्येषां तस्य भक्तिर्विवर्द्धते ॥
विपरीतस्तु पुरुषो व्यवहारेऽतिबुद्धिमान् । भजन्नपि हरिं सोऽन्ते भविष्यति पराङ्मुखः १५ ॥
यो गुरुः स निजं शिष्यं साधुवर्त्मं सुशिक्षयेत् । यद्यादरेण शिष्यस्तु गृह्णीयाद्धितमित्यदः ॥
तर्हि तस्मिन्नतिप्रीतिर्गुरोर्भवति सर्वथा । तया च सोऽचिरेणैव सिद्धिमाप्नोति वांछिताम् ॥
एवं ममापि वचनं विदित्वा हितमात्मनः । यो ग्रहीष्यत्यादरेण साधुर्वापि गृही पुमान् १८ ॥
तस्मिन्भविष्यति प्रीतिर्ममाप्यतिशयेन हि । औदासीन्यं तथाऽन्यस्मिन्निति जानीत सत्तमाः ॥

इति प्रभोस्तस्य वचोऽमृतं ते निपीय सर्वेऽपि सदोनिषण्णाः ।
संतो गृहस्थाश्च मुदं प्रपद्य तद्धारयंति स्म महादरेण ॥ २० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावूनषष्ट्यधिकशततमस्तरंगः ॥ १५९ ॥२६॥

शकाब्दे विक्रमार्कस्य नंदाश्ववसुभूमिते । एकादश्यामूर्जशुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वितर्दौ दक्षिणास्यस्य न्यषीदन्मंचकोत्तमे ॥ २ ॥
सितसर्वांबरधरो नानाभक्तगणैर्वृतः । मंदारपीतधवलपुष्पस्त्रक्शेखरार्चितः ॥ ३ ॥
पप्रच्छ मुक्तानंदं स साधुवर्यं पुरःस्थितम् । क्रोधोदये तु भवतो निमित्तं किंनु वर्त्तते ॥ ४ ॥
मम तूत्पद्यते नैव क्रोधः स्वार्थस्य सिद्धये । भूरिद्रव्यविनाशस्य कर्त्तर्यपि न मेऽस्ति रुट् ५ ॥
यदि कश्चिद्धर्मलोपं कुर्याद्वा रंकपीडनम् । गृह्णीयाद्वाऽन्यायपक्षं तस्मिंस्तूत्पद्यते हि रुट् ६ ॥
साप्यल्पिकाऽल्पवृत्तिश्च न ग्रंथिं जनयत्यसौ । कियत्कालं तिष्ठति ते क्रोधस्तद्वद सोऽब्रवीत् ॥
यदाऽहं कस्यचिद्वीक्षे वैपरीत्येन वर्त्तनम् । प्रतिपक्षं च साधूनां तस्मै क्रुध्याम्यहं तदा ॥ ८ ॥
किंतु क्रोधः सद्य एव शांतिमेति न तिष्ठति । तमुवाच हरिः कीदृक् विचारोऽस्ति त्वया कृतः ॥
स ऊचे ते हरेः सम्यग्माहात्म्यं वेद्म्यहं हृदि । अतो यथा प्रसन्नः स्यास्त्वं तथा कार्यमस्ति मे ॥
क्रोधस्तवानभीष्टोस्ति ततस्तं न दधे हृदि । दुःस्वभावं तथा चान्यं न रक्षामि तवाप्रियम् ११ ॥
शुकादीनां सदाचारं दृष्ट्वा च महतां सताम् । तद्विरुद्धा नैव रक्ष्या दोषाः क्रोधादयो हृदि ॥
एवं विचार्य भगवन्न क्रोधः क्रियते मया । तमुवाच हरिः साधो विचारस्तेऽस्ति वै महान् ॥
गुणातीतो विचारोऽयं प्राक्संस्कारवशात्तव । हृदि जातोऽस्ति बलवान् क्रोधादीनां निवर्त्तकः ॥
प्राक्संस्कारवतां पुंसां पौरुषं सिद्ध्यति द्रुतम् । अन्येषां तु विलंबेन देशकालानुसारतः ॥ १५ ॥
साहाय्यं विदधात्येव संस्कारः पौरुषस्य तु । न तु केवलसंस्कारः साधयेत्कार्यमीप्सितम् ॥
संस्कारस्यैव हेतुत्वे श्रुतिस्मृतिषु वर्णिताः । विधयश्च निषेधाश्च भवेयुर्वै निराश्रयाः ॥ १७ ॥
अतस्त्वद्वन्मुमुक्षुस्तु पौरुषेणैव सर्वथा । भगवत्प्रीतये जह्यादंतर्दोषान् प्रयत्नतः ॥ १८ ॥
क्रोधोऽल्पोऽपि क्वचिद्यस्य दुर्बलेऽप्युद्भवेन्नरे । तस्य कालेन स भवेत्सत्सु च स्वेष्टदैवते ॥ १९ ॥
कस्मिंश्चिदप्यतो नैव संकल्पो मलिनः क्वचित् । मुमुक्षुणा विधातव्यो भ्रंशकः सत्पथात्स यत् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपि रंकं नरं कंचिदवमंतुं क्रुधा त्वहम् । नोत्सहेंऽतर्यामितया हरिं सर्वत्र वेद्मि यत् ॥ २१ ॥
अवमानः क्वचिद्यस्य प्रयोजनवशाद्भवेत् । तदंतर्यामिकृष्णस्यावमानं तं च वेद्म्यहम् ॥ २२ ॥
ततस्तदपराधस्य कारयामि क्षमापनम् । पूजया च प्रणामेन तदभीष्टार्पणेन च ॥ २३ ॥
स प्रसन्नो भवेद्यर्हि तदा स्वास्थ्यं भवेन्मम । अन्यथा तु भवेद्भूरिरनुतापः स्वचेतसि ॥ २४ ॥
अतः सर्वेषु भूतेषु दयैवास्ति मम प्रिया । अहिंसधर्मसिद्धिः स्यात्तयैव खलु नान्यथा ॥ २५ ॥
अतित्यागोऽथातिदया त्वस्ति भक्त्यंतरायकृत् । अतो भक्त्यनुकूलैव दया त्यागश्च रक्ष्यताम् ॥
अतोऽस्मत्संप्रदायेऽत्र मया त्यागः प्रवर्त्तितः । कृष्णालयविधानादिभक्तिसिध्यनुकूलकः २७ ॥
अल्पेऽपि सति हि त्यागे पृथिव्यां हर्युपासना । यदि स्थास्यति तन्नृणां श्रेयो भावि सहस्रशः ॥
तुलसीपत्रपुष्पाणां शाकादीनां च चिन्वनम् । विना कृष्णस्य भक्तिस्तु न सिद्ध्येत्कार्यमेव तत् ॥
ढुंढकानामिव ततो दया नास्मन्मते मता । कृष्णभक्त्यनुकूलेव सा कार्येत्येव निश्चयः ३० ॥
स्थैर्याय कृष्णोपास्तेर्हि मंदिराणि मया क्षितौ । कार्यंत इति जानीत येन श्रेयो भवेन्नृणाम् ॥
यथाशास्त्रं स्वस्वधर्मं पालयंतो जनास्तु ये । उपासनां करिष्यंति हरेर्यास्यंति तेऽमृतम् ३२ ॥

श्रुत्वा वाचं स मुनिस्तथाऽन्ये नारायणस्याऽऽदराजतुल्याम् ।
हृदि प्रतोषं प्रतिपेदिरे ते सदोनिषण्णा गृहिणश्च सर्वे ॥ ३३ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ षष्ट्यधिकशततमस्तरंगः ॥ १६० ॥ २७ ॥

शकाब्दे विक्रमार्कस्य नंदाश्ववसुभूमिते । तपस्याद्यद्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य निजाश्रमे । स न्यषीदत्पीठवरे सितवासा वृतो निजैः ॥ २ ॥
पौराणिकः कथां कृत्वा तमुवाच प्रयागजित् । श्रीमद्भागवतस्याऽत्र समो ग्रंथो न विद्यते ॥३॥
तमुवाच हरिर्ब्रह्मंस्तदस्त्युत्तममेव हि । श्रीवासुदेवमाहात्म्यतुल्यो ग्रंथस्तु नैव हि ॥ ४ ॥
धर्मो ज्ञानं च वैराग्यं भक्तिश्चाऽत्र हि तत्त्वतः । भवंत्यहिंसयज्ञाश्च प्रोक्ताः श्रेयस्करा नृणाम् ॥
ततो रामायणकथ प्रसंगाज्जानकीपतेः । स गुणान्कथयामास महतो राजदुर्लभान् ॥ ६ ॥
ततश्चोचे रघुपतिः शरणागतवत्सलः । अस्ति किंतु सदोषं तु शरणागतमुज्झति ॥ ७ ॥
मिथ्यापि लौकिकं दोषं सीतायां तु निशम्य सः । पतिव्रतामपि जहौ सद्य एवाऽविचारयन् ॥
मुक्तानंदस्तदोवाच प्रकृतिस्त्वीदृशी प्रभो । रामानंदस्वामिनोऽपि गुरोरस्माकमास वै ॥ ९ ॥
उवाचाऽथ हरिः साधो प्रकृतिर्नेदृशी मम । अतो वास्ति दया नित्यं पुरुषे शरणागते ॥१०॥
दयालोरपि मे प्रीतिर्भक्तद्रोहिणि तु क्वचित् । न जायते हि पुरुषे त्यागिन्यपि गृहिण्यपि ११॥
कृष्णभक्तस्य यो दोषं ब्रूयात्तं शृणुयां यदि । तर्हि सद्योऽरुचिस्तस्मिन् जायते मम निश्चितम् ॥
तेन भाषितुकामोऽपि शक्नुयां नैव भाषणे । ईदृश्येवाऽरुचिस्तस्मिन् जायते मे स्वभावतः ॥
यो भक्तपरिचर्यायां निरतः सर्वदा भवेत् । तस्मिंस्त्वतितरां प्रीतिर्मम साहजिकी भवेत् १४॥
कस्मिंश्चिदल्पकं दोषं दृष्ट्वा सद्योऽरुचिर्न मे । तस्मिन् स्याच्चाऽल्पकं दृष्ट्वा गुणं नैव प्रसन्नता ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुकालं परीक्ष्यैव गुणो यस्य तु निश्चितः । भवेत्स्वेनैव तस्मिंस्तु प्रीतिः स्यान्निश्चला मम १६॥
एवं दोषस्तु यस्मिन्स्यात्सोऽपि कालेन भूयसा । स्वेनैव निश्चितः स्याचेत्तस्मिन्स्यादरुचिस्तदा ॥
न तु सद्यो गुणे दोषे दृष्टे वापि श्रुतेऽन्यतः । कस्मिंश्चिन्मे भवेत्प्रीतिरप्रीतिर्वापि पूरुषे ॥ १८॥
यस्मिन् यावान् गुणः स्वेन निश्चितः स्यात्सतु क्वचित् । केषांचिदपि वाक्यैस्तु हृदयान्नापगच्छति॥
गुणी यो भगवद्भक्तस्तस्य भक्तो स्म्यहं तु वै । न हि मे भक्तसेवाया अन्यदस्ति प्ररोचनम् २०॥
यस्य यस्याऽभवद्भक्ते स्वरुचिः स स पूरुषः । गतिं प्राप्यापि महतीमधोगतिमुपागमत् ॥२१॥
अचलां पदवीं प्राप्ता वर्त्तंते महतीं तु ये । तेऽपि साक्षात्कृष्णभक्तप्रसादादिति गम्यताम् २२॥
भक्तानां प्रीणनादेव प्रीतो भवति वै हरिः । द्रोहात्तेषां तु तत्कालमप्रीतः स भवत्यलम् २३॥
भगवत्प्रीतिकामेन ततः पुंसा प्रयत्नतः । प्रीणनीयाः संत एव तद्भक्ताः परिचर्यया ॥ २४ ॥
न प्रीणयति यो भक्तान्स तु भागवताध्वनः । पतिष्यतीति विज्ञाय प्रीत्या सेव्यास्त एव हि ॥
यस्मिन् कृष्णश्च तद्भक्ताः प्रीताः संति स पूरुषः । भूतलस्थोऽपि विज्ञेयो ब्रह्मधाम्न्येव हि स्थितः
यस्मात्प्रीणाति न हरिः साधुसंप्रीणनं विना । अतो मुक्ता अपि नराः सेवंते सत एव हि २७॥
ममापि कृष्णसंप्रीत्यै साधवः प्रतिजन्म हि । प्रीणनीया भवंतीति निश्चयोऽस्ति कृतो हृदि ॥
एवमेव च युष्माभिरपि सर्वैर्मदाश्रितैः । साधुसंप्रीणनस्यैव कर्त्तव्यो दृढनिश्चयः ॥ २९ ॥
शब्दब्रह्मण एषा तु वार्त्ता सर्वस्य साधवः । साररूपेति जानीत मया निश्चित्य कीर्त्तिता ३०॥
वेदादीनां रहस्यं च वार्त्तैषा मोक्षवर्त्मनि । पुंसां जीवनरूपास्ति चरतां नात्र संशयः ॥३१॥
मुक्तानंदादयो भक्ता इत्युक्तास्तेन तत्क्षणम् । एवमेवाचरिष्याम इत्युत्वा तं ववंदिरे ॥ ३२ ॥

सुधासमेनेति हरीरितेन श्रुतेन वाक्येन परां मुदां ते ।
संतो गृहस्थाश्च सदोनिषण्णास्तद्भक्तिभाजः सकलाः समीयुः ॥ ३३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकषष्ट्यधिकशततमस्तरंगः ॥ १६१ ॥ २८ ॥

शकाब्दे विक्रमार्कस्य नंदाश्ववसुभूमिते । शुक्लाष्टम्यां तपस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । वितर्द्यामुदगास्यस्य न्यषीदन्मंचकोत्तमे ॥ २ ॥
वृतः स्वभक्तैर्बहुभिस्त्यागिभिर्गृहिभिश्च सः । सितसर्वांबरधरः पुरःस्थानब्रवीत्ततः ॥ ३ ॥
साक्षात्कृष्णे भगवति यस्यासक्तं भृशं मनः । भवेत्तस्य तु लक्ष्माऽहं स्फुटमेव वदामि वः ॥४॥
अत्यध्वचलनश्रांतः सुप्तः स्याच्छवसन्निभः । उत्थाय शक्नुयान्नैव स्नातुं भोक्तुं च वा ततः ५॥
तथाविधोऽपि यः श्रुत्वा जायमानां हरेः कथाम् । वार्त्तां वा सहसोत्थाय श्रृणुयादश्रमो यथा ॥
यद्वा रोगादिनाऽऽर्त्तः स्यादपमानेन वार्दितः । भवेदथ हरेः श्रुत्वा जायमानां कथां क्वचित् ॥
वार्त्तां वा सद्य उत्थाय नीरोगादिरिवादरात् । श्रृणुयात्तां स विज्ञेयो भृशासक्तमना हरौ ८॥
प्राप्य राज्यं महर्द्धिं वा नानाकार्याकुलोऽपि सन् । श्रुत्वावार्त्तां प्रभोः सद्यः स्यान्निसंग इवोत्सुकः
अत्यासक्तमना ज्ञेयः स च साक्षाद्रमापत्तौ । त्यागी सोऽस्तु गृही वापि मुक्त एव न संशयः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुक्तानंदोऽथ तं नत्वा पप्रच्छासक्तिरीदृशी । कृष्णेति स्यात्त्वयि कथमिति पृष्टोऽब्रवीद्धरिः ॥११॥
प्राक्संस्कारो भवेद्यस्य बलिष्ठस्तस्य सा भवेत् । सेवया प्रीणनेनाऽथ सा स्यात्तद्वत्सतामपि ॥१२॥
सुधामिवापीय स वाचमित्थं जगद्गुरोस्तस्य मुनिस्तथाऽन्ये ।
संतो गृहस्था निखिलाश्च तोषं प्रपेदिरे भूरितरं सदःस्थाः ॥ १३ ॥
इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्विषष्ट्यधिकशततमस्तरंगः ॥ १६२ ॥ २९ ॥

शकाब्दे विक्रमार्कस्य नंदाश्ववसुभूमिते । श्रीरामजन्मदिवसे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमक्षितिपस्य सः । वासुदेवालयस्याग्रे न्यषीदत्स्वासने प्रभुः ॥ २ ॥
सितांबरधरः श्वेतपुष्पहारावतंसकः । वृतो भक्तैरसंख्यातैस्त्यागिभिर्गृहिभिस्तथा ॥ ३ ॥
स्वाग्रोपविष्टान् सदसि त्यागिनः सोऽब्रवीत्प्रभुः । श्रीमद्भागवतादीनि सच्छास्त्राणि भवंति हि ।
वदंति तानि यद्यच्च तत्तत्सत्यं न संशयः । कलेः स्थानं सुवर्णं च स्त्रियस्तत्र प्रकीर्त्तिताः ॥५॥
तस्मिंस्तासु कलिर्नूनं दृश्यते व्यास इत्यपि । बहवस्त्यागिनो लोके तदर्थं भ्रष्टतां गताः ॥ ६ ॥
अपि धीरा नरा लोके कांताकनकदर्शने । जायंते विह्वलाः प्रायः सज्जंते तत्र चात्मना ॥ ७ ॥
पदार्थद्वयमेतद्धि सर्वेषामस्ति बंधनम् । कश्चिद्देव बलं प्राप्य कार्ष्णं तस्माद्विमुच्यते ॥ ८ ॥
प्रकृतेः पुरुषाच्चापि परं यद्ब्रह्म निर्गुणम् । तदेवैकं विदित्वा सत्तद्रूपं स्वं विभावयन् ॥ ९ ॥
उपासीत परं ब्रह्म कृष्णं चानन्यभावतः । अवरं ब्रह्मणो यत्तत्सर्वं विद्याच्च नश्वरम् ॥ १० ॥
तुच्छं च मत्वा तत्रास्तीव्रं वैराग्यमेव यः । पुमान् स एव मुच्येत स्वर्णस्त्रीबंधनात्खलु ॥११॥
इतरे तु पुमांसोऽत्र मूर्खा वा पंडिता अपि । त्यागिनो गृहिणो नापि बध्यंते नाऽत्र संशयः ॥
ते साधवः सत्यमितीश्वरस्य निपीय वाक्यामृतमस्य सर्वे ।
संतोषमापुः परमं सदःस्थास्तदाश्रिता ये गृहिणश्च तेऽपि ॥ १३ ॥
इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रिषष्ट्यधिकशततमस्तरंगः ॥ १६३ । ३० ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । चतुर्थ्यां नभसः शुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः । स्वावासवेदिकायां स निषण्णोऽभून्निजासने ॥ २ ॥
सितांबरधरो भक्तैस्त्यागिभिर्गृहिभिस्तथा । पुरःस्थैर्वीक्ष्यमाणश्च पुराणश्रवणादृतः ॥ ३ ॥
श्रुत्वा कपिलगीतां स स्वपौराणिकवक्त्रतः । प्रसन्नश्च सुखासीनः स्वयमेवाब्रवीत्सतः ॥ ४ ॥
यो वासुदेवो भगवानक्षरात्पर उच्यते । स श्रीकृष्णः परं ब्रह्म सर्वकारणकारणम् ॥ ५ ॥
मायायां वीर्यमाधत्त स एव पुरुषात्मना । अक्षरात्मा स पुरुषो मुक्तो ब्रह्मेति चोच्यते ॥६॥
तज्जप्रधानपुरुषद्वारा वैराजपूरुषः । ब्रह्मांडविग्रहः सद्यः प्रादुर्भवति वीर्यवान् ॥ ७ ॥
यथा स्त्रं पुरुषद्वारा लोक उत्पद्यते सुतः । तथा मायाधिपस्यासौ पुरुषस्योच्यते सुतः ॥ ८ ॥
यथाऽत्र लौकिकस्य स्तः पुरुषस्याकृतिक्रिये । तथैव तस्य ते ज्ञेये द्विपरार्द्धायुषः खलु ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथा जीवात्मनोऽवस्था जाग्रत्स्वप्नसुषुप्तयः । तथा स्थित्युत्पत्तिलयास्तस्यावस्था अपीरिताः ॥
स्थूलं सूक्ष्मं कारणं च जीवस्येति वपुस्त्रयम् । विराट्सूत्राव्याकृताख्यं वैराजस्य वपुस्त्रयम् ॥
वैराजस्यापि देहस्तु तत्त्वैर्हि महदादिभिः । स्वस्वांशैरेव रचितो भवतीश्वरनोदितैः ॥ १२ ॥
सजीवेऽप्यस्य देहे च करणैः सह देवताः । प्रविष्टा गोलकान्सर्वान्नोदतिष्ठत्तदाऽपि सः ॥१३॥
भगवान्वासुदेवस्तु यदास्मिन् पुरुषात्मना । प्राविशत्तर्ह्यसौ सद्य उदतिष्ठन्महांभसि ॥ १४ ॥
वैराजोऽपि तदा सर्वाः क्रियाः कर्तुं शशाक सः । स एव सर्वजीवेषु हरिः साक्षितया स्थितः ॥
सुषुप्तिरूपमायायाः परतोऽस्ति स च प्रभुः । तथाऽपि तं न जानाति जीवो देहादिसंगतः ॥
तद्दोषेण च तादात्म्यं संप्राप्यैव च वर्त्तते । क्रिया देहाभिमानेन कुर्वन् दुःखायते भृशम् ॥
यदा सद्गुरुवाक्येन स्वस्वरूपं ततः पृथक् । ब्रह्मैवेति विनिश्चित्य मननं कुरुते भृशम् ॥१८॥
तदा तस्मिन् ब्रह्मधर्मा मननस्यानुसारतः । कृष्णध्यानप्रतापेन शनैराविर्भवंति हि ॥ १९ ॥
ब्रह्माऽहं कृष्णदासोऽस्मीत्येवं यर्ह्यस्य निश्चयः । सुदृढो जायते तर्हि मुक्तसंज्ञामुपैति हि २०॥
कृष्णं विना यदा त्वेष उपास्ते देवतांतरम् । देवलोकास्तदा याति मुक्तिं तु हरिसंश्रयात् ॥
वैराजोऽप्येवमेवास्ति द्विपरार्द्धावधि स्वके । देहे बद्धो वासुदेवध्यानान्मुक्तिमुपैति च ॥ २२ ॥
संकर्षणमुपास्तेऽसौ प्रलयेऽथ स्थितावपि । प्रद्युम्नं च तथोत्पत्तावनिरुद्धाख्यमीश्वरम् ॥२३॥
संकर्षणादयस्त्रिस्रो वासुदेवस्य मूर्त्तयः । गुणात्मिका भवंत्येव त्रिवर्गफलसिद्धिदाः ॥ २४ ॥
उत्पत्त्यादिकार्यसिद्धिस्तदुपासनयाऽस्य तु । भवत्यथो मोक्षसिद्धिर्वासुदेवैकचिंतनात् ॥२५॥
वासुदेवोपासनं च वैराजस्य न दुष्करम् । शुद्धांतःकरणत्वेन तत्सांनिध्यस्य संभवात् ॥२६॥
असावपि न कुर्वीत वासुदेवस्य सर्वथा । उपासनां दृढां यावत्तावन्नैव विमुच्यते ॥ २७ ॥
एवं हि साम्यमुदितमस्ति वैराजजीवयोः । तद्विदित्वा कृष्ण एव सेव्यो निःश्रेयसाय तु ॥२८॥
सर्वावतारहेतुत्वं वैराजस्यैव कीर्त्तितम् । यच्छ्रीभागवते तत्तु तदंतर्यामिणो हरेः ॥ २९ ॥
कृष्णः पुरुषरूपेण प्रविश्यास्ते तदंतरे । तदभेदेनावतारास्तस्मादेव प्रकीर्त्तिताः ॥ ३० ॥
न हि केवलवैराजादवतारकथाऽस्ति सा । हर्यावेशं विनाऽसौ यदुत्थातुमपि नाशकत् ॥ ३१ ॥
वैराजस्थस्तु पुरुषो निरन्नो मुक्त एव सः । मायां नियम्य तत्कार्यालिप्त एवास्ति सर्वदा ॥
वैराजोऽस्ति पुमानीशो मायाधीशसुतत्वतः । भोगान्भुक्त्वापि मायायाः प्रलये याति पूरुषम् ॥
वैराजपुरुषस्याऽस्य यत्संबंधोऽस्ति मायया । आविर्भवत्यतः सर्गकालेऽसौ पुरुषेक्षणात् ॥३४॥
अन्यो जीवस्तु मायाया वश एव हि वर्त्तते । तद्भोगभुक्त्या दुःखी च प्रलयेऽस्यां च लीयते ॥
असंख्याता यथा संति जीवात्मानस्तथैव हि । वैराजा अप्यसंख्याता भवंतीत्यवगम्यताम् ॥
ब्रह्मांडानि हि तद्देहास्तेषां संख्या न विद्यते । ततस्तज्जीववैराजपुंसामपि न सा मता ॥ ३७ ॥
अंतर्यामी तु सर्वेषां कृष्णात्मा पुरुषोऽस्ति यः । स त्वेक एव भगवान् वेदे ब्रह्मेति कीर्त्तितः ॥
उत्पत्तिस्थितिसंहारकारणं जगतां च सः । इत्युक्तवंतं पप्रच्छ शुकानंदमुनिस्तु तम् ॥ ३९ ॥
भगवान्वासुदेवस्त्वं करोषि पुरुषात्मना । ब्रह्मांडजननादीनि स्वतंत्रः परमेश्वरः ॥ ४० ॥
ततो वेदे त्वमेवोक्तः पुरुषः पुरुषोत्तमः । अतः केन विशेषेण बोध्या भिन्नवतोर्द्वयोः ॥ ४१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीहरिरुवाच

तयोरस्ति महान् भेदो जीववैराजयोरिव । उपासकोऽस्ति पुरुष उपास्यो भगवान् हरिः ४२ ॥
भेदो यथा वा वैराजतत्स्थपूरुषयोरपि । भवत्येवं तयोर्भेदो महानेवेति गम्यताम् ॥ ४३ ॥
बहवः संति पुरुषा ब्रह्मरूपाश्च निर्गुणाः । पुरुषोत्तममेकं ते सेवंते स्वामिनं तु तम् ॥ ४४ ॥
जीवमायेशपुरुषकृष्णा इति च पंचकम् । अन्योन्यभिन्नं चानादि वर्त्तते मत औद्धवे ॥ ४५ ॥
वार्त्तेदृशी तु बहुशः कृताऽस्ति पुरतो हि वः । तथापि मननाभावात्सम्यक्तस्या न साऽस्फुरत् ॥
ततोऽस्या मननं कार्यं सर्वैः सम्यग्यतस्त्वसौ । शास्त्रशब्दांतरश्रुत्या नापगच्छेत्कदाचन ४७ ॥
श्रुत्वेति वाचं हरिणोदितां ते सुधासमां साधुजनाः शुकाद्याः ।
भक्ता गृहस्थास्तुतुपुश्च सर्वे वार्त्तां च तां ते स्म लिखंति हर्षात् ॥ ४८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ चतुःषष्ट्यधिकशततमस्तरंगः ॥१६४॥३१॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । पंचम्यां नभसः शुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य निजाश्रमे । उपाविशत्स्वासनेऽसौ वृतो भक्तैः सहस्रशः ॥ २ ॥
सितांबरधरः श्वेतपुष्पहारालिराजितः । श्वेतपुष्पमयापीडकर्णभूषणशोभनः ॥ ३ ॥
स उवाच निजान्भक्ताः संबंधः स्वकुटुंबिनाम् । सुदुस्त्यज इतीवांतर्भाति मेऽतिविचारतः ४॥
स्नेहानुबंधो बंधूनां मुनेरपि सुदुस्त्यजः । इत्यपि श्रूयते वाक्यं भक्तौ त्वेषोऽतिविघ्नकृत् ॥५॥
बंधुस्नेहमयो वृक्षः संछिन्नोऽपि पुनः पुनः । प्ररोहति जटीवाऽतो मूलोत्खातोऽस्य युज्यते ॥६॥
त्यक्तत्रिदेहाभिमतेर्ब्रह्मात्मैक्यदृढीकृतेः । दार्ढ्येन कृष्णभक्तेश्च युक्तस्य स्यात्स नान्यथा ॥ ७ ॥
बंधुस्नेहविहीना ये सांगां भक्तिं नराकृतेः । हरेः कुर्युर्जनास्ते तु भक्ता एकांतिका मताः ॥८॥
स्वधर्म आत्मनिष्ठा च वैराग्यं मायिकार्थतः । अंगान्येतानि भक्तेर्वै संति तत्पुष्टिहेतवः ॥ ९ ॥
एकाकिन्येव भक्तिस्तु जीवं तारयितुं क्षमा । देशकालादिवैषम्ये यांति धर्मादयश्च ताम् ॥१०॥
भक्त्या केवलयैवासन्मुक्ता वै बहवो नराः । धर्मादीनां तु साहाय्ये निर्विघ्ना सा भवेद् ध्रुवम्
धर्माद्यैः केवलैर्मुक्तिर्न स्याद्भक्त्या तु सा भवेत् । एतावान् हि विशेषोऽत्र विज्ञातव्यो मुमुक्षुणा
श्रेयांसि बहुविघ्नानि भवंतीति स्मृतेर्बुधाः । धर्माद्यैः सहितामेव कृष्णे विदधते हि ताम् ॥
कुर्वद्भिर्भगवद्भक्तिं देशकालादयः शुभाः । सेवनीयाः प्रयत्नेन नाऽशुभास्तु कदाचन ॥१४॥
श्रुत्वेति ब्रह्मामृततुल्यवाचं सभोपविष्टास्तदनुव्रता ये ।
सर्वेऽपि ते साधुगृहस्थभक्ताः प्रपेदिरे भूरितरं प्रहर्षम् ॥ १५ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ पंचषष्ट्यधिकशततमस्तरंगः ॥ १६५ ॥ ३२ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । नभःकृष्णत्रयोदश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य निजाश्रमे । सितसर्वांबरधरः स्वासने स उपाविशत् ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्यागिभिर्गृहिभिर्भक्तैः पुरःस्थैर्वीक्षिताननः । स्वयमेवाऽब्रवीत्प्रीतः स तानानंदयन् गिरा ॥
कृष्णं भजामः सर्वेऽपि वयं तत्र पृथक् पृथक् । स्वं स्वं भावं कथयत येन भक्तिः प्रतन्यते ॥
भावं मदीयं तत्रादौ यूयं श्रृणुत वच्म्यहम् । कृष्णेतरपदार्थे मे प्रीतिर्नास्त्येव कुत्रचित् ॥
तत्र प्रीतिं यदा विद्यां तं जह्यां तर्हि तत्क्षणम् । अन्यथा मे सुखं न स्यात् स्मरेयं च न तं पुनः
यादृशस्तादृशो वापि कृष्णभक्तो भवेत्तु यः । अरुचिर्न भवेत्तस्मिन्मम तद्भक्तिवीक्षणात् ॥ ७ ॥
नास्त्येषणा मे पञ्चानां विषयाणां हृदि क्वचित् । अनिच्छया बलात्प्राप्तांस्तान्नैव गणयाम्यहम् ॥
जन्मतोऽद्य दिनं यावत्स्वप्नेऽपि मम कर्हिचित् । न हि स्त्रीद्रव्यसंबंधिभोगसंकल्पसंभवः ॥
अखंडं भगवद्रूपे मनो मे वर्त्तते सदा । बाह्यतस्तु हितायैव नृणां तत्स्नेहमीक्षये ॥ १० ॥
एवं हि भगवत्प्रीत्यै भावो मे विहितो दृढः । कथितः स यथावद्वो यूयं ब्रूताऽऽत्मनोऽथ तम् ।
ततो यथायथं सर्वे स्वं स्वं भावं तमब्रुवन् । धर्मे ज्ञाने विरागादौ वृत्तिं भक्तौ पृथक् पृथक् ॥
भावं श्रुत्वा स भक्तानां तानुवाच पुनः प्रभुः । धर्माः सर्वेऽपि राजंते ब्रह्मचर्यव्रतेन वै ॥१३॥
यत्नेनापि कृता धर्मास्तद्विना न फलप्रदाः । देहे जीव इवैतद्धि धर्मेषु निखिलेष्वपि ॥ १४ ॥
ब्रह्मचर्यवतामेव लोकेऽत्रापि परत्र च । न दूरे भगवानस्ति तस्मात्सर्वाधिकं हि तत् ॥ १५ ॥
अष्टांगं यत्र पश्यामि ब्रह्मचर्यमहं नरे । तस्मिन् स्वाभाविकी प्रीतिरचला मम वर्त्तते ॥ १६ ॥
प्रायशोऽत्रत्यभक्तेषु ब्रह्मचर्यस्य दर्शनात् । ममाप्यत्र पुरे वासो भवतीत्यवगम्यताम् ॥ १७ ॥
ब्रह्मचर्यं दृढं यस्य स दूरस्थोऽपि मेंऽतिके । वर्त्ततेऽथांतिकस्थोऽपि तद्धीनस्त्वतिदूरगः ॥१८॥
ब्रह्मचर्यव्रतवतः सेवा मे रोचते भृशम् । अतो मुकुंदवर्णीन्द्रसेवा मे सर्वदा प्रिया ॥ १९ ॥
एतावत्कालपर्यंतं मयाप्येतद्व्रतं दृढम् । क्रियते कार्यते चाऽन्यैस्तद्वार्त्ता क्रियते भृशम् ॥ २० ॥
ब्रह्मचर्यच्युतिं यस्य वीक्षे तस्मिन्मयाऽरुचिः । भृशं सद्यो भवति वै चित्ते खेदोऽपि तेन च ॥
वंध्यस्य पुंसः पुत्रः स्याद्वार्द्धके तन्मृतावथ । तस्य यादृग्भवेच्छोकस्तस्य मेऽपि तथा भवेत् ॥२२॥
अत एव ब्रह्मचर्यच्युतेर्वार्त्तापि कस्यचित् । न कार्या मेऽग्रत इति यूयं प्रोक्ता मया पुरा ॥२३॥
अथ तं हरजिद्भक्तः पप्रच्छ विनयानतः । ब्रह्मचर्यं दृढं स्वामिन् केनोपायेन सिद्ध्यति ॥ २४ ॥
तमुवाच हरिस्तत्र संत्युपायास्तु भूरिशः । तत्रापि मुख्यं कथये श्रृणु ते साधनत्रयम् ॥ २५ ॥
आद्यं मनोजयस्तत्र स तु स्यादात्मनिष्ठया । कृष्णस्य नवधा भक्तौ मनसो योजनेन वा ॥२६॥
यथैव कस्यचित् पुंसो भूतः कश्चिद्वशो भवेत् । तं स्वतंत्रं क्षणमपि कुर्याच्चेद्भक्षयेत्स तम् ॥२७॥
तथा मनः स्वतंत्रं चेत्कुर्यात्क्षणमपीह यः । रहितं कृष्णभक्त्या तत् तमेव भृशमर्दयेत् ॥२८॥
अतो यथा भूतपतिर्भूतं कर्मसु सर्वदा । नियोजयेन्मनस्तद्वद्योज्यं कार्ष्णे तु कर्मणि ॥ २९ ॥
श्रवणे कीर्त्तने वापि स्मरणे वाऽर्चनादिषु । कृष्णस्यैव मनो योज्यं न स्वातंत्र्ये तु तत्क्वचित् ॥
एवं मनोजयेन स्याद्ब्रह्मचर्यं तु तद्दृढम् । अष्टांगयोगाभ्यासेन भवेत् तच्च दृढं तथा ॥ ३१ ॥
आहारनियमस्तत्र योगशास्त्रे प्रकीर्त्तितः । प्राणायामस्तेन सिद्ध्येत्तद्दार्ढ्यं च भवेत्ततः ॥ ३२ ॥
तृतीयं साधनं त्वस्ति स्वधर्मेषु स्थितिर्दृढम् । तैश्च देहस्य नियमात्तद्दार्ढ्यं भवति ध्रुवम् ॥३३॥
एवं त्रिभिः साधनैस्तु जाते नियमने सति । मनःप्राणशरीराणां ब्रह्मचर्यं दृढं भवेत् ॥ ३४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न ह्येतद् दुष्करं पुंसां नित्यमभ्यासशीलिनाम् । साधूनां तु विशेषेण तदुद्योगैकचेतसाम् ३५॥
अनेन नरदेहेन नास्ति किंचन दुष्करम् । सोत्साहमनसां पुंसामभ्यासः क्रियते यदि ॥ ३६ ॥
शब्दार्थकठिनं काव्यमप्यत्राऽभ्यासदार्ढ्यतः । सुसाध्यं जायते यद्वत्पठनादृतचेतसाम् ॥३७॥
मुमुक्षूणामपि तथा मनःस्थैर्यादि वांछितम् । अभ्यासदार्ढ्येन नृणां सिद्ध्यत्येव न संशयः ॥
सुधासमानामिति तस्य वाचं निशम्य भक्तः स तु हर्षमापत् ।
अन्येऽपि सर्वे मुनयः सदःस्थाः प्रापुश्च तोषं गृहिणोऽपि भक्ताः ॥ ३९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षट्षष्ट्यधिकशततमस्तरंगः ॥ १६६ ॥ ॥ ३३ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । भाद्रशुक्लप्रतिपदि वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य महीभुजः । पूर्वास्यवेश्मनो वेद्यां न्यषीदत्स शुभासने ॥ २ ॥
भक्तमंडलमध्यस्थः सितांबरधरः स च । सद्गीतकृष्णपद्यानि श्रुत्वा हृष्टोऽब्रवीत्सतः ॥ ३ ॥
तत्त्वैर्जीवस्य संबंधः साधवः प्रीतिवर्ष्मं हि । जडानि तानि वा संति चेतनानीति कथ्यताम् ४॥
अथोचुः साधवस्तानि चिद्रूपाणीति भाति नः । अन्यथा यज्ञभागोऽपि पृथ्व्यादीनां न संभवेत्
तानुवाचाथ भगवांस्तत्त्वानि यदि साधवः । चिद्रूपाणि तदा देहे भवेयुस्तानि जीववत् ॥ ६ ॥
पंचविंशतिसंख्याः स्युर्जीवास्तर्ह्येकवर्ष्मणि । भोक्तृत्वं सुखदुःखानां सर्वेषां च भवेत्समम् ७॥
संबंधः कर्मणां चापि तथैकस्य न संभवेत् । श्रेयोऽपि भागशो भाव्यं सर्वेषामेकसाधितम् ८॥
एवं तु दृश्यते नैव श्रूयते च नहि क्वचित् । एकाकिनां तु मुक्तत्वं श्रूयते प्राक्सतामपि ॥ ९ ॥
इत्युक्ते तेन ते संतस्त्वमेवास्योत्तरं कुरु । सर्वज्ञोऽसीत्यूचुरथो हरिकृष्णोऽब्रवीत्स तान् ॥१०॥
तत्त्वानि महदादीनि मायातः पुरुषेक्षया । संति जातानि सर्गस्यारंभे कृष्णेच्छयैव हि ॥११॥
कार्यकारणभेदेन द्विधा तानीश्वरेच्छया । सर्गोपबृंहणायासन्सर्वाण्यपि पृथक् पृथक् ॥ १२ ॥
तत्र कारणरूपाणि देवास्तत्त्वाभिमानिनः । स्थूलसूक्ष्मशरीराणि तत्कार्याण्यभवंस्तथा ॥ १३ ॥
आद्यानि तत्र चिद्रूपाणीतराणि जडानि च । इति व्यवस्था तत्त्वेषु भवतीत्यवगम्यताम् ॥१४॥
देहेंद्रियांतःकरणैः चिद्रूपत्वं यदीक्ष्यते । तत्तु चिद्रूपजीवस्य तदात्मकतया स्थितेः ॥ १५ ॥
विशेषसत्तया जीवो हृत्पद्मन्येव वर्त्तते । सामान्यसत्तया त्वेष देहादौ च तदात्मकः ॥ १६ ॥
तस्माद्देहादिरूपाणि तत्त्वानि निखिलान्यपि । जडान्येव भवंतीति प्रश्नोत्तरमुदीरितम् ॥ १७ ॥
धर्मांगजस्येति वचः सदःस्थाः निशम्य पीयूषसहोदरं ते ।
सर्वेऽपि संतो गृहिणश्च भक्ताः प्रपेदिरे तोषमपारमेव ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्तषष्ट्यधिकशततमस्तरंगः ॥ १६७ ॥ ३४ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । नभस्यशुक्लैकादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य महीक्षितः । पीठेंऽगणे निंबतरोरंतिके स उपाविशत् ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सितांबरधरो भक्तैर्बहुभिः परितो वृतः । सोऽन्तर्दृष्टिः क्षणं भूत्वा पुरःस्थानब्रवीत्ततः ॥ ३ ॥
मया सम्यग्विचार्यैव हृदये यत्सुनिश्चितम् । साधवस्तद्धि युष्मभ्यं कथयामि निशम्यताम् ॥४॥
नृणां श्रेयो द्विधा प्रोक्तमृषिभिस्तत्त्वदर्शिभिः । आत्मज्ञानेन भक्त्या च तत्राद्यं त्वतिदुष्करम् ॥
रामानंदस्वामिपार्श्वागमनात्पूर्वमप्यहम् । साक्षादपश्यं स्वात्मानं पश्याम्यद्य च सूर्यवत् ॥६॥
इन्द्रियाणां च सर्वासु क्रियास्वपि तमेव हि । पश्याम्यहं क्षणमपि नास्ति तद्विस्मृतिः क्वचित् ॥
सुदुष्करमहं मन्ये सर्वेषां तु नृणामिदम् । प्राग्जन्मबहुसंस्कारैः केनचित्तदवाप्यते ॥ ८ ॥
साक्षाद्धरेस्तु ध्यानेन भक्तेनैवाप्यते हि तत् । न त्वन्यसाधनैः क्वापि प्राप्यं यत्नवतापि वै ॥
स्वरूपसाक्षात्कारेण प्रोक्तेनानेन सर्वदा । अभ्यस्तेन भवेन्मुक्तिरपुनर्भवलक्षणा ॥ १० ॥
मुक्तिरेषा तु विज्ञेया कष्टसाध्या ससंशया । कव्यां तुंबोपबंधेन समुद्रतरणोपमा ॥ ११ ॥
साक्षात्कृष्णस्य नवधा भक्त्या धर्मयुजाऽथ या । मुक्तिः सा त्वस्ति सुकरा नावाऽब्धितरणोपमा ॥
भक्त्यैव मुक्तिः साध्येति पक्षो घंटापथस्ततः । अयमेव हि सर्वेषां श्रयणीय इतीयताम् ॥१३॥
आत्मनिष्ठा दृढं कार्या भक्तैरिति मुहुर्मया । या वार्त्ता क्रियते तस्या अभिप्रायं वदामि वः ॥
आत्मनिष्ठावतः पुंसो देहदैहिकवस्तुषु । प्रीतिर्नश्येत्ततः कृष्णे प्रीतिदार्ढ्यं भवेदिति ॥ १५ ॥
यत्तु केचिद्वदंतीह यदि शुद्धं मनो निजम् । यथेष्टाचरणे तर्हि नास्य दोषः शिशोरिव ॥ १६ ॥
एतद्वाक्यं न मंतव्यं भूरिबाधप्रसंगतः । यथेष्टाचरणेनाऽऽपुर्यन्मुक्ता अप्यधोगतिम् ॥ १७ ॥
समाधिनिष्ठः पुरुषो विवेकी बुद्धिमानपि । कुर्यात्स्त्रीणां प्रसंगं चेद्धर्मभ्रष्टो भवेत्खलु ॥ १८ ॥
एवं योषापि धर्मिष्ठा भक्तिमत्यपि केशवे । यथेष्टं पुंप्रसंगेन सद्यो धर्मच्युता भवेत् ॥ १९ ॥
ईदृश्येवास्ति वार्त्तेयमत्र नास्त्येव संशयः । विना शास्त्रोक्तनियमान् धर्मरक्षा न जायते ॥२०॥
अतः श्रेयोर्थिभिः पुंभिः स्त्रीभिश्च त्यागिभिस्तथा । स्वस्वधर्मः पालनीयो मत्प्रोक्तैर्नियमैर्दृढः ॥
भक्तिः कृष्णस्य नवधा कर्त्तव्या च यथोचितम् । ताभ्यामेव हि संसिद्धिं यूयं प्राप्स्यथ निश्चितम्
सांप्रतं त्विह सर्वेषां भवतां सुदृढा मतिः । मय्येव कृष्णोऽयमिति सा सत्यैवास्ति सर्वथा ॥
अहमक्षरधामेश ईशेशः पुरुषोत्तमः । सर्वावतारहेतुश्च सदा सर्वोपरि स्थितः ॥ २४ ॥
महापुरुषमायादेर्नियंता दिव्यविग्रहः । आविर्भूतोऽस्मि कृपया तत्कार्या मदुपासना ॥ २५ ॥
मच्चरित्राणि गेयानि श्रोतव्यानि च सादरम् । मम ध्यानं विधातव्यं स्मर्त्तव्या मत्कृतोत्सवाः
महासभासु मद्वार्त्ताः कृतं भक्तैर्मदर्चनम् । साधुसंतर्पणं चापि स्मर्त्तव्यं मत्कृतं मुहुः ॥२७॥
एवं विदधतो यूयं मद्भक्तेस्तु प्रतापतः । देहांते परमं धाम मदीयं प्राप्स्यथ ध्रुवम् ॥ २८ ॥
स्वरूपानंदनामासीत् पुरा साधुर्मदाश्रितः । आत्मदर्शी स देहांते प्रारब्धाददतिदुःख्यभूत् ॥
ततस्तदग्रे वार्त्तेयं मया स्थित्वा स्वयं कृता । तदा स हित्वात्मध्यानं मम ध्यानरतोऽभवत् ॥
सद्यः शांतिं ततः प्राप्य देहं हित्वा स भौतिकम् । मद्धाम प्राप परमं यूयं भजत मां ततः ॥
स धर्मभक्तेदार्ढ्याय श्रीमद्भागवतादयः । सद्ग्रंथाः स्वमते चाष्टौ मयाऽतिप्रतिपादिताः ॥
श्रोतव्याः पठितव्याश्च वाचनीयाश्च ते ततः । कृष्णमाहात्म्यबोधः स्यात् पुष्टता भक्तिधर्मयोः
भक्तिहीनेन धर्मेण भक्त्या धर्मविहीनया । नेप्सिता बंधमुक्तिः स्यादुभे सेव्ये ततो बुधैः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत्र भक्तेश्च धर्मस्य न सम्यक्प्रतिपादनम् । ते ग्रंथा नैव वाच्याश्च श्रोतव्या नैव कर्हिचित् ॥
उभयोरेतयोर्यत्र सम्यक् स्यात्प्रतिपादनम् । ते तु ग्रंथाः प्रयत्नेन वाच्याः श्रव्याश्च सादरम् ॥
इति वाक्यसुधां निपीय ते स्वगुरोः साधुजनाः परां मुदम् ।
गृहिणश्च नराः प्रपेदिरे दधुराज्ञां शिरसा तथैव ते ॥ ३७ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधावष्टषष्ट्यधिकशततमस्तरंगः ॥ १६८ ॥ ॥३५॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । पूर्णमास्यां नभस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । वितर्दौ प्रत्यगास्यस्य न्यषीदच्चारुमंचके ॥ २ ॥
सितांबरं वृतं भक्तैरनेकैः समपृच्छत् । मुक्तानंदः कारयंतं सद्भिः प्रश्नोत्तराणि तम् ॥ ३ ॥
मनोवृत्तिरखंडं स्यात्स्थिरा कृष्णे कथं त्वयि । तमुवाच हरिस्तत्र त्वस्त्युपायचतुष्टयम् ॥ ४ ॥
चित्तस्य स्निग्धता शौर्यं भयं वैराग्यमित्यमी । उपाया भगवन्मूर्तौ मनःस्थैर्य उदीरिताः ५॥
स्निग्धस्वभावं चित्तं स्याद्यस्य तस्य तु तद्धरौ । अपि स्निग्धं भवेद्देव स्त्रीधनादाविव द्रुतम् ६॥
शौर्यं च यस्य पुंसः स्यात्स तीक्ष्णप्रकृतिर्भवेत् । कार्ष्णेतरं स संकल्पं सद्य एव विनाशयेत् ॥
तस्यात्मवृत्तिः श्रीकृष्णे स्थिरा स्यादत एव हि । नाश्यंते तेन संकल्पास्तत्र विघ्नकरा द्रुतम् ॥
यस्य भीतिर्भवेच्चित्ते सच्छास्त्रश्रवणादिजा । न भजिष्ये यदि हरिं यास्यामि निरयांस्तदा ॥९॥
ततश्च संसृतिं घोरां गमिष्यामीति लक्षणा । तस्यापि सुस्थिरा कृष्णे मनोवृत्तिर्भवेत्किल ॥
कृष्णेतरपदार्थेषु तुच्छत्वमतिलक्षणम् । वैराग्यं च भवेद्यस्य कृष्णे स्यात्तन्मनः स्थिरम् ॥११॥
स हि सांख्यविचारेण देहभिन्नात्मनि प्रभुम् । धारयित्वा मनस्तस्मिन्नियोक्तुं क्षमते दृढम् ॥
इत्युपाया मया प्रोक्ताश्चत्वारो ये रमापतौ । अखंडमात्मनो वृत्तिर्वर्त्तेत भजतां नृणाम् ॥१३॥
आकस्मिकी हरिकृपा भवेद्यस्मिंश्च पूरुषे । तस्य तु स्यात्स्थिरा वृत्तिः कृष्णे साधनमंतरा ॥१४॥
वृत्तिस्थैर्यं तु कृष्णे यत्तन्नाल्पतपसः फलम् । बहुजन्मोत्थसुकृतोदये स्यात्तद्धि कस्यचित् ॥
कृष्णं विनाऽन्यत्र मनःस्थैर्यं प्रीतिश्च या भवेत् । सैव मायेत्यपि ज्ञेयं हरेः संसृतिकारणम् ॥
विषयेभ्योऽपि पञ्चभ्यो देहस्त्रीतनयादिषु । अधिका दृश्यते प्रीतिः स्वपोषकनरेऽपि च ॥१७॥
कृष्णमाहात्म्यबोधेन मायैषा तु निवर्त्तते । यदा तदैव कृष्णे स्यात्प्रीतिश्च स्थिरतात्मनः ॥१८॥
वृत्तिस्थिरत्वं पुरुषस्य यस्य कृष्णे भवेत्सोऽत्र कृतार्थ उक्तः ।
इति प्रभोस्तस्य वचः स साधुः सुधामिवापीय जहर्ष चाऽन्ये ॥ १९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावूनसप्तत्यधिकशततमस्तरंगः ॥ १६९ ॥ ॥३६॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । भाद्रकृष्णप्रतिपदि वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । वितर्दौ प्रत्यगास्यस्य न्यषीदत् पीठ उत्तमे ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सितांबरो वृतो भक्तैः पप्रच्छ स सतोऽग्रगान् । गीतासूक्तमपि ज्ञानी यथाप्रकृति चेष्टते ॥३॥
शास्त्रोक्तनिग्रहबलप्रचारोऽस्मिन्न जायते । ईदृशी प्रकृतिः पुंसः केनोपायेन नश्यति ॥ ४ ॥
इति ते साधवः पृष्टास्तेन तस्योत्तरं यदा । कर्तुं न शेकुस्तर्ह्येष प्रोवाच स्वयमेव तत् ॥ ५ ॥
प्रकृतिर्यस्य नाश्या स्यात्तस्य तन्नाशके गुरौ । विश्वासोऽपेक्षितो गाढः प्रीतिः सर्वाधिका तथा ॥
हितान्येव हि मन्येत यस्तद्वाक्यानि सर्वथा । प्रियाप्रियाणि सर्वाणि गुणवंत्यगुणानि वा ॥७॥
तस्यैव पुंसस्तद्वाक्यैर्नाश्यते सा न संशयः । अन्यथा तु न नाश्या सा क्वापि केनापि साधनैः
अतस्तत्कामुकेनाऽत्र सतां वाक्यानि सर्वथा । प्रियाप्रियाणि मान्यानि हितानीत्यवगत्य वै ॥

उपदेष्टृगुणग्रहान्नृणां प्रकृतिर्यात्यपि दुस्त्यजा क्षयम् ।
इति तस्य वचः सुधोपमं जहृषुस्ते च निशम्य साधवः ॥ १० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्तत्यधिकशततमस्तरंगः ॥ १७० ॥ ३७ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । कृष्णषष्ठ्यां नभस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वेद्यां प्राचीनवक्त्रस्य न्यषीदन्मंचकोत्तमे ॥ २ ॥
त्यागिभिर्गृहिभिः स्वीयैर्भक्तैर्बहुभिरावृतः । वसानः श्वेतवस्त्राणि पुरःस्थान् सोऽब्रवीत्सतः ॥
इह लोके तु वर्त्तंते द्विविधा मानवाः खलु । केचित्तत्र हरेर्भक्ताः संत्यभक्ताश्च केचन ॥४॥
अभक्तास्तत्र मुह्यंति धनपुत्रादिदातरि । पुरुषे मंत्रयंत्रज्ञे विश्वासं कुर्वते दृढम् ॥ ५ ॥
सत्संगिनस्तु भक्ता ये ते तु तस्मिन्न कुर्वते । धूर्त्तेऽणुमपि विश्वासं हर्येकदृढसंश्रयाः ॥ ६ ॥
भक्ता अपि च विश्वासं तस्मिन् कुर्वंति ये क्वचित् । तेप्यभक्तैः समा ज्ञेयाः शिथिलाः कृष्णसंश्रये
आसीत्कार्यायनग्रामे खट्वांगः क्षत्रियर्षभः । भीष्मोपमो ब्रह्मचर्ये सत्यवादी जितेंद्रियः ॥ ८ ॥
तद्गृहे मांत्रिकः कश्चित्स्वर्णकार उपागमत् । स्वर्णं विधाय ताम्रस्य स साक्षात्तमदर्शयत् ॥ ९ ॥
प्राह च त्वं सदा दानी ह्यसीत्युपदिशामि ते । विद्यां मदीयामित्युक्तो ग्रामात्तं निरयापयत् ॥
सिद्धविद्येऽपि तस्यैवं प्रतीतिर्नाभवद्धृदि । कृष्णान्यवस्त्वनिच्छोर्वै बोद्धुर्मायिकतुच्छताम् ॥
एवं हि भगवद्भक्तस्तुच्छे मायिकवस्तुनि । आसक्तिं न करोत्येव भवन्नेकांतिको हरेः ॥ १२ ॥
स्वधर्मज्ञानवैराग्यैर्युक्तां भक्तिं हरेस्तु यः । अनन्यां विदधीताऽसौ भक्त एकांतिको मतः ॥
देहांतेऽसौ वासुदेवे साक्षाद्विशति निश्चितम् । यथाधिकारमन्ये तु विशंति देवतांतरम् १४ ॥
ब्रह्मादौ प्रविशंत्येके केचित्संकर्षणादिषु । विनैकांतिकभक्तं तु वासुदेवे तु नेतरे ॥ १५ ॥
तादात्म्येनैव यन्नित्यं वर्त्तनं पुरुषस्य सः । प्रवेश इति विज्ञेयो न त्वंबुन इवांबुधौ ॥ १६ ॥
यथाऽतिकामिनो नार्यामतिलुब्धस्य वा धने । वार्द्धकाप्तैकपुत्रस्य यथा वा तत्र पुत्रके ॥ १७ ॥
तथा प्रवेशो भक्तस्य वासुदेवेऽवगम्यताम् । अतिस्नेहो भवेद्यत्र तादात्म्यं तेन वै मतम् १८ ॥
प्रीतिं हित्वा च विश्वासं भक्ते नाऽतोऽखिलेष्वपि । पदार्थेषु हरावेव तौ कार्यौ सर्वथा सदा ॥

श्रुत्वेति वाचं हरिणोदितां ते सुधोपमां साधव आसहर्षाः ।
सर्वे गृहस्थाश्च सदोगतास्तं यांतं प्रणेमुर्विनयेन भक्ताः ॥ २० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकसप्तत्यधिकशततमस्तरंगः ॥ १७१ ॥ ३८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । भाद्रकृष्णे दशम्यां तु वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरात्स्वामी लक्ष्मीवाटीमुपेत्य सः । सितवासा वेदिकायां तत्र पीठ उपाविशत् २ ॥
निषेदुः पुरतस्तस्य त्यागिनो गृहिणस्तथा । तानुवाच तदंतःस्थगुणदार्ढ्यंबुभुत्सया ॥ ३ ॥
यस्मिन् यस्मिन् गुणो यो यो महान् स्यात्स स कथ्यताम् ।
देशकालादिभिर्यस्तु न स्याप्रतिहतः क्वचित् ॥ ४ ॥
मौनांस्तानाह सगुणं ममादौ वच्मि तादृशम् । अरुचिः सर्वदैवाऽस्ति रम्येषु विषयेषु मे ॥ ५ ॥
तद्योगेऽपि बहिर्जाते तत्संकल्पो न मानसे । न तत्स्मृतिर्न च स्वप्ने क्वचिदस्ति तदीक्षणम् ॥६॥
इत्येकस्तादृशो मेऽस्ति गुणोऽथान्यं वदामि वः । सर्वक्रियास्वपि सदा ममास्त्येवात्मदर्शनम् ॥
बहिः प्रवृत्तौ भूयस्यां सत्यामपि यदांतरे । पश्यामि निजमात्मानं तदा विघ्नो न कश्चन ८ ॥
आत्मोन्मुखा एव तदा भवंत्यखिलवृत्तयः । अखंडं सुखमेवास्ति दुःखलेशो न तत्र मे ॥ ९ ॥
गुणं तृतीयकमथो तादृशं कथयामि मे । अतितेजोमये धाम्नि ब्रह्माख्ये निर्गुणे परे ॥ १० ॥
वर्त्तते भगवान् कृष्णः सर्वदा दिव्यविग्रहः । स एव सर्वकर्त्तास्तीत्येवं मे दृढनिश्चयः ॥ ११ ॥
श्रुता मया च वेदांतग्रन्थास्तु शतशः पुरा । तथापि स यथापूर्वं वर्त्तते तैरविक्षतः ॥ १२ ॥
चतुर्थं च गुणं वच्मि तादृशं मम साधवः । दंभभक्ते रुचिर्न स्यात्सत्यभक्ते तु सा भवेत् ॥
सौमनस्यं च नाद्येन स्यात्परेण सहैव मे । इत्युक्त्वा मे गुणाः संतो ब्रूत यूयं गुणान्निजान् ॥
इत्युक्ताः साधवो भक्तास्तेऽपि सर्वे स्वकान् गुणान् । पृथक् पृथग्ब्रुवंति स्म तच्छ्रुत्वोवाच तान् हरिः
युष्मासु शोभनाः संति गुणाः सर्वेऽपि साधवः । तेषां तु जीवनं ज्ञेयं ब्रह्मचर्यव्रतं परम् १६॥
महांतः साधवो ये स्युस्तैस्त्वेतद्धि विशेषतः । पालनीयं तेन धर्माः शोभंतेऽन्येऽखिला अपि ॥
वार्त्तामेतावतीं कृत्वा तत्र भक्तव्रजैः सह । पुनः पुरमुपेत्यासौ स्वाश्रमे समुपाविशत् ॥ १८ ॥
उपाविशंस्तदग्रे च सर्वे भक्तजना अपि । ततः साधूनुवाचासावुपविष्टान्निजाग्रतः ॥ १९ ॥
श्रीमद्भागवतस्य द्वौ स्कंधौ दशमपंचमौ । मया मुख्यतया सम्यक् साधवः प्रतिपादितौ २० ॥
अभिप्रायं तयोः सम्यग्बोध्यं वः कथयाम्यहम् । स्कंधे तु दशमे कृष्णस्वरूपस्यास्ति निश्चयः ॥
वेदशास्त्रपुराणेषु ब्रह्मैकं बहुधोदितम् । ज्ञानमानंदरूपं च सूक्ष्मं तत्त्वं निरंजनम् ॥ २२ ॥
वासुदेवः परं ब्रह्म क्षेत्रज्ञः पुरुषोत्तमः । परमात्मा निर्गुणश्च विष्णुर्नारायणः शिवः ॥ २३ ॥
नामरूपविभेदेन बहुधैवं यदीरितम् । स ब्रह्म कृष्ण एवेति स्पष्टमत्र निरूपितम् ॥ २४ ॥
स्तुतिभागेषु सर्वत्र परोक्षब्रह्मवर्णनम् । कृत्वा तत् कृष्ण एवेति प्रत्यक्ष उपसंहृतम् ॥ २५ ॥
भक्त्याश्रयस्ततः कृष्ण इति तत्र हि निश्चयः । सर्वाण्यपि चरित्राणि मंगलान्येव तस्य हि २६ ॥
श्रोतव्यानि च गेयानि तानि श्रेयस्कराण्यतः । दिव्यानि तानि सर्वाणि ज्ञेयानीति च तद्ग्रहः ॥
अथ स्कंधे पंचमे तु माहात्म्यं सर्वतोऽधिकम् । अस्ति कृष्णस्य यज्ज्ञानात्तद्भक्तिर्वर्द्धतेतराम् ॥
तत्तद्भक्तसुखावाप्त्यै जगतः स्थितये तथा । कृष्णस्यानेकरूपेण प्रोक्ताऽत्रोपासनास्ति च २९ ॥
कृष्णोपबद्धां मर्यादां पालयंतीह ये नराः । तेषामूर्द्ध्वगतिः प्रोक्ता तदन्येषां त्वधोगतिः ॥
योगसिद्धा महांतोऽपि मर्यादां तां यदि क्वचित् । उल्लंघयेयुस्तर्ह्याशु पतेयुः स्वस्थितेर्ध्रुवम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णेतरपदार्थेषु दययापि कदाचन । प्रीतिर्न सर्वथा कार्येत्येतच्चात्रास्ति निश्चितम् ॥ ३२ ॥
स्कंधावेतौ ततो नित्यं सेव्यौ भक्तेन सर्वथा । येन पुष्णाति तद्भक्तिर्मुक्तेरपि गरीयसी ३३ ॥
परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया । गृहीतचेता राजर्षे आख्यानं यदधीतवान् ३४ ॥
इत्थं शुकोक्तेर्गेयानि कृष्णस्य चरितानि तु । सर्वाण्यप्यादरेणैव ज्ञेयः कृष्णश्च साकृतिः ३५॥
यः साकृतिं न जानाति कृष्णं तस्य तु यो भवेत् । दोषः स त्वनिवार्योऽस्ति प्रायश्चित्तशतैरपि ॥
नित्यं साकारमेव श्रीकृष्णं जानाति यः पुमान् । सर्वं तेन तु विज्ञातं सर्वं तेन कृतं तथा ॥

एषा तु वार्त्ता दृढमेव चित्ते सर्वैर्विधेयेति ममोपदेशः ।
पीत्वेति वाक्यामृतमीयुरस्य संतो गृहस्थाश्च मुदं परां ते ॥ ३८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ द्विसप्तत्यधिकशततमस्तरंगः ॥ १७२ ॥ ३६ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । इषासिततृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य निजाश्रमे । स्नात्वा वसित्वा स सिते वस्त्रे पीठ उपाविशत् ॥ २ ॥
मुक्तानंदादयः संतो मयरामसुखास्तदा । गृहस्थास्तस्थुरागत्य दर्शनार्थं तदंतिके ॥ ३ ॥
संध्यादि कृत्वा श्रीकृष्णं संपूज्य च यथाविधि । स साष्टांगनमस्कारान्प्रणयेन चकार च ॥ ४ ॥
तद्दिने सोऽधिकं चैकं तं नित्यापेक्षयाऽकरोत् । पप्रच्छ तं शुकमुनिस्तदा तस्य तु कारणम् ५ ॥
तमुवाच हरिः साधो क्रियंते प्रत्यहं मया । प्रणामाः कारणं तेषामादौ तु कथयामि ते ॥ ६ ॥
देहेऽहंता दैहिकेषु ममता च कदाचन । मम मास्त्विति संप्रार्थ्य क्रियंते नतयोऽन्वहम् ॥ ७ ॥
अद्य त्वासीद्विचारो मे हृदि कश्चन तेन तु । कृतोऽधिकः प्रणामो वै तं च वच्मि हितावहम् ॥
कथा विष्णुपुराणस्य श्रुता निशि मया मुने । दुर्वाससोऽवमानेन प्रापेंद्रो दुर्दशां भृशम् ॥ ९ ॥
तत्संबंधेन च प्रापुः सर्वे त्रैलोक्यवासिनः । महतीं दुर्दशां कष्टां वर्षाणि च सहस्रशः १० ॥
इति श्रुतवतश्चित्ते विचारोऽभून्महान्मम । अहो सदवमानस्य विपाकोऽतीव दुःसहः ॥ ११ ॥
अतः कायेन वचसा मनसा च कदाचन । अद्यप्रभृति तं नूनं न करिष्यामि सर्वथा ॥ १२ ॥
मया बुद्ध्या स न कृतो जन्मतोऽद्यदिनावधि । क्षमापयिष्यामि हरिं क्वचिदज्ञानजं तु तम् ॥
एवं विचार आसीन्मे ततोऽद्य हरिपूजनम् । कृत्वा बद्ध्वांजलिपुटमित्थं संप्रार्थितः प्रभुः १४॥
ज्ञात्वाऽज्ञात्वाऽपि वा वाचा मनसा वपुषा च वा । जातः सदपराधो मे श्रीहरे क्षम्यतां त्वया
इत्युच्चार्य प्रणामोऽद्य कृत एकोऽधिको मुने । येनापराधं तं कृष्णः सहेत करुणानिधिः ॥ १६ ॥
भक्तापराधसदृशं पापमन्यन्न विद्यते । भक्तसंप्रीणनसमं पुण्यमन्यच्च नाधिकम् ॥ १७ ॥
लोभेर्ष्याक्रोधमानैर्हि जायते सद्विगर्हणा । सत्सन्मानश्च लोभादिहीनैरेव हि जायते ॥ १८ ॥
सति देहेऽथ देहांते येषां स्यात्तु सुखैषणा । तैः कायवाङ्मनोभिर्वै सेव्याः संतः सदादरात् ॥
बुद्धिपूर्वं तु सद्द्रोहः कर्त्तव्यो नैव केनचित् । न तत्पापं यतो नश्येत्प्रायश्चित्तशतैरपि २० ॥
अज्ञानात्तु क्वचिज्जाते सतो द्रोहे तु तत्क्षणम् । वपुषा दंडवन्नम्यः स प्रार्थ्यो वचनेन च २१ ॥
अद्यप्रभृति नैवाहं करिष्यामि सतामघम् । इत्येव मनसा कार्यः संकल्पः सुदृढस्तथा ॥ २२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतत्स्मृतिर्भवेन्नित्यमत एव मदाश्रितैः । कृष्णं संपूज्य कृत्वा च प्रणामान्नैत्यकान् पुरा २३ ॥
एकोऽधिको विधातव्यो नमस्कारश्च दंडवत् । ज्ञाताज्ञातवपुर्वाग्घृज्जातसद्द्रोहशांतये ॥ २४ ॥
एषा ममाज्ञा सकलैस्त्यागिभिर्गृहिभिस्तथा । मदीयैः पालनीयैव सदा स्वहितकारिभिः २५ ॥
श्रुत्वेति तस्यामृततुल्यवाचं सोऽन्ये च सर्वे मुनयः प्रहृष्टाः ।
दधुस्तदाज्ञां शिरसा तथैव सर्वे गृहस्थाश्च तदीयभक्ताः ॥ २६ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ त्रिसप्तत्यधिकशततमस्तरंगः ॥ १७३ ॥ ॥ ४० ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । एकादश्यामूर्जकृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वितर्दौ प्रत्यगास्यस्य न्यषीदन्मंचकोत्तमे ॥ २ ॥
सितांबरः पीतपुष्पहारापीडविराजितः । स्वभक्तत्यागिगृहिभिर्वृतः सत उवाच सः ॥ ३ ॥
इह ये भगवद्भक्तास्तैस्तु कृष्णस्य वा सताम् । परिचर्या मिलेद्यर्हि मान्यं भाग्यं तदा महत् ॥
ततः सा भगवत्प्रीत्यै कर्त्तव्याऽतिप्रहर्षतः । न तु लोके स्वयशसे न चारुच्या न मानतः ५॥
जीवस्य तु स्वभावोऽस्ति यत्र मानोपलंभनम् । भवेत्स्वस्येति तत्कर्म कुर्यात्प्रीत्या न चेतरत् ६॥
मानहीना भक्तिरपि केभ्यश्चिन्नैव रोचते । मानस्य दोषरूपत्वात्ते तु मूर्खा मता बुधैः ॥ ७ ॥
भक्तास्तु विरलाः संति मानस्वादविवर्जिताः । रत्नजिन्मयजित्तुल्याः कृष्णप्रीत्येकहेतवः ॥८॥
जीवस्य यादृशः स्वादो मानादुत्पद्यते तथा । नाऽन्येभ्यो हि पदार्थेभ्यः स तु हेयः प्रयत्नतः ॥
सुधोपमेयामिति धर्मसूनोर्निशम्य वाचं मुनयः समस्ताः ।
तेऽन्ये गृहस्थाश्च तदंघ्रिभक्ताः प्रपेदिरे भूरितरं प्रहर्षम् ॥ १० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ चतुःसप्तत्यधिकशततमस्तरंगः ॥ १७४॥ ४१ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । द्वादश्यां सहसः कृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वेदिकायां प्राङ्मुखस्य न्यषीदत्पीठ उत्तमे ॥ २ ॥
सितांबरं वृतं भक्तैस्त्यागिभिर्गृहिभिश्च तम् । साधुर्भगवदानंदः पप्रच्छ विनयानतः ॥ ३ ॥
एकैकरोम्णि कृष्णस्य तव ब्रह्मांडकोटयः । केन प्रकारेण विभो वर्त्तंते सकला अपि ॥ ४ ॥
तत्र कृष्णः स्वयं त्वं च नैकरूपैः कथं स्थितः । तन्मे ब्रूहीति संपृष्टस्तेनोवाच सतां पतिः ५॥
कृष्णेऽक्षरब्रह्मरूपे सावकाशं भवंति ताः । सूक्ष्मादप्यतिसूक्ष्मं तन्महतोऽपि महत्तमम् ॥ ६ ॥
आद्यं तत्रास्त्यमूर्त्तं तु धाम तेजोमयं तथा । मूर्त्तं पुरुषरूपं च सर्वाधारं द्वितीयकम् ॥ ७ ॥
आद्यं निर्गुणमित्युक्तं सगुणं च तथेतरत् । अनिर्देश्यमिति प्रोक्तं द्वेधा शक्तियुतं तु तत् ॥८॥
एकैकरोम्णि तस्यैव संत्यंडान्यणुवन्मुने । नैतावता तु ब्रह्मांडगोलसूक्ष्मत्वसंभवः ॥ ९ ॥
यावत्प्रमाण उदितः शास्त्रे ब्रह्मांडगोलकः । स तावानेव भवति तद्विधा अपरेऽपि च ॥१०॥
ब्रह्मणोऽतिमहत्त्वेन तदणूपमतोच्यते । रैवताद्रेर्यथा मेरोः पुरतस्त्वस्ति सूक्ष्मता ॥ ११ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोकालोकाचलस्याग्रे यथा वा मेरुपर्वतः । असूक्ष्मोऽपीक्ष्यते सूक्ष्मो लोकालोकमहत्तया ॥
अक्षरातिमहत्त्वेन तथा ब्रह्मांडसूक्ष्मता । उच्यते वस्तुतः संति सर्वेऽपि हि यथा तथा ॥१३॥
अतितेजोमये स्वीये धाम्नि ब्रह्मणि सर्वदा । कृष्णोऽक्षरात्मभिर्मुक्तैरास्ते सेवितपंकजः ॥१४॥
तत्रस्थ एव कृष्णस्तु प्रतिब्रह्मांडमात्मनः । योगैश्वर्येण रूपैः स्वैरास्ते कार्यस्य सिद्धये ॥१५॥
यथैव रासलीलायामेकोऽपि स निजेच्छया । भिन्नभिन्नस्वरूपेण प्रतिगोऽपि बभूव ह ॥ १६ ॥
यथोपयोगमत्रापि स तथैवाऽखिलेश्वरः । स्वभक्तसुखदानार्थमास्ते रूपैरनेकधा ॥ १७ ॥

पीत्वेति वाक्यामृतमस्य साधुः स चापरेऽप्यस्य पदाब्जभक्ताः ।
संतो गृहस्थाश्च मुदं प्रपद्य तमानमंति स्म सदोनिषण्णाः ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पंचसप्तत्यधिकशततमस्तरंगः ॥ १७५ ॥ ४२ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । पौषशुक्लचतुर्थ्यां तु वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य महीभुजः । स न्यषीदत्स्वाग्रजस्य मंदिरे पीठ उत्तमे ॥ २ ॥
सितवासा वृतो भक्तैस्त्यागिभिर्गृहिभिश्च सः । उपविष्टान्स्वपुरतः साधून् प्रपच्छ संसदि ॥३॥
भक्त एकांतिको यः स्याद्ब्रह्माधिकारमणस्य सः । गुणातीतश्च सद्रूपः स्यात्सदोपशमस्थितिः ॥४॥
वैराग्यरूपं सत्त्वं च रजो रागात्मकं तथा । मौढ्यं तमश्चेति तस्मिन् गुणधर्मा न संति हि ॥५॥
ईदृग्निर्गुणभक्तस्य कृष्णे प्रीतिर्भवेन्न वा । मुक्तानंदस्तदोवाच तस्य प्रीतिर्भवेद्धरौ ॥ ६ ॥
तमुवाच हरिस्तस्य प्रीतिर्भवति या हरौ । साऽऽत्मनः किं सजातीया विजातीयाऽथवा मुने ॥
मुक्तानंदस्तमाहाऽथ सजातीयेति भाति मे । सोऽथाह वैष्णवाचार्यसिद्धांतोऽप्येवमस्ति हि ॥८॥
रामानुजार्यमध्वार्यौ निंबार्को वल्लभस्त्विति । प्राहुः कार्याऽऽत्मरूपेण प्रीतिः कृष्णे बृहद्धि सा

श्रुत्वेति तस्यामृततुल्यवाचं मुनिः स चान्येऽपि तदीयभक्ताः ।
संतो गृहस्थाश्च सदोनिषण्णाः प्रपेदिरे तोषमुदारमेव ॥ १० ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ षट्सप्तत्यधिकशततमस्तरंगः ॥ १७६ ॥ ४३ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । शुक्लाष्टम्यां सहस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वेदिकायां प्राङ्मुखस्य न्यषीदन्मंचकासने ॥ २ ॥
त्यागिभिर्गृहिभिर्भक्तैरनेकैः परितो वृतः । सितसर्वांबरधरः पुरःस्थान् सोऽब्रवीत्सतः ॥ ३ ॥
गृहिणोऽप्यत्र बहवः कृत्वा सत्संगमात्मनः । भजंति श्रेयसे साक्षात्कृष्णमेव नराकृतिम् ॥ ४ ॥
गुणा दोषाश्च तेषु स्युः प्रवृत्तस्थतया नृणाम् । सुधियस्तु गुणानेव तेषां गृह्णंति नेतरान् ॥
सजातीयविजातीयभेददृष्टिं विहाय ते । परस्परं स्वजनवद्वर्त्तंते गुणदर्शिनः ॥ ६ ॥
तत्रापि कश्चित्संगेन भ्रष्टो जायेत पापिनाम् । सुरापरस्त्र्यादिरतिर्भक्तंमन्यस्तथा भवेत् ॥ ७ ॥
गुणानेवात्मनः पश्येत्स तु दोषं न कंचन । दोषानेव परेषां तु नेतरान्विपरीतधीः ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स तेषामपि भक्तानां दोषदर्शी भवेत्सदा । यदि स्वं बोधयेत्कश्चित्तद्धंस्य तु विशेषतः ॥ ९ ॥
दोषा भवेयुर्यावंतस्ते तावत एव सः । पश्येदिति न किंत्वन्यान् बहून् दोषान् स्वकल्पितान् ॥
ये गुणाः स्वेन तेषु प्राग्दृष्टास्तानपि सर्वशः । दोषानेव स वीक्षेत कुसंगहतसन्मतिः ॥ ११ ॥
ईदृशः पुरुषो यः स्यात्तस्य संगो न कर्हिचित् । कार्यः केनाप्यपकरः सर्वपुण्यापहृत्तथा ॥१२॥
विषयासक्तमनसोऽप्यत्र केचित्तु पुरुषाः । साधुलक्षणसंपन्नानाश्रयंते सतः पुरा ॥ १३ ॥
साक्षाद्धरिं च तद्वाक्याद्भजंत्यदृढनिश्चयाः । स्वमहत्वख्यापनाय त्यागिनश्च भवंत्यरम् ॥ १४ ॥
नियमानां पालनेऽन्यसद्भ्योप्याधिक्यमात्मनः । वदंतोऽपि न तत्कर्तुं शक्ता ग्राम्यसुखैषिणः ॥
देहाभिमानिनस्तांस्तु विदंतोऽतिदयालवः । भक्तिमेकांतिकीं संतो बोधयंति शनैः शनैः ॥१६॥
यदा तु साधवस्तेऽमून् हर्तुं विषयवासनाः । वैराग्यवार्त्तां कुर्वंति तां न शृण्वंति ते तदा १७॥
दुःस्वभाववशात्ते तांस्त्यक्त्वा स्वाप्रियभाषिणः । कुर्वंते पशुबुद्धीनां भक्ताख्यानां तु संगमम् ॥
तद्बोधात्ते वैषयिकसुखेष्वेवानुरागिणः । दोषान्महत्सु गृह्णंति सत्सु वानरवृत्तयः ॥ १९ ॥
दुःसंगदुःस्वभावाभ्यां विपर्यस्तधियोऽथ ते । गुणानपि सतां सर्वान् दोषानेव विचक्षते ॥२०॥
ततः सद्द्रोहमपि ते कर्तुं नैव हि बिभ्यति । नृनाटनेऽपि कृष्णस्य दोषान् गृह्णंति भूरिशः ॥
ईदृशा ये तु जीवास्ते ह्यसुरा इति बुद्ध्यताम् । न तेषां संगमः संतः कर्त्तव्यः क्वापि केनचित्
एतेभ्यो विपरीता ये ते तु दैवा हरेः प्रियाः । न तेषां कृष्णलीलायां संशयः क्वापि जायते ॥
सतां चाप्यगुणः कोऽपि न विशंत्यंतरे क्वचित् । तेषामेव सदा संगः कर्त्तव्यः स्वहितेच्छुभिः

सुधोपमां धर्मसुतस्य वाचमित्थं निशम्यासमुदः समस्ताः ।
ते साधुभक्ताश्च गृहस्थभक्ताः सभोपविष्टाः प्रणमंति तं स्म ॥ २५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ सप्तसप्तत्यधिकशततमस्तरंगः ॥ १७७ ॥ ॥४४॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । पौषकृष्णप्रतिपदि वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वेद्यां प्राचीनवक्त्रस्य स्वासने समुपाविशत् ॥ २ ॥
भक्तैर्वृतस्त्यागिभिश्च गृहिभिः स सहस्रशः । सितसर्वांबरः साधूनुवाच स्वाग्रतः स्थितान् ॥
यूयं सर्वे साधवोऽथ धर्मवंश्याश्च वर्णिनः । भक्ताः पद्माश्च गृहिणो मदीया इति विश्रुताः ॥
यूयं शिष्या गुरुरहं शिष्यशिक्षा गुरोः क्रिया । शिष्यैश्चाज्ञा गुरोः पाल्या धर्म एवं व्यवस्थितः
सावधानतयैवाऽतो शिक्षा वार्त्ताऽनुवासरम् । निःशेषदोषनाशाय क्रियते हि मया मुहुः ॥
भवतीच्छा मम त्वित्थं स्वाश्रितेष्वणुमात्रकः । दोषः स्थातुं नैव देयः कार्या एकांतिनश्च ते ॥
प्रीतिः कृष्णेतरार्थेषु दुःस्वभावश्च कश्चन । स्वाश्रितानां हृदि स्थातुं नैव देयोऽस्ति कर्हिचित् ॥
बाह्यांतःकरणप्राणगुणभूतार्थदेवताः । एतेष्वन्यतमस्यापि संगो देयो न रक्षितुम् ॥ ९ ॥
मायिकोपाधिरहितसन्मात्रेणात्मना हरेः । साक्षादुपासना सर्वैः कारणीयास्ति सर्वथा ॥१०॥
कृष्णभिन्नस्य कस्यापि पदार्थस्य तु वासना । हृदि स्थातुं न देयास्ति सा तु खन्यास्ति मूलतः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कस्यचिद्वासनाशेषो जन्मन्यत्र भविष्यति । यदि तर्हि बदर्यां वा श्वेतद्वीपेऽतिभासुरे ॥ १२ ॥
तपसा नाशयित्वा तं भक्तं कृत्वा च निर्गुणम् । ब्रह्मधामैव नेयोऽसौ न तु गत्यंतरे क्वचित् ॥
अत्रैव प्रायशः सर्वे कर्त्तव्या निर्गुणा इति । ममेच्छा वर्त्तते तस्मादाज्ञा पाल्या ममाखिलैः ॥
सोत्साहैर्भवितव्यं हि मदाज्ञाचरणे सदा । मदाश्रितैस्तु युष्माभिस्त्राताऽस्मि भवतामहम् १५॥
इत्युक्ताः साधुमुख्यास्ते सर्वे भक्तजनाः प्रभुम् । तथा भविष्याम इति तमुक्त्वा च ववंदिरे ॥
एतावत्यभवद्वार्त्ता संगवे तत्र पर्षदि । पुनर्निशि तथैवाऽभूत्सभा तत्रैव हि स्थले ॥ १७ ॥
भक्तमंडलमध्यस्थो हरिः प्रोवाच तान्सतः । गुणात्मका जनाः संति तेषां कर्म गुणात्मकम् ॥
तत्र स्याद्देवलोकाप्तिः सात्त्विकेन तु कर्मणा । कर्मणा राजसेनैव मध्यलोकोपलंभनम् ॥ १९ ॥
अधोलोकोपलब्धिः स्यात्तामसेन तु कर्मणा । तत्र शंका यदि भवेदैकविध्यात्तु कर्मणः ॥२०॥
रजःकर्मवतां नृणां सर्वेषां सुखदुःखयोः । तुल्यताऽपेक्षिता सा तु कथं नास्ति तदोच्यते २१॥
कर्मणो राजसस्यापि देशकालादियोगतः । भेदा भवंत्यनंता हि फले भेदो भवत्यतः ॥ २२ ॥
देहेनानेन भोग्यं तु प्रारब्धं कर्म कीर्त्यते । जन्मांतरेण भोग्यं हि क्रियमाणं तु कर्म यत् ॥
तत्राप्यस्ति विशेषस्तं साधवः कथयामि वः । हरेर्हरिजनानां च कर्म यत्स्यादरोचकम् ॥२४ ॥
इहैव जन्मनि फलं तस्य दुःखं महन्नरः । याम्ययातनया तुल्यं भुंक्ते न त्वन्यजन्मनि ॥२५ ॥
क्रियेत कर्म यत् पुंसा हरितद्भक्तरोचकम् । इहैव तत्फलं भुंक्ते स सुखं ब्रह्म धामवत् ॥ २६ ॥
कृतं स्यादिह यत्नेन कर्म यत्स्वर्गसौख्यदम् । हरितत्सद्द्रोहतस्तत्सर्वमेव विनश्यति ॥२७॥
नरकप्रापकं कर्म कृतं स्यादिह यन्महत् । कृष्णतत्सत्प्रीणनात्तु तच्च सर्वं विनश्यति ॥ २८ ॥
अतो बुद्धिमता त्वत्र हरितज्जनरोचकम् । कर्म यत्नेन कर्त्तव्यं न क्वचित्तदरोचकम् ॥ २९ ॥
बोधनीया एवमेव मुख्येन गृहिणाऽखिलाः । स्वजना अपि यत्कुर्युः कर्म कृष्णसतां प्रियम् ॥
कृष्णतत्सत्प्रीतिकरं कर्म कृत्वा दिवौकसः । सूर्यचंद्रानलमुखाः प्रापुस्तेजस्वितां भृशम् ॥३१॥
ब्रह्मांडे सुखिनो ये ये संति लोकाश्वराश्वराः । ते सर्वे कृष्णतद्भक्तप्रीणनादिति गम्यताम् ३२॥
एवं ज्ञात्वा सौख्यमिच्छद्भिरथ्यं पुंभिः कृष्णस्तज्जनाः प्रीणनीयाः ।
इत्थं वाचं तस्य पीयूषतुल्यां श्रुत्वा संतस्तोषमापुस्तथाऽन्ये ॥ ३३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावष्टसप्तत्यधिकशततमस्तरंगः ॥ १७८ ॥ ४५ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । एकादश्यां पौषकृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स वेश्मनः । वितर्दौ प्रत्यगास्यस्य न्यषीदत्पीठ उत्तमे ॥ २ ॥
सितसर्वांबरो भक्तैस्त्यागिभिर्गृहिभिर्वृतः । सूक्ष्मतूलपटीं पीतां वसानश्चित्रितां तथा ॥ ३ ॥
उवाच स सतो येऽत्र संति भागवतोत्तमाः । ते स्वमेकांतिकं धर्ममेव रक्षंति यत्नतः ॥ ४ ॥
न हि देहस्य मरणं मन्यंते मरणं हि ते । स्वधर्मच्यवनं ते तु जानंति मरणं खलु ॥ ५ ॥
इतरस्यापि भक्तस्य चेत्स्वधर्मच्युतिस्तदा । तां दृष्ट्वा तेऽतिखिद्यंते तदधोगतिचिंतया ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्त्रीपुत्रधननाशादिदुःखं दृष्ट्वा तु देहिनाम् । न जायंते च ते खिन्ना मायिकक्षयनिश्चयात् ॥७॥
धर्मस्याचरणे तेषां श्रवणे बोधनेऽपि च । प्रवर्त्तने च यत्नोऽस्ति यतः कृष्णः प्रसीदति ॥ ८ ॥
एकांतिको धर्म एव हरेरस्त्यतिवल्लभः । यत्स्थापनायाऽनुयुगमवतारान्दधाति सः ॥ ९ ॥
वर्णाश्रमस्य धर्मं तु सप्तर्षिप्रमुखा अपि । संति स्थापयितुं शक्ता न त्वमुं तु हरीतरः ॥ १०॥
ईदृशं धर्ममेकांतमिह पालयतां नृणाम् । क्वचित्स्यात्कस्यचिच्चित्ते कृष्णतद्भक्तदोषधीः ॥ ११ ॥
यदि तर्हि तु धर्मात्स्वात्स पतेन्नात्र संशयः । तस्यां हेतुर्यदि क्रोधस्तदा सर्पो भवेत्स तु ॥१२॥
कामो हेतुर्यदि तदा यक्षो वा राक्षसो भवेत् । मृत्वा ततः स्वधर्मस्य फलं भुंक्तेऽमरालये १३॥
न त्वसौ कृष्णतद्भक्तदोषग्राह्यक्षरं व्रजेत् । अतो न सर्वथा कार्या कृष्णतद्भक्तदोषधीः ॥१४ ॥
महापापवतः क्वापि प्रायश्चित्तैर्विशुद्धितः । सत्संगेन तदाप्तिः स्यान्न तु पुंसस्तु तद्वतः ॥१५ ॥

वचःसुधां कर्णपुटैर्निपीय ते साधवः स्वीयगुरोरितीष्टाम् ।
संतोषमापुर्हृदये महांतं तथा गृहस्था अपि भक्तिमंतः ॥ १६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावशीत्यधिकशततमस्तरंगः ॥ १७९ ॥४६ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । दशम्यां तपसः कृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीक्षितः । प्रागास्यवेश्मवेद्यां स न्यषीदन्मंचकासने ॥ २ ॥
सितवासास्तूलपटीं वसानः स्वीयसंवृतः । संतो विलोकयन्सर्वान्स तद्धितकृदूचिवान् ॥ ३॥
पंच पंच सतां संति मंडलानि हि वोऽनघाः । एकैकस्तेषु मुख्योऽन्ये तदाज्ञानुगुणक्रियाः ॥४॥
तत्र मुख्या यदि भवेद् बुद्धिमांस्तर्हि सोऽपरान् । चतुरो रक्षितुं पार्श्वे शक्नुयाद्रंजयन्सतः ॥
अनीदृशस्यांतिके तु न ते तिष्ठंति साधवः । स हि तेषां मनोभीष्टं विधातुं नैव बुध्यते ॥ ६ ॥
करोति वार्त्तां धीमांस्तु ज्ञात्वा श्रोत्रधिकारिताम् । सम्यग्रोगं परीक्ष्यैव नाडीवैद्योऽगदं यथा ॥
स्वधर्मज्ञानवैराग्यभक्तीनां यस्य सोऽल्पताम् । मुमुक्षौ सति पश्येत्तद्वार्त्तां कुर्याद्धि तद्धिताम् ॥
मुमुक्षोः पुरतः साधोः सम्यग्विषयखंडनम् । दुःखयित्वापि तं कुर्यात्सोऽतिहृष्टस्तदा भवेत् ॥
स्वदोषापगमायाऽथ सद्गुणागमनाय च । सतां संगं विदधते महतां हि हरिश्रिताः ॥ १० ॥
रोगराजोपमः साधुर्महानिति जगुर्बुधाः । यद्गाढसंगात्सहसा विषयेहा निवर्त्तते ॥ ११ ॥
सद्भोज्यवस्त्रसंप्राप्त्यै साधुवेषधरस्तु यः । महासन्मंडले तिष्ठेत्स तु ज्ञेयो नराधमः ॥ १२ ॥
स भ्रष्टो भविता नूनं कालेनाल्पेन सत्पथात् । लप्स्यते च शुनः साम्यमिति जानीत निश्चितम्
अतो दुराशां हित्वैव श्रेयसे स्वस्य केवलम् । महत्संगो विधातव्यस्त्याज्यो मानश्च मत्सरः ॥
श्वेतद्वीपे बदर्यां वा यादृशी सत्सभा भवेत् । तादृशीयं हि महतां साधूनां वर्त्तते सभा १५॥
अत्र त्ववश्यं हातव्याः सर्वा मलिनवासनाः । नास्त्यन्यखलु तत्त्यागस्थानं भुवि मुमुक्षताम् ॥
भुक्ताः संत्येव विषया नानायोनिषु भूरिशः । अद्यापि न तु भोगेच्छा तेषां शाम्यति कस्यचित्
अतो भोगैर्न शाम्येत्सा वह्निज्वालेव सर्पिषा । त्यागेनैव तु सा शांता महासाधुषु दृश्यते १८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतः सा सर्वथा त्याज्या बहुजन्मातिदुःखदा । उपायेनैव भगवन्माहात्म्यश्रवणादिना ॥१९॥
तत्त्याजनार्थं गुणिनो महांतो यदि साधवः । अप्रियाण्यपि वाक्यानि वदेयुर्हितकारिणः ॥ ८० ॥
तर्हि तान्यप्यतिप्रीत्या ग्राह्याणि सुखलब्धये । सदौषधं रोगिणेव भवपाशमुमुक्षुणा ॥ २१ ॥
नन्वीदृशस्त्ववसरो वासनाक्षयकारणम् । दुर्लभोऽस्तीति मत्वैव कर्त्तव्योऽद्य तदुद्यमः ॥ २२ ॥
इहैव जन्मनि त्यक्त्वा वासना ह्यखिला अपि । कृष्णभक्तिप्रतापेन देहस्त्याज्योऽस्ति नान्यथा ॥
त्यक्त्वापि देहं कृष्णस्य भक्तिरेव ममाऽन्वहम् । ब्रह्मरूपेणात्मनैव कर्त्तव्यास्ति शुकादिवत् ॥
इत्येव निश्चयः कार्यः सोत्साहं हि मुमुक्षुणा । ततः साधूक्तरीत्यैव वृत्यं निश्छद्म सर्वदा २५॥
एवं हि वर्त्तमानस्य साहाय्यं कुरुते हरिः । ततोऽसौ देहमुत्सृज्य ब्रह्मधामैव याति हि ॥ २६॥
दिव्यं विमानमारुह्य व्रजन् धाम हरेः स तु । इंद्रब्रह्मादिलोकास्तु निरयानिव पश्यति ॥२७॥
कृष्णधामोत्कृष्टसौख्यलाभायैव हि मायिकम् । तुच्छं ग्राम्यसुखं भक्ता ह्याप्यते दुःखयुग्मया ॥
अतो मद्वचसि स्थित्वा सर्वे मां कृष्णमादरात् । भजंत्वेकांतभक्त्यैव कुर्वंतः सत्समागमम् २९॥
ईदृग्भक्तेरपक्वत्वं यस्य स्यात्सोऽपि पूरुषः । निश्चयं हृदये स्वस्य विदध्यादीदृशं दृढम् ॥ ३० ॥
दुर्गतिर्न भविष्येव कृष्णभक्तस्य मे खलु । न कल्याणकृतः सा स्यादिति गीतासु हीक्ष्यते ३१॥
अपक्वतावशाद्भक्तेर्वासनाशेषतस्तथा । प्राप्याऽप्यहं देवलोकान् देहांते पुण्यकर्मणाम् ॥३२॥
निरयेष्वेव तत्रापि भक्तिवासनया हृदि । अनासक्तो भृशं क्वापि प्राप्स्याम्येवाऽक्षरं पदम् ३३॥
न त्वंतराऽस्ति मे स्थेयं भोगलोभवशादिति । त्यागी वापि गृही कुर्यान्निश्चयं हृदये दृढम् ॥
गृहिभिस्त्यागिभिर्भक्तैः कर्त्तव्या च परस्परम् । संभावना यथार्हं वै तया कृष्णः प्रसीदति ॥
यथाशक्त्यन्नवस्त्राद्यैः संतस्तु गृहिभिर्नरैः । संभावनीयाः सद्भिस्तु कृष्णवार्त्तादिभिश्च ते ३६॥

तस्येति वाक्यं मुनयः सदःस्था निशम्य सर्वेऽपि सुधासमानम् ।
अन्ये च भक्ता गृहिणोऽपि हर्षं महांतमापुर्हृदि तं च नेमुः ॥ ३७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावशीत्यधिकशततमस्तरंगः ॥ १८० ॥ ४७ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । माघकृष्णचतुर्दश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । वितर्द्दौ पूर्ववक्त्रस्य निषसाद निजासने ॥ २ ॥
सितांबरधरो भक्तैर्बहुभिः परितो वृतः । नूत्ना दधानः कंठे च तुलसीकाष्ठमालिकाः ॥ ३ ॥
पीतपुष्पस्रगापीडो ध्यानपद्यानि सोऽश्रृणोत् । सवाद्यं गीयमानानि प्रेमानंदेन साधुना ॥ ४ ॥
ततस्तेषां स पद्यानां कृष्णचिंतनशोभिनाम् । मनःश्रोत्रानंदकृतां स्तुतिं कुर्वन्सतोऽब्रवीत् ५ ॥
अतिशोभनपद्यानि गीतान्येतेन साधुना । श्रुत्वैतानि विचारोऽभून्ममायं हृदये महान् ॥ ६ ॥
अहो अयं महान्साधुर्य इत्थं कृष्णचिंतनम् । करोत्यतो ममाप्येष वंदनीयो भवत्यलम् ॥ ७ ॥
एवं यश्चिंतयन् कृष्णं त्यजेद्देहं स पूरुषः । गर्भवासं पुनर्नैयाद्धन्यो जीवन्नपि ध्रुवम् ॥ ८ ॥
अखंडं भगवन्मूर्त्तौ यस्य चेतो रमेत सः । कृतार्थ एव संजातः श्वेतमुक्तेन संमितः ॥ ९ ॥
अस्मिन्काले धन्यतमो य एवं कृष्णचिंतकः । तस्मात्सर्वैर्यथाशक्ति मनो रक्ष्यं हरौ सदा १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्राप्यशक्तः पुरुष ईदृशानां सतां व्रजे। वर्त्तेत सर्वदा तेन यास्यत्येव हि तद्गतिम् ॥ ११ ॥
ममापि हृदि संकल्प एवमेवास्ति साधवः। पुनर्जन्म यदि स्यात्तद्दासः सन्मंडलेऽस्त्विति १२ ॥
कृष्णं सदा चिंतयेद्यः पुरुषोऽनन्यभावतः। स कालकर्ममायाभ्यो मुक्त एवेति गम्यताम् १३ ॥
धन्यमेव कुलं तच्च कृष्णचिंतकपूरुषः। यत्र जातोऽथ पितरौ कृतार्थौ तस्य सर्वथा ॥ १४ ॥
कृष्णं विहाय ये त्वन्यान् पदार्थान् मायिकान् हृदि। चिंतयेयुः क्वचित्तेषां दुःखांतो नास्ति निश्चितम्
प्राप्तानां मानुषं देहं कृष्णचिंतनतः परः। नास्त्यन्यो हि महाँल्लाभस्तस्मात्तत्कार्यमंजसा १६ ॥

इति प्रभोर्वाक्यसुधां निपीय सर्वेऽपि ते साधुजनाः प्रमोदम्।
प्रापुर्गृहस्थाश्च तदीयभक्ताः सभोपविष्टाः प्रणमंति तं स्म ॥ १७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकाशीत्यधिकशततमस्तरंगः ॥ १८१ ॥४८ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते। तपस्याद्द्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य महीपतेः। वासुदेवालयस्याग्रे न्यषीदत्स निजासने ॥ २ ॥
सितवासाः श्वेतपुष्पापीडशोभिशिरःपटः। भक्तैः सद्भिर्गृहस्थैश्च परीतः सोऽब्रवीत्सतः ३ ॥
प्रत्यक्षभगवन्मूर्त्ति मायिकाश्चाखिलाकृतीः। अज्ञाः समतयेक्षंते न तु तत्त्वविदो जनाः ॥ ४ ॥
पश्यंति मायिकाकारांश्चिंतयंति च ये नराः। निरयान् यांति ते त्वंते संसृतिं च पुनः पुनः ॥
प्रत्यक्षभगवन्मूर्त्ति ये तु पश्यंति मानवाः। चिंतयंति च ते यांति भवमुक्ताः परं पदम् ॥ ६ ॥
एवं तस्याश्च तासां च भेदे महति सत्यपि। मूर्खा विषयिणो जीवा न तं जानंति मोहिताः ॥
दर्शनस्पर्शपूजाद्यैः कृष्णमूर्त्तेश्च मानवाः। कालमायाकर्मबंधान्मुक्ताः संति महासुखाः ॥ ८ ॥
अतो मम तु कृष्णस्य नवधा भक्तिरेव हि। कर्त्तव्याऽस्त्यथ युष्माभिरपि सैव विधीयताम् ॥

इति प्रभोस्तस्य वचोऽमृतं ते निपीय सर्वे मुनयस्तथैव।
तदीयभक्ता गृहिणो जनाश्च प्रहर्षमापुः परमं सदःस्थाः ॥ १० ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्व्यशीत्यधिकशततमस्तरंगः ॥ १८२ ॥ ४९ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते। चैत्रकृष्णद्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स भूभुजः। वासुदेवालयस्याग्रे वेद्यां पीठ उपाविशत् ॥ २ ॥
सितवासा वृतो भक्तैस्त्यागिभिर्गृहिभिश्च सः। सत ऊचेऽद्य तु मम रहस्यमपि वो ब्रुवे ॥ ३ ॥
अब्धौ नद्येव दहने सत्येव शलभेन च। शूरेणेव रणे स्वात्मा ब्रह्मण्यस्ति मया हुतः ॥ ४ ॥
तादात्म्यं तेन संप्राप्य निषेवे कृष्णमेव हि। तेजोमयेऽक्षरे तस्मिन् धाम्नि दिव्यतनुं प्रभुम् ॥
तस्मिन्नेव दृढं प्रीतिरस्ति मेऽन्यत्र न क्वचित्। विषयेषु त्वणुरपि रुचिर्नास्त्येव पंचसु ॥ ६ ॥
तीव्रं वैराग्यवेगं मे दर्शयामि न बाह्यतः। अंतरे तु महानेव वर्त्तते स त्वनौपमः ॥ ७ ॥
यदा पश्यामि महतां सतां तं च तथा मम। तदा विशेषं पश्यामि महांतमुभयोरपि ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रापंचिकपदार्थस्य तेषां किंचन वासना । वर्त्तते मम तु क्वापि नास्ति स्वप्नेऽपि सा ध्रुवम् ९ ॥
भक्तौ च क्रियमाणायां राधिकारमणस्य मे । अंतरायं विधातुं तु समर्थो नास्ति कश्चन ॥ १० ॥
कृष्णाप्तेः पूर्वमात्मानमपि नाशयितुं त्विमम् । कालः कर्म च माया वा नाऽक्षमंत कदाचन ॥
सांप्रतं तु हरिः साक्षान्मिलितोऽस्ति जगत्प्रभुः । कालादिभ्यस्ततो भीतिर्नैवास्ति खलु सर्वथा ॥
इति निश्चित्य मनसा कृष्णे च कृष्णसेविषु । क्रियते सुदृढा प्रीतिः कार्यते च निजाश्रितान् ॥
प्रीतिर्यस्य भवेत् पुंसः क्वापि मायिकवस्तुषु । न हि तस्मिन्मम रुचिः पार्श्ववर्त्तिन्यपि ध्रुवम् ॥
निर्वासनास्तु ये भक्ताः प्रीतिमंतो रमापतौ । भवत्यतिरुचिस्तेषु मम नित्यं हि साधवः १५ ॥

वाक्यं सुधातुल्यमितीश्वरस्य निशम्य सर्वेऽपि तदाश्रितास्ते ।
तदात्मशिक्षार्थकमित्यवेत्य प्रापुः प्रहर्षं गृहिणश्च भक्ताः ॥ १६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्र्यशीत्यधिकशततमस्तरंगः ॥ १८३ ॥ ५० ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । चैत्रकृष्णनवम्यां तु वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स वेश्मनः । वितर्द्दौ दक्षिणास्यस्य न्यषीदन्मंचकोत्तमे ॥ २ ॥
भक्तैः परिवृतः स्वीयैस्त्यागिभिर्गृहिभिश्च सः । सितांबरधरः प्रीत्या पुरःस्थानब्रवीत्सतः ३ ॥
जायतेऽतिसुखी जीवः सुषुप्तिं प्राप्य कर्हिचित् । क्वचित्प्राप्यापि तामस्ति खिन्नः किं तत्र कारणम्
इति पृष्टास्तु ते संतो यदा सम्यक्तदुत्तरम् । न विदुस्तर्हि तत्स्वामी स्वयमेव जगाद तान् ५ ॥
तमःप्रधानसुप्तौ तु प्रायशो वर्त्तते सुखम् । विक्षेपाभावतो जाड्यं प्राधान्येन च दृश्यते ॥ ६ ॥
परस्परं गुणानां च मिश्रत्वात्तत्र यर्हि तु । रजः करोति विक्षेपं तदा दुःखं प्रवर्त्तते ॥ ७ ॥
गुणत्रयस्य संबंधो यावज्जीवस्य वर्त्तते । तावत् क्वापि सुखं नास्ति सुषुप्तौ वापि जाग्रति ॥ ८ ॥
यदा त्वसौ विमुच्यैव गुणसंगं विचारतः । सद्रूपेणाऽवतिष्ठेत सुखी तर्ह्येव जायते ॥ ९ ॥
मुक्तानंदस्तदाऽपृच्छत्सद्रूपेणात्मना तु यः । वर्त्तेत पुरुषस्तस्य बोद्धुमिच्छामि लक्षणम् १० ॥

श्रीहरिरुवाच

अतिदुष्करमेवास्ति सद्रूपेण तु वर्त्तनम् । शरीरं सर्वतो व्याप्य स्थितस्यास्य शरीरिणः ११ ॥
आत्मनिष्ठां परां प्राप्ताः संति ब्रह्मशिवादयः । शिष्यतां भेजिरे येषां नारदः सनकादयः १२ ॥
देशकालादिवैषम्ये तेऽपि यांति क्वचित् क्वचित् । विक्षेपमंतरे दुःखमितरेषां तु का कथा १३ ॥
सद्रूपेण स्थितमपि देशकालादयोऽशुभाः । दुःखयंति शुभास्ते तु सुखयंति च पूरुषम् ॥१४॥
अतः कृष्णनिबद्धायां मर्यादायां हि सर्वथा । पुंभिः सर्वैर्वर्त्तितव्यं भुवि कृष्णाश्रितैः सदा ॥
देशकालानुसारेण येषां येषां यथा यथा । धर्माः प्रकीर्त्तिताः संति तैस्तैर्वृत्यं तथा तथा १६ ॥
ततोऽधिका न पाल्याश्च ततो न्यूनाश्च वा वृषाः । यावंत उक्तास्तावंतः पालनीयाः प्रयत्नतः ॥
अधिकारं हि सर्वेषां ज्ञात्वा सर्वज्ञ ईश्वरः । यां बबंध स मर्यादां सैव पाल्या सुखाप्तये ॥
सैव संतो हि देशाद्यास्तस्या उल्लंघनं तु यत् । तदसंतो हि देशाद्या ज्ञेया एवं शुभाशुभाः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मर्यादायां स्थितिर्याऽस्यां सैव ज्ञेया त्वया मुने । सद्रूपेण स्थितिः स्वस्य यया सौख्यं भवेन्महत्

तस्येति वाचं स सुधोपमेयां निपीय हर्षं मुनिरंतरेऽगात् ।
तथैव चान्ये मुनयस्तदीया भक्ता गृहस्थाश्च सदोनिषण्णाः ॥ २१ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुरशीत्यधिकशततमस्तरंगः ॥ १८४ ॥ ५१ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । एकादश्यां चैत्रकृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुराल्लक्ष्मीवाटिकां समुपेत्य सः । स्वास्तृतायां वेदिकायां न्यषीदद्धवलांशुकः ॥ २ ॥
सितपुष्पस्रगापीडो वृतो भक्तैः सहस्रशः । गीयमानानि पद्यानि सद्भिः कृष्णस्य सोऽशृणोत् ॥
तदंते सोऽब्रवीत्साधून्भक्ताः संति हरेरिह । त्यागिनो गृहिणश्चेति द्विविधा दृढनिश्चयाः ॥ ४ ॥
तेषां धर्मास्तूभयेषां भवंत्येव पृथक् पृथक् । परस्परविरुद्धाश्च संति तान्कतिचिद् ब्रुवे ॥ ५ ॥
धनैश्वर्याश्वमातंगमहिषीगोमहागृहाः । स्त्रीपुत्रानर्घ्यवसनहेमरत्नादिभूषणम् ॥ ६ ॥
एवमादिपदार्थानां संपादनपरिग्रहौ । गृहिणामेव शोभेते त्यागिनां तु न वै क्वचित् ॥ ७ ॥
कौपीनकंथादिधृतिर्वनवासो बृहद्व्रतम् । काषायवस्त्रस्य धृतिः श्मश्रूणां मुंडनं तथा ॥ ८ ॥
परापकारसहनमित्यादि त्यागिनां महत् । भूषणं गृहिणां तत्तु दूषणं नैव शोभते ॥ ९ ॥
एवमाचरणे ज्ञेया परस्परविरुद्धता । गृहिधर्मांस्त्यजेत्त्यागी तद्धर्मांश्च गृही ततः ॥ १० ॥
गृहाश्रमं विहायात्राऽत्र जाता ये त्यागिनो नराः । तैर्विचार्यं वयं नैव गृहिणस्त्यागिनो वयम् ॥
अतो गृहिजनार्हस्य पदार्थस्यैषणा क्वचित् । नैवार्हति न तां क्वापि करिष्यामो व्रतक्षतिम् ॥
एवं विचार्य धर्मे स्वे वर्त्तंते ये तु साधवः । प्रीतिर्ममास्ति तेष्वेव नान्यत्रेत्यवधार्यताम् ॥ १३ ॥
मुकुंदाद्यास्तथैवाऽत्र वर्त्तंते ये मदंतिके । अत एव हि तेष्वस्ति ममप्रीतिर्निरंतरम् ॥ १४ ॥
श्रद्धालुत्वात्तथैतेषां सेवां गृह्णामि चादरात् । श्रद्धाहीनैः कृतां तां तु प्रीत्या गृह्णामि न क्वचित्
पत्रं पुष्पं फलं तोयं श्रद्धादत्तमुपाददे । श्रद्धाहीनेन दत्तं तु नेक्षे किंचिदपि ध्रुवम् ॥ १६ ॥
पूजां यः श्रद्धया कुर्यान्मदीयामपि कश्चन । मद्गृहीतां च तां दृष्ट्वा तस्मा ईर्ष्येत्स मूढधीः

रुचिर्न तस्मिन्मम जायते वै श्रुत्वेति तस्यामृततुल्यवाचम् ।
संतो गृहस्थाश्च तदीयभक्ताः प्रपेदिरे भूरितरं प्रतोषम् ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ पञ्चाशीत्यधिकशततमस्तरंगः ॥ १८५ ॥ ५२ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । वैशाखशुक्लपंचम्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य निजाश्रमे । व्यराजत्स्वासने स्वामी सितवासा वृतो निजैः ॥ २ ॥
स्वाग्रोपविष्टानूचेऽथ स साधून्स्वाननेक्षणान् । यो मोहः कथितः शास्त्रे तद्रूपं शृणुत ब्रुवे ॥ ३ ॥
स्वदोषाननुसंधानं रूपं मोहस्य कीर्त्यते । पंडितंमन्यपुरुषास्तद्वंतः संति भूरिशः ॥ ४ ॥
शरीरस्थं तु जीवं स्वं यथावन्न विदुर्हि ते । कृष्णो गौरश्च वा ह्रस्वो दीर्घोऽणुर्वा महानिति ॥

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवमज्ञानिनोऽप्येते महत्सु हरिसेविषु । साक्षात्कृष्णेऽपि दोषं च त्राकृतौ कल्पयंति वै ॥६ ॥
एते महांतः कृष्णो वा कर्मैतावत्तु नोचितम् । कुर्वंतीति विदुर्मूढा निर्दोषे दोषदर्शनाः ॥७॥
कृष्णस्तु साक्षाद्भगवान् राधालक्ष्मीपतिः प्रभुः । अनंतकोटिब्रह्मांडस्थित्युत्पत्त्यादिकारणम् ॥
शारदाब्रह्मशेषाद्या न पारं यांति यस्य च । वेदा अपि गुणान् यस्य गायंतोंऽतं न यांति च ॥
तस्यापि लीलास्विह ये पुमांसो दोषकल्पकाः । त एवाधार्मिका ज्ञेया मूर्खाश्च विमुखा हरेः
कृष्णे च कृष्णभक्तेषु ये नरा दोषदर्शिनः । न तेषां जायते श्रेयः कदाचिदपि पापिनाम् ॥११॥
एवं हि मोहो विज्ञेयो निर्दोषे दोषदर्शनम् । आत्मदोषस्य चाज्ञानमिति प्रोक्तो विवेकिभिः ॥
माहात्म्यं ये तु कृष्णस्य सत्सच्छास्त्रनिषेवया । ज्ञात्वा भजंति तं तेभ्यः स सम्यगपसर्पति ॥

इति प्रभोस्तस्य वचोऽमृतं ते निपीय संतः सकलास्तदीयाः ।
तोषं महांतं हृदि लेभिरेऽथो सदोनिषण्णा गृहिणश्च भक्ताः ॥ १४ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ षडशीत्यधिकशततमस्तरंगः ॥ १८६ ॥ ५३ ॥

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । ज्येष्ठस्य शुक्लसप्तम्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुराल्लक्ष्मीवाटिकां समुपेत्य सः । आम्राधस्ताद्वेदिकायां निषसाद सितांबरः ॥ २ ॥
मल्लिकापुष्पहारश्च मल्लिकापुष्पशेखरः । परितः स्वैर्वृतो भक्तैः सतः पप्रच्छ सोऽग्रतः ॥ ३ ॥
प्रोक्तोऽधिको भागवते सत्संगो हरिणा स्वयम् । सांख्ययोगतपस्त्यागतीर्थदानव्रतादितः ॥४॥
सोऽधिकः स्यान्मतो यस्य तस्य मे ब्रूत लक्षणम् । इति पृष्टोत्तरमपि तत्र प्रोवाच तान्स्वयम् ॥
सत्सु यस्यात्मबुद्धिः स्यात्तेन ज्ञातोऽस्ति सोऽधिकः । दृष्टांतेन सह स्पष्टं कथयामि च तामहम् ॥
यथाऽत्र कस्यचिद्राज्ञो वंध्यस्य वार्द्धके भवेत् । पुत्र एकोऽथ तस्मिन्स्यात्तस्य स्नेहोऽखिलाधिकः
अधिक्षिपेत्स चेत्स्वं वा श्मश्रूण्याकर्षयेत्पुनः । ग्रामस्थलोकशिशुकांस्ताडयेद्वा कदाचन ॥ ८ ॥
कुर्यादनीतिमपि वा तथापि न हिं भूपतेः । तस्मिन्कदाप्यभावः स्यात्प्रत्युत प्रेम वर्द्धते ॥९॥
तथैव यस्य सत्सु स्यात् स्नेहबुद्धिः सुनिश्चला । आत्मबुद्धिर्मता सैव या न प्रतिहता क्वचित् ॥
इयं यस्य भवेत्सत्सु तेन ज्ञातो हि सर्वतः । सत्संगोऽधिक इत्येवं यूयं जानीत निश्चितम् ॥
आत्मबुद्धिर्भवेद्यस्य सत्सुतस्यैव सर्वथा । स्वधीश्च पूज्यधीस्तेषु स्याच्च तीर्थमतिर्ध्रुवम् ॥१२॥
एता न मतयो यस्य सत्सु जाता नृदेहिनः । अन्यत्र च भवेयुस्ताः स तु प्रोक्तः पशुर्बुधैः ॥

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः ॥ १४ ॥

इति भागवतश्लोकेऽप्ययमेवार्थ ईरितः । सत्स्वेव सर्वथा कार्यस्ततः स्नेहो मनीषिभिः ॥१५॥

इति प्रभोस्तस्य निशम्य वाचं सुधोपमां साधुजनास्तु सर्वे ।
हर्षं महांतं हृदि लेभिरेऽथो भक्ता गृहस्थाश्च सदोनिषण्णाः ॥ १६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्तशीत्यधिकशततमस्तरंगः ॥१८७ ॥ ५४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य खनागवसुभूमिते । एकादश्यां ज्येष्ठशुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । वेद्यां प्राचीनवक्त्रस्य न्यषीदच्चारुमंचके ॥ २ ॥
स्वकीयवक्त्रकमलस्थिरलोचनवृत्तिभिः । त्यागिभिर्गृहिभिर्भक्तैर्वृतश्च परितो निजैः ॥ ३ ॥
स्वर्णसूत्रोल्लसत्प्रांतं शीर्ष्णि श्वेतपटं दधत् । सितं परिदधद्धोत्रं वसानश्च सितां पटीम् ॥ ४ ॥
विधाय गायनं सत्सु सवाद्यं विरतेषु सः । तानाभाष्य जगादेदं सर्वे शृण्वंतु साधवः ॥ ५ ॥
यस्य यादृग्भवेदंगं सत्संगात्प्राक् च सांप्रतम् । स तद्वदतु मे सम्यक् पृथगेकैक आत्मनः ॥
अहमेवादितो वच्मि स्वकमंगमशेषतः । बाल्येऽपि रुचिरभूत्प्रातःस्नाने सुरेक्षणे ॥ ७ ॥
कथावार्त्ताश्रुतौ विष्णोः साधूनां च समागमे । प्रीतिश्च तीर्थयात्रायां ममावर्त्तत सर्वदा ॥८॥
गृहं हित्वा यदा चाहं वनमभ्यागतस्तदा । नासीद्वस्त्रैकखंडस्याप्युपादाने रुचिर्मम ॥ ९ ॥
सर्पशार्दूलभूतादिभयं त्वासीन्न मे हृदि । गहनेऽपि वने स्वस्थो न्यवसं हि दिवानिशम् ॥
तीर्थानि विचरन्भूमौ श्रीरामानंदसद्गुरोः । समीपमेत्य न्यवसं तच्छुश्रूषानुरागवान् ॥ ११ ॥
मयि धर्मधुरां न्यस्य तस्मिन्नंतर्हिते भुवः । सत्संगिनो जनान्धर्मे वर्त्तयामि यथोचितम् ॥१२॥
संप्राप्तो महदैश्वर्यं सेव्यमानोऽपि लक्षशः । शिष्यै राजोचितद्रव्यैर्नं लभे क्वापि विक्रियाम् ॥
संपादितेष्वादरेण प्रियेषु निखिलेष्वपि । औदासीन्यं पदार्थेषु म्रियमाणस्य नुर्यथा ॥ १४ ॥
तस्मिन् यथा वा पुरुषे तदीयसुहृदामपि । स्वार्थसंपादनस्येच्छा सम्यगेव निवर्त्तते ॥ १५ ॥
तथा सर्वपदार्थानां संबंधेऽपि सदा मम । औदासीन्यमनिच्छा च वर्त्तते हृदये ननु ॥ १६ ॥
यथा वा सुत एकः स्यात्सम्राजः सोऽस्य वार्द्धके । म्रियेत चेत्तदास्य स्यादौदासीन्यं हि सर्वतः ॥
तथा मे खाद्यपेयाश्वारोहणादिक्रियास्वपि । औदासीन्यं सदास्त्येव कृष्णाकृष्टांतरत्वतः ॥१८॥
मायिकास्तु पदार्था मे नश्वरा भांति सर्वदा । शुभोऽयमशुभश्चेति पृथग्व्यक्तिर्न तत्र च ॥
इदं शुभमिदं नेति यथा कक्षजरोमसु । भेदो नास्ति समानत्वात्सर्वेषां हि तथाऽत्र च ॥२०॥
यदित्यहं क्वचिद्वच्मि भोज्यमेतत्सुशोभनम् । वस्त्रं च भूषणं वेश्मवाहयानासनादिकम् ॥२१॥
तत्तु तत्तद्भक्ततुष्ट्यै बाह्यतो वच्मि नान्यथा । भक्तार्थाऽस्ति क्रिया सर्वा मम स्वार्था तु क्वापि न
एकांतिकस्य भक्तस्य लक्ष्मेत्थं शास्त्रसंमतम् । तदंतःकरणं नित्यं चिंतनादौ हरेर्भवेत् ॥ २३ ॥
तद्वाणी च भवेत्कृष्णगुणकीर्त्तन एव हि । तत्करौ कृष्णतद्भक्तसेवायामेव तत्परौ ॥ २४ ॥
तत्कर्णौ कृष्णयशसः स्यातां श्रवणतत्परौ । एवं सर्वा क्रिया तस्य कृष्णार्थैव भवेत्सदा ॥२५॥
इति तल्लक्षणं स्वस्मिन्वर्त्तयामि सदोद्यतः । देहात्परो ब्रह्मरूप आत्मेत्यनुभवामि च ॥ २६ ॥
रजआदेर्मायिकस्य स्पर्शो न स्याद् गुणस्य तु । अतो मुहुर्मुहुः स्वस्य शुद्धतैव विभाव्यते २७ ॥
स्वर्णकारो गृहानीताद्भूषार्थं शुद्धकांचनात् । किंचिद्धृत्वा क्षिपेद्रूप्यं यथा द्रष्टुर्दृशश्च्युतौ ॥
एवमत्रापि विज्ञेयं स्वर्णकारगृहं तु हृत् । स्वर्णकारस्तु मायाख्य आत्मज्ञानं तु कांचनम् २९॥
रजआदिगुणांशाश्च रूप्यमित्यवगम्यताम् । प्रमादवानात्मनिष्ठस्तद्द्रष्टा पुरुषो मतः ॥ ३० ॥
सूचितं स्वर्णकारेण कयाचित्संज्ञया यथा । हरंति तत्सुताः स्वर्णं वंचयित्वेक्षितुर्दृशम् ॥ ३१ ॥
मायासुतास्तथाऽक्षाणि स्वर्णतुल्यांस्तु सद्गुणान् । हृत्वा प्रमत्ते कामादिदोषरूप्यं क्षिपंति च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रूप्यक्षेपेऽथ विज्ञाते भूषार्थी कनकं पुनः । यदा विशोधयेद्वह्नौ पूर्वरूपं भजेत्तदा ॥ ३३ ॥
तथा पुमान् ब्रह्मवेत्ता मायिकं गुणमात्मगम् । विचारदार्ढ्येन दहेत्तदा तु स्याद्यथा पुरा ॥३४॥
एतद्विघ्नभयादेव सावधानोऽहमंजसा । ब्रह्मात्मानं प्रपश्यामि सर्वदेत्यंगमस्ति मे ॥ ३५ ॥
मुक्तानंदादयः संतस्तमथोचुः प्रभो त्वयि । नास्ति मायागुणस्पर्शः परं ब्रह्माऽसि यत्स्वयम् ॥
वार्त्तेयं त्वस्मदर्थं हि त्वया करुणया कृता । अवधारणमस्यास्तु करिष्यामो वयं हृदि ॥३७॥

नारायणेनेति वचः सुधाभं समीरितं ते मुनयो निशम्य ।
अन्ये च भक्ता अतिमोदयुक्ताः प्रभुं प्रणेमुस्तममुं व्रजंतम् ॥ ३८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावष्टाशित्यधिकशततमस्तरंगः ॥ १८८ ॥ ५५ ॥

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । आषाढशुक्लपञ्चम्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वितर्दौ पूर्ववक्त्रस्य न्यषीदन्मंचकोत्तमे ॥ २ ॥
सितांबरो वृतो भक्तैस्त्यागिभिर्गृहिभिश्च सः । सवाद्यं कीर्त्तनं सद्भिर्गीयमानं मुदाऽशृणोत् ॥
तदंते सत ऊचेऽसौ शृण्वतो हरिकीर्त्तनम् । अंतर्दृष्टिर्मम त्वासीत्तद् दृष्टमपि वो ब्रुवे ॥ ४ ॥
कृष्णेऽस्ति यादृशी प्रीतिर्मम सा तु तथैव हि । अनुभूता स्वहृदये जातस्तन्निश्चयस्ततः ॥ ५ ॥
ततश्च मेऽतिमहतां कृष्णे प्रीतिमतां सताम् । स्मरणं ह्यभूत्तेऽथ दृष्टास्तत्राखिला अपि ॥ ६ ॥
ततस्तेषां पृथग्जीवास्तदंतःकरणानि च । कृष्णे च यादृशी प्रीतिस्तेषां सा तादृशीक्षिता ॥७॥
तदा तु यादृशी प्रीतिर्मम कृष्णेऽस्ति तादृशी । तेषां प्रीतिर्न वै दृष्टा किंतु न्यूना चलेक्षिता ॥
असतो देशकालादेर्जाते योगे तु कर्हिचित् । महतामपि चैतेषां जायते धीविपर्ययः ॥ ९ ॥
यदा त्वतितरां देशकालाद्यशुभता भवेत् । तदा त्वेषां मतेर्नैव स्थिरत्वं स्यात्कथंचन ॥ १० ॥
अतो महद्भ्य एतेभ्यः सद्भ्योऽपि मम धीर्मया । समीचीनैव विज्ञाता यैकरूपाऽस्ति सर्वदा ॥
देशकालादिवैषम्ये महत्यपि कदाचन । विपर्ययं नैव यायादित्येवं निश्चयोऽभवत् ॥ १२ ॥
कृष्ण एव भवेत्प्रीतिर्न त्वन्यत्र कदाचन । सैव प्रीतिर्मता सत्या न त्वन्या व्यभिचारिणी १३॥
सद्ग्रंथानां च सर्वेषामिदमेवास्ति वै रहः । प्रीतिः सर्वाधिका कार्या कृष्ण एवेति सर्वथा ॥
परमानंदमूर्त्तिश्च सारश्च परमो हरिः । अत्यसारो हि सकलं तदन्यत्तुच्छमस्ति च ॥ १५ ॥
कृष्णेतरपदार्थे स्यात्प्रीतिः सत्संगिनोऽपि चेत् । अपक्वमूलः सत्संगो नंक्ष्यत्येवाल्पकालतः १६॥
अतोऽत्र कृष्णभक्तेन पुंसा सत्संगिना सदा । इंद्रियार्थेषु न प्रीतिः कार्या पंचस्वपि क्वचित् ॥

वर्ज्यं तद्धि कृष्णभक्तेन नूनं कृष्णप्रीतावंतरायो यतः स्यात् ।
वाचं तस्येत्येव संतः सुधाभां श्रुत्वा हर्षं प्रापुरन्ये च भक्ताः ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावूननवत्यधिकशततमस्तरंगः ॥ १८९ ॥ ५६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । आषाढशुक्लषष्ठ्यां तु वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्यैव वेश्मनः । वितर्द्दौ पूर्ववक्त्रस्य मंचके स उपाविशत् ॥ २ ॥
श्वेतांबरो दधत्पुष्पशेखरं च शिरःपटे । भक्तैः सद्भिर्गृहस्थैश्च स्वकीयैः परितो वृतः ॥ ३ ॥
सवाद्यं गीयमानं स साधुभिः कृष्णकीर्त्तनम् । शृण्वन् व्यचारयत्किंचिद्धितायैव स्वसेविनम् ॥
उवाच कीर्त्तनांतेऽथ पुरःस्थान्स सतः प्रति । मया विचारितं किंचिद्युष्माकं गायनावधि ॥५॥
तद्वो वदामि शृणुत प्रीतिः कार्या हरौ दृढम् । सा तु केवलसद्रूपात्मना कार्या न चान्यथा ६॥
नास्त्येवावरणं किंचित्सद्रूपे शुद्ध आत्मनि । माया च कार्यं मायाया गुणदेहेंद्रियादिकम् ॥७॥
अनाद्यविद्यायुक्तत्वादज्ञानां तद्द्वयावृतिः । सत्यैवास्ति न भक्तानां ज्ञानिनां तु हरेः क्वचित् ॥
भक्त्या ज्ञानेन नष्टास्ति सवैराग्येण सा हरेः । तेषां ब्रह्मात्मना कृष्णसेविनां धर्मवर्त्तिनाम् ॥९॥
एवं सदात्मरूपेण वर्त्तनं यदुदीरितम् । ब्रह्मीभूय न तत्स्वस्य मत्तत्वफललब्धये ॥ १० ॥
किंतु प्रकृत्यावरणं स्वस्मिन्नास्ति तदा हरौ । परेऽक्षरात्कुतस्तत्स्यादित्येव दृढबुद्धये ॥ ११ ॥
स्फुरत्यात्मप्रकाशे हि यो विचारस्तु वर्त्तते । सद्रूपे प्रविशत्सोऽन्यत्तस्मिन् ग्रसति मायिकम् ॥
यथा दीपप्रकाशस्था गोधा ग्रसति सर्वशः । सूक्ष्मजंतूंस्तथैवाऽसाविति जानीत निश्चितम् १३॥
अतिशुद्धेनात्मनैवं प्रीतिः परमपूरुषे । भक्तेन सर्वदा कार्या भवपाशविमोचनी ॥ १४ ॥
शुभेऽशुभे वा महति पदार्थेऽल्पेऽपि वाऽखिले । हित्वा साक्षाद्भगवति प्रीतिः कार्यातिनिश्चला
तां विना तु कृतस्त्यागो गृहादेर्बाह्यतस्तु यः । न समोक्षफलायातः स कर्त्तव्यस्तया सह १६॥
हरेः संबंधरहिता पदार्था अखिला अपि । रमणीया अरम्या वा भक्तौ विघ्नतया मताः १७॥
न मायिको रम्य एव पदार्थो भक्तिविघ्नकृत् । तुच्छोऽरम्यः पदार्थोऽपि तथाभूतो यदीक्ष्यते ॥
पूर्वकर्मवशाज्जीवा दृश्यंते बहवोऽपि हि । साक्षाद्धरिं विहायैव सज्जंतस्तुच्छवस्तुषु ॥ १९ ॥
तत्र हेतुस्तु भगवन्माहात्म्यानवबोधनम् । माहात्म्यज्ञास्तु नान्यत्र हरेः सज्जंति कुत्रचित् २०॥
मायिकार्थपरित्यागः कृष्णमाहात्म्यवेदिनाम् । न दुष्करोऽस्ति प्रीतिश्च हरौ तेषां न दुष्करा ॥
कृष्णेतरार्थे यस्मिन् स्यात्प्रीतिस्तं सद्य एव यः । जह्याद् दृढा भवेत्प्रीतिस्तस्यैव कमलाधवे ॥
यस्य यस्य हरौ प्रीतिः पुराप्यासीद् दृढा भुवि । स स सद्यो जहौ तत्र पदार्थं विघ्नकारिणम् ॥
चित्रकेतुर्नृपो योषाः सराज्या लक्षशो जहौ । भक्तिं कुर्वन्भगवति तत्र प्रत्यूहकारिणीः ॥२४॥
स्त्रीसुखं राज्यसौख्यं च सुखमिंद्रपदादिजम् । कृष्णसौख्याग्रतोऽत्यंतं तुच्छमस्तीति स ह्यवैत् ॥
एवं सौख्यनिधिं कृष्णं हित्वाऽन्यत्र करोति यः । प्रीतिं स तुच्छधीर्ज्ञेयः श्वेवोपांश्वस्थिदंशकः
भक्ताख्यस्यापि यस्य स्यात् कृष्णकार्ष्णान्यवस्तुनि । प्रीतिः स तु बुधैरुक्तो बकमार्जारसन्निभः ॥
दृढभक्तस्तु न क्वापि प्रीयतेऽन्यत्र वै हरेः । स्वसंगिनोऽपि कुरुते स्वोपमान् कृष्णवार्त्तया २८॥
वार्त्तां साक्षाद्धरेः कुर्वन् दुष्टेभ्यो न बिभेति सः । रणरंगे शूर इव प्रतिपक्षाततायितः ॥२९॥
कृष्णस्याहं न कुर्यां चेत्सम्यग्वार्त्तां तदा मम । तज्ज्ञानं निष्फलं स्याद्वै ज्ञात्वेति स करोति ताम्
त इत्युक्त्वैतदर्थानि त्रीणि पद्यानि साधुभिः । तुलसीदासभक्तस्य गापयामास संसदि ॥३१॥
ततश्चाहैवमेवाऽत्र वर्त्तितव्यं मदाश्रितैः । कृष्णसंबंधहीनेऽर्थे प्रीतिः कार्या न कुत्रचित् ॥३२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपक्वस्यापि भक्तस्य प्रीतिं विदधतो हरौ । सर्वथा दुर्गतिर्नास्ति प्रतापादेव तस्य वै ॥ ३३ ॥
देवत्वं वा नृपत्वं वा धनित्वं नृपु वाऽऽप्य सः । साक्षाद्धरिमुपास्याऽसौ तत्पदं यास्यति ध्रुवम् ॥
निशम्य तस्येति सदोनिषण्णाः सुधोपमानं वचनं तदीयाः ।
सर्वेऽपि ते साधुजनास्तथाऽन्ये भक्ता गृहस्था अपि तोषमीयुः ॥ ३५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ नवत्यधिकशततमस्तरंगः ॥ १९० ॥ ५७ ॥

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । चतुर्थ्यां नभसः शुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । वेद्यां प्राचीनवक्त्रस्य महासन उपाविशत् ॥ २ ॥
मुनिभिश्च गृहस्थैः स स्वभक्तैः परितो वृतः । सितवासाः स्वपुरतो निषण्णानब्रवीत्ततः ॥
आचार्यो यो य आसीत्प्राक् संप्रदायप्रवर्त्तकः । तस्य तस्याऽभवत् केन संप्रदायस्य पोषणम् ॥
यथामत्युत्तरं तेऽथ ददुस्तस्मै सदुत्तमाः । सोऽथाऽपि सम्यग्जातं तदिति नाऽमन्यतात्मनि ॥
ततस्तान्स्वयमेवाह धार्मिः सम्यक्तदुत्तरम् । संप्रदायस्य पुष्टेर्वैः साधनं तत्त्वतो ब्रुवे ॥ ६ ॥
संप्रदाये यत्र यस्तु स्वेष्टदेवो मतो भवेत् । तत्संबंधी भवेद् ग्रंथो यः स तं पोषयेद् ध्रुवम् ॥
तत्र हि स्याज्जन्महेतुस्तस्य तच्चरितानि च । आविर्भावतिरोभावावधि सर्वाण्यनुक्रमात् ॥८॥
धर्मस्तु सहजस्तिष्ठेत्तदीयचरितेषु च । धर्मस्यैव प्रवृत्त्यर्थं तस्य जन्मास्ति यद्भुवि ॥ ९ ॥
आसन् पुरा य आचार्याः संप्रदायप्रवर्त्तकाः । तत्संप्रदायपुष्टिश्च तद्ग्रंथैरेव वर्त्तते ॥ १० ॥
संप्रदायं यथा स्वेष्टदेवग्रंथः प्रपोषयेत् । अन्यग्रंथस्तथा नैव वेदादिरपि निश्चितम् ॥ ११ ॥
इत्येकं साधनं प्रोक्तमन्यदप्यस्ति तद्ब्रुवे । तत्स्थानां धर्मसहितभक्त्याचरणमंजसा ॥ १२ ॥
इत्येताभ्यां साधनाभ्यां संप्रदायस्य पोषणम् । भवतीत्यवगंतव्यं नान्यथा त्वत्र कस्यचित् १३॥
अतोऽस्मत्संप्रदायेऽपि ये महांतोऽत्र साधवः । यूयं स्थ तैरपि प्रीत्या द्वयमेतत्प्रवर्त्यताम् ॥
तेनैव संप्रदायस्य सम्यक् पुष्टिर्भविष्यति । इत्याज्ञा पालनीया मे भवद्भिः सद्भिरादरात् १५॥
इत्याज्ञावचनं तस्य संतः शास्त्रार्थपारगाः । मुक्तानंदादयः श्रुत्वा ते तच्च शिरसा दधुः ॥१६॥
कृष्णस्य तस्येत्यमृतायमानं वचो निशम्याखिलसाधुसंघाः ।
सभोपविष्टा इतरे च भक्तास्तस्य प्रतोषं हृदयेऽलभंत ॥ १७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावेकनवत्यधिकशततमस्तरंगः ॥ १९१ ॥ ५८ ॥

शकाब्दे विक्रमार्कस्य चंद्राष्टसुभूमिते । द्वादश्यां नभसः शुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स भूपतेः । वितर्दौ श्रीवासुदेवालयस्याऽऽस्ते स्म मंचके ॥ २ ॥
वृतः स्वभक्तैर्बहुभिः प्रागास्यश्च सितांशुकः । स्वयमेवाऽब्रवीत्साधून्पुरःस्थान्स सतां पतिः ३॥
वेदेषु च पुराणेषु सर्वेष्वपि च भारते । नृणां श्रेयस्कराः प्रोक्ताः कृष्णः संतश्च तच्छ्रिताः ॥४॥
त एव ब्रह्मरुद्रादिदेवेभ्योऽप्यधिका मताः । अतस्तत्प्राप्तिरेवोक्ता परं श्रेयस्करी बुधैः ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुपुण्यवतामेव तत्सेवाप्तिश्च जायते । अतः सर्वाधिका प्रीतिस्तेषु कार्या मुमुक्षुभिः ॥ ६ ॥
यथा स्त्रीपुत्रवित्तादौ स्नेहः स्याद्गृहिणां नृणाम् । तथैव तेषु कर्त्तव्यस्तेषां ग्राह्यो न चाऽगुणः ॥
सदोषेष्वपि गृह्णंति गुणानेव सुतादिषु । यथा तेष्वपि गृह्णंति गुणानेव सदादिषु ॥ ८ ॥
सच्चिदानंदरूपो हि कृष्णो नृषु निजेच्छया । नृनाट्यं कुरुते तस्मिन्न तु दोषोऽस्ति कश्चन ॥९॥
संतो गुणाकरा एव यतस्ते सद्गुणांबुधिम् । श्रीकृष्णं सर्वथैवैकं संश्रिताः संति वै दृढम् ॥
अतस्तैरुदितं वाक्यं स्वहितायाऽप्रियं क्वचित् । यः श्रुत्वा तेष्वमर्षी स्याच्च्युतः श्रेयःपथाद्धि सः
एवं कृष्णस्य च सतां प्राप्तौ स्वस्याऽप्रयासतः । जातायामपि संदिग्धः श्रेयसि स्यात्स मूढधीः ॥
संदेहकारणं त्वस्य संसाराभक्तचेतसः । जाताऽस्मिन्नेव जनुषि सा नेत्यभ्यसनं तयोः ॥ १३ ॥
येषां प्राग्जन्मनि हरितत्साधुप्राप्तिसेवने । जाते स्यातां ते तु तेषु स्युर्वै गाढानुरागिणः १४ ॥
विक्षेपहेतवो न स्युः संकल्पा मानसा अपि । तेषां कृष्णैकचित्तानां गोपीनामिव कर्हिचित् ॥
सांप्रतं तादृशा भक्ता भवंत्यत्रापि केचन । भालचंद्रः काशिदासो नाथो वेणीभयादयः १६ ॥

ये कृष्णतत्साधुदृढानुरागाः प्राग्जन्मसंस्कारिण एव ते हि ।
इति प्रभोस्तस्य वचोऽमृतं ते निपीय भक्तास्तुतुषुः समस्ताः ॥ १७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्विनवत्यधिकशततमस्तरंगः ॥ १९२ ॥ ५६ ॥

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । चतुर्थ्यां नभसः कृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वितर्द्यौ प्रत्यगास्यस्य सुमंचक उपाविशत् ॥ २ ॥
सितवासा वृतो भक्तैस्त्यागिभिर्गृहिभिश्च सः । स्वाग्रोपविष्टान्सदसि प्रश्नाय प्रैरयत्स्ततः ३ ॥
पप्रच्छ मुक्तानंदस्तं प्रणम्य भगवन्निह । यथाशक्ति भजंति त्वां भक्ताः कृष्णमतंद्रिताः ॥ ४ ॥
तेषां क्वचन विक्षेपः कालगत्याऽऽपतेद्यदि । तदा कीदृग्विचारेण तद्बाधो न भवेद्धृदि ॥ ५ ॥

श्रीहरिरुवाच

देहभिन्नात्मरूपस्याऽनुसंधानेन सर्वदा । मायिकानां पदार्थानां क्षयित्वावगमेन च ॥ ६ ॥
कालकर्मेशितुर्विष्णोर्महत्तावेदनेन च । व्यवहारिकविक्षेपा बाधंते नैव मानसम् ॥ ७ ॥
अनेककोटिब्रह्मांडाधीश्वरस्य रमापतेः । दासं मां बाधितुं लोके विनाऽऽज्ञां तस्य कः क्षमः ॥
इति ज्ञात्वा सुखं दुःखमिह प्राप्येत यत्तु तत् । कृष्णेच्छोपनतं ज्ञात्वा चिंता कार्या न सर्वथा ॥
मयाप्येवं कृतोऽस्त्येव निश्चयः सुदृढो हृदि । अतो न क्वापि विक्षेपो बाधते कश्चनाऽत्र माम् ॥
आयांतमेव विक्षेपं स्वरूपस्य विचारतः । महत्तायाश्च कृष्णस्य प्रवेष्टुं न ददामि हृत् ॥ ११ ॥
अन्यस्य कृष्णभक्तस्य दुःखं दृष्ट्वा तु मेंऽतरम् । दुःखायते भृशं तत्र दयैवैकास्ति कारणम् १२ ॥
कृष्णभक्तद्रोग्धरि तु दया मे नास्ति सर्वथा । भक्तानां पक्षपातो हि व्रतमस्ति परं मम ॥१३ ॥
अन्यथा स्वार्द्रपत्रादिद्रुमस्याहं कदाचन । तज्जीवदुःखभीत्याऽद्यदिनावधि हि नाऽच्छिदम् १४ ॥
भक्तं दृष्ट्वा पीड्यमानं नोदियाद्यस्य चेतसि । दया स त्वस्ति चंडालो विमुखो मानवः पशुः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भक्तेष्वभक्तेषु च यः समदृष्टिः पुमान्भवेत् । स भक्तोऽपि च सत्संगी ज्ञातव्यो विमुखो हरेः ॥
भक्तं रक्षेद्धन्यमानं केनचिद्यदि कश्चन । महापाप्यपि तर्हि स्यादघान्मुच्येत तत्क्षणम् ॥ १७ ॥
बुद्धिपूर्वं च यः कुर्याद्भक्तद्रोहं पुमानिह । तस्य पुण्यानि नश्यंति सर्वाण्यपि न संशयः १८ ॥
कर्त्तव्योऽतः पक्षपातो भक्तानामेव सर्वथा । तद्द्रोग्धा तु प्रहातव्यः स्वजनोऽप्यंत्यजो यथा ॥
क्वचिन्निमित्तवशतः कृष्णभक्तैः सहात्मनः । जातेऽपि कलहे तेषु क्रोधो रक्ष्यो न सर्वथा २०॥
नैमित्तिकः सतां चित्ते ह्यमर्षस्तु कथंचन । जातोऽपि लीयते सद्यो रेखेव सलिले कृता २१ ॥
अमर्षो हृदये यस्य चिरं तिष्ठेदभक्तवत् । भक्तेऽपि तस्मिन्नैव स्याद्धरेः प्रीतिरितीयताम् ॥२२ ॥

इतीशितुस्तस्य वचो निशम्य मुनिः स पीयूषसमं तथाऽन्ये ।
संतश्च गेहाश्रमिणोऽपि भक्तास्तस्य प्रतोषं हृदयेऽलभंत ॥ २३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ त्रिनवत्यधिकशततमस्तरंगः ॥ १९३ ॥ ६० ॥

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । सप्तम्यां नभसः कृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । वितर्दौ प्रत्यगास्यस्य मंचोत्तम उपाविशत् ॥ २ ॥
सितसर्वांबरः श्वेतपुष्पहारैरलंकृतः । त्यागिभिर्गृहिभिश्च स्वैरनेकैः परितो वृतः ॥ ३ ॥
पुरःस्थानब्रवीत्सोऽथ भक्तान् सर्वहितावहः । यूयं शृणुत भो भक्ताः सादरं वचनं मम ॥ ४ ॥
संस्थितिः कृष्णधर्मेषु कृष्णैकदृढनिश्चयः । कार्ष्णानां पक्षपातश्च त्रयमेतत्सुदुर्लभम् ॥ ५ ॥
यथार्हं तत्र कृष्णोक्तधर्माज्ञावचसः सदा । सर्वथा पालनं यत्सा कृष्णधर्मेषु संस्थितिः ॥ ६ ॥
देहदुःखस्त्र्यादिनाशशुष्कविज्ञास्तिकोक्तिभिः । क्वापि यो न विहन्येत स कृष्णदृढनिश्चयः ॥७॥
स्वश्रेष्ठस्त्रीसुतादीनामिव कृष्णात्मनां नृणाम् । ममत्वेनादरो नित्यं पक्षपातः स कीर्त्तितः ॥८॥
एतत् त्रयं भवेद्यस्मिन् पक्वभक्तो हरेः स हि । त्यागी वापि गृहस्थोऽसौ माननीयोस्ति देहिनाम्
यस्तु गेहाश्रमस्थोऽपि देहगेहधनादिकान् । पदार्थान्सकलान् कुर्यात्कृष्णार्थानेव सर्वथा ॥१०॥
न किंचिदपि यस्य स्यात्कृष्णाद्वस्त्वधिकं हृदि । अतिप्रीतिश्च कृष्णे स्यात्तद्भक्तेषु च नान्यतः ॥
गृहोचिताः क्रियाः कुर्वन्नपि त्यागेच्छुरंतरे । ईदृशः पुरुषः श्रेष्ठो गृहिभक्तेषु कीर्त्तितः ॥१२॥
यस्तु त्यागी साधुशीलो धर्मे एकांतिके स्थिरः । सहस्रशो जनैर्मान्यः स्वाज्ञावर्त्तिभिरादरात् ॥
एवं भूरिप्रतिष्ठोऽपि नारीधनरसादिषु । नासक्तः सन् स्वधर्मेषु शैथिल्यं नाप्नुयात्क्वचित् १४॥
स हि त्यागिषु सर्वेषु श्रेष्ठ इत्यवगम्यताम् । सेवनीयो विशेषेण स च श्रेयोर्थिभिर्जनैः ॥१५॥
लोके प्रतिष्ठितो यश्च पुमान् स्यात्सोऽपि सर्वथा । मदाश्रितैर्माननीयः सर्वैरपि यथोचितम् १६॥
न मानयंति तं ये तु त्यागिनो गृहिणोऽपि वा । तेऽनर्थं प्राप्नुवंत्येव महान्तमिति दृश्यते १७॥
दक्षावमत्या सदसि पुरा शंभोरपीशितुः । यज्ञे स्वभागानाशश्च भार्यानाशो बभूव ह ॥१८ ॥

अतोऽत्र मान्या गुणिनो जनेषु प्रतिष्ठिता ये पुरुषाश्च ते हि ।
इति प्रभोर्वाक्यसुधां निपीय प्रापुर्मुदं ते गृहिणश्च संतः ॥ १९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुर्नवत्यधिकशततमस्तरंगः ॥ १९४ ॥६१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । मार्गशुक्लद्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वितर्दावुदगास्यस्य मंचके समुपाविशत् ॥ २ ॥
नानादेशागतैर्भक्तैः साधुभिर्गृहिभिश्च सः । वृतः सितांबरधरः पर्यैक्षत निजाश्रितान् ॥ ३ ॥
तत्रायोध्याप्रसादाख्यं रघुवीराभिधं च सः । भ्रातृजं प्रैरयत्प्रष्टुं प्रश्नमाभाष्य संसदि ॥ ४ ॥
ततोऽयोध्याप्रसादस्तं प्रणम्याऽपृच्छदादरात् । नानाक्रियाकुलाः स्वामिन्संत्यनेके जना इह ५॥
कार्यं प्रापंचिके तेषामहोरात्रिश्च यात्यपि । योग्यायोग्यानि कर्माणि जायंते तत्र भूरिशः ॥६॥
कृष्णस्य भजनं ते स्यान्मुहूर्तं वा घटीमपि । तावता तानि कर्माणि दग्धानि स्युर्न वा प्रभो ७॥
इति पृष्टो भ्रातृजेन तमुवाच स सत्पतिः । शृण्वयोध्याप्रसाद त्वं यथावत्कथयामि ते ॥ ८ ॥
यद्यक्षमनसां कृष्णभजनावसरे भवेत् । एकाग्रता प्रसादत्वं पुंसो भजनकारिणः ॥ ९ ॥
तदा तु कर्मणां दाहो घट्यर्द्धेनापि जायते । अन्यथा तु भवेन्नैवेत्युत्तरं विद्धि निश्चितम् ॥१०॥
बहुकालेन भजनाभ्यासान्सर्वाणि तान्यपि । नश्यंति शिथिलानां तु भक्तानां न क्षणेन तु ॥
रघुवीरोऽथ पप्रच्छ तं प्रणम्य जद्गुरुम् । केनोपायेन गृहिणां श्रेयः स्यात्यागिनामिव ॥१२॥
तं स्वाम्युवाच सेवायां योज्यं कृष्णस्य तैः स्वकम् । देहगेहधनक्षेत्रपुत्रदारादि नित्यदा ॥१३॥
नोपयुक्तो भवेद्यस्तु पदार्थः कृष्णसेवने । त्यागस्तस्याशु कर्त्तव्यो रक्ष्योऽन्यस्तु प्रयत्नतः ॥१४॥
कृष्णार्थ एव कर्त्तव्य उद्योगः सकलः स्वयम् । एवं मुमुक्षुभिः प्रीत्या भाव्यं कृष्णपरायणैः ॥
एवंविधा ये गृहिणो जना आत्मनिवेदिनः । तेऽपि यायुर्ब्रह्मगतिं त्यागिवन्नात्र संशयः ॥१६॥
तुल्यास्तेऽक्षरमुक्तैः स्युरिति प्रश्नोत्तरं तव । इत्युक्त्वा तं सदःसंस्थान्सतः सर्वानुवाच सः ॥
मया विचार्य बहुधा श्रेयसोंऽगानि देहिनाम् । त्रीण्येव निश्चितान्यत्र भवंति सुखदानि तु १८॥
तत्राद्यमात्मनिष्ठाख्यं पातिव्रत्यं द्वितीयकम् । दास्यमुक्तं तृतीयं च त्रयमित्यतिदुर्लभम् ॥१९॥
आद्यं शुकादिवद्ब्रह्मीभूतस्योपासनं हरेः । द्वितीयं पतिभावेन गोपीवत्तदुपासनम् ॥ २० ॥
हनूमदादिवच्चांत्यं त्रिष्वेकमपि चेद् दृढम् । यस्य सोऽपि भवेन्मुक्तः किं पुनः सुदृढैस्त्रिभिः ॥
एष्वेकतममप्यंगं येन सम्यङ्न साधितम् । निःश्रेयसं कुतस्तस्य मनुष्यस्य भवेदिह ॥ २२ ॥
वदाम्यथ त्रयाणां वः स्थितिमेषां पृथक् पृथक् । आत्मनिष्ठावतः पुंसस्तत्रादौ शृणुत स्थितिम् ॥
भवत्येकत आत्मा च मायिकं यूथमेकतः । देहेंद्रियांतःकरण गुणास्तु विषयादिकम् ॥ २४ ॥
मध्येऽनयोर्विचारोऽस्ति निवाते दीपवत्स्थिरः । ज्ञानाकारश्च येनैव तयोरैक्यं न जायते ॥२५॥
स चात्मनैक्य नाप्नोति नेतरेण च कर्हिचित् । तस्य प्राप्तिस्तु जायेत प्रसादादेव सद्गुरोः ॥
तद्देंद्रियांतःकरणा मिलिता जीववृत्तयः । क्रमेण यांति संकोचं प्रातिलोम्येन सर्वशः ॥ २७ ॥
हृदि तस्मिन् जायमाने क्रोशसाहस्रमायताः । संकुच्य ताः शतक्रोश्यां वर्त्तंते समुपागताः ॥
तस्मिन् दृढेऽथ संजाते स्वस्थानावधि ता द्रुतम् । संकोचमेत्य वर्त्तंते तेनाकृष्टाः स्वरंहसा २९॥
तस्मिन् दृढतरेऽथैताः संकुचंति ततोऽपि ताः । देहमात्रायताः स्युश्च ततोऽक्षगोलकायताः ३०॥
भूत्वा ततोंतःकरणसन्मुखाः संहताश्च ताः । आत्मन्येव विलीयंते लिंगनाशः स उच्यते ३१॥
ततः स च विचारोऽपि प्राप्नोत्येकत्वमात्मना । तस्मिन्प्रकाशश्च महान्प्रादुर्भवति वै तदा ३२॥
ब्रह्मीभूतः स च स्वस्मिन्नारायणमवेक्षते । ब्रह्माहमस्मीति ततोऽनुभवन्स्वं भजेद्धरिम् ॥ ३३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्मनिष्ठावतो नित्यमित्थं ब्रह्मात्मना स्थितिः । ज्ञानिभक्तस्य कथिता शास्त्रानुभवसंमता ३४॥
पातिव्रत्यं भवेद्यस्य दृढं स तु पुमान् भवेत् । श्रीकृष्णभक्तगोपीवत्कृष्णैकपतिभाववान् ॥३५॥
गोप्यो हि यद्दिने प्रापुः कृष्णसंदर्शनं व्रजे । तत आरभ्य कृष्णेऽभूत्तासां स्नेहोऽधिकोऽचलः ॥
पतिभावं च संप्रापुस्तस्मिन्नेव हि केवले । बुद्ध्या संवीक्षितुमपि न शेकुः पुरुषांतरम् ॥ ३७ ॥
अपि देवोपमः कश्चिद्राजा वाप्यतिरूपवान् । विदुस्तमपि ता विष्ठा कृमिणा सममात्मनि ३८॥
ग्राम्याः पंचापि विषयास्तासामासन्विषोपमाः । कृष्णभक्तिं विनैकोऽपि क्षणश्चासीद्युगोपमः ॥
एवं यस्य भवेत् कृष्णे पतिभावो नराकृतौ । अरुचिश्च तदन्यत्र पातिव्रत्यं तदीयताम् ॥ ४०॥
राजदेवसुरेंद्राद्यैः समो रूपगुणादिभिः । यः स्यात्तस्मिन्नपि नरे नाऽस्य प्रीतिर्भवेत् क्वचित् ॥
यथा दृष्ट्वा पुरीषादि ततो दृष्टिर्निवर्त्तते । कृष्णानर्हात्तथैवार्थाद् दृष्टिरस्य निवर्त्तते ॥ ४२ ॥
पतिभावो हरावेव स्यान्न त्वन्यत्र कुत्रचित् । स्यादस्यान्येषु देवेषु तत्सेवकमतिस्तथा ॥ ४३ ॥
अनन्यभक्त इत्थं यः स पातिव्रत्यवान्मतः । दासत्वेनाऽथ भजतः स्थितिं पुंसो वदाम्यहम् ॥
दासभक्तावपि भवेत्पातिव्रत्य इव प्रभौ । प्रेमाधिक्यं च तत्सेवारुचिर्बह्वी सदा हृदि ॥ ४५ ॥
येन येन भवेत्प्रीतिः स्वपतेस्तत्तदादरात् । दास्यभाक् कर्म कुर्वीत नेतरत्तु कदाचन ॥ ४६ ॥
तदंतिकस्थितावेव तस्यैव च समीक्षणे । तद्वार्त्ताश्रवणादौ च स्याद्रुचिस्तस्य नान्यतः ॥४७॥
तद्गुणांस्तत्स्वभावं च बहु मन्येत सादरम् । तदधीनः सदा तिष्ठेत्स्वेच्छाचारी तु न क्वचित्
तदाज्ञापालनोत्कंठस्तदग्रे प्रांजलिः स च । तिष्ठेदत्यादरेणैव तदाज्ञप्तं समाचरेत् ॥ ४९ ॥
आज्ञया तस्य कार्यार्थं न खिद्येद् दूरगोऽपि सन् । अतिहर्षेण तत्कार्यं कुर्वन्नासीत सर्वदा ॥
तदाज्ञया गृहस्थोऽपि सद्यो जह्याद् गृहाश्रमम् । कुर्यात् कर्म प्रवृत्तं च त्यागी स्वं धर्ममत्यजन् ॥
एवं दास्येन भजतः स्थितिः पुंसोऽवगम्यताम् । तथाविधोऽत्र गोपालानंदः साधुर्हि वर्त्तते ॥
तथैव मुक्तानंदश्च साधुरस्ति महामतिः । अन्येषु साधुष्वपि सा तारतम्येन वर्त्तते ॥ ५३ ॥
श्रेष्ठमध्यकनिष्ठत्वमेतत्स्यंगवतामपि । तीव्रमध्यावरैर्भावैर्भक्तानां बोध्यमंजसा ॥ ५४ ॥
यस्य नैतेष्वेकतममप्यंगं स तु पामरः । तस्मान्मदाश्रितैरेकमपि संसाध्यमादरात् ॥ ५५ ॥
एकस्मिन्नप्यपूर्णेऽगे देहत्यागः शुभो न हि । पूर्ण एव हि स श्रेयानतः कार्यस्तदुद्यमः ॥५६॥
सांसारिकस्य जीवस्य स्थितिर्नैकांतिकी खलु । गृहे वसंतस्त्यागेच्छां केचित्कुर्वंति मानवाः ॥
त्यागं कृत्वाऽथ ते भूयस्त्यक्तानर्थानपि स्वयम् । स्मरंति मनसा तेनोभयभ्रष्टा भवंति हि ॥५८॥
तस्मात् कृत्वैव सत्संगं नित्यमेव मुमुक्षुणा । कृष्णेतरपदार्थेषु संत्याज्याऽल्पाऽपि हृद्रुचिः ॥
अंगं न यस्यैकमपि दृढं स्यात्तेन यत्नतः । यथायथं दृढं पाल्याः सदुक्ता नियमाः सदा ॥६०॥
अपक्वः सोऽन्यथा भ्रष्टः सत्संगादपि जायते । ततः संसृतिमाप्नोति त्याज्याऽतोऽनवधानता ॥
आपतेद्यत्क्वचिद्दुःखं भक्तस्य तदपि प्रभोः । इच्छयैवेति विज्ञेयं परीक्षां तस्य कुर्वतः ॥ ६२ ॥
न कालकर्ममायायां कर्तृता त्वत्र विद्यते । भगवद्विमुखेष्वेव नृषु सा त्ववगम्यताम् ॥ ६३ ॥
कृष्णो जवनिकाछन्नः पुमानिव तदांतरः । धैर्यं समीक्षते दुःखप्रेरकः सोऽखिलेश्वरः ॥ ६४ ॥
कालो माया यमादिश्च भजतः पुरुषोत्तमम् । ईक्षणेऽपि न वै शक्ताः कुतस्तर्हि तदर्दने ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुक्तानंदोऽथ पप्रच्छ तं प्रणम्य सदःस्थितः । अंगत्रयदृढीकारवार्त्ता सूक्ष्मेयमस्ति हि ॥ ६६ ॥
सूक्ष्मबुद्धिमतामेव सुज्ञेया सा तु वै सताम् । ज्ञातुं शक्या न तु नृभिः सर्वैरस्ति च दुष्करा ॥
सत्संगिनो मनुष्यास्तु वर्त्तंते भुवि लक्षशः । सर्वेषां सुकरं तेषां साधनं वक्तुमर्हसि ॥ ६८ ॥
ततो नारायणमुनिस्तमुवाच दयानिधिः । एतदंगत्रिकोपेताः सेव्याः संतोऽखिलैरपि ॥ ६९ ॥
वर्त्तेरन् ये तदाज्ञायां सदोद्युक्ताश्च सादरम् । अल्पज्ञा अपि ते नूनं पार्षदाः स्युर्जगत्प्रभोः ॥
कृतार्थाश्च भवेयुस्ते तावतैव न संशयः । माहात्म्यमेवं हि सतां महदस्ति महात्मनाम् ॥७१॥
पामरोऽपि पुमानत्र यः कश्चित्साधुसेवनम् । कुर्यान्निष्कपटः प्रीत्या मुक्ततुल्योऽस्ति स ध्रुवम् ॥

दुःखान्यशेषाण्यपि यांति नाशं संसेवमानस्य हरिं च तन्नॄन् ।
प्रताप एवंविध एव तेषां स्वभावसिद्धो निगमादिगीतः ॥ ७३ ॥
इत्यार्षां वचनसुधां हरेः स साधुर्भक्ताश्चाऽगृहिगृहिणोऽखिलास्तथान्ये ।
पीत्वाऽऽपुः परममुदं ततश्च सर्वे स्वस्वांगं द्रढयितुमुद्यता अभूवन् ॥ ७४ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ पचनवत्यधिकशततमस्तरंगः ॥ १९५ ॥६२॥

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । मार्गकृष्णद्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य महीभुजः । निजाश्रमे पीठवरे स व्यराजत् सितांशुकः ॥ २ ॥
नानादेशागतैर्भक्तैस्त्यागिभिर्गृहिभिस्तथा । वृतः स्वकीयैः परितः प्रसन्नमुखपंकजः ॥ ३ ॥
कथां भागवतीयां च भजनानंदवक्त्रतः । श्रुत्वासीनं तमप्राक्षीन्मुक्तानंदः सदग्रणीः ॥ ४ ॥
विचारस्तव भक्तानां योंऽतरे द्रष्टृदृश्ययोः । वर्त्तते स पृथग्भावं तयो रक्षति मध्यगः ॥ ५ ॥
द्रष्टा जीवोंऽतःकरणमिंद्रियाणि च सर्वशः । दृश्यानि ज्ञानरूपश्च विचारः प्रोक्त आंतरः ॥६॥
जीवेऽस्ति वेदनं तत्र कियदस्तींद्रियेष्वथ । वेदनं चांतःकरणे कियदस्तीति मे वद ॥ ७ ॥

श्रीहरिरुवाच

शब्दादीनामिहार्थानामिंद्रियैस्तु पृथक् पृथक् । प्रत्यक्षं वेदनं स्याद्वै सामान्यत इतीयताम् ॥
ज्ञानं शुभाशुभत्वादेः शब्दादीनां विशेषतः । जायते यन्नूनमंतःकरणैर्मनआदिभिः ॥ ९ ॥
तद्योगात्सुखिदुःखित्ववेदनं स्वात्मनो मतम् । एवं भेदेन यज्ज्ञानं तत्तु स्यान्निर्बलात्मनः ॥
यदिंद्रियांतःकरणनिष्ठं वेदनमस्ति तत् । ज्ञानादिबलसंपन्नो विद्याद्वस्तुत आत्मनः ॥ ११ ॥
स्वातंत्र्येणैव गृह्णीयाद्योग्यानर्थान् स तु ध्रुवम् । अयोग्यान् वर्जयेदेव न तु तद्वशगो भवेत् ॥
दुःस्वप्नो जायते नैव तस्य क्वापि बलीयसः । जितेंद्रियांतःकरणबलस्य हरिसेवितः ॥ १३ ॥
इंद्रियादिवशोऽथान्यस्तदाकृष्टोऽवकृष्यते । ततोऽतिदुःखी भवति स तस्माद् बलमर्जयेत् ॥
अथाऽपृच्छत्स साधुस्तं पुनर्नारायणं प्रभो । केनोपायेन संपाद्यं निर्बलेन बलं दृढम् ॥ १५ ॥
तमुवाच प्रभुस्तेन सांख्याभ्यासेन तत्त्वतः । संप्राप्यते बलं नूनं सद्रूपात्मतया स्थितिः ॥१६॥
अथवाऽतिशयप्रीत्या कृष्णे तत्सत्सु चादरात् । तत्सेवया च नवधा भक्त्या तल्लभ्यते दृढम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साधुसेवासमं नास्ति साधनं सर्वसिद्धिदम् । तस्मात्सैव विधातव्या श्रद्धयैव बलार्थिभिः ॥१८॥
माननीयाः सदा संतो नावमान्याः कदाचन । तन्माननं महापुण्यं महाघं तदमाननम् ॥१९॥
दर्शनस्यापि माहात्म्यं सतां वक्तुं न शक्यते । यमदूता अपि यतः पलायंते ससंभ्रमम् २०॥
अंतकाले नृणां देहे जायंतेऽनेकशो व्यथाः । तेन ता अपि नश्येयुर्भवेच्चैव च सद्गतिः ॥ २१ ॥
अतः कृष्णाश्रिताः संतो ब्रह्ममूर्त्तय एव हि । इत्येव हृदि विज्ञाय न कार्या तेषु मर्त्यधीः ॥
स्वजनेषु यथा प्रीतिः पक्षपातश्च सर्वथा । तेषामस्ति नृणां तद्वत्सतां कार्यावुभौ च तौ २३॥
सत्सेविनि नरे नित्यं ममाप्यस्ति रुचिभृं शम् । सद्द्रोही तु मम क्वापि दृष्टये पि न रोचते ॥
महापाप्यपि पापात्स्वात्कर्हिचिन्मोक्ष्यते नरः । सद्द्रोही तु पातकात्स्वात्कल्पांतेऽपि न मोक्ष्यते
तस्मात्संतः सदा पूज्या माननीयाश्च सर्वथा । श्रद्धया सेवनीयश्च यतः सिद्ध्यति वांछितम् ॥

इति हरिवचनं सुधां स साधुः परममुदैव निपीय तोषमापत् ।
महति सदसि तत्र चोपविष्टा मुनिगृहिणो ह्यपरे पि तद्वदेव ॥ २७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ षण्णवत्यधिकशततमस्तरंगः ॥ १९६ ॥६३॥

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । सहस्यशुक्लसप्तम्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमाख्यमहीक्षितः । वासुदेवालयस्यासौ वेद्यां पीठ उपाविशत् ॥ २ ॥
सितसर्वांबरं नानाभक्तसंघैः परिश्रितम् । स्वयंप्रकाशानंदस्तमपृच्छदुदगाननम् ॥ ३ ॥
अवतारा हरे स्वामिंस्तव संति सहस्रशः । तेष्वस्ति तारतम्यं वा समानास्तेऽखिला अपि ॥४॥

श्रीहरिरुवाच

मया व्यासकृता ग्रंथाः संति सर्वेऽपि संश्रुताः । तदर्थो निश्चितश्चास्ति पौर्वापर्यविचारतः ॥५॥
तत्राऽवताराः कृष्णस्य मत्स्यकूर्मादयोऽखिलाः । आविर्भूता यथाकार्यं कृष्णस्तु भगवान्स्वयम् ॥
अतोऽवतारी कृष्णोऽन्येऽवतारा इति निश्चयः । स हीष्टदेवोऽस्त्यस्माकमुद्धवाध्वनि तिष्ठताम् ॥
बलिष्ठोऽप्यस्त्यसौ भीरुः काम्यपि ब्रह्मचर्यभाक् । शूरोऽप्यतिदयोऽस्तीति चित्रमैश्वर्यमस्य हि ॥
श्रीमद्भागवतीयेऽस्य स्कंधे दशम आदितः । संत्युक्तानि चरित्राणि व्यासेन सकलान्यपि ९ ॥
अतः प्रमाणं सोऽस्माकं स्कंधोऽस्त्येव विशेषतः । भक्तिशास्त्रं चेष्टदेवमाहात्म्यस्याऽत्र वर्णनात् ॥
यत्र कृष्णावताराणां वर्णनं तत्त्वतो भवेत् । ग्रंथाः सर्वेऽपि ते मान्याः संति सामान्यतो मम ॥
अथ तं ब्राह्मणो विद्वान् पुरुषोत्तम ईश्वरम् । नत्वा सदःस्थः पप्रच्छ बद्धांजलिपुटोऽस्मयः ॥
श्रीकृष्णो भगवान् स्वीये त्वं परेऽक्षरधामनि । कीदृशो वर्त्तसे स्वामिन् ब्रह्मांडेषु च कीदृशः ॥

श्रीहरिरुवाच

ब्रह्मधाम्नि हरिः साक्षादस्ति दिव्यासनस्थितः । सेवितोऽनेकमुक्तौघैर्दिव्यानेकोपचारकैः १४ ॥
सर्वेश्वरेश्वरः सोऽयं महाराजाधिराजवत् । वर्त्तते पूज्यमानांघ्रिर्नैकब्रह्मांडनायकैः ॥ १५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वर्त्तंते तेऽस्य चाज्ञायां स्वातंत्र्येण तु न क्वचित् । यथा खंडाधिपतयः सम्राजः सभयं तथा ॥
व्याप्नोत्येव स तत्रस्थो ब्रह्मांडानि स्वशक्तिभिः । गगनस्थ इवोष्णांशुर्देशान् सर्वान्मरीचिभिः
एकोऽप्यनेकसंख्याकैः प्रयोजनवशाच्च सः । जायतेंऽडेष्विच्छयैव स्वतंत्रः स्वावतारतः ॥ १८ ॥
अनंतैश्वर्यसंपन्नोऽनंतशक्तिपतिः स च । स्वशक्त्या सृजति क्वापि ब्रह्मांडानि सहस्रशः ॥ १९ ॥
लक्षशः कोटिशः क्वापि शतशश्चैकमेव वा । एवमेव हि संहारं स तेषां विदधाति च ॥ २० ॥
स लये पृथिवीमेतां नयते परमाणुताम् । सर्गकाले पुनस्तां च करोत्येवातिविस्तृताम् ॥ २१ ॥
सविद्युतो घनान् व्योम्नि प्रादुर्भावयति क्वचित् । पुनस्तिरोभावयति स्वशक्त्या तान्कदा च सः
अचिंत्यवैभवः स्वामी स इत्थं वर्त्तते हरिः । स एव भुवि कृष्णाख्यो न्राकृतिर्निकटेऽस्ति वः ॥

पूर्णाः कलाभिः सकलाभिरेष सेव्यो व एको भवतीति वित्त ।
पीत्वेति वाक्यामृतमस्य सर्वैः साकं तदीयैर्मुमुदे स विप्रः ॥ २४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ सप्तनवत्यधिकशततमस्तरंगः ॥ १९७ ॥ ६४ ॥

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । सहस्यशुक्लैकादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य च भूभुजः । वासुदेवालये वेद्यां व्यराजत्स निजासने ॥ २ ॥
सितसर्वांबरोऽनेकैस्त्यागिभिर्गृहिभिश्च सः । परीतः परितो भक्तैः शुश्रूषूनाह तान्स्वयम् ॥३॥
नृणां निःश्रेयसायैव प्रादुर्भावो भुवि प्रभोः । रामकृष्णादिरूपो हि जायते मानुषाकृतिः ॥४॥
मायामयेऽत्र जगति प्रभोस्तस्य तु कुत्रचित् । जायते नैव मोहो वै रम्येऽर्थेऽन्यजीववत् ॥५ ॥
निजेनाऽलौकिकेनैव प्रतापेन स सर्वदा । असंग एव सर्वत्र स्वतंत्रो वर्त्ततेऽच्युतः ॥ ६ ॥
निजभक्तजनानां स स्वीकर्तुं भक्तिमात्मना । तदर्पितांश्च विषयान्भुंक्ते पंचापि सादरम् ॥
तस्मिन्नपि समर्थेऽपि प्रभौ केचन पूरुषाः । दुर्विदग्धा स्वसाम्येन दोषानारोपयंत्यहो ॥ ८ ॥
अयमीशतया लोके प्रथितोऽप्यसदादितः । अत्यासक्तोऽस्ति विषयेष्वखिलेष्वपि सर्वदा ॥९॥
एवं वदंतस्ते मूढाः स्वसमं तं विदुर्नरम् । न त्वलौकिकमीशस्य माहात्म्यमतिमानुषम् ॥१०॥
एषैव माया विज्ञेया नृत्वं नाटयतो हरेः । विदुषामपि यद्बुद्धावन्यथा ज्ञानसंभवः ॥ ११ ॥
न मोहो ब्रह्मनिष्ठानामपि स्यादर्थपंचके । कुतस्तर्हि भवेत्तत्र स परब्रह्मणः क्वचित् ॥ १२ ॥
अतो नराकृतौ कृष्णे स्वदृष्टांतेन योऽद्धवेत् । ग्राम्यार्थमोहशंका सा परित्याज्यैव सर्वथा ॥१३॥
सर्वथा च विधातव्या भक्तिरेवाऽस्य धर्मयुक् । धीमद्भिः श्रेयसे स्वस्य ज्ञानवैराग्यशालिभिः ॥
सवैराग्यमपि ज्ञानं विना भक्तिं तु मापतेः । यथा निर्लवणं भोज्यं भवत्येव निरर्थकम् ॥१५॥
अतो ज्ञानादिगुणवान् शुकोऽपि ब्रह्मविद्वरः । अधीत्य श्रीभागवतं भक्तिमेवाचरद्धरेः ॥ १६ ॥
अपि भक्तिमताऽन्यत्र प्रीतिहानाय सर्वथा । संपादनीयं ज्ञानं च वैराग्यं भक्तिपोषकम् ॥१७॥
माहात्म्यज्ञानयुग्भक्तिर्ज्ञानवैराग्यशोभना । दृढा यस्य भवेन्नित्यं भक्त एकांतिको हि सः १८॥

धर्मात्मजस्येति वचो निशम्य सुधोपमेयं सुधियोऽखिलास्ते ।
संतो गृहस्थाश्च तदीयभक्ताः सदोनिषण्णा मुदिता बभूवुः ॥ १९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावष्टनवत्यधिकशततमस्तरंगः ॥ १९८ ॥ ६५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । पौषकृष्णप्रतिपदि वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । प्राङ्मुखस्य बहिर्वेद्यां व्यवराजत सदासने ॥ २ ॥
पीतरक्तातिसुरभिपुष्पहारावतंसकः । सितांबरो धृतोऽनेकैस्त्यागिभिर्गृहिभिः स्वकैः ॥ ३ ॥
गीतानि कृष्णपद्यानि सवादित्रं च साधुभिः । श्रुत्वा हृष्टः स पुरतो निषण्णानब्रवीत्सतः ॥४॥
अद्य पृच्छामि महतः सतोऽहं तन्निशम्यताम् । स इत्युक्त्वानंदमुनिमादौ पप्रच्छ संसदि ॥५॥
अस्त्येकः पुरुषः कश्चित्सोऽल्पधीरपि पश्यति । दोषान् स्वकान् परेषां तु गुणानेव न चेतरान्
अथैकोऽस्ति पुमान्कश्चित्स धीमानपि नात्मगान् । दोषान्विचष्टेऽन्येषां तु दोषानेव सतामपि ॥
एवं बुद्धिमतोऽप्यस्य स्वदोषानवबोधने । अस्ति किं कारणमिति प्रश्नस्योत्तरमुच्यताम् ॥ ८ ॥
यथामत्युत्तरे तेन कृतेऽपि मुनिनाथ सः । तत्सम्यग्नेति मन्वानः स्वयमेव तदूचिवान् ॥ ९ ॥
नेक्षेत यः स्वगान् दोषान्न गुणांश्च सतां नरः । प्राग्जन्मन्यत्र वा तेन कृतो द्रोहो महासतः ॥
तेन पापेन धीरस्य महत्यप्यस्ति दूषिता । अतो विपर्ययं प्राप्ता भवतीत्युत्तरं मुने ॥ ११ ॥
इत्युक्त्वा तं स पप्रच्छ नित्यानंदमुनिं प्रभुः । श्रेय आत्यंतिकं केन साधनेन नृणां भवेत् १२॥
साक्षात्कृष्णाश्रयेणैवेत्युच्येत यदि तर्हि तु । धर्मज्ञानविरागाणां भक्तेर्वा किं प्रयोजनम् ॥१३॥
इति पृष्टः सोऽपि मुनिर्यथामत्युत्तरं ददौ । तदप्यजातं मन्वानः स्वयमेव तमाह तत् ॥ १४ ॥
श्रेय आत्यंतिकं यत्तद्धरेः साक्षात्समाश्रयात् । भवतीत्येव जानीहि नास्तीदृक्साधनांतरम् ॥
अन्यानि धर्ममुख्यानि साधनानि तु सत्पतेः । तस्याज्ञयैव पाल्यानि तस्यैव प्रीतये प्रभोः ॥
अपि कालश्च माया च ब्रह्मेशौ भास्करादयः । तस्याज्ञामनुवर्त्तंते नियंतुः सभयाः सदा ॥१७॥
अतो भक्तेन कृष्णस्य सावधानतयैव हि । तदाज्ञा पालनीयैव यया सिद्ध्यति दासता ॥ १८ ॥
एवं सत्येकमेवास्ति श्रेयसे साधनं नृणाम् । इति दत्त्वोत्तरं ब्रह्मानंदं पप्रच्छ स प्रभुः ॥ १९ ॥
देहे जीवोऽस्ति योऽत्राऽसौ साकृतिर्वा निराकृतिः । अस्तीति पृष्टः साकार इति प्राह स तं मुनिः
तं स्वाम्युवाच साकारो यदि जीवो भवेत्तदा । बुद्धींद्रियादीन् जीवानां सुखायेशः कुतः सृजेत्
बुद्धींद्रियमनःप्राणान् जनानामसृजत्प्रभुः । मात्रार्थं च भवार्थं च ह्यात्मने कल्पनाय च २२॥
इत्युक्तं श्रीभागवते ततो जीवः स्वरूपतः । स्वभावतश्च चिद्रूपः सन्मात्रश्चास्ति निश्चितम् २३॥
अनाद्यज्ञानरूपेण वपुषा कारणेन तु । स चावृतोस्ति वै नित्यं यथा बीजं त्वचावृतम् ॥ २४ ॥
चुंबको लोहमाकृष्य स्वशक्त्या तेन सज्जते । यथा तथेशसृष्टेन स च बुद्धींद्रियादिना ॥२५ ॥
अज्ञानेनैव तस्मिंश्चाऽहंमतिं विदधाति सः । न त्वसौ वस्तुतस्तादृगित्युक्तः सोऽब्रवीन्मुनिः ॥२६॥
कृष्णैकांतिकभक्त्याऽसावज्ञानविनिवृत्तितः । यदा त्रिदेहमुक्तः स्यात्कीदृग्रूपस्तदा भवेत् ॥२७॥
तमुवाच हरिर्यर्हि श्रीकृष्णोपासनाबलात् । वपुस्त्रयं लीयतेऽस्य चिद्रूपो जायते तदा ॥ २८ ॥
कृष्णेच्छयाऽथ दिव्योऽस्य पराप्रकृतितो मुने । आविर्भवति देहो वै तेन संयुज्यते च सः २९॥
तादृशोऽथ हरिं प्रीत्या तस्मिन्नक्षरधामनि । सेवमानो वर्त्ततेऽसौ प्रश्नोत्तरमितीरितम् ॥३०॥
ततः पप्रच्छ गोपालानंदं साधुवरं हरिः । भगवंतं भजंतेऽत्र बहवः पुरुषा मुने ॥ ३१ ॥
केषांचिज्जायते तत्र साक्षाद्दर्शनमात्मनः । अष्टांगस्य च योगस्य सिद्धिरप्यतिदुर्लभा ॥ ३२ ॥
सिध्यत्येतद्द्वयमपि कृपया कृष्णतत्सताम् । अतस्तेष्वेव तेषां तु सर्वदा लग्नतोचिता ॥३३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथापि कस्यचिद्योगसिद्धौ च स्वात्मदर्शने । जाते तत्रैव तस्यातिलग्नता पुंस ईक्ष्यते ॥ ३४ ॥
तद्धेतौ तु हरौ सत्सु तस्या गौणत्वमीक्ष्यते । तत्र किं कारणं साधो ब्रूहीत्युक्तोऽब्रवीत्स तम् ॥
पुंसोऽस्य योगसंसिद्ध्या स्वात्मनो दर्शनेन च । हृदि मानो जात इति वृत्तिस्तस्येदृशीक्ष्यते ॥
इत्युक्तवंतं प्रत्याह तं हरिः स यदा पुमान् । सिद्धयोगश्चात्मदृक् स्याद् ब्रह्मरूपस्तदा भवेत् ॥
तस्मिंस्तथाविधे मानो वक्तुं शक्यो न वै मुने । किंतु तेन न विज्ञातं योगसिद्धादिवर्त्तनम् ॥
योगसिद्धाश्चात्मदृशो ब्रह्मीभूताः पुरातनाः । यथाऽवर्त्तंत तत्तेन ज्ञातव्यं शास्त्रचक्षुषा ॥३९॥
योगस्य सिद्धिं परमां संप्राप्तश्चात्मदर्शनः । ब्रह्मानंदनिमग्नश्च प्रागासीद्व्यासनंदनः ॥ ४० ॥
तथाविधोऽप्यधीत्याऽसौ श्रीमद्भागवतं हरौ । चकार परमां भक्तिं तस्य चात्मप्रियोऽभवत् ॥
भक्तेरेव स वृद्ध्यै च साधुवैष्णवसंगमम् । नित्यमिच्छन्कथां चक्रे तत्पुराणस्य संसदि ॥४२॥
एवमन्येऽपि बहव आत्मनिष्ठाश्च योगिनः । कृष्णतत्सेवकेष्वेव संप्रापुरतिलग्नताम् ॥ ४३ ॥
आत्मदृग्योगिनामेतां परीपाटीं तु ये विदुः । अधुनाऽप्यत्र ते भक्ता वर्त्तंते तद्वदेव हि ॥४४॥
अतो यस्येदृशी वृत्तिर्न स्यात्तेन तु शास्त्रतः । बुद्ध्वा प्राग्योगवृत्तांतं हेयो दोषो निजोऽचिरात् ॥
येन दोषः स्वको नैव विदितः स्यात्कथंचन । पूजनांते हरिस्तेन प्रार्थनीयो दिने दिने ॥ ४६ ॥
नारायण हरे स्वामिन् यः कश्चिन्मयि संस्थितः । दोषः स्यात्स त्वया नाश्यः कृपया दीनवत्सल ·
इति संप्रार्थितः साक्षाद्भगवानीश्वरेश्वरः । दोषानशेषतो हंति नचिरेणैव हृद्गतः ॥ ४८ ॥
इति प्रश्नोत्तरं स्वामी दत्वाऽस्मै शास्त्रसंमतम् । पुरोनिषण्णं पप्रच्छ मुक्तानंदं महामुनिम् ॥
कृतावतारोऽपि हरिः स्वतंत्रोऽस्त्येव सर्वदा । मानुष्यं नाटयन् क्वापि स स्वैश्वर्यं न दर्शयेत् ॥
मंत्रयंत्रादिवित्कश्चित्प्राकृतोऽपि पुमान्मुहुः । चमत्कारान्बहून्सद्यो दर्शयेदंजसाश्रितान् ॥५१॥
तद्दर्शनेन भक्तस्य नृवृत्तिं भजतो हरिम् । ततो यायात्परावृत्तिं न वा यायान्मनो वद ॥ ५२ ॥
इति पृष्टः स तं प्राह यदि भक्तेन तेन सः । सम्यक् स्यान्निश्चितस्तर्हि परावर्त्तेत तन्न वै ५३॥
यदि प्राकृतजीवस्य चमत्कारसमीक्षणात् । परावर्त्तेत भक्तस्य मनः कृष्णान्नृशीलिनः ॥ ५४ ॥
तर्हि तेन हरिर्नैव ज्ञातः खलु यथार्थतः । इत्युत्तरं हरिः श्रुत्वा प्राह तं सत्यमीरितम् ॥५५॥
पप्रच्छाऽथो शुकमुनिं प्रभुः साधोऽत्र देहिनः । यस्य साक्षाद्धरेः प्राप्तिर्जाताऽस्त्यथ च तत्सताम्
जीवतोऽत्राऽस्य को लाभो देहांते कश्च जायते । इति पृष्टः स तं प्राह त्वमेवास्योत्तरं कुरु ॥

श्रीहरिरुवाच

कालोऽस्य जीवतः कृष्णकथासंश्रवणादिना । सर्वोऽपि यात्यथेक्षा स्याद् ब्रह्मरूपात्मनो मुने ॥
अवस्थात्रितयाक्रांतिः स्वधर्मे चाऽचलस्थितिः । त्यागश्चाऽधर्मसर्गस्य सर्वदा सर्वथैव हि ॥५९॥
कृष्णेतरपदार्थेषु वैराग्यं च सदा दृढम् । एष लाभोऽत्र विज्ञेयो हरिभक्तस्य जीवतः ॥ ६० ॥
देहांते त्वस्य भगवत्साधर्म्याप्तिश्च जायते । ब्रह्मधामनि कृष्णस्य सेवा तेन च लभ्यते ॥६१॥
तत्र तेनाऽनुभूयंते यथावच्च रमापतेः । स्वरूपं च स्वभावश्च सद्गुणाश्च विभूतयः ॥ ६२ ॥
एवं श्रीकृष्णभक्तस्य लाभोऽत्राऽस्ति परत्र च । प्रश्नोत्तरमिति प्रोक्तं मुने हृद्यवधारय ॥६३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रश्नोत्तरात्मकवचोऽमृतमीश्वरस्य तस्येति ते मुनिवराः श्रवणैर्निपीय ।
हर्षं परं ययुरथो मुनयः सदःस्थाः सर्वेऽपरेऽपि च गृहाश्रमिणः पुमांसः ॥ ६४ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ नवनवत्यधिकशततमस्तरंगः ॥ १९९ ॥ ६६ ॥

शकाब्दे विक्रमार्कस्य चंद्राष्टवसुभूमिते । माघकृष्णतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः । निजावासादपाग्देश उपगंगाजलप्रहेः ॥ २ ॥
वेद्यां निषद्य राजन् स स्वासने विशदांशुकः । सद्गीतकृष्णपद्यानि भक्तसंघवृतोऽशृणोत् ॥ ३ ॥
कीर्त्तनांते प्रसन्नोऽसौ सत ऊचे पुरोगतान् । सर्वे शृण्वंतु भो संतो युष्मान् पृच्छामि किंचन
एकांतिका हरेर्भक्ता देहांते ब्रह्मतां गताः । तत्साम्यं परमं प्राप्य संति तद्धाम्नि भूरिशः ॥५॥
तेषु कृष्णे च को भेदो येन ते सेवका मताः । सेवनीयश्च भगवानिति पृष्टास्त ऊचिरे ॥ ६ ॥
प्रश्नस्यास्योत्तरं स्वामिंस्त्वयैव हि भविष्यति । इत्युक्तः स हसन्नूचे श्रूयतां तदहं ब्रुवे ॥ ७ ॥
कृष्णभक्ताः कालकर्ममायावरणवर्जिताः । ब्रह्मीभूता ब्रह्मधाम्नि वसंति हरिसन्निधौ ॥ ८ ॥
भूरितेजोमयांगास्ते कृष्णाग्रे स्वल्पतेजसः । तारका इव चंद्राग्रे दृश्यंत इति गम्यताम् ॥९॥
रूपसौंदर्यमैश्वर्यं गुणाः कल्याणकारिणः । कृष्णदत्ताः संति तेषु कृष्णे तु सहजस्थिताः ॥१०॥
दीयमानमपि स्वेभ्य ऐश्वर्यं राधिकापतेः । अर्णवांभ इवाऽपारमवितर्क्यं च वर्त्तते ॥ ११ ॥
अस्ति कृष्णे निरवधि महैश्वर्यमखंडितम् । तत्रस्थमुक्तपुंसां तदत्यंतमपि सावधि ॥ १२ ॥
ब्रह्मांडानि सृजेयुस्ते कृष्णस्यैवाज्ञया क्वचित् । पालयेयुः संहरेयुस्तानि न त्विच्छयात्मनः १३॥
अनेककोटिब्रह्मांडस्रष्टृत्वादीनि तु प्रभौ । स्वातंत्र्येण भवंतीति तस्य तेषां च भेदकृत् ॥ १४ ॥
एवमादिगुणैर्ज्ञेया कृष्णस्य स्वामिता तथा । मुक्तपुंसां सेवकत्वं ज्ञेयं ब्रह्मस्वरूपिणाम् ॥१५॥

अमृतं वचनं स्वगुरोरिति ते मुनयस्तु निशम्य मुदं परमाम् ।
गृहिणश्च जना निखिला अगमन् विनयेन च तं स्म नमंति हि ते ॥ १६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ द्विशततमस्तरंगः ॥ २०० ॥ ६७ ॥

मध्यमप्रकरणं समाप्तम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणाय नमो नमः

वृत्तालयपुरे

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । एकादश्यामूर्जशुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे गोमतीसरसस्तटे । स व्यराजन्महापीठे भक्तसंघैः परिश्रितः ॥ २ ॥
शोणशीर्षस्कंधपटो धृतश्वेतांगरक्षकः । श्वेतसुरवारधरो जंव्वाभकटिबंधनः ॥ ३ ॥
स्थलपद्मस्रगापीडकेयूरकरभूषणम् । तमुद्गवदनं शोभारामः पप्रच्छ शास्त्रवित् ॥ ४ ॥
प्राप्नुयात्कृष्णभक्तो यो निर्विकल्पस्थितिं स ते । एकांतिकः स्थितप्रज्ञो निर्भयो मुक्त ईरितः ॥
यस्तु नैतां स्थितिं भक्तः प्राप्तः स्यात्तेऽस्य कीदृशी । गतिः स्यादिति संपृष्टस्तमुवाच स सत्पतिः
मनःप्राणनिरोधः स्यात्कृष्ण इत्येव केवलम् । निर्विकल्पस्थितिर्नैव किंतु साऽस्त्यन्यथापि हि ॥
विश्वसर्गविसर्गादिनवलक्षणलक्षितः । श्रीकृष्ण आश्रयः प्रोक्तः श्रीमद्भागवतादिषु ॥ ८ ॥
साक्षान्नराकृतेस्तस्य मुमुक्षोर्दृढनिश्चयः । स्वपित्रादेरिवाऽचाल्यः क्वापि केनापि यो भवेत् ॥९॥
निर्विकल्पसमाधिः स प्रोक्तो मुक्तो भवेत्स यत् । तस्मिन् सति मनःप्राणनिरोधो नास्त्यपेक्षितः
तावतैव कृतार्थोऽसौ भवतीत्यवगम्यताम् । तं विना प्राणरोधस्तु ज्ञेयोऽकिंचित्करः खलु ॥११॥
प्राणरोधविहीनोऽपि यः कृष्णदृढनिश्चयी । भवेत्पुमान् स विज्ञेयो निर्विकल्पसमाधिमान् ॥
कीदृक् कृष्णस्वरूपं स्यात् परमे ब्रह्मधामनि । श्वेतद्वीपे च वैकुंठे कीदृक् कीदृग्भवेच्च तत् ॥
दर्शनं तस्य रूपस्य भविष्यति कदा मम । विकल्पा ईदृशा यस्या भवेयुर्हृदये मुहुः ॥ १४ ॥
दैवेच्छातः क्वचिज्जाते समाधावपि तस्य तु । नैवैकांतिकभक्तत्वं यतो मुक्तिर्भवेत् परा ॥१५॥
अतो नराकृतावेव कृष्णे यस्याऽचला मतिः । भवेत्तस्यैव मुक्तिः स्यात्त्यागिनो गृहिणोऽपि च ॥
इति ज्ञात्वा सैव दृढा कर्त्तव्याऽत्र मुमुक्षुणा । तयैव च कृतार्थत्वं स्वस्य ज्ञेयं न चान्यथा ॥
इति प्रश्नोत्तरं श्रुत्वा स हृष्टोऽभूद्द्विजोत्तमः । दीनानाथोऽथ पप्रच्छ तं कविः प्रांजलिः प्रभुम्
विकल्पानां प्रशमने यथाशक्त्युद्यमे कृते । सम्यक् तत्स्यान्न चेत्तर्हि प्रभो कीदृग्गतिर्भवेत् ॥
तमुवाच हरिः शक्त्या क्रियमाणे तदुद्यमे । सम्यग्जये न जातेऽपि दुर्गतिस्तु भवेन्न हि ॥२०॥
न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति । इति कृष्णस्य वचनं प्रमाणमिह विद्यते ॥२१॥
इहैव हि जये जाते निर्विकल्पस्थितिर्भवेत् । क्वचिज्जये न जातेऽपि सा स्याद्देवाऽन्यजन्मनि २२॥
योगभ्रष्टस्य पुंसोऽस्य पूर्वाभ्यासः पुनः प्रभौ । अचलां कारयत्येव मतिं नैवाऽत्र संशयः ॥
तद्विकल्पात्मना नित्यं मनसा तु मुमुक्षुणा । विधातव्यं युद्धमेव स्वारिणेव जिगीषुणा ॥२४॥
युद्धे जये त्विह प्राप्ती राज्यादेरस्य जायते । रिपोरभिमुखे मृत्यावपि स्वर्गोपलंभनम् ॥ २५ ॥
रिपुं बलिष्ठं ज्ञात्वैव तद्भीत्या यः पलायते । तस्य त्वत्राऽयशोऽमुत्र भवत्येवाऽधमा गतिः ॥
विकल्पबलिनस्तस्माद्भेतव्यं मनसो न वै । शक्त्याऽनेन तु योद्धव्यं सद्गतिर्भविता ततः ॥२७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

येनैं शत्रुर्मनो ज्ञातं कृतं युद्धं न तेन च । जाताश्च तदधीनास्ते प्राप्ता एव हि दुर्गतिम् ॥
सुधोपमेयामिति तस्य वाचं निशम्य विप्राः स च तत्सदःस्थाः ।
सर्वे गृहस्थाश्च विरक्तसंघा अपि प्रतोषं हृदये समीयुः ॥ २९ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धावेकाधिकद्विशततमस्तरंगः ॥ २०१ ॥ १ ॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । ऊर्जशुक्लत्रयोदश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे गोमतीसरसस्तटे । सहकारवने वेद्यां स्वासने स उपाविशत् ॥ २ ॥
पीतांबरधरो हैमवृत्तशोणांगरक्षकः । हैमसूत्राढ्यकौसुंभप्रावारोष्णीषमंडितः ॥ ३ ॥
चंपकापीडधवलपुष्पहारालिराजितः । नानादेशागतस्वीयनानाभक्तगणावृतः ॥ ४ ॥
प्रश्नोत्तराणि कुरुतेत्याह स स्वान् जनान् प्रभुः । नत्वा पप्रच्छ तं भक्तः कर्णगुप्ताभिधस्ततः ॥
केनोपायेन भगवन्साक्षात्कृष्णः प्रसीदसि । इति पृष्टः स ऊचे तं स स्वाद्रोहात्प्रसीदति ॥ ६ ॥
द्रोहस्तु विश्वसर्गादि कर्तुरप्यस्य सर्वथा । अकर्तृत्वादिविज्ञानमीश्वराणामपीशितुः ॥ ७ ॥
आहुः कालस्य कर्तृत्वं केचित्केचिच्च कर्मणः । मायायाः केचन प्राहुः स्वभावस्यापि केचन ॥
सम्यक्शास्त्रार्थविज्ञानं तेषां नास्तीति गम्यते । कालादेः कृष्णशक्तित्वं वेदादौ वर्णितं यतः ॥
नास्त्येव विश्वसर्गादौ कालादीनां स्वतंत्रता । तत्तत्क्रिया विदधते हरेः प्रेरणयैव ते ॥ १० ॥
सम्राज आज्ञयैवास्ति यथा मंडलभूभृताम् । प्रजाप्रशासनं तद्वत्कालादीनां तदाज्ञया ॥ ११ ॥
एवं सर्वनियंतारं सर्वकर्त्तारमेव च । तं यो विद्यात्स वै भक्तः प्रोक्तो द्रोहीतरस्तथा ॥ १२ ॥
विद्वांसोऽप्यत्र केचिच्च तं सदा दिव्यविग्रहम् । अप्यरूपं विदुर्विद्धि तदपि द्रोहमेव हि ॥ १३ ॥
संपूर्णांगं स्वनृपतिं यथा कश्चन कीर्त्तयेत् । नासाकर्णादिहीनोऽस्ति राजाऽस्माकमसाविति १४ ॥
ईदृग्वाक्यं नरपतेर्द्रोह एव तथा हरेः । दिव्यांगस्याऽप्यरूपत्वकथनं द्रोह ईयताम् ॥ १५ ॥
अरूपस्य हरेः सर्गारंभे मायासमीक्षणम् । न संभवेदतो नित्यं स ज्ञेयो दिव्यविग्रहः ॥ १६ ॥
वस्तुतः करपादादिहीनं कृष्णमवेत्य ये । तमर्चेयुश्चंदनाद्यैऽस्तेऽपि तद्द्रोहिणो मताः ॥ १७ ॥
वेदेषु भगवद्रूपं सम्यगस्ति निरूपितम् । अपि तन्न सुबोधं यत्तत्र मुह्यंति सूरयः ॥ १८ ॥
स्वस्वरूपावबोधार्थं ततो भगवतैव हि । प्रवर्त्तितानि शास्त्राणि सांख्यादीनि धरातले ॥ १९ ॥
आचार्यः सांख्यशास्त्रस्य महर्षिः कपिलोऽभवत् । चतुर्विंशतितत्त्वानि तेन तत्रोदितानि च ॥
तत्त्वात्मकशरीरेभ्यो जीवेशास्तु पृथक् क्वचित् । न स्थातुं शक्नुवंतीति तेन तेऽपि निरूपिताः
परमात्मा पञ्चविंशस्तन्नियंतृतया पृथक् । तेभ्यो निरूपितोऽस्तीति तत्रापीशोऽस्ति साकृतिः ॥
पृथक्त्वमथ सुस्पष्टं जीवेशपरमात्मनाम् । कालेन नाऽभवद्वेद्यं तच्छास्त्रेण मुमुक्षुताम् ॥ २३ ॥
तदा हिरण्यगर्भेण योगशास्त्रं प्रवर्त्तितम् । चतुर्विंशतितत्त्वेभ्यस्तत्रोक्तः क्षेत्रवित्पृथक् ॥ २४ ॥
परमात्मा तु भगवान् षड्विंशः पृथगीरितः । एवं तत्रास्ति तद्ध्येय उक्तः कृष्णो हि साकृतिः ॥
सुबोधं तत्र कृष्णस्य नाभूद्रूपस्य वर्णनम् । पञ्चरात्रं ततश्चक्रे भगवान्नारदात्मना ॥ २६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वासुदेवादिरूपेण चतुर्व्यूहो निरूपितः । तत्र कृष्णस्ततस्तस्याकृतिः स्पष्टं विभाव्यते ॥ २७ ॥
नारायणो वासुदेवः स एव स्वेच्छया प्रभुः । चतुर्भुजादिरूपेण वैकुण्ठादौ च वर्त्तते ॥ २८ ॥
रामकृष्णादिरूपेण यथाकार्यं स भूतले । स्वातंत्र्येणावतीर्णः सन् निघ्नन् दुष्टान्सतोऽवति ॥
एवं साकृतिता तस्य वेदादौ वर्णिताऽस्त्यतः । सत्संगिनश्च तं बुद्ध्वा भजंते सर्वकारणम् ॥
वेदादीनां च तात्पर्यं वासुदेवे हि साकृतौ । अस्तीति श्रीभागवते सूतः प्राह विधिश्च तत् ॥
वासुदेवपरा वेदा वासुदेवपरा मखाः । वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ ३२ ॥
वासुदेवपरं ज्ञानं वासुदेवपरं तपः । वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ ३३ ॥
नारायणपरा वेदा देवा नारायणांगजाः । नारायणपरा लोका नारायणपरा मखाः ॥ ३४ ॥
नारायणपरो योगो नारायणपरं तपः । नारायणपरं ज्ञानं नारायणपरा गतिः ॥ ३५ ॥
एवं वेदादिभिः शास्त्रैरेकवाक्यतयैव ये । कृष्णं विदुः परं तत्त्वं त एव ज्ञानिसत्तमाः ॥ ३६ ॥
पृथक्पृथक्तया त्वस्य शास्त्रेषु महिमोदितः । न तावता वस्तुभेद इति ज्ञेयं मनीषिभिः ३७ ॥
दृष्ट्या सितं त्वचा शीतं जिह्वया मधुरं यथा । घ्राणेन सुरभीत्येकमप्युक्तं बहुधा पयः ३८ ॥
सर्वे गुणा हि पयसो गुणैर्भिन्नं पयो न हि । एवं हि भगवानेको भूयांसः संति तद्गुणाः ॥
पृथक् पृथक् च शास्त्रेषु युक्तिभिर्बहुधैव ते । तन्महत्त्वावबोधार्थं प्रोक्ताः स त्वेक एव हि ॥
एवं भगवतो ज्ञानं विना द्रोहो भवेत् खलु । तस्मात्तदेव यत्नेन संसाध्यं सन्निषेवया ॥ ४१ ॥
भक्तत्वं त्वस्य ज्ञानेन तेनैव च रमापतेः । प्रसन्नता भवेन्नित्यमिति प्रश्नोत्तरं तव ॥ ४२ ॥

श्रुत्वेति तस्यामृततुल्यवाचं वैश्यः स चान्ये गृहिणश्च संतः ।
सद्गोनिषण्णाः सकलास्तदीया भक्ता अवापुः परमं प्रहर्षम् ॥ ४३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ द्व्यधिकद्विशततमस्तरंगः ॥ २०२ ॥ ॥ २ ॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । एकादश्यामूर्जकृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालयात् । प्रत्यग्वेद्यां स्वास्तृतायां व्यराजत्स सितांबरः ॥ २ ॥
त्यागिभिर्गृहिभिश्चासौ स्वभक्तैः परितो वृतः । स्थलाब्जशेखरस्त्रग्भिः शोभमानोऽब्रवीत्ततः ३॥
औद्धवे संप्रदायेऽस्मिन्स त्वेकांतिक उच्यते । भक्तिर्दृढा भवेद्यस्य ज्ञानवैराग्यधर्मयुक् ॥ ४ ॥
मुमुक्षूणां सेवनीयः स च प्राधान्यमर्हति । अत्र पृच्छामि वः किंचिच्छ्रुत्वा तत्कार्यमुत्तरम् ॥
भक्त्यादिषु चतुर्ष्वेषु यस्मिन्नेकतमे गुणे । प्राप्तेऽपरे त्रयोऽपि स्युस्तदंतः समुपागताः ॥ ६ ॥
तं गुणं ब्रूत यूयं मेऽवश्यसाध्यं मुमुक्षुभिः । मुक्तानंदश्च गोपालानंदस्तं तत ऊचतुः ॥ ७ ॥
धर्मोऽस्ति तादृश इति हृदये प्रतिभाति नौ । हरिरूचेऽथ धर्मस्तु विमुखेऽपि भवेन्नरे ॥ ८ ॥
न स तेन गुणेनान्यान् गुणांस्त्रीन् प्राप्नुयात् क्वचित् । इत्युक्त्वा स्वयमेवाह तदुत्तरमपि प्रभुः
महत्ताबोधयुग्भक्तिर्दृढा भगवतः स हि । गुणस्तथाविधो ज्ञेयो गुणास्त्वन्ये तदंतराः ॥ १० ॥
हरेराज्ञां पालयंति ब्रह्मकालेश्वरादयः । एवं महत्तां बुद्ध्वैव भक्तिं यः कुरुते दृढाम् ॥ ११ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदाज्ञसान्स्वधर्मादीन्नातिक्रामेत्कदाचन। एवं धर्मादयो भक्तेर्ज्ञेया अंतर्गता गुणाः ॥ १२ ॥
अथाह तं शुकमुनिर्भक्त्या यद्येकयाऽखिलाः। प्राप्ता भवेयुर्धर्माद्या नोक्ता सैकैव किं तदा ॥
एकांतिकश्चतुर्भिः स्याद् गुणैरित्युच्यते कुतः। इति पृष्टस्तु मुनिना तेन प्रत्याह तं हरिः १४ ॥
परापरेति भेदेन भक्तिस्तु द्विविधा मता। कृष्णमाहात्म्यबोधेन युक्ता तत्रादिमोदिता ॥ १५ ॥
दृढा सैव भवेद्यस्य तस्य पुंसस्तु सर्वथा। धर्मादिसाधनोद्योगः पृथङ्नास्त्येव निश्चितम् १६ ॥
तादृशस्तु पृथुर्भक्तः कथायाः श्रवणे हरेः। कर्णायुतं वृतं येन न त्वन्यद्वरदायिनः ॥ १७ ॥
वेणुनादं हरेः श्रुत्वा तत्पार्श्वं च यियासवः। स्वैरुद्धास्त्यक्तवपुषस्तादृश्यश्च व्रजांगनाः ॥ १८ ॥
सामान्यतो भवेद्यस्य भक्तिः पुंसोऽपरा प्रभोः। माहात्म्यज्ञानरहिता साध्यं तेन तु तत्त्रयम्
चतुर्भिः साधनैर्युक्तो भवेदेकांतिको हि सः। एवं व्यवस्था विज्ञेया पुंसां भक्तेस्तु भेदतः ॥
ब्रह्मानंदोऽथ पप्रच्छ केनोपायेन लभ्यते। प्राप्या भवेत्परा भक्तिस्तव पुंसो मुमुक्षतः ॥ २१ ॥
तमुवाच हरिः सा तु प्राप्यते सेवया सताम्। चतुर्विधास्तेऽपि संति ते च ज्ञेया निदर्शनैः ॥
दीपाभा दीपिकाभाश्च तडिद्भाश्चौर्वसंनिभाः। कृष्णमाहात्म्यबोधस्य तारतम्येन ते तथा २३ ॥
तत्र ये भ्रष्टतां यायुः क्वचिद्विषयवायुना। आद्यास्ते कथिताः संतश्चिराद्यास्यंति सिद्धताम् २४ ॥
विषयै रमणीयैस्तु तीव्रवायूपमैरिह। क्वचिद्ये भ्रष्टतां यायुस्ते द्वितीया उदीरिताः ॥ २५ ॥
वर्षोदकेन विद्युद्वत् सर्वैर्मायिकवस्तुभिः। ये क्वचिन्नाप्नुयुः क्षोभं ते तु प्रोक्तास्तृतीयकाः ॥
यथा समुद्रगोऽप्यौर्वः क्षीयते न तदंबुना। प्रत्युताऽऽपीय तत्क्षारं कृत्वा मधुरमुज्झति २७ ॥
तथा ये विषयान्सर्वान्सेवमाना अपि क्वचित्। यायुर्नाणुमपि क्षोभं कुर्युस्तच्छ्रेय एव च २८ ॥
ते तुरीया निगदिता एवं संतश्चतुर्विधाः। तत्राद्याश्च द्वितीयाश्च सेवार्हा न मुमुक्षताम् २९ ॥
पराभक्तीप्सुभिर्नित्यमितरेषां तु यत्नतः। मनोवाक्तनुभिः सेवा कर्त्तव्या निजशक्तितः ३० ॥
तत्रापि संतो विद्युद्भा ज्ञेया एकांतिका हरेः। और्वाभास्तु हरेरेव परमैकांतिका मताः ३१ ॥

इति तस्य वचोऽमृतं स पीत्वा मुनिरापाति मुदं सदोनिषण्णाः।
अपरे मुनयोऽखिलाश्च भक्ता गृहिणश्चाऽप्यलभंत ये तदीयाः ॥ ३२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ त्र्यधिकद्विशततमस्तरंगः ॥ २०३ ॥ ३ ॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते। दशम्यां सहसः शुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालये। सितवासा व्यराजत्स वृतस्त्यागिगृहिव्रजैः ॥ २ ॥
पप्रच्छ मुक्तानंदस्तं तदाज्ञसो हरेस्तव। भक्तस्यैकं साधनं मे प्रधानं वक्तुमर्हसि ॥ ३ ॥
येनैकेन कृतेनैव साधनानीतराण्यपि। अखिलानि कृतानि स्युरिति पृष्टोऽब्रवीद्धरिः ॥ ४ ॥
साधुलक्षणयुक्तानां सतां संगोऽस्ति तादृशः। इत्युक्त्वा स सतः सर्वान्पृच्छति स्म दयानिधिः ॥
कृष्णस्यैकांतिको भक्तो दक्षो योगक्रियासु च। सांख्ययोगौ कृष्णपराविति जानंश्च यो भवेत् ॥
तेन मूर्त्तौ भगवतो वृत्ती रक्ष्या कथं सदा। कथं मूर्त्तिश्चालनीया हृदा तत्प्रवणेन च ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अंतर्वृत्तिः कथं रक्ष्या कथं रक्ष्या च सा बहिः । कथं लये च विक्षेपे तेन वृत्यं तु साधवः ८ ॥
इति पृष्टास्तेन संतो यदा सम्यक्तदुत्तरम् । कर्तुं विदुर्नैव तदा स्वयमेव तदाह तान् ॥ ९ ॥
अस्त्यंतःकरणं संतो जीववृत्त्याचितं नृणाम् । उद्गच्छन्नैकधारांबुयंत्रेण सदृशं च तत् ॥ १० ॥
जलयंत्रे यथा वारि भ्रमित्वोद्गच्छति द्रुतम् । तत्रेंद्रियेष्वात्मवृत्तिस्तथा भ्रांत्वोद्ध्र्वमेति हि ॥
एवं सत्यत्र यो योगी सतां वर्त्तयति द्विधा । अंतर्बहिस्ततस्ताभ्यां साक्षात्कृष्णं समीक्षते १२ ॥
अंतर्वृत्त्या साक्षिरूपं हृदि कृष्णं स ईक्षते । दृष्टिद्वारा बहिर्वृत्त्या पुरतस्तं च वीक्षते ॥ १३ ॥
आनखाग्रादाशिखं च साकल्येनैव वीक्षते । बहिः स भगवन्मूर्त्तिं न त्वंगानि पृथक् पृथक् ॥
यथा कश्चिन्महासौधं महांतं वापि पर्वतम् । साकल्येनैव वीक्षेत तथाऽसौ पश्यति प्रभुम् ॥
मूर्त्तिं बहिर्धारयतस्तस्या ऊद्ध्र्वमधोऽथ वा । पार्श्वयोर्वापि चेत्किंचिद्वस्तु दृक्पथमापतेत् ॥
नातिदूरे तदा तां तु पश्येत्पश्येत्स्वसन्निधौ । नासाग्रे वा भ्रुवोर्मध्ये धारयेत्प्रयतः स तु ॥१७॥
एवं धारयतस्तस्य निद्रा वाऽऽलस्यमापतेत् । यदि तर्हि पुनर्दूरे धारयेत्तां स योगवित् १८ ॥
धृतरज्जुर्यथा बालः पतंगं स्वेच्छया मुहुः । ऊद्ध्र्वं चाधः पार्श्वयोर्वा संनयेदानयेत्पुनः १९ ॥
तथैव योगकलया मूर्त्तिं वर्त्तयतोऽस्य च । निद्रालस्यं चापयायात् स भवेच्च सचेतनः २० ॥
ततः पुनर्नासिकाग्रे धृत्वा तामंतरे भ्रुवोः । नीत्वा स्वांतर्नयेत्तां च तत्स्थयैक्येन भावयेत् ॥
आत्मवृत्तिस्तदा द्वेधा भूता यात्येकतां हृदि । आनंदं परमं तत्र याति भागवतं स च २२ ॥
आलस्यं वापि निद्राऽथ पुनस्तत्रोदियाद्यदि । तदा पुनर्द्विधा वृत्तिं कृत्वा पूर्ववदाचरेत् २३ ॥
श्रोत्रत्वगादिद्वारापि स च योगकलां मुहुः । तथांतःकरणद्वारा साधयेदेवमेव हि ॥ २४ ॥
तथा सांख्यविचारेण देहत्रयपृथक्कृते । धारयेच्छुद्धचैतन्यरूप आत्मनि च प्रभुम् ॥ २५ ॥
अंतर्बहिर्वा भगवन्मूर्त्तिं धारयतो यदि । व्यावहारिकविक्षेप आपतेत् क्वापि कश्चन ॥ २६ ॥
तदापि तं समादध्याद्धारयन्नेव तां स तु । न तु योगकलां क्वापि स्वकीयामुत्सृजेत्सुधीः ॥२७॥

सांख्यं च योगं विदुषो यथावद्भक्तस्य वृत्तिर्भवतीदृशी वै ।
इति प्रभोर्वागमृतं निपीय ते तोषमापुर्मुनयो गृहस्थाः ॥ २८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुरधिकद्विशततमस्तरंगः ॥ २०४ ॥४॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । चतुर्थ्यां सहसः कृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे गोमतीसरसस्तटे । वेद्यामाम्रवणे मंचासन एष व्यराजत ॥ २ ॥
सितांबरः स्थलाब्जस्रक्शेखरोत्तंसशोभितः । त्यागिभिर्गृहिभिः स्वीयैः परितोऽनेकशो वृतः ३॥
पप्रच्छ मुक्तानंदस्तमुदगास्यं तदाज्ञया । दैवी ह्येषा गुणमयीत्यादित्वद्वाक्यतो हरे ॥ ४ ॥
मायां तरेयुः कृष्णं त्वां प्रपद्येरन्नरास्तु ये । न तिष्ठति ततो माया प्रपन्नेषु हरिं क्वचित् ॥ ५ ॥
भक्तानां हृदि संकल्पविक्षेपोऽपि समीक्ष्यते । स च मायां विना केन कृतस्तद्वक्तुमर्हसि ॥६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीहरिरुवाच

सर्गकालेऽस्य जगतो मायायास्तु गुणत्रयात् । भूतादीनां समुत्पत्तिर्जायते भगवद्दृशा ॥ ७ ॥
तामसात्तत्र जायंते महाभूतानि पंच च । दशेंद्रियाणि जायंते बुद्धिः प्राणश्च राजसात् ॥ ८ ॥
बाह्यांतःकरणेशाश्च जायंते सात्विकान्मनः । एभिरेव हि जायंते तत्त्वैर्देहास्तु सर्वशः ॥ ९ ॥
एतैरेव च भक्तानामपि देहसमुद्भवः । जातोऽस्तीत्यस्ति सर्वत्र मायामयगुणात्मता ॥ १० ॥
गुणात्मकांतःकरणात्संकल्पक्षोभसंभवः । जायंते हृदि भक्तानामपि यावद्वपुःक्षयः ॥ ११ ॥
एवं सति यथा मायानिवृत्तिर्जायते नृणाम् । भगवंतं प्रपन्नानां तथा वच्मि निशम्यताम् १२॥
प्रत्यक्षभगवद्रूपे धृतमानुष्यनाटने । मायिकत्वस्य लेशोऽपि सर्वथैव न विद्यते ॥ १३ ॥
नराकृति परं ब्रह्म भवत्येतद्धि निर्गुणम् । इति स्वान्निश्चयो यस्य पुंसो भगवतो दृढः ॥ १४ ॥
स तु मायां तीर्ण एव वर्त्तमानोऽपि तादृशे । देहे कृष्णस्याऽवबोधाद् गुणातीततया किल १५॥
क्षोभाभावाद्धरे रूपे क्रियारक्ते निजांतरे । संकल्पक्षोभदुष्टेऽपि स मायां तीर्ण एव हि ॥१६॥
संकल्पादिस्तु मनसो धर्मः स्वाभाविकोऽस्ति वै । अतो न संशयः कार्यो मायायास्तरणे हरेः ॥
मायातीतं हरिं विद्याद्यो वै धृतनराकृतिम् । तावता सोऽपि विज्ञेयो मायातीत इति ध्रुवम् ॥
क्वचित्प्राप्तगुणक्षोभा अपि ब्रह्मादयः सुराः । वसिष्ठाद्याश्च मुनयो भवंत्येव तथाविधाः ॥१९॥
एतदेवाऽस्य प्रश्नस्य ज्ञातव्यं भवतोत्तरम् । इत्युक्तः स प्रसन्नोऽभून्नित्यानंदस्ततोऽब्रवीत् २०॥
प्रपन्नस्य हरिं त्वां मे पुंसो लक्ष्म वद प्रभो । तमुवाच हरिस्तत्तु गीतायां हरिणोदितम् २१॥
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः २२॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः २३॥
एवं कृष्णं प्रपन्नस्य महादुःखं यदि क्वचित् । आपतेत्तर्हि स ततो रक्षां नेच्छेत्तदन्यतः ॥ २४ ॥
यद्यत्सुखमभीष्टं स्यात्स्वस्य तत्तच्च कर्हिचित् । कृष्णेतरस्मान्नेच्छेद्वै सर्वमिच्छेद्धरेः स च ॥ २५॥
कृष्णेतरं कंचिदपि नैव विद्यात्सुखप्रदम् । हरेश्चिकीर्षानुगुणं स च वर्त्तेत सर्वदा ॥ २६ ॥
एवंविधस्तु विज्ञेयः प्रपन्नः पुरुषो हरिम् । इत्युक्त्वोपरतं नांजः क्षत्रियस्तं स पृच्छति २७॥
दृढं त्वदाश्रयो न स्याद्धृदयेऽथापि बाह्यतः । प्रौढिं दृढाश्रितसमां स्वस्य यस्तु प्रदर्शयेत् २८॥
स दांभिको नरः स्वामिन् दृढभक्तसमक्रियः । कथं ज्ञेय इति पृष्टो धर्मसूनुस्तमब्रवीत् ॥२९॥
स सह व्यवहारेण सहवासेन वा मुहुः । दृढवर्त्तनकाले वा सुधीभिर्ज्ञायते द्रुतम् ॥ ३० ॥
सन्मंडले स च स्थातुं शक्नुयान्नैव सर्वथा । पृथग्भूत्वा ततः कृष्णं भजेत्स्वैरं चरेत्तथा ॥३१॥
कृष्णाश्रयोऽप्युत्तमादिभेदेन त्रिविधो मतः । भक्तोऽपि तद्वशात् त्रेधा कनीयानेष तत्र तु ३२॥
नित्यानंदोऽथ नत्वा तं पप्रच्छासौ कदाचन । स्यादुत्तमो न वा स्वामिन्निति पृष्टोऽब्रवीत्प्रभुः ॥
यथा भगवतः कुर्याद्बाह्याभ्यंतरपूजनम् । तथा द्रव्यैस्तदुच्छिष्टैरर्चेद्भक्तान् स उत्तमान् ॥ ३४॥
भगवंतमिव प्रीत्या सदन्नैस्तांश्च भोजयेत् । द्रव्यव्ययं च कृष्णार्थमिव कुर्यात्तदर्थकम् ॥ ३५ ॥
एवमुत्तमभक्तानां सेवनं कृष्णवत्तु यः । अतिप्रीत्याऽऽचरेन्नित्यं सोऽत्रैव स्यात्खलूत्तमः ॥ ३६॥
अन्यथा तु कनिष्ठोऽसौ बहुभिर्जन्मभिर्हरिम् । भजन्नुत्तमतां यायादिति प्रश्नोत्तरं तव ३७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति वचनसुधां हरेः स पीत्वा मुनिवर आप मुदं च साधवोऽन्ये ।
गृहिजनाश्च ये निषण्णास्तदनुचरा अतुलां च लेभिरे ते ॥ ३८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ पञ्चाधिकद्विशततमस्तरंगः ॥ २०५ ॥ ५ ॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । एकादश्यां सहःकृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालयात् । प्राच्यां महासनेऽराजत्स सूक्ष्मविशदांशुकः ॥ २ ॥
पुष्पस्रक्शेखरै रम्यं नानाभक्तगणावृतम् । भक्तश्चिन्मयरावाख्यस्तमपृच्छत्कृतानतिः ॥ ३ ॥
सकारणशरीरा हि मायायां प्रलये हरे । जीवा अनेकशो लीनास्तिष्ठंत्यव्यक्तभावतः ॥ ४ ॥
स्थूलसूक्ष्मशरीराप्तिपूर्वं तेषां विचित्रता । सर्गादौ जायते सा किं कर्मभिर्वा हरीच्छया ॥५ ॥
सोच्येत कर्मभिस्तर्हि स्याज्जैनमतसत्यता । वैषम्यनैर्घृण्याप्तिः स्यादिच्छयाऽपि हरेस्तदा ॥ ६ ॥
यथावद्देतन्मे ब्रूहि सर्वज्ञस्त्वं यतः प्रभो । इति पृष्टो हरिः प्रीतस्तं प्रोवाच निशम्यताम् ॥७॥
कारणाख्यं शरीरं यत्तदविद्यात्मकं मतम् । तत्रास्ति सूक्ष्मं स्थूलं च वपुर्बीजे यथा द्रुमः ॥८॥
अतः कारणसंज्ञं तद्भवतीत्यवगम्यताम् । अनादितत्संचिताख्यकर्मभिश्चाऽस्ति संयुतम् ॥ ९ ॥
जीवेन समवायोऽस्ति तस्य बीजत्वचोरिव । गंधभूम्योरिवातः स सार्वकालिक उच्यते ॥१० ॥
पृथ्वीगतानि बीजानि प्रावृट्काले यथांभसः । संयोगं समवाप्यैव प्ररोहंति पृथक् पृथक् ॥११॥
सकारणांगा मायायां लीना जीवास्तथेशितुः । वृष्टिं प्राप्योत्पत्तिकाले ततः प्रादुर्भवंति हि १२॥
प्राप्नुवंति च देहांस्ते स्वस्वकर्मानुसारतः । पृथक् पृथक् प्रवर्त्तंते सांकर्यं नैव यांति च ॥१३॥
नास्तिकाः केवलं प्राहुः कर्मणामेव कर्त्तृताम् । न तु तत्फलदेशस्य ततो दुष्टं हि तन्मतम् १४॥
कालस्य केचन प्राहुः केवलस्यैव कर्तृताम् । कृष्णेच्छायाः केवलायाः केचित्केवलकर्मणः ॥१५॥
नैतत्सतां मतं नूनं महतां शास्त्रदर्शिनाम् । ईश्वरस्येच्छयैवास्ति कर्तृता क्वापि कर्मणः ॥१६ ॥
कर्तृता भवति क्वापि कालस्यापि तदिच्छया । स्वातंत्र्येण तु नास्त्येव कर्तृत्वमुभयोरपि ॥
न सर्वदेश्वरेच्छाया एकस्या एव कर्तृता । अन्यथाऽनंतशक्तीनां तस्य निष्फलता भवेत् ॥१८॥
पृथक्कर्तृत्वमेतेषां यच्छास्त्रेपूपवर्णितम् । ब्रवीमि कारणं तत्र नश्येयुर्येन संशयाः ॥ १९ ॥
कलावपि हरेर्भक्ता भवेयुर्बहवो यदा । एकांतिकास्तदा सत्ययुगवत्स्युः क्रिया नृणाम् ॥ २० ॥
भगवद्भक्तिरूपस्य कर्मणोऽत्र बलिष्ठता । ज्ञेया यया घोरकालप्रवृत्तिरपि दूरिता ॥ २१ ॥
तस्यैव कर्मणः शास्त्रे कर्तृत्वाद्यस्ति वर्णितम् । न त्वन्यकर्मण इति नैतज्जानंति नास्तिकाः २२॥
तथाऽऽदिमे सत्ययुगे कालस्यैव बलिष्ठता । आसीद्यया कर्मबलं सर्वेषामपि दूरितम् ॥ २३ ॥
तदाऽऽसन् ब्राह्मणाः सर्वे नान्यो वर्णस्तु कश्चन । सर्वे च सत्यसंकल्पा मनसा सृष्टिकारकाः ॥
गृहे गृहे कल्पवृक्षास्तेषां चासन्महात्मनाम् । सर्वे भक्ताश्च कृष्णस्य सर्वे धर्मपरायणाः ॥२५॥
कालस्यैव बलं हीदृग्यदा कृष्णेच्छयाऽभवत् । अकिंचित्करतैवासीत्कर्मादीनां तदाऽऽत्मनाम् ॥
कर्तृतादीनि शास्त्रेऽपि तस्यैवोक्तानि संति हि । न तु सर्वस्य कालस्य स्वातंत्र्येणेति गम्यताम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रादुर्भवन् भुवि हरिर्यदा चेच्छन्मयाधुना। देहेनानेन सर्वेषां स्वाश्रितानां तु देहिनाम् ॥२८॥
श्रेय एवास्ति कर्त्तव्यं न तु तत्पात्रतेक्षणम्। तदा कर्म च कालो वा कर्तुं किंचन न क्षमौ॥
यथा कृष्णावतारेऽत्र गोपगोपीगवां कृतम्। पक्षिणां स्थावराणां च तेन श्रेयः स्वयोगतः॥
श्रेयः कृतं च दैत्यानामपि तेन जिघांसताम्। अत्र केवलमिच्छाया हरेर्भवति कर्तृता ॥३१॥
एवं व्यवस्था विज्ञेया कर्मादीनां सुबुद्धिभिः। स्वातंत्र्यं पारतंत्र्यं च तेषामपि यथातथम्॥
मुख्यः कर्त्ता तु सर्वेषां पाता हर्त्ता च सर्वथा। श्रीकृष्ण एव भवतीत्येवं ज्ञात्वा स सेव्यताम्
सुधातुल्यां वाणीमिति निजगुरोस्तस्य स नृपो निशम्यापत्तोषं निजहृदि तथान्ये च मुनयः॥
सदःसंस्था भक्ता गृहिण उत ये तेऽपि च परं ततः सर्वे नेमुर्भृशविनयतस्तं हितकरम् ३४॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षडधिकद्विशततमस्तरंगः॥ २०६॥ ६॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते। मार्गकृष्णचतुर्दश्यां वचोऽमृतमिदं हरेः॥ १॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालये। व्यराजत्सितवस्त्रोऽसावुपविष्टः सदासने॥ २॥
त्यागिभिर्गृहिभिर्भक्तैर्नानादेशागतैर्वृतम्। नत्वा चिन्मयरावस्तं पृच्छति स्म पुरः स्थितः॥३॥
श्रूयंते द्विविधा जीवाः प्रभो दैवास्तथाऽऽसुराः। तत्रासुराः क्वचिद्यायुर्दैवत्वं वा न तद्वद ४॥

श्रीहरिरुवाच

आसुराणां तु दैवत्वं दुर्लभं सर्वथैव हि। जात्यासुरास्तथाऽऽविद्यासुरा इति च ते द्विधा ५॥
तत्र द्वितीयास्तूत्कृष्टसतां निश्छद्मसेवया। कृष्णभक्त्या चासुरत्वमुज्झित्वा यांति दैवताम् ६॥
आद्यास्तु भक्तिं सत्संगं नित्यं कुर्वंत एव चेत्। जह्युर्देहांस्तदा लीना भवेयुर्ब्रह्मणि ध्रुवम् ७॥
निर्यायुश्च पुनस्तस्माल्लीयेरंस्तत्र ते पुनः। मुहुरेवं हि भवतां तेषामासुरता क्षयेत्॥ ८॥
एतदन्य उपायो हि नास्त्येवासुरताक्षये। इत्युक्तः सोऽभवत्तुष्टः शोभारामस्ततोऽब्रवीत् ९॥
अन्वयो व्यतिरेकश्च मायायां मायिकेष्वतः। कीदृगस्ति तव स्वामिन्नित्युक्तः स तमब्रवीत् १०॥
मायातदीयकार्येषु हरेरर्द्धस्य नाऽन्वयः। नार्द्धस्य व्यतिरेकश्च भवतीत्यवगम्यताम्॥ ११॥
किंतु स्वयं स्वरूपेण पृथगेव स्थितः प्रभुः। वर्त्ततेऽन्वीय सर्वत्र सामर्थ्यं तस्य हीदृशम् ॥१२॥
नाऽस्य प्रवेशे मायायामशुद्धत्वभयं क्वचित्। यतस्तस्य प्रवेशेन सापि यात्यक्षरात्मताम् ॥१३॥
अपि तत्कार्यतत्त्वानि तस्य चानुप्रवेशतः। ब्रह्मतां यांत्यतो नेशस्तत्संबंधेन दुष्यति॥ १४॥
धाम्ना स्वेनैव स सदा निरस्तकुहकोऽस्ति हि। इति श्रीमद्भागवते बहुधास्ति निरूपितम् १५॥
वृक्षस्य बीजआकाशो योऽन्वितोऽस्ति स एव हि। तच्छाखापत्रपुष्पादावन्वितो भवति ध्रुवम्॥
तथाप्यसौ न वृक्षस्य छेदे दाहे च कर्हिचित्। छिद्यते दह्यते वापि यत्तद्रूपं हि तादृशम् १७॥
एवं सकार्यमायायामन्वीयापि हरिस्ततः। पृथगेव स्वरूपेण वर्त्तते सर्वदाऽच्युतः॥ १८॥

इति हरेर्वचनं स सुधोपमं द्विजवरस्तु निशम्य मुदं ययौ।
मुनिगणा गृहिणश्च तथाऽपरे मुमुदिरे सकला हि सदोगताः॥ १९॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्ताधिकद्विशततमस्तरंगः॥ २०७॥ ७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । पौषशुक्लचतुर्थ्यां च वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालये । उपविष्टः स्वासनेऽसौ व्यराजत सितांशुकः ॥ २ ॥
परीतोऽसौ भक्तसंघैः श्रृण्वन् पद्यानि सज्जनैः । गीयमानानि कृष्णस्य किंचिद्ध्यानपरोऽभवत् ॥
ततो नेत्रे स उन्मील्य वीक्षमाणः सतोऽब्रवीत् । अध्यात्मवार्त्ता क्रियते मया तां श्रृणुताखिलाः
नेत्रस्य वृत्तिरेषा या सा स्वरूपेव लक्ष्यते । स्थूले पदार्थे नेत्राग्रं प्राप्ते सा प्रतिरुध्यते ॥५॥
अतः स्थूलैव सा ज्ञेया पृथ्वीतत्त्वमयी तथा । भक्तस्तु तां योजयति स्वरूपे परमात्मनः ॥६॥
तदा तु सा प्रथमतः सूक्ष्मरज्जुरिवायता । लक्ष्यते पीतवर्णा च कुर्वता तेन चिंतनम् ॥ ७ ॥
ऊर्णनाभिर्यथैवोर्णास्तंभांस्तंभांतरावधि । वितत्यास्ते क्वचित्स्तंभ आद्ये क्वाप्यंतिमे स्वयम् ॥
क्वचिदास्ते तयोर्मध्ये भक्तजीवस्तथा च सः । क्वचिन्निजांतःकरणे क्वचित्कृष्णे क्वचांतरे ॥ ९ ॥
वृत्तौ तस्मिन्वर्त्तमान ऊर्णायामूर्णनाभिवत् । पीताऽपि सा चांबुतत्त्वप्रधाना लक्ष्यते सिता ॥
अग्नितत्त्वप्रधानाऽथ साऽरुणा तेन दृश्यते । वायुतत्त्वप्रधानाऽथ हरिद्वर्णेक्ष्यते च सा ॥११॥
व्योमतत्त्वप्रधानाऽथ श्यामा सा तेन वीक्ष्यते । ततः सा निर्गुणा भूत्वा जायतेऽतिप्रकाशभाक्
कृष्णस्वरूपाकाराऽथ लक्ष्यते सा सुखात्मिका । एवमभ्यसतस्तस्य लीयते कृष्ण एव सा ॥ १३॥
इयमेवाऽस्य निद्रोक्ता हरिभक्तस्य योगिनः । एवं बुभूषुर्यो भक्तः स भवेत्सर्वदा शुचिः ॥
देवं पुपूजिषुर्यद्वद्भूत्वाऽऽदौ देववच्छुचिः । ततः समर्चयेद्देवं प्राप्नुयात्तत्फलं तदा ॥ १५ ॥
देहत्रयमलं तद्वत्सांख्यज्ञानांबुना स च । धूत्वा शुचिर्हरिं ध्यायेत्तदाऽतिसुखभाग्भवेत् ॥१६॥

पीत्वा वचोऽमृतमिति स्वगुरो रसालं ते साधवश्च गृहिणोऽपि तदीयभक्ताः ।
तस्मिन्महासदसि ये सकला निषण्णास्ते चाप्नुवन्नतु मुदं परमां स्वहृत्सु ॥ १७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ अष्टाधिकद्विशततमस्तरंगः ॥ २०८ ॥ ८ ॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । शुक्लाष्टम्यां सहस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालयात् । पुरस्तादासने स्वीये व्यराजत्स सितांबरः ॥ २ ॥
नानाभक्तैः परिवृतः सोऽपृच्छत्स्वाग्रगान्सतः । गुणात्मकं सुखं यत्तत् व्यवस्थास्वनुभूयते ३ ॥
एवं भागवतं सौख्यं निर्गुणं यदखंडितम् । कथं तदनुभूयेत सर्वावस्थासु सात्त्वतैः ॥ ४ ॥
प्रश्नस्येत्युत्तरं वक्तुमविदः प्राह तान् स्वयम् । कृष्णसौख्यस्यानुभवप्रकारं कथयाम्यहम् ५ ॥
यद्याकाशः पृथिव्याद्यैर्भूतैर्हीनो भवेत् परम् । यावत्यस्तारकाः संति तावंतस्तत्र चेंदवः ॥६॥
तदा सहस्यपूर्णानां तेषां कांत्योपमीयते । सच्चिदानंदरूपो हि चिदाकाशो महोज्ज्वलः ॥७॥
तस्मिंस्तु भगवान् कृष्णो राजते दिव्यविग्रहः । समाधौ तं समीक्षंते भक्तास्तत्कृपयैव हे ॥
तद्दर्शनं क्षणमपि कृतं भक्तस्य तस्य तु । सहस्राब्दं कृतमिव यात्येवानुभवं हृदि ॥ ९ ॥
बहुकालं भुक्तमपि मार्मिकं तु सुखं नृणाम् । क्षणभुक्तमिव प्रांते जायते हि गुणात्मकम् १०॥
कार्ष्णं तु निर्गुणं सौख्यमखंडमविनाशि च । सहानुभूयते भक्तैरवस्थासु तिसृष्वपि ॥ ११ ॥

१६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पीयूषसाम्यं गतमीश्वरस्य तस्येति वाक्यं मुनयो निशम्य ।
सर्वे गृहस्थाश्च तदीयभक्तास्तोषं महांतं हृदयेऽलभंत ॥ १२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ नवाधिकद्विशततमस्तरंगः ॥ २०९ ॥ ९ ॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । एकादश्यां पौषशुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालये । मंचासने व्यराजत्स पिचुमंदतरोरधः ॥ २ ॥
सितांबरधरं भक्तैरनेकैः परितो वृतम् । भृगुगुरुस्तमप्राक्षीद्भद्रायनपुरागतः ॥ ३ ॥
संसारे भ्रमतां स्वामिन्स्याच्छ्रेयः कथमात्मनाम् । इति पृष्टः स तं प्राह श्रेयः स्यादाश्रयाद्धरेः ॥
भूतानां श्रेयसे भूमाववतीर्णस्य तस्य च । द्विविधानि स्वरूपाणि नराकाराणि संति वै ॥ ५ ॥
कानिचिद्राजरूपाणि साधुरूपाणि कानिचित् । उभयेषां लक्षणानि संति तेषां पृथक्-पृथक् ॥
तत्राद्यानां भागवते प्रोक्तानि स्कंध आदिमे । लक्ष्माणि सत्यमुख्यानि संवादे भूमिधर्मयोः ७॥
स्कंध एकादशेऽन्येषां कृपालुप्रमुखानि च । लक्ष्माण्युक्तानि तान्यादौ ज्ञेयानि श्रेय इच्छता ॥
उभयेषां च साधर्म्यं न देहक्रियया त्विह । भगवत्यथ प्रपन्नानामस्ति श्रेयोविधौ त्विदम् ॥९॥
राजरूपस्तु भगवान् रामकृष्णादिरीयताम् । चतुःषष्टिःकलास्तस्मिन्नीतिश्च सकला भवेत् १०॥
रसाः शृंगारमुख्याश्च मृगया चापदि क्वचित् । गृहस्थाश्रमधर्मश्च भवेत्तस्मिन् यथोचितः ११॥
साधुरूपश्च भगवानात्रेयकपिलादिकः । तस्मिन्ज्ञानकलाः सर्वास्त्यागो योगस्तथा भवेत् ॥१२॥
रसस्तु शांत एवैको जीवाहिंसा च सर्वथा । त्याग एवाष्टधा स्त्रीणां स्याद्भक्तिश्च हरौ दृढा १३॥
एवं हि लक्षणैः कृष्णं ज्ञात्वाऽऽश्रित्य च तं दृढम् । स्थित्वैव तस्य चाज्ञायां कार्या तद्भक्तिरुत्तमा
अनेनैव ह्युपायेन मुमुक्षोः पुरुषस्य तु । आत्यंतिकं भवेच्छ्रेयो नान्यथेत्यस्ति निश्चयः ॥ १५ ॥
प्रत्यक्षो भगवान्न स्याद्यदा भुवि तदा तु ये । संतस्तं मिलितास्तेषामाश्रयादपि तद्भवेत् ॥१६॥
साधुलक्षणसंपन्नास्तेऽपि न स्युर्यदा तदा । कृष्णप्रतिकृतेर्भक्त्या तत्स्याद्धर्मयुजा दृढम् ॥ १७ ॥

श्रुत्वेति तस्याऽमृतसारवाचं स वैश्यवर्यश्च तथा सदःस्थाः ।
तदाश्रिताः साधुजनाः समस्ता गृहाश्रमस्थाश्च ययुः प्रहर्षम् ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ दशाधिकद्विशततमस्तरंगः ॥ २१० ॥ १० ॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । पौर्णमास्यां सहस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालये । सोऽराजत् स्वासने पट्टे पिचुमंदतरोरधः ॥ २ ॥
सितवासास्त्यागिभिश्च गृहिभिः स्वाश्रितैर्वृतः । श्वेतपुष्पस्रगापीडोत्तंसद्वयविराजितः ॥ ३ ॥
प्रसन्नः स्वयमेवासौ पुरःस्थानब्रवीत्ततः । न द्रुह्या मामकैः कृष्णतद्भक्तद्विजदुर्बलाः ॥ ४ ॥
मम त्वेष स्वभावोऽस्ति यत्कृष्णस्य च तत्सताम् । विप्राणां दुर्बलानां च द्रोहो मास्त्विति सर्वदा
तेभ्यो यथा बिभेम्यत्र तथाऽन्येभ्यो न कर्हिचित् । तद्द्रोहिणं च द्रष्टुं मे रोचते नैव कर्हिचित्
अन्येषां द्रोहतो नैव जीवो नश्यति कर्हिचित् । एतेषां द्रोहतस्तु स्याज्जीवनाशोऽपि निश्चितम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतस्तद्द्रोहतो भीर्मे वर्त्तते सर्वदा हृदि । तद्द्रोग्धृभिश्च साकं मे स्थातव्यं क्वापि नास्ति वै ॥
मुक्तानंदोऽथ पप्रच्छ तं जीवस्य तु कुत्रचित् । नाशो न श्रूयते स्वामिन्स कथं जायते वद ९ ॥

श्रीहरिरुवाच

पर्वतादिशरीरस्य प्राप्तिर्नाशोऽस्य कीर्त्तितः । यया न क्वापि कल्याणं भवेत्तस्येति गम्यताम् १०॥
अतो न कार्यस्तद्द्रोहस्तेषामग्रे च सर्वथा । न रक्षणीयो मानोऽपि भूरिदोषाकरः क्वचित् ॥
मानिनो भगवद्भक्तिरपि स्यादासुरी ध्रुवम् । मानेन भक्तभयदः पुमानप्यासुरो मतः ॥ १२ ॥
अथ तं परिपप्रच्छ गोपालानंद ईश्वरम् । इह शास्त्रविदः केचित् पुराणज्ञाश्च केचन ॥ १३ ॥
ते मुह्यंति कथं स्वार्थे परेषां बोधका अपि । स्वस्वस्वसद्भक्तमाहात्म्यं कथं सम्यग्विदुर्न ते ॥

श्रीहरिरुवाच

शास्त्राणि च पुराणानि वृत्त्यै ते प्रवदंति हि । मुमुक्षारहितत्वाच्च नाश्रयंते हरिं ततः ॥ १५ ॥
हर्याश्रयं विना चैनान् कामक्रोधादयोऽरयः । जित्वा प्रवर्त्तयंत्येव निरयाध्वनि सर्वथा १६ ॥
ततः कृष्णं च तद्भक्तान्स्वौपम्येन विचक्षते । कामक्रोधाद्यरिजितांस्तत्तान्न बहु मन्वते ॥ १७ ॥
एवं यथार्थमाहात्म्यं कृष्णस्य च सतामपि । विद्वांसोऽपि न जानंति तांश्च निंदंत्यपि क्वचित् ॥
इत्युक्त्वा तं स पप्रच्छ महतः सकलान्सतः । दीनानाथाख्यविप्रं च सर्वसंशयनाशनः १९ ॥
ये तु ब्रह्मविदः संतो ब्रह्मरूपा हि ते मताः । परत्र वर्त्तमानाश्चाऽवस्थात्रयवपुस्त्रयात् ॥ २० ॥
क्रियाः सर्वाश्चेंद्रियाणां मन्यंते तेन चात्मनः । तानज्ञानिजना नैव जानीयुर्भुवि तत्त्वतः ॥
तत्समानां स्थितिं यायुर्ये तन्माहात्म्यवेदनात् । त एव तान्विदुः सम्यक् शास्त्रज्ञा अपि नेतरे
तेषां ये महिमानं च न जानंत्यत्र तत्त्वतः । तेषां ब्रह्मस्वरूपेऽपि जायते न स्थितिः क्वचित् ॥
तां विना च विदुर्नैव ब्रह्मस्थितिमतोऽपरान् । एवमन्योन्यबाधस्य परिहारः कथं भवेत् २४ ॥
इति प्रश्नस्योत्तरं तु यदा कर्तुं न ते विदुः । तदा तत्स्वयमेवासौ कथयामास तान्प्रभुः २५ ॥
कृतावतारं कृष्णं ये प्रत्यक्षं न्राकृतिं भुवि । मिलिता ब्रह्मनिष्ठां च प्राप्ताः स्युः साधवोऽमलाः ॥
अतिप्रीतिर्भवेत्तेषु यदि तर्हिं तयैव हि । तेषां महत्त्वं विद्युश्च तत्स्थितिं चाप्नुयुस्ततः ॥ २७ ॥
येषु येषां भवेत् प्रीतिस्तेषां तद्दोषदर्शनम् । नैव स्यादिति लोकेऽपि प्रसिद्धिर्वर्त्तते खलु २८ ॥
अतः सत्सु प्रीतिमतां नृणां स्वौपम्यतः क्वचित् । दोषदृष्टिर्भवेन्नैव परं स्यात्तद्गुणग्रहः २९ ॥
ब्रह्मात्मदर्शनं तेन साक्षात्कृष्णस्य चेक्षणम् । भवतीत्यवगंतव्यं प्रश्नस्योत्तरमंजसा ॥ ३० ॥

वाक्यं सुधासोदरमीश्वरस्य तस्येति ते साधुजनाः स विप्राः ।
श्रुत्वातितोषं हृदि लेभिरेऽथो संतो गृहस्था अपरे च सर्वे ॥ ३१ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावेकादशाधिकद्विशततमस्तरंगः ॥ २११ ॥ ११ ॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । पौषकृष्णद्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणस्य सः । दुर्गेऽधस्तान्निंबतरोर्व्यराजत्पट्टकासने ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सितधोत्रः सितोष्णीषः सितप्रवरणान्वितम् । वसानः स्थलपद्माभमहावस्त्रं वृतो निजैः ॥ ३ ॥
स्थलाब्जहारधृक्किंचिद्ध्यानोन्मीलितलोचनः । कृपयालोकयन्भक्तांस्त्यागिनो गृहिणस्तथा ४॥
उवाच तान्स सर्वेऽपि भक्ताः शृणुत सादरम् । सर्वेषामपि युष्माकं वार्त्तां कुर्वे हितावहाम् ॥
अनंतकोटिसूर्येन्दुवह्निज्योतिःसमप्रभे । अक्षरे धाम्नि भगवान् राजते पुरुषोत्तमः ॥ ६ ॥
कृष्णः स एव जीवानां कल्याणाय धरातले । आविर्भूतोऽस्ति मर्त्येषु युष्मद्दग्गोचरोऽस्ति सः ॥
तस्य स्यान्निश्चयो यस्य पूर्णः सत्संगतोऽन्वहम् । सोतिक्षीणोऽपि भक्तात्मा पुष्टिं याति महीयसीम्
यथाऽमायां निष्कलोऽपि सौरीं प्राप्य प्रभां शशी । वर्द्धमानः प्रतिदिनं पूर्णः स्यात् पूर्णिमातिथौ
तथा माहात्म्यबोधेन सह निश्चयमीशितुः । प्राप्याऽसावप्येधमानोऽन्वहं याति हि पूर्णताम् ॥
बाह्यांतःकरणान्येनं पूर्णं निश्चयतः क्वचित् । ततश्चालयितुं नैव शक्नुवंत्यचलस्थितिम् ॥ ११॥
न चाऽसौ नरलीलायां हरेर्मुह्यति कर्हिचित् । ईदृशो निश्चयो यस्य स ज्ञेयो निर्भयः पुमान् ॥
पूर्णोऽप्येष यदि क्वापि देशादीनसतः श्रयेत् । देहाभिमानं कुर्याद्वा तदा कृष्णेन्दुवत् क्षयेत् ॥
मुह्यन् हरेर्नृनाट्येऽसौ गृह्णंस्तद्गुणं ततः । अमाचंद्रोपमामेव न चिरेणोपयाति वै ॥ १४ ॥
द्विषोपि कामक्रोधाद्या न तथा क्षयहेतवः । यथा नृनाट्ये संदेहा हरेश्चाप्यगुणग्रहः ॥ १५ ॥
छिन्नमूलो यथा वृक्षः क्षयं यात्यचिरेण वै । नष्टेशनिश्चयस्तद्वत्पातं श्रेयोध्वनः पुमान् ॥ १७ ॥
सत्संगे वर्त्तमानोऽपि कृष्णनिश्चयदुर्बलः । दोषदर्शी च कृष्णे यः स त्वित्थं तर्कयत्यपि १७॥
श्रेयो भविष्यति न वा ममाऽहं किं वपुःक्षये । देवो भविष्याम्यथवा राजा वापि पिशाचकः ॥
एवं बहुकुतर्कोऽसौ विमुखो भविता ध्रुवम् । सन्मुखेनापि वा तेन श्रेयः सिद्ध्येन्न कस्यचित् ॥
दृढनिश्चयहीनश्च पुमान् क्लीबोपमो मतः । न तस्य बोधनेन स्यादुद्धारः कस्यचिद्यतः ॥ २० ॥
स्ववंशे क्षीयमाणेऽपि यथा क्लीबान्न संततिः । भवेत्तथा न मुक्तिः स्यात्तस्मादपि कदाचन २१॥
श्रोतव्यं तन्मुखान्नैव गीता भागवतादि च । यतस्तच्छ्रवणेनापि श्रेयः सिद्ध्यति नाण्वपि २२॥
विषदुष्टपयःपानान्मृत्युः स्यान्न सुखं यथा । एवं तच्छ्रवणाद्बुद्धिभ्रंशः स्यान्न तु सन्मतिः २३॥
अतो देशादयः संत एव सेव्या न हीतरे । मुमुक्षुभिस्तथा मुक्तैः सावधानैः प्रयत्नतः ॥२४॥
दृढनिश्चयवान् यस्तु भक्तः पूर्णो भवेद्धरेः । अजुष्टहेयदेशादिः स इत्थं वेत्ति चेतसि ॥ २५ ॥
यद्दिनान्मिलितः कृष्णस्ततोऽहं तु कृतार्थताम् । प्राप्तोऽस्मि नास्ति मे कार्यं शिष्टं तद्वचनेतरत् ॥
ये करिष्यंति मद्दीक्षां वार्त्तां श्रोष्यंति वापि मे । मुक्ताः संसृतिबंधात्ते यास्यंति परमं पदम् ॥
अतो भवद्भिरप्येवं स्वनिश्चयफलं हृदि । सावधानैर्भावनीयं कृतार्थत्वं च सर्वदा ॥ २८ ॥
इत्युक्त्वा गापयामास कृष्णपद्यं स साधुभिः । धन्यं वृंदावनमिति कृतं भक्तेन केनचित् २९॥
श्रीमद्भागवतस्यैकं श्लोकमप्यवदत्ततः । अहो अमी देववरामरार्चितमिति स्वयम् ॥ ३० ॥
सोऽथाह श्रीहरेः साक्षात्संबंधस्येदृशो महान् । प्रतापोस्तीति विज्ञाय सेव्यः स परमादरात् ॥

तस्यैवं वचनमुदारमीश्वरस्य पीयूषोपममखिला निशम्य भक्ताः ।
संतस्ते सह गृहिभिः सदोनिषण्णाः संप्रापुः परममुदं तदेकचित्ताः ॥ ३२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्वादशाधिकद्विशततमस्तरंगः ॥ २१२ ॥ १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । सहस्यकृष्णसप्तम्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणस्य सः । दुर्गोऽधस्तान्निंबतरोर्व्यरराजत्पट्टकासने ॥ २ ॥
सितांबरधरः श्वेतपुष्पहारविराजितः । सलीलं दाडिमफलं दधदेकेन पाणिना ॥ ३ ॥
हैमच्छत्रासराजश्रीर्वृतो भक्तैः सहस्रशः । आनंदयन् भक्तजनान्स समैक्षत सर्वतः ॥ ४ ॥
पप्रच्छ भृगुगुप्तस्तं विना साधनसंपदम् । समाधिर्जायते पुंसां केषांचित्स कथं भवेत् ॥ ५ ॥
इति पृष्टः स तं प्राह श्रृणु त्वं वैश्यसत्तम । साक्षात्कृष्णोऽत्र मर्त्यानां श्रेयसे जायते नृपु ॥
राजरूपः क्वचित्स स्यात्साधुरूपश्च कर्हिचित् । उभयोपि स्वसंबंधान्नृणां श्रेयः करोति हि ॥
सकलैश्वर्यपूर्णः स्यान्नराकारोऽपि स ध्रुवम् । अतो न प्राकृतनरैस्तुल्यता तस्य संभवेत् ॥ ८ ॥
पाषाणोपि यथाऽऽकर्षः स्वशक्त्यैवेतराश्मतः । भिद्यते भगवांस्तद्वत्स्वैश्वर्येणान्यमर्त्यतः ॥९ ॥
लोहकीला यथा तर्याश्चुंबकं प्रति सर्वतः । आकृष्टाः स्वयमेव स्युः सूत्रधारक्रियां विना ॥
तथा कृष्णं श्रद्धया यः पश्येत्तस्येंद्रियाण्यपि । आकृष्टानि भवेयुश्च स्वयमेव हि तं प्रति ॥११॥
ततः समाधिर्भवति व्रजे गोकुलवासिनाम् । यथा कृष्णेक्षणात्पूर्वमासीत्तद्वदितीयताम् ॥१२॥
तमेव तत्र श्रीकृष्णं कोटिसूर्यसमद्युतिम् । यथैक्षंताक्षरे धाम्नि ते तथेमे तमेव माम् ॥१३॥
अस्मिन्काले हरिर्भूयो योऽस्ति तस्यैवमेव हि । समाधेः कारणं मूर्त्तिर्भवतीत्यवगम्यताम् १४॥
बहूनामद्य जीवानामुद्धारेच्छास्ति यद्धरेः । ततः समाधिर्भवति ह्यभक्तानामपि द्रुतम् ॥१५ ॥
कृष्णेच्छया तिरश्चां च सोऽस्ति हीक्षणमात्रतः । किं पुनस्तर्हि भक्तानां ध्यानिनां स नृणामिति
अथ पप्रच्छ तं मुक्तानंदः साधुः कृतानतिः । सर्वत्र व्यापकं ब्रह्म त्वमित्याहुर्बुधाः प्रभो १७॥
व्यापकस्य न मूर्त्तत्वं मूर्तं स्याद् व्यापकं कथम् । इति पृष्टस्तमवदद्धरिर्ब्रह्मास्ति मूर्त्तिमत् १८॥
ब्रह्म तत्कृष्ण एवोक्त एकदेशगतोऽपि सः । सर्वत्र व्यापकोस्त्येव स्वशक्त्या तेजसाऽर्कवत् ॥
यथा कश्चिद्योगसिद्धः स्वस्थानस्थित एव सन् । श्रृणोति दूरगान् शब्दान् दूरस्थान् वीक्षतेऽपि च
तथा स्वाभाविकानंतैश्वर्यसंपन्न ईश्वरः । स्थित एवाऽक्षरे धाम्नि व्याप्नोत्यंडानि कोटिशः ॥
यदा यदा यत्र यत्र दातुमिच्छेत्स्वदर्शनम् । तदा तदा तत्र तत्र स्वेच्छयाविर्भवत्यसौ ॥ २२ ॥
एकोप्यनेकरूपोऽसौ स्वसामर्थ्येन जायते । एवं व्यापकता तस्य ज्ञातव्या न त्वरूपतः ॥२३॥
एवं स व्यापको ज्ञेयो नित्यदिव्यतनुः प्रभुः । अप्राकृतस्वरूपत्वादरूपः क्वचिदुच्यते ॥२४॥
श्रुत्वेति धार्मैरमृतोपमानां स तस्य वाचं मुनयोऽपरे च ।
सदोगता ये गृहिणश्च भक्तास्ते चापुरंतःकरणेऽतितोषम् ॥ २५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ त्रयोदशाधिकद्विशततमस्तरंगः ॥२१३॥१३॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । सहस्यांतनवम्यां तु वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणस्य सः । मंदिरस्याग्रतो मंचे सितवासा व्यराजत ॥ २ ॥
वृतं त्यागिगृहस्थैस्तं भक्तैर्भूरिभिरानतः । पप्रच्छ रामचंद्राख्यो भक्तो वटपुरागतः ॥ ३ ॥
कुपात्रपुंसोऽपि हरे समाधिरिह जायते । किं तस्य कारणमिति पृष्टः प्रभुरुवाच तम् ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धर्मशास्त्रोदितान्वर्णाश्रमधर्मांश्च पालयेत् । यः कुपात्रं स कथितः सुपात्रं च तदादरः ॥ ५ ॥
कुपात्रस्यापि पुंसश्चेद् हृदये कृष्णतत्सताम् । गुणः सम्यक् प्रविष्टः स्याद्गुणस्तु न सर्वथा ६॥
तर्ह्यसौ तेन पुण्येन स्वधर्मत्यागदोषतः । विमुच्यते सद्य एव पवित्रो जायते भृशम् ॥ ७ ॥
अतो लगति तच्चित्तं मूर्त्तौ भगवतो दृढम् । समाधिर्जायते तेन सहसेत्यवगम्यताम् ॥ ८ ॥
सुपात्रं यस्तु पुरुषो लोके शास्त्रे च संमतः । तस्यापि हृदये कृष्णतत्सतां द्रोहधीर्यदि ॥ ९ ॥
तर्हि तेनातिपापेन सर्वं सुकृतमस्य च । तत्कालं याति विलयं जायतेऽथ स पातकी ॥ १० ॥
तद्द्रोहपापमधिकं महापापादपि ध्रुवम् । महापापात्प्रमुच्येत पुरुषः साधुसंश्रयात् ॥ ११ ॥
पापं तद्द्रोहजं यत्तत् क्वापि केनापि न क्षयेत् । पुण्यतीर्थकृताघस्य वज्रलेपत्वविश्रुतेः ॥१२॥
अतो लोकैः कल्पितो यो धार्मिको न स धार्मिकः । धर्महीनस्तन्मतश्च न ज्ञेयो धर्मवर्जितः ॥
अतो यस्य समाधिः स्यात्स ज्ञेयोऽतीव पुण्यवान् । बहिर्दृश्यं त्वनाचारं सोऽल्पकालेन हास्यति

श्रुत्वेति वाचं सुधयोपमेयां जगद्गुरोस्तस्य स तोषमाप ।
संतोऽस्य भक्ता गृहिणश्च सर्वसभोपविष्टा मुदमापुरम्याम् ॥ १५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुर्दशाधिकद्विशततमस्तरंगः ।। २१४ ।। १४ ।।

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । सहस्यकृष्णैकादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणस्य सः । दुर्गेऽधस्तान्निंबतरोर्व्यराजत सुपट्टके ॥ २ ॥
हैमबुट्टारुणानर्घ्यनीशारसुरवारकौ । कौसुंभानर्घ्यशीर्षण्यप्रावारौ धारयंस्तथा ॥ ३ ॥
सच्छत्रचामरै रम्यं नानाभक्तगणैर्वृतम् । पप्रच्छ शोभारामस्तं शास्त्रविद्विहितानतिः ॥ ४ ॥
भवंति द्विविधा जीवा दैवाः केचित्तथाऽऽसुराः । ते किं स्वभावतः संति तादृशा वा निमित्ततः

श्रीहरिरुवाच

पुरा प्रलयकाले तु मायायां द्विविधा अपि । आसन् जीवा विलीना वै सर्गकालेऽथ उद्गताः ॥
यादृशं यादृशं कर्म ते कुर्वंतोऽभवंस्तथा । तादृशं तादृशं भावं सर्गे पृथगवाप्नुवन् ॥ ७ ॥
दैवाः केचन जायंते जायंते केचनासुराः । दैवानामासुराणां च संगेन हेतुनाऽपि च ॥ ८ ॥
आसुरत्वे च दैवत्वे सत्कोपानुग्रहौ परम् । कारणं भवतीत्येतत्प्रसिद्धमवगम्यते ॥ ९ ॥
वैकुंठवासिनौ देवौ पार्षदप्रवरौ हरेः । कोपेन ब्रह्मपुत्राणामासुरत्वमवापतुः ॥ १० ॥
प्रह्लादो दैत्यपुत्रश्च नारदर्षेरनुग्रहात् । दैवत्वं प्राप्य भगवद्भक्तानामग्रणीरभूत् ॥ ११ ॥
जुगुप्सुना स्वदैवत्वं कोपनीया न वै ततः । द्रोहेण साधवः क्वापि प्रसाद्यास्ते तु सर्वदा १२॥

इति वाक्यसुधां निपीय विप्रः स परं तोषमवाप तस्य भूम्नः ।
अपरे च महासभोपविष्टाः सकला भक्तजना हि ये च तेऽपि ॥ १३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पञ्चदशाधिकद्विशततमस्तरंगः ।। २१५ ।। १५ ।।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । पौषकृष्णत्रयोदश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणस्य सः । दुर्गेऽराजच्छुभे मंचे निंबाधस्तात्सितांबरः ॥ २ ॥
नानादेशागतैर्भक्तैर्बहुभिः परितो वृतम् । तं नत्वा शास्त्रिणः प्रोचुर्वटपत्तनवासिनः ॥ ३ ॥
प्रभो कंचिच्चमत्कारं यदि कांश्चिन्महाजनान् । दर्शयेस्तर्हि बहवः स्युः सत्संगिजना इह ॥४॥

श्रीहरिरुवाच

महांतो गृहिणो येऽत्र भवेयुर्वा नृपा अपि । न साकं सौमनस्यं तैर्भवेन्मम कदाचन ॥ ५ ॥
तेषां धनमदो राज्यमदश्चापि भवेद्धृदि । अस्माकं तु त्यागमदस्तथा भक्तिमदोऽस्ति च ॥ ६ ॥
अतो न तेषां चास्माकमैकमत्यं भवेत् क्वचित् । वैधर्म्यमुभयेषां च भवद्भिरपि बुध्यते ॥ ७ ॥
आढ्यान्नृपान्वा सत्संगं समाधिं कारयेय वा । यदि तर्हि प्रसन्नास्ते दद्युर्ग्रामधनादि मे ॥८॥
तल्लालसा तु मे नास्ति कृष्णध्यानैकचेतसः । ध्यानेऽस्ति यादृशं सौख्यं राज्यादौ नास्ति तादृशम्
सुखं भवेच्चेद्राज्यादौ तर्हि स्वायंभुवादयः । साम्राज्यं मलवत्त्यक्त्वा कुतो यायुस्तपोवनम् १०॥
कृष्णभक्तिसमं सौख्यं स्यात्स्त्रैणमपि चेत्तदा । चित्रकेत्वादयो जह्युः सर्वं तदतुलं कुतः ११ ॥
कृष्णसौख्यस्य पुरतः सर्वं ब्रह्मांडजं सुखम् । प्रोक्तं निरयवत्तुच्छं संतो नेच्छंति तत्ततः १२ ॥
ममापि कृष्णभक्त्युत्थं सुखं यत्तत्सुखं मतम् । सांसारिकं सुखं यत्तद्दुःखमेवाऽखिलं ननु ॥
ऐश्वर्यदर्शनेनाऽत आढ्यादीन्नैव कारये । सत्संगं किंतु सहजवृत्त्यैवाहं न चाग्रहात् ॥ १४ ॥
आग्रहस्तु हरेर्भक्तौ सत्संगस्य च रक्षणे । ममास्तीत्यखिलं हार्दं मयाद्य कथितं हि वः १५ ॥
श्रुत्वेति ते भक्तिसुतस्य वाचं सुधासमां शास्त्रविदो द्विजाग्र्याः ।
प्रहर्षमापुर्मुनयः सदःस्थास्तथा गृहस्थाश्च तदीयभक्ताः ॥ १६ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ षोडशाधिकद्विशततमस्तरंगः ॥ २१६ ॥ १६ ॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । सहस्यकृष्णपक्षांते वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालयात् । पुरस्ताद्धर्म्ये आत्मीय आसने स उपाविशत् ॥ २ ॥
सितांबरो भक्तजनैर्बहुभिः परिवारितः । पुरो निषण्णान्स सतः प्रत्यूचे स्वाननेक्षणान् ॥ ३ ॥
ज्ञानेंद्रियाणि पंचाऽथ पंच कर्मेंद्रियाण्यपि । समानि संति सर्वेषां साधूनां चासतामपि ४ ॥
व्यवहारश्च तैस्तेषामेकधैवास्ति नान्यथा । एवं सति तु साधूनां स्याजितेंद्रियता कथम् ॥ ५ ॥
पृच्छंतमिति साधूंस्तं मुक्तानंदोऽब्रवीन्मुनिः । निर्विकल्पसमाधौ तु स्याज्जितेंद्रियता सताम् ॥
तमुवाच हरिस्तेषामपि सर्वेंद्रियक्रियाः । देहस्मृताविवाज्ञानां मुने संत्येव नान्यथा ॥ ७ ॥
इत्युक्त्वा तं स तत्प्रश्नोत्तरमप्यवदत्स्वयम् । दोषदृष्ट्येंद्रियार्थेषु स्याज्जितेंद्रियता सताम् ॥
अतो विषयनिष्ठा ये दोषास्ते सद्भ्य आदरात् । उत्तमेभ्योऽवगंतव्या मंगल्याश्च गुणा हरेः ॥
विषयाणां मायिकानामुपभोगेन सर्वथा । महन्नरकदुःखं च भावीति ज्ञेयमंजसा ॥ १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्था दुःखप्रदत्वाच्च ज्ञेया एते हि शत्रवः। न प्रीतिः शत्रुषु भवेत्सहवासेऽपि कस्यचित् ॥
वैरिबुद्ध्या च विषयान्सेवेरन्येऽत्यभावतः। यावदर्थं सतां तेषां स्याजितेंद्रियता ध्रुवम् ॥१२॥
कृष्णस्य नवधा भक्त्या तत आयुर्व्ययश्च तैः। कार्यो न स्वज्ञविमुखजीववद्विषयेहया ॥ १३ ॥
इत्युक्त्वा तं हरिः सर्वानपृच्छत्त्यागिनः प्रभुः। त्यागिनो ज्ञानिनः केचिद्भक्ताः संति च केचन
निवृत्तधर्मनिरतास्तत्राऽद्याः संति साधवः। उन्मत्तवद्वर्त्तमाना देहभिन्नात्ममानिनः ॥ १५ ॥
वर्णाश्रमाभिमानेन हीना लोकविलक्षणाः। निःसंगास्ते चैकचरा बध्यंते नैव कुत्रचित् ॥१६॥
अन्ये तु त्यागिनस्त्यक्तगृहपुत्रधना अपि। प्रवृत्तमार्गे वर्त्तंते लोभक्रोधादिकारणे ॥ १७ ॥
तत्संबंधाद्धृदि क्वापि स्याद्विकारोपि कश्चन। अतो न घटते तेषां घटते वाऽत्र वर्त्तनम् ॥१८॥
प्रवृत्ते वर्त्तमानानामपि स्यान्निर्विकारता। केनोपायेन तेषां तद्ब्रूतेति प्रश्नयोस्तु मे ॥ १९ ॥
हर्याज्ञयेति चेत्तर्हि भंगापाने तया कृते। मत्तत्वमिव तद्वृत्त्या तयापि स्याद्विकारिता ॥२०॥
तस्मान्न संमतं ह्येतदुत्तरं तत्त्वदर्शिनाम्। इत्युक्त्वा स्वयमेवाह शुश्रूषूंस्तांस्तदुत्तरम् ॥ २१ ॥
निवृत्तधर्मवंतो ये साधवो जडवर्त्तनाः। केवलं ह्यात्मनिष्ठास्ते भक्तोना भक्तिवर्जिताः ॥२२॥
इतरे त्यागिनो भक्ता ये ते तु यदि सर्वथा। कृष्णोक्तनियमान्नित्यं पालयंतो यथार्थतः ॥२३॥
कृष्णतद्भक्तसंबंधिप्रवृत्तावेव चेद्रताः। भवेयुस्तर्हि तु भवेन्न तेषां हृदि विक्रिया ॥ २४ ॥
सैव भक्तिर्निगदिता स्यान्मुक्तिश्च ततस्तया। तद्भिन्ना तु प्रवृत्तिर्या सा त्वधोगतिकारणम् ॥
ईदृशास्त्यागिभक्तास्तु पूर्वेभ्योऽप्यधिका मताः। यत एषां क्रियाः सर्वाः कृष्णार्था एव संति हि
कृष्णोक्तनियमान्सर्वान्पालयंतो यथातथम्। कृष्णतद्भक्तसेवार्थं प्रवृत्तिमपि चाश्रिताः ॥ २७ ॥
निःस्पृहा निर्विकाराश्च संत्येते त्यागिनो यतः। तत्केवलात्मनिष्ठेभ्यस्तेभ्यस्तान्मन्य उत्तमान् ॥
प्रवृत्तौ वर्त्तमानानां कृष्णार्थं च सतां कृते। हरेः कृपापात्रतां च यातानां सा न बंधकृत् ॥

सद्योगतास्ते मुनयो गृहस्थाः श्रुत्वेति तस्यामृततुल्यवाचम्।
सर्वेऽपि तोषं हृदये समीयुस्ततः प्रणेमुश्च तमात्मनाथम् ॥ ३० ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ सप्तदशाधिकद्विशततमस्तरंगः ॥२१७॥१७॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते। माघशुक्लप्रतिपदि वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालये। संध्यानीराजनस्यांते स न्यषीदत्सदासने ॥ २ ॥
सितवासा वृतोऽनेकैर्नानाभक्तैः स सर्वतः। उवाच महतः साधून्प्रश्नं कुर्वे निशम्यताम् ॥
सत्संगिनां नृणां किं किमवश्यं ज्ञेयमंजसा। इति पृष्ठोत्तरमपि तस्य स स्वयमाह तान् ॥४॥
संप्रदायस्तथाऽभीष्टग्रंथा गृहिसतां वृषाः। इष्टदेवश्चेति सम्यक् बोध्यं सत्संगिपूरुषैः ॥ ५ ॥
तत्राद्यः संप्रदायस्तु स्वगुरूणां परंपरा। गुरुस्तत्रादिमो ज्ञेय उद्धवोऽध्वप्रवर्त्तनात् ॥ ६ ॥
बोध्यः स रामानंदो हि कृष्णार्पितगुरुत्वधूः। स्वामिनस्तस्य च ज्ञेयः साक्षाद्रामानुजो गुरुः ॥
श्रीरंगाख्ये महाक्षेत्रे समाधौ स गुरोस्ततः। प्राप्तवान्वैष्णवीं दीक्षां तस्य शिष्यो भवाम्यहम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अयाऽयोध्याप्रसादे च रघुवीरे सुते स्विका । धर्मवंश्येऽस्ति निहिता गुरुतेति गुरुक्रमः ॥ ९ ॥
ग्रंथास्त्वभीष्टा अष्टौ हि भवंत्युद्धववर्त्मनि । वेदाश्च व्याससूत्राणि श्रीमद्भागवतं तथा ॥१०॥
विष्णुनामसहस्राख्यं स्तोत्रं भगवतोदितम् । गीता विदुरनीतिश्च भारतस्थमिदं त्रयम् ॥ ११ ॥
श्रीवासुदेवमाहात्म्यं तथा स्कंदपुराणगम् । याज्ञवल्क्यस्मृतिश्चेति ग्रंथा अष्टौ प्रकीर्त्तिताः ॥
त्यागिनां च गृहस्थानां धर्मा ये ते पृथक् पृथक् । श्रीवासुदेवमाहात्म्याद्विज्ञातव्या अशेषतः ॥
इष्टदेवस्तु भगवान् श्रीकृष्णो राधिकापतिः । प्रत्यक्षं च परोक्षं च ज्ञेयं रूपं यदस्य तत् ॥१४॥
परोक्षं ब्रह्मधामस्थं गोलोके द्विभुजं सदा । राधया च श्रिया जुष्टं कोटिसूर्यसमद्युति ॥१५॥
श्रीदामानंदप्रमुखैः पार्षदैस्तन्निषेवितम् । स कृष्णोऽनंतकोट्यंडसर्गस्थित्यंतकारकः ॥ १६ ॥
चतुर्भुजं चाष्टभुजं स सहस्रभुजं तथा । धामांतरेषु रूपं स्वं धृत्वाऽऽस्ते च पृथक् पृथक् ॥
वासुदेवादिरूपेण चतुर्व्यूहः स जायते । केशवाद्यात्मना चासौ चतुर्विंशतिधा प्रभुः ॥ १८ ॥
स एव च वराहादीनवतारान्धरातले । दधाति सर्वशास्त्राणां तात्पर्यं चाऽस्ति तत्र वै ॥१९॥
परोक्षं रूपमित्थं हि ज्ञेयं कृष्णस्य तत्त्वतः । प्रत्यक्षं तु नराकारं वर्त्तमानं धरातले ॥ २० ॥
नराकृतेर्भगवतश्चरित्राणि त्वशेषतः । अन्यानि साक्षाद् व्यासेन वर्णितान्यतिभक्तितः ॥२१॥
आचार्येभ्यश्च सर्वेभ्यो व्यास एव महान्मतः । स्वत एव प्रमाणत्वात्तद्वाक्यानां हि वेदवत् ॥
आचार्याः शंकरो रामानुजो मध्वस्तथाऽपरे । निंबार्कविष्णुस्वाम्याद्या भुवि सद्धर्महेतवः ॥
व्यासवाक्यानि जगृहुस्ते प्रमाणतयाऽखिलाः । अतस्तानि प्रमाणानि संति मुख्यतयैव नः ॥
स श्रेयसे नृणामादौ व्यधाद्वेदं चतुर्विधम् । ब्राह्मादीनि पुराणानि भारतं चाकरोत्ततः ॥२५॥
तथाप्यात्यंतिकश्रेयःसाधनं न स्फुटं मया । प्रोक्तमित्यासतापोऽसौ श्रीमद्भागवतं व्यधात् ॥
वेदशास्त्रपुराणानां पंचरात्रस्य चाऽखिलम् । सारमाकृष्य रचितमेतत्तेन रसात्मकम् ॥ २७ ॥
तत्र सर्वावताराणां धर्त्ता कृष्णः स्वयं प्रभुः । अवतारीति गदितः स चास्ति निर्गुणः सदा ॥
स्वनिर्गुणत्वं स्वेनैव श्रीकृष्णेनोद्धवं प्रति । प्रोक्तमेकादशस्कंधे गुणाध्यायेऽस्ति हि स्फुटम् ॥
निर्गुणस्यैव संबंधाद्यस्य भावा गुणात्मकाः । अपि निर्गुणतां यांति ततः कृष्णोऽस्ति निर्गुणः ॥
येन केनापि भावेन कामद्वेषभयादिना । ये प्राप्तास्तस्य संबंधं ते च निर्गुणतां ययुः ॥ ३१ ॥
यद्यसौ निर्गुणो न स्याच्छुद्धसत्त्वात्मको भवेत् । तत्संबंधात्कथं तर्हि निर्गुणा गोपिकादयः ॥
अतो निर्गुण एवासावत्र नास्त्येव संशयः । दिव्यत्वं जन्मकर्मादेः स्वस्याह स्वयमेव सः ॥
जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥
कृष्णेनानेन केभ्यश्चिद्भक्तेभ्यश्च निजेच्छया । रूपांतराण्यद्भुतानि दर्शितानि भवंत्यपि ॥ ३५ ॥
चतुर्भुजं त्वष्टभुजं सहस्रभुजमित्यपि । यथाप्रयोजनं रूपमाविर्भावयति स सः ॥ ३६ ॥
तेषां त्रिविधरूपाणां भेदात्तस्य स्वरूपतः । उपासनाया भेदस्तु शास्त्रोक्तो युक्त एव हि ॥३७॥
एकस्यैव स्वरूपस्य द्विभुजस्यापि केचन । स्थानावस्थावेषभेदाद्विभिन्नोपासनं विदुः ॥ ३८ ॥
न तदस्मन्मतं तस्मात्तन्न ग्राह्यं मुमुक्षुभिः । तथैव तस्याचरणमप्याचर्यं न मच्छ्रितैः ॥ ३९ ॥
स्वधर्मज्ञानवैराग्यभक्तिबोधकराणि च । स्वस्वीयभक्तमाहात्म्यावेदकानि यथार्थतः ॥ ४० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उद्धवं प्रति यान्यस्य यानि स्युश्चार्जुनं प्रति । अन्यान् भक्तान् प्रति च वा वचनानि जगद्गुरोः
तान्येवादरतो भक्तैर्ग्रहीतव्यानि सर्वथा । न त्वस्याचरणं दृष्ट्वा कार्यमाचरणं तथा ॥ ४२ ॥
गोपोच्छिष्टोपयोगं च रासक्रीडादि चास्य यत् । चरित्रं वीक्ष्य तत्तद्वदाचरेद्यः पुमानिह ॥
सदाचारपरिभ्रष्टः स पतेन्निरये ध्रुवम् । तस्मान्मदाश्रितैर्नैवं वृत्यं क्वचन पूरुषैः ॥ ४४ ॥
अशास्त्रीयं लोकगर्ह्यं श्रीकृष्णाचरणं यथा । न ग्राह्यं स्वगुरोर्मेऽपि तथैवाचरणं क्वचित् ॥ ४५ ॥
वाक्यानि त्यागिगृहिणां धर्मादेर्बोधकानि मे । यान्युद्धवपथे तानि पालनीयानि सच्छ्रितैः ॥
वर्त्तिष्यतेऽन्यथा यस्तु स मदीयो न कर्हिचित् । वार्त्तैषां हृदये धार्या सर्वैः कार्या च सर्वतः

पीत्वेति धर्मांगभवस्य वाचं सुधामिव त्यागिगृहस्थसंघाः ।
सर्वेऽपि ते तोषमगुः सदःस्था दधुश्च यत्नेन हृदंबुजे ताम् ॥ ४८ ॥
तमेव कृष्णं च निजेश्वरं ते गुरुं च सम्यग्घृदये विदंतः ।
अनन्यभक्त्या परयैव भेजुर्न गोपमानेश्वरनिश्चयास्तम् ॥ ४९ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधावष्टादशाधिकद्विशततमस्तरंगः ॥ २१८ ॥१८॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । माघशुक्लद्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणालये । प्राग्भाग उपविष्टोऽभूत्स्वासने स सितांशुकः ॥ २ ॥
स्वभक्तैस्त्यागिगृहिभिर्भूरिभिः परितो वृतः । संध्यानीराजनस्यांते स्वीयांस्तान्प्रत्युवाच सः ३॥
जीवानां भारते वर्षे नरदेहोपलंभनम् । यदा भवेत्तदा कश्चिद्यतेत श्रेयसे सुधीः ॥ ४ ॥
साक्षात्कृष्णोऽथ वा तस्य भक्ताः श्रेयस्करा नृणाम् । भवेयुरेव धर्मिष्ठा यत्र कुत्रापि भूतले ॥
शास्त्रोक्तलक्षणैस्तस्य तेषां वा यदि वेदनम् । मुमुक्षोस्तस्य पुंसः स्याद्भक्तः स्यात्तर्हि स प्रभोः ॥
भक्तस्यास्य पदार्थेषु कृष्णभिन्नेषु सर्वथा । प्रीतिर्नैवोचिता क्वापि कृष्णसत्स्वेव सोचिता ॥ ७ ॥
कार्ष्णसौख्यस्य पुरतो मायिकार्थभवं सुखम् । निरयोपममस्तीति न रमेतैव तत्र सः ॥ ८ ॥
नारकाणां कृमीणां तु नरकेपि भवेद्रतिः । मनुष्याणां तु सा तत्र न स्यादेव यथा क्वचित् ॥९॥
तथैवाज्ञानिनामेव मायिकेषु रतिर्भवेत् । भक्तानां तु क्वचिन्नैव तेषु जायेत सा हरेः ॥ १० ॥
भक्तो यः स्यात्स तु हरेर्मत एव हि पार्षदः । अतः स तत्त्वमुत्सृज्य कृमितामाप्नुयात्कुतः ॥
किंच भक्तस्य संकल्पो यदा सत्यो भवेत्तदा । कार्या न मायिकार्थेच्छा तेन कार्यैव सा हरौ ॥
कुसंगेन भवेत्सा च यदि भक्तस्य कुत्रचित् । तर्हि सा महती हानिरविवेको महांश्च सः ॥१३॥
अतो ब्रह्मांडजं सौख्यं काकविष्ठोपमं हृदि । मत्वा कार्या दृढा प्रीतिः कृष्णे सत्सु च नान्यतः ॥

इतीशितुस्तस्य निशम्य वाचं सुधासमांते तु सभोपविष्टाः ।
तदीयभक्ताः सुधियः समस्ताः प्रपेदिरे चेतसि भूरितोषम् ॥ १५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावूनविंशत्यधिकद्विशततमस्तरंगः ॥ २१९ ॥१९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । माघशुक्लतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र वृत्तालयपुरे लक्ष्मीनारायणस्य सः । दुर्गे वेद्यां स्वास्तृतायां निंबाधस्ताद्व्यराजत ॥ २ ॥
सितवासा माध्यपुष्पस्रजं कंठे दधद्वृतः । स्वभक्तनिकरैश्छत्री पप्रच्छ स सतोऽखिलान् ॥३॥
जातो रजोगुणात्कामः क्रोधलोभौ तमोगुणान् । जातौ तेषां त्रयाणां च किमुन्मूलनसाधनम् ॥
तमुवाच शुकानंदो निर्विकल्पो यदा भवेत् । समाधिरात्मवीक्षा च कामाद्युन्मूलनं तदा ॥५॥

श्रीहरिरुवाच

यावत्कालं समाधिः स्यादात्मनो वापि दर्शनम् । प्रतिलोमदशस्तावन्न स्यात्कामादिपीडनम् ॥
समाधिमानपि यदा व्युत्थितः स्यात्तदा त्वमुम् । अर्दयंत्येव कामाद्याः समाधिरहितं यथा ७॥
ब्रह्मश्च शिवसिष्ठाद्याः समाधिनिरता अपि । व्युत्थानकाले कामाद्यैः प्रापुरेव हि विक्रियाम् ८॥
यथा सुषुप्तिश्चाज्ञानां निर्विकारत्वकारणम् । तथा समाधिः सुज्ञानां विशेषो नात्र कश्चन ॥९॥
अतो नैतत्समीचीनमुत्तरं भवता कृतम् । तस्मादन्ये साधवोऽपि विचार्य कथयंतु तत् ॥१०॥
मुक्तानंदादयश्चक्रुस्ततस्ते तद् यथामति । तदप्यसंगतं मत्वा स्वयमेव तदाह तान् ॥ ११ ॥
विवेकज्ञानदार्ढ्यं यज्जनकस्येव भूपतेः । तदेव कामरोषादिबीजोत्खननसाधनम् ॥ १२ ॥
संन्यासिन्या सुलभया मोह्यमानोऽप्यनेकधा । जनको हि पुरा राजा न मुह्यन्नित्थमाह ताम् ॥
गुरोः पंचशिखस्याऽहं कृपया सांख्योगयोः । निष्णातोस्मीति नास्त्येव मोहो मे योगिनि क्वचित्
चंदनेनार्चयेद्योऽगं ममार्द्धं यस्तथाऽसिना । अर्द्धं छिंद्याच्च तौ तुल्यौ भवतो म उभावपि ॥१५॥
मिथिलायाः समग्राया दाहेऽपि मम किंचन । नास्ति दग्धव्यमित्येव निश्चयो मेऽस्ति सर्वदा ॥
असंगी निर्विकारोऽस्मि प्रवृत्त्यध्वस्थितोऽप्यहम् । श्रुत्वेति तस्य वचनं विस्मिता साऽगमत्ततः ॥
अतस्तस्येव यस्य स्याज्ज्ञानदार्ढ्यं स एव हि । प्रवृत्तौ वर्त्तमानोऽपि नेयात्कामादिविक्रियाम् ॥
तच्च ज्ञानं समासेन कथयामि निशम्यताम् । एक एव हरिः सारोऽसारोऽन्यस्तु ततोऽखिलम्
कृष्णाकारं विहायैकं मायिकाकृतयोऽखिलाः । दुःखदा नाशवत्यश्च भवंतीत्येव वेदनम् ॥२०॥
देहत्रयपृथक्सत्तारूप आत्मैव केवलम् । हरिदासोऽहमस्मीति वेदनं ज्ञानमुत्तमम् ॥ २१ ॥
एतज्ज्ञानवतः पुंसः प्रवृत्त्यध्वन्यपि क्वचित् । कामादिविक्रिया नैव हृदि स्यादिति निश्चितम् ॥
ज्ञानी स एव सर्वेभ्यो भक्तेभ्यः श्रेष्ठ उच्यते । त्यागी सोऽस्त्वथवा गेही न विशेषोऽत्र कश्चन ।
एषो पि क्वापि देशादेः संबंधादसतः पतेत् । स्वस्थितेः संत एवाऽतः सेव्या देशादयोऽखिलैः ॥
ब्रह्मादेर्विक्रिया याऽभूत्कारणं तत्र च क्वचित् । असद्देशादिसेवाऽस्ति क्वचिज्ज्ञानाद्यपक्वता २५॥

वाक्यामृतं तस्य विभोस्त इत्थमापीय संतो निखिलास्तथाऽन्ये ।
गृहस्थभक्ता अपि तत्सदःस्थाः संतोषमापुस्तमथ प्रणेमुः ॥ २६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ विंशत्यधिकद्विशततमस्तरंगः ॥ २२० ॥ २० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणाय नमो नमः

श्रीनगरे

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । एकादश्यां तपःकृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र श्रीनगरे स्वामी नरनारायणालयात् । प्रत्यङ्मुख उदग्वेद्यां निषसाद सितांबरः ॥ २ ॥
स्रजश्च स्थलपद्मानां बह्वीः कंठे दधच्छुभाः । तेषां चोष्णीष आपीडान्कर्णयोश्चावतंसकौ ३ ॥
नानादेशागतैर्भक्तैस्त्यागिभिर्गृहिभिश्च सः । वृत्तांतदृष्टिरभवन्मुहूर्त्तं व्युत्थितस्ततः ॥ ४ ॥
विलोकयन्नसौ भक्तान् करुणापूर्णया दृशा । प्रोवाच वो ध्यानयोगं वच्म्येकतममिष्टदम् ५ ॥
मोक्षधर्मेषु कथितं गांगेयेनैव भारते । महद्भिरनुभूतं च मयापि परमाद्भुतम् ॥ ६ ॥
स्वाभाविकश्चमत्कारः सिद्धमंत्रौषधादिषु । यथाऽस्ति तद्वदत्रापि सोऽस्ति तं श्रृणुतादरात् ७ ॥
स्वस्तिकासनमासीन ऋजुकायो रहःस्थले । ध्याताऽऽदौ दक्षिणे नेत्रे ध्यायेद्भास्करमंजसा ८ ॥
ध्यायेद्वामेऽक्षिण चंद्रं च यथाशक्त्यन्वहं मुहुः । एवमभ्यसतुः पुंसस्तौ सा[illegible]वतस्तयोः ९ ॥
दक्षे नेत्रे तदा तापो वामे शैत्यं च जायते । तदा तौ वैपरीत्येन तयोर्ध्यायेदनाकुलः ॥ १० ॥
ततस्तौ हृदयाकाशे पश्येदंतर्दृशा चिरम् । आत्मज्योतिश्च तत्रैव पश्येत्तत्स्थं च साक्षिणम् ॥
एवं समभ्यसन् ध्यानं योगी स्वहृदि वीक्षते । घटीयंत्रमिव भ्राम्यल्लिंगदेहमपि ध्रुवम् १२ ॥
ततश्चाल्पेन कालेन विश्वरूपमपि प्रभोः । स वीक्षतेऽथ तत्रस्थांल्लोकानपि चतुर्दश ॥ १३ ॥
विराड्रूपमपि ह्येतत् स नातिमहदीक्षते । अल्पेऽपि तत्र लोकांस्तु सावकाशं समीक्षते १४ ॥
वटपत्रे शयानस्य तुंदे बालाकृतेर्हरेः । मार्कंडेयो यथाद्राक्षीत्तथैषोऽप्यखिलं जगत् ॥ १५ ॥
एवं संपश्यतो ध्यातुर्मुमुक्षोर्हृत्स्थसंशयाः । नश्यंति कृष्णविषयाः सर्वे नास्तिकता तथा १६ ॥
ऐश्वर्यं शास्त्रगदितं स च वेत्ति कृतं हरेः । जीवोपि तस्यातिबली भवत्यैश्वर्यसंयतः ॥ १७ ॥
यावत्प्रकाशः सूर्येन्द्वोर्ब्रह्मांडेऽत्र प्रवर्त्तते । जायते तावदस्यापि चक्षुर्वृत्तेः प्रवर्त्तनम् ॥ १८ ॥
सिद्धयोऽष्टाणिमाद्यास्तमुपतिष्ठंत आदृताः । स तु भक्त्यंतरायत्वान्न गृह्णाति हृदापि ताः १९ ॥
ततः सिद्धदशां याति स नारदशुकादिवत् । ईदृक्फलप्रदं ह्येतद् ध्यानमस्तीति बुद्ध्यताम् ॥
मुक्तानंदोऽथ पप्रच्छ तमेतद् ध्यानमुत्तमम् । श्रुतं त्वयोदितं स्वामिन्सकलार्थप्रसाधकम् ॥२१॥
इदं यमादियोगांगसाधकस्यैव सिध्यति । किं वेतरस्य पुंसोपीत्युक्तस्तं हरिरब्रवीत् ॥ २२ ॥
श्रीकृष्णानन्यभक्तस्य ध्यातुरेतत्तु सिध्यति । अन्यस्य तु न कस्यापि यमाद्यंगवतोऽपि हि २३ ॥

इति तस्य तु वाक्यमुत्तमं सुधया संमितमादरेण ।
अपरे च निशम्य साधवः प्रभुभक्ताः परमां मुदं ययुः ॥ २४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकविंशत्यधिकद्विशततमस्तरंगः ॥ २२१ ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । तपस्यशुक्लैकादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र श्रीनगरे स्वामी नरनारायणालयात् । उदग्वेद्यां निषण्णोऽभूत्स्वास्तृते पट्टकासने ॥ २ ॥
सितं वासः परिदधच्चोत्तरीयं सितं दधत् । पाटलं पटकं शीर्ष्णि धारयन्सस्मिताननः ॥ ३ ॥
हारांश्च स्थलपद्मानामवतंसौ च शेखरान् । दधत्केयूरकटकान्वृतोऽनेकैर्निजाश्रितैः ॥ ४ ॥
उवाच स सतः प्रीतः किंचित्पृच्छामि साधवः । तस्योत्तरं विचार्यैव यूयं कुरुत चेतसि ॥ ५ ॥
एको भक्तो जाग्रदाद्यास्तिस्रोऽवस्था व्यतीत्य च । ब्रह्मात्मैकत्वमास्थाय वर्त्तमानो भवेदिह ६ ॥
शुद्धसत्वं चाश्रितः स्याद्धित्वा मिश्रगुणत्रयम् । भजेन्नारायणं भक्त्या पालयन्धर्ममात्मनः ७ ॥
एकस्त्ववस्थात्रितये मलिने च गुणत्रये । वर्त्तमानोप्यतिप्रीतियुक्तः स्यात्परमेश्वरे ॥ ८ ॥
एतयोरुभयोर्मध्ये श्रेष्ठः कतर उच्यताम् । अथोचुः साधवः सर्वे श्रेष्ठोऽतिप्रीतिमान् हरौ ९ ॥
तानुवाच ततः स्वामी स्नात्वैकः शुचिरर्चयेत् । कृष्णं चैकोऽशुचिद्रव्यलिप्तांगो मलिनोऽर्चयेत्
एतयोः कतरः श्रेष्ठस्तदोचुः साधवश्च तम् । शुचिः श्रेष्ठोऽर्चक इति ततः स्वामी जगाद तान् ॥
एवं चेत्तर्हि पूर्वस्य प्रश्नस्योक्तं यदुत्तरम् । भवद्भिः खंडनं तस्य जातमेव भवद्गिरा ॥ १२ ॥
भक्तं त्वमायिकोपाधिं भवंतो मन्वतेऽवरम् । श्रेष्ठं च मायिकोपाधिमतिप्रीतियुतं हरौ १३ ॥
कथमेतदिति पृष्टाः संतस्ते तु तदुत्तरम् । कर्तुं नैवाऽशकंस्तर्हि स्वयमूचे स सद्गुरुः ॥ १४ ॥
चतुर्विधा भजंते मामिति कृष्णेन भाषितम् । गीतायां तत्र हि ज्ञानी भक्तः स्वात्मेति कीर्त्तितम्
मायिकोपाधिहीनोऽतो ब्रह्मीभूतो ह्यवासनः । भक्तोऽतिश्रेष्ठ इत्येव भवद्भिरवगम्यताम् १६ ॥
चतुर्विधो हि प्रलयः प्रोक्तो भागवतादिषु । नित्यो नैमित्तिकः संतः प्राकृतात्यंतिकौ तथा ॥
सुषुप्तिश्चाऽस्य जीवस्य नित्योऽथ ब्रह्मणश्च सा । नैमित्तिकः प्राकृतिकः प्रकृतौ प्राकृतात्ययः ॥
ज्ञानेन मायिकोपाधिलयश्चात्यंतिको मतः । एषां त्रिषु विलीनास्तु प्रयांति पुनरुद्भवम् १९ ॥
आत्यंतिके लये लीनमायिकोपाधयस्तु ये । आत्मना न पुनस्तेषां संबंधो जायते क्वचित् २० ॥
ब्रह्मीभूताश्च दिव्यांगाः सर्गकालेऽपि ते हरेः । भक्ता नैव प्रजायंते कालमायाक्रियावशात् ॥
स्वातंत्र्येण तु भक्तास्ते भगवानिव कर्हिचित् । आविर्भवंति लोकेषु तदाज्ञातोऽज्ञमुक्तये २२ ॥
अत एव ब्रह्मरूपाज्ज्ञानिनो ये रमापतिम् । भजेयुस्ते मताः श्रेष्ठा मयेति हृदि गम्यताम् ॥
अनन्यभक्तैः कृष्णस्य वार्त्तेयं त्ववधारितुम् । शक्या न त्वखिलैः पुंभिरिति जानीत सत्तमाः ॥

श्रुत्वेति पीयूषसमानवाचं सर्वेऽपि ते प्रेमवतीसुतस्य ।
मुदं परां साधुजनाः सदःस्थाः प्रपेदिरेऽन्ये गृहिणश्च भक्ताः ॥ २५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्वाविंशत्यधिकद्विशततमस्तरंगः ॥ २२२ ॥ ॥२॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । तपस्यांत्यद्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र श्रीनगरे स्वामी नरनारायणालयात् । उदग्वेद्यां निषण्णोऽभून्मंचे भक्तगणैर्वृतः ॥ २ ॥
वलक्षपरिधानश्च पाटलोष्णीषमंडितः । सितप्रावारवसनः कुंदपुष्पस्रगर्चितः ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थलपद्मकृतापीडो वीक्षमाणो दृशा निजान् । स्वयमेव सतोऽप्राक्षीत्सर्वज्ञोऽपि स लीलया ॥
सर्वेऽपि जीवा विषयान्सेवंते पंच सर्वदा । न तान्विना क्षणमपि स्थातुं शक्ता इतीक्ष्यते ५ ॥
शब्दादीस्ते यदा पंच नाप्नुवंति बहिस्तदा । निजांतःकरणे तेषां कुर्वते चिंतनं मुहुः ॥ ६ ॥
केचित्त्यक्त्वा बहिस्तांस्तु चिंतयंति निजांतरे । सर्वथा तु न तत्त्यागे क्षमंते पंडिता अपि ७ ॥
एवैव विषयासक्तिः संसृतेः कारणं नृणाम् । सर्वेषां दृश्यते संतो दुःखदायाः पुनः पुनः ८ ॥
पंचस्वेकतमेऽपि स्यान्न च सर्वेषु चेद्रतिः । तथापि सापि कुर्यात्तु संसृतिं नात्र संशयः ९ ॥
विशुष्कभूरिमूलस्य वटवृक्षस्य कुत्रचित् । यद्येकतममप्यार्द्रमवशिष्येत मूलकम् ॥ १० ॥
तदप्यस्य पुनारोहकारणं जायते यथा । तथैकविषयासक्तिरपि संसृतिकारणम् ॥ ११ ॥
एवं सति कथं सर्वविषयासक्तिरंजसा । न स्याद्भक्तस्य हृदये तद्यूयं वक्तुमर्हथ ॥ १२ ॥
इति पृष्टाः साधवस्ते यदा सम्यक्तदुत्तरम् । कर्तुं विदुर्न वै तर्हि तदाह स्वयमेव तान् ॥१३॥
यदा मुमुक्षुर्हित्वैव स्वदेहत्रयभावनाम् । सच्चिद्रूपात्मना साक्षाच्चिंतयेत्कृष्णमंतरे ॥ १४ ॥
तदा तद्बलतस्तस्य वर्त्ततोपशमो हृदि । सति तस्मिंस्तु विषयाः प्रवेष्टुं नांतरे क्षमाः ॥१५ ॥
दृष्टाः श्रुता वा ये पूर्वं तेऽपि यांत्येव विस्मृतिम् । सर्वेऽपि विषया बुद्धौ प्राग्जन्मश्रुतदृष्टवत् ॥
कामिनोऽत्र यथा यूनः संप्राप्तस्य प्रजागरम् । अध्वश्रांतस्य सुदृढं सुप्तस्यांतिके स्त्रियाः ॥१७॥
तस्याः स्याद्विस्मृतिः पंचविषयाणां च सर्वथा । तथोपशममाप्तस्य तेषामस्त्यपि जाग्रति ॥१८॥
सुषुप्त्युपशमेऽप्येवं विस्मृतिः स्यात्तमोमये । विषयाणां किमुत तज्ज्ञानोपशमवर्त्तने ॥ १९ ॥
एवं हि विषयासक्तिर्नष्टोपशमतो यदा । कृष्णध्यानोपलब्धा स्यान्न तदा संसृतिस्तया ॥ २० ॥
इति श्रुत्वोत्तरं सम्यक् ते प्रश्नस्य ययुर्मुदम् । साधवोऽथ तमप्राक्षीन्नित्यानंदो महामुनिः २१॥
दुष्करत्वात्त्वयोक्तस्य त्वद्ध्यानस्य तु सर्वथा । तद्धेतोः सुकरोपायो हरे तस्यास्ति वा न वा २२॥
अस्ति चेद्विषयासक्तिहृतस्तस्य स तर्हि तम् । मह्यं ब्रूहीति पृष्टोऽसौ तं प्रोवाच जगद्गुरुः २३॥
कृष्णस्य च तदीयानां बुध्वा माहात्म्यमंजसा । श्रद्धया तान् परिचरेद्यः स तं प्राप्नुयाद् ध्रुवम्
निरताः परिचर्यायां संतः संत्यत्र केचन । तेषामप्यतिनिर्मानः कश्चिद्देव भवेत्पुमान् ॥ २५ ॥
कृष्णभक्तः स एवेमं लभेतोपशमं खलु । न तु सर्वेऽपि तं यायुः परिचर्यापरा अपि ॥ २६ ॥
स्वामिने रोचते नैव मानः खल्वात्मसेविनः । गृह्णाति विमनाः सेवामापत्काले कदन्नवत् २७॥
प्रसन्नताऽस्ति निर्माने सेवके यादृशी सदा । न तादृशी समाने हि तां विना तं स नाप्नुयात् ॥
अथाऽपृच्छच्छुकमुनिस्तं प्रणम्य महाप्रभो । मानत्यागो मुमुक्षोः स्यात्सविवेकमनीषया ॥२९॥
तेन स्वामी प्रसन्नः स्या इति युक्तं त्वयोदितम् । सा स्यान्न यस्य धीस्तस्मिंस्त्वं प्रसन्नः कथं भवेः
तमुवाच हरिः साधो कल्याणेच्छा भवेद् दृढम् । यस्य तस्मिन्सेवके तु प्रीयंते हरितज्जनाः ॥
विना विवेकधिषणामेकयापि मुमुक्षया । विशुद्धभावैकदृशः प्रसीदंति स तज्जनाः ॥ ३२ ॥
मुकुंदो रत्नजिच्चोभाविमौ भक्तौ सदःस्थितौ । दृष्टांतत्वेन विज्ञेयावत्रेमौ यत्तथाविधौ ॥३३॥
किंच सांप्रतमत्रैते त्वयोध्यावासिनो द्विजाः । रामप्रतापप्रमुखाः संति सर्वेऽपि तादृशाः ३४॥
प्रसादयितुमेते हि यथाकृष्णं विदुस्तथा । नान्ये केचन जानंति बुद्धिमंतोऽपि साधवः ॥३५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतिविश्वासिनो ह्येते शुद्धांतःकरणास्तथा । निश्छद्मवर्त्तनाः संति कृष्णतद्भक्तसेवने ॥ ३६ ॥
तस्माद्यस्य मुमुक्षा स्याद् दृढं स तु पुमान्मुने । अल्पधीरपि हित्वैव मानं सेवेत सात्वतान् ३७॥

पीत्वा वचोऽमृतमिति प्रभुवक्त्रपद्मनिर्यातमाप स मुनिर्भृशमेव तोषम् ।
संतोऽपरेऽपि सकलाश्च सदोनिषण्णा आपुर्गृहस्थपुरुषाश्च तदीयभक्ताः ॥ ३८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रयोविंशत्यधिकशततमस्तरंगः ॥ २२३ ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणा नमो नमः

दुर्गपुरे

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । एकादश्यां राधकृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः । वासुदेवालयस्याग्रे स न्यषीदद्वरासने ॥ २ ॥
सन्मल्लिकासुमनसां हारशेखरदोःस्रजः । यथास्थानं दधच्छ्वेतवासा भक्तगणावृतः ॥ ३ ॥
स पप्रच्छ सतो भक्तिः केनोपायेन कर्हिचित् । असतो देशकालादेर्योगेऽपि नाप्नुयात्क्षतिम् ४॥
ततस्तदुत्तरं कर्तुमशक्तांस्तांस्तदाह सः । आत्मज्ञानेन वैराग्ययुजा क्वापि न तत्क्षतिः ॥ ५ ॥
विना विरक्तिं भक्तस्य मायिकेऽर्थेऽपि नश्वरे । प्रीतिर्भगवतीव स्यात्ततः पातः सदध्वनः ॥ ६ ॥
आत्मज्ञानं विना दैह्यं सुखं दुःखं यदाऽऽपतेत् । भक्तोऽपि हर्षशोकाभ्यां तदा विह्वलतामियात्
ततस्तदुभयेनैव भक्तिर्निर्विघ्नतामियात् । एतदेव ततो भक्तः साधनं द्रढयेद्द्विया ॥ ८ ॥
विरक्त्या भगवन्मूर्त्तीतराकाराश्च सर्वशः । क्रियंते मायिका मिथ्या न स्यात्तेषु ततो रुचिः ९॥
तथैवात्मावबोधेन सुखं दुःखं च मायिकम् । भवेद्भक्तस्य मिथ्यैव स्यान्न विह्वलता ततः १०॥
एतद् द्वयं विना यस्तु निर्विकल्पसमाधिमान् । सोऽपि व्युत्थानकाले स्याद्प्राकृतार्थरुचिः किल
अथ ये भगवद्भक्तास्तेषामंगे उभे मते । ज्ञानं प्रीतिश्चेति ते तु कर्त्तव्ये सुदृढे च तैः ॥ १२ ॥
ज्ञानांगं तु भवेद्येषां माहात्म्यातिशयं हरेः । विदुस्तेऽथ क्षणमपि प्रीत्यंगाः स्युर्न तं विना १३॥
हेमंतसिंहभूपाद्यास्तत्राद्यांगा अमी स्थिताः । सच्चिदानंदमुख्याश्च द्वितीयांगा भवंत्यमी ॥१४ ॥
ज्ञानांगाश्च विदुः कृष्णं नियंतारं हि देहिनाम् । स्वेच्छया कर्म कुर्वंतं सर्वं न त्वन्यशिक्षया ॥
ये त्वेतदन्यथा स्वांते विदुस्तेषां रमापतेः । स्वरूपवेदनं सम्यङ् नास्त्येवेत्यवगम्यताम् ॥१६ ॥
येषां प्रीतिर्भवेत्कृष्णे ते तु तस्य नृनाटने । गृह्णीयुर्नाऽगुणं क्वापि विद्युल्लीलां च तस्य ताम् ॥
लोकेपि स्वार्थसिद्धिः स्याद्यस्मात्तस्यागुणं पुमान् । न गृह्णाति यतस्तस्मिन् प्रीतिर्जाताऽस्ति कार्यतः
तर्हि संसृतिविच्छेदस्वार्थसिद्धिर्यतः प्रभोः । तस्य भक्तोऽगुणं कोऽपि गृह्णीयात् प्रीतिमान्कथम्
यस्यैतयोरेकतममंगं स्यान्न दृढं स तु । भक्तः क्षणिकधीर्बालोपमो ज्ञेयो न तूत्तमः ॥ २० ॥
वार्त्तामेतावतीं स्वामी दिवा चक्रे ततोऽगमत् । स्वावासं च पुनः सायमुत्तमस्य महीभृतः ॥
प्राग्द्वारालयवेदिस्थमंचासन उपाविशत् । वृतः स त्यागिगृहिभिः प्रसन्नास्यः सितांबरः ॥२२॥
कुंदपुष्पस्रजं कंठे दधच्छृण्वंश्च साधुभिः । सवाद्यं गीयमानानि सत्पद्यानि स आह तान् २३॥
मयास्ति लिखिता शिक्षापत्री तस्या दिने दिने । पाठः कार्योऽखिलैः सद्भिर्गृहिभिर्वर्णिभिस्तथा॥
पाठाशक्तौ तु सा श्रव्या तदयोगे तु पूजनम् । तस्याः कर्त्तव्यमित्याज्ञा सर्वान्प्रत्यस्ति मच्छ्रितान्
त्रिषु चैतेष्वेकतमं यदि न स्यात् क्वचित्तदा । उपवासो विधातव्यो दिनमेकं मदाश्रितैः ॥२६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्येतस्य वचोऽमृतं मुनिजना भक्तास्तथैवापरे सर्वेऽपि श्रुतिभिर्निपीय परमं तोषं सदःस्था ययुः धृत्वाज्ञां च शिरोभिरूचुरथ तं सर्वे वयं सादरं स्वामिन्प्रत्यहमेवमेव हि विधास्यामस्त्वदीया इति

ततः प्रसन्नो नितरां स ईशः प्रीत्या सतस्तान् परिषस्वजेऽथ ।
गृहस्थभक्तान्निजपादपद्मनिधानतस्तोषयति स हृत्सु ॥ २८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ चतुर्विंशत्यधिकद्विशततमस्तरंगः ॥ २२४ ॥३६॥

शकाब्दे विक्रमार्कस्य नेत्राष्टवसुभूमिते । षष्ठ्यां वलक्षे ज्येष्ठस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स भूभुजः । वासुदेवालयस्याग्रे पीठोत्तम उपाविशत् ॥ २ ॥
सितांबरः सितोष्णीषे मल्लिकापुष्पशेखरम् । दधत्परिवृतो भक्तैस्त्यागिभिर्गृहिभिस्तथा ॥ ३ ॥
तानुवाच सर्वेऽपि जानंत्येव हि मानवाः । जगतोऽस्य क्षयिष्णुत्वं नित्यतामात्मनस्तथा ॥ ४ ॥
जीवानां पारतंत्र्यं च स्वतंत्रत्वं परात्मनः । सर्वथा सुखसिंधुत्वं तस्यैव च विदंति ते ॥ ५ ॥
तथापि तेषां हृदये प्राधान्यं जगतः सदा । कथमस्त्यथ तच्चित्तं कुतो न लगतीश्वरे ॥ ६ ॥
मुक्तानंदस्तमूचेऽथ विरक्तेर्दृढता हृदि । तेषां नास्तीति तच्चित्तं तुच्छार्थेष्वपि सजते ॥ ७ ॥
तमुवाच हरिः साधो सत्यमेतत्त्वयोच्यते । अन्यदप्यत्र भवति कारणं तन्निशामय ॥ ८ ॥
यदा सत्संगतः पुंसां भवतीश्वरनिश्चयः । तदैव बध्यते यादृगंगं तत्सर्वदा भवेत् ॥ ९ ॥
कस्यचिरवात्मनिष्ठांगं दास्यांगं कस्यचित्तथा । बध्यते कस्यचित् पातिव्रत्यांगं पुरुषस्य हि ॥१०॥
प्रत्यहं क्रियमाणेन सत्संगेन तदेव हि । पुष्टिमेति न तु क्वापि परिवृत्तिं तदाप्नुयात् ॥ ११ ॥
यदांगं बध्यते पुंसां तदा विभ्रांतवन्मनः । कामक्रोधादिभिरिव व्याकुलत्वमुपैति च ॥ १२ ॥
तस्मिन्काले यादृशं तद्बद्धं स्यात्तादृशं सदा । तिष्ठतीति तदेवांगं पर्यालोच्यं स्वमंजसा १३॥
तस्मिन्नपक्वे तु भवेच्छ्रीकृष्णेतरवस्तुनि । प्रीतिः पुंसोऽपि विदुषो न तु कृष्णे दृढा भवेत् १४॥
अतो विवेकिभिः पुंभिः स्वांगपक्वत्वसिद्धये । विशोध्यते प्रयत्नेन विचारेण महीयसा ॥१५॥
पक्वांगस्यापि देशादेर्वैषम्याद्यदि कुत्रचित् । विक्षेपेण भवेत्प्रीतिः कृष्णादन्यत्र वस्तुनि ॥१६॥
तदा तेनापि तां ज्ञात्वा विचार्य स्वांग एव हि । स्थेयं तदनुवृत्त्याऽस्य भवेत्स्वास्थ्यं न चान्यथा
सुरूपस्वस्रमात्रादिवीक्षायां क्वचिदात्मनि । दुःसंकल्पोदये यादृगनुतापस्तु जायते ॥ १८ ॥
तादृक्सत्संगिनां पुंसां कृष्णान्यार्थानुषज्जने । अपेक्षितोऽनुतापोऽस्ति सत्संगो हीयतेऽन्यथा १९॥
सर्वसाधनतः श्रैष्ठ्यं सत्संगस्य हरिः स्वयम् । प्राह भागवतस्यैकादशस्कंधे स्वमुद्धवम् ॥२०॥
न रोधयति मां योगो न सांख्यं धर्म एव च । न स्वाध्यायस्तपस्त्यागो नेष्टापूर्त्तं न दक्षिणा ॥
व्रतानि यज्ञच्छंदांसि तीर्थानि नियमा यमाः । यथावरुंद्धे सत्संगः सर्वसंगापहो हि माम् २२॥
एवं दुर्लभसत्संगे नष्टे नष्टं न किं नृणाम् । अत एवातियत्नेन कर्त्तव्यं तस्य रक्षणम् ॥२३॥
प्राक्संस्कारवतां पुंसामपि संस्कारसंभवः । सत्संगादेव जातोऽस्ति तथाऽद्य च स जायते २४॥
एवं सत्संगमाहात्म्यं ये सम्यङ्न विदुर्नराः । तेषां बुद्धौ तु जाड्यस्याधिक्यमस्तीति गम्यते ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्वेतद्वीपे च वैकुंठे गोलोके बदरीवने । यादृश्यस्ति सभा तस्या अप्येषास्त्यधिका सभा ॥२६॥
अतितेजस्विनो भक्तान्सर्वान्वीक्ष इमानहम् । अत्र नास्त्येव संदेहो यथा दृष्टं ब्रवीमि यत् ॥२७॥
स्थित्वापि संग एतेषां येषां साक्षाद्धरौ न हि । प्रीतिः सम्यग्भवेत्तत्र हेतुरन्योऽपि विद्यते २८॥
तेषां प्रतीतिर्हृदये परोक्षे वर्त्तते यथा । दृढा तथा न प्रत्यक्षे कृष्णे साऽस्तीति कारणम् ॥२९॥
भक्तिः परोक्षदेवे स्याद्यादृशी स्वगुरौ हरौ । प्रत्यक्षेऽपि विधातव्या तादृश्येवेति वेदवाक् ॥३०॥
अत ईदृक्सतां संगाद्येषां साक्षाद्धराविह । प्रीतिः सर्वाधिका स्यात्ते ज्ञानिमुक्ता इतीयताम् ॥
परं पदं यद्देहांते प्राप्यं तत्त इहैव हि । देहे सत्येव संप्राप्ताः कृतार्थाश्च ततो मताः ॥ ३२ ॥
स्थूलेव भासमानाऽपि वार्त्तैषा नास्ति तादृशी । कुशाग्रबुद्धिभिः सद्भिरतिसूक्ष्मेति बुध्यते ॥

निशम्य तस्येति वचः सदःस्थाः सुधोपमेयं स मुनिस्तथाऽन्ये ।
सर्वेऽपि संतो गृहिणश्च भक्ताः प्रपेदिरेंतःकरणे प्रमोदम् ॥ ३४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पञ्चविंशत्यधिकद्विशततमस्तरंगः ॥ २२५ ॥२॥

शकाब्दे विक्रमार्कस्य गुणाष्टवसुभूमिते । शुचिकृष्णप्रतिपदि वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स भूभुजः । भक्त्या हरजिता नीतो भक्तेनात्मनिकेतनम् ॥ २ ॥
पीठोत्तमे तत्र तेन निषण्णः कारिते शुभे । तेन चाऽभ्यर्चितः प्रीत्या सद्गंधकुसुमादिभिः ॥
पौष्पस्रग्वलयापीडः सद्भिश्च गृहिभिर्नरैः । परीतः सितवस्त्रोऽसौ स्वाग्रस्थानवदत्सतः ॥४॥
स्नेहो दया च हृदये भवेतां हरिसेविनाम् । तत्र पृच्छामि मुनयः किंचिद्वस्तन्निशम्यताम् ॥५॥
स्नेहोऽस्ति मधुना तुल्यो यत्र तत्र स सज्जति । दुःखिते प्राणिमात्रे च भक्तानां जायते दया ॥
यथार्षभस्य कृपणे मृगबालेऽभवद्दया । ततः स्नेहोऽभवत्तेन मृगतामेव सोऽप्यगात् ॥ ७ ॥
अतः स्नेहं दयां चोभे आत्मज्ञानेन सद्धियः । अपाकुर्वंति हृदयाद्वैराग्येण च भूयसा ॥ ८ ॥
आत्मज्ञानेन चैतन्यादन्यत्किंचिन्न शिष्यते । नामरूपे नाशवती विरक्त्या भवतोऽखिले ॥९॥
देहत्रयं जायते च नष्टप्रायं ततः स्वकम् । सर्वोपाधिविनिर्मुक्तं सन्मात्रं ब्रह्म शिष्यते ॥ १० ॥
एवं स्थितिजुषां कृष्णे तद्भक्तेषु च साधुषु । दयास्नेहौ भवेतां वा न भवेतां ब्रुवंतु तत् ॥११॥
इति पृष्टास्तेन संतो यदा कर्तुं तदुत्तरम् । नाशकंस्तर्हि स प्रीत्या स्वयमेव तदाह तान् ॥१२॥
गुणावस्था शरीराणामात्मा त्रितयतः पृथक् । ज्ञानवैराग्यवेगेन भास्यते नान्यदण्वपि ॥१३॥
गुणादीनामुपाधीनामस्य तेन लये सति । आत्मा ब्रह्मत्वमाप्नोति तदान्यन्नावशिष्यते ॥१४॥
अस्मिंस्तु समये यस्य साक्षात्कृष्णस्य निश्चयः । माहात्म्यज्ञानयुक्तः स्यात्पूर्वाभ्यस्तः सदागतः ॥
ब्रह्मीभूतस्यापि तस्य कृष्णे कार्ष्णेषु चानिशम् । वर्त्तेयातां दयास्नेहावितरेषां तु न क्वचित् ॥
दयार्द्रकृष्णतद्भक्तसंगवासनयाऽस्य हृत् । वासितं भवतीत्यस्य निर्विघ्ने स्तो दयारती ॥ १७ ॥
ब्रह्मीभूतस्यापि पुंसः कृष्णे भक्तिर्भवेत्परा । तद्भक्तेषु च सौहार्दमिति गीतादिषूदितम् ॥१८॥
ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥१९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया । गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥
आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे । कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥२१॥
हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः । अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥ २२ ॥
कृष्णभक्त्या विरहितो यस्तु ज्ञानविरागयोः । अभ्यासान्मायिकोपाधिं हित्वा तिष्ठेत्सदात्मना
तस्य पुंसस्तु न क्वापि कृष्णे वा तस्य साधुषु । दया प्रीतिर्वापि भवेन्निर्दयोऽस्य गुरुर्यतः ॥२४॥
तस्य साधनकाले हि केवलात्मविदो गुरोः । संगो जातः स दुःसंग एवेत्यस्ति सतां मतम् २५ ॥
तद्वासनावासितेऽस्यतु कृष्णतत्सत्सु मानसे । दयाप्रीत्युदयो न स्यात्सर्वं मिथ्येति वेदनात् २६॥
हरेर्दयानिधेः संगो जातः स्याद्वापि तत्सताम् । यस्य तस्य तु भक्तश्च स्यातां ते ब्रह्मरूपिणः ॥

इति धर्मसुतस्य सद्गिरं मुनयस्ते निखिलाः सुधोपमाम् ।
गृहिणश्च निशम्य लेभिरे हृदि तोषं परमं सदोगताः ॥ २८ ॥
भक्तेन तेनाऽथ समर्चितोऽसौ वृतः स्वकीयैः पुनरात्मवासम् ।
दुर्गे नरेशस्य समेत्य तत्र मंचासने साधु विराजते स्म ॥ २९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ षड्विंशत्यधिकशततमस्तरंगः ॥ २२६ ॥ ३ ॥

शकाब्दे विक्रमार्कस्य गुणाष्टवसुभूमिते । नभःशुक्लतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स भूभुजः । स्वावासे स्वासनेऽराजत्सितवासा उदङ्मुखः ॥ २ ॥
वृतः स्वभक्तनिकरैर्नानादेशेभ्य आगतैः । उपविष्टान्स्वपुरतः प्रोवाच स सतः प्रभुः ॥ ३ ॥
ज्ञानवैराग्यवेगेन मायिकार्थेषु सर्वथा । अप्रीतस्यापि भक्तस्य कृष्ण एव रतस्य च ॥ ४ ॥
यावन्न स्यान्निर्विकल्पः समाधिस्तावदेव तु । तदंतरे बाधितानुवृत्तिः शिष्यत एव हि ॥ ५ ॥
असत्तया निश्चितेषु स्त्रीपुत्रद्रविणादिषु । अपि प्रीतिः क्वचिन्मा भूदिति तद्भीर्भवेत्तया ॥ ६ ॥
स्वहतेभ्योऽपि शत्रुभ्यः स्वप्नदृष्टेभ्य एव वा । शूरस्यापि क्वचिद्भीतिर्भवेद्यद्वत्तथा तया ॥ ७ ॥
मायिकानां पदार्थानां बुद्धानामप्यसत्तया । क्वचित्स्मृतेरपि भयं तया भवति तस्य च ॥ ८ ॥
निर्विकल्पसमाधिः स्याद्यस्य पुंसोऽत्र तस्य तु । सा विनष्टा भवेन्नूनमतोऽस्ति तदपेक्षणम् ९ ॥
तस्यां च वर्त्तमानायां पुंसो हीनस्य तेन तु । अंतकाले भवेत् क्वापि विप्रलापोऽपि तद्वशात् ॥
तं श्रुत्वा स्वगुणं तस्य केचिद्दृढ्लं त्यबुद्धयः । भक्तत्वेन श्रुतोप्येष मृतेऽवाच्यं कथं न्विति ११ ॥
नैतावता भवेत्तस्य दुर्गतिस्तु कदाचन । कृष्णनिश्चयदार्ढ्येन स यात्येव परां गतिम् ॥ १२ ॥
कृष्णनिश्चयहीनस्तु सद्वाक्यानि ब्रुवन्नपि । म्रियेत चेत्तर्हि सोऽपि प्रयात्येवाऽधमां गतिम् १३॥
स्मरन् कृष्णस्य नामानि यत्तद्वा प्रलपन्नपि । यो बाधितानुवृत्त्याऽसौ भक्तस्त्वंते व्रजेद्धरिम् ॥
एतावती कृता वार्त्ता प्रभुणा तेन तद्दिने । पुनः सायं स तत्रैव भक्तसंसद्यराजत ॥ १५ ॥
अपृच्छत्स सतो जीवो देह एकत्र कीदृशः । स्थितोऽस्त्यथाऽखिले देहे व्याप्य कीदृक्तया स्थितः
प्रश्नस्यास्योत्तरं कर्तुं यदा सम्यग्न ते विदुः । तदा तत्स्वयमेवाह हरिः साधून्निशम्यताम् १७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अस्त्येकं हृदये मांसचक्रं वै पांचभौतिकम् । स्थितोऽस्ति तत्र जीवात्मा चिद्रूपोऽतिप्रकाशवान्
यथा चीवरवर्त्तौ स्यात्तैलाक्तायां हविर्भुजः । ज्योतिस्तथा तत्र जीवः संलग्नो वर्त्तते भृशम् ॥
यथाऽयोगोलके वाऽग्निः सर्वतो व्याप्य तं भवेत् । विशेषसत्तया तद्वत्तत्रासौ व्याप्य संस्थितः
सामान्यसत्तया चैष व्याप्तोऽस्त्येवाखिलं वपुः । अतस्तत्सर्वदेशेषु सुखं दुःखं च बुध्यते २१॥
विशेषसत्तया वर्त्तौ वर्त्तमानोऽपि दीपकः । सामान्यसत्तया गेहं यथा भासयतेऽखिलम् ॥२२॥
विशेषसत्तया तद्वत्तच्चक्रे संस्थितोऽप्यसौ । सामान्यसत्तया जीवश्चेतयत्यखिलं वपुः ॥ २३ ॥
तैलाधिष्ठानवर्त्तीनां यथा संबंधमंतराः । नाग्निस्तिष्ठेत्तथा जीवो विना तच्चक्रमेकलः ॥२४॥
ऐक्येन भासमानोऽपि तद्भिन्नोऽस्त्येव वस्तुतः । अतो न देहनाशेऽपि तन्नाशो भवति क्वचित् ॥
यथा वर्त्यां विनाशेऽपि तदैक्येन स्थितोऽनलः । न नश्यति तथा जीवोऽप्यविनाशीति गम्यताम्
देहस्यांतर्यथा जीवो जीवस्यांतस्तथेश्वरः । साक्ष्यंतर्यामिपर्यायस्तदुपास्यो हि वर्त्तते ॥ २७ ॥

इत्थं गुरोस्तस्य वचोऽमृतं ते निपीय भक्ता निखिलास्तदीयाः ।
विसृष्टगेहा गृहिणश्च सर्वे प्रापुर्महांतं हृदये प्रमोदम् ॥ २८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्तविंशत्यधिकद्विशततमस्तरंगः ॥ २२७ ॥ ४ ॥

शकाब्दे विक्रमार्कस्य गुणाष्टवसुभूमिते । भाद्रस्य शुक्लैकादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । वेद्यां प्राचीनवक्त्रस्य निजासन उपाविशत् ॥ २ ॥
मल्लिकाहारवलयशेखरालिविराजितः । सितवासा वृतो भक्तैः प्रश्नाय प्रैरयत्स तान् ॥ ३ ॥
पप्रच्छ मुक्तानंदस्तं कीदृशी भक्तिरीशितुः । अभिभूयेतांतरायैः कीदृशी ते तथा न च ॥ ४ ॥

श्रीहरिरुवाच

माहात्म्यस्यावबोधेन युक्ता भक्तिस्तु या हरेः । सा विघ्नैर्न विहन्येत हन्येताऽन्या तु सर्वथा ॥
तत्तु श्रीमद्भागवततृतीयस्कंध ईरितम् । देवहूत्या स्वपुत्राय तस्यै तेन च तत्त्वतः ॥ ६ ॥

यन्नामधेयश्रवणानुकीर्त्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् ।
श्वादोऽपि सद्यः सवनाय कल्पते कथं पुनस्ते भगवन्नु दर्शनात् ॥ ७ ॥
अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्त्तते नाम तुभ्यम् ।
तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते ॥ ८ ॥

नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् । आत्मनः सर्वभूतानां भयं तीव्रं निवर्त्तते ॥९॥
मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात् । वर्षतींद्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ॥१० ॥
ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः । क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयम् ॥ ११ ॥
एवं माहात्म्यबोधाढ्या निर्विघ्ना भक्तिरीयताम् । अन्या सविघ्नेत्युक्तोऽसौ पुनः पप्रच्छ तं मुनिः
भक्तिस्ते महिमोपेता केनोपायेन लभ्यते । तमुवाच हरिः सा तु महतां सेवयाऽऽप्यते ॥१३॥
मयोदितैरुपेता ये लक्षणैः साधवो भुवि । स्युः प्रसंगेन तेषां वै सोदेति हृदये नृणाम् ॥१४॥
इत्युक्त्वोपरतं तं च पृच्छति स्म शुको मुनिः । स्वामिन् भक्तौ भगवतस्तव स्तः कौचन क्षितौ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णनिश्चयदार्ढ्ये तु समौ द्वौ किंतु चेतसि । कामादिविक्रियैकस्य क्वापि स्यान्नेतरस्य तु ॥१६॥
द्वयोरप्येतयोरंते सुखाप्तिः स्यात्समाऽथ वा । न्यूनाधिकेति पृष्टोऽसौ तमुवाच मुने शृणु १७ ॥
कामक्रोधादिहीनो यो भक्तोऽस्ति दृढनिश्चयः । अतित्यागयतिवैराग्य आत्मनिष्ठस्तथा भृशम् ॥
साक्षात्कृष्णेतरत्किंचित्सोऽपीच्छेद्यदि तर्हि तु । निष्कामो बाह्यतोऽप्येष सकामो न्यूनसौख्यभाक्
अन्यः कामादिविक्षेपं प्राप्य स्यादनुतापवान् । यो भक्तः क्वापि नेच्छेच्च किंचित्साक्षाद्धरीतरत्
कृष्णनिश्चयवानेष मंदज्ञानविरागवान् । सकामो दृश्यमानोऽपि निष्कामोऽस्त्येव सर्वथा २१ ॥
ततो महत्सुखं सोंऽते प्राप्स्यति ब्रह्मधामनि । एष एवाऽनन्यभक्त इति जानीहि निश्चितम् ॥
अतो भूरिसुखेच्छुस्तु भक्तस्त्याग्यथवा गृही । किंचित्कृष्णेतरद्वस्तु नैव वांच्छेत्कदाचन २३ ॥

धर्मांगजस्येति सुधासमानं वचो निशम्याप मुनिः स तोषम् ।
अन्ये च सर्वे मुनयः सदःस्थास्तथा गृहस्थाश्च तदीयभक्ताः ॥ २४ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धौ अष्टाविंशत्यधिकद्विशततमस्तरंगः ॥२२८।५॥

शकाब्दे विक्रमार्कस्य गुणाष्टवसुभूमिते । भाद्रस्य कृष्णपंचम्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभृतः । स्वावासवेद्यां सोऽराजत्स्वासने धवलांशुकः ॥ २ ॥
त्यागिभिर्गृहिभिर्भक्तैर्बहुभिः परितो वृतः । प्रसन्नकदनाब्जोऽसौ पुरःस्थान्सत ऊचिवान् ॥३॥
भक्तिं कृष्णस्य नवधा श्रवणादिं य आचरेत् । स चेत्स्वश्रेयसे कुर्यात्तर्हि कृष्णः प्रसीदति ॥
ईर्ष्यया वापि दंभेन स चेत्तामाचरेद् भृशम् । तथापि तया कृष्णश्चिरेणापि प्रसीदति ॥ ५ ॥
श्रेयोर्थमेव कर्त्तव्या ततो भक्ती रमापतेः । तयैव भगवांस्तूर्णं सुप्रीतो भवति ध्रुवम् ॥ ६ ॥
साक्षात्कृष्णे प्रसन्ने तु भक्तस्य सकला अपि । सफला हि भविष्यंति तत्संबंधिमनोरथाः ७ ॥
भक्तिं विदधतः पुंसो यदि कश्चिच्च कुत्रचित् । अपराधो भवेत्तर्हि स स्वदोष इतीयताम् ८ ॥
न तु तद्धेतुताऽन्यस्मिन्नारोप्या पुरुषे क्वचित् । न ह्यन्यवाक्यतः क्वापि कूपे पतति कश्चन ॥९ ॥
जीवस्य तु स्वभावोऽयमपराधवतोऽपि हि । परस्मिन्दोषमारोप्य स्वस्य निर्दोषताग्रहः १० ॥
अन्येन भ्रामितेनेदमकार्यं विहितं मया । न त्वेतन्मम कर्त्तव्यमित्येवं च ब्रवीति सः ॥ ११ ॥
एवं परस्मिन्नारोप्यो दोषः स त्वात्मनोऽस्ति हि । अकार्यं नाचरेत्स्वश्चेत्किं कुर्यादितरस्तु तम् ॥
अतः परस्मिन्दोषं यः पुमानारोपयेत्स तु । अतिमूर्खोऽवगंतव्यः स्वदोषानवबोधनात् ॥१३ ॥
अकार्याचरणे केचिन्मनसः सेंद्रियस्य च । ब्रुवंति हेतुतां तेऽपि मूर्खा एव न संशयः ॥१४॥
यन्न रोचेत जीवाय मनः संकल्पयेन्न तत् । रुचिर्भवेद्यत्र तस्य तत्तु संकल्पयेद्धि तत् ॥ १५ ॥
जीवस्य भगवद्ध्यानसमये स्त्र्यादि दर्शनम् । यद्यप्रियं भवेत्तर्हि मनः संकल्पयेन्न तत् ॥१६ ॥
मानसाकार्यसंकल्पादनुतापं व्रजेद्यदि । जीवस्तर्हि मनो भूय आचरेन्न तथाविधम् ॥ १७ ॥
संकल्पान् मानसान् दुष्टान् मलिनो जीव एव चेत् । प्रीत्यैवानुसरेत्तर्हि स पतेद्देव सत्पथात् ॥
अतः शुद्धो मुमुक्षुस्तु क्वाप्यधर्मोपदेष्टरि । स्वांते वा पुरुषेऽन्यस्मिन्विधत्ते वैरमेव हि ॥१९ ॥
ततो मनश्चान्यपुमानधर्मं तदरोचकम् । नैवोपदिशति क्वापि तद्रुचिं चानुवर्त्तते ॥ २० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दुःसंकल्पा यस्य नित्यं जायेरन् हृदये स च । जीव एवास्ति मलिनः स्वहितानुद्यतः खलु ॥
एवं हि चक्षुरादीनि सकलानींद्रियाण्यपि । तमनुसृत्य वर्त्तंते राजानमनुगा यथा ॥ २२ ॥
यद्यसत्स्त्र्यादिवीक्षादौ जीवस्य न रुचिर्भवेत् । स्वातंत्र्येण तदा तानि न क्षमाण्येव तद्ग्रहे ॥
अतः सृति स्वापराधेऽन्यत्र दोषार्पणं तु यत् । तन्मौर्ख्यमेव जीवस्य निर्विवेकस्य सर्वथा २४॥
एवं ज्ञात्वा हरेर्भक्तिं यः कुर्यात्तं प्रधर्षितुम् । इंद्रियाणि मनश्चान्ये पुमांसोऽपि क्षमा नहि ॥
इत्थं निशम्यात्मगुरोर्वचस्ते पीयूषतुल्यं मुनयः सदःस्थाः ।
सर्वे तथान्ये गृहिणः स्वभक्ता लब्ध्वातिमोदं हृदि तं प्रणेमुः ॥ २६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ ऊनत्रिंशाधिकद्विशततमस्तरंगः ॥ २२९ ॥ ६ ॥

शकाब्दे विक्रमार्कस्य गुणाष्टवसुभूमिते । कृष्णषष्ठ्यां नभस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स भूभुजः । स्वाश्रमे तूलिकापीठे व्यराजत सितांबरः ॥ २ ॥
बिभ्रच्च मल्लिकाहारशेखरान् परितो वृतः । नानाभक्तगणैः साधून् स उवाच पुरोगतान् ॥३॥
वदास्यहं स्वसिद्धांतमंतःस्थं शृणुताऽखिलाः । कृष्णतद्भक्ततो नाऽन्यः सुखदोऽस्ति मुमुक्षताम्
अतो यथा स्वदेहेऽस्ति जीवस्यात्ममतिस्तथा कृष्णे च कृष्णभक्तेषु कार्या हेया च देहतः ॥५॥
पक्षपातस्तदीयश्च रक्ष्यः स्वजनवद् दृढः । तस्मिन्सत्यपमानोऽस्तु मृत्युर्वा स न हीयताम् ॥६॥
देहदैहिकतः प्रीतिस्तेषु कार्यो विशेषतः । अभावस्तु क्वचित्तेषां ग्रहीतव्यो न चेतसि ॥ ७ ॥
एवं वर्त्तत यो भक्तः कामक्रोधादयोऽरयः । तं नाभिभवितुं शक्ता भवंत्यतिबला अपि ॥ ८ ॥
यो ब्रह्मधाम्नि भगवान्सदाऽऽस्ते दिव्यविग्रहः । स एव साक्षात्कृष्णोऽस्ति नराकारो धरातले ॥
तस्य स्यादाश्रयो यस्य भाव्यं तेनाऽभयेन यत् । यमादिभ्यो भयं नास्ति तस्य पुंसः कदाचन ॥
यास्यामि कां गतिं मृत्वा भवितास्मि पिशाचकः । पदं वैंद्रादि गंतेति चिंता कार्या न तेन च ॥
सोऽवश्यमेव देहांते कृष्णधामैव यास्यति । स्थातुं दास्यति तं नैव कृष्णो मध्ये तु कुत्रचित् ॥
अतः साक्षाद्भगवति भक्तेन स्वमनो दृढम् । वज्रभूमौ वज्रकील इव योज्यं प्रयत्नतः ॥ १३॥
यः कृष्णैकमना अत्र पुमान् स्यात्स तु सर्वथा । देहे सत्येव भगवद्धाम्न्यस्तीत्यवगम्यताम् १४॥
श्रुत्वेति वाचं मुनयो जगद्गुरोस्तस्याऽमृतेनोपमितां सदोगताः ।
ते चापरे ये गृहिणोऽपि पूरुषास्तोषं ययुस्ते हृदये महत्तमम् ॥ १५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रिंशदधिकद्विशततमस्तरंगः ॥ २३० ॥ ७ ॥

शकाब्दे विक्रमार्कस्य गुणाष्टवसुभूमिते । कृष्णे नवम्यां भाद्रस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । वेद्यां प्राचीनवक्त्रस्य मंचोत्तम उपाविशत् ॥ २ ॥
सितांबरो मल्लिकास्रक्शेखरैः सुविराजितः । नानाभक्तैः परिवृतः स्वयमूचे सतः प्रति ॥ ३ ॥
हरिभक्तस्य पुंसस्तु सुखदायीनि सर्वदा । साधनानि भवंत्यत्र कानि साध्यानि सर्वथा ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति पृष्टाः साधवस्ते यथामति तदुत्तरम् । चक्रुस्ततः स्वयं प्रीतस्तदुवाच सतां पतिः ॥ ५ ॥
सुदृढेन स्वधर्मेण वैराग्येण च भूयसा । सर्वेन्द्रियवशीकारे मुख्यमेतत्तु साधनम् ॥ ६ ॥
कृष्णकार्ष्णेष्वतिप्रीतिर्मैत्रं तेषु च सर्वदा । अनौदास्यं क्वचित्तेषु रुचिस्तत्संग एव च ॥ ७ ॥
इत्येतैः साधनैर्युक्तः सर्वदा सुखदायिभिः । यो भक्तः स सुखी नित्यमिह लोके परत्र च ८॥
यस्येन्द्रियवशीकारो न स्यात्स तु पुमान्सताम् । मंडले वर्त्तमानोऽपि दुःखी स्यान्न सुखी क्वचित्
भक्तिं विदधतोऽप्यस्य विषयान्प्रति यर्हि तु । इंद्रियाण्यपकृष्यंते तदा दुःखी स जायते १०॥
इंद्रियाणि जितानि स्युर्यस्य तस्यैव सर्वथा । धर्मवैराग्ययोर्दार्ढ्यं ज्ञेयं नान्यस्य तद्ध्रुवम् ११॥
मुक्तानंदस्ततोऽपृच्छद्भक्तौ कृष्णस्य ते प्रभो । महद्विघ्नं किमस्तीति पृष्टो हरिरुवाच तम् १२॥
अनवेक्षा स्वदोषाणां कृष्णतद्भक्ततो द्रुहः । पार्थक्यमथ तेभ्यश्च निस्पृहत्वेन वर्त्तनम् ॥ १३ ॥
एतद्दोषत्रयं भक्तौ महद्विघ्नमितीयताम् । अतो भक्तेन भेतव्यं तस्माच्छ्रेयोर्थिना सदा ॥१४ ॥
इति भक्तिसुताख्यनिर्गतं स मुनिर्वागमृतं निपीय च ।
सकला मुनयः सदोगता गृहिणोऽपि प्रमुदं च लेभिरे ॥ १५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावेकत्रिंशदधिकद्विशततमस्तरंगः ॥ २३१ ॥ ८ ॥

शकाब्दे विक्रमार्कस्य गुणाष्टवसुभूमिते । इषस्य शुक्लैकादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः । वितर्दौ प्रत्यगास्यस्य व्यराजत् पीठ उत्तमे ॥ २ ॥
पौष्पस्रग्वलयापीडः सितवासा वृतो निजैः । त्यागिभिश्च गृहस्थैश्च सर्वान्भक्तानुवाच सः ३॥
अस्मदीया येऽत्र संतो महांतस्तेषु चापि ये । यादृश्यस्ति स्थितिस्तेषां तामहं कथयामि वः ४॥
तांश्च श्रुत्वाऽखिलैर्भक्तैर्मदीयैः स्वस्य तादृशी । स्थितिः सम्यक् साधनीयेत्युक्त्वा तामवदच्च तान्
कृष्णैकांतिकसत्प्राप्तः साक्षात्कृष्णनिजात्मनोः । सम्यक्स्वरूपबोधो यस्तज्ज्ञानमिति कथ्यते ६॥
तथा स्वधर्मवैराग्यभक्तीनां च यथार्थतः । बोधो यत्सुदृढश्चित्ते तच्च ज्ञानमितीर्यते ॥ ७ ॥
ब्रह्मधाम्नो गोपुरं हि तच्चास्तीत्यवधार्यताम् । संतो महांतो येऽस्माकं संति ते तत्र संस्थिताः ॥
यथा तिष्ठंत्यनुचरा राज्ञः सौधस्य गोपुरे । संनद्धाः सासिचर्माणो विनिद्रा धैर्यशालिनः ॥९॥
अंतःप्रवेशं चौरेभ्यो न ददाना हठात्तु ये । प्रविशेयुश्च तन्नाश उद्युक्ताः सर्वदैव हि ॥ १० ॥
तथा ते संस्थिता ज्ञाने तदंतर्ब्रह्मधाम तत् । तत्र चास्ति हरिः साक्षात्तं च पश्यंति ते प्रभुम् ॥
तद्दर्शने जायमाने स्त्रीधनाद्यरये क्वचित् । मानसायांतरावेशं कर्तुं न ददते च ते ॥ १२ ॥
हठात्तु प्रविशंतं तं ते निघ्नंत्येव तत्क्षणम् । एवं हि सावधानास्ते धीरास्तिष्ठंति तत्र वै ॥१३॥
दैह्याभ्यां सुखदुःखाभ्यां हानिवृद्धिभयादिभिः । विघ्नैश्चालयितुं ते तत्स्थानाच्छक्या न सर्वदा
एवं स्थितिमतां तेषां दैहिकी सकला क्रिया । कथं नु जायत इति शंकाऽपाक्रियतेऽधुना ॥
उदकार्थी यथा कश्चित् प्रहेरुदकमाहरन् । स्ववृत्तिं कुरुते द्वेधा स्वपात्रे च स्वरक्षणे ॥ १६ ॥
अश्वगामी यथा वाऽश्वरक्षणे कुत्सिताध्वनः । स्वरक्षणे च वृत्तिं स्वां करोति पुरुषो द्विधा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं तेऽपि द्विधा कृत्वा वृत्तिमात्मन एकया । कृष्णं पश्यंत्यन्यया च कुर्वंते दैहिकीं क्रियाम् ॥
एवं हि महतामस्ति साधूनां सर्वदा स्थितिः । तथैव सर्वैर्युष्माभिः साध्या साऽतिप्रयत्नतः ॥
सौधप्रवेशे चौराणां यथा राज्ञोऽरुचिर्भवेत् । स्वीयेषु गोपुरस्थेषु तद्भृत्याऽप्यपयाति च २०॥
तथैव भजतां हृत्सु स्थाने भगवतो यदि । स्यात् प्रवेशो धनस्त्र्यादेस्तेषामनवधानतः ॥२१॥
तदा भगवतोऽरुच्या भक्तिरप्यपयाति हि । तस्मात्सर्वैः सावधानैः स्थित्वा ज्ञाने स दृश्यताम् ॥

शिक्षावचोऽमृतसमं त्विति धर्मसूनोः पीत्वाऽखिला अपि तदाश्रितपूरुषास्ते ।
संतोषमाप्य परमं हृदये बभूवुस्तद्ध्यान एव निरता अपि सावधानाः ॥ २३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ द्वात्रिंशदधिकद्विशततमस्तरंगः ॥ २३२ ॥ ६ ॥

शकाब्दे विक्रमार्कस्य गुणाष्टवसुभूमिते । इषस्य कृष्णद्वादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वेद्यां प्राचीनवक्त्रस्य न्यषीदद्द्विज आसने ॥ २ ॥
सितवासास्त्यागिभिश्च गृहिभिर्बहुभिर्वृतः । तत्राऽऽगतं द्विजं कंचित्सोपृच्छन्माध्वरवर्त्मगम् ३॥
भवतां संप्रदायेऽस्ति व्रजे वृंदावनं तु यत् । तदेव भगवद्धाम प्रलयेऽप्यविनाशि च ॥ ४ ॥
अस्माकं हृदि वार्त्तेयं सम्यङ्नाविशति ध्रुवम् । प्रलये पंचभूतानां नाशे तच्छिष्यते कथम् ॥
इत्युक्त्वा श्रीभागवतं तत्राऽऽनाय्य स संसदि । वाचयामास तत्स्थं च महाप्रलयवर्णनम् ॥६॥
उवाच स ततो विप्रमत्र भागवते तथा । गीतायां चोक्त एवास्ति सर्वनाशो महालये ॥ ७ ॥
मायापुरुषयोगेन यत्किंचिदुदयं गतम् । तत्सर्वं कालवेगेन नश्यतीति श्रुतौ श्रुतम् ॥ ८ ॥
एवं सत्यविनाशित्वं व्रजे वृंदावनस्य यत् । तत्र प्रमाणं ज्ञातं चेद् ब्रूहि व्यासवचो यदि ॥९॥
व्यासादन्यो न कोऽप्यस्ति महानाचार्य उत्तमः । अतस्तद्वाक्यतो नान्याचार्यवाक्यं प्रमापकम् ॥
आचार्या येऽपरे तेषां वाक्यानां तु प्रमाणता । व्यासवाक्यानुसारेण भवत्येव न चान्यथा ॥
अतस्तदीयवाक्येन श्रुत्या चापि कयाचन । भौमवृंदावनस्यापि नित्यता चेत्तदोच्यताम् ॥ १२ ॥
किं चाचार्यैराधुनिकैर्मतं स्वं स्वं प्रमापितम् । वाक्यैः पद्मपुराणस्य न तदप्यस्ति संमतम् १३॥
मूलग्रंथे तु पाद्मे ते श्लोकाः संति न यत्ततः । तैरेव तत्र प्रक्षिप्ताः सुधीभिरिति कीर्त्यते ॥
तत्तन्मतानुगास्तांस्तु मानयंति नहीतरे । अतो हि सर्वमान्यस्य ग्रंथस्यातिप्रमाणता ॥ १५ ॥
व्यासेनापि पुराणानि ब्राह्मादीनि च भारतम् । कृत्वाऽप्यपरितोषात्तु श्रीमद्भागवतं कृतम् १६॥
ततोऽतितोषमापेदे तस्मात्सर्वपुराणतः । आधिक्येन प्रमाणेषु तच्चैवाऽऽर्यजना विदुः ॥ १७ ॥
तस्मात्तस्मिन् यदि श्लोकः स्यात्तन्नित्यत्वबोधकः । गीतायां वापि चेत्तर्हि कथ्यतां विदितो यदि
इत्याक्षिप्तः स विप्रस्तु तं नत्वाऽऽह कृतांजलिः । सर्वज्ञोऽसि हरे स्वामिंस्त्वमेवात्र धरातले ॥
त्वत्प्रश्नस्योत्तरं वक्तुं कोऽपि शक्तो न भूतले । दृढप्रतीतिर्मम तु जाता त्वं भगवानिति ॥२०॥
आचार्याणां त्वमाचार्य ईश्वराणामसीश्वरः । त्वमेवाऽस्योत्तरमतः सिद्धांतं ब्रूहि चात्मनः २१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीहरिरुवाच

ब्रह्मरूपानेकमुक्तावासे वृंदावनाभिधे । स्वीये ब्रह्मपुरे धाम्नि सदा कृष्णो विराजते ॥ २२ ॥
सच्चिदानंदरूपोऽसावस्ति दिव्यतनुर्द्विज । तद्धामापि सदा दिव्यमखंडं वर्त्तते बृहत् ॥ २३ ॥
आविर्भूय स एवात्र व्रजे वृंदावनेऽवसत् । यत्र कृष्णो भवेत्तत्र तद्धामापि भवेद् ध्रुवम् ॥२४॥
कृष्णस्यैवेच्छया येऽत्र दिव्यदृष्टिमुपागताः । स्युस्ते नरास्तु वीक्षंते कृष्णं तद्धाम च स्फुटम् ॥
भौमवृंदावने तेषां तद्धाम्नस्यापि वीक्षणात् । तन्नित्यतोदिताऽस्त्येव न तु तस्य स्वभावतः २६॥
इति प्रश्नोत्तरं विप्र दत्तं ते शास्त्रनिश्चितम् । अथास्मदीयसिद्धांतं यथावत्कथयामि ते ॥२७॥
वेदादीनि मया सर्वसच्छास्त्राण्यवगाह्य यः । सिद्धांतो निश्चितस्तं त्वमव्यग्रः सन् निशामय ॥
जीवा ईशा ब्रह्म माया परमेश्वर इत्यमी । अनादयो भवंत्येव पंच चापि न संशयः ॥ २९ ॥
पृथिव्यंतःस्थबीजानि यथा मेघांबुयोगतः । उद्गच्छंति तथा जीवा मायाया ब्रह्मयोगतः ३०॥
सर्वेषामुद्गमे स्थाने तिरोभावे च सर्वथा । इच्छैव परमेशस्य मुख्यो हेतुरितीयताम् ॥ ३१ ॥
नित्यसिद्धा एव जीवा मायायां संति सर्वशः । पृथिव्यामिव बीजानि तेनोद्गच्छंति नूतनाः ॥
ईश्वरस्याऽक्षरत्वाच्च न तदंशाश्च ते मताः । परमेश्वर एकोऽस्ति सर्वेषां तु नियामकः ॥ ३३ ॥
स श्रीकृष्णोऽक्षराख्ये स्वे धाम्नि दिव्याकृतिः सदा । राजतेऽक्षरमुक्तैः स्वैः प्रेम्णा सेवितपत्कजः
ते यदा शरणं गत्वा साक्षात्तं सर्वकारणम् । स्वधर्मज्ञानवैराग्ययुजा भक्त्या भजंति च ॥३५॥
तदैव तीर्त्वा तन्मायां ज्ञानिभक्तास्तु ते द्विज । समानत्वं प्रयांत्येव नारदर्षिशुकादिभिः ३६॥
ब्रह्मीभूताश्च ते गत्वा देहांते कृष्णधाम वै । पार्षदत्वं भगवतो यायुः सिद्धांत एष नः ॥ ३७ ॥
इति श्रुत्वा स तद्वाक्यं त्यक्त्वैव स्वमतादरम् । कृत्वा समाश्रयं तस्य दीक्षां जगृह औद्धवीम् ॥

इत्थं गुरोस्तस्य वचोऽमृतं ते सदोनिषण्णा मुनयः समस्ताः ।
निपीय भक्ता गृहिणश्च सर्वेऽप्यापुः प्रहर्षं हृदये तदीयाः ॥ ३९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ त्रयस्त्रिंशदधिकद्विशततमस्तरंगः ॥२३३॥ १० ॥

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । शुचिशुक्लतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वेद्यां प्राचीनवक्त्रस्य न्यषीदन्मंच उत्तमे ॥ २ ॥
सितांबरो वृतो भक्तैः परितः स सहस्रशः । अग्रे निषण्णान् पप्रच्छ साधून् स्वाननचक्षुषः ३॥
मनसश्चेंद्रियाणां च जये साधनमेककम् । अस्ति वा पृथगस्तीति पृष्टास्ते तद्व्यचारयन् ॥ ४ ॥
ततोऽसावेव तान्प्राह प्रश्नोत्तरमहं ब्रुवे । इन्द्रियाणां जयेऽस्त्यन्यत्साधनं च हृदः पृथक् ५ ॥
तपःस्वधर्मवैराग्यनियमैस्तु जयो भवेत् । इन्द्रियाणां च नवधा कृष्णभक्त्या मनोजयः ॥ ६ ॥
मुक्तानंदस्ततोऽपृच्छन्नजतां त्वां नृणां हरे । निर्विकल्पसमाधौ स्याद् यादृशी शांतिरंतरे ७ ॥
विनापि तं तादृशी स्याच्छांतिः केनांतरे प्रभो । आपद्यपि कथं श्रेयोध्वनः पातो भवेन्न च ८ ॥
एतत्प्रश्नद्वयस्य त्वमुत्तरं वक्तुमर्हसि । इति पृष्टस्तमवदद्धरिकृष्णस्तदुत्तरम् ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्मबुद्ध्या दृढप्रीतिः स्वदेहेऽस्ति यथा तथा । सा स्यात्कृष्णे च कार्ष्णेषु तर्हि शांतिस्तथा भवेत्
भक्तस्य तद्वतो न स्यात् पातः श्रेयोध्वनः क्वचित् । असद्देशादियोगेऽपि निर्विघ्नः सोऽस्ति सर्वथा
इति प्रश्नोत्तरं दत्त्वा पृच्छति स्म पुनः सतः । सत्पतिः परया प्रीत्या यूयं शृणुत साधवः ॥
भक्तौ द्वौ भवतः कौचित्तत्रैकस्य हरौ भृशम् । श्रीराम इव जानक्याः स्नेहो भवति सर्वथा ॥
रामाज्ञया यदा सीतां लक्ष्मणस्तु महावने । रथादुत्तार्य हित्वा तां चक्रे जिगमिषां ततः १४ ॥
तदा रुरोद सा तां च दृष्ट्वा सोऽप्यरुदत्ततः । उवाच सा स्वदुःखेन नैव रोदिमि लक्ष्मण ॥
किंतु रामोऽस्त्यतिदयः स मां लोकापवादतः । त्याजयित्वापि हृदये कुर्यादेव विचारणाम् ॥
अहो मया वनं घोरं निर्दोषा स्त्री प्रहापिता । भवित्री का गतिस्तस्या महासाध्व्या सदात्मनः ॥
इति संस्मृत्य संस्मृत्य भवेद्वै सोतिदुःखितः । ततो रोदिमि तस्मात्त्वं गत्वेत्थं तं वदेः प्रभुम् ॥
नास्त्येव दुःखं सीताया घोरेऽपि विपिने यतः । आसन्नमाश्रमं गत्वा वाल्मीकेस्त्वां भजिष्यति ॥
अतो न तस्या दुःखेन दुःखितव्यं त्वया हृदि । इति ब्रूयाः प्रभुमिति साऽब्रवीदतिभावतः ॥
नतु सा भर्तुरगुणं किंचिदप्यग्रहीद्धृदि । एवं हि तस्य स्नेहोऽस्ति कृष्णे कार्ष्णेषु चाच्युतः ॥
सामान्यतोऽस्ति धर्मस्तु वैराग्यं च तथास्य हि । ईदृशो भक्त एकोऽस्ति तथैकस्तद्विलक्षणः २२॥
सुदृढस्नेहहीनोऽसौ धर्मवैराग्यदार्ढ्यवान् । एतयोः कतरः स्नेहसाहचर्योचितो मतः ॥ २३ ॥
इति तत्प्रश्नमाश्रुत्य चैतन्यानंद आह तम् । उभयोरादिमः स्नेहसाहचर्ये हितावहः ॥ २४ ॥
इत्युत्तरवचः श्रुत्वा मुनेस्तस्य स सत्पतिः । इदमेवोत्तरं ह्यस्य प्रश्नस्याऽस्तीत्युवाच तम् ॥२५॥

स भक्तिपुत्रस्य तु वाचमित्थं सुधासमानां मुनिराकलय्य ।
सदोनिषण्णा मुनयोऽपरे च संतोषमापुर्गृहिणश्च भक्ताः ॥ २६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुस्त्रिंशदधिकद्विशततमस्तरंगः ॥ २३४ ॥११॥

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । आषाढस्याऽसिताष्टम्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स भूभृतः । स्वावासे स्वासनेऽराजन्नानाभक्तगणावृतः ॥ २ ॥
सितवासाः प्रसन्नास्यो भक्तानूचे स शिक्षयन् । मानः श्रेयोर्थिना त्याज्यः कुलविद्याधनादिजः ॥
सत्संगिनोऽवरस्यापि वृत्त्यं दासतयैव च । कृष्णतद्भक्तिभाजां च ग्राह्यो नैवागुणः क्वचित् ४ ॥
यस्यांतःकरणे लग्नः स स्यात्सतु पुमानिह । अलर्क इव विज्ञेयः स्पर्शानर्हो हि देहिनाम् ५ ॥
तल्लालास्पर्शमात्रेण तद्रोगो यस्य जायते । यथा तथाऽस्यापि संगाद्वैमुख्यं कृष्णतो भवेत् ६ ॥
तदंतःस्थस्तद्गुणः क्षयरोग इवाऽचलः । उपायैर्नाशितुं नैव शक्योऽस्त्यासुरबुद्धिकृत् ॥ ७ ॥
ब्रह्महत्यादिपापानां शास्त्रे प्रोक्तास्ति निष्कृतिः । न क्वापि कृष्णतद्भक्तात्पागुणग्रहणस्य तु ८ ॥
न तत्पापस्य नाशः स्यात्प्रायश्चित्तशतैरपि । पुंसश्च तद्वतो नैव संसृतेः स्यान्निवर्त्तनम् ॥ ९ ॥
अनंतकल्पेषु भवेत्पुनर्जन्म पुनर्मृतिः । न तु क्वापि भवेत्तस्य पापिनो हि सुखक्षणः ॥ १० ॥
रोगाग्निशस्त्रव्याघ्राद्यैर्देहस्यैव मृतिर्भवेत् । न तु क्वापि हि जीवस्य सापि स्यादेतदंहसा ११ ॥
कल्याणसाधने स्वस्य प्रवृत्तिर्नैव कर्हिचित् । एषैव जीवस्य मृतिर्विज्ञेया खलु पाप्मनः ॥१२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं दुष्परिणामत्वाद्धरेस्तस्य च सेविनाम् । ग्राह्यो नैवागुणः क्वापि द्रोहहेतुः सुबुद्धिना १३ ॥
तथा श्रेयोर्थिना स्वस्य देहसंबंधिषु क्वचित् । सत्संगिष्वपि नैवातिस्नेहः कार्यश्च सर्वथा ॥१४॥
दुग्धं सशर्करमपि सर्पेण यदि दूषितम् । भवेत्तदा पेयबुद्धिस्तस्मिन्मृत्युप्रदा यथा ॥ १५ ॥
तथैव हरिभक्ता ये देहसंबंधदूषिताः । तेषु प्रीतिर्दुःखदेति न कुर्यात्तां सुधीः पुमान् ॥ १६ ॥
तेभ्यः स निःस्पृहो भूत्वा भजेत्कृष्णपदांबुजम् । एषा वार्त्ता सदा धार्या हृदि श्रेयोंतरायहृत्

श्रुत्वेति वाचं सुधया समानां नारायणस्य स्वकविघ्नहर्त्तुः ।
सर्वेऽपि ते भक्तजनाः सदःस्थाः संप्राप्य मोदं हृदये दधुस्त्वाम् ॥ १८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पञ्चत्रिंशदधिकद्विशततमस्तरंगः ॥ २३५ ॥१२॥

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । शुचेः कृष्णनवम्यां तु वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्यास्य सद्मनः । प्राङ्मुखस्य वितर्दौ स न्यषीदत् पीठ उत्तमे ॥ २ ॥
सितांबरश्च स दधन्मल्लिकाहारशेखरान् । वृतः सहस्रशो भक्तैः पुरःस्थानब्रवीत्ततः ॥ ३ ॥
योऽसौ देहोऽस्ति जीवस्य कर्माधीनः स वर्त्तते । एकस्थितेस्ततो नास्ति निर्द्धारस्तस्य साधवः ४॥
क्वचित्सुखी क्वचिद् दुःखी स्वतंत्रोऽस्ति क्वचिच्च सः । परतंत्रः क्वचिच्चास्ति क्वचिद्गेहे क्वचिद्वने ॥
स्वेप्सितेऽस्य स्थितिः स्थाने क्वचिदस्ति क्वचिन्न च । क्वचित्कर्मवशाच्चासौ पृथक् सन्मंडलाद्भवेत्
दुष्टभूपवशः क्वाऽसौ स्वांतेंद्रियवशः क्वचित् । तदैकाकितया तस्य सर्वथाऽवस्थितिर्भवेत् ७ ॥
एवं सति तु सत्संगवासे नियमपालने । नियतत्वं भवेन्नैव तस्य कर्मवशत्वतः ॥ ८ ॥
एकांतिकत्वं भक्तस्य तदा सिध्येन्न सर्वथा । स्वधर्मज्ञानवैराग्ययुजा भक्त्यैव तद्यतः ॥ ९ ॥
प्राधान्ये कर्मणो हीत्थं क्वचित्कालस्य वा सति । एकांतिकत्वं भक्तस्य कथं तिष्ठति सर्वदा ॥
इति पृष्टे भगवता महांतः सत्सु ये तु ते । गोपालानंदप्रमुखा यथामत्युत्तरं ददुः ॥ ११ ॥
तत्सम्यङ् नेति मन्वानः स्वयमेवाह तत्स तान् । सर्वदैकांतिकत्वं वो मद्दृष्टांतेन कीर्त्तये १२॥
सुखस्य वाऽऽप्तौ दुःखस्य संपदो विपदश्च वा । सर्वदेव स्थितिर्यादृगस्ति मे सा निशम्यताम् ॥
महैश्वर्यं भगवतः सम्यग्जानाम्यहं ततः । संपदश्चक्रवर्त्त्यादेः पश्याम्येव तृणोपमाः ॥ १४ ॥
कृष्णं सर्वाधिकं ज्ञात्वा तत्रात्मा योजितोऽस्ति मे । तस्मिन्नेव दृढः स्नेहः कृतोऽस्ति गिरिवत्स्थिरः
तं कालः कर्म वा माया नैव चालयितुं क्षमाः । सुखे दुःखे च संप्राप्ते सर्वदास्ति स तु स्थिरः
पुरदुर्गादिवासान्मे वने वासोऽतिरोचते । स्थित्वा रहस्येव हरिं यद्ध्यायेयमितीप्सितम् १७ ॥
रामानंदस्वामिनश्च दीक्षातः पूर्वमेव हि । मुक्तानंदेन साकं म एवमेवास निश्चितम् ॥ १८ ॥
अधुनापि मनोवृत्तिरेवमेवास्ति नान्यथा । बद्धोऽस्मि कृष्णभक्तेषु स्नेहपाशेन सर्वदा ॥ १९ ॥
अतो हित्वा सतां संगं गंतुमन्यत्र न क्षमः । उदासीनश्च बहुशो यियासुरपि काननम् २० ॥
अभक्तै रक्ष्यमाणस्तु भूरिशुश्रूषकैरपि । धनिभिर्वापि तत्स्थाने तिष्ठेयं नैव कुत्रचित् ॥ २१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ईदृश्यस्ति मम प्रीतिः कृष्णे कार्ष्णेषु चाऽनिशम् ।
तान्विना त्वतिरम्येऽपि नास्ति साल्पाऽपि वस्तुनि ॥ २२ ॥

अन्यत्र चेदणुरपि प्रीतिः स्यात्तर्हि तावती । कृष्णे न्यूना भवेत्तस्मात्पूर्णा सा क्रियते हरौ ॥
कथासंकीर्त्तनादौ च कृष्णस्यातीव मत्तता । हृदि मे वर्त्तते न्यूनं यया स्याद्देहविस्मृतिः २४ ॥
देहस्मृतिं तु यत्नेन स्वाश्रितानां सुखाप्तये । बलात्कृत्वा व्यवहृतिं कुर्वे लोकानुसारिणीम् ॥
जानाम्यहं कृष्णमेव देहस्यास्य प्रवर्त्तकम् । न कर्मणां बलं भक्ते न च यत्कालमाययोः ॥२६॥
दासत्वेन कृतश्चास्मि तदधीनो मयापि सः । अतः स्वेच्छानुसारेण प्रवर्त्तयतु तं प्रभुः ॥२७॥
गजं सोऽश्वं खरं वापि तमारोहयतां क्वचित् । कारागारे क्षिपतु वा रोगिणं विदधातु वा ॥
न तु दुःखापहाराय प्रार्थयामि क्वचिद्धरिम् । रुचिः स्याद्यादृशी तस्य तथैव विदधातु सः ॥
न च कृष्णप्रियाद्भिन्नं कार्यमस्ति स्वकं प्रियम् । तस्यैव यत्प्रियं तन्मे प्रियमित्यस्ति निश्चयः ॥
न च प्रारब्धकर्माऽन्यत्कृष्णेच्छातोस्ति वै मम । कर्मेश्वरे यतस्तस्मिन्नहं प्राप्तोऽस्मि लग्नताम् ॥
दैहिकेऽतिसुखे प्राप्ते भृशदुःखे च वा मम । हर्षशोकविहीनस्य स्थितिरेकविधाऽस्त्यतः ॥
एवं मदीया वृत्तिर्वः कथिता साधवोऽखिला । यामन्योऽपि समाश्रित्य सर्वदैकांतिको भवेत् ॥
धर्मं ज्ञानं च वैराग्यं कृष्ण एव दृढाश्रितः । सर्वदा परितः पाति स्वाश्रितानां न संशयः ॥
क्वचिद्देशादिवैषम्याद्बाह्यतस्तच्च्युतिर्भवेत् । तथापि नांतरे सा स्यात्प्रसादाद्राधिकापतेः ॥

सुधासमां वाचमितीश्वरस्य निशम्य ते साधुजनाः सदःस्थाः ।
तद्भक्तिभाजो गृहिणश्च सर्वेऽविदन्स्वशिक्षार्थमिमां तु वृत्तिम् ॥ ३६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ षट्त्रिंशदधिकद्विशततमस्तरंगः ॥ २३६ ॥१३॥

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । आषाढकृष्णैकादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । प्रागास्यस्य महावेद्यां निषसाद वरासने ॥ २ ॥
सितवासाः पौष्पहारशेखरैश्च विभूषितः । नानाविधैः परिवृतः स्वभक्तैः सस्मिताननः ॥ ३ ॥
सद्भिर्गीतं कृष्णयशः श्रुत्वासीनं यथासुखम् । पप्रच्छ मुक्तानंदस्तं नत्वा प्रश्नं तदाज्ञया ॥४॥
नास्तीशेशारवदन्यत्तु सारवस्त्विह किंचन । तथापि न दृढप्रीतिर्भक्तानां त्वयि जायते ॥ ५ ॥
अत्र किं कारणमिति पृष्टः स्वामी तमब्रवीत् । सारासारविवेको हि तेषां नास्तीति कारणम् ॥
असारस्त्र्यादिसौख्येच्छावशात्सर्वसुखांबुधौ । प्रीतिं कृष्णे न कुर्युर्यैं तैः स इत्थं विधीयताम्
यथोचितं ब्रह्मचर्यमिह पालयतामपि । अस्माकं कृष्णभक्तानां दोषः कामादिवासना ॥ ८ ॥
स्त्रैणं सुखं तु सर्वासु योनिषु प्राप्तमेव नः । पश्वादियोनिषु च तन्नृभ्योऽप्यतिशयेन वै ॥ ९ ॥
अजत्वे स्वेन चैकेन ह्यजा भुक्ताः सहस्रशः । श्वत्वे शुन्यः कपित्वे च वानर्यः कामिना भृशम्
एवं योनिषु बह्वीषु बह्व्यस्तज्जातियोषितः । तरुण्यो रूपवत्यश्च भुक्ताः स्युर्यत्नमंतरा ॥११॥
सांप्रतं च हरेर्भक्तिं करिष्यामो न चेत्तदा । अग्रेऽपि पूर्ववत्तास्ताः प्राप्स्यामोऽयत्नतः स्त्रियः ॥
तथास्माभिश्च देवत्वे देवलोकसुखं महत् । भुक्तमस्त्येव बहुशो नृपत्वे त्वैहिकं सुखम् ॥१३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतो न मायिकं सौख्यं दुर्लभं कस्यचित् क्वचित् ।
कार्ष्णं सुखं तु सर्वेभ्यः सुखेभ्योऽस्त्यतिदुर्लभम् ॥ १४ ॥

यत्प्राप्तये तपो घोरं कुर्वंति मुनयो वने । साम्राज्यं च नृपा हित्वा तपसे यांति काननम् ॥
कृपयैव प्रभोः प्राप्तं तदप्यस्त्येव सांप्रतम् । तद्धित्वान्यातितुच्छार्थसुखेहां कुर्महे कथम् ॥
एवं विवेको येषां स्यात् तेषां तु कृष्ण एव हि । प्रीतिर्भवत्यतितरां न त्वन्यत्र कदाचन ॥१७॥
एतद्विवेकहीनास्तु स्त्रीरसद्रव्यजं सुखम् । दुर्लभं च महन्मत्वा तत्र सज्जंति सर्वथा ॥१८॥
तेन पापेन न प्रीतिः साक्षात्कृष्णेऽपि जायते । तेनैव चापि मलिना वासना जायते हृदि ॥
पूर्वानुभूतं दृष्टांतमत्र ते कथयाम्यहम् । अयोध्यायामभूत्कश्चित्कायस्थः शिवपूजकः ॥ २० ॥
सोऽर्चयित्वा शिवं नित्यं वरमित्थमयाचत । मनुष्यजन्म मे क्वापि न दद्याः सर्वथा विभो ॥
मानुष्येऽत्र मया भूरिकामवर्द्धनमौषधम् । भक्ष्यतेऽथापि न स्त्रैणं सुखं सम्यगवाप्यते ॥२२॥
लोकलज्जाभयात्सर्वो व्यर्थो गच्छति वासरः । एकया च स्त्रिया रात्रौ सम्यक् शांतिर्न जायते
अतो यथा दिवारात्रं भुंजीय बहुयोषितः । तथा खरावतारं त्वं भक्तवत्सल देहि मे ॥ २४ ॥
एवं स प्रार्थयन् शंभुं मया दृष्टः शिवालये । तस्मादुक्तेन पापेन स्याद्धै मलिनवासना ॥२५॥
अतस्तेन विवेकेन तद्धेयं सर्वथा जनैः । इति श्रुत्वा प्रहृष्टोऽसौ मुनिः पप्रच्छ तं पुनः ॥२६॥
विवेक ईदृशो यस्य न स्यात्सतु पुमान्प्रभो । त्वयि प्रीतिविहीनः स्यादिति युक्तमुदीरितम् ॥
भवानेव परं ब्रह्म सुखाब्धित्वात्सुखप्रदः । नान्योऽस्ति सुखदायीति विवेको यस्य वर्त्तते ॥
सोऽपि भक्तस्त्वयि कथं दृश्यते प्रीतिवर्जितः । इति पृष्टः स मुनिना तमुवाच सतांपतिः ॥
देशकालक्रियादीनामसतामेव योगतः । अस्मिन् जन्मनि वाऽन्यस्मिन् दुःसंगेन च तस्य तु ॥
असत्कर्माणि तीक्ष्णानि संति जातानि भूरिशः । तेषां मनसि जाताऽस्ति वासनोत्खातुमक्षमा
अतो विवेकिनोप्यस्य नास्त्येवाऽसारवर्जने । सामर्थ्यं सारभूते च प्रीतिं कर्तुं हरावपि ॥३२॥
यदा चाऽसौ सतामेव देशादीनां तु योगतः । सत्संगेन च कर्माणि कुर्यात्संत्येव सर्वथा ३३॥
अस्य तीक्ष्णैस्तदा तैस्तु दुष्कर्माण्यखिलान्यपि । उन्मूल्यंते ततः प्रीतिः कृष्णे भवति भूयसी
अथाऽयोध्याप्रसादस्तं पप्रच्छ प्रभुमानतः । सत्संगमिह कुर्वाणौ त्वद्भक्तौ स्तो नरावुभौ ॥ ३५॥
तयोरेकोऽतिमतिमान्विदन् शास्त्रार्थमंजसा । तथापि कृष्णाद्विमुखो जायमानः स ईक्ष्यते ॥
पुमानन्यस्त्वल्पमतिः किंचिच्छास्त्रार्थवेदनः । तथापि कृष्णं सुदृढमाश्रितोऽस्तीति दृश्यते ३७॥
अत्र किं कारणमिति पृष्टस्तं हरिरब्रवीत् । द्विविधाः संति जीवास्तु दैवाः केचित्तथाऽऽसुराः
तत्र दैवा हरिं नैव त्यजंत्यल्पधियोऽपि हि । बुद्धिमंतोऽप्यासुरास्तु तं जहत्येव सर्वथा ॥३९॥
यथा मरीचबीजानि भुव्युप्त्वा सिंचितान्यपि । शर्करांबुभिरात्मीयं तैक्ष्ण्यं नोज्झंति सर्वथा ॥
एवमेवासुरा जीवाः सद्वाक्यैर्बोधिता अपि । स्वकीयं दुर्गुणं नैव त्यजंतीशं त्यजंति च ॥४१॥
इक्षुबीजानि यद्वच्च कटुंभःसिंचितान्यपि । उप्तानि भुवि माधुर्यं स्वकीयं न त्यजंति वै ॥४२॥
दैवा जीवास्तथैवात्र शिक्षार्थैः कटुभाषणैः । उक्ता अपि स्वसाद्गुण्यं न त्यजंति तथा हरिम्
इति प्रश्नोत्तरं श्रुत्वा स प्रहृष्टोऽभवत्ततः । पृच्छति स्म शुकानंदस्तं प्रणम्य कृतांजलिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दैवास्तथाऽऽसुरा जीवा बोध्याः कैर्लक्षणैः प्रभो । इति पृष्टस्तमवदत्स्वामिनारायणो मुनिम् ॥
दैवास्तु क्वाप्यसद्देशकालकर्मादियोगतः । प्राप्ता अपि क्रोधलोभकामादीन् दुर्गुणान् मुने ॥
पुनः सद्देशकालादिसंबंधं प्राप्य तांस्तु ते । कालेनाल्पेन हित्वैव भजेयुः सद्गुणान् शुभान् ॥
आसुरेषु तु जीवेषु सहजाः संति दुर्गुणाः । ते च सद्देशसंगाद्यैः स्युर्नष्टा इव बाह्यतः ॥४८॥
कंचित्कालं ततस्ते च स्युर्भक्तोत्तमवर्त्तनाः । यथोद्धर्वमिष्टनीराऽधःक्षारोदा भाल्लकूपिका ॥
असद्देशादियोगेऽथ ते भवेयुर्यथा पुरा । शिक्षावाक्यैः सतां तेऽपि स्वाप्रियैश्चाक्षमत्सराः ॥
अत्यमर्षास्ततस्ते च सत्सेवा यावती पुरा । कृता तस्या लक्षगुणं द्रोहं कुर्युः सतां मुहुः ॥५१॥
इत्येतैर्लक्षणैर्बोध्या दैवा जीवास्तथासुराः । इत्युक्त्वा विरतं मुक्तानंदः पप्रच्छ तं पुनः ॥५२॥

सत्संगाद्यैर्यदा जीवा आसुराः स्युः शुभक्रियाः ।
भजेयुस्त्वां तथा भक्त्या तस्मिन्काले मृता यदि ॥ ५३ ॥

तर्हि तेषां गतिर्दैवी भवेत्किं वाऽऽसुरी प्रभो । हरिस्तमाह ते मृत्वा दैवा जीवा भवंति हि ॥
ततः साक्षाद्धरेर्भक्तिं कृत्वा ते परमं पदम् । व्रजंत्यथामुं पप्रच्छ नृसिंहानंद आनतः ॥ ५५ ॥
त्वयेश नवधा भक्तौ कतमा श्रेयसी मता । हरिस्तमूचे यस्य स्यात्तया स्नेहो हरौ दृढः ॥ ५६ ॥
तस्य सैव मता श्रेष्ठा नेतरेत्यवगम्यताम् । गोपालानंदसाधुस्तमथाऽपृच्छत्कृतानतिः ॥ ५७ ॥
किशोराणां च यूनां ते भक्तानामिह सर्वथा । भक्तानां कीदृशां संगोऽवश्यकार्योऽस्ति तद्वद ॥

श्रीहरिरुवाच

वयोवृद्धाश्च ये धर्मज्ञानवैराग्यशालिनः । हरेरनन्यभक्ताः स्युस्ते तेषां संगमोचिताः ॥ ५९ ॥
नांजः क्षत्रमथापृच्छत्तं प्रभो योजितं मनः । त्वय्येकेन तु भक्तेन क्रोधेनैव दृढं सदा ॥ ६० ॥
भयेन त्वयि चैकेन स्नेहेनैकेन चेश्वरे । योजितं स्याद् दृढं स्वांतं तेषां कतम उत्तमः ६१ ॥
तमुवाच हरिर्येन मनः स्नेहेन योजितम् । स श्रेष्ठोऽथ शिवानंदस्तं पप्रच्छ कृतानतिं ॥६२॥
भजतोऽपि हरे भक्त्या यस्य त्वामंतरे प्रभुम् । सारासारविवेकोऽपि वैराग्यं च भवेन्न हि ॥
तस्यैतद् द्वितयं केनोपायेन हृदये भवेत् । हरिस्तमूचे तत्तु स्याद्गाढस्नेहेन वै हरौ ॥ ६४ ॥
यस्य यस्मिन्भवेत्स्नेहस्तत्र चेद्विघ्नमाचरेत् । जनः कश्चित्तर्हि तस्मिन् क्रोधः स्यात्तं च स त्यजेत्
न केवलं मनुष्येषु भवत्येव पशुष्वपि । दृश्यते हि महान् क्रोधः स्वाभीष्टार्थांतरायके ॥६६॥
महिषीं कामयन् कश्चिन्महिषो महिषांतरम् । दृष्ट्वा क्रोधेन तं हंति तथा सर्वत्र दृश्यते ६७॥
तस्मात्कृष्णे दृढस्नेहे सति पुंसोऽप्रयत्नतः । वैराग्यं च विवेकश्च भवतीत्यवगम्यताम् ॥ ६८॥
इत्युक्तः स मुनिर्भूयस्तं पप्रच्छ जगद्गुरुम् । बुद्धिमंतौ हरेर्भक्तौ द्वौ कौचिद्भवतः प्रभोः ६९॥
तत्रैकस्त्वतिविश्वासी यथात्मानं भवान्वदेत् । तथैवाऽसंशयं कुर्यान्नतु स्वस्य प्रियं क्वचित् ७०॥
त्वदुक्तमपि चान्यस्तु विचार्य वचनं हृदि । यावत्स्यादुचितं स्वस्य तावत्कुर्यान्न चाऽखिलम् ॥
एतयोः कतरः श्रेष्ठ इति पृष्टोऽब्रवीत्स तम् । विश्वासी भगवद्वाक्ये यः स एवोत्तमो मतः ॥
रामायणे श्रीरामस्य वाक्यमस्त्येवमेव हि । भक्तं मद्दृढविश्वासं यामि मातेव बालकम् ॥७३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्याश्रुत्य वचस्तस्य प्रसन्नः सोऽभवन्मुनिः । आत्मानंदस्ततोऽपृच्छत्तं प्रगम्य कृतांजलिः ७४॥
यावज्जीवं हरेरेव कार्यमस्ति प्रियं मम । एवं हृदि भवेद्यस्य निश्चयः सुदृढीकृतः ॥ ७५ ॥
विश्वासः कथमागच्छेत्तस्य ते त्वत्सतां हृदि । अयमत्यंतदृढतायुक्तोस्ति भक्तिभागिति ॥ ७६ ॥

श्रीहरिरुवाच

यदासावतिरोगी स्यादस्य शुश्रूषणं न च । सम्यङ्न कुर्यात्कश्चिदपि तदापि स हरिप्रियः ॥
कस्य चाप्यगुणं नैव गृह्णीयाद्भजतो हरिम् । आगच्छेत्तस्य विश्वासो हृदये कृष्णतत्सताम् ७८॥
तथा निर्दोषमपि च स्वं हरिर्वापि तज्जनाः । यदि क्वाप्यवमन्येरंस्तदापि स्यादविक्रियः ७९ ॥
तथा स्वनियमेषु स्यादेकस्यापि च्युतिः क्वचित् । यदि तर्ह्यतिखिन्नः सन्कुर्यात्तन्निष्कृतिं द्रुतम् ॥
दुःसंकल्पे तथा क्वापि जाते स्वांते भृशाकुलः । दैह्ये दोष यथाऽन्यस्तु तथासौ तावतोत्तपेत् ॥
एवं लक्षणवान् यः स्याद्विश्वासस्तस्य सर्वथा । स्याद्धरेश्च तदीयानां दृढभक्तोऽस्त्यसाविति ८२॥
इति प्रश्नोत्तरं श्रुत्वा प्रसन्नः सोऽभवन्मुनिः । ततो भगवदानंदस्तं पप्रच्छ कृतांजलिः ॥८३॥
कथं ज्ञायेत भगवंस्तव त्वत्सेविनां सदा । माहात्म्यं हृदयेऽस्त्यस्य भक्तस्यात्र मुमुक्षतः ॥८४॥

श्रीहरिरुवाच

कुर्याद्धरेस्तत्सतां च सेवां निश्छद्म यो मुने । प्रीत्या तस्यास्ति हृदये तन्माहात्म्यमितीयताम् ॥
खाद्यपानशिरःपाणिपादसंवाहनादिभिः । स कुर्याद्रोगिणां सेवां साधूनां च यथोचितम् ॥८६॥
यद्यद्वस्तु प्रियं स्वस्य प्राप्तं स्यादात्मनोंऽतिके । तत्तत्तेभ्योऽर्पयित्वादावुपयुंज्यादसौ ततः ८७॥
एवं विदधतः प्रीत्या भक्तस्य हृदये मुने । अखंडं कृष्णतद्भक्तमहिमास्तीति बुध्यताम् ॥ ८८ ॥
इत्युक्त्वा तं तु सोऽपृच्छत्स्वयमीशः सतोऽखिलम् । कश्चिदेकांतिको भक्तो वर्त्तते परमात्मनः ॥
धर्मो ज्ञानं च वैराग्यं भक्तिश्चेति चतुष्टयम् । तीव्रमेवास्ति तच्चास्य नान्यैः शक्यं प्रधर्षितुम् ॥
अथापि धर्मादिषु तु क्वचिच्छैथिल्यसंभवः । जायते तस्य किं तत्र कारणं स्यात्तदुच्यताम् ९१॥
इति प्रश्नं गुरोः श्रुत्वा गोपालानंद आह तम् । ब्रह्मानंदश्च भगवान् दयैवाऽत्रास्ति कारणम् ॥
एकांतिको हि यो भक्तः स साक्षात्कृष्णवद्भुवि । प्रवर्त्तने समर्थोऽस्ति धर्मस्यैकांतिकस्य वै ॥
दयाधिक्यवतस्तस्य यत्किंचिद्बाह्यदृष्टितः । वर्त्तनं तत्स्वाश्रितानां जीवानां श्रेयसे परम् ॥९४॥
त्वमेवाश्रित्य कतिचिज्जडार्षभशुकोपमः । भक्ता भवेयुरित्येव हेतुना स तथा भवेत् ॥ ९५ ॥
अन्यस्तु हेतुर्नास्तीति श्रुत्वा प्रश्नोत्तरं प्रभुः । तावुवाचाऽस्य प्रश्नस्य त्विदमेवोत्तरं मतम् ॥

सुधोपमां वाचमितीश्वरस्य तौ त्यागिवर्यावपरे च संतः ।
निशम्य भक्ता गृहिणोऽपि सर्वे मोदं हृदि प्राप्य च तं प्रणेमुः ॥ ९७ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्तत्रिंशदधिकद्विशततमस्तरंगः ॥२३७॥ १४ ॥

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । शुचिकृष्णत्रयोदश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स भूभुजः । स्वावासे स्वासनेऽराजत्सितसूक्ष्मघनांशुकः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वृतः सहस्रशो भक्तैस्त्यागिभिर्गृहिभिस्तथा । हारान् दधत् कौंदपौष्पान् स उवाच सतोऽखिलान्
कृष्णभक्तो यदैकांत उपविश्य निजांतरे । कृष्णस्य मानसीमर्चां ध्यानं वा कर्तुमीहते ॥ ४ ॥
तदा स्मृतिपथं याति तस्य पुंसः पराभवः । असद्देशादियोगाद्यो विषयैः प्राकृतः स वै ॥५॥
कामक्रोधादिभिर्वापि यः कृतः स्वपराभवः । सोऽपि स्मरणमायाति तदा च ध्यातुरंतरे ॥६ ॥
ततो ध्यानसुखं तस्य जायते नैव किंचन । वेदना तु महत्येव जायतेऽसत्स्मृतेर्हृदि ॥ ७ ॥
भक्तेर्विधासु नवसु स्वाभीष्टतमयैकया । तस्या नाशे सति भवेत्कृष्णार्चाध्यानजं सुखम् ॥८॥
युद्धे शस्त्रक्षतार्त्तस्य युक्तपट्टकबंधनात् । अर्त्तिनाशे भवेन्निद्रासौख्यं यद्वत्तथैव तत् ॥ ९ ॥
यया तु भक्तिविधया सुखं भवति तस्य सा । स्वागमित्यत्रगंतव्यं दृढीभूतं हितावहम् ॥१०॥
स्वकमंगमतो भक्तो विदित्वाऽऽश्रित्य तद् दृढम् । हरेर्मानसपूजादि कुर्यात्तेन सुखं भवेत् ॥
अविदित्वा तु यः स्वांगं ध्यानादि कुरुते हरेः । स नाप्नोति सुखं तेन ततस्तज्ज्ञेयमंजसा ॥
कार्ष्णेतरांस्तु संकल्पान् सर्वथा हंति सर्वशः । स्वांगानुकूलं विहिता भक्तिरेवेति गम्यताम् ॥
नवधापि विधातव्या भक्तिस्तत्र विशेषतः । स्वांगभक्तिर्विधेयेति ज्ञेयः सिद्धांत औद्धवः १४॥
जगद्गुरोरित्यमृतोपमानं वचः प्रभोस्तस्य निशम्य सर्वे ।
ते त्यागिनोऽथो गृहिणोऽपि भक्ताः सदोनिषण्णा अलभंत मोदम् ॥ १५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावष्टत्रिंशदधिकद्विशततमस्तरंगः ॥ २३८ ॥१५॥

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । अमायां शुचिमासस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स सद्मनः । वेद्यां प्राचीनवक्त्रस्य न्यषीदत्तूलिकासने ॥ २ ॥
सितवासा दधत्पौष्पान् कंठे हारांश्च शेखरान् । उष्णीषे निजभक्तौघैर्नानादेशागतैर्वृतः ॥३॥
सतश्च गृहिणो भक्तान्सर्वान्प्रति जगाद सः । सर्वे भक्ताः शृणुत वः किंचित्पृच्छाम्यहं हितम्
हरिभक्तस्य पुंसोऽत्र गुणहीनस्य देहिनः । वर्जने न प्रयासोऽस्ति स त्वस्ति गुणिवर्जने ॥ ५ ॥
भूरिसद्गुणयुक्तः स्यात् पुमान् यस्तु धरातले । तस्य त्यागो भवेन्नैव प्रीतिहेतुर्गुणो यतः ॥६॥
गुणवान् पुरुषो यः स्यात्सोऽस्तु स्वीयः परोऽथ वा । अनायासेन तस्मिन् स्यात्प्रीतिः सर्वजनस्य हि
प्रीतिस्तु गुणजाता या साऽविचाल्या भवेद् दृढा । ततः कथं भवेत्त्यागो गुणिनो धीमतापि च
एवं सति तु भक्तस्य कृष्णादन्यत्र कुत्रचित् । केनोपायेन न भवेत्प्रीतिः क्वापि तदुच्यताम् ९॥
इति पृष्टास्तु ते भक्ता यथामति तदुत्तरम् । यथाकथंचिदवदंस्ततः स स्वयमाह तत् ॥ १० ॥
यथा पतिव्रता नारी पत्युरन्यत्र पूरुषे । प्रीतिं न कुर्यात् क्वापीह तथाऽन्यत्र हरेस्तु सः ११॥
दरिद्रो वा कुरूपो वा रोगी वृद्धोऽथ वा निजः । पतिरेव प्रियस्तस्या न त्वन्योऽतिगुणोऽपि वै
रूपतारुण्यवित्ताद्यैः पूर्णमप्यन्यपूरुषम् । प्रीत्या तु सा क्वचिन्नैव पश्येद्वा तेन संवदेत् ॥१३॥
देवरश्वशुरादीनामतिथीनां च सा नृणाम् । कुर्यादन्नांबुभिः सेवां पतिसंबंधहेतुना ॥ १४ ॥
लेशमात्रमपि प्रीतिर्न त्वस्या गुणिभावतः । भर्त्रन्यपुरुषे क्वापि स्वप्नेऽपि भवति ध्रुवम् १५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं यस्य भवेत्प्रीतिः प्रत्यक्षपुरुषोत्तमे । तस्य प्रीतिर्भवेन्नैव गुणिन्यपि हि पूरुषे ॥ १६ ॥
कृष्णभक्तेषु तु प्रीतिः कृष्णसंबंधतो भवेत् । नास्य तद्गुणदृष्ट्येति गुणित्यागोऽवगम्यताम् ॥
स्वप्राप्ते श्रीहरौ साक्षात् प्रीतिस्तस्य च यादृशी । तादृशी तु भवेन्नैव हरे रूपांतरेष्वपि १८ ॥
यथा हनुमतः प्रीतिर्वर्त्तते चिरजीविनः । अद्यापि श्रीराम एव न तु कृष्णादिमूर्त्तिषु ॥ १९ ॥
एवं यः प्रीतिमान् कृष्णे भवेद्भक्तोऽचलस्थितिः । ऐकपत्यं तु तस्यैव ज्ञातव्यं सुदृढं सदा ॥
प्रतिव्रतोपमा प्रीतिः स्वस्वामिनि हरौ दृढा । यस्य न स्यात्तस्य भक्तिर्ज्ञातव्या व्यभिचारिणी
तस्माद्भक्तेन सुधिया सर्वथा सर्वदात्मनः । प्रीतिः कार्या हरावेव नान्यत्र तु कदाचन ॥ २२ ॥

श्रुत्वेति तस्यामृततुल्यवाणीं ते साधवोऽन्ये च सदोनिषण्णा ।
तदीयभक्ता गृहिणोऽपि सर्वे तस्मिन्नवापुर्दृढमैकपत्यम् ॥ २३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावूनचत्वारिंशदधिकद्विशततमस्तरंगः ॥२३९॥१६॥

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । शुक्लषष्ठ्यां नभोमासे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स सद्मनः । वेद्यां प्राचीनवक्त्रस्य पीठोत्तम उपाविशत् ॥ २ ॥
सितांशुकः स्रजं पौष्पीं दधत्कंठे वृतो निजैः । त्यागिभिर्गृहिभिश्चासौ प्रोवाच स्वाग्रगान्सतः ॥
श्रीमद्भागवते यादृक् स्कंधे भवति पंचमे । राजर्षिभरताख्यानं नाख्यानं तादृशं परम् ॥ ४ ॥
अत्रैवातिचमत्कारो वर्त्तते शृण्वतां नृणाम् । कृष्णेतरपदार्थे यन्मुमुक्षोर्न मनो व्रजेत् ॥ ५ ॥
साक्षात्कृष्णावतारस्य ऋषभस्य सुतोहि सः । कृष्णार्थं मलवत्यक्तराज्यश्रीरात्मदर्शनः ॥ ६ ॥
हरिक्षेत्रनिवासी च भजन् कृष्णमहर्निशम् । स्नेहान्मृगार्भे कृपया भक्तिभ्रष्टोऽभवन्मृगः ॥७॥
कृष्णतद्भक्तभिन्नार्थे स्नेहः पापं महन्मतम् । येनार्षभोऽपि राजर्षिर्मृगत्वमगमद् द्रुतम् ॥ ८ ॥
अत एव स विप्रत्वेऽनंतरं मृगजन्मनः । निःसंगो व्यचरद्भूमौ जडवृत्तिर्भजन् हरिम् ॥ ९ ॥
अत एव सदा भक्तैर्बुद्धिमद्भिर्मुमुक्षुभिः । कृष्णेतरपदार्थेषु कार्या नाऽल्पापि वै रतिः ॥ १० ॥

इति तस्य वचोऽमृतं प्रभोर्निखिला भक्तजना निपीय ते ।
मुनयो गृहिणश्च मानसे परमं हर्षमवापुरानताः ॥ ११ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चत्वारिंशदधिकद्विशततमस्तरंगः ॥२४०॥१७॥

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । दशम्यां नभसः कृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । उपाविशत्प्राङ्मुखस्य वेद्यां पीठे सितांशुकः ॥ २ ॥
बिभ्रत्पुष्पस्रगापीडान् वृतो भक्तैः सहस्रशः । त्यागिभिश्च गृहस्थैश्च स्वाननार्पितदृष्टिभिः ३ ॥
पप्रच्छ रघुवीरस्तं प्रणम्य पुरतः स्थितः । जाग्रतीव स्थितिः स्वप्ने जीवस्य न कुतः प्रभो ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीहरिरुवाच

भवंति देहिनां तिस्रोऽप्यवस्थास्त्रिगुणात्मिकाः। एकैकश्च गुणोऽप्यस्ति मिश्रोऽन्याभ्यां पृथक् पृथक्
रजोगुणात्मिकावस्था स्वप्नसंज्ञा हि वर्त्तते। तमः सत्त्वविमिश्रस्य प्राधान्यं रजसोऽत्र हि ॥६॥
उद्रेके तमसस्तत्र जाड्याधिक्येन कर्हिचित्। अनुभूतमपि स्वप्नं देही वक्तुं न शक्नुयात् ७॥
सत्त्वस्य क्वचनोद्रेके जाते स्वप्ने तु देहिनः। स्थितिर्भवेज्जाग्रतीव तत्स्मृतिश्च यथाक्रमम् ॥८॥
उद्रेको रजसस्त्वत्र वर्त्तते प्रायशस्ततः। भ्रांतत्वं जायते तेन जाग्रद्वन्नास्ति तत्स्थितिः ॥ ९ ॥
निर्लोभानंदसाधुस्तमथापृच्छत्कृतानतिः। जाग्रत्यदृष्टं स्फुरति कथं स्वप्ने तथाऽश्रुतम् ॥ १० ॥

श्रीहरिरुवाच

अदृष्टाश्चाऽश्रुता येऽर्था इह जन्मनि तेऽपि चेत्। स्वप्ने स्फुरेयुस्तर्ह्येतेऽनुभूताः पूर्वजन्मसु ॥
तेषां वासनया नूनमंतःकरणसंस्थया। स्फुरणं जायते स्वप्ने नान्यथेत्यवधार्यताम् ॥ १२ ॥
अखंडानंदसाधुस्तमथापृच्छत्कृतांजलिः। सुखं दुःखं च सर्वेषां पूर्वकर्मानुसारतः ॥ १३ ॥
भक्तस्येति हे स्वामिन्प्राबल्यं पूर्वकर्मणाम्। कियत्कालं तिष्ठतीति पृष्टस्तमवदत्प्रभुः ॥ १४ ॥
यथा यथाऽसौ सत्संगे प्रीत्याधिक्यमवाप्नुयात्। तथा तथास्य कर्माणि प्राप्नुयुः खलु जीर्णताम्
ततो न संसृतेर्दाने क्षमंते तानि निश्चितम्। जीर्णौषधान्यबीजानि प्ररोह इव सर्वथा ॥१६॥
यथा जीर्णानि धान्यानि प्ररोहेष्वक्षमाणि वै। भक्षणे तूपयुक्तानि भवेयुः सर्वथा नृणाम् ॥
संसृतेः संप्रदानत्वे तथा तान्यक्षमाण्यपि। दैह्यसौख्ये च दुःखेऽस्य यावज्जीवं क्षमाणि हि १८॥
कर्मणां जीर्णता जाता कथं ज्ञेयेति चेद्ब्रुवे। द्वौ शूरौ पुरुषौ कौचिद्भवेतामुद्यतायुधौ ॥१९॥
यावत्तौ युध्यमानौ स्तः परस्परजिगीषया। तावत्तयोर्बलाधिक्यं भवेत्तुल्यं हि देहयोः ॥२०॥
यदा त्वेकतरो यायात्परावृत्तिं तदा स तु। पराजितो निर्बलश्च विपरीतस्तथेतरः ॥ २१ ॥
एवं कार्ष्णो जागतश्च संकल्पौ द्वौ परस्परम्। युध्यमानौ तुल्यबलौ भवतः समरोत्सुकौ २२॥
यदा कार्ष्णार्दितो यायात्परावृत्तिं तु जागतः। पूर्वकर्ममयस्तर्हि स ज्ञेयो जीर्णतां गतः २३ ॥
प्राक्कर्मवासनारूपं मनो भवति तद्युतात्। संकल्पा जागताः सर्वे उद्गच्छंति मुहुस्ततः ॥ २४ ॥
कृष्णभक्तिप्रतापेन महत्संगेन चाऽनिशम्। प्रशमं यांति ते सर्वे सा कर्मजीर्णतेयताम् २५ ॥
इत्युक्त्वा तं स पप्रच्छ सतः सर्वान्सतां गतिः। नष्टो देहाभिमानः स्याद्यस्य भक्तस्य सर्वथा ॥
तथा नष्टा भवेयुश्च सर्वा विषयवासनाः। कथं तदुभयं ज्ञेयं परैस्तद् ब्रूत साधवः ॥ २७ ॥
प्रश्नस्येत्युत्तरं वक्तुं यदा ते नाऽविदंस्ततः। स्वयमेवाब्रवीत्स्वामी हर्षयन्नात्मसंश्रितान् २८ ॥
देहाभिमानो नष्टः स्याद्धरेर्भक्तस्य यस्य तु। नष्टा च पंचविषयैषणांतःकरणात्तथा ॥ २९ ॥
तस्य या याः क्रियास्तास्ताः स्युर्वै भगवदाज्ञया। यावदाज्ञं स कुर्वीत क्रिया न तु निजेच्छया
देहाभिमानं रक्षेत्स तत्तत्कार्योचितं तया। विषयाणां चोपभोगं कुर्याद्देव यथोचितम् ॥३१॥
भूमेरुत्थापितस्य स्याद् दुर्बलस्य पशोः स्थितिः। बलिभिर्विधृतिर्यावत्तच्च्युतौ तु न सा यथा ॥
तथाविधस्य भक्तस्य तथा स्याद्दैहिकी क्रिया। यावत्स्याज्ञा प्रभोः स्वस्य तावत्येव न चान्यथा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नष्टाभिमानविषयवासनो भक्त उत्तमः। ईदृग्लक्ष्मेति बोद्धव्यो विपरीतस्तथान्यथा ॥ ३४ ॥
तथाविधस्तु यो भक्तो व्यवहारक्रियासु सः। आसक्तस्ताः स्वतो हातुं शक्नुयान्न तयाऽपि च
वाचं निशम्येति हरेरुदारां सुधोपमां साधुजनाः समस्ताः।
ते च द्वितीयाश्रमिणोऽपरेऽपि सदोनिषण्णा मुदिता बभूवन् ॥ ३६ ॥
इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधावेकचत्वारिंशदधिकद्विशततमस्तरंगः॥२४१॥१८॥

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते। नभःकृष्णत्रयोदश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः। वितर्दौ प्रत्यगास्यस्य मंचासन उपाविशत् ॥ २ ॥
स मल्लिकाकर्णिकारपुष्पहारान् गले दधत्। सितवासा वृतो नानाभक्तवृंदैः सतोऽब्रवीत् ३॥
त्यागिनो हरिभक्ता ये स्युश्चेत्तेषु कुलक्षणे। भवेतां द्वे काममैकं स्वजनप्रियतेतरत् ॥ ४ ॥
आभ्यां द्वाभ्यां न सद्वृंदे तेषां शोभा भवेत् क्वचित्। एते च भवतो येपु ते मताः पशुभिः समाः
अष्टधैव ततस्त्यागः संरक्ष्यो योषितस्तु तैः। स्वजनेषु च न प्रीतिः कार्याऽल्पाऽपि मुमुक्षुभिः ॥
स्वसंबंधिपु पश्यामि यस्य प्रीतिरहं क्वचित्। तस्य मे हृदये भूयांस्त्यागिनो दोष एति हि ॥७॥
महापापादपि महत्स्वजनप्रीतिलक्षणम्। भवति त्यागिनः पापमनिवार्यं हि निष्कृतैः ॥ ८ ॥
तस्माद्देहाच्च देहेभ्यः पृथगात्मास्ति चिन्मयः। यः स एवाहमस्मीति बुध्वा तत्प्रीतिमुत्सृजेत् ॥
प्रीतिरत्रत्यदेहेषु प्राग्जन्मजनितेष्विव। विचार्य नैव कर्त्तव्या ह्युभयेषां समस्ततः ॥ १० ॥
कृष्णाश्रयस्य माहात्म्यात्प्रीतिं ये तेपु कुर्वते। द्विगुणा जायते तेषां सा संबंधद्वयेन वै ॥११॥
तेषां सा तद्वतां कृष्णतद्भक्तेभ्योऽपि भूयसी। जायते स्वजनेष्वेव तया ते सत्पथाच्च्युता १२॥
स्वजनेपु यथा प्रीतिर्नार्हा तद्वच्च सर्वथा। पुंसु नैव विधातव्या स्वशुश्रूषारतेष्वपि ॥ १३ ॥
हरिभक्ततयाप्येषु प्रीतिर्नैवोचिता सताम्। संबंधद्वयतस्तस्या द्वैगुण्यं स्यात्स्वपातकृत् ॥ १४ ॥
सशर्करेऽपि हि क्षीरे दूषिते सर्पलालया। सर्वथैव यथा पेयबुद्धिस्त्याज्या सुखार्थिभिः ॥१५॥
स्वार्थसिद्धया दूषितेषु तथा भक्तेष्वपि प्रभोः। प्रीतिर्न सर्वथा कार्या निजश्रेयोर्थिभिः क्वचित्
अन्यथा तु हरेर्ध्याने क्रियमाणे हृदंबुजे। तेषामपि भवेत्स्फूर्त्तिः स्नेहाधिक्यान्मुहुर्मुहुः ॥१७॥
भरतस्यार्षभस्यापि मृगार्भस्फुरणं मुहुः। क्रियमाणे हरेर्ध्याने स्नेहाधिक्यादभूद्यथा ॥ १८ ॥
तथा तेषामपि भवेत् कृष्णान्यस्फुरणं हृदि। एतदेव महद्विघ्नं भक्तानामिति गम्यताम् ॥१९॥
एषा वार्त्ता मुख्यसद्भिः कर्त्तव्या स्वस्वमंडले। प्रत्यहं चेतरैः सर्वैः श्रव्या त्यागिभिरादरात् ॥
मदाश्रितैर्वर्णिभिश्च तथैषा भक्तपत्तिभिः। कार्या श्रव्या वाऽऽदरेण स्वहिताय दिने दिने २१॥
यस्मिन् दिनेऽस्याः श्रवणं कीर्त्तनं वा भवेन्न हि। तत्परेऽहनि कर्त्तव्य उपवासो मदाज्ञया २२॥
हारिप्रसादेरिति ते तु वाचं पीयूषतुल्यां मुनयो निशम्य।
भक्तास्तथाऽन्ये गृहिणश्च सर्वे ये तेऽपि मोदं परमं प्रपन्नाः ॥ २३ ॥
इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिंधौ द्विचत्वारिंशदधिकद्विशततमस्तरंगः॥२४२॥१९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । अमायां नभसः कृष्णे वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स भूभृतः । स्वावाले स्वासनेऽराजस्सितवासा वृतो निजैः ॥ २ ॥
दीनानाथः पृच्छति स्म तं विप्रो विहितानतिः । कालः कर्म स्वभावश्च सुखदुःखाप्तिहेतवः ३॥
तत्र कालस्तव हरेः शक्तिरित्यस्ति वर्णितः । जीवेन विहितं यत्तत्कर्मेति च निरुच्यते ॥ ४ ॥
स्वभावस्य स्वरूपं तु न सम्यगवगम्यते । तद्वक्तुमर्हसि स्वामिन्निति पृष्टोऽब्रवीत्स तम् ॥ ५ ॥
प्राग्भवीयेषु जीवानां नानाकर्मसु यानि तु । पक्कीभूयैकरसतां जीवैः प्राप्तानि तानि हि ॥ ६ ॥
स्वभाव इति संप्रोक्तः प्रकृतिर्वासनेति च । इत्युक्त्वोपरतं मुक्तानंदः पप्रच्छ तं नमन् ॥ ७ ॥
जीवैकारसतां प्राप्ता हृत्स्था या कर्मवासना । सा कथं नश्यति स्वामिन् पृष्ट इत्यवदत्स तम् ॥
आत्मनिष्ठायुजा कृष्णभक्त्या सा तु विलीयते । विनात्मनिष्ठां भक्तिस्तु न स्यादेकांतिकी ध्रुवम्
यथा कृष्णे तथाऽन्यत्र पदार्थे मायिकेऽपि च । तया विना भवेत्प्रीतिस्तद्युग्भक्तिरतो मता १०॥
असद्देशादियोगेन सा चेत्क्षुब्धा भवेत् क्वचित् । तथापि सा यथापूर्वं स्थिरा स्यादात्मनिष्ठया ॥
आत्मनिष्ठायुता साऽऽतो वासनाक्षयसाधनम् । भवतीत्यवगंतव्यं मुमुक्षोर्दुःखसंसृतेः ॥१२॥

पीत्वेति वाचं स हरेः सुधाभां तोधं महांतं हृदये जगाम ।
तथाऽपरे साधुजनाश्च सर्वे सदोगता ये गृहिणश्च तेऽपि ॥ १३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ त्रिचत्वारिंशदधिकद्विशततमस्तरंगः॥२४३॥२०॥

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । नवम्यां भाद्रपच्छुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स वेश्मनः । वितर्दौ प्रत्यगास्यस्य स्वासने समुपाविशत् ॥ २ ॥
सितवासाः पुष्पहारान् दधत्कंठे वृतो निजैः । भक्तैश्च प्रैरयत्साधून्प्रश्नोत्तरकृते प्रभुः ॥ ३ ॥
गोपालानंदमप्राक्षीत्ततः शुकमुनिर्मुनिम् । तरंति मायां जीवास्तु भक्त्या कृष्णस्य नान्यथा ४॥
देहांते ते प्राप्नुवंति ब्रह्मधाम तयैव च । केवलेन तु धर्मेण देवलोको ह्यवाप्यते ॥ ५ ॥
पुण्यस्यांते ततो जीवाः पतंति विवशा भुवि । अवतारास्तु कृष्णस्य जायंते धर्मगुप्तये ॥ ६ ॥
भक्तेः संस्थापनार्थं तु नावतारो हरेरिति । गीतादौ श्रूयतेऽतः किं धर्मे भवति गौरवम् ॥७॥
इति पृष्टः सता तेन स मुनिर्नाशकद्यदा । कर्तुं तदुत्तरं सम्यक्तदोवाच हरिः स्वयम् ॥ ८ ॥
जगद्धर्त्ता धर्म इति तस्य संरक्षणे कृते । सर्वस्य जगतोऽपि स्याद्रक्षणं कृतमेव च ॥ ९ ॥
सोऽपि द्वेधा प्रवृत्तश्च निवृत्त इति वर्त्तते । उभयः कृष्णसंबंधाद्भगवद्धर्म उच्यते ॥ १० ॥
स एव भक्तिरित्युक्तो भगवत्तुष्टिकृद् भृशम् । कृष्णसंबंधरहितो धर्मः कर्मेति कथ्यते ॥११ ॥
प्रादुर्भावे भगवतो धर्मः सर्वोऽपि भूतले । सुरक्षितो भवेदेव ह्यन्यदा तु स निर्बलः ॥१२ ॥
कृष्णमाश्रित्य वर्त्तते धर्मो भक्तिश्च वेदनम् । अतो यत्र स तत्रैव स्यात्तेषां हि प्रवर्त्तनम् १३॥
अतः कृष्णावतारस्य हेतुः शास्त्रे मतः क्वचित् । धर्मस्य स्थापनं क्वापि भक्तेर्ज्ञानस्य च क्वचित् ॥
एकस्य ग्रहणं यत्तदन्ययोरुपलक्षणम् । इति ज्ञात्वा कृष्ण एव सेव्यः सर्वार्थसिद्धये ॥ १५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उत्साहः स्यान्न सेवायां माहात्म्यज्ञानमंतरा । अतस्तद्बुद्धये सेव्याः साधवः साधुलक्षणाः ॥
साक्षान्नराकृतेः कृष्णात्तत्साधुभ्यस्तथेतरत् । वस्तु किंचिन्न सेवार्हं प्रीतियोग्यं च कुत्रचित् ॥
ममैवैतन्मतं कृष्णतदेकांतिकभक्ततः । नान्यत्र क्वापि कर्त्तव्या प्रीतिर्वस्तुनि सर्वथा ॥ १८ ॥
स्वाभाविकी मम त्वस्ति मनसो वृत्तिरीदृशी । कृष्णकार्ष्णेतरार्थे यत्प्रीतिर्नैव भवेदिति ॥१९॥
वनाद्यादौ निवासे च शुकदत्तर्षभादिवत् । वृत्तिः साहजिकी मेऽस्ति न महानगरादिषु ॥
अहमीदृक्स्वभावोऽपि कृष्णकार्ष्णानुरागतः । ग्रामे वसामि च पुरे संमर्दे लक्षशो नृणाम् ॥
न ग्रामपुरवासे मे स्वार्थस्त्वन्योल्पकोऽपि हि । तस्मिन्सत्यपि निर्बंधो भवामीव नगे वने ॥२२॥
कृष्णार्थं वा तदीयार्थं प्रवृत्तिं महतीमपि । कुर्वाणोऽपि निवृत्तिं तां जानामि हृदये किल २३॥
हरिभक्तस्य दोषं तु न गृह्णामि कदाचन । दैहिकं वाचिकं वापि स्वल्पं स्वाभाविकं मुनी ॥
स्वगतं तं तु महता यत्नेनापि क्षिपाम्यहम् । यावत्तिष्ठेत्स विदितस्तावन्न स्यात्सुखं हृदि ॥२५॥
हरिभक्ते महांतं तु ब्रह्मचर्यच्यवादिकम् । दोषं गृह्णामि तं यस्तारयाजयामि च सर्वथा ॥२६॥
अत्यजंतं तु तं सद्यस्त्यजामि तमभक्तवत् । तदत्यागे तु तत्संगादन्योऽपि स्याद्धि तत्समः २७॥
भक्तान् जित्वा विवादैश्च न प्रसीदामि चेतसि । प्रसीदामि च तेभ्योऽहं संप्राप्यैव पराजयम्
पराजयस्तु भक्तस्य विवादैर्यैः कृतो भवेत् । महापापादपि तु तं जानाम्यधिकमेव हि ॥२९॥
हरिभक्तस्य दोषं यो ममाग्रे पुरुषो वदेत् । न सदृष्टिप्रियो मेऽथ तद्वस्तान्नांबु न प्रियम् ३०॥
देहसंबंधिपुरुषो यः सोऽपि यदि तादृशः । तर्हि तस्मिन्नपि प्रीतिर्मम सद्यो निवर्त्तते ॥ ३१ ॥
आत्मैव सत्तारूपोऽहं कृष्णभक्तोऽस्मि निश्चितम् । इति ज्ञानवतः प्रीतिर्दुस्त्यजा दैहिकेषु नो ॥
यस्तु शुद्धात्मरूपेण न स्थातुं शक्नुयात्पुमान् । कामलोभक्रुधाद्यास्तं पीडयेयुर्हि शत्रवः ३३॥
सत्संगिनोऽत्र ये संति तेभ्यस्तस्य पृथक्तया । वैजात्यं स्फुटमेव स्यात्तेषामेकांतिकत्वतः ॥३४॥
एतेषु कांश्चिज्जानामि मनुजाकृतिमत्स्वपि । श्वेतवैकुंठगोलोककृष्णपार्षदसन्निभान् ॥ ३५ ॥
कांश्चिच्च ब्रह्मधामस्थकृष्णपार्षदयूथतः । समानत्वेन जानामि भक्तेष्वेतेषु मद्धृदि ॥ ३६ ॥
स्वधर्मज्ञानवैराग्योपेता भक्तिर्हृदि स्थिरा । एतेषामस्ति सततं तद्धेते मेऽतिवल्लभाः ॥ ३७ ॥
स्वधर्मादिविहीना स्याद्यस्य भक्तिः पुमान्स तु । शैथिल्यमाप्नुयादेव परिणामे न संशयः ॥
तथाविधस्तु स पुमान्स्वयमेवौद्धवाध्वतः । बहिर्भवति तत्स्थो वा तत्सुखं लभते न हि ॥३९॥
अत एकांतिकत्वेन भजनीयो हरिः सदा । देहे दैहेषु च प्रीतिं परित्यज्यैव सर्वथा ॥ ४० ॥
एवं कृष्णं भजेयुर्ये तेषां नैव मनो व्रजेत् । देहदुःखापमानाद्यैरपि क्वापि परां गतिम् ॥४१ ॥
ईदृशा वैष्णवा ये ते सुहृद्बंधुजना मम । भवंति सर्वथा नान्ये दैहिका अपि ते क्वचित् ॥
यावज्जीवं स्थैर्यमस्ति सहैवैतैर्मम ध्रुवम् । देहांतेऽपि हरेर्धाम्नि स्थेयमेतैः सहास्ति मे ॥४३॥
एवं हि निश्चयो मेऽतो युष्माभिश्च मदाश्रितैः । एवमेव हि कर्त्तव्योऽनान्यथेत्युदितं हितम्
हितैषी यो भवेत्तेन स्वकीयाय हितं वचः । वाच्यं तदप्रियमपि मित्रलक्षणमीदृशम् ॥ ४५ ॥
हरेर्निशम्येति वचःसुधाभं साधू उभौ तावपरे च संतः ।
सर्वे गृहस्थाश्च सभोपविष्टाः प्राप्यैव मोदं हृदये दधुस्तत् ॥ ४६ ॥
इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुश्चत्वारिंशदधिकद्विशततमस्तरंगः॥२४४॥२१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शकाब्दे विक्रमार्कस्य वेदाष्टवसुभूमिते । भाद्रकृष्णचतुर्थ्यां तु वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स सद्मनः । वितर्दौ प्रत्यगास्यस्य मंचकाग्र्य उपाविशत् ॥ २ ॥
सितांबरः श्वेतपुष्पहारापीडविराजितः । वृतः सहस्रशो भक्तैः साधुभिर्गृहिभिस्तथा ॥ ३ ॥
गीयमानानि शुश्राव कृष्णपद्यानि साधुभिः । प्रेमभक्तिप्रधानानि स चैकाग्रमनाः प्रभुः ॥ ४ ॥
श्रुत्वा तानि प्रहृष्टोऽसौ प्रोवाच स्वाग्रगान्सतः । ईदृशाः स्निग्धभक्तास्तु दुर्लभाः संति भूतले ॥
हेमंतसिंहो नृपतिः सांप्रतं चास्ति तादृशः । मूलजित्पर्वताद्याश्च संत्यन्येऽपि च केचन ॥ ६ ॥
प्रेमभक्तिमतः स्युः संक्षीणा विषयवासनाः । अनायासेनास्य तिष्ठेदात्मनिष्ठापि सर्वदा ॥ ७ ॥
इति ब्रुवाणं पप्रच्छ मुक्तानंदस्तमानतः । कृष्णर्षयो भजंति त्वां मनुष्याश्च यथारुचि ॥ ८ ॥
त्वां दासत्वेन बहवो नारदाद्या भजंति वै । नरसिंहादयो भक्ताः साध्वीभावेन चाभजन् ९ ॥
एवं द्विधा भक्तभक्त्योर्भक्तिः का वा वरीयसी । तमुवाच हरिस्तेषां भक्तिर्द्वैधापि चैकधा ॥
प्रेम्णि भेदोऽस्ति न तयोः क्रियाभेदे भवत्यपि । भक्तिं विदधतां पुंसां स्त्रीणां देहास्तु मायिकाः ॥
अतस्ते नश्वराः संति नित्या एव च देहिनः । चिद्रूपास्ते न हि नरा न स्त्रियश्च भवंति हि ॥
ते स्निग्धभक्ता देहांते गत्वा भागवतं पदम् । कृष्णेच्छानुसृतान् देहान् प्राप्नुवंति हि निर्गुणान्
तादृशास्ते ततो भक्ताः श्रीहरिं तत्र धामनि । प्रेम्णा संसेवमानास्तु वर्त्ततेऽतिमुदान्विताः ॥
यस्य भक्तस्य तु भवेत्स्त्रीपुत्रद्रविणादिषु । अपि कृष्ण इव प्रीतिः शिथिलः स न सन्मतः १५ ॥
भक्तस्य स्याद्यदि स्त्रीषु पुंसो भक्तास्वपि क्वचित् । कुदृष्टिस्तर्हि तत्पापं महापापाधिकं मतम् ॥
स्त्रीणां संगेन यत्पापमभक्तानां भवेदिह । ततोऽधिकं तद्भक्तासु कुदृष्ट्यैव भवेद् ध्रुवम् १७ ॥
स्वसृमातृसमा ज्ञेया भक्तेनाऽन्याः स्वयोषितः । तत्रापि हरिभक्तायाः स्त्रियस्तास्तु विशेषतः ॥
एवं ज्ञानं दृढं यस्य स भक्तो रसिको भवेत् । तथाभवन्नन्यथा तु भवेद् भ्रष्टो न संशयः १९॥
तथा स्निग्धेन भक्तेन कृष्णतत्सेविनां क्वचित् । दोषस्तु न ग्रहीतव्यो द्रोहबुद्धिर्भवेद्यतः ॥२०॥
मुहुः कृतेभ्यः पापेभ्यो महद्भयोऽपि कदाचन । प्रायश्चित्तैश्च भोगैश्च मुक्तिः स्यादपि कस्यचित्
कृष्णकार्ष्णद्रोहभवात्पापात्तु क्वापि कस्यचित् । केनाप्युपायेन भवेन्नैव मुक्तिश्च कुत्रचित् २२॥
संसृतिं याति स पुमान् राक्षसादिषु योनिषु । न नश्येदासुरी बुद्धिस्तस्य क्वाप्यघरूपिणः २३॥
द्रोहबुद्धिरपि द्वेधा पक्वापक्वेति भेदतः । यस्य पक्वा भवेत्तस्य सा न नश्येत्कदाचन ॥२४ ॥
अपक्वा त्वनुतापेन सतां निश्छद्मसेवया । स्वदैन्येन च तद्भूरिमाहात्म्यज्ञतया क्षयेत् ॥ २५ ॥
कृष्णोऽपि निजभक्तेभ्यः पुंसु द्रुह्यत्सु सर्वथा । अप्रीतो जायते यद्वत्तथा नाऽन्याघकर्तृषु ॥२६॥
वैकुंठे सनकादीनामपमानो यदा कृतः । जयेन विजयेनापि तदा तत्रागमद्धरिः ॥ २७ ॥
उवाच सनकादींश्च सद्भयो द्रुह्यंति ये नराः । मम ते शत्रवस्तांस्तु क्षिपाम्यासुरयोनिषु ॥२८॥
स्वहस्तेन यदा द्रोहः सतां स्यात्तर्ह्यपि ध्रुवम् । छिंद्यां तमपि तत्कालमितरस्य तु किं पुनः ॥
एवमुक्तं भगवता ततस्तौ तस्य पार्षदौ । आसुरीं योनिमापन्नौ भ्रष्टौ वैकुंठलोकतः ॥ ३० ॥
एवमन्येऽपि बहवो महद्द्रोहापमानतः । महत्पदव्याः पतिता दुःखिताश्चाभवन्भृशम् ॥३१॥
तस्मात्सुखेच्छुना पुंसा संतो मान्याः सदैव हि । प्रसाद्या नमनाद्यैश्चाप्यपमाने क्वचित्कृते ३२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथा यथा प्रसन्नाः स्युः स्वस्मिन् हरिरता जनाः। तथा तथा विधातव्यं प्रयत्नेन सुखार्थिभिः

स ईश्वरस्येति वचो निशम्य सुधासमं साधुवरस्तथाऽन्ये।
संतो द्वितीयाश्रमिणश्च भक्ताः सर्वेऽपि ते प्रापुरुदारतोषम् ॥ ३४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ पञ्चचत्वारिंशदधिकद्विशततमस्तरंगः ॥२४५॥२२॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते। आश्वयुज्यां पौर्णमास्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स भूभुजः। स्वावासस्यांगणेऽराजत्पर्यंके धवलांबरः ॥ २ ॥
परितो भक्तनिकरैर्वृतः साधूनुवाच सः। क्रियतेऽकृतपूर्वाऽद्य वार्त्ता तां शृणुताऽखिलाः ॥३ ॥
कर्त्तव्या मानसी पूजा भक्तैः प्रत्यहमीशितुः। तत्तत्कालोचितैरेव स्नानाद्यैरुपचारकैः ॥ ४ ॥
तत्रोष्णकाले शीतेन वारिणा च सुगंधिना। स्नपयित्वा हरिं प्रेम्णा वाससांगानि मार्जयेत् ॥
ततः सितं नवं सूक्ष्मं घनं धौतं सुशोभनम्। यथोचितं च वसनं भक्तस्तं परिधापयेत् ॥ ६ ॥
शिरःपटं सितं सूक्ष्ममुत्तमांगे च धारयेत्। आच्छादयेन्नवीनं तं प्रावारं स तथाविधम् ॥ ७ ॥
हैमे सुशोभने पीठे तमास्थाप्याऽथ चर्चयेत्। तदंगानि मलयजचंदनेन सुगंधिना ॥ ८ ॥
स्वयं घृष्ट्वा वाटिकायां हैम्यां भृत्वा तदात्मनः। धृत्वा करे दक्षदोष्णा ललाटं प्राक्स चर्चयेत्
सम्यङ् निरीक्ष्य तत्तस्य ततः पाणी स चर्चयेत्। सम्यङ् निरीक्ष्य तौ वक्ष उदरं च तथार्चयेत्
पादौ तु कुंकुमेनैव चर्चयित्वा स सर्वतः। सम्यङ् निरीक्ष्य कुसुमैरर्चयेत्तं सुगंधिभिः ॥११ ॥
पौष्पान्हारान् शेखरांश्च केयूरवलयानि च। यथास्थानं धारयित्वा ते निरीक्षेत सादरम् १२ ॥
धूपं दीपं विधायाऽथ नैवेद्यं च समर्पयेत्। यथोचितं यथाकालं यथास्वरुचि तत्तु सः १३ ॥
नीराजयित्वा सप्रेम सस्वजेत तमादरात्। सकृद्द्विर्वापि बहुशो यथास्वस्नेहमर्चकः ॥ १४ ॥
ततः पादांबुजे तस्य धारयेद्धृदि शीर्ष्णि च। तल्लग्नकुंकुमाक्तं च पश्येत्स्वं हृच्छिरस्ततः १५॥
परिष्वंगे तदंगस्थचंदनेनाभिचिह्नितम्। निरीक्षेत वपुः स्वं च पुष्पहारादिभिस्तथा ॥ १६ ॥
पुष्पोद्याने ततो रम्ये निजभक्तजनैः सह। विहरंतं प्रसन्नास्यं तं निरीक्षेत भक्तितः ॥ १७ ॥
वर्षाकाले तु भक्तस्तमादौ स्वहृदि भावयेत्। नद्यां सद्भिः सह स्नात्वा निजांतिक उपागतम् ॥
आर्द्रसर्वांबरं तं तु दृष्ट्वोत्थायाशु धारयेत्। कौसुंभान्येव वासांसि सर्वाण्यपि यथोचितम् १९॥
ततः सिंहासनस्थं तं सकेसरसुगंधिना। चर्चयित्वा चंदनेन पुष्पाद्यैः प्राग्वदर्चयेत् ॥ २० ॥
पूजनांते निरीक्षेत महासौधविराजितम्। भक्तमंडलमध्यस्थं भक्तस्तं परमादरात् ॥ २१ ॥
शीतकाले तु तं भक्तः स्नपयेदुष्णवारिणा। सितं सूक्ष्मं घनं धौत्रं ततश्च परिधापयेत् ॥२२॥
मृदुतूलपटीछन्ने सूक्ष्मप्रच्छदवाससि। तमुपावेश्य पर्यंके वासांसि परिधापयेत् ॥ २३ ॥
हैमसूत्राढ्यकौसुंभपटकं शीर्ष्णि बंधयेत्। यथास्थानं धारयेच्च नीशारं कच्छनीं तथा ॥२४ ॥
कटिबंधनवासश्चाऽमूल्यं कट्यां स बंधयेत्। प्रावारवस्त्रमन्यच्च धारयेत्तं तथाविधम् ॥ २५ ॥
नानारत्नमयीर्हैमी भूषास्तं धारयेत्ततः। प्रत्यंगं संनिरीक्षेत स सप्रेम च सादरम् ॥ २६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ललाटे चंद्रकं चारु कुंकुमेन विधाय तम् । अर्चेत्पुष्पादिभिः प्राग्वदुपचारैर्मनोरमैः ॥ २७ ॥
अंतर्गृहे ततो भक्तैः स्वकीयैः सहसंस्थितम् । महासने भावयेत्तं स्वस्थो भक्तश्चिरं प्रभुम् ॥
इत्थं हि मानसी पूजा यथाकालं यथोचितम् । कर्त्तव्या सकलैर्भक्तैः प्रत्यहं प्रेमवृद्धिकृत् ॥२९॥
इत्युक्त्वा स क्षणं स्थित्वा पुनराह सतः प्रभुः । भक्तैरन्यच्च यद्बोध्यं कथयामि निशम्यताम्
यदा भवेयुः सुप्रीता हरेर्भक्ताः स एव वा । स्वस्मिंस्तदा महद्भाग्यं माननीयं स्वकं हृदि ॥
यदा च ते स्वशिक्षार्थं स्वाप्रियाण्यपि कर्हिचित् । ब्रूयुर्वाक्यान्यपि तदा भाग्यं मान्यं महत्स्वकम्
अहो मद्गुणक्षत्यै कृपयैते वदंति माम् । निःस्पृहा अपि शिक्षार्थवाक्यानीति दयालवः ३३॥
न चाऽप्रियवचःश्रुत्वा क्लेशितव्यं कदाचन । प्रसन्नैरेव सततं भाव्यं तैः स्वहितेच्छुभिः ॥३४॥

सुधोपमानामिति तस्य वाचं निशम्य ते त्यागिजनाः समस्ताः ।
तथा गृहस्था इतरेऽपि तोषं महांतमापुर्हृदये सदःस्थाः ॥ ३५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षट्चत्वारिंशदधिकद्विशततमस्तरंगः ॥२४६॥२३॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । इषस्य कृष्णद्वादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स भूभुजः । गोपीनाथालयेऽराजच्चक्रके धवलांबरः ॥ २ ॥
मुक्तानंदस्तमप्राक्षीन्नानाभक्तगणैर्वृतम् । भक्तास्त्वदीयास्त्वत्सेवां यांति धाम्न्यक्षरे तव ॥ ३ ॥
तत्प्राप्तेः साधनानि स्युर्यानि तानि त्वमर्हसि । वक्तुं मे कृपया स्वामिन्नित्युक्तः स उवाच तम्
श्रद्धा स्वधर्मो वैराग्यं सर्वथेंद्रियनिग्रहः । अहिंसा ब्रह्मचर्यं च सत्संगश्चात्मनिष्ठता ॥ ५ ॥
माहात्म्यज्ञानयुग्भक्तिः श्रीहरेरपि निश्चला । यथालब्धेन संतोषो निर्दंभत्वं दया तपः ॥ ६ ॥
महत्सु हरिभक्तेषु बहुमानः समेषु च । मैत्री हीनेषु तेष्वेव हितस्याचरणं तथा ॥ ७ ॥
इत्येतैः साधनैः साधो भक्ता एकांतिका हरेः । सेवां सुदुर्लभां सम्यक् प्राप्नुवंत्यक्षरे पदे ॥
अथाऽपृच्छच्छुकमुनिः प्रभो संतो वयं सदा । त्वदुक्तनियमेष्वेव प्रीत्या वर्त्तामहेऽखिलाः ९ ॥
आपद्यपि क्वचित्तेभ्यो नैव स्यात् पतनं तु नः । येन तल्लक्षणं किन्तु भवेत्तद्वक्तुमर्हसि ॥ १० ॥

श्रीहरिरुवाच

महत्स्वल्पेषु च हरेर्वाक्येषु स्याद् दृशिः सदा । तेभ्योऽधिकं वा न्यूनं वा वर्त्तनं नैव कर्हिचित्
एतदेव हि विज्ञेयं लक्षणं कृष्णसेविनाम् । कदाचिदापत्कालेऽपि स्वधर्माच्च्यावकं मुने ॥१२ ॥
इत्युक्त्वा स पुनः सर्वान् भक्तानवददीश्वरः । दुस्त्यजां प्रकृतिं मन्ये पुंसां सत्संगिनामपि ॥
सत्संगे स्वार्थबुद्धिः स्याद्यस्य तस्य तु सा व्रजेत् । यथोत्तमक्षितिभृतस्तस्य संबंधिनां तथा १४॥
एतेषां स्वगृहेऽस्माकं स्वार्थः स्थापनलक्षणः । वर्त्ततेऽतो यदस्मभ्यं रोचते तद्धि कुर्वते ॥१५ ॥
न त्वेते किंचिदप्यात्मरोचकं कुर्वते क्वचित् । अतः प्रकृतिरेतेषां सुत्यजाऽभूदितीयते ॥ १६ ॥
एवमेव हि सत्संगे मन्येरन्स्वार्थमत्र ये । तेषां तु सुत्यजा पुंसां सा स्यादेव न संशयः ॥१७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भयेनाप्यस्ति तत्त्यागो न त्वसौ सार्वकालिकः । चौर्यत्यागो राजभयात्तस्कराणामिव क्वचित् ॥
दुःस्वभावापनोदार्थं मया मर्मभिदो गिरः । प्रोक्ताः श्रुत्वाऽपि यो ग्लानिं नाप्नुयान्मनसि क्वचित्
तस्योपरि तु मे प्रीतिरस्ति स्वाभाविकी ध्रुवम् । स्वप्नेऽप्यविस्मृता क्वापि नापहार्या च केनचित्
इत्युक्त्वा निजभक्तानां कतीनांचित् स सर्ववित् । श्रेष्ठान्यंगान्यचकथद्बद्धानि निजयोगतः ॥
श्रद्धाऽस्त्यंगं जयायाश्च रमायास्त्याग एव च । मत्प्रीतिर्ललितायास्तु श्रेष्ठमंगं हि विद्यते २२॥
नित्यानंदस्यापि मुनेरस्त्यंगं प्रीणनं मम । ब्रह्मानंदस्य सत्संगमर्यादा रक्षणाग्रहः ॥ २३ ॥
मम प्रीतिश्च विश्वासो मुक्तानंदस्य वर्त्तते । अंगमेकस्थितिश्चास्ति सर्वदा सोमवर्मणः ॥ २४ ॥
यथा हरिः प्रसन्नः स्यात्तथा मद्वर्त्तनं यदि । स्यात्तदा युक्तमित्यंगं चैतन्यानंदयोगिनः ॥ २५ ॥
स्वयंप्रकाशानंदस्य मुख्यमंगं च वर्त्तते । माहात्म्यज्ञानसहितः साक्षात्कृष्णस्य निश्चयः ॥ २६ ॥
आत्मानंदस्य महतो मद्वाक्यस्यानतिक्रमः । हेमंतराज्ञो मनसः कृष्णान्यार्थेष्ववबंधनम् ॥२७॥
मम चापि मदीयानां साधूनां महतां दृढः । विश्वासो हृदये भूयानंगमुत्तमभूपतेः ॥ २८ ॥
एवमंगानि मुख्यानि सोऽन्येषां च स्वसेविनाम् । कथयित्वाऽथ महतः स्वभक्तान्पुनराह तान्
युष्माकमीदृशांगानामपि कर्हिचिदापदि । देशकालादिवैषम्ये स्थितिर्नैवेदृशी भवेत् ॥ ३० ॥
विदुषामप्यविस्रब्धः षड्वर्ग इति वाक्यतः । स्यात्तदा मायिकार्थैर्वोबंधनं नात्र संशयः ॥३१॥
तस्मिंस्तु समये यस्य ज्ञानांशाधिकता भवेत् । न तस्य बंधनं क्वापि विषयैर्मायिकैर्भवेत् ॥३२॥
ज्ञानांशस्त्वात्मनः स्वस्य यथावद्रूपवेदनम् । देहस्य दैहिकानां च स्वरूपज्ञानमंजसा ॥ ३३ ॥
विराट्सूत्राव्याकृतानां प्रकृतेः पुरुषस्य च । अक्षरब्रह्मणः साक्षाद्धरेर्धाम्नश्च वेदनम् ॥ ३४ ॥
तत्परस्य हरेश्चापि दिव्यमूर्त्तेर्यथार्थतः । ज्ञानमित्यादि सकलं यत्स ज्ञानांश उच्यते ॥ ३५ ॥
तस्यातिदार्ढ्यं यस्य स्यात्स न मुह्येद्धि कर्हिचित् । तस्मिन्सति च वैराग्यं यद्भवेत्तत्खलूत्तमम् ॥
वैराग्यं तं विना यत्स्यात्तत्तु निर्बलमीयताम् । नश्येद्रम्यार्थदृष्ट्यापि दीपार्चिर्वायुनेव तत् ३७॥
ज्ञानांशजं बलिष्ठं तद्दिव्यार्थैर्नापि हन्यते । सामुद्रै रंबुभिरपि यथैव वडवानलः ॥ ३८ ॥
ईदृग्ज्ञानांशदार्ढ्यं वो हृदि नित्यं भवेदिति । बहुशः क्रियते वार्त्ता मयेयं भवतां पुरः ॥३९॥
ईदृग्ज्ञानांशहीनास्तु स्युर्वै देहाभिमानिनः । मायिकार्थप्रसक्ताश्च भक्तास्ते प्राकृताः स्मृताः ४०॥
इति वार्त्तां विधायाऽसौ क्षणांतेऽपि पुनर्हरिः । वार्त्तां चकार कृपया भक्तानानंदयन्निजान् ॥
हरेः कथाया वार्त्तायाः श्रवणे च विशेषतः । यस्य स्याद्यावती प्रीतिस्तावती स्याद्भवारुचिः ४२॥
कामलोभक्रुधादीनां शत्रूणां चाऽनुपद्रवः । तावान् भवेदतः प्रीतिः कर्त्तव्या सुधिया ततः ॥
सा भवेद्यस्य तस्यैव विवर्द्धंते महागुणाः । क्षीयंतेऽन्यस्य तु गुणाः कष्टसंपादिता अपि ॥४४ ॥
गुणहीनस्य पुंसोऽपि तस्या एव भवेद्ध्रुवम् । उत्कृष्टगुणसंप्राप्तिर्न तु तत्र प्रमादिनः ॥ ४५ ॥
शास्त्रे नवविधा भक्तिः प्रोक्ता तत्राऽऽदिमा श्रुतिः । सा यस्य परिपक्वा स्यात्तस्य सा सुलभाऽखिला
प्रेमांता भक्तिभेदा ये श्रवणांतेऽखिला अपि । सर्वथैवानुवर्त्तंते ततस्तत्साध्यमादितः ॥ ४७ ॥
एतावती कृता वार्त्ता संगवे तेन तत्र तु । मध्याह्ने स पुना राज्ञ उदगास्यमगाद् गृहम् ४८॥
भुंजाना अभवंस्तस्य महावेद्यां मुनिव्रजाः । निंवाधस्तात्ततो वेद्यां स्वासने स उपाविशत् ४९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अभितस्तं निषेदुश्च गृहस्थास्तदुपाश्रयाः । उवाचाऽथ सतः सर्वान् भक्तिधर्मात्मजः प्रभुः ५०॥
नराः स्युर्येऽत्र सत्संगे मच्छ्रितास्तैस्तु सर्वथा । नारीणां कृष्णभक्तानां नातिमाहात्म्यमीयताम्
माहात्म्यातिशयज्ञानात्तासां स्याच्चिंतनं हृदि । ततः स्वप्ने दर्शनं स्यात्ततो विघ्नं महद्भवेत् ॥
अतः सामान्यतो भक्ता इमाः संतीति गम्यताम् । न तु कार्यं विशेषेण तद्वार्त्ताकथनाद्यपि ॥
भक्ताभिः स्त्रीभिरप्येवं सत्संगे हरिसेविनाम् । पुंसां विशेषमाहात्म्यं नावगम्यं हि सर्वथा ॥
कृष्णभक्तौ हि नारीणां पुमांसो विघ्नरूपिणः । भवंति तेषां ताश्चेति ज्ञेयं सर्वैर्मुमुक्षुभिः ५५ ॥

इति प्रभोस्तस्य निशम्य वाक्यं सुधासमं साधुजना समस्ताः ।
गृहाश्रमस्था अपि भक्तिभाजो मोदं महांतं हृदयेऽलभंत ॥ ५६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ सप्तचत्वारिंशदधिकद्विशततमस्तरंगः ॥२४७॥२४॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । ऊर्ज्जशुक्लदशम्यां तु वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स सद्मनः । वितर्दौ प्रत्यगास्यस्य व्यराजत सुमंचके ॥ २ ॥
सितांबरो वृतो भक्तैस्त्यागिभिर्गृहिभिश्च सः । स्वयमेवाब्रवीत्स्वामी निषण्णान् पुरतः सतः ३॥
भक्तिः श्रद्धा च धर्मादि यद्यत्सत्कर्म किंचन । क्रियेत कृष्णसंबंधि नरैरिह मुमुक्षुभिः ॥ ४ ॥
तत्तत्सर्वं विधातव्यं फलेच्छारहितं सदा । इत्युक्तमस्ति सच्छास्त्रे सत्यमेवोक्तमस्ति तत् ॥५॥
किंतु स्वस्मिन् भगवतः प्रसादस्त्वर्थ्य एव तैः । अन्यथा तामसं कर्म तत्स्यादित्यवधार्यताम् ॥६॥
प्रसन्नता भगवतो महद्भिश्चोपचारकैः । पूजकेषु भवेत्तस्य न तु रंकेषु देहिषु ॥ ७ ॥
इति शंका न कर्त्तव्या यतोऽसौ भक्तवत्सलः । श्रद्धया पूजयेद्यः कस्तस्मिन्नेव प्रसीदति ॥ ८ ॥
पत्रं पुष्पं फलं वापि श्रद्धाभक्तिसमन्वितः । अतिरंकोऽपि यो दद्यात् प्रीत्या गृह्णाति तत्प्रभुः ॥
श्रद्धाभक्तिविहीनांस्तु महतोऽप्युपचारकान् । राज्ञापि दत्तान्नादत्ते सर्वैश्वर्ययुतो हि सः ॥१०॥
यो भजेत्तस्य भगवानिति जानीत निश्चितम् । तस्मादनन्यभावेन भजनीयः स सर्वदा ॥११॥
दारिद्र्यदीर्घरोगादिविपत्तौ वापि संपदि । यस्तुल्यवृत्तिर्न चलेद्भक्तेः सोऽनन्यभक्तिमान् ॥१२॥
अथाऽपृच्छद्रमाभक्ता दूरे स्थित्वा प्रणम्य तम् । कैर्दोषैरप्रसन्नस्त्वं प्रसन्नः कैर्गुणैर्भवेः ॥१३॥

श्रीहरिरुवाच

विशेषवर्त्तनेच्छायां हृदि सत्यां पुनः पुनः । तदाज्ञाप्रार्थनं मत्तो यत्तन्नप्रीतये हि मे ॥१४ ॥
ज्ञात्वाऽपि स्वेष्टक्वं मां मद्वाक्योपरि भूरिशः । प्रत्युत्त्यानयनं युक्त्या यत्तन्न प्रीतये हि मे ॥
केनचित्सह सद्वार्त्ताः कुर्वाणे मयि योंऽतरा । भाषेत तद्भाषणं मे प्रीतये नास्ति सर्वथा ॥१६॥
भक्तिधर्मादिसत्कर्माचरणे राधिकापतेः । कृपायः एव हेतुत्वकथनं प्रीतये न मे ॥ १७ ॥
अहमेवं करिष्यामीत्यादिस्वबलजल्पनम् । न तु कार्येष्वीशबलानुस्मृतिस्तन्न मे प्रियम् ॥ १८ ॥
यस्य स्वांगानि यतता भाषणादौ भवेन्मुहुः । तस्य चानियतालापो न मे प्रीतिकरः खलु ॥
व्यावहारिककार्येषु लज्जालस्येन यस्य तु । हरेः कथाकीर्त्तनादौ स्यातां ते स न मे प्रियः २०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धर्मभक्तिविरागाद्यैर्यत्स्याहंकारभाषणम् । त्यागिनो वा गृहस्थस्य तन्नैव प्रीतिकृन्मम ॥ २१ ॥
यः सभामेत्य सर्वेषां पश्चादुपविशेद् गुणी । स्वस्योचिते न तु स्थाने सोऽपि न प्रीतये हि मे ॥
तथा सभोपविष्टान् यो महतः कूर्परादिभिः । पराकृत्याऽग्रतस्तेषां निषीदेत्स प्रियो न मे ॥
न सम्यगावृतांगाश्च न चाऽधो दृष्टयो गतौ । याः स्त्रियस्ता न मे प्रीत्यै स्युश्च कुत्सितभाषणाः
मद्दर्शने जायमाने तत्र कस्मिंश्चिदागते । पुंसि योषिति वा वाहे पशौ वा शुनि निर्गते ॥२५॥
पुनः पुनस्तमीक्षेत हित्वा मद्दर्शनं तु यः । अत्यप्रियः स मे नूनं साधुत्वात्तं न ताडये ॥२६॥
दुःसंकल्पांश्च यो भक्तो जायमानान् हृदि स्वके । कथनार्हंसतामग्रे न ब्रूयात्स प्रियो न मे ॥
क्रोधो मानश्चाऽन्यभयात्स्वांतस्थाकथनं तु यत् । महतामग्रतस्तच्च नैव प्रीतिकरं मम ॥ २८ ॥
तथैव हरिभक्तानां समत्वेन परस्परम् । एकैकगौरवाज्ञानमपि न प्रीतये मम ॥ २९ ॥
मदप्रीतेर्हेतुभूता दोषा इत्युदिता मया । विपरीता गुणा ज्ञेया एभ्यो मत्प्रीतिहेतवः ॥३०॥

निपीय वाक्यामृतमित्यमुष्य जगद्गुरोः साप मुदं हि भक्ता ।
अन्ये च संतो गृहिणोऽपि सर्वे तद्भक्तिभाजश्च सभोपविष्टाः ॥ ३१ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावष्टचत्वारिंशदधिकशततमस्तरंगः ॥२४८॥२५॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । एकादश्यां प्रबोधन्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः । गोपीनाथालयेऽराजत्स निजैः परितो वृतः ॥ २ ॥
सितांबरः प्रसन्नास्यो भक्तान् सर्वानुवाच सः । वैष्णवा विष्णुवन्मान्या इति शास्त्रे निरूप्यते
तेषां लक्ष्माणि मुख्यानि कतिचित्कथयामि वः । सर्वदा कृष्णसंबंधिक्रियास्वेव रता हि ते ॥
बाह्यांतःकरणानां याः क्रियाः स्युस्तासु सर्वदा । तद्वशा न भवेयुश्च कुर्युस्तास्त्वात्मनो वशे ॥
अहिंसा ब्रह्मचर्यादीन् पालयेयुर्यमान् दृढम् । ब्रह्मीभूता अपि दृढं भजेयुः कृष्णमादरात् ॥ ६ ॥
एवंविधाः कृष्णभक्ता ये स्युः कृष्णैकचेतसः । त एव हरिवत्प्रीत्या मान्याः पूज्याश्च सादरम् ॥
नैतेऽन्यमनुजैस्तुल्या न च देवैः समा अपि । यतस्तेष्वीदृशी नास्ति क्रियाऽतस्तद्विलक्षणाः ॥
ईदृशाः पुरुषाः सेव्याः पुरुषैस्तु मुमुक्षुभिः । ईदृश्यो योषितः सेव्या योषिद्भिश्च मुमुक्षुभिः ॥
आत्मानंदोऽथ साधुस्तं पप्रच्छ विहितानतिः । इह सत्संगिनः संति बहवः पुरुषाः प्रभो ॥
त्वदुक्तनियमेष्वेते वर्त्तेरन् यावदादरात् । तावत्तु विषयैस्तेषां बंधनं नास्ति सर्वथा ॥ ११ ॥
क्वचिन्नियमभंगेऽपि सतां विचरतां भुवि । शिक्षया ते यथापूर्वं वर्त्तेरन् कृतशोधनाः ॥ १२ ॥
देशकालादिवैषम्यात्सत्यां देशांतरस्थितौ । तत्र सत्संगिनां नृणां संबंधे चाऽसति क्वचित् ॥
तदापि नियमेष्वेव यथापूर्वं स्थितिर्भवेत् । यस्य पुंसः स विज्ञेयो लक्षणैः कीदृशैः प्रभो ॥

श्रीहरिरुवाच

धर्मांशो यस्य वर्त्तेत मनीषायां विशेषतः । आस्तिक्यं लोकलज्जा च तथा पातकभीरुता ॥
देशकालादिवैषम्येऽप्यसौ भ्रश्येन्न धर्मतः । तस्य क्वापि न बंधाय विषयाः प्रभवंत्यतः ॥ १६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मयरामसुकुंदाद्याः संति विप्रास्तथाविधाः । निष्कुलानंदमुख्याश्च संतोऽप्येकधियः सदा ॥ १७ ॥
इत्युक्त्वा तं निजान् सर्वान् साधूनप्रतिजगाद सः । द्वावंतरायौ भवतः पुंसां धर्मधियामपि
आत्मनिष्ठा च भगवन्माहात्म्यस्यावबोधनम् । क्वचिद्धर्मच्युतौ ताभ्यां नानुतापो भवेद्धृदि ॥
तत्रात्मनिष्ठो जानीयादात्मा ब्रह्मास्म्यहं परम् । तं मां शुभाशुभाः क्वापि क्रिया नैव स्पृशंति हि
अन्यस्तु कृष्णमाहात्म्यं बहु विद्याच्च कीर्त्तयेत् । नाम्नः स्मृत्यैव कृष्णस्य नश्यंत्यघभरा इति ॥
एवमेतद्द्वयेन स्याच्छैथिल्यं धर्मपालने । अत इत्थं हृदि दृढं वेद्यं धर्माचनेच्छुना ॥ २२ ॥
धर्मसंस्थापनायैव भुवि कृष्णस्य भूरिशः । अवतारा भवंत्यत्र तैः करोति च तत्प्रभुः ॥ २३ ॥
धर्मरक्षा ततः प्रेष्ठा तस्यास्तीत्यवगम्यते । अतो मयापि तत्प्रोक्तो धर्मः पाल्यः सदा दृढम् ॥
तेनाऽसौ मयि सुप्रीतो भविष्यति न संशयः । धर्मभंगे त्वस्य भृशं ह्यरुचिर्भविता मयि ॥
एवं यस्य दृढग्रंथिर्भवेद्धृदि स पूरुषः । कदाचिद्भगवत्प्रोक्तधर्मभ्रष्टो भवेन्न हि ॥ २६ ॥
आत्मनिष्ठैश्च भगवन्माहात्म्यज्ञानिभिस्तथा । एवं हृदि दृढं बोध्यं तेन धर्मस्थितिर्भवेत् ॥ २७ ॥
एतज्ज्ञानविहीनस्तु ज्ञानी वा भक्तिमानपि । भवेद्धर्मच्युतः क्वापि बद्ध्येत विषयैरपि ॥ २८ ॥
इत्युक्त्वा विररामासौ मुहूर्त्तार्द्धमथो पुनः । स्वयमेव सतः प्राह स्वस्वभावं दयानिधिः ॥ २९ ॥
स्वधर्मस्य विरक्तेर्वा ज्ञानस्य तपसोऽपि वा । भक्तेस्त्यागस्य वा यस्याहंकारः स प्रियो न मे ॥
योऽल्पे स्यातां ज्ञानभक्ती हृदि स्वे वाह्यतस्तु ते । स्वख्यात्यै दर्शयेद्भूरि दंभी स च न मे प्रियः
आत्माभेदेन यः कृष्णं भजेत्स्वनियमेषु च । कार्ष्णेषु शिथिलो यः स्यात्तावुभौ न प्रियौ मम
महत्तमत्वं कृष्णस्य विद्याद्यः स्वस्य तुच्छताम् । न तु देहान्यचिद्रूपात्मत्वं स च न मे प्रियः ॥
स्वधर्मज्ञानवैराग्यैः संपन्नोऽनन्यभक्तिमान् । अप्यल्पभक्तं कृष्णस्य यस्तु विद्यात्स्वतोऽधिकम् ॥
तदग्रेऽतिविनीतः स्यादात्मप्रौढिं न दर्शयन् । स पुमानात्मवत्प्रेष्ठो ममास्तीत्यवगम्यताम् ३५ ॥

पीत्वेति संतो वचनामृतं ते धर्मावतारस्य हरेः समस्ताः ।
सभानिषण्णा गृहिणोऽपि ये ते सर्वे च मोदं हृदयेऽलभंत ॥ ३६ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धावूनपञ्चाशदधिकद्विशततमस्तरंगः ॥२४९॥२६॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । ऊर्जमासे पौर्णमास्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स भूपतेः । गोपीनाथालयेऽराजत्तूलपट्यां सितांबरः ॥ २ ॥
नानाभक्तैः परिवृतः स उवाच सतः स्वयम् । मायिकं तुच्छमेवास्ति सुखं कार्ष्णं त्वनश्वरम् ॥
समुद्रवारिणोऽन्यानि वारीणीव रमापतेः । सुखस्य शेषभूतानि सुखान्यन्यानि सर्वशः ॥ ४ ॥
शब्दाद्याः पंच विषयाः संत्यन्यत्र पृथक् पृथक् । आनंदमूर्त्तौ कृष्णे तु संत्येकत्रैव पंच ते ५ ॥
अतः साक्षात्प्रभोस्तस्य क्रियमाणे निरीक्षणे । पंचानामप्यनुभवस्तेषां सह हि जायते ॥ ६ ॥
सुखं त्वस्ति पदार्थेषु मायिकेषु पृथक् पृथक् । तदप्यल्पं नश्वरं च परिणामेऽतिदुःखदम् ७ ॥
अतोऽनंतसुखांभोधिः कृष्ण एव मुमुक्षुभिः । विरज्याऽन्यत्र संसेव्यः सर्वदा दिव्यविग्रहः ८ ॥
सेव्यमानो हरिर्भक्त्या सेवके संप्रसीदति । तस्मिन्प्रसन्ने सकलाः प्रसीदंति हि तज्जनाः ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्मिंस्तेषु च तुष्टेषु भक्तश्च सकला अपि । पूर्णा मनोरथा नूनं भवंतीत्यवगम्यताम् ॥ १० ॥
मयि कृष्णश्च तद्भक्ताः प्रसीदेयुः सदेति यः । कामयेत्स तु तान्नित्यमनुवर्त्तेत सादरम् ११ ॥
यस्तत्प्रसन्नता कामः पुमान् स्यात्स तु सर्वथा । तदप्रियं दुःस्वभावं जह्यादेवात्मनो द्रुतम् १२ ॥
जीवस्वरूपसंलग्नमपि तत्कामुकस्तु तम् । जह्यादेवाऽचिरेणैव नान्यथा तत्प्रसन्नता ॥ १३ ॥
रामानंदगुरोरीक्षाकामोऽहं पूर्वमात्मनः । त्यागिस्वभावं हित्वाशु मुक्तानंदमनुव्रतः ॥ १४ ॥
अन्नसत्रे रोटकादिविधाने तेन योजितः । तदप्यकरवं प्रीत्या प्रवृत्तं कर्म तन्मुदे ॥ १५ ॥
हरेर्भक्तैरतस्त्याज्यस्तदरोचक आत्मनः । स्वभावः सर्वथा पुंभिर्नान्यथा तत्सुखं भवेत् ॥ १६ ॥
तथैव हरिभक्तैश्च कथंचिदपि मानसे । संकल्पग्रन्थयो नैव बंधनीया निजाहिताः ॥ १७ ॥
अत्रैव निद्रा कर्त्तव्या भोक्तव्यमिदमेव च । इत्याद्या ग्रन्थयो नैव निबध्यास्तुच्छवस्तुनः १८ ॥
पालयिष्ये ब्रह्मचर्यं दृढमित्यादयस्तु ये । संकल्पा ग्रंथयस्तेषां निबध्याः स्वहितावहाः ॥ १९ ॥
तत्राद्यास्तु सतां वाक्यैर्मोचनीया मुमुक्षुभिः । अन्यास्तु ग्रंथयो नैव मोचनीयाः कदाचन ॥
ग्रन्थीनामुभयेषां च हेयत्वे नास्ति तुल्यता । तुल्यतां यस्तु जानीयात्सहि बालिश ईरितः ॥
बालो यथाऽन्यवाक्येन स्वमुष्टिस्थां वराटिकाम् । जह्यात्सुवर्णमुद्रां च न तु तत्तत्त्ववित्पुमान् ॥
हिताहितत्वं ग्रंथीनामजानन् पुरुषस्तथा । मोचयेदुभयान् मूर्खः साम्येन न विवेकवान् २३ ॥
तथा योऽप्युभयान् नैव मोचयेत्सोऽपि बालिशः । उभयेषामुपादाने समत्वेनावबोधनात् २४॥
एवं ग्रंथिस्वभावश्चेद्यावज्जीवं भजेद्धरिम् । तर्हि श्रेयो भवेत्किंतु विश्वासार्हस्तु न ह्यसौ २५ ॥
मानभंगे क्वचिद्वाऽसौ तीक्ष्णस्वाप्रियवाक्श्रुतौ । भ्रष्टः स्यादेव सन्मार्गात्प्रतीतिर्नास्त्यतोऽस्य वै ॥
सदसद्ग्रंथिप्रकृतिर्भक्तो राजर्षिरीरितः । कृष्णप्रीत्यनुसारेण भजन् ब्रह्मर्षिरुच्यते ॥ २७ ॥
आद्यं ज्ञानखलं केचित्सेवानर्हं बुधा जगुः । अन्यं स्वात्मप्रियं विष्णोर्ज्ञानिनं सेव्यमन्वहम् ॥
मोचनीया हरेर्भक्तैस्तुच्छार्थग्रंथयस्ततः । भगवद्धर्मसंबंधिग्रंथयस्तु न कर्हिचित् ॥ २९ ॥
तथैव भक्तैर्मानस्तु प्रवेष्टुं निजचेतसि । न देयः स यतो दोषः कामादप्यधिको मतः ३० ॥
कामिनो गृहिणोऽनेके संति सत्संगिनोऽत्र हि । तथापि साधवस्तेषु कुर्वंते करुणां नृषु ३१ ॥
ते च कृष्णं भजंतोऽपि सद्भ्यः स्वन्यूनतां विदुः । अतः सदध्वनो नैव भ्रष्टतामुपयांति हि ॥
पुंसु मानिषु संतोऽपि करुणां नैव कुर्वते । विदुः स्वाधिकतां सद्भ्यो मानिनः पुरुषाः खलु ॥
निर्मानिभ्योऽपि सद्भ्यस्ते नैव स्वन्यूनतां विदुः । अतो भवंति ते भ्रष्टास्त्यक्तगेहाश्रमा अपि ॥
ईर्ष्याक्रोधौ च जायेते मानादेव सतामपि । अतः स सर्वथा हेयः श्रेयसे हरिमाश्रितैः ॥ ३५ ॥
साक्षाद्धरेर्निश्चयः स्याद्धृदि सम्यग्यदा तदा । तस्याश्रयः स्यात्सुदृढः श्रेयोहेतुर्न चान्यथा ३६ ॥
अयं पितेयं मातेति स्वपित्रोर्निश्चयो यथा । अचलोऽस्ति नृणां तद्वत्कर्त्तव्यः स हरेरपि ॥३७ ॥
स्वजातिकुलबंधूनां जलाग्न्यादेश्च निश्चयः । शास्त्रश्रोतुः स्वपित्रादेरुपदेशेन जायते ॥ ३८ ॥
प्रमाणं शास्त्रमेवाऽतः कार्याकार्यावबोधने । लोकप्रवृत्तिः सर्वापि शास्त्रमूलैव वर्त्तते ॥ ३९ ॥
अहिंसाब्रह्मचर्यादिलक्षणं शास्त्र एव हि । कृष्णाश्रितानां साधूनां स्पष्टमस्ति निरूपितम् ॥
अतस्तल्लक्षणोपेतसाधूनामुपदेशतः । साक्षात्कृष्णस्य कर्त्तव्यः श्रद्धया निश्चयोऽचलः ॥ ४१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ततः कुर्वीत तद्भक्तिं श्रेयसे यः स्वधर्मयुक् । स भक्तः स्वजनैः साकं मुच्यते भवबंधनात् ॥
तदाऽपृच्छन्नाथजित्तं वैश्यो वटपुरागतः । त्वया भक्तस्य बंधूनामपि मुक्तिरुदीरिता ॥ ४३ ॥
विना साधनसंपत्तिं तेषां सा जायते प्रभो । भक्तसंबंध एवास्ति हेतुस्तत्राऽपरोऽपि वा ४४ ॥

श्रीहरिरुवाच

न हि संबंधमात्रेण तस्य ते यांति सद्गतिम् । किंत्वस्मिन्कुर्वतां प्रीतिं सा भवेदिति गम्यताम् ॥
यस्य यस्य भवेत्स्नेहस्तस्मिन्स स पुमानिह । देहांते सद्गतिं याति न तत्संबंधिनोऽखिलाः ४६ ॥
तस्मिन्प्रीतिजुषां तेषां नराणां जायते हृदि । देहावसानवेलायां तस्यैव स्मरणं यतः ॥ ४७ ॥
अंतस्ते भगवद्वृत्तेस्तस्यैव शुभकर्मणा । विमुक्तकिल्बिषा यांति देहांते सद्गतिं किल ॥ ४८ ॥
इति प्रश्नोत्तरं तस्मै दत्त्वोचे स पुनः सतः । सच्छास्त्रे जीवपरयोः स्वरूपं सुनिरूपितम् ॥
मया सदसि तद्वार्त्ता क्रियते या तथैव तु । तत्संबंधि सुखं नैव यथावत् प्राप्यते हृदि ५० ॥
यथावत्तत्सुखाप्तिस्तु जायते हि समाधिना । देहत्यागानंतरं वा न तु केवलवार्त्तया ॥ ५१ ॥
रम्यस्य शब्दस्य सुखं श्रोत्रेणैव हि तत्त्वतः । यथाऽनुभूयते तद्वन्न हि तद्वार्त्तया नृभिः ५२ ॥
रमणीयोऽस्ति वै शब्द इति वार्त्तामुखेन तु । जायते न त्वनुभवस्तस्य तु श्रवसा यथा ॥ ५३ ॥
स्पर्शादीनां तथाऽर्थानामिंद्रियैश्च त्वगादिभिः । यथा भवत्यनुभवस्तथा तद्वार्त्तया न वै ५४ ॥
तथात्मकृष्णसौख्यस्यानुभवोऽस्ति समाधिना । देहांते वा यथा तद्वन्नास्ति तद्वार्त्तया तु सः ॥
अतो भक्तस्तु तां श्रुत्वा तस्याः स्वहृदयेऽजसा । कुर्वीत मननं नित्यं तन्निदिध्यासनं तथा ५६॥
सति देहेऽत्र ताभ्यां स्याज्जीवात्मपरमात्मनोः । साक्षात्कारः स्वरूपस्य देहांतेऽपि तथा भवेत् ॥
भक्तस्यापि हरेरेतत्साधनद्वयमंतरा । साक्षात्कारो भवेन्नैव तयोरित्यवगम्यताम् ॥ ५८ ॥

वाक्यामृतं तस्य गुरोस्त इत्थं पीत्वा हृदि त्यक्तगृहाः सुतृप्तिम् ।
सर्वेऽलभंताऽथ गृहस्थभक्ता ये तेऽपि मोदं च ययुः सदःस्थाः ॥ ५९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पञ्चाशदधिकद्विशततमस्तरंगः ॥ २५० ॥ २७ ॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । ऊर्जासितप्रतिपदि वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य महीभुजः । गोपीनाथालयेऽराजत्सितवासाः स चक्रके ॥ २ ॥
नानादेशागतैर्भक्तैः साधुभिर्गृहिभिश्च सः । परितो वृत आहेदमुपविष्टान् पुरः सतः ॥ ३ ॥
कृष्णभक्तेः पतेज्जीवः कारणद्वयतः किल । शुष्कवेदांतश्रवणात्कृष्णे दोषधियस्तथा ॥ ४ ॥
आकारमात्रमिथ्यात्वं वेदांतश्रवणात्पुमान् । निश्चित्य कृष्णस्याकारमपि विद्यान्मृषा हृदि ॥५॥
सुखं वैषयिकं यत्तत् कृष्णस्याप्यस्ति हीप्सितम् । राधालक्ष्म्यादिभिः स्त्रीभिः स रमेताऽन्यथा कथम्
एवं कुबुद्ध्या कृष्णस्य स्वसाम्यावगमो भवेत् । एतद्धेतुद्वयं तस्य भक्तिभ्रंशकमीयताम् ॥ ७ ॥
अतो मुमुक्षुभक्तस्तु विद्यादित्थं सुनिश्चितम् । मायिकाकृतयः सर्वा वेदांते कीर्त्तिता मृषा ॥८॥
साकार एव कृष्णस्तु कथितो दिव्यविग्रहः । मायागुणाकारहीनो निर्गुणश्च निराकृतिः ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रामानुजश्च निंबार्को मध्वोऽथो वल्लभादयः । एवमेव हि वेदांतसिद्धांतं स्फुटमूचिरे ॥ १० ॥
श्रुतिस्मृतिपुराणाद्यैः प्रमाणैः प्रबलैर्हि ते । आहुर्वेदांततात्पर्यं न तु केवलयुक्तितः ॥ ११ ॥
तद्भाष्यैः सह वेदांतश्रवणं कुर्युरत्र ये । प्राप्नुयुर्भक्तिपुष्टिं ते पतेयुर्न तु भक्तितः ॥ १२ ॥
वैष्णवाचार्यसिद्धांतं हित्वा येऽस्वल्पबुद्धयः । शुष्कज्ञानिमुखात्कुर्युर्वेदांतश्रवणं नराः ॥ १३ ॥
ते तु भ्रष्टा भवेयुर्वै कृष्णभक्तेर्न संशयः । साक्षात्कृष्णेऽपि दुस्तर्कान् कुर्युर्ये ते तु बालिशाः ॥
स्वधर्मज्ञानवैराग्यैः सहिता यस्य मापतेः । माहात्म्यबोधयुग्भक्तिः स्यात्सोऽस्ति बुद्धिमत्तरः ॥
नहि तादृशभक्तस्य दुस्तर्कः स्याद्धरौ क्वचित् । पूर्णकामो हि भगवानिति तस्यास्ति निश्चयः ॥
आनंदमूर्त्तेर्नास्त्येव क्वापि कामसुखैषणा । तथाविधा क्रिया त्वस्य स्वभक्तानां सुखाय हि १७॥
कृष्णमूर्त्तिः सर्वसुखमय्येवास्ति मनोहरा । यतस्तां सेवमानस्य नास्त्येवान्यसुखैषणा ॥ १८ ॥
पूर्णानंदो हरिस्तस्यानंदलेशस्य लेशतः । संत्यन्ये विषयानंदास्तुच्छ एव ततो हि ते ॥ १९ ॥
अतो हित्वा हरेः सौख्यं नित्यं महदनंतकम् । तुच्छमन्यसुखं कोऽपि नेच्छत्येव सुधीः क्वचित्
ब्रह्मधाम्नः सुखस्याग्रे सर्वलोकसुखानि तु । यांत्येव निरयौपम्यमित्युक्तं भारतादिषु ॥ २१ ॥
हरेर्द्धाम्नः सुखं त्वीदृक् हरेः सौख्यस्य का कथा । तत्प्राप्तानां च भक्तानां नास्त्येवान्यसुखैषणा
स्वात्मारामस्य कृष्णस्य कुतस्तर्हि भवेत्तु सा । अतोऽल्पकोऽपि दोषस्तु कृष्णे ज्ञेयो न कुत्रचित्
एवं विदंति ये भक्तास्तेषां भक्तिस्तु सर्वदा । निर्विघ्नैव भवत्यत्र नूनमित्यवधार्यताम् ॥ २४ ॥
सूरवर्माऽथ पप्रच्छ तं सत्संगिन ईश्वरम् । विदंति त्वां तु तत्त्वेन त्वसतश्च तथा हृदि ॥२५ ॥
तत्रापि चित्तं केषांचिद्भक्तिं विदधतामपि । ततो याति परावृत्तिं तत्र किं कारणं प्रभो ॥२६॥

श्रीहरिरुवाच

यदा तैः कृष्णतत्साधुनिश्चयो विहितो हृदि । तदैव काचित्तज्ज्ञाने शिष्टा ज्ञेया ह्यपक्वता २७॥
कृष्णनिश्चयकाले हि तेषां दोषा मनोगताः । सद्वाक्यैः कतिचिन्नष्टा अवशिष्टाश्च केचन २८॥
दोषानिर्मूलनं ह्येव तदपक्वत्वमीयताम् । कृष्णतत्साधुतश्चित्तपरावर्त्तनकारणम् ॥ २९ ॥
रसास्वादोऽवशिष्टः स्याद्यस्य तं साधवो यदा । खनेयुस्तर्हि तस्य स्यात्परावृत्तं मनस्ततः ॥३०॥
एवं हि कामसंकल्पं धनलोभं च साधवः । मानं वाप्यवशिष्टं च खनेयुर्वचनैर्यदा ॥ ३१ ॥
तदा तेभ्यः परावृत्तं मनस्तेषां भवेद् ध्रुवम् । साक्षाद्धरिः खनेद्वा तांस्तदापि स्यात्तथैव तत् ॥
यस्य निश्चयकाले तु दोषा नष्टा अशेषतः । भवेयुस्तस्य पुंसस्तु परावर्त्तेत नांतरम् ॥ ३३ ॥
सांप्रतं चात्र युष्मासु येषां केषांचिदंतरे । दोषशेषो भवेत्तैस्तु सोऽतर्दृष्ट्यावधार्यताम् ॥३४॥
ततो ज्ञास्यंति तेंतःस्थं स्वं स्वं दोषं यथार्थतः । वेत्स्यंति तत्फलमपि भावि वैमुख्यमीश्वरात् ॥
इत्युक्त्वा तं हरिर्भूपं ब्रह्मानंदं शुकं तथा । प्राह युष्माभिरात्मस्थः को दोषोस्तीति दृश्यताम्
क्षणं विचार्य तेऽथोचुर्मान एकस्तु वर्त्तते । स्वतुल्यभक्तविहितापमानाद् ग्लानिसंभवात् ३७॥
अथोवाच हरिर्युष्मानत्र पृच्छामि किंचन । अस्ति कृष्णस्य माहात्म्यमनंतं सर्वतोऽधिकम् ३८॥
द्युपतय एव तेन ययुरंतमनंततयात्वमपि यदंतराडंनिचया ननु सावरणाः ।
ख इव रजांसि वांति वयसा सह यच्छ्रुतयस्त्वयि हि फलंत्यतन्निरसनेन भवन्निधनाः ॥३९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति वेदैर्निगदितं तद्ये जानीयुरंजसा । तद्भक्तेषु कथं तेषां जायते मानसं भवः ॥ ४० ॥
सर्वेश्वरत्वं सम्राजो विदुर्ये भुवि मानवाः । ते तत्पद्माग्रतो नूनं वर्त्तेरन्मानवर्जिताः ॥ ४१ ॥
खंडमंडलराजापि तत्पद्ममपि दुर्बलम् । बहु मन्येत तद्वाक्यानुसृतं कर्म चाचरेत् ॥ ४२ ॥
न तु तस्याग्रतो मानं रक्षेत्किंचिदपि क्वचित् । यतस्तत्स्वामिनः सम्यङ् महत्त्वं वेत्ति सोऽन्तरे ॥
एवं यो यस्य माहात्म्यं विद्यात्सर्वाधिकं स तु । तत्तदीयाग्रतो नैव मानं रक्षेत्कदाचन ॥४४ ॥
एवं सति हरेः सम्यङ्माहात्म्यविदुषामपि । कथं तत्सत्सु मानः स्यादिति पृष्टास्त ऊचिरे ४५॥
सत्यं त्वयोच्यते स्वामिन् यदि माहात्म्यवेदनम् । स्यात्सम्यक् ते हरेस्तर्हि त्वत्सदग्रेन मानिता
हरिराहाऽथ वीक्षध्वमुद्धवो बुद्धिमत्तरः । हरेरेकांतिको भक्त आसीन्नीतिविशारदः ॥४७॥
तथापि कृष्णमाहात्म्याभिज्ञत्वाद्व्रजयोषिताम् । कृष्णैकचेतसां पादरजःस्पर्शसमीहया ॥ ४८ ॥
वृंदावने वीरुदादावपि जन्मैच्छदात्मनः । तासामग्रे च निर्मानो भूत्वा स्वयमवर्त्तत ॥ ४९ ॥
ब्रह्मा च कृष्णसंबंधाद्भूरिभाग्यं व्रजौकसाम् । जानन्नीशोऽपि निर्मानो भूत्वैव तदवर्णयत् ॥
अहो भाग्यमहो भाग्यं नंदगोपव्रजौकसाम् । यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम् ॥५१ ॥
एवं ये कृष्णमाहात्म्यं विदुस्तेषां तु चेतसि । तद्भक्तेषु न मानेर्ष्याक्रोधाद्याः स्युः कदाचन ॥
मानहानौ च तत्संगात्सत्यामपि न कर्हिचित् । औदासीन्यं भवेत्तेषां तत्संगाद्वाऽन्यतः स्थितिः
ईदृग्भक्तो न वै दैह्यसुखार्थं दैन्यभाग्भवेत् । दैहिकापदि कष्टायामपि न स्वस्थितेश्चलेत् ॥
प्रारब्धं क्षीयते भोगादिति जानन्निजांतरे । दुःखान्मोचयतु स्वामीत्येवं संकल्पयेन्न वै ॥५५॥
निष्कामभक्ते ह्येतस्मिन् हरेर्भूरिप्रसन्नता । जायते च तदीयानां भक्तानामपि सर्वथा ॥ ५६ ॥
इति वार्त्तां विधायाऽसौ पुनरप्याह तान्सतः । भगवत्सुखसंप्राप्तिः स्याद् ग्राम्यार्थविरागिणाम्
मत्स्यस्य जलसंबंधो यावत्स्यात्तावदेव सः । क्रीडेद्यथासुखं तस्याभावे तु मृत्युमाप्नुयात् ५८॥
तथा विषयसंबंधो यावत्स्यात्तावदेव ये । वर्त्तेरन्सुखिनस्तस्याभावे तु स्युर्मृतोपमाः ॥ ५९ ॥
पंचेंद्रियार्थजीवानां तेषां भागवतं सुखम् । क्वापि न प्राप्यमस्तीति यूयं जानीत निश्चितम् ॥
येषां विषयसौख्येन नष्टा जीवनता भवेत् । तेषामेव भवेत्कृष्णसुखस्यानुभवोऽजसा ॥ ६१ ॥
तस्मान्मुमुक्षुणा पुंसा सर्वथा विषयैषणाः । धर्ममेकांतिकं श्रित्वा हातव्या अप्रमादतः ॥६२॥

इति निपीय हरेर्वचनामृतं मुनिगणाः सकला अपि ते पराम् ।
मुदमगुर्गृहिणश्च तदाश्रिता हृदि तदेव दधुश्च सदोगताः ॥ ६३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धावेकपञ्चाशदधिकद्विशततमस्तरंगः ॥ २५१ ॥२८॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । पौषशुक्लद्वितीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे उत्तमस्य स भूपतेः । स्वाश्रमं निकषा वेद्यां न्यषीदन्मंचके निशि ॥ २ ॥
सितांबरः परिवृतो निजभक्तैः सहस्रशः । अपृच्छत्स शुकानंदं प्रांजलिं पुरतः स्थितम् ॥ ३ ॥
द्वौ कौचिद्धरिभक्तौ स्तस्तरुणौ समनिश्चयौ । उभौ स्वधर्मनिष्ठौ च मंदवैराग्यशालिनौ ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकः प्रारब्धवशतः कृतोद्वाहस्तयोरभूत् । अन्यस्तु भार्येच्छुरपि नाप्तदारोऽभवन्मुनिः ॥ ५ ॥
उभयोर्विषयास्वादे वृत्तेस्तैक्ष्ण्यं तु विद्यते । तयोस्तु कतरस्याशु कुंठितं तद्भविष्यति ॥ ६ ॥
वेदस्तु तीव्रवैराग्यं यस्य स्यात्तस्य सर्वथा । ब्रह्मचर्याश्रमादेव प्राह संन्यासमाश्रमम् ॥ ७ ॥
स्याद्यस्य मंदवैराग्यं तस्य गार्हस्थ्यमाह च । वृत्तितैक्ष्ण्यस्य कुण्ठत्वसिद्धये विषयेष्वसौ ॥ ८ ॥
ततो वनाश्रमं तस्य ततः संन्यासमाह च । अतो विचार्य वक्तव्यं प्रश्नस्यास्योत्तरं मुने ॥ ९ ॥
इति पृष्टो यदा सम्यक् सन् प्राहोत्तरं तदा । स्वयमेव स तत्प्राह स्वामिनारायणो मुनिम् ॥
उभयोर्यः कृतोद्वाहः स श्रेष्ठ इति गम्यताम् । वृत्तितैक्ष्ण्यं कुण्ठितं स्यात्तस्यैव विषयेषु यत् ॥
अन्यस्य तीव्रवैराग्यमात्मनिष्ठा च नास्त्यतः । असत्संगे क्वचिज्जाते बध्येत विषयेष्वसौ ॥ १२ ॥
तीव्रवैराग्यहीनस्य यावज्जीवं न निर्वहेत् । त्यागो यदा कदाप्यस्य विषयैर्विघ्नतो भवेत् ॥१३॥
गृहस्थस्त्वात्मनो दैन्यं जानन् सत्साधुसेवया । अन्नांबुवस्त्रपात्राद्यैर्भक्तिदार्ढ्यमवाप्नुयात् ॥
इत्युक्तवंतं पप्रच्छ तं स साधुः सतांपते । वैराग्यमांद्येऽपि सति त्यागभूद्यस्त्वदाश्रितः ॥१५॥
स सद्यस्तव माहात्म्यं शृणुयाच्च विचारयेत् । तह्यंसौ तीव्रवैराग्यं कथं न प्राप्नुयात्प्रभो ॥
पुंसः कस्यचिदेव स्यात्तीव्रवैराग्यमादितः । यत् सत्संगाद् बहूनां तज्जायमानं समीक्ष्यते १७॥

श्रीहरिरुवाच

स्वधर्मज्ञानवैराग्यभक्तिसंपन्नसाधुषु । अतिप्रीतिर्भवेद्यस्य श्रीकृष्ण इव सर्वदा ॥ १८ ॥
दैहिकीः स्वाः क्रियाः सर्वास्तेषां रुच्यनुसारतः । कुर्वीत सभयं नित्यं नान्यथा यश्च कर्हिचित्
प्राप्नुयात्तीव्रवैराग्यं स हि मायिकवस्तुषु । यावज्जीवं निर्वहेद्वा त्यागस्तस्य विनापि तत् २०॥
महत्सेवां विना त्वन्योपायेन स्यान्न तत्क्वचित् । तत्सेवयात्वतिप्रीत्या सर्वं संपद्यते खलु ॥२१ ॥
उद्धवाध्वन्येवमिमे मयि संत्यनुरागिणः । गृहिणस्त्यागिनः सर्वे निदेशाकांक्षिणो मम ॥२२ ॥
महांतः साधव इव येऽपक्वास्तेऽपि साधवः । मदुक्तान्नियमान् सर्वान् पालयंत्यप्रमादितः ॥
एवमेव गृहस्थेषु पुंसु योषित्सु वर्णिषु । पद्गेषु चोत्तमैस्तुल्यं वर्त्तंत इतरेऽखिलाः ॥ २४ ॥
वयं चेत् पालयिष्यामो नियमान् सकलांस्तदा । स्वामी भक्तप्रियोऽस्माकमतिप्रीतो भविष्यति ॥
नियमो यदि कश्चित्स्याच्छिथिलस्तर्हि नः प्रभुः । अप्रीतो भवितेत्येवं भीतास्ते पालयंति तान् ॥
अतिप्रीत्यैव मय्येते यथा मद्रुचिवर्त्तनाः । भवंति तत्र वैराग्यनियमस्तु न विद्यते ॥ २७ ॥
तदाल्पमस्ति केषांचित्केषांचिच्चास्ति तद् भृशम् । तथापि मत्प्रीतिवशान्निर्वहंत्यखिला अपि ॥

आपीय वाक्यामृतमित्यमुष्य जगद्गुरोराप मुनिः स तोषम् ।
तथाऽपरे त्यागिजनाः सदःस्था गृहाश्रमस्थाश्च तदीयभक्ताः ॥ २९ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ द्विपञ्चाशदधिकद्विशततमस्तरंगः ॥२५२॥२६ ॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । पौर्णमास्यां सहस्यस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गे आभयेः क्षितिपस्य सः । व्यराजतासने तौले श्रीगोपीनाथमंदिरे ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सितसर्वांबरो भक्तैर्वृतः स्वीयैः सहस्रशः । त्यागिभिर्गृहिभिश्चासौ स्वयमेवाऽवदत्ततः ॥ ३ ॥
रोचते भक्त ईदृग्मे मनस्तत्रावरुध्यते । स्वधर्माचलनिष्ठो यश्चिद्रूपात्माभिमानवान् ॥ ४ ॥
तेजोराशौ हरिर्नित्यं तिष्ठतीति वदन् दृढम् । भक्तिं यस्तस्य कुर्याच्च प्रीत्या दृढविरक्तिमान् ५॥
केवलं भगवत्प्रीत्यै निश्छद्म विदधीत यः । तपोयोगं व्रतादिं च सत्समागमलालसः ॥ ६ ॥
एतद्विपर्ययाचारे कस्मिंश्चिदपि पूरुषे । रुचिर्नास्त्येव मे नूनं वेदशास्त्ररतेऽपि वै ॥ ७ ॥
अन्यच्च वच्मि युष्मभ्यं लग्नं यत्रास्ति मे मनः । सदैव सानुसंधानं शृणुतार्थांस्तु पंच तान् ॥
क्रियासु क्रियमाणासु सर्वास्वपि च सर्वदा । देहस्थितिः क्षणमपि भवितेति न वेद्म्यहम् ॥९॥
गतो देहागतोऽद्यैवेत्येवं जानामि तत्त्वतः । वैराग्यरूप इत्येको भवत्यर्थो मनोगतः ॥ १० ॥
वपुषा क्षणिकेनापि कर्मैतावत्तु शोभनम् । संसाधितमथैतावत्साध्यमस्ति स्वशक्तितः ॥११॥
इत्येवास्त्यनुसंधानं सर्वदा मम मानसे । द्वितीयोऽर्थोऽयमुदितस्तृतीयं च निबोधत ॥ १२ ॥
वासना इंद्रियार्थानां पंचानामपि सर्वथा । नष्टा भवंति ताः किं वा शिष्टा इत्यनुसंदधे ॥१३॥
यदि शिष्टास्तदोन्मूल्याः शीघ्रमेवातियत्नतः । नष्टानां च न विश्वासः क्वापि तत्पुनरुत्थितेः ॥
तृतीयोऽर्थोऽयमुदितश्चतुर्थस्तु निरंतरम् । महतामपि भक्तानां सम्यग्घार्दावलोकनम् ॥ १५ ॥
एतावत्यः किलैतेषां नष्टा विषयवासनाः । एतावत्योऽवशिष्टाश्चेत्यनुसंधानमस्ति मे ॥ १६ ॥
पंचमोऽर्थस्तु मनस औदासीन्यापनोदनम् । विचारेणैव महता परोपकृतयेऽस्ति वै ॥ १७ ॥
औदासीन्ये जायमाने न जाने क्वापि निर्गमः । भवेत्स्वस्याऽथ तेन स्यादन्येषां खिन्नता भृशम् ॥
अत्र स्थितौ तु मे सर्वे त्यागिनो गृहिणोऽपि च । सहर्षं भगवद्भक्तिं कुर्युरित्यनुसंदधे ॥१९ ॥
सोत्साहं भगवद्भक्तिं कुर्वंतः सकलानिमान् । भक्तान्समीक्षमाणस्य मनो मे प्रीयतेतराम् ॥२०॥
स्वभक्तजनशिक्षार्थमित्थं स निजवर्त्तनम् । तानुवाच स्वयं स्वस्ति साक्षान्नारायणप्रभुः ॥२१॥

आपीय तस्येति वचोऽमृतं ते भक्तप्रियस्याखिलसाधुभक्ताः ।
गृहस्थभक्ताश्च सभोपविष्टा महांतमापुर्मनसि प्रहर्षम् ॥ २२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ त्रिपञ्चाशदधिकद्विशततमस्तरंगः ॥२५३ ॥३०॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । चतुर्थ्यां तपसः शुक्ले वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स वेश्मनः । वितर्दौ प्रत्यगास्यस्य न्यषीदन्मंचकासने ॥ २ ॥
सितवासाः साधुभिश्च गृहिभिः परितो वृतः । सद्भिः सवाद्यगीतानि कृष्णपद्यानि सोऽशृणोत्
हरिर्हारिरित्यष्टिर्मे इति पद्यं स साधुभिः । गीतं निशम्य संहृष्टो गातुमाजिज्ञपत् पुनः ॥ ४ ॥
यमुनायाः स्थितस्तीर इति पद्यं तदाज्ञया । जगुस्तदांतर्दृष्टिः सन्स तच्छ्रुत्वाऽब्रवीत्ततः ॥५॥
तेजोराशिर्भवत्येकः कोटींद्वर्काग्निसप्रभः । यमाहुरक्षरं ब्रह्मानंतं कृष्णस्य धाम च ॥ ६ ॥
अस्ति तत्र स्वयं साक्षाद्भगवान् पुरुषोत्तमः । अवतारा भवंत्यत्र तस्मादेवाखिला अपि ॥ ७ ॥
क्षराक्षरपरः सोऽस्ति सर्वकारणकारणम् । अक्षरात्मकमुक्तौघसंसेवितपदांबुजः ॥ ८ ॥
स एव भगवान् साक्षाद्युष्माद्दग्विषयोऽद्य तु । वर्त्ततेऽत्यंतकारुण्यान्नृणां निःश्रेयसाय वै ॥९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अक्षरे धाम्नि या मूर्त्तिर्वर्त्तते परमात्मनः। तस्याः साक्षात्तु कृष्णस्य मूर्त्तेश्चास्ति सदृक्षता १०॥
यो भक्तो मायिकाकारे स्यादत्यंतविरागवान्। कृष्णस्वरूपलुब्धश्च सतामनुभवेद्धृदि ॥११॥
उभयोरंतरं किंचिदपि नास्त्येव सर्वथा। वर्णेन वयसा पुष्ट्या तथौन्नत्येन च ध्रुवम् ॥१२॥
अग्रतश्चक्षुषः साक्षाद्ध्यायतो भगवत्तनुम्। पुंसोऽल्पोऽपि तयोर्भेदो नैव तिष्ठति सर्वथा १३॥
ध्याताऽसौ यर्हि तामेव प्रातिलोम्येन चक्षुषः। अंतर्ध्यायेत्तदा त्वैनां पश्येत्तत्तारकासमाम् ॥
ततः स प्रातिलोम्येन यदा कंठांतरे च ताम्। पश्येत्तदा तु तामेव संवीक्षेत महीयसीम् ॥१५॥
अत्युन्नतां चातिपुष्टामीक्षेतातिभयंकराम्। ततस्तां प्रातिलोम्येन संपश्येद्धृदये यदा ॥ १६ ॥
स्वबुद्धिस्थात्मनि तदान्वीक्षेतांगुष्ठमात्रकाम्। ततस्तां प्रातिलोम्येन पश्येद्योऽक्षरधामनि १७॥
जीवात् परत्र कोव्यर्कचंद्रतेजसि तत्र तु। तां स पश्यति दृष्टग्रे पूर्वं दृष्टा यथा तथा ॥१८॥
अतो योऽस्त्यक्षरे धाम्नि गुणातीते हरिः स्वयम्। स एवास्त्यत्र प्रत्यक्षो नास्त्यल्पापि तयोर्भिदा
मनुष्याकृतिरप्येष कृष्णो भवति निर्गुणः। अक्षरस्थ इवेत्येव विज्ञेयः सूक्ष्मदर्शिभिः ॥ २० ॥
तन्मूर्त्तिभेदः पूर्वं यो ध्यानिना वीक्षितः स तु। तत्तद्गुणात्मकस्थानैरेव न त्वस्ति वास्तवः ॥
एवं भगवता तेन स्वस्वरूपनिरूपणम्। कृतं स्वभक्तबोधाय कृपयैव परोक्षवत् ॥ २२ ॥

इतीशितुस्तस्य वचोऽमृतं ते निपीय संतो निखिलाः प्रमोदम्।
भक्ता गृहस्थाश्च सभोपविष्टाः संप्राप्य भक्त्यैव ववंदिरे तम् ॥ २३ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ चतुष्पञ्चाशदधिकद्विशततमस्तरंगः ॥२५४॥२३॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते। तपसः शुक्लपंचम्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः। वितर्दौ प्रत्यगास्यस्य व्यराजत महासने ॥ २ ॥
वसंति कानि वासांसि परिधाय वृतो निजैः। वासंतकृष्णपद्यानि सद्भिर्गीतानि सोऽशृणोत् ॥
अथाह मुक्तानंदादीन्साधून्साधुप्रियः प्रभुः। विषया विनिवर्त्तंत इति पद्यार्थ उच्यताम् ॥४॥
ते रामानुजभाष्येण तदर्थमवदंस्ततः। तं श्रुत्वा सोऽब्रवीदित्थं मयाऽस्यार्थस्तु निश्चितः ॥ ५ ॥
आहारः सति तारुण्ये ह्रसनीयः शनैः शनैः। युक्तः स च विधातव्य इंद्रियाणि जिगीषुणा ॥
बलं न क्षीयते दैह्यं विना त्वाहारलाघवम्। बलक्षयं विना नैव स्यादिंद्रियजयोऽपि वै ॥७॥
युक्ताहारविहारः सन् भक्तिं नवविधां हरेः। यः कुर्यात्तस्य भक्तत्वं निर्विघ्नं परिपूर्यते ॥ ८ ॥
समाधिनिष्ठोऽपि पुमानिंद्रियाणां जयं विना। तद्वशः सन् भवेद् भ्रष्टः किमु तद्यल्पसाधनः ॥
उपवासैर्न बहुभिराहारस्य यमो भवेत्। यत्स तैर्वृद्धिमेवैति तृष्णाया अतिवृद्धितः ॥ १० ॥
अतः शनैः शनैरेव युक्त्या धीरः पुमांस्तु तम्। नियच्छंश्च भजेत् कृष्णं ततः सिद्धिमवाप्नुयात्
इत्युक्त्वा स सतः स्वामी क्षणांते पुनराह तान्। भक्तिं कृष्णस्य कुर्वद्भिर्माहात्म्यं तस्य बुध्यते ॥
तद्वेदनमपि द्वेधा भवतीति निरूप्यते। सतां तदन्यदसतां त्वन्यदेवेति भेदतः ॥ १३ ॥
सदा कृष्णोऽस्ति साकारो बृहद्धाम्न्यतितेजसि। योंऽतर्यामी च सर्वेषां सर्वकारणकारणम् ॥
अनेककोटिब्रह्मांडमहाराजश्च निर्गुणः। दिव्यानंदमयाकारः प्रत्यक्षोऽस्ति स वै हरिः ॥ १५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदन्यदखिलं दृश्यं मायिकं चास्ति दुःखदम् । ततस्तत्र रुचिं हित्वा भजनीयो ह्यसौ सदा ॥
कालो माया शिवो ब्रह्मा सूर्यचंद्रयमादयः । तन्मर्यादां सावधानाः सभयं पालयंति हि १७॥
मयाऽतो धर्ममर्यादा पाल्या तस्यैव सर्वथा । तत्प्रीतय इति ज्ञानं सतामस्तीति गम्यताम् ॥
असंतः कुधियो ये ते त्वित्थं जानंति चेतसि । महत्तमोऽस्ति वै कृष्णो भगवान् भक्तवत्सलः ॥
अधर्मोद्धारकः साक्षात्स्वयं पतितपावनः । तस्याश्रयेण जातोऽस्मि सर्वदैवाकुतोभयः ॥ २० ॥
अतो धर्मच्युतौ क्वापि जातायामपि चेतसि । तच्चिंता नैव कर्त्तव्येत्यसतामस्ति वेदनम् ॥ २१ ॥
एवं यः कृष्णमाहात्म्यमालंब्याऽसन्मतं पुमान् । पापभीरुर्भवेन्नैव सोऽतिदुष्ट इतीयताम् २२ ॥
भक्ताभासं विदित्वा तं तस्य संगः कदाचन । मुमुक्षुणा न कर्त्तव्यः कृते भ्रश्येद्धि सन्मतिः ॥
सन्मतं यस्य तु भवेत्कृष्णमाहात्म्यवेदनम् । प्रयत्नेन विधातव्यः संगस्तस्य मुमुक्षुणा ॥ २४ ॥

सुधामिवास्वाद्य हरेरुदारमित्थं वचस्ते मुनयः प्रमोदम् ।
गृहाश्रमस्थाश्च तदीयभक्ताः प्रपेदिरे तेऽप्यखिलाः सदःस्थाः ॥ २५ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ पञ्चपञ्चाशदधिकद्विशततमस्तरंगः ॥२५५॥३२॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । तपस्यशुक्लैकादश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स भूभुजः । सितांशुकधरोऽराजद्गोपीनाथस्य मंदिरे ॥ २ ॥
वृतः सद्भिश्च गृहिभिः स्वभक्तैः परितः प्रभुः । उवाच स्वाग्रगान् साधून् सर्वे शृणुत सादरम् ॥
भक्तानामिह कृष्णस्य तद्भिन्नाखिलवस्तुषु । दृढं वैराग्यमुचितं कृष्णे प्रीतिश्च भूयसी ॥ ४ ॥
स्त्रीपुत्ररसवित्तादिपदार्थाहतबुद्धिता । स्त्र्याद्यर्थं चान्यमंत्रादौ श्रद्धाया हीनतोचिता ॥ ५ ॥
ईदृशा हरिभक्तास्तु सत्संगिष्वपि दुर्लभाः । मुक्तानंदश्च गोपालानंद एतौ हि तादृशौ ॥ ६ ॥
अलौकिकं चमत्कारं दर्शयत्यपि पूरुषे । नाऽनयोर्गौरवमतिर्भवेत् क्वापि हरिं विना ॥ ७ ॥

सच्चिद्रूपे स्वात्मनि यः साक्षात्कृष्णं सदा स्थितम् ।
विद्यादिव्याकृतिं चान्याकारान् सर्वांस्तु नश्वरान् ॥ ८ ॥

दृढवैराग्यवान् यश्च कृष्णमाहात्म्यवित्तथा । भवेत्तस्य तु न क्वाऽपि भवेद् बुद्धौ भ्रमः खलु ९॥
तथापि स्त्रीरसधनप्रसंगः सर्वथैव हि । ईदृशैरपि न क्वापि कर्त्तव्यः पुरुषैरिह ॥ १० ॥
संतो महांतोऽप्येतेन भवेयुः सत्पथच्युताः । यायुश्चातिनिकृष्टत्वमत्र नास्त्येव संशयः ॥ ११ ॥
पदार्थाः स्त्र्यादयो ह्येते सुरावत्स्वोपभोगिनम् । सद्यो भ्रष्टमतिं कुर्युः पंडितं वाऽप्यपंडितम् ॥
प्रसंगो विजने स्त्रीणां सुरूपाणां भवेद्यदि । महतो वित्तराशेर्वा मुहुः स्यादुपलंभनम् ॥ १३ ॥
क्रियेत वा स्वस्य नरैर्लक्षशो माननं यदि । तदा महांतः संतोऽपि मुह्येरन्निति निश्चयः १४ ॥
एकं नारायणमृषिं विना तु धनयोषिताम् । प्रसंगेन नरः कोऽपि न भ्रष्ट इति न श्रुतः १५ ॥
तस्मान्न सर्वथा कार्यः प्रसंगो धनयोषिताम् । मुमुक्षुभिश्च मुक्तैर्वा मच्छ्रितैः स्वहितार्थिभिः ॥
स्वधर्मज्ञानवैराग्योपेता भक्तिर्दृढा हरेः । साधनायाप्रयत्नेन स्यादेकांतिकता यतः ॥ १७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकांतिकस्तु यो भक्तो वासुदेवे स निश्चितम् । प्रविश्यास्ते सेवते च लक्ष्मीवत्तं सदाऽऽदरात्
ततोऽस्य कालमायादिभयं सर्वं निवर्त्तते । अतोऽत्र विघ्नकृत्त्याज्योऽसत्प्रसंगो विवेकिभिः ॥
प्रवेशस्तु हरौ ज्ञेयः स्नेहाधिक्येन चेतसि । तस्याऽखंडानुसंधानं न तु तस्मिन्स्वलीनता २० ॥
यथाऽहिफेनप्रमुखे व्यसने सक्तचेतसः । तद्विना वर्त्तनं नैव भवेत्पुंसः कथंचन ॥ २१ ॥
तथैकांतिकभक्तस्य सांगभक्तौ रमापतेः । विषक्तचेतसः क्वापि तां विना वर्त्तनं नहि ॥ २२ ॥
कष्टामयकरं लोकगर्हितं वित्तहानिकृत् । अपि न व्यसनी क्वापि मुंचति व्यसनं यदि ॥२३ ॥
इहामुत्राऽतिसुखदं कृष्णं भूरियशस्करम् । तर्हि भक्तः कथं क्वापि मुंचेदाधारमात्मनः ॥२४॥
एवं कृष्णैकचित्तस्य भक्तस्य जीवतोऽपि वा । मृतस्य कृष्णे विज्ञेयं प्रवेशोऽस्तीति निश्चितम् ॥
चतुर्द्धा मुक्तिमप्येष भक्तो वांछेन्न कर्हिचित् । कुतस्तत्वल्पसुखदं स्वर्गं राज्यादि वा नृणाम् ॥
भक्तो भूत्वापि यो विष्णोः सुखे सज्जेत मायिके । रज्येत वा कुसंगेऽपि स भ्रष्टो भविता ध्रुवम्
देहाभिमानो नारी च दुःस्वभावो धनं रसः । एते भक्तौ महाविघ्ना ज्ञेयास्त्याज्याश्च यत्नतः
सति देहेऽभिमाने तु तत्र रोगादिसंभवे । अलाभे क्वचिदन्नादेर्वाऽऽज्ञायां तपसोऽपि वा ॥२९॥
शिथिलैव भवेद्भक्तिस्तदा तस्य च चेतसि । विचारः कोऽपि तिष्ठेन्नो ततोऽकार्यरतिर्भवेत् ३० ॥
स्त्रीद्रव्यरसयोगे तु प्रीतिस्तस्य हराविव । तेष्वपि स्यात्ततो भक्तिः शिथिलत्वं व्रजेद् ध्रुवम् ॥
दुःस्वभाववशस्यापि पुंसस्तत्खननोदितैः । सद्वचोभिर्व्रजेदेव शैथिल्यं भक्तिरीशितुः ॥ ३२ ॥
अत एतान्प्रयत्नेन विघ्नान् स्वश्रेयसे सुधीः । वैराग्याभ्यासयोगेन सत्प्रसंगं चरंस्त्यजेत् ३३ ॥

निशम्य ते संसदि धर्मसूनोस्तस्येति पीयूषसमानवाचम् ।
अंत्याश्रमस्थाश्च गृहाश्रमस्थाः सर्वेऽपि भक्ता हृदि मोदमापुः ॥ ३४ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ षट्पञ्चाशदधिकद्विशततमस्तरंगः ।। २५६ ॥३३॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । मधोः शुक्लतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामी श्रीगोपीनाथमंदिरे । व्यराजताऽऽसने श्वेतसर्ववासावृतो निजैः ॥ २ ॥
तमपृच्छच्छुकमुनिः प्रणम्य पुरतः स्थितः । हिताय भजतां नृणां सर्वेषामपि ते पदम् ॥ ३ ॥
हृदि तिष्ठेत्सदैवैका कृष्णस्य तव वासना । तद्भिन्ना च विनष्टा स्याद्वासना मूलतोऽखिला ४ ॥
साधनद्वितयं तत्र प्रतिभाति मम प्रभो । प्रीतिदार्ढ्यं त्वयि हरौ चैकं ज्ञानं विरागयुक् ॥ ५ ॥
एतद्द्वयं यस्य सम्यङ्न वर्त्तेत स्वमानसे । निश्चयस्तु भवेत्सम्यगघरेः श्रद्धा च भूयसी ॥ ६ ॥
तस्य तत्सिद्धयेस्त्यऽन्य उपायो वा न हीश्वर । इति पृष्टः स धार्मिस्तं प्रोवाच शृणु सन्मते ॥
प्राकृतानां वासनानां हृदः सम्यग्निवृत्तये । कृष्णैकवासनायाश्च सम्यक् संसिद्धये हृदि ॥ ८ ॥
त्वदुक्तसाधनद्वंद्वमेव मुख्यतया मतम् । साधनांतरमप्यत्र वर्त्तते तद्वदामि ते ॥ ९ ॥
ब्रह्मचर्यव्रतं तेन त्वष्टधा स्त्रीविवर्जनम् । पालनीयं प्रयत्नेन भक्तेनात्मनिवेदिवत् ॥ १० ॥
मायिकार्थेषु कर्त्तव्या दोषदृष्टिश्च पंचसु । श्रद्धया च सतां सेवा भक्तिश्च नवधा हरेः ॥११ ॥
एतच्चतुष्टयं यस्य भवेच्छ्रितवतो हरिम् । ज्ञानप्रीती विनाऽप्यस्य भवेत्कृष्णैकवासना ॥ १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्याश्रुत्य स तद्वाक्यं पुनः पप्रच्छ तं मुनिः । प्रसिद्धिरस्ति सर्वत्र कामात् क्रोधोऽभिजायते ॥
यस्य यस्य पदार्थस्य स्वस्य कामो भवेद्धृदि । तस्य तस्य प्रतिहतौ भवेत् क्रोधो न संशयः ॥
कार्यकारणभावोयमस्ति स्वाभाविकः खलु । यतस्त्यागिष्वपि तथा दृश्यतेऽन्यत्र किं पुनः ॥
एवं सत्यपि कस्यापि स्वकामोपहतावपि । नैव क्रोधो भवेत्क्कापीत्येवं स्याद्वा न हि प्रभो ॥

श्रीहरिरुवाच

महांतः साधवो येऽत्र तेषां तु हृदि सर्वथा । संकल्पः शुभ एव स्याद्धर्मपोषणकारणम् १७ ॥
तत्रापि स तु केषांचिज्जायते हर्यनुज्ञया । शास्त्रदृष्ट्यैव दयया केषांचित्तु स जायते ॥ १८ ॥
ततस्तेऽत्र प्रवर्त्तंते धर्माध्वस्थापनोद्यताः । बोधयंतश्चाज्ञजीवान् ज्ञानं भागवतं परम् ॥ १९ ॥
यः कश्चिद्धर्ममर्यादामुल्लंघ्याऽधर्ममाचरेत् । तस्मै क्रुध्यंति ते तस्य शिक्षणाय हिताय च ॥
अन्यथा धर्मसेतूनां रक्षणं न भवेद् ध्रुवम् । धर्मच्युतानां च नृणां न च श्रेयो भवेत् क्वचित् ॥
तस्मात्सहस्रशो नृणां स्वाश्रितानां हिताय यः । शुभसंकल्पजः क्रोधस्तेषां नास्त्येव सोऽघकृत् ॥
जनसंगं परित्यज्य चरेयुर्ये वनांतरे । तेषां तु न भवेत् क्वापि क्रोधोऽन्येषां तु संभवेत् २३ ॥
सहस्रशो नृणां धर्मस्थापने न महत्फलम् । भवतीत्येव मत्वैव संतः क्रुध्यंति कर्हिचित् ॥२४॥
धर्मस्थापन आज्ञायाः पालनेन हरेरपि । प्रसन्नता स्यादिति ते न त्यजंति स्वकामनाम् ॥२५ ॥
स्वापेक्षया महांतो ये भवेयुः साधवो गुणैः । स्वश्रेयः स्वार्थसिद्धिश्च यदि तेभ्यो मता भवेत् ॥
तदा तु तेपु कर्त्तव्या प्रीतिरेव दृढा सदा । क्रोधस्तु सर्वथा नैव तेषु कार्यः कदाचन ॥ २७ ॥
एवंविदः स्वसंकल्पभंगेऽप्यनुदयो भवेत् । क्रोधस्येति विजानीहि सन्माहात्म्यावबोधनात् ॥
व्यावहारिकतुच्छार्थहेतोः क्रुध्येत्तु यः सते । धर्मनिष्ठाय स पुमान् ज्ञेयो मूर्खश्च पापकृत् २९॥
बुद्धिमानपि कश्चित्स ते क्रुध्येच्च तन्मतिः । ज्ञेया न परमार्थैति किंतु सा व्यावहारिकी ३०॥
अतो विचार्य कर्त्तव्यः क्रोधस्त्याज्यश्च सद्धिया । हेयोपादेयता त्वस्य बुद्धयते साधुसेविभिः ॥

श्रीहरेरिति वचः सुधोपमं साधुरेष हि निशम्य चेतसि ।
मोदमाप सकलाश्च साधवो येऽपरे गृहिजनाश्च तेऽप्यलम् ॥ ३२ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ सप्तपंचाशदधिकद्विशततमस्तरंगः ॥ २५७ ॥३४॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । शुक्रे नवम्यां चैत्रस्य वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामी गोपीनाथस्य मंदिरे । भक्तसंघैः परिवृतो व्यराजत सितांबरः ॥ २ ॥
शुकानंदस्तमप्राक्षीन्नत्वा सन्मंडलस्थितः । आश्रयंते हरिं भक्त्या श्रेयसे त्वां मुमुक्षवः ॥ ३ ॥
सेवंते त्वामथ प्रीत्या त्वद्भक्तानपि चादरात् । दृढभक्ततया लोके ख्यातिं यांति च ते ततः ॥
दैहिकापदि तेषां च वैषम्ये देशकालयोः । त्वदाश्रयस्याऽचलता हृत्स्था बोध्या कथं प्रभो ५॥
आपत्काले हि बहवो भक्ताख्यास्तव संश्रयम् । त्यजंत इह दृश्यंते भ्रमंतश्चाप्यभक्तवन् ॥ ६ ॥
तस्मादापदि कष्टायामपि येषां स्थिरा स्थितिः । भवेत्तेषां तु मे स्पष्टं लक्षणं वक्तुमर्हसि ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीहरिरुवाच

कृष्णस्यैव महत्तां ये विद्युर्नान्यस्य कर्हिचित् । विद्युश्च मायिकार्थानां तुच्छतामेव सर्वथा ॥८॥
कृष्णतद्भक्तवचनैर्दुस्त्यजामपि ये स्वकाम् । हित्वैव प्रकृतिं सद्यो भवेयुस्तदनुव्रताः ॥ ९ ॥
त्यागेऽपि नैव मुह्येयुः स्वकीयप्रकृतेस्तथा । तेषामापद्यपि ज्ञेयं दार्ढ्यं कृष्णाश्रयस्य हि ॥१०॥
श्रुत्वेति तस्य वचनं पुनः पप्रच्छ तं स सन् । त्यागे स्वकीयप्रकृतेर्मोहस्तु हृदि संभवेत् ॥११॥
तारतम्यं तत्र किंचिद्वर्त्तते वा नहि प्रभो । उवाच तं हरिः साधो तारतम्यं तु विद्यते ॥१२॥
यदा स्वप्रकृतिं कृष्णस्त्याजयेद्वापि तज्जनाः । तदा स्वमेव दोषं ये विद्युस्ते तूत्तमा मताः १३॥
कृष्णस्यैवाऽगुणं ये तु तद्भक्तानां च वा हृदि । गृह्णीयुस्ते निकृष्टा वै विश्वास्याश्च न वै सताम्
कृष्णाश्रयस्थितिस्तेषां संदिग्धेत्यवगम्यताम् । अथाऽपृच्छत्पुनः साधुः स तं संशयनाशनम् ॥
प्रकृतिर्यस्य भवता त्वद्भक्तैरपि वा क्वचित् । त्याजिता स्यान्न तां ते च त्याजयेयुर्हितावहा १६॥
यादृशी तन्मतिर्भाव्या प्रकृतित्याजनक्षणे । साऽनुमेया कथं तेन तत्त्वं कथय मे प्रभो ॥१७॥

श्रीहरिरुवाच

प्रकृतेर्वशतां स्वस्य बुभुत्सुः पुरुषस्तु यः । स स्वीक्षेत स्वसंकल्पान् जायमानान्मुहुर्हृदि १८॥
कार्ष्णेतरेषामर्थानां पंचानामपि ये हृदि । संकल्पाः स्युस्तत्र तेनावधार्या बलिनस्तु ये ॥१९॥
अवधारणतस्तेषां तद्वशत्वस्य निश्चयः । सर्वथैव भवेत्तस्य विचारेण स्वचेतसि ॥ २० ॥
ईदृक्संकल्पवशगः क्रियास्तदनुसारिणीः । करोम्यहं मुहुरिति जानीयात्स्वस्थितिं सुधीः ॥२१॥
ईदृशीं प्रकृतिं स्वीयां कृष्णः संतोऽथवा यदा । त्याजयिष्यंति मां तर्हि वैक्लव्यं मे भविष्यति ॥
भक्तस्य प्रकृतिर्यस्य हरिणा वापि तज्जनैः । न त्याजिता भवेत्तेन साऽनुमेयैवमात्मनि ॥ २३ ॥
तत्त्याजनात्पूर्वमेव यद्यसौ मृत्युमाप्नुयात् । तदा तु सद्गतिं यायात्कृष्णभक्तिप्रतापतः ॥२४॥
यदि ते त्याजयेयुस्तां जीवंतं तं तदा त्वसौ । मुह्येन्नैवाऽत्र संदेहो विमुखो वा भवेत्ततः ॥२५ ॥
विमुखोऽसौ यदि क्वापि प्रकृतेर्वशतः सताम् । द्रोहं कुर्यात्तदा त्वस्य दुःखं भूरितरं भवेत् ॥
सतां हृदि हरिः साक्षाद्वर्त्तते सर्वदा स्वयम् । अतः सद्द्रोहतो द्रोहो हरेरेव भवेद् ध्रुवम् ॥
जगदात्मा च भगवानस्तीति द्रोहतोऽस्य च । सर्वस्य जगतो द्रोहो जायते नाऽत्र संशयः २८॥
अत एव हि सद्द्रोहपातकं सर्वपापतः । धर्मशास्त्रेऽधिकं प्रोक्तमनिवार्यं च निष्कृतैः ॥ २९ ॥
कंसादीनां कथं मुक्तिः साक्षात्कृष्णद्रुहामपि । जातेति चेत्तत्र हेतुं कथयामि मुने श्रृणु ॥३०॥
वैरभावेन तेषां तु सर्वदा कृष्णचिंतनम् । आसीत्ततो भगवता मुक्तिर्दत्ता दयालुना ॥ ३१ ॥
येन केनापि भावेन यः स्वस्याऽखंडचिंतनम् । करोति तस्य स श्रेयो विदधाति दयावशात् ॥
कारुण्यमीदृशं ह्येव वर्त्ततेऽस्य जगद्गुरोः । अखंडचिंतके स्वस्य यत्तु दोषानवेक्षणम् ॥३३॥
स्वापराधं सहेतेशो दयालुत्वाज्जनैः कृतम् । निजभक्तापराधं तु सहते नैव कर्हिचित् ॥ ३४ ॥
अत एव हि सद्द्रोहो मनसापि कदाचन । केनापि नैव कर्त्तव्यो विनोदेनापि धीमता ॥३५॥
वैरिणामपि यः श्रेयः करोतीशो दयावशात् । तत्समक्तिमतां कुर्यादत्र नास्त्येव संशयः ३६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति प्रथयितुं लोके निजभक्तिविवृद्धये । असुराणां हरिः श्रेयः करोतीत्याहुरागमाः ॥ ३७ ॥
सांप्रतं वैरभावेन भजेयुर्ये तु तं जनाः । विज्ञेयास्ते तु दैतेयपक्षपातिन एव हि ॥ ३८ ॥
न ह्येतत्सन्मतं क्वापि महांतो मुनयो यतः । प्राहुः प्रीत्यैव भजनं हरेः श्रेयस्करं नृणाम् ३९॥
श्रुत्वेति सद्गुरोस्तस्य वाक्यं पप्रच्छ तं पुनः । बुभुत्सुः साधुलक्ष्माणि शुकानंदः स सन्मतिः ॥
येषां द्रोहान्महत्पापं जायते देहिनां तव । तेषां सतां लक्षणानि प्राधान्येन वद प्रभो ॥४१॥
श्रीहरिर्मुनिना तेन पृष्ट इत्थं स्वचेतसि । क्षणं विचार्य कृपया तमुवाच मुने शृणु ॥ ४२ ॥
दिव्यसाकारता नित्यं हरेरस्तीति वेदनम् । मुख्यं लक्ष्म सतां ज्ञेयं तद्वंतो हि प्रिया हरेः ४३॥
क्वचिद्वेदपुराणादौ तन्निराकारता श्रुतौ । मायिकाकारहीनत्वं जानीयुर्येन चान्यथा ॥ ४४ ॥
त एव संतः संतो हि न निराकारताविदः । न स्यादुपासनादार्ढ्यं यत्तेषां शून्यवादिनाम् ४५॥
अनेककोटिब्रह्मांडसृष्टिस्थित्यादिकर्तृता । निराकृतेः कथं वाच्या तस्मात्साकार ईश्वरः ॥ ४६ ॥
एकदेशस्थितिः प्रोक्ता तस्य चोपनिषत्स्वपि । निराकृतेः कथं सापि घटेत परमात्मनः ॥ ४७ ॥
विराजतेऽक्षरे धाम्नि स हि राजाधिराजवत् । स एव च नराकारो भुवि साक्षात्समीक्ष्यते ४८॥
एवं हि भगवज्ज्ञानं सतां लक्षणमीरितम् । तथा तस्यैव भक्तिश्च नवधा परमादरात् ॥ ४९ ॥
कुर्वत्सु तां च भक्तेषु प्रीतेरतिशयस्तथा । सत्संगस्याऽपरित्यागः सर्वथा मनसापि च ॥ ५० ॥
सत्समूहनिवासे च यः कुर्याद्विघ्नमात्मनः । सद्य एव परित्यागो दुःस्वभावस्य तस्य तु ॥५१॥
स्वदुःस्वभावोत्खनने क्रियमाणे च साधुभिः । स्वस्यैव दोषग्रहणं न तु तेषां महात्मनाम् ॥
तावता वा विमुह्यैव तेषां संगस्य वर्जने । संकल्पस्याप्यनुदयो हृदये क्वचिदात्मनः ॥ ५३ ॥
यो यः पदार्थः श्रेष्ठः स्यात्तस्य तस्योपलंभने । सद्भ्यस्तदर्पणस्यैव संकल्पः स्यान्न चेतरः ॥
सद्भ्योऽर्पयित्वा तं तं च स्वस्य भूरिप्रसन्नता । सत्समूहस्थितौ स्वस्य सुज्ञेयाशयवर्त्तनम् ॥
न त्वपारतया स्थानं पुरतो महतां सताम् । स्वभावतोऽपि शान्तस्य कुसंगिष्वरुचिर्भृशम् ॥
जाते दुर्जनसंगेन हृद्युत्तापस्य संभवः । संगे भगवदीयानामेवातिस्वस्थता तथा ॥ ५७ ॥
एते गुणाः सतां ज्ञेया महतां कृष्णसेविनाम् । येषु ते स्युस्तेषु कृष्णः स्वयमेव विराजते ॥
एतेषां द्रोहतः साक्षाद्धरेर्द्रोहो भवेद् ध्रुवम् । तथैतेषां सेवनाच्च स्यात्साक्षात्कृष्णसेवनम् ५९॥

इति वाक्यसुधां निपीय साधुः स तथान्ये मुनयश्च धर्मसूनोः ।
गृहिणश्च तदाश्रिताः समस्ता मुदमापुर्हृदये सदोनिषण्णाः ॥ ६० ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धावष्टपञ्चाशदधिकद्विशततमस्तरंगः ॥२५८॥३५॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते । राधशुक्लप्रतिपदि वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामी वाहारूढो निजाश्रमात् । लक्ष्मीवाटीमुपागत्य वेद्यामास्ते स तत्र सः २ ॥
सन्निवृतश्च गृहिभिर्भूरिभिः स स्वमाश्रितैः । सितवासाः प्रसन्नास्यः पप्रच्छ स्वाग्रगान्सतः ॥
मुमुक्षोरिह जीवस्य किं तत्साधनमुत्तमम् । आत्यंतिकं भवेच्छ्रेयो येन निर्विघ्नमंजसा ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रेयोध्वनि महाविघ्नः कश्चाऽस्तीति निगद्यताम्। इति पृष्टा यथाबुद्धि त उत्तरमकुर्वत ॥ ५ ॥
सम्यक्त्वन्नेति मत्वाऽथ स्वयमेवाह तत्प्रभुः। आदौ तेन तु विज्ञेया कृष्णसाकारता दृढम् ॥
ब्रह्मज्योतिः समूहेऽस्ति सदा दिव्यतनुर्हरिः। स एव श्रेयसे नृणां त्राकृतिर्जायते भुवि ॥७॥
इति ज्ञात्वाऽऽश्रयस्तस्य दृढः कार्योतिभावतः। धर्मोपेता ततो भक्तिः प्रीत्या कार्याऽस्य सर्वदा
भक्तिमंतश्च ये संतः सेव्यास्ते परमादरात्। श्रेयःसाधनमेतद्धि मुमुक्षोः परमं मतम् ॥ ९ ॥
शुष्कवेदांतिनः संगो महान् विघ्नोऽत्र गम्यताम्। संगेऽस्य तस्मिन् प्रीतिः स्यात्तदीयगुणदर्शनात्
गुणो यत्र समीक्ष्येत तस्मिन्नाशु भवेद्रतिः। इतीक्ष्यते हि लोकेऽपि श्रृणुताऽस्य गुणं ब्रुवे ११॥
आत्मा नित्यो निर्विकारो भवत्येव निराकृतिः। नैवाऽस्य जन्ममृत्युश्च न संगः पापकर्मणाम् ॥
परमात्माऽपि नित्यादिगुणयुक्तोऽस्ति सर्वदा। तस्मिंस्त्वयि च नैवास्ति भेदो हि वास्तवः क्वचित्
एवं गुणं दर्शयित्वा कुर्यादाकारखंडनम्। हरेस्ततः स तत्संगी स्याद्भक्तिभ्रष्टतत्समः ॥ १४ ॥
अत एष महाविघ्नः श्रेयोमार्गे ततोऽस्य तु। महादुष्टस्य नो कार्यः क्वचित्संगो मुमुक्षुभिः ॥
इति प्रश्नोत्तरं स्वामी कृपया स महाप्रभुः। कृत्वा पुनरुपागच्छन्नगरं तद्वृतो निजैः ॥१६॥
तत्र प्राचीनवक्त्रस्य वेद्यामुत्तमवेश्मनः। न्यषीदन्मंचकवरे परितः स वृतः स्वकैः ॥ १७ ॥
साधून् पुरःस्थानवदप्रसन्नः स पुनः स्वयम्। मयावगाह्य शास्त्राणि सर्वाणीत्थं हि निश्चितम्
आत्मनो ब्रह्मणश्चापि साक्षाद्दर्शनमंतरा। कस्यापि शांतिर्नैव स्यान्मायिकैः सुखराशिभिः ॥१९॥
तत्तु साक्षाद्धरेरेव ध्यानोपासनमंतरा। तपोव्रतादिभिर्नैव जायते साधनांतरैः ॥ २० ॥
तद्धित्वा ये यतंतेऽत्र तत्प्राप्त्यै साधनांतरैः। ते तु स्वेष्टरसप्राप्त्यै खं लिहंत्येव जिह्वया ॥
सर्वप्रयत्नेन तत आत्मब्रह्मदिदृक्षुभिः। ध्यातव्यो त्राकृतिः कृष्णः प्रीत्येत्यस्ति मतं मम ॥२२॥
केचित्सांख्येन योगेन यतंतेऽत्र तदाप्तये। तेषां भूरिप्रयासेन कश्चिदेव तदाप्नुयात् ॥ २३ ॥
तदपि श्रीहरेरेव कृपयैव हि सिद्ध्यति। तद्भूरिकष्टं वीक्ष्यास्मकारुण्यस्यांतरात्मनः ॥ २४ ॥
साधनांतरमुज्झित्वा ततोऽयं मदुदीरितः। पक्षः श्रय्योऽतिसुकरः सर्वसाध्यः सुबुद्धिभिः ॥

सुधासमां वाचमितीश्वरस्य निशम्य ते साधुजनाः सदःस्थाः।
भक्ता द्वितीयाश्रमिणश्च सर्वे मोदं हृदि प्राप्य च तं प्रणेमुः ॥ २६ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धावूनषष्ट्यधिकद्विशततमस्तरंगः ॥२५९॥२६॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते। राधशुक्लतृतीयायां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्गं उत्तमस्य स वेश्मनः। वितर्दावुदगास्यस्य न्यषीदच्चक्रकोत्तमे ॥ २ ॥
सितांबरो वृतो भक्तैस्त्यागिभिर्गृहिभिश्च सः। नानादेशसमायातैः प्रीतः प्रोवाच तान्स्वयम् ॥
यस्य साक्षाद्भगवतो यथावन्निश्चयो हृदि। जातः स्यात्स तु न क्वापि ततोपसरति ध्रुवम् ॥
देशकालक्रियासंगवैषम्येऽपि यथा पुरा। स तिष्ठेन्नाल्पमात्रोऽपि ह्रासस्तस्य भवेत्क्वचित् ॥५ ॥
दैवात्प्राप्तस्य दारिद्र्यं राज्ञ इभ्यस्य वा यथा। कदन्नाद्यदतोप्यल्पं तिष्ठेत्प्राग्वैभवस्मृतिः ॥६ ॥
तथा भागवतं सौख्यमनुभूतवतः पुरा। दैवाद्देशांतराद्याप्तावपि तिष्ठेद्धि तत्स्मृतिः ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भजन्नेव स तत्रापि हरिमेवांतरे सदा। प्रारब्धप्रापिते भुंक्ते सुखदुःखे अविक्लवः ॥ ८ ॥
तस्मान्नराकृतेः साक्षात्कृष्णस्य ज्ञानमंजसा। मुमुक्षुणा दृढीकार्यं चलेद्यन्न विपद्यपि ॥ ९ ॥
तज्ज्ञानं यादृशं तच्च यथावत्कथयामि वः। मायिकाकारतः कृष्णाकृतिरस्ति विलक्षणा ॥१०॥
अतीव रमणीयांगा सर्वसौंदर्यसंग्रहा। दिव्या नित्याऽकालगुणा सर्वेषां च मनोहरा ॥ ११ ॥
तेजःपुंजेऽक्षरे धाम्नि नित्यं कृष्णो विराजते। तद्भक्ताश्च तदाकाराः सेवंते स्वामिनं हि तम् ॥
कृष्णः स्वामी सेवकास्ते पुरुषाः पुरुषोत्तमम्। भजंतीति विशेषोऽस्ति तत्सारूप्येऽपि सेविनाम्
कृष्णतुल्यः कृष्ण एव न त्वन्यः कोऽपि पूरुषः। पारमस्य महिम्नश्च कोऽपि याति न कुत्रचित्
अप्राकृतगुणस्यास्य कल्याणगुणवारिधेः। ध्यानेन यांति नैर्गुण्यं देहिनोऽपि गुणात्मकाः ॥१५॥
महापुमान्महामाया त्वस्याज्ञावशतो ध्रुवम्। सर्वाधीशस्य नैकांडसर्गादिं कुरुते जनाः ॥१६॥
स्वधामस्थस्त्वयं कृष्णः स्थितो ब्रह्मांडकोटिषु। अंतर्यामिस्वरूपेण जीवेश्वरव्रजेष्वपि ॥१७॥
अश्मकाष्ठादिगस्यापि वह्ने रूपं यथा पृथक्। हरेस्तेषु स्थितस्यापि त्वन्यदेव तथैव तत् ॥१८॥
जीवेश्वराणां सर्वेषां जीवनं च स एव हि। तं विना तेन वै किंचित्कर्तुं भोक्तुं तथेशते ॥१९॥
ईदृक्स्वतः सिद्धभूरिमहैश्वर्यनिधिः प्रभुः। जीवानां श्रेयसे भूमौ नृनाट्यं विदधात्ययम् ॥२०॥
इति साक्षाद्धरिं ज्ञात्वा दृढनिश्चयतोऽत्र यः। तस्यैव भक्तिं कुर्वंस्तत्सौख्यं चानुभवेद्धृदि ॥
तद्विस्मृतिर्न तस्य स्यादापत्कालेऽपि कर्हिचित्। अतो मुमुक्षुर्यत्नेन साधयेदेतदेव हि ॥ २२ ॥
सर्वैर्भवद्भिरप्येतन्मच्छ्रितैः परमादरात्। सर्वथैव दृढीकार्यं श्रेयोमूलमिदं यतः ॥ २३ ॥
आपत्काले क्वचित्प्राप्ते सत्संगान्निःसृतौ बहिः। अपि न स्वस्थितेर्भंगो भवेदस्मिन् दृढीकृते ॥
अत एव मयाप्येषा वार्त्ताऽग्रे भवतां कृता। साऽवधर्मा स्वहृदये मुमुक्षूणां हितावहा ॥२५॥

इति तस्य जगद्गुरोः सुधातुलितं साधु वचो निशम्य ते।
मुनयो गृहिणस्तदाश्रितास्तुतुपुस्तद्धृदये तथा दधुः ॥ २६ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिन्धौ षष्ट्यधिकद्विशततमस्तरंगः ॥ २६० ॥३७॥

शकाब्दे विक्रमार्कस्य भूताष्टवसुभूमिते। राधशुक्लचतुर्दश्यां वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे स्वामी स गोपीनाथमंदिरे। चक्रकासन आस्ते स वृतो भक्तैः सितांबरः ॥२॥
स मुक्तानंदप्रमुखान् निविष्टान् पुरतः सतः। आनंदयन्मधुरया वाचोवाच जगद्गुरुः ॥ ३ ॥
सम्यक् शास्त्रविचारेण मया त्वस्ति सुनिश्चितम्। मृषैवाकृतयः सर्वा मायाकार्यसमुद्भवाः ॥
अक्षरे धाम्नि कृष्णस्य तद्भक्तानां च सर्वशः। याः संत्याकृतयस्तास्तु सत्या दिव्याश्च भासुराः॥
पुरुषाकृतयः संति स च ते तत्र धामनि। सच्चिदानंदरूपाश्च दिव्यांगवस्त्रभूषणाः ॥ ६ ॥
तैः सेवितोऽसौ विविधैः प्रेम्णा दिव्योपचारकैः। परमानंददस्तेभ्यो वर्त्तते तत्र सर्वदा ॥७॥
एतादृशोऽयं कारुण्याज्जातोऽस्ति श्रेयसे नृणाम्। इह दृग्विषयः सेवां हरिर्वः स्वीकरोत्यसौ ॥
रूपेऽस्याऽस्मिन्नक्षरस्थे मूलरूपे च किंचन। भेदो न सर्वथाऽस्तीति जानीत निश्चितं हृदि ॥
सर्वेषामक्षरादीनां नियंता चेश्वरेश्वरः। असावेकांतभावेन भवद्भिः सेव्य आदरात् ॥ १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अस्यैव पूर्वमासन् येऽवताराः श्रेयसे नृणाम् । वंद्याः पूज्यास्तेऽपि संति भजनीयाश्च भावतः ॥
साक्षादिमं तत्त्वतस्तु ज्ञात्वैव सर्वकारणम् । भजतातिप्रयत्नेन हित्वा च षड्गुणान् द्रुतम् ॥
धनलोभः स्त्रीप्रसंगो देहाहंता रसैषणा । स्वीयबंधुजनप्रीतिः कुसंगिष्वनुरागिता ॥ १३ ॥
भक्तौ विघ्नकरा एते हेया दोषा धियैव षट् । कार्यः संगः सतामेव तद्वाक्यं पाल्यमंजसा ॥
हरिवाक्यं पालयेयुर्बहुमानेन येऽखिलम् । अतिक्रमे क्वचित्तस्य तप्येरंश्च भृशं शुचा ॥ १५ ॥
महत्सु तेषु तु स्वस्य जीवः सत्सु विशेषतः । सर्वथा जटितव्यश्च तेऽनुवर्त्या निरंतरम् ॥
दूरे विषयसंबंधादंजसा वृत्यमन्यथा । नियमानां स्वकीयानां भंगः स्यान्नाऽत्र संशयः ॥

इति हरेर्वचनं परमामृतं परमकारुणिकस्य निपीय ते ।
मुदमवाप्य परां विनयेन तं नुनुवुरादरतस्तदुपाश्रिताः ॥ १८ ॥

इति श्रीशतानन्दविरचिते हरिवाक्यसुधासिन्धावेकषष्टयधिकद्विशततमस्तरंगः ॥ २६१ ॥३८॥

शकाब्दे विक्रमार्कस्य रसाष्टवसुभूमिते । । शुचिकृष्णदशम्यां तु वचोऽमृतमिदं हरेः ॥ १ ॥
तत्र दुर्गपुरे दुर्ग उत्तमस्य स सद्मनः । प्रागास्यस्य बहिर्वेद्यां मंचासन उपाविशत् ॥ २ ॥
नैकैर्भक्तैः परिवृतः सद्भिर्गृहिजनैश्च सः । सितांशुकधरः प्रीत्या स्वयमेवाऽब्रवीत्ततः ॥ ३ ॥
मायामपास्य सततं प्रीतिर्भगवति स्थिरा । कार्येति सर्वशास्त्राणां सिद्धांतोऽस्ति सतां मतः ॥
माया तु देहेऽहंबुद्धिर्ममता दैहिकेष्विति । विज्ञाय सा प्रयत्नेन हातव्या साधुसेवया ॥ ५ ॥
अद्य कालांतरे वापि यदैवं यः करिष्यति । तदा सुखी स तु पुमान्भविष्यति न चान्यथा ॥६॥
हनुमन्नारदाद्यैश्च महाभागवतैरपि । इयमेवोज्झिता माया कृता प्रीतिर्दृढा हरौ ॥ ७ ॥
याचितं तैर्हरेश्चापि मायाया निजरक्षणम् । निर्माय भगवद्भक्तप्रसंगश्च निरंतरम् ॥ ८ ॥
तस्माद्युष्माभिरप्येवं याच्यं कार्यं च मच्छ्रुतैः । अस्यार्थस्य मदुक्तस्य श्रवणादि च सादरम् ॥
किंच ये भगवद्भक्तास्तैः संपाद्यं बलद्वयम् । आत्मनिष्ठा बलं चाऽथ माहात्म्यस्य बलं हरेः ॥
आत्मनिष्ठा तु विज्ञेया स्थूलादिवपुषां त्रयात् । पृथगात्मास्ति तद्द्रष्टा स एवास्मीति निश्चयः ॥
विप्रत्वादिर्न तस्यास्ति जातिः कापि च कस्यचित् । स पुत्रो न पिता नापि न बंधुर्न पतिश्च वा
स च ज्ञातास्ति चिद्रूपोऽग्न्यर्कवच्च प्रकाशकः । हृत्पद्मस्थोऽखिलं देहं प्रकाशयति तेजसा १३॥
तत्तेजोऽस्ति ज्ञानरूपमग्न्यर्कादेस्तु तज्जडम् । सूक्ष्मजंतोरपि स्पर्शं यत्तज्जानाति नेतरत् ॥१४॥
देहाननेकाञ्जग्राह विससर्ज च तानसौ । तदापि न मृतो नूनं यतो जीवन् स वर्त्तते ॥ १५ ॥
अच्छेद्योऽयमदाह्योऽयमिति यं भगवाञ्जगौ । सोऽस्ति देहस्तु नैवेति ह्यात्मनिष्ठा प्रकीर्त्यते १६॥
संपन्नस्य तया देहेऽहंता च स्वजनादिषु । ममता नश्यति क्षिप्रमीर्ष्याक्रोधादयोऽपि च ॥१७॥
अन्यथा देहमानेन साध्वाचारेष्वपि क्वचित् । आत्मदृष्टांततो दोषान् गृह्णीयादपि शास्त्रवित् ॥
सतां साहजिके यस्तु दैहिके वाचिकेऽपि वा । दोषदृक्कर्मणि पुमान् सोऽज्ञो यात्यापदं भृशम्
अतो मुमुक्षुणा पुंसा सैव साध्या प्रयत्नतः । ज्ञेयं हरेश्च माहात्म्यं तच्च संक्षेपतो ब्रुवे ॥२०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ब्रह्मांडमेतत् पञ्चाशत्कोटियोजनविस्तृतम् । अंतर्भवति लोकैश्च चतुर्दशभिरन्वितम् ॥२१॥

साब्धिद्वीपनगं देवदैत्यमर्त्यादिसंभृतम् । अधिष्ठितं च ब्रह्माद्यैरीशैरद्भुतदर्शनम् ॥ २२ ॥

एकैकस्माद्दशगुणैस्तच्च पृथ्वीजलादिभिः । वृतमावरणैरस्ति त्वष्टभिः परितः स्थितैः ॥ २३ ॥

एतादृशान्यसंख्यानि ब्रह्मांडानि भवंति हि । तेषां राजाधिराजोऽस्ति कृष्ण एकः स्वयं प्रभुः ॥

संख्येयग्रामनाथस्य सम्राजोऽपि क्षितौ महत् । माहात्म्यमस्ति तर्ह्यस्य कस्तद्वर्णयितुं क्षमः ॥

तस्याग्रतस्त्विमे जीवा अर्काग्रे विस्फुलिंगवत् । अतितुच्छा भवंत्येव सर्वे ब्रह्मांडवर्त्तिनः ॥२६॥

सुखं वैषयिकं तेन दत्तं ते भुंजतेऽल्पकम् । सारस्वादुभुजात्यक्तमुच्छिष्टं भषको यथा ॥२७॥

तस्यापि हेतोरायासस्तेषां भूयानिहेक्ष्यते । स्वजनैः सह वैरं च हिंसा स्वस्येतरस्य वा ॥२८॥

तदपीदृग्यदा प्रेष्ठमीक्ष्यते चातिदुर्ल्लभम् । तदा भागवतं सौख्यं किं वर्ण्यं च तदौकसम् ॥

सदानंदनिधित्वाच्च सहजं सुखमच्युते । अलौकिकमनंतं च वर्त्तते नित्यमक्षयम् ॥ ३० ॥

तस्येशलंभिता छाया सुषुप्तिसुखमुच्यते । रोगाद्यार्त्तोऽपि लभते निर्वृतिं यत्र भूयसीम् ॥३१॥

ईदृक्सुखनिधिः स्वामिनारायण इतीरितः । रामकृष्णादिरूपाणां हेतुः सर्वेश्वरेश्वरः ॥३२ ॥

अवतार्यं क्षराधीशोऽक्षरमुक्तेडितश्रवाः । परात्परतरो यश्च सर्वोपर्य्येव यः सदा ॥ ३३ ॥

साधून्वः सुखयंस्तत्र वाक्सुधाभिरहर्निशम् । सोऽनन्यभक्तानन्यांश्च जयति स्वेप्सितप्रदः ॥३४॥

तस्य पादरजोमूर्ध्ना राधालक्ष्म्यादिशक्तिभिः । ईशैर्ब्रह्मादिभिः प्रीत्या योगेशैश्चोह्यतेऽखिलैः ॥

ते च मानं विहायैव भक्तिं तस्यैव नित्यदा । कुर्वते स च सर्वेषां स्वातंत्र्येण नियामकः ३६॥

तत्रैव भगवच्छब्दो मुख्योऽस्ति ब्रह्मशब्दवत् । स एक एव सन्नीशस्तत्समोऽन्यो न नाधिकः ॥

तदुपासनया भक्तास्तत्साधर्म्यं व्रजंति हि । न तु ते भगवंतस्तु स्युर्नियंत्रनवस्थितेः ॥ ३८ ॥

प्रतीशमिच्छावैजात्यादुत्पत्त्यादेश्च सर्वथा । मर्यादा जगतां नश्येत्स्याच्च धर्मविपर्ययः ॥ ३९ ॥

न तु तौ भवतस्तस्माद्भगवानेक एव हि । ज्ञेयः स्वतंत्रो मर्यादापाता सर्वनियामकः ॥ ४० ॥

कालो माया च यमराडंतकाद्याश्च सर्वदा । ततो भीतास्तदाज्ञायां वर्त्तंते किंकरा इव ॥ ४१ ॥

उत्पत्तिस्थितिसंहारान् ब्रह्मांडानां निजेच्छया । करोत्यचिंत्यविभवो भगवानद्भुतक्रियः ४२ ॥

सृष्टौ तस्य च चातुर्यं विविधं दृश्यतेऽद्भुतम् । मयूराश्चित्रिता हंसाः श्वेताश्च हरितः शुकाः ॥

नृभ्यो नराः पशुभ्यश्च पशवो द्रुमतो द्रुमाः । पक्षिभ्यः पक्षिणः कीटाः कीटेभ्यश्चोद्भवंति हि ॥

इत्याद्याश्चर्यलीलस्य कृतं तस्य जगत्पतेः । नान्यथा शक्यते कर्तुं केनापि क्वापि किंचन ४५ ॥

अंगाच्च्युतं पुनस्तत्र योक्तुं रोमापि तत्कृतम् । सम्राडपि क्षमो नास्ति तदा कोऽन्यस्तु शक्नुयात्

इत्यादि तस्य माहात्म्यमनन्यस्थं मुमुक्षुभिः । ज्ञात्वा कार्या रतिस्तस्मिन् विरक्तिरितरत्र च ॥

सहात्मनिष्ठया यस्य माहात्म्यज्ञानमीशितुः । स तु वैषयिके क्वापि सुखेनैव हि बध्यते ॥४८॥

बद्धोऽपि मुच्यते ताभ्यां मुक्तस्तत्र न सज्जते । अतस्तयोः स्वमनसि वर्त्तनीयो रयो दृढम् ४९॥

तस्य स्फुटाववोधार्थं दृष्टांतः कथ्यते मया । तेनानुमेयं तस्यापि सादृश्येनैव लक्षणम् ॥ ५० ॥

शूरस्य मानिनः पुंसो यथा कश्चिद्रिपुर्बलात् । समक्षं पितरं हन्यात्तेन तप्येत सोऽधिकम् ॥

पुनः स एव च रिपुर्हन्यात्तस्यैव पुत्रकम् । भार्यां वृत्तिं चापहरेत्कुर्याच्चोपद्रवान्मुहुः ॥५२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तैस्तस्यांतरे तस्य चिंताशोकरयः सदा । वर्त्तेताऽत्र तथा वेगो वर्त्तनीयस्तयोरपि ॥ ५३ ॥
तद्वेगबलतः पुंसां निर्यांति विषयैषणाः । यथा देहस्थशल्पानि विशल्यौषधियोगतः ॥ ५४ ॥
विषयेच्छाशल्यहीनं निर्मलं मानसं ततः । सहेंद्रियैर्हरावेव प्रीतिं बध्नाति वै दृढाम् ॥ ५५ ॥
एष एव हि सत्संगो मुक्तिहेतुरितीर्यते । कृष्ण एव सति स्वीयमनःसंगस्तु यो दृढः ॥५६॥
वार्त्तेयं दैवजीवानामंतरे श्रुतिमात्रतः । प्रविष्टांगानि पुष्णाति परमान्नमिवाशितम् ॥ ५७ ॥
आसुराणां तु जीवानां श्रुतेरंतर्गतापि सा । बहिर्द्रुतं विनिर्याति श्वभुक्तमिव पायसम् ॥५८॥
समासतः कृतापीयं वार्त्ता सर्वार्थसंभृता । अस्तीत्यस्यां विबुद्धायां विबुद्धोऽर्थोऽखिलो नरैः ॥
सुज्ञाः सद्यो विदुरिदं रहस्यं नेतरे क्वचित् । एतद्विदां प्रसंगात्तु तेऽपि विद्युस्तथैव हि ॥६० ॥
स्वबुद्धिकल्पिता नेयं स्वप्रौढिख्यापनाय वा । केवलं शास्त्रदृष्टा या वार्त्ता न कथिता मया ६१॥
किंतु स्वकीयानुभवसिद्धैवोक्ता यथातथम् । अतोऽस्ति सप्रमाणेति धार्या मनसि मामकैः ६२॥
स्त्रीधनग्रामनगरराजार्हविषयैर्भृशम् । योगेऽपि तेष्वनासक्तिर्वर्त्तते चारुचिर्मम ॥ ६३ ॥
फलं तच्चात्मनिष्ठाया माहात्म्यावगतेर्हरेः । ते उभे अप्यतः सद्भिः साधनीये प्रयत्नतः ॥६४॥
ततो भक्तिर्भगवति निर्विघ्नैकांतिकी भवेत् । तदन्यत्र विरक्तिश्च नारदादैरिवाचला ॥ ६५ ॥

इति परमपवित्रा स्वानुभूता जनानां भवसरणविमुक्त्यै या मयाऽकारि वार्त्ता ।
इह सदसि भवद्भिः सादरं साऽवधार्या विषयविषरसेभ्यः श्रावणीया च नृभ्यः ॥ ६६ ॥

इति ते न परोक्षवत् कृतैषा निजवृत्त्याश्रितशिक्षणाय वार्त्ता ।
नरनाट्यधृता स्वयं स साक्षात्सकलात्मा पुरुषोत्तमोऽस्ति कृष्णः ॥ ६७ ॥

इति हरेरुचिरं वचनामृतं सदसि भक्तजनास्तु निपीय ते ।
हृदि मुदं परमामभिलेभिरे तदनुवर्त्तनमेव च चक्रिरे ॥ ६८ ॥

इति श्रीशतानंदविरचिते हरिवाक्यसुधासिंधौ द्विषष्ट्यधिकद्विशततमस्तरंगः ॥ २६२ ॥ ३९ ॥

अन्त्यप्रकरणं समाप्तम्

द्वे शते द्व्यधिकाषष्टिरित्येतानि हरेर्मया । वचोऽमृतानि सत्पद्यैर्ग्रथितानि विभागशः ॥ १ ॥
दुर्गपत्तनमुख्येषु तेन स्थानेषु संसदि । वचोऽमृतानि प्रोक्तानि स्वाश्रितानां हिताय वै ॥ २ ॥
संतश्च गृहिणो भक्ताः शुश्रुवुस्तानि सादरम् । श्रेयस्कराणि मर्त्यानां सच्छास्त्रैः संमतानि च ॥
तेषु भूरिषु सद्वृद्यैर्धर्मयुग्भक्तिवृद्धये । एतानि लिखितान्यासन् यथामति यथाश्रुतम् ॥ ४ ॥
मुक्तानंदश्च गोपालानंदः सर्वसदग्रणीः । नित्यानंदः शास्त्रिवरो ब्रह्मानंदो महाकविः ॥ ५ ॥
पंचमश्च शुकानंद एतैः संगत्य तत्त्वतः । संस्मृत्यैतानि लिखितान्यभवन् दुर्गपत्तने ॥ ६ ॥
श्रीहरेराज्ञयैतानि मया तत्सत्प्रसत्तये । पद्यैरानुष्टुभैः स्पष्टं ग्रथितानि यथामति ॥ ७ ॥
पारोक्ष्येणाऽत्र कथितं माहात्म्यं हरिणास्ति यत् । कृष्णस्य च सतां तत्तु ज्ञेयं तस्य च तत्सताम् ।
धर्मज्ञानविरागाढ्यभक्तिशिक्षा च या कृता । सापि साक्षात्स्वभक्तानां तद्दार्ढ्यायेति गम्यताम् ॥
हरिवाक्यसुधासिंधुरयं तस्य च तत्सताम् । मुदेऽस्तु सुप्रसन्नाश्च स्वाश्रिते संतु ते मयि १० ॥
इमं ये प्रपठिष्यंति ग्रंथं श्रोष्यंति वाऽऽदरात् । कथयिष्यंति या तेभ्यः प्रसन्नो भविता हरिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्मिन् प्रसन्ने किमपि दुर्लभं नास्ति देहिनाम् । सर्वे मनोरथास्तूर्णं सफलाः स्युर्न संशयः ॥
भक्तिरेकांतिकी सिध्येदेतदर्थावधारणात् । नश्यंति सकला हृत्स्था मुमुक्षूणां च संशयाः १३ ॥

ग्रन्थोऽयं सकलार्थसाधनकरो दुस्तर्कमूलापहृद्
भक्तिज्ञानविरागधर्मभगवन्माहात्म्यरत्नाकरः ।
अत्र श्रीहरिणात्मनो ह्यनुभवः सच्छास्त्रसंमानितः
प्रोक्तोऽस्तीति भजन्निमं प्रतिदिनं स्यात्पूर्णकामो नरः ॥ १४ ॥

स्थानसंख्यासंग्रहोऽथ सर्वेषां तु निरूप्यते । वचोऽमृतानामुक्तानां हरिणा स्पष्टबुद्धये ॥ १५ ॥
अष्टसप्ततिरादौ तु विद्यंते दुर्गपत्तने । वाक्यामृतानि सारंगपुरेऽष्टादश वै ततः ॥ १६ ॥
कार्यायने द्वादशाऽथ लौहग्रामे दशाष्ट च । पंचालाख्ये ततो ग्रामे विद्यंते सप्त तानि च १७ ॥
पुनर्दुर्गपुरे सप्तषष्टिर्वृत्तालये ततः । विंशतिश्च श्रीनगरे तानि त्रीणि भवंति च ॥ १८ ॥
एकोनचत्वारिंशच्च पुनर्दुर्गपुरे ततः । एवं हि द्वे शते षष्टिद्व्यधिका तानि सर्वशः ॥ १९ ॥

निजवाक्यसुधाभिराश्रितानखिलांस्त्यागिजनांश्च गेहिनः ।
य इहाऽसुखयद्दयानिधिः सहजानंदमहं नमामि तम् ॥ २० ॥

योऽक्षरे परतरे विराजते स्वीयधाम्नि निजमुक्तसेवितः ।
एष भक्तिवृषनंदनः स मे श्रीहरिर्वसतु मानसे सदा ॥ २१ ॥

इति श्रीसहजानंदस्वामिशिष्यशतानंदविरचितः
श्रीहरिवाक्यसुधासिन्धुः सम्पूर्णः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीस्वामिनारायणाय नमो नमः

सेतुमालाख्यव्याख्याया अन्तिमश्लोकाः

हरिवाक्यसुधासिंधुः सर्वग्रंथशिरोमणिः। विराजतेऽयं सकलसच्छास्त्रोपरि सर्वथा ॥ १ ॥
सच्छास्त्राणां यथा वेदः प्रमाणमधिकं तथा। ग्रंथोऽयं सर्वथैवास्ति हरेरास्योद्भवत्वतः ॥ २ ॥
कथ्यते श्लोकसंख्यास्य यथाग्रथितवृत्ततः। अनुष्टुप्संख्यया चेति द्विधा सम्यक् पृथक् पृथक् ।
तत्रादौ दुर्गनगरतरंगाणां भवंति हि। सहस्रे द्वे अशीतिश्च श्लोकाः पंच तथोत्तमाः ॥ ४ ॥
ततः सारंगनगरतरंगाणां शतानि च। श्लोकाः संत्येकपंचाशन्मनोज्ञा हरिसेविनाम् ॥ ५ ॥
कार्यायनतरंगाणां श्लोकास्त्रीणि शतानि च। तथैव पंचपंचाशत्संति श्रोतृमनोरमाः ॥ ६ ॥
लोहग्रामतरंगाणां श्लोका अष्टशतानि च। अष्टत्रिंशत्तथा संति श्रोतृभक्तमनःप्रियाः ॥ ७ ॥
पंचालस्य तरंगाणां श्लोकास्त्रीणि शतानि च। रमणीया भवंत्येव तथा सप्तदशात्र तु ॥ ८ ॥
पुनर्दुर्गपुरस्यात्र तरंगाणां सहस्रकम्। एकं शतान्यष्ट संति श्लोकास्त्रिंशच्च पंच च ॥ ९ ॥
वृत्तालयतरंगाणां श्लोकाः पंचशतानि च। विंशतिर्द्वौ तथा संति हरिभक्तमनःप्रियाः ॥ १० ॥
तथा श्रीनगरस्यात्र तरंगाणां भवंति च। भक्ताह्लादकराः श्लोका अशीतिः सप्त वै तथा ॥११॥
पुनश्च दुर्गनगरतरंगाणां सहस्रकम्। एकं शतानि त्रीण्येव त्रयः श्लोका भवंति च ॥ १२ ॥
समग्रसंख्यया श्लोका यथा ग्रथितवृत्ततः। सप्तोनाष्टसहस्राणि संति भक्तप्रियाः सदा ॥१३॥
वाक्यानि श्रीहरिरुवाचेत्यत्र सप्ततिस्तथा ॐ द्वे च संत्यानंददानि दृष्टैव हरिसेविनाम् ॥ १४ ॥
अनुष्टुप्संख्यया श्लोकाः सहस्राण्यष्ट संति च। एकं शतं तथा सार्द्धत्रिंशद्रम्या अमुष्महि ॥
हेतुः सर्वावताराणामवतारी स्वयं प्रभुः। पिता श्रीसहजानंदः सर्वोपरि विराजते ॥ १६ ॥
यं साम्येन वदंति येऽक्षरपरं सर्वावतारैर्जना मंदास्तेत्ववतारिणोऽस्य न परं जानंति तत्त्वं प्रभो
यस्याज्ञां निवहंति मंगलकरां सर्वेऽक्षराद्याः सदा वंदे तं पुरुषोत्तमं च सहजानंदं सदानंददम्
यः स्वीये परमेऽक्षरे परतरे धाम्नि प्रभू राजते मुक्तैरक्षररूपिभिश्च बहुधा संसेवितोऽभिष्टुतः
रूपैश्वर्यगुणादिभिः सुखकरैरुत्कृष्ट एवाक्षरात्सर्वेभ्यश्च तमानमामि पितरं श्रीभक्तिधर्मात्मजम् ॥

ॐ अधोलिखितेषु तरंगेषु निर्दिष्टश्लोकसंख्याभ्यः पूर्वं "श्रीहरिरुवाच" इति पदं विज्ञेयम्। ततस्तु ग्रन्थ एव श्रीहरिरुवाचेति पदानि दत्तानि।

तरंगे	३३,	६१,	७३,	७८,	७९,	९७,	१००,	१०३,	१०५,	१०७
श्लोकात्	६,	११,	४,	(६,१०,२२,३०,४३,७०,७९)	१५,	१३,	५,	२८,	११,	६,
तरंगे	१०९,	१११,	११५,	११६,	११८,	११९,	१२०,	१२१,	१२३,	१२४, १२५
श्लोकात्	(२३,३९,६७)	५,	५,	५,	(२२, ७९)	६,	३२,	७,	११,	१३, २७,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi